दर्शनंगच्छतिउच्छ्वासस्यवायोर्निग्रहात् ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गारामांविसपतंतराम श्रीएमः श्रीः

सजीव

अपनेनलयस्थानं ८ निगृहीतः पवनः हृद्यंजलमम्मास्यं ९ अमूर्त्तयः अदृश्याः अतस्तेषामप्यभावावधारणंतु शक्यंकिंपुनस्तत्संस्थेतिभावः १० नचमलवत्तत्त्वमपिनि
श्चेतुमशक्यंनित्यसवत्कनोलक्षणाद्यभावादितिशंकतेयदीति शरीरिषुशरीरकारयितॄणामवस्थसंघातेषु ११ पंचेति पंचभूतात्मकेपंचविषयरतौपंचविज्ञानानिज्ञा

तस्मिन्नष्टेशरीराग्नौततोदेहमचेतनं पतितंयातिभूमित्वमयनंतस्यहिक्षितिः ८ जंगमानांहिसर्वेषांस्थावराणांतथैवच
आकाशंपवनोभ्येतिज्योतिस्तमनुगच्छति तेषांत्रयाणामेकत्वात्द्वयंभूमौप्रतिष्ठितं ९ यत्रखंतत्रपवनस्तत्राग्निर्यत्रमारुतः
अमूर्त्तयस्तेविज्ञेयामूर्त्तिमंतःशरीरिणां १० भरद्वाजउवाच यद्यग्निमारुतौभूमिःखमापश्चशरीरिषु जीवःकिंलक्ष
णस्तत्रेत्येतदाचक्ष्वमेनघ ११ पंचात्मकेपंचरतौपंचविज्ञानचेतने शरीरेप्राणिनांजीवंवेत्तुमिच्छामियादृशं १२ मांसशोणि
तसंघातेमेदःस्नाय्वस्थिसंचये भिद्यमानेशरीरेतुजीवोनैवोपलभ्यते १३ यद्यजीवंशरीरंतुपंचभूतसमन्वितं शारीरेमानसेदुःखे
कस्तांवेदयतेरुजं १४ शृणोतिकथितंजीवःकर्णाभ्यांनशृणोतितत् महर्षेमनसिव्यग्रेतस्माज्जीवोनिरर्थकः १५ १५

नकारणानियंचचेतनानिज्ञानानिचयज्ञानानिस्मिन्पंचविज्ञानचेतने १२ नैवोपलभ्यतेवीहितंदुर्वत् १३ अजीवंचेतनाशून्यं अमास्याभावाच्छरीरमेवचेतनमित्यर्थः १४
मात्मदेहेंद्रियसंघातश्चेतनः यस्मिन्नसयेसतिसंघातः सन्निकृष्टेपिशब्दादीन्नगृह्णातीतिमनएवआत्मास्विसाहचतुर्भिः शृणोतीति २५ ॥ ॥

मो० ४१

उत्तरमाह नपंचेति यथा श्रोत्रादीनां शब्दादिग्राहकत्वेन ग्राह्यसजातीयगुणाश्रयत्वेन आकाशादिरूपत्वं एवं मनोपि सर्वगुणग्राहकत्वात्सर्वगुणाश्रयत्वेन पांचभौतिकं न त्वन्न
किंचित्तद्भूतेभ्योऽन्यत्वांतरं पंचसाधारणत्वात् अतः तन्न शरीरनिर्वाहकं किंतु कः आंतरात्मैव शरीरं स्थूलसूक्ष्मभेदेन द्विविधं वहते चालयति १९ यदुक्तं मनसो नव

42

सर्वं पश्यति यद्दृश्यं मनोयुक्तेन चक्षुषा मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति १६ न पश्यति न चाघ्राति न शृणोति न भाषते न च स्पर्शरसौ वेत्ति निद्रावशगतः पुनः १७ हृष्यति क्रुध्यते कोऽत्र शोचत्युद्विजते च कः इच्छति ध्यायति द्वेष्टि वाचमीरयते च कः १८ भृगुरुवाच न पंचसाधारणमत्र किंचिच्छरीरमेको वहतेंतरात्मा स वेत्ति गंधांश्च रसान् श्रुतीश्च स्पर्शं च रूपं च गुणाश्च येऽन्ये १९ पंचात्मके पंचगुणप्रदर्शी स सर्वगात्रानुगतोंतरात्मा स वेत्ति दुःखानि सुखानि चात्र तद्विप्रयोगात्तु न वेत्ति देहः २०

स्मि
धानान्न शृणोतीति तत्राह पंचात्मके इति पंचभूतात्मके शरीरे पंचगुणाः यन्न ततस्तथा मनः तस्य दृशामपि मनः खिन्नमिस न भवात् स एव मनोद्वारा सर्वगात्रानुगतः व्यतिरेकमाह तद्विप्रयोगात्तस्य पुंसो सम्बन्धाभावे देहः स बुद्धिमतस्को न वेत्ति देहादेशेन न त्वेषु सारावपि वेदनमपरिहार्यं सा ततन तस्य चक्षुषश्च मनसोप्यनुन्मीलनाद्दर्शनेपि न तस्य क एम
रणात्त्वाप्याहतिरित्यर्थः २० ॥

यदा निर्गतप्रदीपेइव देहाग्नौ शांते रूपादिकं नोपलभ्यते तदा नश्यति क्षिपते देह एव न नष्टेवेतन नष्टस्यर्थः २१ स्थूलदेहनाशमुक्त्वा सूक्ष्मस्यापि नाशमाह आप इति आपोम
पंचभूतमयं अत्रापशब्देन सूक्ष्मोभूतसंघातो गृह्यते तन्मयं सूक्ष्मात्मनाव्याप्तमित्यर्थः तस्माद्देहिनामपि आप एव मूर्तिराकृतिः तत्रान्तः आत्मा चिद्रूपः पुरुषः मा
नसः तदंतर्गते मनसि अभिव्यक्तः स एवोपाधियोगात् जीवः स एव ब्रह्मा पूर्वोक्तश्चतुर्मुखो मुख्यजीवः सार्वज्ञ्यादिमत्वात् २२ स एवात्मा प्राकृतैः त्रिगुणात्म

यदा न रूपं न स्पर्शो नोष्मभावश्च पावक तदा शांते शरीराग्नौ देहत्यागेन नश्यति २१ आपोमयमिदं सर्वमापोमूर्तिः
शरीरिणां तत्रात्मा मानसो ब्रह्मा सर्वभूतेषु लोककृत् २२ आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः तैरेव
तु विनिर्मुक्तः परमात्मेत्युदाहृतः २३ आत्मानं तं विजानीहि सर्वलोकहितात्मकं तस्मिन्यः संश्रितो देहे ह्यब्बि
न्दुरिव पुष्करे २४ क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकं तमो रजश्च सत्वं च विद्धि जीवगुणानिमान् २५

कमूलप्रकृतेर्विकारैः गुणैः इंद्रियमनोभिः संयुक्तः सन् क्षेत्रज्ञः जीव इत्युच्यते तथा च श्रुतिः आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति अयमेव परमात्मेत्याह तैरे
वेति २३ तं परमं सर्वलोकस्य हितं सर्वं तदात्मकं आसेवानंदमात्रा निभृतानि मात्रामुपजीवंतीति श्रुतेः तस्मिन्पूर्वोक्ते स्थूलसूक्ष्मरूपे २४ क्षेत्रज्ञं प्रत्यगात्मानं तम
र्थं तं परमात्मानं तदर्थं जानीहि क्षेत्रज्ञस्य लौकिकं स्वरूपमाह तम इति योयमावरणविक्षेपप्रकाशाद्यभिमानी क्षेत्रज्ञः स परमात्मैवेत्यर्थः २५ ॥ ॥

मो०
४३

43

सिद्धे १

- सचेतनं चेतनेनेन सहितं जीवगुणं जीवस्य भोगोपकरणं देहेंद्रियमनांसि तज्जीवगुणाः चेष्टंते तं च सर्वं सर्वोत्पुकं ब्रह्म सर्वं समारोपितं ततो मिसर्वं इति निर्वचनात् चेष्टयेन शतपुत्रिका मिव सूत्रधारः कीदृशं सर्वं अतः परं संसारिणो जीवा दमममंसारिणं २६ एवं नित्यस्य वस्तुतः सत्वेनानादे वैदेवदत्तो मृतो देवदत्त इत्यादिव्यवहारो देहोत्पत्ति नाशमात्र परत्या हन जीवेति दृशाहं नायं च न तं शरीर नाश एव जीवस्य मरणमित्युच्यते इत्यर्थः जीवापेतं वा चकिलेदं म्रियते न जीवो म्रियत इति च्यते २७ एवं देहेंद्रियादि बुली ६२

सचेतनं जीवगुणं वदंति सचेष्टते चेतयते च सर्वं अतः परं केचन विरोधवदंति भावन्निय योगो भुवनानि तस्य २६ न जीवनाशो स्ति हि देह भेदे मिथ्यैतदाहुर्मृत इत्यबुद्धाः जीवस्तु देहांतरितः प्रयाति दशार्द्धतानस्य शरीरभेदः २७ एवं मर्वेषु भूतेषु गूढस्त्वराति संवृतः दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया तत्त्वदर्शिभिः २८ तं पूर्वापररात्रेषु युंजानः सततं बुधः लघ्वाहारो विशुद्धात्मा पश्यत्यात्मान मात्मनि २९ चित्तस्य हि प्रसादेन हित्वा कर्म शुभाशुभं प्रसन्नात्मात्मनि स्थित्वा सुखमानंत्यमश्नुते ३० ३०

त्मसंवृतः यतो ज्ञानेनाहतः सत्वाग्र्यया सूक्ष्मया सहत्याय सूक्ष्मया बुद्ध्या अहं ब्रह्मास्मीति वाक्यकरणबुद्धि वृत्त्या दृश्यते आवरकाज्ञाननाशपूर्वकं देहादिभ्यो विविक्तः साक्षा क्रियते २८ दर्शनोपायमाह तमिति युंजानः समाधिमनुतिष्ठन् सततं दीर्घकालादरनैरंतर्येण विशुद्धचित्तः आत्मनि बुद्धौ आत्मानं प्रत्यंचं २९ प्रसादेन अत्र सुखमनंत या सुखं सुखाभिन्नं आनंदं मोक्षं ३० ॥ ॥

विद्याचा २

प्र०
४२

कि१

कुतः सृष्टमिदं विश्वमित्यादिप्रश्नस्कस्पतासर्थमाह मानस इति यः शरीरेषु नरपशुतादिषु मानसो मनस आविर्भूतो ऽग्निः अग्निरिव प्रकाशात्मा पूर्वोक्तो जीव इत्यभिधीयते लोकैः तस्मा
देव प्रजापतेः सर्वेश्वरात् एषा सर्वभूतप्रत्यक्षा सृष्टिः भूतानां प्रसूता [illegible] किं व्यवहारत इत्युच्यते नेत्याह अध्यात्मविनिनिश्चये सति । आत्मानमधिकृ
त्य प्रवृत्तो विशिष्टः ब्रह्मविद्याजन्यसाक्षात्कारेण परोक्षज्ञानादधिको ऽहं ब्रह्मास्मीति निश्चयो ऽसंदिग्धविपर्यस्तं ज्ञानं तस्मिन्सतीति तत्र विरोधवत्समं प्रायः दृष्टिसममपास्य सृष्टिर्मृषैवेत्यत्र

ब१ तम१

मानसो ऽग्निः शरीरेषु जीव इत्यभिधीयते सृष्टिः प्रजापतेरेषा भूताध्यात्मविनिश्चये ३१ इति शांतिपर्वणि मोक्षधर्मेषु भृ
गुभरद्वाजसंवादे भृगुरुवाच असृजत्ब्राह्मणानेव पूर्वं ब्रह्मा प्रजापतीन् आत्मतेजोभिनिर्वृत्तान्भास्कराग्निसमप्र
भान् १ ततः सत्यं च धर्मं च तपो ब्रह्म च शाश्वतं आचारं चैव शौचं च स्वर्गाय विदधे प्रभुः २ देवदानवगंधर्वाः दैत्यासुरमहोरगाः य
क्षराक्षसनागाश्च पिशाचा मनुजास्तथा ३ ३ ३

शौचं च २

पंजरवदभ्यासान्नात्विकेवेति निवर्तत इति भावः ३१ त्र्यो ऽध्यायः असृजत कथं सृष्टानि भूतानीत्यस्योत्तरमुक्त्वा कथं वर्णविभक्तिरित्यस्योत्तरमाह असृजदित्यादि तत्र पूर्वं चित्त
प्रसादेन ज्ञानं समभ्यनेत्युक्तं चित्तप्रसादस्य धर्मफलत्वमनेनो धर्मान्निरूपयति ब्राह्मणान्ब्रह्मनिष्ठान्प्रजापतीन्मरीच्यंगिरआदीन्आत्मतेजः सत्यसंकल्पत्वादिसामर्थ्यं तेन
निर्वृत्तान् उत्पादितान्ब्राह्मणान् १ धर्मं यज्ञादि तपः कृच्छ्रचान्द्रायणादि । शाश्वतं ब्रह्म नित्यो वेदः आचारं । स्नानादिं शौचं प्रायश्चित्तादि ३ ॥ ॥ ॥

न तामसं१

वर्णान्सात्विकंसंमसंतामीयंवेनिस्वच्छत्वादिसाम्यात्गुणहृत्वंवर्णशब्देनोच्यते ४ सितः स्वच्छः सत्वगुणः प्रकाशात्माशमदमादिस्वभावः लोहितः रजोगुणः प्रवृत्यात्माशौर्यतेजआदिस्वभावः पीतकः रजस्तमोभ्यामिश्रः कृष्यादिर्निहीनकर्मप्रवर्तकः असितः कृष्णः आवरणात्मा तमोगुणः स्वतः प्रकाशप्रवृत्तिहीनः शकटवत्परप्रेर्यः इत्यस्माक्षिपति वर्णेनेति मावर्णः सात्विकत्वादिः यदि भिद्यते तर्हि तद्विशेषः तत्र हेतुः सर्वेषामिति ६ नः अस्माकंब्राह्मणानामपि कामक्रोधादिरजस्तमः कार्यं निग्रहाय प्रभवति समर्थो भवति

नां स्य२

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ये चान्ये भूतसंघानां वर्णास्तांश्चापि निर्ममे ४ ब्राह्मणानां सितो वर्णः क्षत्रियाणां तु लोहितः वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ५ भरद्वाज उवाच चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभिद्यते सर्वेषां खलु वर्णानां दृश्यते वर्णसंकरः ६ कामः क्रोधो भयं लोभः शोकश्चिंता क्षुधा श्रमः सर्वेषां नः प्रभवति कस्माद्वर्णो विभिद्यते ७ स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितं तनुः क्षरति सर्वेषां कस्माद्वर्णो विभज्यते ८ जंगमानामसंख्येयाः स्थावराणां च जातयः तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ९ भृगुरुवाच न विशेषोस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतं १० ॥

स्रुतः सत्वादिव्यभिचारात् न तत्प्रयुक्ता जात्यादिव्यवस्थेत्यर्थः ८ जंगमानां पश्वादीनां तस्मात्तेषां समानधर्मत्वात् पशुवृक्षादिषु विषमतयेष्वपि न जातिभेद इति निश्चय इत्यर्थः ९ ब्राह्मं ब्राह्मणजातिमत् तत्र हेतुः ब्रह्मणेति वर्णितां क्षत्रियादिभावं १०

रक्ताङ्गाः रजोगुणमयाः ११ पीताः रजस्तमोमयाः १२ कृष्णाः केवलतमोमयाः १३ व्यस्ताः पृथक्कृताः द्विजाः ब्राह्मणाः तेषां चतुर्णामपि वर्णानां १४ चतुरः चत्वारः ब्राह्मी वेदमयी चतुर्णामपि वर्णानां ब्रह्मणा पूर्वं विहिता लोभदोषेण त्वज्ञानतां तमोभावं गताः शूद्राश्चानधिकारिणो वेदे जाता इत्यर्थः १५ ब्रह्मतन्त्रे वेदानुष्ठानं

कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ११ गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः स्वधर्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः १२ हिंसानृतप्रिया लुब्धाः सर्वकर्मोपजीविनः कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः १३ इत्येतैः कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः धर्मो यज्ञक्रिया तेषां नित्यं न प्रतिषिध्यते १४ इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती विहिता ब्रह्मणा पूर्वं लोभात्त्वज्ञानतां गताः १५ ब्राह्मणा ब्रह्मतन्त्रस्थास्तपस्तेषां न नश्यति ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा १६ ब्रह्म चैव परं सृष्टं ये न जानन्ति तेऽद्विजाः तेषां बहुविधास्त्वन्यास्तत्र तत्र हि जातयः १७ पिशाचा राक्षसाः प्रेताः विविधा म्लेच्छजातयः प्रनष्टज्ञानविज्ञानाः स्वच्छन्दाचारचेष्टिताः १८

तत्स्थानां तत्पराणां ततस्तेषां ब्रह्म आत्मानं धारयतां उपास्यत्वेन निश्चिन्वतां जिज्ञासतां तपआदिकं न नश्यति १६ ब्रह्म चैवेति सृष्टं सर्वकार्यपरं ब्रह्माभेदेन ये न विदुः द्विजाः हीनद्विजाः न जानन्तीति योजना तत्र तत्र योनिषु जाता जन्मानि १७ तान्येवाह पिशाचा इति १८ ॥

ब्राह्मणः ब्रह्मणि वेदे विहितः ब्राह्मणः संस्कारो येषां ते वेदोक्तसंस्कारवन्तः अपरे अर्वाचीनाः कश्यपः परैः प्राचीनैः स्मृतं ते १९ एवं घासां मीमांसकं तेमन्तामनवस्थां निषारयति
आदौ नित्यक्रियानाशहीनाः अपचयहीनाः यतो मानसीरऊरगवन्मनो मात्रजन्यानहिरऊरगोनश्यन्त्यपचीयते वाऽनन्यत्वात् धर्मतंत्रे । योगानष्ठानं तदेव परं अयनं
विलयस्थानं यस्याः सा तथा २० चतुर्दश ब्राह्मणाः इत्येतैः कर्मभिर्मिश्रिता द्विजा वर्णान्तरं गता इत्युक्तं तत्स्वरूपं विवृणोति ब्राह्मण इत्यादिना १ जातकर्मादिभिरष्टाच

प्रजा ब्राह्मणसंस्काराः स्वकर्मकृतनिश्चयाः ऋषिभिः स्वेन तपसा सृजंते चापरे परैः १९ आदिदेवसमुद्भूता ब्रह्ममूलाक्षयाव्यया
सासृष्टिर्मानसी नाम धर्मतंत्रपरायणा २० मोक्षधर्मेषु भृगुभरद्वाजसंवादे भरद्वाज उवाच ब्राह्मणः केन भवति क्षत्रियो वा द्विजो
त्तम वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर १ भृगुरुवाच जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः वेदाध्ययनसंपन्नः
षट्सु कर्मस्ववस्थितः २ शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ३ सत्यं दानमथा
द्रोह आनृशंस्यं त्रपा घृणा तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ४ ॥

त्वारिंशत्ता यस्यैते अष्टचत्वारिंशत्संस्काराः स ब्रह्मणः सायुज्यतां सरूपतां गच्छतीति स्मृतेः षट्कर्माणि संध्यास्नानं जपो होमो देवतानां च पूजनं आतिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने
इति २ विघसं ब्राह्मणादिभुक्तशेषं तदेवाश्नातीति विघसाशी ३ अथाद्रोहः स्यन्तनयो क्रोधः स्यपिपाशः आनृशंस्यं नैष्ठुर्याभावः त्रपा लज्जा घृणा कारुण्यं ४ ४ ॥

क्षत्रं हिंसा तदर्थं जातं क्षत्रजं युद्धादिकर्म दानं विप्रेभ्यः आदानं प्रजाभ्यः ५ वाणिज्यापशुरक्षादीति विशत्याशु पशुभ्यश्चेति पाठे पशुभ्य इति ल्यब्लोपे पंचमी पशून् वाणिज्या कृ
पयोगिनो लब्ध्वा विशति प्रतिष्ठां लभत इत्यर्थः ७ शूद्रे चेति एतत्सत्यादि सप्तकं द्विजे त्रैवर्णिके धर्म एव वर्णविभागे कारणं न जातिरित्यर्थः तमेव ब्राह्मणपहेतं धर्ममाह सर्वोपाये

क्षत्रजं सेवते कर्म वेदाध्ययनसंगतः दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ५ विशत्याशु पशुभ्यश्च कृष्यादानरतिः शु
चिः वेदाध्ययनसंपन्नः स वैश्य इति संज्ञितः ६ सर्वभक्ष्यरतिर्नित्यं सर्वकर्मकरोऽशुचिः त्यक्तवेदस्त्वनाचारः स वै शूद्र इति
स्मृतः ७ शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ८ सर्वोपायैस्तु लोभस्य क्रोध
स्य च विनिग्रहः एतत्पवित्रं ज्ञानानां तथा चैवात्मसंयमः ९ वार्यौ सर्वात्मना तौ हि श्रेयोघातार्थमुच्छ्रितौ नित्यं क्रोधाच्छ्रि
यं रक्षेत्तपो रक्षेच्च मत्सरात् विद्यां मानापमानाभ्यामात्मानं तु प्रमादतः ११ यस्य सर्वे समारंभा निराशीर्बंधना द्विज त्यागे यस्य
हुतं सर्वं स त्यागी स च बुद्धिमान् १२ ॥

रित्यादिना ९ तौ क्रोधलोभौ सार्द्धश्लोकः ११ आशीः इष्टकाम्या तद्रूपं बंधनं तद्वर्जिता निराशीर्बंधनाः समारंभाः सम्यगारभ्यंत इति यज्ञादयः काम्यकर्मत्यागीत्यर्थः हुतं ब्र
ह्मैव ब्राह्मणो वा दत्तं च अग्निहोत्रनित्यश्राद्धादि त्यागे फलत्यागनिमित्तं तथा चोक्तं सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः इति १२ १२ १२ १२ १२ ॥

अहिंस्रंः अहिंसाशीलः मैत्रंमित्रभावः तदेवायनंपरंप्रस्थानंतद्गतः १३ अशोकंस्थानंआत्मानंआतिष्ठेत आभिमुख्येनतिष्ठेत्आत्मध्यानपरोभवेदित्यर्थः साह्वलोकः १४ संगेषुममेदमितिसंगहेतुषुपुत्रदारादिषु १५ एवंभूतस्यानवेक्ष्यंयोगमाहइंद्रियैरिति अव्यक्तमितिसंधिः इतिअनेनप्रकारेणयत्इंद्रियैर्गृह्यतेतत्तस्यव्यक्तं तच्चविज्ञेयंसाक्षात्कर्त्तव्यं लिंगग्राह्यंलिंगंचतद्ग्राह्यंचेतिसूक्ष्मशरीरंयोगिदृश्यंचेत्यर्थः यद्वालोकदृष्ट्यानुमानगम्यमूर्त्यतः अतींद्रियंइंद्रियागोचरं १६ अविस्रंभेअविश्वासेनिमित्तेसतिगंतव्यं

अहिंस्रः सर्वभूतानांमैत्रायणगतश्चरेत परिग्रहान्परित्यज्यभवेद्बुद्ध्याजितेंद्रियः १३ अशोकंस्थानमातिष्ठेदिहचामु
त्रचाभयं तपोनित्येनदांतेनमुनिनासंयतात्मना १४ अजितंजेतुकामेनभाव्यंसंगेष्वसंगिना इंद्रियैर्गृह्यतेयद्यत्त
द्व्यक्तमितिस्थितिः अव्यक्तमितिविज्ञेयंलिंगग्राह्यमतींद्रियं १६ अविस्रंभेनगंतव्यंविस्रंभेधारयेन्मनः मनःप्रा
णेनिगृह्णीयात्प्राणंब्रह्मणिधारयेत १७ ॥

नप्राप्यं अतः विस्रंभेएवगुरुवेदवाक्येषुयाथार्थ्यनिश्चयेमनोधारयेत अविस्रंभेणेतिसमूर्द्धन्यपाठेतुपथापोषितमग्नीध्यायीनेत्यादौपोषित्ववत्एवंअग्निलेनयत्दृश्यंतद्विश्वा
सेनैवनतत्तत्रव्यक्ततत्त्वंनथास्ति इहतत्रनभवत्येवमाणामित्यर्थः एवंचसर्वाणींद्रियाणिवृत्य तत्त्वप्रद्रष्टव्यमनोमात्रेणावतिष्ठेतमनोपिप्राणेप्राणोपि धिकेनीवात्मनिसूक्ष्मे
त्वंपदार्थेधारयेत्तमपिब्रह्मणितत्पदलक्ष्येधारयेत १७ ॥ ॥ ॥ ॥ ॥

एतच्च ब्रह्मात्मनावस्थानं निर्वाणाख्यं पदं यत्तु किंचित्तच्चेयध्यानधातृविभागं योगी न चिंतयेत् न निर्वेदात् परवैराग्याद्धेवप्राप्नोतीत्याह निर्वेदादिति यदाहुर्योगभाष्यकाराः वैराग्यं प्र
ख्यापय एतस्येव हि नांतरीयकं फलं कैवल्यमिति सुखं ब्रह्मेत्यभेदे सामानाधिकरण्यं १८ संक्षेपेण योगाधिकारिणं निरूपयति शौचेनेति १९ पंचदशः सुकृतो वा ब्राह्मणधर्मः क्रम
प्र इद्धर्म इति प्रागुक्तं तत्र शुक्लकृष्णयोः स्वरूपे विविनक्ति सत्यमिति सत्यं सत्यवक्तृत्वं प्रायकं ब्रह्मवेदः तपः स्वधर्मानुष्ठाने सत्येन ब्रह्मतपोरूपेण १ अनृतं तद्विपरीतं स्व

निर्वेदादेव निर्वाणं न च किंचिद्विचिंतयेत् सुखं वै ब्राह्मणो ब्रह्म निर्वेदेनाधिगच्छति १८ शौचेन सततं युक्तः सदाचारसमन्वितः
सानुक्रोशश्च भूतेषु तद्द्विजातिषु लक्षणं १९ शांतौ मोक्षधर्मेषु भृगुभरद्वाजसंवादे भृगुरुवाच सत्यं ब्रह्म तपः सत्यं सत्यं वि
सृजते प्रजाः सत्येन धार्यते लोकः स्वर्गं सत्येन गच्छति १ अनृतं तमसो रूपं तमसा नीयते ह्यधः तमोग्रस्ता न पश्यंति प्रकाशं त
मसावृताः २ स्वर्गं प्रकाश इत्याहुर्नरकं तम एव च सत्यानृतं तदुभयं प्राप्यते जगतीचरैः ३ तत्राप्येवंविधा लोके वृत्तिः स
त्यानृते भवेत् धर्माधर्मौ प्रकाशश्च तमो दुःखं सुखं तथा ४

वैदिकं पथ्येश्चरणां प्रकाशं स्वर्गं तमः अविद्यादिरूपो विपर्ययः तेन ग्रस्ताः तमसा मूलाज्ञानेन २ स्वर्गः देवत्वं प्रकाशः सत्वप्राप्यः नरकं तिर्यक्त्वं तमोगुणोत्थं सत्यानृतं तमाव ... षर्व
तदुभयमिश्रणेन ३ सत्यानृते इति सुखदुःखे इति संबंधः ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्लोकं व्याचष्टे तत्रेति ६ भूतानां संसारिणां यत्सुखं स्वर्गपरिष्वंगादिजनितं सुखं अनित्यं च्युतः स्वार्थं नयते तेन किं तद्दुःखस्योपाधिकस्य विमोक्षार्थमेव यतेत ७ तात्किंनि
त्यं सुखं नास्त्येवेत्याशंक्य सदृष्टांतं प्रकाशतस्तिमिरदृष्टांतमाहरा त्क्षिति नश्येत च्युतं हितं भवति ८ प्रवृत्तयः दृष्टादृष्टफलाः अविधायते वेदेनत्यतः त्रिवर्गफलात्परं सु

तत्र यत्स्यात्सुखं स धर्मो योऽधर्मः स प्रकाशो यः प्रकाशस्तत्सुखमिति तत्र परस्त्वतं सोऽधर्मो योऽधर्मस्तत्तमो यत्तमस्तद्दुःखमिति
५ अत्रोच्यते शारीरैर्मानसैर्दुःखैः सुखैश्चाप्यसुखोदयैः लोकसृष्टिं प्रपश्यंतो न मुह्यंति विचक्षणाः ६ तत्र दुःखविमो
क्षार्थं प्रयतेत विचक्षणाः सुखं ह्यनित्यं भूतानामिह लोके परत्र च ७ राहुग्रस्तस्य सोमस्य यथा ज्योत्स्ना न भासते तथात
मोभिभूतानां भूतानां नश्यते सुखं ८ तत्र खलु द्विविधं सुखमुच्यते शारीरं मानसं च इह खल्वमुष्मिंश्च लोके वस्तुप्रवृत्तयः सु
खार्थमभिधीयंते न ह्यतः परं त्रिवर्गफलं विशिष्टतरमस्ति स एव काम्यो गुणविशेषो धर्मार्थगुणारंभस्तद्धेतुरस्योत्पत्तिः सुखप्र
योजनार्थ आरंभः ९ ॥ ॥ ॥ ॥

वस्त्वनित्यं सुखमेव आत्मगुणविशेषः तार्किकाभिमतः धर्मार्थौ गुणाभूतौ यस्य प्रधानभूतस्य सुखस्य तदर्थ आरंभो आरभ्यत इति व्युत्पत्त्या धर्मादिः अनुष्ठेय इति शेषः
यतस्तद्धेतुः धर्महेतुरस्य सुखस्योत्पत्तिरभिव्यक्तिः आरंभस्त्रिवर्गस्य राहुग्रस्तेंदुप्रकाशवत्सत्तोपितमसा अप्रकाशमानस्य सुखस्य अभिव्यक्तये सर्वोप्यारंभ इत्यर्थः ९

सुखार्थ आरंभश्च यत्र शंशकते यदेतदित्यादिति सुखानां परमा। स्थितिर्नित्यत्वं सुखान्न परमस्तीति यात्तन्नोपपद्यते महर्षीणां नित्यसुखस्या॑पलंभात् अनित्यसुखसतच्छत्वमाहन

हीति महर्षियोगैश्वर्यं १० नित्यस्य सुखस्यानुपलंभे हेतुमप्यसत्त्वमपर्त्तन्निराकरोति अत्रोच्यते इत्यादिना अनृतात् सत्यासत्याभ्यामनिर्वचनीयात्॥ अज्ञानात्

भरद्वाज उवाच यदेतद्भवताभिहितं सुखानां परमा। स्थितिरिति न तदुपपद्यते एषामृषीणां महति स्थितानामप्राप्य एष काम्यो

गुणविशेषो न चैनमभिलषंति च तपसि श्रूयते त्रिलोककृद्ब्रह्मा प्रभुरेकाकी तिष्ठति ब्रह्मचारी न कामसुखेष्वात्मानमवदधाति

अपि च भगवान्विश्वेश्वर उमापतिः काममभिवर्तमानमनंगत्वेन शममनयत् तस्माद्ब्रूमो न तु महात्मभिरयं प्रतिगृहीतो न त्वे

ष तावद्विशिष्टो गुणविशेष इति नैतद्भगवतः प्रत्येमि भगवता तूक्तं सुखान्न परमस्ती। ति लोकप्रवादो हि द्विविधः फलोदयः सु

कृतात्सुखमवाप्यते दुष्कृताद्दुःखमिति १० भृगुरुवाच अत्रोच्यते अनृतात्खलु तमः प्रादुर्भूतं ततस्तमोग्रस्ता अधर्ममेवानु

वर्तंते न धर्मं क्रोधलोभहिंसानृतादिभिरवच्छन्नाः न खल्वस्मिंल्लोके नामुत्र सुखमाप्नुवंति विविधव्याधिरुजोपतापैरवकीर्यंते

वधबंधनपरिक्लेशादिभिश्च क्षुत्पिपासाश्रमकृतैरुपतापैरुपतप्यंते वर्षवातात्युष्णातिशीतकृतैश्च प्रतिभयैः शारीरैर्दुःखैरुप

तप्यंते बंधुधनविनाशविप्रयोगकृतैश्च मानसैः शोकैरभिभूयंते जरामृत्युकृतैश्चान्यैरिति ११ १२ तमः अविद्या अनित्याशुचिदुःखरूपेषु दे

हादिषु नित्यत्वशुचित्वसुखत्वबुद्धिरूपो विपर्यासः ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सत्तया

अस्य विपर्यासस्याभावे नित्यं सुखं प्रकाशत इत्याह यत्त्वेतैरिति १२ एतदेव स्वर्गपदाभिधेयमित्याह न वै तत्र इत्यादिना तस्मात्स्वर्गार्थिनां प्रवृत्तिः सुखार्थैवेति युक्तमुक्तं
सत्वान्नपरमस्तीति १४ ऐहिकं सुखं तुच्छीकृत्य यथा स्वर्गार्थं सर्वे बुद्धिमन्तः प्रवर्तन्ते एवं स्वर्गमपि विस्मृत्वेन तुच्छीकृत्य बुद्धिमन्तरा मोक्षमुपायं यतेत इत्याह पृथि
वीति सर्वभूतानां जनित्री अविद्या पृथिवीवत् पृथिवी सर्वेषां क्लेशानां हेतुभूता यथा जातमपत्यं तद्विधाः अनन्तक्लेशसंततिहेतुभूता स्तत्र स्वर्गे ऽपि संति यथा च पुमान् अवि

परत्वेते शारीरमानसैर्दुःखैर्न संस्पृश्यन्ते सततं वै द्विज नचैते दोषाः स्वर्गे प्रादुर्भवन्ति तत्र खलु भवति १२ सुरभिः पवनः
स्वर्गे गन्धश्च सुरभिस्तथा क्षुत्पिपासाश्रमो नास्ति न जरा न च पापकं १३ नित्यमेव सुखं स्वर्गे सुखं दुःखमिहोभयं न
रके दुःखमेवाहुः सुखं तत्परमं पदं १४ पृथिवी सर्वभूतानां जनित्री तद्विधाः स्त्रियः पुमान्प्रजापतिस्तत्र शुक्रं तेजोम
यं विदुः १५ इत्येतल्लोकनिर्माणं ब्रह्मणा विहितं पुरा प्रजाः समनुवर्तन्ते स्वैः स्वैः कर्मभिरावृताः १६ शान्तौ मोक्षधर्मेषु
भृगुभरद्वाजसंवादे ॥ ॥

द्यावाननेकक्लेशभाजनं तथा तत्र प्रजापतिः तस्यापि सोऽपि विभेत्तस्तत्रारमत प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत् तस्य तद्रेतः [illegible]रोहस्त मधुकैटभौ तं हन्तुमुद्यतौ यत्कृतात्कृता
स्तं यभिन्नमुपनाद्यस्यादिष्टा ति स्मृतिस्तस्यापि भयाद्रक्षाद्दि प्रतियादनात् एतावांस्तु विशेषः अत्र शुक्रं जन्मान्तरबीजं वासनाजालं पुण्यपापरूपमभयं तत्त्वतश्चतेजोमयं केव
लपुण्यमयमिति एवं च निरुपाधिसुखमेव परमः पुरुषार्थो न स्वर्ग इति साधयतां मोक्षस्य निर्विषयत्वात्सुखतमत्वं १६ षोडशः ॥ ॥

साः

एवंच्चनत्तानरवत्नतमः चतुर्भत्तमित्यादियंथप्रवरोनदुःखादुद्विग्रोमोक्षंचतुलीभंमच्वानः चिन्नच्छद्वि हारामोक्षप्रायकंप्रणमेवश्रेयरति निश्चित्व नत्तद्विशेषफलानिष्ट
छनिसारौरविवेकार्थंदानस्मोमाद्दिना दानस्यदानस्यसधर्मस्येत्येकः प्रश्नः १ शांतिः उपरतिः ४ कोस्याधिकारिणः किंस्वधर्मचरणं ५ स्वधर्मोवर्णाश्रमनि

भरद्वाजउवाच दानस्य किंफलं प्राहुर्धर्मस्य चरितस्य च तपसश्च [illegible] तपसस्स्वाध्यायस्य हुतस्य वा १ भृगुरुवाच हुते
न शाम्यते पापं स्वाध्यायैः शान्तिरुत्तमा दानेन भोगानित्याहुस्तपसा स्वर्गमाप्नुयात् २ दानं तु द्विविधं प्राहुः परत्रार्थमिहैव च
सद्भ्यो यद्दीयते किंचित्तत्परत्रोपतिष्ठते ३ असद्भ्यो दीयते यत्तु तद्दानमिह भुज्यते यादृशं दीयते दानं तादृशं फलमश्नुते ४ भर
द्वाजउवाच किंकस्य धर्मचरणं किं वा धर्मस्य लक्षणं धर्मः कतिविधो वापि तद्भवान्वक्तुमर्हति ५ भृगुरुवाच स्वधर्माचर
णे युक्ता ये भवंति मनीषिणः तेषां स्वर्गफलावाप्तिर्योन्यथा स विमुह्यति ६ भरद्वाजउवाच यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहि
तं पुरा तेषां स्वे स्वे समाचारास्तान्मे वक्तुमिहार्हसि ७ ॥

यत्तधर्मः तस्याचरणे युक्ताः व्यवस्थिताः योन्यथा विपरीताचारः स मुह्यते ६ सोविनमेवधर्मेष्वष्ठतिय दिग्विवतणीमाश्रमाणां धर्मः चातुराश्रम्यं तेषामाश्रमाणां ७

तंद्राहीनिद्रा आलस्यमनुयोगः अभ्यासो ऽक्षरस्य हरांश्रवणांतरस्थविचारः ॥ मानसंमनः सिद्धांते सम्यसंकल्पादिसिद्धिंशाप्नोति ९ ९ ९ ९ ९

नि२ मा२

भृगुरुवाच एवमेव भगवता ब्रह्मणा लोकहितमनुतिष्ठता धर्मसंरक्षणार्थमाश्रमाश्चत्वारोभिनिर्दिष्टाः तत्र गुरुकुलवासमेव प्रथममाश्रममुदाहरंति सम्यगत्र शौचसंस्कारनियमव्रतविनीतो उभेसंध्ये भास्कराग्निदैवतान्युपस्थाय विहाय तंद्रालस्ये गुरोरभिवादनवेदाभ्यासश्रवणपवित्रीकृतांतरात्मा त्रिषवणमुपस्पृश्य ब्रह्मचर्याग्निपरिचरणगुरुशुश्रूषानित्यभिक्षाभैक्ष्यादिसर्वनिवेदितांतरात्मा गुरुवचननिर्देशानुष्ठानाप्रतिकूलो गुरुप्रसादलब्धस्वाध्यायतत्परः स्यात् ॥ भवति चात्र श्लोकः गुरुं यस्तु समाराध्य द्विजो वेदमवाप्नुयात् तस्य स्वर्गफलावाप्तिः सिध्यते चास्य मानसमिति ९ ॥ ॥

सम्यगुदितश्चाचारः समुदाचारस्तस्य लक्षणं समावृत्तानां समापितगुरुकुलवासानां स्नातकानां सहधर्मचर्यमिहामौ चरताधर्ममिति इयंत्योः सहाधिकारिकं धर्मं तच्चर्याफलं च जन्मप्रकर्षः प्रथाउखलसंवाक्कापराणामसवैव्राह्मणोज्ञाताः पुलावादिदेवताउपदिशतेतोराज्ञा सर्वेलिकुल्पादहिंसाप्रहानहेतुः निर्मितेपाजनमध्याय

गार्हस्थ्यंखलुद्वितीयमाश्रमंवदंतितत्रसमस्तसदाचारलक्षणंसर्वमनुव्याख्यास्यामः समावृत्तानांसदाचाराणांसहधर्मचर्यफला
र्थिनांगृहाश्रमोविधीयते धर्मार्थकामावाप्तिस्तत्रत्रिवर्गसाधनमपेक्ष्यागर्हितेनकर्मणाधनान्यादायस्वाध्यायोपफल
प्रकर्षेणवाब्रह्मर्षिनिर्मितेनवाअहिंसारतेनवाह हलकर्मनियमाभ्यासदैवतप्रसादोपलब्धेनवाधनेनगृहस्थोगा
र्हस्थ्यंवर्त्तयेत् तद्धिसर्वाश्रमाणांमूलमुदाहरंतिगुरुकुलनिवासिनः परिव्राजकायेचान्येसंकल्पितव्रतनियमधर्मानु
ष्ठायिनस्तेषामप्यतएवभिक्षाबलिसंविभागाः प्रवर्त्तन्ते १० वानप्रस्थानांचद्रव्योपस्कारइतिप्रायशः खल्वेतेसाधवः सा
धुपथ्योदनाः स्वाध्यायप्रसंगिनस्तीर्थाभिगमनदेशदर्शनार्थंपृथिवींपर्यटंति तेषांप्रत्युत्थानाभिगमनस्यावाक्प्रदान
सुखशक्त्या [illegible] शयनाभ्यवहारसत्क्रियाचेति ॥ ॥ ॥

तंवृत्तिग्रहश्च अहिंसारामणिहिंस्योषधिस्वर्गीयाकाराः तेतेभ्यो
गतेनग्रासेनभिक्षांतिथिभ्यः बलिर्भूतेभ्योहोमः संविभागः पुत्रादिभ्योवि[illegible]भजनं १० द्रव्योपस्कारः धनवर्जनं द्रव्योपस्कारइतिपादेद्रव्याणांफलमूलनीवारादीनांउपस्कारः
संपादनं सुखशक्त्यासुखवत्याशक्त्या नतुदेहपीडया सत्क्रियाचकर्त्तव्येतिशेषः ॥ ॥ ॥ ॥ ॥

५८

निवापेनपितृतर्पणेन १५ अपिचात्रवासनस्त्वादिधर्मेमाल्यादिलाभः संकल्पसमकालेसिद्ध्यतीत्यर्थः १६ त्रिवर्गोधर्मार्थकामाः तैः सहितागुणानांसत्वरजस्तमसांनिर्वृ

भवतिचात्रश्लोकः अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्त्तते सदत्वादुष्कृतंतस्मैपुण्यमादायगच्छति १२ अपिचात्रयज्ञ
क्रियाभिर्देवताः प्रीयंतेनिवापेनपितरोविद्याभ्यासश्रवणधारणेनऋषयः अपत्योत्पादनेनप्रजापतिरिति १३ श्लोकौ
चात्रभवतः वत्सलाः सर्वभूतेभ्योवाच्याः श्रोत्रसुखागिरः परितापोपघातश्चपारुष्यंचात्रगर्हितं १४ अवज्ञानमहंकारो
दंभश्चैवविगर्हितः अहिंसासत्यमक्रोधः सर्वाश्रमगतंतपः १५ अपिचात्रमाल्याभरणवस्त्राभ्यंगनित्योपभोगनृत्यगीत
वादित्रश्रुतिसुखनयनाभिरामदर्शनानांप्राप्तिर्भक्ष्यभोज्यलेह्यपेयचोष्याणामभ्यवहार्याणांविविधानामुपभोगः स्वविहा
रसंतोषः कामसुखावाप्तिरिति १६ त्रिवर्गगुणनिर्वृत्तिर्यस्यनित्यंगृहाश्रमे ससुखान्यनुभूयेहशिष्टानांगतिमाप्नुयात् १७
उंछवृत्तिर्गृहस्थोयः स्वधर्मचरणेरतः त्यक्तकामसुखारंभः स्वर्गस्तस्यनदुर्लभः १८ शांतौमोक्षधर्मेषुभृगुभरद्वाजसंवादे

त्तिः कृतामुक्तिहेतोः सत्वप्रकृत्यानंतात्वातेर्जननात्मनशाधिकारतेत्यर्थः शिष्टानांनलमसोसादिवाक्येगुरुभिरनुशिष्टानां १७ उंछः कणशः आदानंतेनवृत्तिर्जीवनंयस्यसः कामसुखस्य
संस्कारंभाश्चेतिद्वंद्वः १८ समस्ताः ॥ ॥

सिकताः सूक्ष्मपाषाणपांसवः शर्कराः कर्करसहितान्नत वालुकाः लघुपुलमिश्राः सिकतासवउपस्पर्शनंस्नानं बलिः भूतावाहुतिः होमः वह्नौ बलीहोमयोः

नर

भृगुरुवाच वानप्रस्थाः खल्वपि धर्ममनुसरंतः पुण्यानितीर्थानिनदीप्रस्रवणानिसुविविक्तेष्वरण्येषुमृगमहि
षवराहशार्दूलवनगजाकीर्णेषुतपस्यंतोनुसंचरंतित्यक्तग्राम्यवस्त्राभ्यवहारोपभोगावन्यौषधिफलमूलपर्णपरिमित
विचित्रनियताहाराः स्थानासनिनोभूमिपाषाणसिकताशर्करावालुकाभस्मशायिनः काशकुशचर्मवल्कलसं
वृतांगाः केशश्मश्रुनखरोमधारिणोनियतकालोपस्पर्शनाः स्कंदितकालबलिहोमानुष्ठायिनः समित्कुश
कुसुमापहारसंमार्जनलब्धविश्रामाः शीतोष्णवर्षपवनविष्टंभविभिन्नसर्वत्वचोविविधनियमोपयोगचर्याति
ष्ठानविहितपरिशुष्कमांसशोणितत्वगस्थिभूताधृतिपराः सत्वयोगाच्छरीराण्युद्वहंते॥१॥ यस्त्वेतांनियतश्चर्यां
ब्रह्मर्षिविहितांचरेत स दहेदग्निवद्दोषानजयेल्लोकांश्चदुर्जयान॥२॥

नर

कालेऽनुष्ठायिनः विष्टंभः हेलनया सहनं नियमः पंचाग्न्यादिसाधनं उपयोगः आहारसंकोचः चर्यापर्यटनं विहितं विधानं १ २ २ २ २ २ २

परिव्राजकानांपरिवर्हणांशय्यादिभोगसामग्री ३ ३ ४ ४ ४ ४॥ ॥४

परिव्राजकानांपुनराचारः तद्यथा विमुच्यामिषधनकलत्रपरिवर्हणसंगेष्वात्मानंस्नेहपाशानवधूयपरिव्रजंति समलो
ष्टाश्मकांचनास्त्रिवर्गप्रवृत्तेष्वसक्तबुद्धयः अरिमित्रोदासीनानांतुल्यदर्शिनाः स्थावरजरा[illegible]युजांडजसंस्वेदजोद्भिज्जानां
भूतानांवाङ्मनः कर्मभि[illegible]रनभिद्रोहिणोऽनिकेताः पर्वतपुलिनवृक्षमूलदेवता[illegible]यतनान्यनुचरंतोवासार्थमुपे
युर्नगरंग्रामंवानगरेपंचरात्रिकाग्रामेचैकरात्रिकाः प्रविश्यचप्राणधारणार्थंद्विजातीनांभवनान्यसंकीर्णकर्मणामुपति
ष्ठेयुः पात्रपतितायाचितभैक्षाः कामक्रोधदर्पलोभमोहकार्पण्यदंभपरिवादाभिमानहिंसानिवृत्ताइति ३ भवंतिचात्र
श्लोकाः अभयंसर्वभूतेभ्योदत्वायः श्चरतेमुनिः नतस्यसर्वभूतेभ्योभयमुत्पद्यतेक्वचित ४ ५

कृत्वेति आत्मसमीपे समारोप्य अग्निमुद्दिश्य स्वमुखे हविर्भिर्जुहोतीति होमं कुर्यात् चिताग्निनां चयनं कृतं समुत्सृष्टैः तेषां लोकं प्राजापत्यं पदं यद्वा स्वशरीरसंस्थं अग्निहो
त्रं प्राणाग्निहोत्रं भैक्ष्योपगतैर्हविर्भिः कृत्वेति संबंधः भिक्षुर्भूत्वेत्यर्थः शारीरं शरीरस्थं अग्निं स्वप्रकाशमानं जीवं स्वमुखे स्वनिर्गमस्थाने परमात्मनि जुहोति । जीवं
ब्रह्मणि प्रविलापयति योगं करोतीत्यर्थः सः चितानामग्नीनां हुत्वा स्वमार्गं लोकं अव्यक्तमानं श्रयते च यथा निरिंधनो वह्निः स्वयोनावुपशाम्यतीति उक्तं च शकु

कृत्वाग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति विप्रस्तु भैक्ष्योपगतैर्हविर्भिश्चिताग्निनां स व्रजते हि लोका
न् ५ मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसंकल्पितबुद्धियुक्तः अनिंधनं ज्योतिरिव प्रशांतं स ब्रह्मलोकं श्रयते द्विजा
तिः ६ भरद्वाज उवाच अस्माल्लोकात्परो लोकः श्रूयते नोपलभ्यते तमहं ज्ञातुमिच्छामि तद्भवान्वक्तुमर्हति ७

नीनामिवाकाशे पदं न दृश्यत इति विधानतोऽनाशार्थं त्यये वै भाविनं मार्गं आह्वेति त्रयते चैनं स परिवेनं न चयते प्यत्र मथापीत्यत्र च पतत्रमाद्दोह दृष्टं वयते हि शृणोति ५ एतदेवाह मो
क्षमेति सततं संकल्पितमुक्तासंकल्पहीना बुद्धिर्यस्य ब्रह्मैव लोको ब्रह्मलोकस्तं ६ एवं समाधनां ब्रह्मविद्यां श्रुत्वा ब्रह्मसाक्षात्कारोपायं जिज्ञासमानः पृच्छति अस्मा
दिति परो लोकः परमात्मा ज्ञातुं साक्षात्कर्तुं ७ ॥

मो० ५२

52

उत्तरे इति अत्रेदमवधेयं किमिह श्रोतॄणां हिमवदुत्तरभाग एव परलोकत्वेन प्रतिपाद्यते उत प्रकृतिप्रसिद्धः परमात्मेति तत्र श्रोतॄणामर्थलाभः संभवति लाक्षणिकार्थस्याग्राह्यत्वात्स्व-
र्गसदृशः पुण्यकृज्जनप्राप्यो भूभाग एव आश्रमत्रयधर्मफलस्य उपसंहार्यत्वादिति प्राप्ते ब्रूमः अग्निर्धनं यो तिरिव शान्ते सब्रह्मलोकं व्रजते मन इति एतद्वाक्यसमनंतरम
स्थितयोः प्रश्नोत्तरयोः ब्रह्मविद्याधिकारत्वात्तयोस्तत्परत्वे संभवति अप्यसन्निहिताप्रकृतप्राचीनाश्रमत्रयधर्मफलोपसंहारपरत्वकल्पनं न युज्यते तेषां तत्र तत्र तत्तत्फला-
वाप्तेः सिद्धत्वाच्च समानसमितिसर्गत्तत्सम्बन्धालेभ इति सदेहे हृग्निवद्धोयानजयेज्ज्ञोकांश्च रुजेयानि निफलस्योपसंहारेणानपेक्षणात् तत्र श्रवणानर्थक्यप्रतिहतत्वाद्विप

भृगुरुवाच उत्तरे हिमवत्पार्श्वे पुण्ये सर्वगुणान्विते पुण्यः क्षेम्यश्च काम्यश्च स परो लोक उच्यते २

रीतं बलाबलमिति न्यायेन संनिधिप्रकरणाभ्यां श्रुतिरेव बाध्यते यथा आकाशस्तल्लिङ्गादित्यत्र सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति सर्वभूतोत्पत्तिलिङ्गादा-
काशश्रुतिर्भूताकाशपरापि ब्रह्मपरतया व्यवस्थाप्यते तद्वदिहापि द्रष्टव्यं न च एषानुमंत्रणमंत्रवदिति उत्कृष्टस्यास्य योग्यतया प्राचीनाश्रमत्रयधर्मफलत्वे नौत्सर्गिकसक-
ष्टश्च विहित त्वदर्पण लोचनीयमिति दिक् श्रुतिप्रक्रियाज्ञानेनापि परमात्मानं साक्षात्क्रियत इति तं साक्षात्कारोपायं ब्रूहीति प्रार्थितो भृगुराह उत्तरे इति उत्तरे आत्मोपलब्धि-
स्थानत्वात् उत्कृष्टतरे हिमवत्पार्श्वे हिमवत्तुल्यो आत्मन ॥ ॥ ॥ ॥ ॥ ॥

एम० ५२

२ न्वयो भविष्यतीति युक्तं प्रकरणानुगुण्यार्थसमर्थसमर्पकत्वसंभवात् प्रकरणयोगात् तस्मादन्यार्थत्वे सत्यार्थतया प्रतीयमानमेतत् प्रश्नोत्तरमिति २

त्रमेरुशब्देदितोनासावंशस्तस्यपार्श्वेसमीपेयेघ्राणामध्येउरणेवर्ह्नुउरणगमेसवैर्गुणैः रमणीयत्वादिभिर्युक्तेदेशेउराणः अपहतपाप्माद्यैः सत्यकामः सत्यसंकल्प
: काम्याः सर्वकामोपभोगयोग्यस्सपरोलोकः परमात्मास्तीत्युच्यते तथाहिमंत्रशास्त्रेभ्रूमध्यदेशस्यरम्यत्वादिकमुक्तं हेमरूपोम्बुवोमिध्येमेरुस्तिष्ठतिपर्वतः त
स्माभितोमहीपार्श्वेपंचाशत्कोटियोजनालवणेक्षुसुरासर्पिर्दधिक्षीरजलात्मभिः सिंधुभिः सप्तभिर्द्वीपैस्तत्संख्यैर्द्विगुणोत्तरैः मंदरः पारियात्राश्चेत्यादिना अ
तावपियएषोनंतोव्यक्तआत्मातंकथमहंविजानीयामित्युपक्रम्यसोविमुक्तेप्रतिष्ठितः सोविमुक्तः कस्मिन्प्रतिष्ठितइत्यादिनाभ्रुवोर्घ्राणस्यचयः संधिरितितेन
तस्यदेशस्यनिरुपाधिब्रह्मप्रापकाविमुक्ताख्यसोपाधिकब्रह्मस्थानत्वोक्तेः सोपाधिकत्वंब्रह्मगुणाश्चयएषआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोऽ
पिपासुस्सत्यकामः सत्यसंकल्पइतिप्रसिद्धाः तदिदमुक्तंहिमवत्पार्श्वेपरोलोकइति ॥ २ ६ ॥ ॥ ॥ ॥ ॥

तेवेति आपापकर्मत्वादिगुणचतुष्टयवंतो मानवास्तत्र गताः संतो निरुपद्रवा भवंतीति योजना तथाचश्रुतिः तं वा एतं सेतं तीर्त्वांऽधः सन्नंधो भवत्युपतापी सन्ननुपतापी
भवतीति सेतुं आत्मानं तीर्त्वा प्राप्य समाधिकाले ९ तत्र काले इति संबंधः अमृत आत्मा समाधिकाले प्रभवति ईश्वरो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीति
तस्य सत्यसंकल्पत्वश्रवणात् अत एव चानन्याधिपतिरिति सूत्राच्च सत्यसंकल्पत्वादेव विद्वान अनन्याधिपतिरस ईश्वरोऽसौ नास्ति किं तु यमेव सर्वेश्वर इति सूत्रार्थः अ
तएव स देशः हिमवत्सार्श्वीयो मोक्षावोमध्यदेशः स्वर्गसदृशः स्वर्गेन सदृशः सत्यसंकल्पादिगुणाविर्भावसाम्यात निरुपद्रवात् सम्यविरणांव्याधयो न स्पृशंतीति १० आ

तत्र त्वपापकर्माणः शुचयोऽत्यंतनिर्मलाः लोभमोहपरित्यक्ता मानवा निरुपद्रवाः ९ स स्वर्गसदृशो देशस्तत्र युक्ताः शु
भा गुणाः काले ऽमृत्युः प्रभवति स्पृशंति व्याधयो न च १० न लोभः परदारेषु स्वदारनिरतो ऽजनः नान्योन्यं वध्यते तत्र द्रव्ये
षु च न विस्मयः परो ह्यधर्मो नैवास्ति संदेहो नापि जायते २१ ॥ ॥ ॥

त्वमिथुनश्चात्मक्रीड आत्मरतिरित्यादिश्रुतेरर्थसंग्रहः इति । न लोभ इति परेषु अनात्मभूतास्वनेदाराश्चेति समासः स्वस्यात्मैव दाराः तत्र निरतः यतस्त्वजनः बाधितवा
ह्यलोकः नान्योन्यं वध्यते तत्र भेदाभावात् द्रव्येषु संकल्पमात्रोपनतेषु न विस्मयः आश्चर्यबुद्धिर्नास्ति इदं सर्वं यदयमात्मेत्यादिश्रुतिभिः सर्वस्यात्ममात्रत्वावधारणा
त् हि यतस्तत्र परो ऽनात्मभूतो ह्यधर्मः अनृतादिर्नास्ति एतेन ब्रह्मलोकं न विंदंत्यनृतेन हि प्रत्यूढा इति श्रुतेरनृतस्याज्ञानस्य तत्तिरोधायकत्वादनृताभाव एव तदाविर्भाव
संभवात् संदेहः किं देहादिरात्मा उतान्यः अन्योऽपि कर्ता वा अकर्तापि एकोऽनेको वेत्येवंरूपः संशयः न जायते तत्त्वापरोक्षीकरणात् । छिद्यंते सर्वसंशया इति श्रुतेः ११

कृतस्य अनुष्ठितस्य योगस्य कर्ममात्रस्य वा एवं सर्वेन दृश्यमित्येतेयाल्किंव प्रज्ञाः साधु कुर्वन्तीति निष्ठविधायां सर्वकर्मफलान्तर्भावश्रवणात् १२ सर्वकामैरिति सार्द्धश्लो
कद्वयमेकं वाक्यं इह अस्मिन् भूर्वोः संबंधे स्थिताः केचिद्योगिनः सर्वकामैर्हिता आहृताः संतो महान्त एव वर्तन्ते इति भावः प्राणोपरमो निधारणं सर्वेषां कामानां अविलो
पनं तन्मात्रमेव केषांचिद्दिव्यभोगेऽपि विरक्तानां उपपद्यते युज्यते न तु कामभोगः १३ मध्यमानां लेतत्क्लेशसाध्यमित्याह श्रमेणेति केचिन्नयोगे स्वर्ग्यं द्राप्य धर्मपराः व्या

कृतस्य तत्फलं तत्र प्रत्यक्षमुपलभ्यते यानासनाशनोपेताः प्रासादभवनाश्रयाः १२ सर्वकामैर्वृताः केचिद्धेमाभरण
भूषिताः प्राणधारणमात्रं तु केषांचिदुपपद्यते १३ श्रमेण महता केचित्कुर्वन्ति प्राणधारणं इह धर्मपराः केचित्केचि
न्नैकृतिका नराः सुखिताः दुःखिताः केचिन्निर्द्धना धनिनोऽपरे १४ इह श्रमो भयं मोहः क्षुधा तीव्रा च जायते लोभश्चा
र्थकृतो नृणां येन मुह्यंत्यपंडिताः १५ इह वार्ता बहुविधा धर्माधर्मस्य कारिणः यस्तद्वेदोभयं प्राज्ञः पाप्मना न स लिप्य
ते १६ ॥ ॥

सनारदाय्यः परोपकारार्थं विहितेषां सिद्धिनिस्वभोगाय केचिन्नैकृतिकाः आत्मवंचनतत्पराः बाह्यभोगेन योगजं धर्मं नाशयंतः अत एवान्ये धर्मपराः सुखिताः नैकृतिका दुः
खिताः यतो निर्द्धनाः क्षीणपुण्याः अपरे धर्मपरास्तु धनिनः योगजधर्मेण परोपकारजं धर्मं धनं च वर्द्धयंतः १४ इहेति नैकृतिकानामिह लोके अमात्रिकं भवतीत्यर्थः १५
वार्ताः कुशलाः धर्माधर्मस्य धर्माधर्मयोरितिपरत्वे तु उभयं धर्माधर्मौ उपादेयहेयतया वेद १६ ११

मो० ५४

५५

सोपधंसदंभं १७ तपोयोगजधर्मः १८ तस्मादिहैवधर्माधर्मविचारः कार्यइत्याहइहेति चिंताविचारः तमेवाहकर्मेति १९ इष्टेष्वासनमंतपोयेषांब्र ह्मलोकंहिमवत्पार्श्वं २० तत्रैवजायंतेआविर्भवंति २१ सत्कारंयोगेआदरंऋच्छंतिप्राप्नुवंति अन्यथादोषमाह तिर्यगिति २२ इहैवसंसारे उत्तरांदिशंहिम

सोपधंनिकृतिंस्तेयंपरिवादोऽभ्यसूयिता परोपघातोहिंसाचपैशुन्यमनृतंतथा १७ एता नासेवतेयस्तुतपस्तस्यप्रही यतेयस्त्वेतान्समाचरेद्विद्वान्नतपस्तस्यविवर्द्धते १८ इहचिंताबहुविधाधर्माधर्मस्यकर्मणः कर्मभूमिरियंलोकेइहकृत्वाशु भाशुभं शुभैःशुभमवाप्नोतितथाशुभमथान्यथा १९ इहप्रजापतिःपूर्वंदेवाःसर्षिगणास्तथा इष्टेष्टतपसःपूता ब्रह्मलोकमुपाश्रिताः २० उत्तरःपृथिवीभागःसर्वपुण्यतमःशुभः इहस्थास्तत्रजायंतेयेवैपुण्यकृतोजनाः २१ प दिसत्कारमृच्छंतितिर्यग्योनिषुचापरे क्षीणायुषस्तथाचान्येनश्यंतिपृथिवीतले २२ अन्योन्यभक्षणासक्तालोभमो हसमन्विताः इहैवपरिवर्त्तंतेनतेयांत्युत्तरांदिशं २३ येगुरूनप्युपासंतेनियताब्रह्मचारिणः पंथानंसर्वलोकानांविजा नंतिमनीषिणः २४ ॥

वत्पार्श्वं २३ योगकलालाभेसहाचार्यएवशरणीयः आचार्यवान्पुरुषोवेदनैषातर्केणमतिरापनेयेत्यादिश्रुतिभ्यइत्याह येगुरूनिति नियताःशमदमोपरत्यादियुक्ताः ब्रह्मचारिणः ब्रह्मणिपवचारः कायवाङ्मनसांचरत्तिर्येषां पंथानंगमनागमनमार्गंसगुणंब्रह्मनिर्गुणंवक्तव्यासिद्धांज्ञानंति २४ ॥ ॥ ॥ ५४

टीकर २

नी १

ब्रह्मनिर्मितः वेदप्रकाशितः धर्माधर्मौ लोकस्य कर्तव्याकर्तव्यार्थौ २५ विस्मितः चमत्कृतस्तथ्यगुणेन २६ एषः प्रत्यगात्मा जगतः प्रभव कारणं निखिलेन साकल्येन संकीर्तितः २७ परैर्दर्शितः पंथाः कृतिमुक्तिबलात्मया यथाकथं विरुद्धीनः पंडिताः शोधयंतु तं १ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंश।

इत्युक्तोयं मया धर्मः संक्षिप्तो ब्रह्मनिर्मितः धर्माधर्मौ हि लोकस्य यो वै वेत्ति स बुद्धिमान् २५ भीष्मउवाच इत्युक्तो भृगुणा राजन् भरद्वाजः प्रतापवान् भृगुं परमधर्मात्मा विस्मितः प्रत्यपूजयत् २६ एषते प्रभवो राजन् जगतः संप्रकीर्तितः निखिलेन महाप्राज्ञ किं भूयः श्रोतुमिच्छसि २७ शांतौ मोक्षधर्मेषु भृगुभरद्वाजसंवादः ॥ ॥युधिष्ठिरउवाच आचारस्य विधिं तात प्रोच्यमानं त्वयानघ श्रोतुमिच्छामि धर्मज्ञ सर्वज्ञो ह्यसि मे मतः २ भीष्मउवाच दुराचारा दुर्विचेष्टा दुष्प्रज्ञाः प्रियसाहसाः असंतस्त्विति विख्याताः संतश्चाचारलक्षणाः पुरीषं यदि वा मूत्रं ये न कुर्वंति मानवाः राजमार्गे गवां मध्ये धान्यमध्ये शिवालये च जागारे तथा तीरे ये न कुर्वंति ते शुभाः ३ शौचमावश्यकं कृत्वा देवतानां च तर्पणं धर्ममाहुर्मनुष्याणामुपस्पृश्य नदीं तरेत् ४

वंतं सच्छ्रीगोविंदसूरिसूनोर्नीलकंठविरचिते भारतभावदीपे मोक्षधर्मेषु भृगुभरद्वाजसंवादार्थप्रकाशोऽष्टदशः ॥ ॥ संक्षेपेण प्रागुक्तमाचारं योगं च विस्तरेण प्रतिपादयितुमध्यायत्रयमारभते आचारस्य विधिं तातेत्यादि १ आचारो लक्षणं ज्ञापकं येषां यतः आचाराज्जिज्ञास्यमानैः साधुरसीति भावः ३ शौचं कृत्वा उपस्पृश्य आचमनं कृत्वा नदीं तरेत् अवगाहेत चतुर्थः तर्पणमिति संबंधः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पादे १

जपेत्सावित्रीं संध्यां उपलक्ष्य । तिष्ठेत् उपतिष्ठेत् वस्त्वग्रस्तोत्रैर्मंत्रैः इतरां पश्चिमां ५ पंचार्द्र इति पाणी मुखं चेति पंच आर्द्राणि यस्य भोजनं अन्नं अन्नं भक्ष्यात् अग्रे तं अत्र एषा
दीर्घ ६ आर्द्रपाणिः कृतोन्नरोपोशनैः इत्यर्थः नार्द्रपाणिरित्यपपाठः ७ शुचिदेशे यज्ञादिशाला चैत्यं देवतायतनं ८ सामान्यं साधारणं पाकभेदेन कुर्यादित्यर्थः ९

सर्वं संध्योपतिष्ठेत नक्तं पौरं येत्व पेत् सायंप्रातर्जपेत्संध्यां तिष्ठन्पूर्वां तथेतरां ५ पंचार्द्रो भोजनं भुंज्यात् प्राङ्मुखो मौनमास्थितः
न निंद्यादन्नभक्ष्यांश्च स्वादु स्वादु च भक्षयेत् ६ आर्द्रपाणिः समुत्तिष्ठेन्नार्द्रपादः स्वपेन्निशि देवर्षिभवनं ... प्रादक्षिण्येन चारमेत्
रां ७ शुचिदेशमनड्वाहं देवं गोष्ठं चतुष्पथं ब्राह्मणं धार्मिकं चैत्यं नित्यं कुर्यात्प्रदक्षिणं ८ अतिथीनां च सर्वेषां प्रेष्याणां
स्वजनस्य च सामान्यं भोजनं भृत्यैः पुरुषस्य प्रशस्यते ९ सायंप्रातर्मनुष्याणामशनं देवनिर्मितं नांतरा भोजनं दृष्टमुपवासी
तथा भवेत् १० होमकाले तथा ... काले तथा ... अनन्तरं ... प्राज्ञो ब्रह्मचारी तथा भवेत् ११ अमृतं ब्राह्मणो-
च्छिष्टं जनन्या हृदयं कृतं तज्जनाः पर्युपासंते सत्यं संतः समासते १२ ॥ ॥ ॥ ॥ ॥ ॥

तथाकुर्वन् यथाकालभोजी उपवासफलं लभते इत्यर्थः ११ ब्राह्मणभुक्तावशिष्टं मातृहृदयमिव हितकारं कृतं धात्रा तत्ये उपासते तेन सत्संब्रह्मसमासते आसादयंति अ-
हारस्य दोषलब्धिः सत्सद्दोषावाप्तिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्ष इति क्रमेणाहारशुद्धेर्ब्रह्मप्राप्तिफलश्रुतेः १२ १२ १२ १२ १२

शंकुश्रकः कीलवद्बुश्रकवत्पापाधीनो दृथापं दिनो वा दंस्यादिपाठे संश्रेषकः कामलोभादिवशः कुशकुसंसंश्लेषणार्थौ वादिको दंस्य हृयवानेवमुखः पादः संकुस्सको वि कुसकइति मंत्रव णीतः अस्थिरः पापो वा पद्वाः मतंत्रग्राह्मणोच्छिष्टमित्यस प्रशंसार्थं हिंसामयंयागादिकर्म्म निंद्यते स्त्वो श्रुति लोष्ट मर्द्दी पशियवेदिकरणं तृणच्छे दो वर्हिराहरणार्थं नखवादी नर्दैर्च्छिल्वाछिल्वापञ्जेशेषं मां संवादस्तीति तथा निन्यो च्छिष्टं नित्ससोमयानं पितृपितामहो वा पितोमं य पसनपीत वान सर्वैर्बाह्म

लोष्टमर्द्दी तृणछेदी नखखादी तु यो नरः नित्योच्छिष्टः शंकुश्रुको नेहायुर्विंदते महत् १३ पशुघासंस्कृतं मांसं नि हन्तो मांसम कृणात न भक्षयेद्वृथामांसं शष्टमांसं च वर्जयेत १४ स्वदेशे परदेशे वा अतिथिं नोपवासयेत काम्यकर्मफलं लब्ध्वा गुरू णामुपपादयेत १५ गुरुभ्यश्चासनं देयं कर्त्तव्यं चाभिवादनं गुरूनभ्यर्च्य पुज्यंते आयुषा यशसा श्रिया १६ नेक्षेतादि त्यमुद्यंतं न च नग्नां परस्त्रियं मैथुनं सततं धर्म्यं गुह्ये चैव समाचरेत १७

णोनामेमतेः तेन उच्छिष्टः सोमपापी संकुसकफलाभिषंगी महदायुर्न्नेति १३ पशुघाय त्ववैरविदाः ध्वर्युणां मांसं पत्नियम पि निहत्तो न भक्षयेन वृथामासं च अमंस्कृतमा सं शष्टमांसं वरं मांसं श्राद्धशेष मित्यर्थः शष्टं चरम मात्रे स्यादिति विश्वः एतेन हिंसापक्तो धर्मो न कर्त्तव्यमुक्तं १४ किं तर्हि गृहस्थेन कर्तव्यमत आह स्वेति काम्यंकम नीयं कर्मभिक्षाचर्यंतस्य फलं अन्नादि गुरूणां पित्रादीनां १५ धर्म्यं तावत्कालिकं गुह्ये रहसि १७

56

तद्दयं हस्तं तीर्थं गुरुः शुचिः अग्निः आर्यकृतं शिष्टाचरितं सर्वं चौक्षं प्रशस्तं त्वार्थेषु बालं गोपुच्छं १८ प्रदिष्टं कर्त्तव्यत्वेनोपदिष्टं १९ क्रियापथे श्रौतस्मार्तधर्मानुष्ठाने
दक्षिणं पाणिमुद्धरेत् यज्ञोपवीती भवेत् अजिनं वासो वा दक्षिणात उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतमिति श्रुतेः १०
सायमिति मार्ई श्लोकः विप्राणां पूजनमेव उत्तमं पुण्यं उत्तमा कृषिः स्वनष्टं दृष्टफलमित्यर्थः वा यतेऽग्निः क्रियते वदस्थैर्ये इति धातुः सध कारणाटः प्रमादिकः सस्यानां धान्या

तीर्थानां तद्दयं तीर्थं शुचीनां तद्दयं शुचिः सर्वमार्यकृतं चौक्षं बालसंस्पर्शनानि च १८ दर्शने दर्शने नित्यं सुखप्रश्नमुदा
हरेत् सायं प्रातश्च विप्राणां प्रदिष्टमभिवादनं १९ देवागारे गवां मध्ये ब्राह्मणानां क्रियापथे स्वाध्याये भोजने चैव
दक्षिणं पाणिमुद्धरेत् २० सायं प्रातश्च विप्राणां पूजनं च यथाविधि पण्यानां शोभनं पण्यं कृषीणां वाद्यते कृषिः ब
हुकारं च सस्यानां वाह्ये वाहो गवां तथा २१ संपन्नं भोजने नित्यं पानीये तर्पणं तथा सुशृतं पायसे ब्रूयाद्यवाग्वां कृशरे त
थो २२ ॥

नां बहुकारं बहुलीकरणं च तद्वव गवां इन्द्रियाणां वा वाह्ये प्राप्ये वाहः प्रापणं दिव्यसुन्नपानादीष्टप्राप्तिरपि विप्राणां पूजनमेव पण्यादिवदेष्टव्यमित्यर्थः २१ पूजनप्रकार
माह संपन्नमिति भोजने दीयमाने संपन्नमिति ब्रूयात् दाता सुसंपन्नमिति गृहीता ब्रूयादित्यर्थाज्ज्ञेयं एवमुत्तरत्र सुतर्पणमिति प्रतिगृहीता सुशृतमिति दाता
सुश्रुतमित्यन्यः यवाग्वां तु नोदनं कृसरे हि हलेन सह पाच्यते श्रोदने २२ ॥ ॥

प्रति २४

अभिव

संपाके कृते सति विपाकात् अभिनंदनं वंदनादिना संतोषणं कार्यमिति शेषः कीदृशं अभिनंदनं आधिनाशनं आयुष्यं आयुष्करं २२ प्रत्यादित्यं [illegible] मुखेन मेहेत मूत्रमुत्सृजेत
शकृत्पुरीषं २३ अवराणां कनिष्ठानां समानानां तुल्यानां २४ आर्यं दृष्टं तेन्य मित्रं कृतं तत्र अभिवादनादि रूपं दंभेनाधिकं न शक्यमिति कथमार्यत्वं निश्चयं तत्राह तद

आश्चर्यकर्मणि संपाके कृते त्वानेय भोजने आधिनाशं च सर्वेषामायुष्यमभिनंदनं २२ प्रत्यादित्यं न मेहेत न पश्येदात्मनः
शकृत् मैहस्त्रियाऽथ शयनं सहभोज्यं च वर्जयेत् २३ त्वंकारं नामधेयं च ज्येष्ठानां परिवर्जयेत् अवराणां समानानामुभयेषां न
दुष्यति २४ हृदयं पापवृत्तानां पापमाख्याति वैकृतं ज्ञानपूर्वं विनश्यंति गूहमाना महाजने २५ ज्ञानपूर्वं कृतं पापं छाद
यंत्यबहुश्रुताः नैनं मनुष्याः पश्यंति पश्यंत्येव दिवौकसः २६ पापेनापिहितं पापं पापमेवानुवर्त्तते धर्मेणापिहितो धर्मो
ऽधर्ममेवानुवर्त्तते २७ धार्मिकेणाकृतो धर्मो धर्ममेवानुवर्त्तते पापं कृतं न स्मरेद्धि मकोविवर्त्तमानस्ततदृत्तिकर्द्धिः एकुर्पथावे
दनुपैति चापि तथा तु धर्मं पापमुपैति कर्म २८ आशपाशं चितं दुःखं दुःखे नैवोपभुज्यते नहुष्टानप्रशंसंति मरणं नपती कृते ३०

हृदयमिति वैकृतं नेत्रादिविकारः पापं हृदयमाख्याति यथोक्तं नेत्रवक्त्रविकारेण ज्ञायतेंतर्गतं मनः इति गूहमानाः पापं २६ पापेनेति पापेन पापिना पापं प्रकाशनीयं
धर्मस्तु गोपनीय इत्यर्थः २८ विवर्त्तमानस्य अशाश्वतस्य सत्त्वं धर्ममिति छेदः २९ मरणांकतं ३०

मो०
५७

57

मानसंमनोनिर्वर्त्य मनसाशिवमिस्यसर्वभूतेभ्योऽभयंदद्यादित्यर्थः ३१ एकइतिधर्मेध्यानयोगं ननसहोभौवरतांधर्ममितिविधेर्दंपत्योरग्निहोत्रादिर्धर्मोविहितस्तत्के
यमुच्यतेनास्तिधर्मेसहायतेति स्यादेरितिशेषः कातर्हिविधेर्गतिरित्यत आह केवलमिति मनसिधर्मभूतेवाल्पसहायोविधिप्राप्तोप्यनर्थकइत्यर्थः यथोक्तंमनसैवकृतं
रामशरीरकृतंकृतं येनैवालिंगपतेकांतातेनैवालिंग्यतेसुतेनेति तस्मात्स्त्र्यादिसापेक्षंधर्ममनादृत्यमानसिकेयोगधर्मेएवमनोदध्यादितिभावः ३२ एतमेवस्तौति
धर्मइतियोनिस्सानिष्फलयस्यानं देवत्वमनुष्यत्वादिप्रापकोधर्मइत्यर्थः तेषामेवदेवमनुष्याणांदिविहार्दाकाशाख्येब्रह्मलोकेऽमृतंकैवल्यकारणंधर्मएव न

मानसंसर्वभूतानांधर्ममाहुर्मनीषिणः तस्मात्सर्वेषुभूतेषुमनसाशिवमाचरेत ३१ एकस्वचरेद्धर्मेनास्तिधर्मेसहायता
केवलंविधिमासाद्यसहायःकिंकरिष्यति ३२ धर्मोयोनिर्मनुष्याणांदेवानाममृतंदिवि प्रेत्यभावेसुखंधर्माच्छश्वत्तैरुपभु
ज्यते ३३ शांतौमोक्ष० आचारविधिः॥ ॥युधिष्ठिरउवाच अध्यात्मंनामयदिदंपुरुषस्येहचिंत्यते यदध्यात्मंयथाचैतत्त
न्मेब्रूहिपितामह १ कुतः सृष्टमिदंविश्वंब्रह्मन्स्थावरजंगमं प्रलयेचकमभ्येतितन्मेवक्तुमिहार्हसि २ ॥ ॥

प्रेत्यभावेऽपरलोकेस्वैर्देहयात्रोधर्मो देवस्त्वंतैर्धर्मकर्तृभिः ३३ एकोनविंशः अध्यात्मं एवंमानसिकोधर्मोदेवादीनांयोनिरित्युक्तंतत्रकिंस्वरूपोसोधर्मः कथं
वदेवादिहेतुत्वंतस्येतिपृच्छति अध्यात्ममिति आत्मानंचित्तमधिकृत्यप्रवृत्तोयोगधर्मोऽध्यात्मंयदिदंपुरुषस्यकर्तव्यत्वेनचिंत्यतेशास्त्रेविचार्यतेतदध्यात्मंकिंलक्ष
णंकिंप्रकारकंचेतिप्रश्नद्वयंकृतं १ तथाब्रह्मैवप्रजानांयोनिरितिप्रसिद्धंत्वयातुमानसोधर्मोयोनिरित्युक्तंतत्कथमित्याशयवानाहकुतइति २

एम०
५७

श्रेयस्करं धनादि [illegible] श्रेयस्करस्तत्रो धर्मः श्रेयस्करतमो ध्यानयोगः सर्वस्वरूपसत्त्वाविर्भावहेतुत्वात् ३ स्पष्टीति स्पष्टिप्रलयव्याख्यापि अध्यात्मव्या
ख्यायामेवान्तर्भूता। तथाहि यद्विज्ञेयप्यात्मा वनीवोन्मस्यात्तर्हि तस्य उपासनाशेषत्वात्तस्मिन् श्रुते जगज्जन्मादिहेतुत्वं परिणामयी फलवदर्थवादः स्यात् इत्य
संस्कारकर्मसम्पारार्थत्वात् फलश्रुतिरर्थ- स्यादिति घंटाघोषः यो पि ब्रह्मत्ववद्वारो पिनैरपि नीलग्रीवत्वपीतांबरत्वसत्यकामत्वसत्यसंकल्पत्वं जगज्जन्मादिहेतुत्वा
दिगुणो रूपानितिस्वरूपासिद्धेः संज्ञवान्तज्ञानाशो पिना एव गुणाः तथापि तस्य सर्वेगुणाविशिष्टस्य ज्ञेयत्वेन घटादिवज्जडत्वापत्तिर्दुर्वारा ननु चिन्मय एवासौ विग्रहः शिव
न्मया एव च गुणा इति न तेषां जडत्वमिति चेन्न अत्र एष्टव्यः चिन्मयत्वं विद्धकारत्वं चिद्रूपत्वं वानाद्यः वाचारंभणं विकारो नामधेयमिति विकारस्यानृतत्वश्रवणेन तेषां

श्रीभगवानुवाच अध्यात्ममिति मां पार्थ यदेतदनुपृच्छसि तद्व्याख्यास्यामि ते तात श्रेयस्करतमं स्फुटं ३ तच्छिष्टलयसंयुक्त
माचार्यैः परिदर्शितं यज्ज्ञात्वा पुरुषो लोके प्रीतिं सौख्यं च विन्दति फललाभ एव तस्य स्यात्सर्वभक्तहितेवनात् ४ ४॥

तुच्छत्वापत्तेः नात्मस्वात्मनिवृत्तिविरोधात् नहि चिदेव चिदंतरयालयति संभवति ग्राह्यचित्तः अचित्वापत्तेः तस्मात् ज्ञेयप्यात्मा भूतीचोनन्य एव तथाच सूक्ष्मादित्वतदुपादानत्वो
क्तिस्तद्रूपत्वइति पन्थाः अध्यात्मव्याख्यामेव स्पष्टिप्रलयसुत्पादनं संगतमिति तत्र संगेयश्रोतरयोः सूक्ष्माद्युपन्यासोपि युक्तिमतर इति सिद्धं अत्र मानमाह आचार्यैः परि
दर्शितमिति आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिवेदवाक्यैरित्यर्थः प्रीतिं हृष्टमुखं सौख्यं स्वस्वात्मकं भावं सत्तां प्रकृतिपरसपामांसस्वात्मकसत्मात्रमित्यर्थावि
गमात् स्वस्वभाव इति विग्रहे षष्ठीतत्पुरुषः शिरइतिवेदोपचारी कीतिव्यक्रमाकरे तथाच श्रुतयः यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सहेति
श्रियं निष्कलं शांतमित्याद्या तस्य आत्मविदः फलं सर्वकामावाप्तिस्तल्लाभः स्यात् हितं वर्तनत्वात् ४ ॥

अध्यारोपापवादन्यायेन ज्ञेयस्य ब्रह्मणस्तटस्थलक्षणं नाकाशादिपृथिवीति भूतानां जरायुजादीनां प्रभवाप्ययौ उत्पत्तिलयस्थानं भूतानि ५ यतः आनंदात्मनः आनंदा
द्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीति श्रुतेः सृष्टानि तत्रैव लयं यांति यतस्ततिपंचम्यार्थमाह। महाभूतानि पृथिव्या
दीनि भूतेभ्यः जरायुजादिभ्यः उत्पद्यंते सागरस्योर्मयो यथेति अत्र जरायुजादिभ्यः स्वाधुसन्निलयौ वृत्तान्तेषामानंदरूपब्रह्मणुक्तं खादीनां च सप्रकाशादिवत्कल्पनामा

पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं महाभूतानि भूतानां सर्वेषां प्रभवाप्ययौ ५ यतः सृष्टानि तत्रैव तानि
यांति पुनः पुनः महाभूतानि भूतेभ्यः सागरस्योर्मयो यथा ६ प्रसार्य च यथांगानि कूर्मः संहरते पुनः तद्वद्भूतानि
भूतात्मा सृष्टानि हरते पुनः ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्र बलं चोक्तं ६ प्रसार्येति भूतानि खादीनि भूतात्मा जीवः यतः भूतान्येव देहाद्याकारपरिणतानि आत्मत्वेन मन्यमानः अस्ति खल्वन्यो ऽपरो भूतात्मा यो ऽयं सितासितैः
कर्मफलैरभिभूयमानः सदसद्योनिमापद्यत इति श्रुति [illegible] उपसिद्धेश्च एतेन कूर्मो ऽंगानीव विषयेभ्यो निवर्तीचोनम्यानीत्युक्तं ७ ७ ७ ७ ७

तुकथंभौतिकेभ्योभूतोत्पत्तिः नहिपुत्रात्पिताजायतइतिचेन्नअत्रक्रमः वीजाद्वृक्षोवृक्षाद्वीजं निर्वीजेभ्योवृक्षाइतिवद् विभ्यतीति ननुतत्रपूर्ववीजंसूक्ष्मरूपेणावयोऽस्ति
सूक्ष्मंकुरोन्मुखजिविंशीवीजोरेकत्वात्तिंविशीसन्निवेशदर्शनात् तर्हिव्यत्पभेदेनगृहीतेदेहेसूक्ष्मरूपेणमहाभूतानिसंतीतितस्याभिसंधिवेषाह महाभूता
नीभूतानीश्वरः सर्वभूतेषुशरीरेषुपंचमहाभूतानिसमकरोदेव कृतेषुच[illegible]तेषुवैषम्यंवैलक्षण्यंपार्थिवत्वेनावस्थितत्वपततज्जीवोदेहाद्यात्माभिमा

महाभूतानिपंचैवसर्वभूतेषुभूतकृत् आकरोत्तेषुवैषम्यंतत्तज्जीवेनपश्यति ८ शब्दःश्रोत्रंत
थाखानित्रयमाकाशयोनिजं वायोःस्पर्शस्तथाचेष्टात्वक्चैवत्रितयंस्मृतं ९ ॥ ॥

नीनपश्यतिदेहेकःपार्थिवोंशः कश्चाप्यइतिनजानाति अयंभावःजीवस्याभिमानत्यागेखल्वस्यसर्वकारणत्वंग्रासत्वंनतद्भावान्नसर्वेश्वरसूक्ष्माणामपित
तन्मध्यइते ततश्चानवास्यांनरसंस्कृताः सन्तस्तमिथ्यात्वेनिश्चिनोति ततोभेददृष्टेर्वाधाद्युच्यतेइति ८ जीवस्यजगदुपादानत्वप्रथनायतस्माद्भूतेदेहेन्द्रिया
शानिविभजतेशब्दइत्यादिनाखानिछिद्राणिश्रोत्राकाशस्ययोनिःकारणंतज्जं ९

गी०
५९

59

पाकःअन्नादिपक्तिःतद्धेतुः १० यंचैवदेहस्थानीतिशेषः ११ इंद्रियाणिभूतेष्वंतर्भूतानि।मनइति कर्त्ताजीवउच्यतेअस्यविज्ञानानिवृत्तिरूपाणिएतदुभयात्मिका
बुद्धिः सप्तमी क्षेत्रज्ञः साक्षी १२ चक्षुरितिपंचानामुपलक्षणंआलोचनायविषयग्रहणाय अध्यवसानायनिश्चयाय क्षेत्रज्ञः साक्षिवत्उदासीनबोधरूपत्वा

रूपंचक्षुस्तथापाकस्त्रिविधंतेजउच्यते रसःक्लेदश्चजिह्वाचत्रयोजलगुणाः स्मृताः १० घ्रेयंघ्राणंशरीरंचएतेभूमिगु
णास्त्रयः महाभूतानिपंचैवषष्ठंचमनउच्यते ११ इंद्रियाणिमनश्चैवविज्ञानान्यस्यभारत सप्तमीबुद्धिरित्याहुः क्षेत्रज्ञः
पुनरष्टमः १२ चक्षुरालोकनायैवसंशयंकुरुतेमनःबुद्धिरध्यवसानायक्षेत्रज्ञःसाक्षिवत्स्थितः १३ ऊर्द्ध्वंपादतलाभ्यां
यदर्वाक्चोर्द्ध्वंचपश्यति एतेनसर्वमेवेदंविद्ध्यभिव्याप्तमंतरं १४ १४ ॥

न
त्साक्षित्वस्यापिसाहंकारोपाधिकत्वान्नात्मधर्मत्वमितिविक्षकरणेप्रदर्शितं १३ ऊर्ध्वमिति पादतलमारभ्यऊर्ध्वंस्थितंशरीरंउपर्यधश्चयत्साक्षिचैतन्यंपश्यतिएतेनइ
दंबहिर्दृश्यमानंअंतरंव्योमादिरंतःकरणंतद्व्याप्तं १४ ॥ ॥ ॥ ॥ ॥ ॥

रा०म०
५९

सर्वं बुद्ध्यादिसाक्षिणो ब्रह्मभावमुक्ताः स्वबुद्ध्याद्युपहितसंबंधे महाभूतत्वदृष्टत्वमुक्तं तथुक्ताश्च सा चालोचनीयमित्याह उक्तैरेभिरिति इंद्रियाणीह कार्त्स्न्येन वेदितव्यानि परीक्षणीया
नि इंद्रियाणीति मनो बुद्ध्योरप्युपलक्षणं तथा हि किमिंद्रियाणि प्राक्तनमेव घटादिकं गोचरयंत्युत दृष्टिसमयमात्रसिद्धं स्वाद्येपि किं सत्वं सत्तासामान्यसमवायो वा स्वार्थक्रियाका
रिता वा नाद्यः सत्तायां सत्तासामान्यंतराभ्युपगमेनवस्थायाता तस्त्वनभ्युपगमे तत्सा त्रप्यसत्तापत्तेश्च न द्वितीयः स्वांकल्पितस्यापि सर्पस्य भयकंपादिजनकत्वलक्ष
णार्थक्रियाकारित्वदर्शनान्न च तत्र पुष्कलार्थक्रियाकारित्वं दृष्टं सर्पेणापरदर्शनादिति शंक्यं तत्रापीहमितिस्वास्मिन्सत्ताकल्पकल्पनायाः सत्वविषयनिवर्तकत्व
दर्शनात्तथा चैवोपमितिप्रतिमायां कल्पितचैतन्यस्य प्रतिमायीदृशा द्वैत्र्यीडाकरत्वदर्शनाच्च न च तत्र तार्किकात्त्वसभेदस्य मारोपवशात्स्वप्रासस्थानादेः सत्वविषयनि

उक्तैरेभिरिंद्रियाणीह वेदितव्यानि कार्त्स्न्यशः तमोरजश्च सत्वं च तेपि भावान्तराश्रिताः १५ ॥

वर्तकत्वमुक्तं गारुडशास्त्रप्रमाणात् देहेंद्रियादीनां तच्चात्मनभेदेन दृश्यमनात्मानं कथं कल्पितत्वमितिचेत्तच्छ्लाघनीयप्रज्ञो देवानांप्रियः भेदस्यहे सत्यपि यत्र क
ल्पनायाः पुष्कलार्थक्रियाकारित्वं दृष्टं किमतोभेदस्यहेयाधोन्तरकालीनार्थक्रियाकारित्वाभावस्य रज्जुसर्पादौ देहेंद्रियादौ वा तत्वदर्शनात् तस्मात्परिशेषात् दृष्टिसमयमात्र
वदृष्टिसमसमयसिद्धिं घटादिकं इंद्रियाणि गोचरयंतीतिसिद्धं इंद्रियाण्यपि मनःसोनवहितत्वायां सन्निहितमपि रूपादिकं न गोचरयंतीति मनोमात्राण्येव तस्वेतेषा
तन्मात्रत्वात् भवा [illegible] तमनोपि प्रमात्राः प्रयुक्तंसन्नावृहितं भवतीति प्रमात्रात्मकं वप्र मात्रत्वं चात्मनिवृद्धिव्यतिरेकेणासभुसारेण दृष्टमिति बुद्धेरेव धर्मः उ दृष्टिश्च त्रि
गुणात्मकस्याज्ञानस्य कार्यं स्वतस्त्रिगुणात्मकानेव भावान्विषयीकरोतीति तदिदमुक्तं इंद्रियाणि तमश्चादिकमेव तेपि इंद्रियग्राह्या भावा भावान्तराश्रिताः इंद्रियाश्रिताः इं
द्रियजाः परंपरया तमश्चाद्याश्रिताएवेति १५ ॥

एतदेवम्रपंचयिष्यन्ननुरोचनार्थतज्ज्ञानफलमाहएतामिति एतां त्रिगुणात्मिकां मूलप्रकृतिं बुद्धिं वा भूतानां खादीनां जरायुजादीनां च आगतिं उद्भवस्थानं गतिं लय स्थानं चेति बुद्ध्वा विचारेण अवेक्ष्य शनैः वैराग्यविवेकवृद्धिक्रमेण उत्तमं शमं सुखं भूम्यगानंदं लभते कंठगतविस्मृतचामीकरवत् नित्यप्राप्तमपि अज्ञानात् अप्राप्तमिव तत्त्व मसादिवाक्यात् लभते १६ भूतानां गत्यागती एवाह गुणैरिति तत्तन्मत्र्यादिभिर्गुणैः बुद्धिः नेनीयते पुनः पुनरतिशयेन विषयात्मतां नीयते अतो बुद्धिरेव मनः प्राणेन्द्रियाणि भूतानि च बुद्धिविवर्तानि सर्वतत् भावेबुद्धेरभावे गुणाः कुतः स्वरूपेण तेषां बाधात् न क्वापि संतीत्यर्थः एतेन सांख्याभिमतं तेषां अबाध्यत्वं नित्यत्वं नेमयत्वं च निरस्तं

एतां बुद्ध्वा नरो बुध्या भूतानामागतिं गतिं समेवेक्ष्य शनैरेव लभते शममुत्तमं १६ गुणैर्नेनीयते बुद्धिर्बुद्धिरेवेंद्रियाण्य पि मनः षष्ठानि भूतानि बुद्ध्यभावे कुतो गुणाः १७ इति तन्मयमेवैतत्सर्वं स्थावरजंगमं प्रलीयते चोद्भवति तस्मान्निर्दिश्य ते तथा १८

अयमर्थः रज्ज्वज्ञाने सति तत्कार्यं सर्पस्तज्जं भयादिकं च दृश्यते परीक्षादशायां तु सर्पाभावे सति रज्जौ न तन्मूलमज्ञानमुपलभ्यते नापि तज्जं भया दिकं एवं बुद्ध्यभावे बुद्धेः कार्यं कारणं च नश्यतीति गुणशब्देन सत्त्वादयो मन इंद्रियविषयादयश्च गृह्यंते १७ इतीति यत एतस्मात् तन्मयं बुद्धिमयं प्रलीयते बुद्धौ लीनायां उद्भवति बुद्ध्युद्भवे तस्मात्तथा बुद्धिमयत्वेन निर्दिश्यते वेदे मनसा ह्येव पश्यति मनसा शृणोतीति प्राणेभ्यो देवा देवेभ्यो लोका इति च बुद्धिमनसोरभेदात् बुद्धेरेव श्रवणादिसाधनं श्रोत्रादिरूपेण प्राणेभ्यश्चक्षुरादिभ्य इंद्रियेभ्यः देवास्तदनुग्राहका आदित्यादयः लोकाः भूतभौतिका इत्यर्थः १८ ॥

एतदेवाह द्वाभ्यां येनेति सा बुद्धिर्येन द्वारेण पश्यति तच्चक्षुरित्यर्थः जिह्वया त्वचेति इत्थंभावे तृतीये जिह्वारूपया बुद्ध्या बुद्धिः कर्त्री रसं जानाति १९ तत्र हेतुः विक्रियते बुद्धि
रेव चिदाभासविशिष्टा जीवापरसंज्ञा कर्तृत्वं करणत्वं चापद्यते तथा च श्रूयते सप्राणन्नेव प्राणो नाम भवति वदन्वाक् पश्यंश्चक्षुः शृण्वन्श्रोत्रं मन्वानो मन इत्यान्यस्य क
र्मनामान्येवेति। सकृदिति यौगपद्यमुच्यते कर्त्रादिभावस्य ततश्चाकाशाद्वायुः वायोरग्निरिति क्रमो न विवक्षितः किं तर्हि ज्ञातृज्ञानज्ञेयानां सहैवोत्पत्तिरित्यर्थः २० अधि

येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते जिघ्रति घ्राणमित्याहू रसं जानाति जिह्वया १९ त्वचा स्पर्शयते स्पर्शं बुद्धि
विक्रियते सकृत् येन प्रार्थयते किंचित्तदा भवति तन्मनः २० अधिष्ठानानि बुद्धेर्हि पृथगर्थानि पंचधा इंद्रियाणी
ति यान्याहुस्तान्यदृश्योधितिष्ठति २१ पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्त्तते कदाचिल्लभते प्रीतिं कदाचिदनुशो
चति २२ न सुखेन न दुःखेन कदाचिदपि वर्त्तते एवं नराणां मनसि त्रिषु भावेष्ववस्थिता २३

तिष्ठति रूपादीन्बुद्धिः प्रकाशयत्येतेभिरधिष्ठानानि करणानि बुद्धेः कर्त्र्याः अदृश्यः शिवदात्माऽधितिष्ठति स्वरूपसन्मात्रेणेंद्रियाणि व्यापारयतित्र्यस्का तत्रश्लो
हे २१ एतदेवाह पुरुषेइति त्रिषु भावेषु सत्त्वरजस्तमोमयेषु सुखदुःखमोहात्मकेषु तानेव क्रमेणाह कदाचिदिति २२ एवं त्रिषु भावेष्ववस्थितां बुद्धिर्मनसि वर्त्तते म
नोद्वारा इंद्रियविषयेष्वपीति द्रष्टव्यं २३ ॥ ॥ ॥ ॥ ॥ ॥

प१

क्त्वं गच्छ लोकान्जितान्स्वेन कर्मणा यत्र वांछसि १७ भीष्म उवाच जापकानां फलावाप्तिर्मया ते संप्रदर्शिता गतिः
स्थानं च लोकाश्च जापकेन यथा जिता १८ प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनं अथवाग्निं समायाति सूर्यं वाविश
ते पि वा १९ स तैजसेन भावेन यदि तत्र रमत्युत गुणांस्तेषां समाधत्ते रागेण प्रतिमोहितः २० एवं सोमे तथा वायौ भूम्या
काशशरीरगः सरागस्तत्र वसति गुणांस्तेषां समाचरन् २१ अथ तत्र विरागी स गच्छति त्वथ संशयः परममव्ययमिच्छन्स तमेवा
विशते पुनः २२ अमृताच्चामृतं प्राप्तः शांतीभूतो निरात्मवान् ब्रह्मभूतः स निर्द्वंद्वः सुखी शांतो निरामयः २३ ॥ ॥

गुणान् प्रकाशकत्वादीन् २१ अथेति तत्राग्न्यादौ तमेव परमेष्ठिनमेव परं उत्कृष्टं अव्ययं मोक्षक्रमतः इच्छन् २२ अमृतात्परमेष्ठीभावात् आपेक्षिका
मृतात् अमृतं कैवल्याख्यं मुख्यामृतं शांतीभूतः निष्कामः निरात्मवान् आत्मबुद्धिः तद्वान् अहंकारस्तद्वर्जितः अत एव ब्रह्मभूतः निर्द्वंद्वः [illegible]

कस्तैवस्थानंब्रह्मस्थानंअनाहतत्वाहतिमूलं २४ चतुर्भिः प्रत्यक्षागमानुमानचेतोभिः लक्षणैः लक्ष्यतेनेनेतिलक्षणत्यापकैः हीनंरूपगुणसंबंधजडत्वा
दिभिः षड्भिर्विरहितं। अतएवषड्भिरूर्मिभिः अशनापिपासाभ्यां प्राणधर्माभ्यां शोकमोहाभ्यां चित्तधर्माभ्यां जरामृत्युभ्यां देहधर्माभ्यां चहीनंतत्समला
त् अतएवप्राणाद्यात्मकषोडशकगुणैर्नैवतैःशनाहयः सहितास्तैः प्राणाद्याश्वप्राणाच्छ्रद्धाखंवायुर्ज्योतिरापपृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलो

ब्रह्मस्थानमनावर्त्तमेकमक्षरसंज्ञकं अदुःखमजरंशांतंस्थानंतत्प्रतिपद्यते २४ चतुर्भिर्लक्षणैर्हीनंतथाषड्भिःसषो
डशैः पुरुषंतमतिक्रम्यआकाशंप्रतिपद्यते २५ अथचेच्छतिरागात्मासर्वंतदधितिष्ठति यद्यत्प्रार्थयतेतच्चमनसाप्र
तिपद्यते २६ अथवाचेक्षतेलोकानसर्वान्निरयसंज्ञितान् निस्पृहःसर्वतोमुक्तस्तत्रवैरमतेसुखं २७ एवमेषामहारा
जजापकस्तांगतिर्यथा एतत्तेसर्वमाख्यातंकिंभूयःश्रोतुमिच्छसि २८ शांतौमोक्षधर्मेषुजापकोपाख्याने॥ ॥

केषुनामचेतिप्रश्नस्योत्तरं आकाशंकारणंब्रह्मातिक्रम्यपुरुषमनुपाधिचिन्मात्रंप्रतिपद्यतइतिसंबंधः २५ नेच्छतिपुरुषप्राप्तिमितिशेषः सर्वंसर्वात्मकंतत्आका
शाख्यंकारणं। अधितिष्ठतितदभिमानीभवतियद्वैमनेनसयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंतीत्यादिश्रुतेरर्थः सत्यकामःसत्यसंक
ल्पश्च। विद्वानितिशेषः २६ अथचेतिपरवैराग्यवतःसर्वलोकत्यागोपिभवतीत्याह। तत्रनिर्गुणे २८ पंचविंशः॥ ॥ ॥ ॥ ॥

किमितिउत्तरंसमालोक्यतयासहचेतिविदुषवाक्यश्रवणानंतरं तौइक्ष्वाकुपैप्पलादी।तस्यविदुषस्यभाषितेवचनेविषये १ यदेतत। सद्योमुक्तिक्रममुक्तिलोको।

युधिष्ठिरउवाच किमुत्तरंतदातौस्मचक्रतुस्तेनभाषिते ब्राह्मणोवाथवाराजातन्मेब्रूहिपितामह १ अथवातौगतौतत्रय
देतत्कीर्तितंत्वया संवादोवातयोः कोभूत्किंवातौतत्रचक्रतुः २ भीष्मउवाच तथेत्येवंप्रतिश्रुत्यधर्मंसंपूज्यचप्रभो यमंका
लंचमृत्युंचस्वर्गंसंपूज्यचार्हतः ३ पूर्वंयेचापरेतत्रसमेताब्राह्मणर्षभाः सर्वान्संपूज्यशिरसाराजानंसोब्रवीद्द्विजः ४ फलेनानेन
संयुक्तोराजर्षेगच्छपुण्यतां भवताचाभ्यनुज्ञातोजपेयंभूयएवहि ५ वरश्चममपूर्वंहिदत्तोदेव्यामहाबल श्रद्धातेजपतोनित्यंभ
वत्विति विशांपते ६ राजोवाच यद्येवमफलासिद्धिःश्रद्धाचजपितुंतव गच्छविप्रमयासार्धंजापकंफलमाप्नुहि ७ ब्राह्म
णउवाच कृतः प्रयत्नः सुमहान्सर्वेषांसंनिधाविह सहतुल्यफलावांयत्रतौगतिः ८ व्यवसायंतयोस्तत्रविदित्वात्रिद
शेश्वरः सहदेवैरुपययौलोकपालैस्तथैवच ९ साध्याश्चविश्वेमरुतोवाद्यानिसुमहांतिच नद्यःशैलाःसमुद्राश्चतीर्था
निविविधानिच १० ॥

वांगछ्वो २

तरंगासिरितित्रयं २ अर्हतःपूज्यान ६ यदीति अफलातावपदियद्यपि मत्संपलमस्तत्वात नथापिजपश्रद्धानज्जपरूपेनैवतत्फलहेतुत्वात्जापकंजपार्जितं
फलमपिप्राप्नुहीसर्थः प्रयत्नः तम्यंजपदानार्थंनौआवयोः ८ व्यवसायंनिश्चयं १०

81

संयोगविधिः जीवब्रह्मैक्यप्रतिपादका वेदांताः स्तोभाः सामगीतिपूरणार्थानि अक्षराणि हाथिहाबुइत्यादीनि ११ अथेति अन्योन्यविधिना परस्परोपकारेण सहितौ एककाल एव विषयाणां रूपादीनां प्रतिसंहारं प्रतीपसंहारं विषयकारणीभूतेंद्रियसंहारेणैव संहारं १६ तत्र क्रममाह प्राणेति मूलाधारात्कुंडलि

तपांसि संयोगविधिर्वेदाः स्तोभाः सरस्वती । नारदः पर्वतश्चैव विश्वावसुर्हहाहुहू ११ गंधर्वाश्चित्रसेनश्च परिवारगणैर्युतः नागाः सिद्धाश्च मुनयो देवदेवः प्रजापतिः १२ विष्णुः सहस्रशीर्षश्च देवोऽचिंत्यः समागमत् अवाद्यंतांतरिक्षे च भेर्यस्तूर्याणि च विभो १३ पुष्पवर्षाणि दिव्यानि तत्र तेषां महात्मनां ननृतुश्चाप्सरः संघास्तत्र तत्र समंततः १४ अथ स्वर्गस्तथा रूपी ब्राह्मणं वाक्यमब्रवीत् संसिद्धस्त्वं महाभाग त्वं च सिद्धस्तथा नृप १५ अथ तौ सहि राजन्नन्योन्यविधिना ततः विषयप्रतिसंहारमुभावेव प्रचक्रतुः १६ प्राणापानावथोदानं समानं व्यानमेव च एवं तौ मनसि स्थाप्य दधतुः प्राणयोर्मनः १७ ॥

नीमुत्थाप्य ऊर्ध्वोर्ध्वचक्रजयक्रमेण मनसि हृदयेऽनाहतचक्रे स्थाप्य निरुध्य तत्रस्थं मनः एकीभूतयोः प्राणापानयोः स्थाप्य वशीकृत्य आहधतुः धारयतः स्म १७

घ्र १

उपस्थितं उपस्थं कुरुतः तौ उपस्थितहस्तौ बद्ध्वा ॰ मनाविसर्गः भ्रुवोरधः नाशिकाग्रं पश्यन्ताविति शेषः स्वनासिकाग्रे स्थिनदृष्टुमशक्यमतो यएवायमादर्शेषु
स्वेषएनमेवाहं ब्रह्मोपासे इति कृते ॰ रादर्शस्थनासिकाग्रदर्शनं माभवतीति भ्रुवोरधः इति विशेषणं तेन नासं तं निमीलिताक्षः स्यात् निद्राप्रासेः नापि उल्लु

उपस्थाप्योदरे तौ च नासिकाग्रमधो भ्रुवोः भ्रुकुट्यां चैव मनसा धारयन्तस्तदा १८ निश्चेष्टाभ्यां शरीराभ्यां स्थिरदृष्टी स
माहितौ जितात्मानौ तथा धाय मूर्द्ध्न्यात्मानमेव च १९ तालुदेशमथोद्दाल्य ब्राह्मणस्य महात्मनः ज्योतिर्ज्वालासु
महती जगाम त्रिदिवं तदा २० हाहाकारस्तथा दिक्षु सर्वेषां सुमहानभूत तज्ज्योतिः स्तूयमानं स्म ब्रह्माणं प्राविशत्तदा
२१ ततः स्वागतमित्याह तत्तेजः प्रपितामहः प्रादेशमात्रं पुरुषं प्रत्युद्गम्य विशांपते २२ भूयश्चैवापरं प्राह वचनं मधुरं
तदा जापकैस्तुल्यफलता योगानां नात्र संशयः २३ योगस्य तावदेतेभ्यः प्रत्यक्षं फलदर्शनं जापकानां विशिष्टं तप
त्युत्थानं समाहितं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दिताक्षः स्यात् लोकदर्शनेन विक्षेपादिस्युक्तं । उपस्थाप्योदरे तौ चेति पाठे तौ प्राणापानौ भ्रुकुट्यां भ्रुवोर्मध्ये आज्ञाचक्रे धारयन्तः १८ तथा उक्तप्रकारेणात्मानं
चिन्तितौ आत्मानं चित्तं प्राणसंहितं मूर्द्धनि धारयन्त इति पूर्वेणान्वयः सुषुम्नामार्गेणेति शेषः १९ तालुदेशं ब्रह्मरन्ध्रं २२ योगानां योगिनौ २३ योगस्य योगेन
एतेभ्यः स एतेषां सम्यानां समाहितं विहितं २४ ॥ ॥

जितात्मानौ २

मो०
८२

82

उष्पतामिति। अत्र चान्तर्मुखात्मप्रवेशोक्त्या द्विः स्वहेतव्यष्टिलिंगवियोगो जापकस्य ब्रह्मलोकं गतस्य सद्य एव भवतीत्युक्तम् तत्र हेतुरनेनैव यदिति तस्य ब्रह्मात्मैकत्वं बो-
धितवानित्यर्थः अयमर्थो भगवद्गीतासु संगृहीतः सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ओमित्येकाक्षरं ब्र-

उष्पतामपि चेत्युक्त्वा चेतयन्तं तपनः अथास्य प्रविवेशास्य ब्राह्मणोऽभिगतज्वरः २५ राजाप्येतेन विधिना भगवन्तं पितामहं
यथैव द्विजशार्दूलस्तथैव प्राविशत्तदा २६ स्वयंभुवमथो देवा अभिवाद्य ततोऽब्रुवन् जापकानां विशिष्टेयं ... त्थानं समाहितं २७
जापकार्थमयं यत्नो ... पर्यर्थं वयमागताः कृतपूजाविमौ तुल्यौ त्वया तत्फलाविमौ २८ २९ योगजापकयोर्दृष्टं फलं सुमहदद्य वै
सर्वांल्लोकानतिक्रम्य गच्छेतां यत्र वांछितं २९ ब्रह्मोवाच महास्मृतिं पठेद्यस्तु तथैवानुस्मृतिं शुभां तावप्येतेन विधिना गच्छ-
तां मत्सलोकतां ३० यश्च योगे भवेद्भक्तः सोऽपि नास्त्यत्र संशयः [illegible] विधिनानेन देहान्ते मम लोकानवाप्नुयात्
३१ साधयेगम्यतां चैव यथास्थानानि सिद्धये ३२ ॥

ह्म व्याहरन्मामनुस्मरन् यः प्रयाति स मद्भावं याति नास्त्यत्र संशय इति स्मरेत् ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति स्मृतेः कर्मा-
न्ते व्यष्टिलिंगान्मुच्यते इति भेदः २७ वयं त्रिदशेभ्यस्तारयः त्वया च तन्मुखेन २८ वांछिते अग्रे गंतव्यं २९ संहिताध्यायिनां फलमुक्त्वा षडंगाध्यायिनां मन्वादिस्मृत्य-
ध्यायिनां च फलमाह महास्मृतिमिति ३१ साधयेयुः प्रदिष्टमिति शेषः ३२ ॥ ॥ ॥ ॥ ॥

शां०
८२

३५ जापकोपाख्याने समासं षट्त्रिंशोध्यायः॥ ॥पूर्वं च जापकत्वं सांगाद्योगस्यापि श्रेयस्त्वमुक्तं योगजापकयोर्हि एकं फलमसमहत्त्वं च वा इति तथा उपनिषत्तामपि वेदस्य स्वाध्या
चेतयत्स नतं तं उनरिति जपफलकाले ब्रह्मबोधस्यापि द्वारत्वमुक्तमेवं योगोपि ज्ञानसहाय एव उन ज्ञानफलकृदिति मत्वा पृच्छति किमिति ज्ञानं विचारस्तत्सहितो योगः

भीष्म उवाच इत्युक्त्वा सततदा देवस्तत्रैवांतरधीयत आमंत्र्य च ततो देवा ययुः स्वं स्वं निवेशनं ३३ ते च सर्वे महात्मानो धर्मं सत्कृत्य तत्र वै पृष्ठतोनुययू राजन्सर्वे सप्रीतचेतसः ३४ एतत्फलं जापकानां गतिश्चैव प्रकीर्तिता यथा श्रुतं महाराज किं भूयः श्रोतुमिच्छसि ३५ शांतौ मोक्षधर्मेषु जापकोपाख्यानं॥ ॥ युधिष्ठिर उवाच किं फलं ज्ञानयोगस्य वेदानां नियमस्य च भूतात्मा च कथं ज्ञेयस्तन्मे ब्रूहि पितामह १ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं मनोः प्रजापतेर्वादं महर्षेश्च बृहस्पतेः २ प्रजापतिं श्रेष्ठतमं प्रजानां देवर्षिसंघप्रवरो महर्षिः बृहस्पतिः प्रश्नमिमं पुराणं पप्रच्छ शिष्योथ गुरुं प्रणम्य ३ यत्कारणं यत्र विधिः प्रवृत्तो ज्ञाने फलं यत्प्रवदंति विप्राः यन्मंत्रशब्दैरकृतप्रकाशं तदुच्यतां मे भगवन्यथावत् ४ ॥ ॥

ज्ञानयोगस्तत्सविद्यामेतां योगविधिं च कृत्स्नं तत्कारणं सांख्ययोगाभिपन्नमित्यादि लिंगादनयोः समुच्चयावगमात् वेदानां च किं फलं तथा नियमस्याग्निहोत्रादेः भूता
त्मा जीवः ३ कारणं जगत इति शेषः यत्र यन्निमित्तं विधिः कर्मकांडः ज्ञाने सति यत्फलं प्राप्यं मंत्रशब्दैः वेदवाक्यैः वाङ्मनसातीतत्वात् अप्रकाशितं ४ ॥

83

अर्थशास्त्रं त्रिवर्गशास्त्रं। आगमो वेदः मंत्राः इष्टेत्यादयो वेदांतर्गताः तद्विद्भिर्नरैः यत्नयज्ञादिभिः फलं महत्त्वं उपास्यते तेन किं वस्तु कथं केन प्रकारेण वा तत् आसीत् भविता क्व
वा तत्र स्वर्गे देशांतरे वा प्रसंगात्मने वा ५ महीजाः स्थावरजंगमाः ६ ज्ञानं यतः यस्मिन्विषये ततः ज्ञानात् तदर्थी ज्ञानार्थी मिथ्याप्रवृत्तिं न तत्त्वज्ञात्वा प्रवृत्तिं त

स्तु ४

यज्ञार्थशास्त्रागममंत्रविद्भिर्यज्ञैरनेकैर्वरगोप्रदानैः फलं महद्भिर्यदुपास्यते च किं तत्कथं वा भविता क्व वा तत् ५ मही महीजाः
पवनोंतरिक्षं जलौकसश्चैव जले दिवं च दिवौकसश्चापि यतः प्रसूतास्तदुच्यतां मे भगवन्पुराणं ६ ज्ञानं यतः प्रार्थयते नरो वै
ततस्तदर्थाभवति प्रवृत्तिः न चाप्यहं वेद परं पुराणं मिथ्याप्रवृत्तिं च कथं नु कुर्यां ७ ऋक्सामसंघांश्च यजूंषि चापि छंदांसि न
क्षत्रगतिं निरुक्तं अधीत्य च व्याकरणं सकल्पं शिक्षां च भूतप्रकृतिं न वेद्मि ८ स मे भवान् शंसतु सर्वमेतत्सामान्यशब्दैश्च विशेष
णैश्च स मे भवान् शंसतु तावदेतत् ज्ञाने फले कर्मणि वा यदस्ति यथावदेहाच्च्यवते शरीरी पुनः शरीरं च यथाभ्युपैति ९ म
नुरुवाच यद्यत्प्रियं यस्य सुखं तदाहुस्तदेव दुःखं प्रवदंत्यनिष्टं इष्टं च मे स्यादितरच्च न स्यादेतत्कृते कर्मविधिः प्रवृत्तः १०

स्वासये कथं नु कुर्यां ७ सोहं भगवो मंत्रविदेवास्मि नात्मविदिति श्रुतेः ऋक्सामादिज्ञानेपि भूतप्रकृतिविषयं आद्युपादानमात्मानं न वेद्मि ८ सामान्यशब्दैः आत्मा से
वोपलब्धव्य इत्यादिभिः विशेषणैः संज्ञानमज्ञानं विज्ञानमानंदं विज्ञानमानंदं इत्यादिभिः ९ यत्र विधिः प्रवृत्तस्तस्योत्तरमाह यदिति १० ॥ ॥

स १

ज्ञानेफलंपरिस्प्रश्नोत्तरमाहइष्टमिति ११ यद्वार्थशास्त्रेप्रश्नोत्तरमाह कामेति कामात्मकाः कामप्रधानाः छंदसिवेदेएभिः कामैः कर्मपथावेदोक्तेलौकि
केवानिरयंस्वर्गं।नरकंवा १२ एतत्साक्षिप्रश्नद्वैनइष्टमिति इष्टानिष्टेप्रियाप्रियेसुखदुःखेतत्तः सुखमिष्टंप्राप्त्यंदुःखमनिष्टंत्याज्यंसा आशीः प्रार्थना सा
चकर्मभिः एवंप्रार्थयितारंत्र्यवछंदति व्याप्नोति एतावदेवपुरुषः प्रार्थयतेनान्यत्कर्मफलमन्तत्वार्थीः स्वर्गकामोयजेतश्येनाभिचरन्यजेतेत्यादेरुक्तत्वान्निशि वि
त्या१ ने१

इष्टंत्वनिष्टंचनमांभजंतेतेत्वन्तकृतेज्ञानविधिः प्रवृत्तः कामात्मकाश्छंदसिकर्मयोगा एभिर्विमुक्तः परमश्नुवीत
नानाविधेकर्मपथेष्वसत्त्वार्थीनरः प्रवृत्तोनिरयंप्रयाति १२ बृहस्पतिरुवाच इष्टंत्वनिष्टंचसुखासुखेचसाशी
स्त्र्यवछंदतिकर्मभिश्च १२ मनुरुवाच एभिर्विमुक्तः परमाविवेश एतत्कृतेकर्मविधिः प्रवृत्तः कामात्मका
नछंदसिकर्मयोग एभिर्विमुक्तः परमाददीत १३

ष्टस्यतस्यैवफलत्वेनश्रवणात् १२ विविदिषंतियज्ञेनेत्यादिवाक्यात् एभिः कामैर्विमुक्तस्तत्कर्मणापत्तशयपरंब्रह्मविविदिषोस्तस्मादिहाणवविशेत् ए
तदर्थमेवकर्मविधिः प्रवृत्तः स्वर्गादिफलश्रवणंतुकामात्मिकानेवछंदतिव्याहणोति। अतः एभिः कामैर्विमुक्तः परमेवाददीतब्रह्मज्ञानार्थमेवकर्माण्यनु
तिष्ठेन्नतुफलार्थमित्यर्थः १३ ॥

किं श्रेयेनादीन्यपि ज्ञानार्थमनुष्ठेयानि नेत्याह। आत्मेति। आत्मादिवित्तं आदिभिः प्रथमैर्निसेरिमर्थः इध्यमानः रागादिदोषापनयेन आत्मदर्शी वर्द्धमानः श्रुति
मान्तद्वत्सद्विषयप्रकाशवानत एव स्वार्थी मुमुक्षुः परं त्वत्यंतं कर्मणो वरं निराशिषमिमनेन साशीत्त्ववच्छंदतीति परोक्तिर्निरस्ता अवैतित्वपैति स्वहत्सा
माप्नोति २४ ननु बंधकानां कर्मणां कथं बंधनिवर्त्तकत्वं न हि स्वरूपात् आचांतः शुद्ध्यतीत्याशंक्याह प्रजाः सृष्टा इति एतौ मनः कर्मणी संस्कारद्वेद्ये अपि सस्तु

आत्मादिभिः कर्मभिरिध्यमानो धर्मे प्रवृत्तो द्युतिमान्स्वार्थी परं हि तत्कर्म यथाप्रदेयं तं निराशिषं ब्रह्मपरं त्वपैति २४
प्रजाः सृष्टा मनसा कर्मणा च द्वावेवैतौ सत्पथौ लोकजुष्टौ दृष्टं कर्म शास्त्रयुतं चांतवच्च मनस्त्यागः कारणानामादरिक्त २५
तेनात्मना चक्षुरिव प्रणीता निशान्तपेन मनसा संवृतात्मा ज्ञानं तु विज्ञानगुणेन युक्तं कर्माशुभं पश्यति वर्जनीयं २६

यौ ब्रह्मप्राप्तिमार्गौ कथं तदाह दृष्टमिति दृष्टं प्रत्यक्षं श्रुतिबोधितमित्यर्थः शास्त्रयुतं च मोक्षहेतुरपि स्वर्गं तत्तच्च दृष्टफलमपि। तत्र मनसा क्रियमाणस्त्यागः फल
गा२ त्यागैव शास्त्रयुक्तत्वे कर्मणां कारणानाम्यनत्वस्वरूपेणात्यागस्त्वर्थः २५ तेनेति यथा चक्षुः प्रणीता नायकः निशान्तपेनास्तेन मनसा संवृतात्मा अनाहत स्व
रूपः सन् तेनात्मना तैजसेन वा लोकेन वर्जनीयं कंटकादिकं पश्यति एवं ज्ञानं बुद्धिः विज्ञानगुणेन विवेकेन युक्तं सत् अशुभं पश्यति २६ ॥

दृष्टांतैर्विहायैवं ज्ञानफलस्य श्रैष्ठ्यमाह सर्पानिति उदपानं कूपं १७ ज्ञानपूर्वकं कृत्स्नं कर्म सफलमित्याह कृत्स्नमिति कर्म पंचात्मकं पंचधर्मं चाह य:श्री
त्मानः निष्पादकाः यस्मात्तथा समाधिः ऐकाग्र्यं देवताध्यानादौ यस्मै देवतायै हविर्गृहीतं स्यात्तां ध्यायेदिति श्रुतेः फलं फलवत् १८ कर्तृत्वभावेन स्वात्मकर्मणां
फलभेदमाह गुणेति गुणात्मकं सात्त्विकं राजसं च विधेयं कर्मेत्यर्थः तस्माद्धेतोर्मंत्रोपि गुणात्मकः तत्रेहतं मंत्रपूर्वं हि कर्म तत्र सात्त्विको मंत्रः अग्निमीळे पुरोहितमः

सर्पान्कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयंति अज्ञानतस्तत्र पतंति केचित् ज्ञाने फलं पश्य यथा
विशिष्टं १७ कृत्स्नं कर्म मंत्रो विधिवत्प्रयुक्तो यज्ञा यथोक्तास्त्विह दक्षिणाश्च अन्नप्रदानं मनसः समाधिः
पंचात्मकं कर्मफलं वदंति १८ गुणात्मकं कर्म वदंति वेदास्तस्मान्मंत्रो मंत्रपूर्वं हि कर्म विधिर्विधेयं मनसो
पपत्तिः फलस्य भोक्ता तु तथा शरीरी १९

इषे त्वोर्जे त्वा तामसः सर्वं वै विश्वं तद्धृदयं प्रविश्येत्यादिः एवं विधिरपि त्रिविधः आत्मकामो यजेत अभिचरन्यजेतेत्यादिः कर्तृत्वभावे मेयादपि तद्वैरमाह म
नसोपपत्तिः फलस्येति तथाहि यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति विद्यादिमान्सात्त्विकः कर्ता विद्यादिहीनः केवलं प्रवृत्तिमात्रपरो राज
सः दंभाभिसंधिस्तामसः तेषां कर्म क्रमेण वीर्यवत्तरं वीर्यवत्तन्निर्वीर्यं च भवति यथा फलस्योपपत्तिस्तथा फलस्य भोक्तापि सात्त्विकादिः स्वीमत्स्व भवति १९

मो०
२५

शब्दादयः कर्मफलं कर्मप्राप्ये लोके स्वर्गे सिद्ध्यन्ति। नरः प्रभुरधिकारी ज्ञानफले इति शेषः न संस्थानगत इत्येकं पदं मरणोच्छ्रासोज्जीवन्नेव स्यात् उद्धृत्कल्याः मुक्त
भोक्तव्य मित्यदृष्टफलात्कर्मणोपेक्षया दृष्टफलं ज्ञानमेव श्रेय इति भावः २० ननु कर्मभ्य एव मोक्षः सिद्ध्येत्किं ज्ञानेनेत्यत आह यद्यदिति शरीरवताकृतं क

४५

शब्दाश्च रूपाणि रसाश्च पुण्याः स्पर्शाश्च गंधाश्च शुभास्तथैव नरो न संस्थानगतः प्रभुः स्यादेतत्फलं सिध्यति कर्मलो
के २० यद्यच्छरीरेण करोति कर्म शरीरयुक्तः समुपाश्नुते तत् शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरं २१
वाचा तु यत्कर्म करोति किंचिद्वाचैव सर्वं समुपाश्नुते तत् मनस्तु यत्कर्म करोति किंचिन्मनःस्थ एवाश्नुते तत् २२ य पनुपा २
थायथा कर्मगुणं फलार्थी करोत्ययं कर्मफले निविष्टः तथा तथायं गुणसंप्रयुक्तः शुभाशुभं कर्मफलं भुनक्ति २३

र्मशरीरयुक्तेनैव भोक्तव्यं यतः कर्मफलस्य दुःखादेरायतनमाश्रयः शरीरं न शरीरं आत्मनो शरीरत्वलक्षणो मोक्षः न शारीरेण कर्मणा सिद्ध्यतीत्यर्थः २१ तर्हि
वाचिकेन जपादिना मानसिकेन ध्यानादिना मोक्षः सिद्ध्यतीत्यत आह वाचेति वाङ्मनसाभ्यां कृतं कर्म न दृष्टैव भोक्तव्यं ननु तत्तदन्तं तद्वाक्गोचरये दित्यर्थः २२ कर्मणि गु
णाः सत्वरजस्तमो वा कर्मगुणास्तं २३ ॥ ॥ ॥ ॥ ॥

मो०
२५

अयथा प्रतिकूलं स्रोतः प्रवाहं जलवेगेनाभिपाती भवति न त्विच्छया तथा कर्मप्रवृत्तो ऽप्युपैति अनुवर्तते तत्रैवं सति शुभे तोषो न त्वशुभे इति मोक्षमेवे
प्सेदित्यर्थः २४ एवं कर्मगतिमुक्त्वा ज्ञानेन कृत्यामीति प्रतिजानीते यत इति आत्मवंतो जितचित्ता जगतव्यतिक्रम्य यत परं यांति परं श्रेष्ठं यत् २५ यत्तस्मा
दहीनमपि तान् पंचप्रकारान् रसादीन् जनानां भोक्तृणामर्थे ससृजे उत्पादितवान् अवर्णं लोहितशुक्लकृष्णवर्णं लोहितशुक्लकृष्णवर्णप्रधानं रजःस

मन्त्रो ५ यथा स्रोत इवाभिपाती तथा कृतं पूर्वमुपैति कर्म शुभे त्वसौ तुष्यति दुष्कृते तु न तुष्यते वै परमः शरीरी २४ य
तो जगत्सर्वमिदं प्रसूतं ज्ञात्वात्मवंतो व्यतियांति यत्तत् यन्मंत्रशब्दैरकृतप्रकाशं तदुच्यमानं शृणु मे परं यत् २५ रसैर्विमुक्तं
विविधैश्च गंधैरशब्दमस्पर्शमरूपवच्च अग्राह्यमव्यक्तमवर्णमेकं पंचप्रकारं ससृजे प्रजानां २६ न स्त्री पुमान्वापि न
पुंसकं च न सन्न चासत्सदसच्च तन्न पश्यंति यद्ब्रह्मविदो मनुष्यास्तदक्षरं न क्षरतीति विद्धि २७ शांतौ मोक्षधर्मे
बृहस्पतिसंवादे ॥ ॥ ॥

त्वतमोमयं तदस्मात् २६ सत्प्रधानपरमाणवादि असत् तुच्छं सदसत् अनिर्वचनीयं मायाशबलं अत एवाक्षरं अपरिणामि नासदासीन्नो सदासीत्तदा
नीं नासीद्रजो नो व्योमा परो यदिति श्रुतावपि सृष्टेः प्राक् सदसद्रजःशब्दैरितानां प्रधानासत्परमाणूनां प्रकृतिप्रसक्तानां परव्योमशब्दितसमायाशबलस्य च त
स्कारणत्वात्प्रसक्तस्य निषेधात् २७

अक्षरात्तमायासहायात् । ननु नेमो मायापरोपहितमिति सूत्रे: प्राक्तमायाशबलस्य निषेधात्कथं अक्षरे मायासहायादिति विशेषणं दीयते सत्यं तस्य तन्नाम्न्यपिहितं यद्दृश्यते [illegible] दितितत्रैव वाकाशेषेतद्बुद्धेन मिथ्याभूतेनततमसाच्छादितमपुव्यापकं चापिहितं चाच्छादितमित्युक्ते स्तमसश्चतन्तुत्वाभिधानान्नमर्थे गारह्मश्चन परमार्थतो ऽक्षरस्य सद्वितीयत्वमितिज्ञेयं एवं चतद्धानानाहन्नाच्छक्तिरित्वंशाद्ध ततमिवाक्षरात्खादयुत्पद्यते ऽनिनक्वचिद्दोषः १ एवमक्षरे जगदारोप्य तत्र प्रवर्तति एतैरिति पार्थिवैः शरीरैर्लब्ध

मनुरुवाच अक्षरात्खं ततो वायुस्ततो ज्योतिस्ततो जलं । जलात्प्रसूता जगती जगत्संजायते जगत् ॥ १ ॥
एतैः शरीरैर्जलमेव गत्वा जलाद्भवेत्तेजः पवनोऽन्तरिक्षं । खाद्वै निवर्तन्ति न भाविनस्ते मोक्षं च तेनैव परामाप्नुवन्ति ॥ २ ॥

रोगाद्युपायेन शरीरेण: जलं गत्वेति सृष्टिविपरीतक्रमेण संहारक्रमः तेजसः पवनं ततोंतरिक्षं गत्वेति योज्यं अन्तरिक्षमनाकाशं खात्तत्स्थो पंचमी मायाशबलं खशब्दोदितमतोऽपि भाविनः भावोऽक्षरं तद्घेषामात्मत्वेन नास्तीति निर्विशेषब्रह्मणा न्यानं च्यासात्तेन निवर्तन्ति न संसरंति किं तर्हि परं मोक्षं प्राप्नुवंतिये भाविनस्तेपरमाप्नुवंतीति पाठे तु येन भाविनस्ते खात्तत्वं प्राप्य निवर्तन्ति ये तु भाविनस्ते खादपि परं यतस्त्प्राप्नुवन्तीति योजना २

एवंज्ञातस्यापिपरस्ययोगैकगम्यत्वंवक्तुंलक्षणमाहनोष्णमिति नशीतंनमृदुइतिनोष्णंनकषायंनमधुरमितिचसंबंधः स्वभावःप्रमातृत्वादिस्वतत्त्वं ३ कस्माद्धिर
सादीनांवेदितेत्यतआह स्पर्शमिति। तनुःत्वगिंद्रियं। त्वगादिभिस्तत्स्वरूपंवस्तुनचगृह्यतेति यतोयतः अनध्यात्मविदः आत्मानमधिकृत्यप्रवृत्तोयोगः अध्यात्मं
तदनभिज्ञाः योगमेवाह। निवर्त्यपित्वेतिगुरूक्त्युक्तेपिविशेषः नहिपुरुषकारेणशब्दात्स्रोतंनिवर्त्यपितंशक्यं यथोक्तंवार्त्तिके शांतोदांतउपरतस्तितिक्षुः

नोष्णंनशीतंमृदुनापितीक्ष्णंनाम्लंकषायंमधुरंनतिक्तं नशब्दवन्नापिचगंधवन्नन्नरूपवत्तत्परमस्वभावं ३ स्पर्शंतनु
र्वेदरसंचजिह्वाघ्राणंचगंधांश्छ्रवणौचशब्दान् रूपाणिचक्षुर्नचतत्स्वरूपंगृह्णंत्यनध्यात्मविदोमनुष्याः ४ निवर्त्तपि
त्वारसनांरसेभ्योघ्राणंचगंधाच्छ्रवणौचशब्दात् स्पर्शात्त्वचंरूपगुणात्तुचक्षुस्ततःपरंपश्यतिस्वंस्वभावं ५ ॥ ॥

समाहितोभूत्वात्मन्येवात्मानंपश्येदितिश्रुतेर्व्याख्याने स्वांतंअंयेषुकर्त्तुः साक्षात्कारणाकरणंभवति तामेवतन्निषिद्धानिकर्माणीह शमादिभिभिः अस्वांतंअंतयेषुस्वा
त्कर्त्तुः कर्मसुसर्वदासमाहितोयथेदानींतन्निरोधोविधीयतेपीडीकृतेंद्रियग्रामंबुद्ध्यावारोप्यनिश्चलंविषयांस्तत्स्मृतीं अक्लांतिष्ठेच्चिरंतुरोधतः एषोभ्युपायः
सर्वत्रवेदांतेषुप्रतिष्ठितः तत्त्वमस्यादिवाक्योत्थज्ञानोपसमर्थमादरादितिततोनिवर्त्तकात्मनातः परंतुउपाधिभूतबुद्ध्यादेः परंस्वंप्रत्यगभिन्नंस्वभावंस्वरूपमत्तां
पश्यति ५ ५

मो०
८७

कोमोक्षभावस्तत्राह। यत इति। ते मुनयः समुदायं कर्त्रादिसंघातं यत्कारणं यदृष्टंकं चाहुः तं तथाभावं यश्यन्तीति एवं गात्र्वयः समुदायमाहुः यः कर्त्ता प्रमाता येन ज्ञानं कर्म
मेकरणेन यत्प्राप्यमुद्दिश्य यस्मिन्देशे काले च यस्मिन्समस्तेषु रेवानि भिन्नमते तांतदनुकूलां प्रवृत्तिं यत्नं आरभते यच्चारभ्य तत्कर्म दर्शनगमनादिकं करोति यतः एग
हेयादितः अग्रहणात्‌ ईश्वरेच्छातो वा गृहीत्वा अवलंब्येति यो जननात्‌ तत्र कर्त्ता कर्मकरणं देशकालौ समस्तेषु रेवप्रवृत्यारंभारमोय त्योगसादिकं रागादेषुष्णा दिकं च समुदा
यत्वं यपतहेतः चिन्मात्रं न देवस्वभावस्तस्यार्थः ६ ननु किं तत्कारणं यदपेक्ष्य नियमयोरपि जीवेशयोः कार्यत्वमुच्यते इत्याशंक्याह यद्वेतिवाशब्द एवार्थे। यदेवख्या यकर्ड

यतो गृहीत्वा हीं करोति यश्च यस्मिंश्च तां समारभते प्रवृत्तिं यस्मिंश्च यद्येन च यश्च कर्त्ता यत्कारणं ते समुदायमाहुः ६ यद्यप्यसद्व्यापकसा
धकं च यन्मंत्रवत्तस्यास्यनिचापि लोके यः सर्वहेतुः परमात्मकारी तत्कारणं कार्यमतोयदन्यत्‌ ७ ॥ ॥ ॥

स्वरूपं साधकं आर्षं जीवाख्यं चामृत उभयोर्विभुत्वे नित्यत्वे च तत्त्वत्वेन नियम्यनियामकभावो न स्यात्‌ तथा च अंतः प्रविष्टः शास्ता जनानां सर्वात्मेसा इत्यश्रुतयो
नोपपद्येरन्‌ एकस्यैवोभयात्मकत्वे मानमाह मंत्रवदिति। एक एव तत्त्वात्मा भूतेभूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदिति मंत्र एवात्र प्रमाणमिस
र्थः भूतात्मानि स्यात्मारकधेतिव्यापकत्वेन। स्थास्यनीतिस्थाणुत्वं कूटस्थत्वापरपर्यायमुच्यते यः आत्मकारी आत्मनैव एकाद्वितीयेन करोति सर्वमित्यात्मकारी तदा
त्मानं स्वयमकुरुतेसाहित्यश्रुतेः न तत्परं कारणं आनंदाद्ध्येव खल्विमानि भूतानि जायंत इत्यादिश्रुतेः आनंदमयाख्य ईश्वरस्त्वयंता कारणं। श्रुद्वापेक्षया कार्यमित्यर्थः तदिदमत्तं
कार्यमतोयदन्यदिति ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

एम०
८७

एवं स्वभावस्य परमकारणत्वमुक्त्वा ज्ञानात्मतामप्याह त्रिभिः यथाहीति स्वस्त्रैः सम्यगनुष्ठितैः पुण्यपापैः शुभाशुभेषु शरीरेषूत्पन्नेष्विदं स्वजं स्वभावाख्यं परमकारणं
ज्ञानं निसर्गसिमात्रं निबद्धं शुभाशुभवपुषां जनेष्वपि सहभवतोः विरोधादित्यर्थः ८ यथेति यथाहि कार्यस्योदीपः मन्दिरांतर्विषयमवभासयति तथाहि कमलस्यः ए
वं पंचेंद्रियरूपाः चैतन्यप्रदीपयुक्ता इन्द्रियगवाक्षप्रकाशाः ज्ञानदीपेन प्रदीप्ताः परवंतः चित्प्रकाशाधीनत्वात्प्रकाशकत्वात् न स्वतंत्रा इत्यर्थः तथा चक्षुतपः येन वागम्यघते पे

यथाहि कश्चित्सकलैर्मनुष्यैः शुभाशुभं प्राप्नुते याविरोधात् एवं शरीरेषु शुभाशुभेषु स्वकर्मजेष्वेव ज्ञानमिदं निबद्धं ८ यथा प्रदीपः
पुरतः प्रदीपः प्रकाशमन्यस्य करोति दीप्यन् तथेह पंचेंद्रियदीपवृक्षा ज्ञानप्रदीप्ताः परवंत एव ९ यथा च राज्ञो बहवो ऽत्यमा
त्याः पृथक्प्रमाणाः प्रवदंति युक्ताः तद्वच्छरीरेषु भवंति पंच ज्ञानैकदेशाः परमः स तेभ्यः १० यथार्चिषोऽग्नेः पवनस्य वेगा मरीच
योऽर्कस्य नदीषु चापः गच्छंति चायांति च संचरंत्यस्तद्वच्छरीराणि शरीरिणां तु ११ यथा च कश्चित्परशुं गृहीत्वा धूमं न पश्येज्ज्वल
नं च काष्ठे तद्वच्छरीरोदरपाणिपादं छित्त्वा न पश्यंति ततो यदन्यत् १२ ज्व

न च कुंपि पश्यति येनात्मकर्मनो मतः इत्याधाः ९ तेभ्य इंद्रियेभ्यः सः ज्ञानरूपः स्वभावः परमः १० अस्य ज्ञानस्य नित्यत्वं साधयति यथार्चिष इति शरीरेषु मनोद्वारा ज्ञानं निबद्ध
मपि शरीराण्येव नश्यंति न ज्ञानमित्यर्थः ११ उपाध्युपधेययोर्भेदज्ञानपारदृश्यत्वं सदृष्टांतमाह द्वाभ्यां यथा चेति गृहीत्वा व्यापारयित्वा १२ १२ १२ ॥

योगात् उपायात् । पश्यामीति नभवन्निंद्रियात्मा जीवः सुबुद्धिः परं बुद्धिं च समं एककालं पश्यतीत्यर्थः १३ देहनाशो मृत्यादिना बुद्ध्युपाधिश्छिदात्मा न बाध्यते इत्याह दृष्टा
मां । यथात्मन इति । अंगशरीरी अन्यतस्मात् आत्मनः पृथक् स्वप्नांतरे स्वप्नमध्ये यथा पश्यति सुमहान् सुबुद्धिः मनोबुद्धियुक्तः श्रोत्रादिभिर्दशभिरिंद्रियैः पंचभिः प्राणैश्च सहितः
समदृशा मारुतो आत्मनः शरीरं पृथक् करत्वमात्मचमश्यन्नापि नचात्मनो भिन्नत्वमजानन् शरीरं तामुक्तो भवति लिंगात् स्थूलदेहात् लिंगं तद्देयं देहांतरं १४ सन्निपातो मारणां

तामेव काष्ठानि यथा विमथ्य धूमं च पश्येत ज्वलनं च योगात् तद्वत्सुबुद्धिः सममिंद्रियात्मा बुधः परं पश्यति तं स्वभावं १३
यथात्मनो ऽगं पतितं पृथिव्यां स्वप्नांतरे पश्यति चात्मनो ऽन्यत् श्रोत्रादियुक्तः सुमहान् सुबुद्धिर्लिंगात्तथा गच्छति लिंगमन्यत् १४
उत्पत्तिवृद्धिव्ययसंनिपातैर्न युज्यते ऽसौ परतः शरीरी अनेन लिंगेन तु लिंगमन्यद्गच्छत्यदृष्टः फलसंनियोगात् १५ न चक्षु-
षा पश्यति रूपमात्मनो न चापि संस्पर्शमुपैति किंचित् न चापि तैः साधयते ऽथ कार्यं ते तं न पश्यंति स पश्यते तान् १६ ॥

सावद्वः स्वपदकर्मसंबंधात् । अनेन लिंगेन शरीभूतेन अदृष्टः अलक्षितः १५ एवमात्मनो बुद्ध्यादात्म्यं निकृतं संमार्यु क्त्वा वस्तुतो ऽसंगत्वमाह नचक्षुषेति इंद्रियाग्रा
ह्यत्वमुक्त्वा न स्पर्शमुपैतीत्यभोक्तृत्वद्वारा संगत्वमुक्तं न चापीत्यकर्तृत्वद्वारा ते च कर्णाद्याः स पश्यते तान् इति मात्रत्वमुक्तं साक्षिणो ऽपि बुद्धिवृत्तिव्याप्यत्वात् कर्मत्वमिति द्योतनस्फुल
द्वारा न पश्यंतीत्युक्तं १६ १६ ॥ ॥ ॥ ॥ ॥ ॥

नं २

असंगस्यापितस्याप: पिंडवत्धीमान् सम्यग्गम्यमानस्याप्यतीतिरित्याहयथेतिद्वयंपैगल्यादिकं कश्चित्रूप: पिंडादि: तथापितः वल्कलस्यादग्धत्वपिंगलत्वात्परं
परंगुणंरूपंवायथानविभर्त्तितथैवतत्सूक्ष्मस्यात्मन: रूपंचैतन्यंदेहेदृश्यतेनतद्देहोवल्कलतस्यैततः तथापितोदृश्यचक्षुषोगल्पादिकंयद्धाविवात्मनिदेहगतंदु:खा
दिकंप्रतीयतइत्यर्थ: १७उक्तदृष्टांतेनैवयथास्थूलशरीरंत्यक्त्वा प्राप्नोतितस्यतस्यधर्मान्नात्मन्यभिमन्यतइत्याहतथेति अदृश्यंतदस्थै:तदाश्रयंदेहांतराश्रयं १८ अत्र

यथासर्वमपिज्वलतोऽनलस्यसंतापनंरूपमुपैतिकश्चित् नचापरंरूपगुणंविभर्तितथैवतद्दृश्यतिरूपमस्य १७
तथामनुष्य: परिमुच्यकायमदृश्यमन्यद्विशतेशरीरं विसृज्यभूतेषुमहत्सुदेहंतदाश्रयंचैवविभर्तिरूपं १८
खंवायुमग्निंसलिलंतथोर्वींसमंततोभ्याविशतेशरीरी नानाश्रया: कर्मसुवर्तमाना: श्रोत्रादय:पंचगुणान्श्रयंते १९

असंगात्पूर्वदेहत्यागेदेहांतरेयादानंयसप्रकारमाहखमितित्रिभि: शरीरीम्रियमाण: खाद्युपादानकैर्देहांशै: खादीनन्वाविशते एवंश्रोत्रादयोपिसमस्तशनानाश्रया: खादी
पादानका: संतोपिकर्मसुपूर्ववज्ज्ञानहितेषुवर्तमाना: श्लिष्टा: पंचगुणान्शब्दादीन्श्रयंते अयमर्थ: स्थूलदेहनाशेपिकर्मणावद्धसप्तदशात्मकंलिंगंननश्यतिकिंतदे
हांतंप्रविश्यतितराजतो कामापेनतथावस्थिति:नमुक्तामतंप्राणोनूत्क्रामंतिप्राणाणमनूत्क्रामंतीतितंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतितथयातृणजलायुका:
समाक्रम्यपूर्वंजहातीति॥ १९ ॥

क्रामंतसर्वमत्रात्मनि

मो॰
८५

४१

तत्र किमिंद्रियं कस्य भूतस्य गुणं ग्रहयतेइत्यपेक्षायामाह। श्रोत्रं खजः खस्य गुणं शब्दं ग्रहयते इत्यनुषंगः पृथिव्याः गुणं गंधं घ्राणं संग्रहयते। विपाकः चक्षुरूपं तेजः परिणामः तेजोमयं रूपं जलाश्रयं तेजः रसप्रकाशकं रसनेंद्रियं रसं ग्रहयते वायव्यात्मकः स्पर्शकृतः इंद्रियविशेषत्वकतमेवं वायव्यात्मकं गुणं स्पर्शं ग्रहयते शब्दादिवासनानां सहितानाम् वश्रोत्रादयः कर्मसन्निहिताः संवर्तीतमर्थः २० पंचानामिंद्रियाणां मैथ्याः शब्दादयः भूतेषु खादिषु वसंतितानि च पंचनखादीनि इंद्रियेषु वसंति सर्वाणि चैतानि शब्दा

श्रोत्रं खतो घ्राणमथो पृथिव्यास्तेजोमयं रूपमथो विपाकः जलाश्रयं तेजउक्तं रसस्तु वाय्वात्मकः स्पर्शकृतो गुणश्च
२० महत्सु भूतेषु वसंति पंच पंचेंद्रियार्थास्त्वतथेंद्रियेषु सर्वाणि चैतानि मनोनुगानि बुद्धिं मनोन्वेति मनः स्वभावं
२१ शुभाशुभं कर्मकृतं यदस्मिन्तदेव प्रत्यादहते स्वदेहे मनोनुवर्तंति पराऽवराणि जलौकसः स्रोतस्वानुकूले २२

दीनि वादीनि इंद्रियाणि च मनोनुगानि मनः बुद्धिमन्वेति बुद्धिः स्वभावमन्वेति तेन इंद्रियाणि पराणि प्राहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु स इति गीतासं गत। ततस्त्वार्थानां कारणं मंद्रियाणि तेषां मनस्तस्य बुद्धिस्तस्याः स्वभावमेति क्रमात्सर्वं वासनाबाधितात्यं तत्सुखमेवं मत्तीत्ति तदवियोगाश्चिदात्मा पुनः पुनः संसरतीत्यर्थः एतदेवाह शुभेति स्वदेहे स्वकर्मार्जितं सू तनदेहे रंद्रियादीनि तदेव कर्मत्यादहते पतऐहिकान्नमतः पूर्वं जन्म कृतं पराऽवराणि पूर्वोक्तादीनि पूर्वसंस्काराणि वृत्तोपादंदेहे
कर्माणि कुर्वन्ननमुच्यत इत्यर्थः २२ २२ ॥ ॥ ॥ ॥

एम॰
८५

नचैवमपरिहार्यत्वाद्दुःसमनास्मंततेः अलंमोक्षाशापेत्याशंक्य अनादिकालागतमपिभ्रमंतत्त्वधीस्समूलमुन्मूलयितंक्षमेतेइतिप्रतिपादयितंसदृष्टांतंसंसारस्यभ्रमपूर्वकत्वमाह
चलमिति यथादृष्टिपथंदृष्टिज्ञानंअनतिक्रांतंसमस्तमितंवस्तुतत्स्यपंथाइवपंथाः हानोपादानादिमार्गोयस्यतत्तथादृष्टिपथंभ्रांतिज्ञानंतज्जंचलंवाधविषयतयास्
स्थिरंजनः परैतिपराक्रम्यएतिअवगच्छतिप्रत्ततत्वं यथानौस्थःनौचांचल्यंनीरतीरेआरोपयतिनोस्थैर्यंवनवृक्षादितंभवतिएवंपरंपरमात्मानंकूटस्थमपिबुद्ध्युपधानात्कू
टस्थमिवभासमानंबुद्धिमार्गंभ्रांतिजनकलक्ष्यंधीनिरोधेनपराक्रम्यपरमतत्त्वमभ्येतिएवंयथामरुस्थमुत्तकाकारंमहद्रूपमिवमहज्जलरूपमिवलोचनोत्तेजनवलेनाभितोभा

चलंपथादृष्टिपथंपरैतिसूक्ष्मंमहद्रूपमिवाभिभाति स्वरूपमालोचयतेचरूपं
परंतथाबुद्धिपरंपरैति २२ शांतोमोक्षधर्मेषुमनुबृहस्पतिसंवादे॥ ॥

त्तातथासूक्ष्ममपिचिदात्मतत्त्वंबुद्धियोगात्स्थूलप्रपंचात्मनाभातिएवंयथारूपंस्वमुखप्रतिबिंबंस्वरूपंस्वस्यमुखस्यतत्त्वंसूक्ष्मयोग्यमपिदर्पणाः आलोचयतेदर्शयति
५२ एवंकंमेवप्रत्यग्वस्तुस्वाज्ञानकल्पितचोरदर्पणाः पाप्मभूतविपदाद्याकारेणावभासयति तत्रयथाउपनेत्रदर्पणयोरुपाधेःकृतस्थौल्यंमुखस्यदृश्यत्वंचापैति। एवंधीनि
ग्रहेचित्तः स्थूलत्वंदृश्यत्वंचापैति। नत्वेवंकूटस्थस्यात्मनाविकारित्वसूक्ष्मस्थूलत्वेदृग्रूपस्यदृश्यत्वेचक्रमेणदृष्टांतत्रयं एवंचानादिरपिभ्रांतिस्तत्त्वज्ञानेननतयाश्चवाभे
नापिवाधितंशक्यानचभ्रांतेरुन्मज्जनंसंभवतिबुद्धेस्तत्वपक्षपातित्वात्तस्मात्भ्रांतिज्ञानापनयायआत्मज्ञानेयतितव्यमितिभावः २२ अष्टविंशः॥ ॥

ननु प्रागुक्तं निर्विकारस्याविकारित्वं न संभवति स्थूलत्वं च दृश्यस्य दृश्यत्वं च बुद्धियोगादिति तन्न बुद्ध्यतिरिक्तस्यात्मनोऽनुपलंभादित्याशंक्याह यदिति। आत्मेन्द्रियमनोयुक्तं भोक्तेत्या
हुर्मनीषिण इति श्रुतेः समनस्कैरिन्द्रियैरुपहितं पञ्जीवचैतन्यं तत्तच्चिराय चक्षुः कालं पुरस्तात्पूर्वं प्राप्तान्गुणान्विषयान्कालान्तरे संस्मरते बाल्येऽहमिदमन्वभूवमिति तदा मनो
रथकाले विषयेन्द्रियसंनिकर्षाभावे घटमूर्यात्रेयत्तानज्ञातत्वात्समनोमितत्वाद्बुद्धेरेवसर्वात्मतां प्राप्तात्तदन्ये न चैतन्येनावभासते इति। अस्ति बुद्ध्यधिकश्चेतनस्तत्रार्थः ननु त
दानीन्द्रियाण्येव विषयवासनावासितानि बुद्ध्यवकाशेन इत्याशंक्याह तेष्विति इन्द्रियेषूपहतेषु विलीनेषु शब्दाद्यग्रहात्पश्चात्स्वप्नकाले बुद्धेः रूपं त्रिपुटीज्ञेयज्ञानज्ञा

मनुरुवाच यदिन्द्रियैस्तूपहितान्पुरस्तात्प्राप्तान्गुणान्संस्मरते चिराय। तेष्विन्द्रियेषूपहतेषु पश्चात्स बुद्धिरूपः परमः स्वभावः॥ १ ॥

त्मिकां तद्रूपमस्य स बुद्धिरूपः सन्नमानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेति श्रुतेः समानो बुद्ध्या तादात्म्यं प्राप्तः परमः सर्वोत्कृष्टः स्वभावस्त्विद्रूपश्चा
त्मा बुद्धेरन्योऽस्त्येव च स्वरूपेणाभावः यथा जाग्रत्काले घटचक्षुषोर्भास्यभासकयोर्व्यतिरिक्तः कूटस्थः निर्विकारो ह्यादित्यः सत्तामात्रेण चक्षुषोऽनुग्रहं घटस्य च प्रकाशं करोति
एवं स्वप्नेऽपि मानमेयात्मना स्थितां बुद्धिं तद्रूपः उदासीनः प्रकाशोऽवभासयेदिति तस्माद्व्यतिबुद्धेः तत्तादात्म्यं तस्याविकारित्वाद्याक्रांतत्वमात्मेति सिद्धं॥ १ ॥

ननु मनोरथे इव स्वप्नेऽपि वा सकलानामपीन्द्रियाणां संनिधानात्तत्राप्यविशिष्टं बुद्धेरेवभासकत्वं तथा चक्षुरादिः स्वप्नावस्थायां प्रत्यक्षपाहत्य यथोक्तत्वात् द्रुक् जागरितदेशएवास्येति । ननु स्वप्नेऽप्यज्ञा
गरूपत्वमिन्द्रियाणामसत्त्वेऽनुपपन्नं इन्द्रियैरर्थोपलब्धिर्जागरितमिति प्रसिद्धेः अतो न मनोरथे इव स्वप्नेऽपि बुद्धिरिति क्वचेतना नास्ति द्वितीयत्याशंकाह यथेति । सः परमः युगपत् एकका
ले अयुगपत् एककाले अनेककाले च अतीतानागतेऽपदार्थजातं कृत्स्नं इह परत्र वा जन्मनि दृष्टं अविशेषात् समस्तानसमक्षं अन्तः सन्निधिर्येषां तान् संनिहितान् इन्द्रियार्थान् निशश्वरी
न्नोपि कुर्ते किंतु प्रकाशयत्येव पश्यतीति हेतोः तथा चलं परस्परव्यभिचारि अवस्थात्रयं संचरते पतो विद्वान्स्वाक्षी तस्मात्स्वाभाव्येभ्योऽनुवृत्तं भिन्नं कुसुमेभ्यः सत्त्वमिवेति न्यायात्
एकस्यार्थः अयमर्थः स्वप्नावस्थायां हि अतीतानागतं च वस्तुजातं युगपत्संनिहितमिव दृश्यते नतु इन्द्रियाणां सत्त्वेती स्मादिज्ञानेन स्मातनत्यतीत्यादिना तेषां सन्निकर्षे

यथेन्द्रियार्थान्युगपत्समेतान्लोपे कृतेनैकृत्स्नमनन्तकालं तथाचलं संच
रते स विद्वांस्तस्मात्स एकः परमः शरीरी २ ॥ ॥ ॥

रिति असन्निकृष्टमज्ञाने न तदानीमिन्द्रियतद्भावकल्पना यथा न हि रज्ज्वादिषु विवाधिष्ठानज्ञानार्थं न हि इन्द्रियापेक्षा इति आत्मनो वहेर्वाः विष्टानत्वेनाभिमतस्येन्द्रियायोग्य
त्वात् तस्मात्स्वप्ने धीरेवैका मातृमानमेयात्मना सतीन दृश्येन सा ज्ञाणामास्यते तत्स्वा स्वावस्थात्रयं चलमिति अविशेषात् जागरेऽपि मेवमात्राद्याकारेति परिशिष्ट एव साक्षी
शरीरी शरीरदर्शी निर्ज्ञेयमिति अर्थो वन्वितिक्रान्ति स्फुटस्वयं कृविषये वैतिक्रान्त्यर्थी विदांप्रसिद्धं अमयात्रायं प्रत्ययः स्वयंज्योतिरिति स्वप्ने आत्मनः स्वयंज्योतिष्ट्वज्ञापना
र्थं यत्र स्वप्नो ज्योतिर्नोपि ह्यसा निर्विषयत्वं स्यादिति दिक् २

चलं संचरतेऽस्येत ह्यचेष्टरजइति प्रत्येकं त्रिगुणात्मकानि तान्यहंकारी नि बुद्धिः स्थानानि तेषां गुणानां तद्धनदुःखादीन विरूपान्परस्परविलक्षणान् गच्छति जानाति
वन भुंक्ते अवस्थांतरगतस्य दुःखादेरमत्रादर्शनात् । तथा च श्रुतिः सप्तेत्रवपश्यन्ति तिष्ठणं चयायां वानन्वागतस्तेन भवत्यसंगोह्ययं पुरुष इति अतो बुद्धेरेव दुःखा

रजस्तमः सत्वमथोत्तरीयं गच्छन्समौ स्थानगुणान्विरूपान् तथेंद्रियाण्यपि शनैश्च
रीरीकृताशनं वायुरिवेंधनस्थं ३ ॥

दिभोक्तृत्वं तत एव कर्तृत्वं न त्वात्मा भोक्ता कर्ता वा किंतु दासीन बोधमात्र एवेत्यर्थः इममेवमायं इंद्रिय संबोध्यपि दिशतितथेति । अवस्थाय थेनेव इंद्रिय पथेनापि बुद्धेरेव
सुखादि भोक्तृत्वमर्थः अत्र दृष्टांतः कृतेति यथा काष्ठस्थोऽग्निरेव काष्ठं दहति न वायुः सत्वग्निं दीपयत्येवमेवं । इंद्रियस्था धीरेवेंद्रियजं सुखादिकं भुंक्ते चितिस्तु बुद्धिं चेतन
यत्येव न तत्रदीपं सुखादिकं भुंक्ते इत्यर्थः ३ ॥ ॥ ॥ ॥ ॥ ॥

एवंवृद्धेः एथकत्वहात्रिनमात्मनत्वंचक्षुराघगोचरत्वाह नचक्षुषेति रूपंतरूपंचक्षुषानपश्यति। स्पर्शनंत्वगिंद्रियंनपश्यति रूपस्पर्शरहितत्वात्। नचहेतुः यतइंद्रियैरिंद्रियंप्रा
णस्यप्राणमुतचक्षुषश्चक्षुः श्रोत्रस्यश्रोत्रंमनसोयेनमनोविदुरितिश्रुतेरिंद्रियप्रकाशकंनेंद्रियप्रकाश[illegible]कत्वंयातीत्यर्थः नहिदाह्यदाहकोग्निर्दाह्यत्वोमवति। इंद्रि
याणामितिपादेनिर्धारणेषष्ठी। इंद्रियाणांमध्येस्पर्शनंयत्तदपिनपश्यतीतियोज्यं श्रोत्रेणलिंग्यतेगम्यतइतिश्रोत्रगम्यमपिनस्त्रशब्दत्वात् एतच्चप्रमाणानांतराणामप्युपल
क्षणांकथंतर्हितस्यतत्त्वोपनिषदंपृच्छामीत्युपनिषद्गम्यत्वंदृश्यतेतत्रप्रमाणवेद्यत्वेनिर्धीगम्यत्वंचश्रूयतइत्याशंक्याह श्रवणेनदर्शनंतथाकृतमिति। तथा कथंयेनयश्यतित

नचक्षुषापश्यतिरूपमात्मनोनपश्यतिस्पर्शनमिंद्रियाणां
नश्रोत्रलिंगंश्रवणेनदर्शनंतथाकृतंपश्यतिनहिनश्यति ५

हिनश्यतीति। तच्छब्दयोगाद्येनेत्यध्याहार्यं अयमर्थः आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिआत्मदर्शनार्थत्वेनश्रवणादिकंविधीयते। तत्रविहित
त्वंपदार्थस्यतत्त्वमसीतिवाक्यादात्मनोब्रह्मभावावगतौवेदाश्रवेदाइतिवेदांतानामपिबाधःश्रूयते अमस्यनुवाक्यार्थध्यानेनतदवगतौमनसोपिलयःश्रूयतेताव
त्मनोनिरोधस्वंत्वदिंद्रियावस्थायंगतमितितदिदमुक्तंयेनकरणेनशब्देनमनसावापश्यतिआत्मानंनहिनश्यतीति एवंश्रवणेनवेदांतवाक्यविचारेणआत्मनोदर्शनं
तथानाहशंत्रसत्तामितसमस्तक्रियाकारकादिहेतंकृतंविहितं तथाचश्रुतिः यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिः ५ ॥ ॥ ॥

श्रोत्रेति स्वं स्वं आत्मानं न पश्यंति तत्र किमु वक्तव्यं परमात्मानं न पश्यंतीत्यर्थः सर्वस्यात्मा सौ तत्स्वेनाहृद्यचिन्मात्रत्वमुक्तं सर्वदर्शीति तत्सेव दृश्यद्रष्टात्मत्वमुक्तं पुनः सर्वज्ञ इति दृश्यदृष्टे नित्यसंबंधश्चोक्तस्तस्य पीनरुक्तं ५ एवं आत्मनि साधकं प्रमाणं प्रदर्श्य बाधकाभावमप्याह यथेत्यादिना ६ ज्ञानात्मवान् ज्ञानेनैव स्वरूपवान् ज्ञानस्वरूप इत्यर्थः ७ आत्माप्रतीयमानोपि न प्रतीयत इति सदृष्टांतमाह। पश्यन्निति सोमेत्यादर्शनत्वेप्रति विंवेतं जगत्तत्त्वलोकलंकवद्वोध्य पश्यन्नपि न विंदति इदं जगदेव चंद्रे दृश्यत इ तिनजानाति। एवं आत्मज्ञानेप्यति पराङ्मुखः न चायमेकांतेना विषयः अस्मत्प्रत्ययविषयत्वादिति अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरिति वा। तथापि ब्रह्माभिन्नत्वेनाज्ञा

श्रोत्रादीनि न पश्यंति स्वं स्वं आत्मानमात्मना सर्वज्ञः सर्वदर्शी च सर्वज्ञस्तानि पश्यति ५ यथा हिमवतः पार्श्वे पृष्ठं चंद्रमसो यथा न दृष्टपूर्वं मनुजैर्न च तन्नास्ति तावता ६ तद्वद्भूतेषु भूतात्मा सूक्ष्मो ज्ञानात्मवानसौ अदृष्टपूर्वश्चक्षुर्भ्यां न चासौ नास्ति तावता ७ पश्यन्नपि यथा लक्ष्म जगत्सोमे न विंदति एवमस्ति न चोत्पन्नं न च तत्त्रपरायणं ८

त्वात्तन्न चोत्पन्नं ननु यथात्मैव ब्रह्म तर्हि सज्ञात एव न च तज्ज्ञाने शोकादिनिवृत्तिरूपं फलं दृश्यतेऽतः किं शास्त्रेणेत्याशंक्याह न च तत् उपरायणं तत् आत्मवेदनं न परायणमि तिनव न हि देवं परायणमित्यर्थः तथा च श्रुतिः यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः तदा देवमविज्ञाय दुःखस्यांतो भविष्यतीति ज्ञातोपि भर्तृवत् दम्यथात्वेन गृहीतत्वा त्तमप्युज्ञा नापशान्वेपेक्ष्यतीत्यर्थः भर्तुः किल राजवत्स मो हृदेशस्थो भृत्सोमेरमात्मेभर्तृर्मृतो वत्सस्त्तकृसो ज्ञात इति राज्ञे ज्ञापितेतं च समीपगतं राजायश्यन्नपि वीरो यात्नपश्यती वेत्याच कृतेदृहाः ८ ॥ ॥ ॥ ॥ ॥

अपिवादृष्टमपिपदार्थमनुमानेनजानंतीत्याहरूपेति। स्थूलदृष्ट्यारूपवंतमपिदृष्टंउदयास्तमनेआद्यंतेमरुन्मात्रत्वेनअरूपत्वात्बुधाः धियाअरूपंमरुन्मात्रमेवसमन
पश्यंति। यथाहुः आदावंतेचयन्नास्तिवर्तमानेपितत्तथेति तथातज्ज्ञाः उदयास्तमयगतास्तदर्शिनः सवितुर्गतिंदूरत्वाद्दृष्टामप्यदृष्टेणागत्यभावाणामपिदेशांतरप्रा
प्तिलिंगेनधियापश्यंति। एवंदृश्यमानस्यास्तत्वे ऽदृश्यमानस्यसत्त्वेचदृष्टांतद्वयमुक्तं ९ दार्ष्टांतिकमाहतथेति। यथेदंतथाद्रस्थंरविगतिवत्तदुर्लक्ष्यंप्रकरणात्आ

रूपवंतमरूपत्वादुदयास्तमनेबुधाः धियासमनुपश्यंतितद्भ्रनाः सवितुर्गतिं ९ तथाबुद्धिप्रदीपेनदूरस्थंसविप
श्चितः प्रत्यासन्नंनिनीषंतिज्ञेयंज्ञानाभिसंहितं १० नह्यखिल्वनुपायेनकश्चिदर्थोभिसिद्ध्यति सूत्रजालैर्य
थामत्स्यान्बध्नंतिजलजीविनः ११ मृगैर्मृगाणांग्रहणंपक्षिणांपक्षिभिर्यथा गजानांचगजैरेवंज्ञेयंज्ञानेनगृह्य
ते १२ अहिरेवह्यहेःपादान्पश्यतीतिहिनःश्रुतं तद्वन्मूर्तिषुमूर्तिस्थंज्ञेयंज्ञानेनपश्यति १३ ॥ ॥

त्मानंबुद्धिप्रदीपेनपूर्वोक्तरीत्यासमनुपश्यंतीत्यनुषज्यते। प्रत्यासन्नंनिकटस्थमपिज्ञेयंप्रपंचंनिनीषंतेनेतुमिच्छंति किंप्रति ज्ञानाभिसंहितंज्ञानशब्देनाभिसंहितंता
नशब्दाभिधेयब्रह्मसत्यंज्ञानमनंतंब्रह्म विज्ञानमानंदंब्रह्मेत्यादिश्रुतिभ्यः तत्प्रति ब्रह्मणिप्रविलाययितुमिच्छंतीत्यर्थः १० एतच्चोपायेनैवसिद्ध्यतीतिसदृष्टांतमाह
नहीति ११ उपादानोपादेययोर्भेदात्मृगाणांमृगादिवत्ज्ञानेनसजातीयेनज्ञेयंग्रहणेनवशीक्रियतेअस्मिन्नेवदृढार्थः १२ मूर्तिषु स्थूलदेहेषुमूर्तिस्थंलिंगदेहस्थं
ज्ञेयमात्मानंज्ञानेनधीवृत्त्या १३

नत्वात्मनो धीवृत्तिविषयत्वेन जडत्वापत्तिरित्याशंक्याह। नोत्पन्नं हंत इति। परा बुद्धिः स्वरूपाधीवृत्तिः परं शुद्धं बोध्यं न पश्यति घटवत् तथापि वृत्तिव्याप्तिरेव ब्रह्मणः प्राप्तिः न तु फ
लव्याप्तिरित्यर्थः यथोक्तं। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्ष्यत इति १४ वृत्तिरूपोपाधिलयेपि ब्रह्मप्राप्तिर्न तु स्वरूप
शेष इति सदृष्टांतमाह यथेति स्वमावास्यायां पूर्णो महवाप्तं प्राप्य स्वलिंगत्वात् ज्ञापकोपाधिसूक्ष्मत्वात् तथा अनष्टं शरीरिणं विद्धि १५ कोषः स्थूलशरीरं तस्माद्विमुक्त्या

नोत्पन्नं हंत यथा वेन्नमिंद्रियैरिंद्रियाणपि तथैवेह परा बुद्धिः परं बोध्यं न पश्यति १४ यथा चंद्रो ह्यमावास्यामलिंगत्वान्न दृ
श्यते न च नाशोस्य भवति तथा विद्धि शरीरिणं १५ क्षीणकोषो ह्यमावास्यां चंद्रमा न प्रकाशते तद्वन्मूर्तिविमुक्तोसौ
शरीरी नोपलभ्यते १६ यथाकाशांतरं प्राप्य चंद्रमा भ्राजते पुनः तद्वल्लिंगांतरं प्राप्य शरीरी भ्राजते पुनः १७ जन्मवृद्धिक्षये
पश्चात्सप्रज्ञक्षयेणोपलभ्यते सा तु चांद्रमसी वृत्तिर्न तु तस्य शरीरिणः १८

विमुक्तः १६ एवं सति समाधौ रात्मनः सत्वमुक्त्वा व्युत्थाने लिंगेनोपितदाह यथेति स्वाकाशांतरं स्वप्रकाशभेदं॥ ॥लिंगांतरमित्युक्तेः समाधौ पूर्वलिंगनाशउक्तः
तथा हृष्टिस्रष्टिमायेन लिंगांतरोत्पत्तिरित्यर्थः १७ जन्मेति चांद्रमसी चंद्रमंडलस्य वृत्तिर्धर्मः एवं शरीरस्यैव जन्मादि नात्मन इत्यर्थः १८ ॥ ❁ ❁ ॥

तत्र परमतेन युक्तिमाह उत्पत्तीति उत्पत्त्यादिकालभेदात्परिमाणादिभेदेन शरीरभेदेऽपि स एवायं देवदत्त इति शरीरिण ऐक्यं प्रत्यभिज्ञायते एवममावास्यामित्यदर्शनेन लक्ष्यते तत्र
दर्शनं गतोऽपि मूर्तिमान् लब्धदेहः स्वं देहमप्येक एव बाल्याद्यवस्थान्तरगासामर्थ्यदेहीत्यर्थः १९ देहदेहिनोः संबन्धोऽयं प्रतीयमानोऽपि कालत्रयेऽपि नास्तीत्याह नेति। चिद्रूपं देहिनं
अविद्रूपो देहः प्रकाशमन्धकार इव स्प्रष्टुं त्यक्तुं वा न शक्नोतीत्यर्थः २० एवं सत्यपि देहं विना न देहिनः प्रकाशो [illegible] नापि देहिनं विना देहप्रकाश इति म
तिसदृष्टान्तमाह द्वाभ्यां यथेति तमो राहुः अदृश्योऽपि दृश्येनार्कादिना युक्त एव प्रकाशते। एवमात्मा देहेनेति अयमहमस्मीति प्रकाशते देहाभावे तु व्यक्तो न स्पष्टं

उत्पत्तिवृद्धिव्ययता यथा स इति गृह्यते चन्द्र एव त्वमावास्यां तथा भवति मूर्तिमान् १९ नोपसर्पद्धि भुवद्वा शशिनं दृश्यते तमः
विसृजंश्चोपसर्पंश्च तद्वत्पश्य शरीरिणम् २० यथा चन्द्रार्कसंपृक्तं तमस्तदुपलभ्यते तद्वच्छरीरसंपृक्तः शरीरीत्युपलभ्यते २१
यथा चन्द्रार्कनिर्मुक्तः स राहुर्नोपलभ्यते तद्वच्छरीरनिर्मुक्तः शरीरी नोपलभ्यते २२

प्रकाशत इत्यर्थः विनाशमेवाप्तो भवतीत्यादिश्रुतेः २१ यथेति दृष्टान्तदार्ष्टान्तिकयोरर्थान्वयः यथा अर्कविमुक्तो राहुर्न प्रकाशते एवं चैतन्यमन्तरेण जडो देहो न प्रकाश
त इत्यर्थः दार्ष्टान्तिके ऽन्यथा योजना तन्न दृष्टान्तमुक्तवान् अप्रकाशमानं शरीरं स्वीयत्वेन यस्यास्तीति तद्वच्छरीरं शिवदात्मानेन निर्मुक्तः शरीरी नोपलभ्यत इति स्वर्गीव्यक्त इत्या
दौ स्वर्गमात्रव्यस्य स्वशरीरमात्रानुरक्तं भोक्तृ विवक्षितं न तैवरीत्याः एवं लोकोऽपि शरीरोपलंभे आत्मान्वयः प्रदर्शितो यः यथा अक्तरीत्याव उभयोरपि श्लोकयोरन्वोप
लंभे शरीरान्वयव्यतिरेकौ दर्शितौ २२

मौ१

नन्वेवं मरणे शरीराभावादात्मनोप्यभावः स्यादित्याशंक्य तत्रापि शरीरांतरसंबंधोस्तीति सदृष्टांतमाह यथेति अमावास्यां सूर्येण सह गां संगतश्चंद्रः स्फूर्तिं न दृश्यते तेन समयांतरे दृ
श्यमानोपि न दृश्यते एवमेव एवमेकशरीरनिर्मुक्त आत्मा कर्मणः फलभूतैः शरीरांतरैः युज्यत एवेति न शरीराभावादात्माभावोस्ति किं तु भोगाद्भिन्न इत्यर्थः २२ एकोनविं
शः देहसंबंधस्य परिहार्यत्वं स्कृत्वा मु[illegible] मुक्तो देहेनामाभूदिति तन्निवृत्तिसाधनं योगं वक्तुं सदृष्टांतं देहवियोगप्रकारमाह यथेति। यथाव्यक्तं स्थूलशरीरं शेते स्वप्ने

यथा चंद्रोमावास्यां नक्षत्रैर्युज्यते गतः तद्वच्छरीरनिर्मुक्तः फलैर्युज्यति कर्मणः २३ इति मोक्षधर्मेषु मनुबृहस्पतिसंवादे॥ ॥
मनुरुवाच यथाव्यक्तमिदं शेते स्वप्ने चरति चेतनं ज्ञानमिंद्रियसंयुक्तं तद्वत्प्रेत्य भवाभवौ १ यथांभसि प्रसन्ने तु रूपं पश्यति
चक्षुषा तद्वत्प्रसन्नेंद्रियत्वाज्ज्ञेयं ज्ञानेन पश्यति २ स एव लुलिते तस्मिन् यथा रूपं न पश्यति तथेंद्रियाकुलीभावे ज्ञेयं ज्ञा
नेन न पश्यति ३ अबुद्धिरज्ञानकृता अबुद्ध्याकृष्यते मनः दुष्टस्य मनसः पंच संप्रदुष्यंति मानसाः ४ ॥ ॥

चेतनं लिंगशरीरं यथाव्यक्तादिदं स्वप्ने चरति तद्वत् संसारः इंद्रियसंयुक्तं लिंगमपि शेते सुषुप्तौ केवलं ज्ञानं प्रेत्य लिंगात् वियुज्य चरति तद्वद्भवाभावो मोक्ष इत्यर्थः १ ज्ञेयमात्मानं ज्ञा
नेन बुद्ध्या आत्मज्ञानात् च्यवते तत्र इंद्रियजयादुपायवतीत्यर्थः २ विपर्यये बंधमाह स एवेति ज्ञाने बुद्धौ न पश्यति ३ अबुद्धिरविद्या अनित्याशुचिदुःखानात्मसु देहादिषु नि
त्यशुचिसुखात्मबुद्धिः विपर्ययरूपा सा च अज्ञानजा आकृष्यते रागाद्याक्रांतं भवति पंच श्रोत्रादयः मानसाः मनःप्रधानाः ४ ॥ ॥ ॥ ॥

तं १ … सुखं २

अज्ञानतमः मोहरूपं तैः अवगाहे अत्यंतमग्नः अदृष्टवत् धर्माधर्मयुक्तं यथा स्यात् तथाभूतात्मा जीवः विषयेभ्यः शब्दादिभोगार्थं निवर्त्तते अतः प्रवर्त्यते ५ अंतं नाशं गतं अन्तर्गतेहितोपापविरतेति समासः तर्षः तृष्णा शाश्वत सेति भावप्रधानो निर्देशः अमर्थात् तत्साधनयोः विपरीतं ७ यदि वा स्वच्छे आत्मनि बद्धे ८ प्रसृतैर्विषयेषु रन्ग

तं १ … सुख २

अज्ञानतमसो विषयेष्ववगाहेन तमस्यं अदृष्टवद्भूतात्मा विषयेभ्यो निवर्त्तते ५ तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् निवर्त्तते तदा तर्षः पापमंतगतं यदा ६ विषयैः संसर्गाच्छाश्वतस्य न संश्रयात् मनसा चान्यथा कांक्षे मरं न प्रतिपद्यते ७ ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ८ प्रसृतैरिंद्रियैर्दुःखी तैरेव नियतैः सुखी तस्मादिंद्रियरूपेभ्यो यच्छेदात्मानमात्मना ९

तैः नियतैः निगृहीतैः इंद्रियैः सुखं तेन निरूप्यंते इति इंद्रियरूपेभ्यः शब्दादिभ्यः यच्छेत् आत्मानं इंद्रियसंयमनसेव निगृह्णीयात् ९

लवणोदकन्यायेनकारणेकार्यलयनियमादिंद्रियमनोबुद्धिज्ञानमहत्तांपूर्वपूर्वस्योत्तरोत्तरस्मिंश्चविलयायतेषांकार्य कारणभावमाहइंद्रियेभ्यइति।पूर्वंकारणंज्ञानं
जीवात्मा।महत्तरमात्मातथाचानेनैवक्रमेणाभ्यन्तरवपिइंद्रियादीनांप्रविलापनंदृश्यते यच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनिज्ञानमात्मनिमहतिनि

इंद्रियेभ्योमनःपूर्वंबुद्धिः परमणततः बुद्धेः परतरंज्ञानंज्ञानात्परतरं
महत ९० ९० ९० ९० ९०

ξ१

यच्छेच्छांतआत्मनीतिश्रुत्यर्थस्तु वाक्वाचंवात्तादिवाह्येंद्रियाणिमनसिनियच्छेत्मनसीइतिदैर्घ्यंछांदसं।वागादिव्यापारमुत्सृज्यम नोमात्रेणावतिष्ठेतेत्यर्थः
:मनोपिविषयविकल्पाभिमुखंज्ञानशब्दोदितायांबुद्धौनियच्छेत् तांचमहत्यात्मनिभोक्तरिनियच्छेत्अस्मीत्येतावन्मात्रेणावतिष्ठेततमपिशांतेपरस्मिन्नात्मनियच
स्यांकाष्ठायांस्वप्रकाशसमस्तविशेषेनियच्छेदिति ९० ॥
९९

त्रविलापनक्रमनियमायउत्पत्तिक्रममाह अव्यक्तेति अव्यक्तात्महद्विन्मात्रात् युक्तं आहतं मनसः श्रोत्रादीनि श्रोत्रादिभिः शब्दादयः प्रसज्जाइत्यर्थः तथाच स्मृ
तौ श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येतीत्यात्मनि हि विषयाणामिंद्रियमनआदीनां लयः प्रबोधश्च एतस्मादात्मनः सर्वे प्राणाः यथायतनं विप्र
तिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति प्राणशब्दितेभ्य इंद्रियेभ्यो देवानामादित्यादीनां तेभ्यो लोकानां चोत्पत्तिः श्रूयते तस्मादुक्त एव शब्दार्थः ननु किमर्थमयं क्र
मो विवक्ष्यते असमाधौ समाधिं न मनिहृत्यर्थमिति चेन्मैवं तथाहि सर्वकहानउत्तरोत्तरकत्वं प्रविविक्तेतो योगिनो निरुध्यमाने चित्ते दिने दिने लयाभ्यासाद्धीयते उत्तरोत्त

अव्यक्तात्परतं ज्ञानं ततो बुद्धिस्ततो मनः मनः श्रोत्रादिभिर्युक्तं शब्दादीन्साधु पश्यति ११ यस्तानत्यज
ति शब्दादीन्सर्वाश्च व्यक्तयस्तथा विमुंचेत्प्रकृतान्ग्रामांस्तान्मुक्तोऽमृतमश्नुते १२ ॥ ॥ ॥

द्विवत्सरं वा वत्स्यां वा सहसा गच्छन्ति तो लयविक्षेपौ हेयतया आक्षेपे तेलयविक्षेपरहितं मनः कृत्वा सनिश्चलं यदा यात्यमनीभावं तदा तत्परमं पदमिति तत्रैव स्थूलप्रपं
चात्सूक्ष्मं गच्छन्मध्ये लीनः सद्यः सप्रसूतस्नात्कारणं गच्छन्लीनो विदेहः कारणात्सूक्ष्मं गच्छन्लीनः प्रकृतिलयः सूक्ष्मात्मा सोजीवन्मुक्तः तत्रैव संसार्येव मध्यमो
क्रममुक्तिभाजो उत्तमस्तु सद्योमुक्तिभागिति ११ तदेतदाह यस्तानिति यस्त्यजति त्यजेत व्यक्तीः शब्दाद्याश्च पंचभूतानि विषयादीनि कारणशरीराणि मुक्त्वा हार्दाकाशे
भासमानानि विमुंचेत प्राकृतान्प्रकृतस्थान्ग्रामान्ग्रामवदं तः कारणं पाद्यसप्तं बहिष्षस्थानानि स्थूलसूक्ष्मकारणशरीराणि मुक्त्वा अमृतं कैवल्यमश्नुते १२

मो० २६

प्राकृतान्यामानिमत्रसंख्याभिमतायकृतिमीश्वरंजीतिआत्मनएवेंद्रियाधकृष्यात्तमप्राविति महदशांतमाहहृम्भांउयन्तीति १३ इंद्रियगुणान्इंद्रियभोग्यान्‌रूपादीन्‌
आहृत्यआत्तस्वरूपंगच्छतीतियोजना १४ अस्यउनः पुनर्देहावाप्तौहेतुमाहयन्नीतमितिप्रणीनंकर्माणाउयस्यापितंमार्गेविषयंकर्मणोवनीयमानः कर्मफलंप्र
राहिप्राप्नोतियतः प्रवृत्तंप्रवृत्तिप्रधानंधर्मंपुण्यपापात्मकं। आत्मवानस्यात्मविदितिपाठेप्रारब्धकर्ममात्रविषयोयंश्लोकः १५ एतत्परिहारार्थंनिवृत्तंधर्ममाहवि

९८

उयन्तिसवितायद्वात्तजतेरश्मिमंडलं सएवात्तमुपागच्छत्तदेवात्मनियच्छति १३ अंतरात्मातत्तथादेहमाविश्येंद्रि
यरश्मिभिः प्राप्येंद्रियगुणान्सर्वान्सोस्तमाहृत्यगच्छति १४ प्रणीतंकर्मणांमार्गेनीयमानः पुनः पुनः प्राप्नोत्ययंकर्मफलं
प्रवृद्धंधर्ममात्मवित १५ विषयाविनिवर्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्तते १६ बुद्धिःकर्मगुणैर्हीना
मं१ यदामनसिवर्त्तते तदासंपद्यतेब्रह्मतत्रैवप्रलयंगतं १७ ॥
वि२ प्रलत

षयाइति आहरणंआहारोविषयभोगस्तद्वर्जितस्य। विषयाः शब्दाद्यभिलाषाः निवर्त्तंतेपरंतुरसोवासनात्मकोननिवर्त्ततेसोपिपरंआत्मानंदृष्ट्वाआत्मावासनकलंका
कामस्यपरंसोनिवर्त्ततेभोगेच्छांत्यक्त्वाः स्मानंपश्यतोविषयवंधोनिवर्त्ततइत्यर्थः १६ कर्मगुणैः कर्माणिगुणाभूतानियेषांतेविषयसंगैः मनसिमनः प्रधानेलंपदा
र्थेः स्मितामात्रे। तदामनोपीतिशेषः ब्रह्मसंपद्यतेकुतः पतत्तत्रैवप्रलयंगतंभवति १७ ॥ ॥ ॥ ॥

गपं० २६

ब्रह्मपदार्थमाह अस्पर्शनमिति स्पर्शादिहीनत्वात् स्पर्शनादिक्रियानाश्रयः अनिंद्रियत्वात् घ्राणादिक्रियाहीनं अश्रवणं अवितर्कं च अनुमानागम्यं ईदृशं परं ब्रह्म सत्वं बुद्धिः प्रविशते १८ अध्यायार्थमुपसंहरति मनसीति आहृतयोषदादिप्रपञ्चरूपः मनः संकल्पकृतत्वात् तत्रैव मग्ना भवंति ॥ यथा कृपादावपि धरणीतंमत्ते दोष निमित्तरूपा रूपादयो विषयाः संकल्पकृता इति एवं मनसो बुद्धौ बुद्धेर्जीवे तस्य ब्रह्मणि विलय इत्यर्थः १९ सिद्धिर्नेति नकारः काकाक्षिवदुभयत्र संबध्यते कार्ये

ज्ञानं २ — मग्ना

अस्पर्शनमशृण्वानमनास्वादमदर्शनं अघ्राणमवितर्कं च सत्वं प्रविशते परं १८ मनस्याकृतयो मनस्त्वभिगतं मतिं मतिस्त्वभिगता ज्ञानं ज्ञानं चाभिगतं परं १९ इंद्रियैर्मनसः सिद्धिर्न बुद्धिं बुध्यते मनः न बुद्धिर्बुध्यतेऽव्यक्तं सूक्ष्मं त्वेतानि पश्यति २० मोक्षधर्मेषु मनुबृहस्पतिसंवादे ॥ ॥ मनुरुवाच दुःखोपघाते शारीरे मानसे चाप्युपस्थिते यस्मिन्न शक्यते कर्तुं यत्नस्तं नानुचिंतयेत् १ भैषज्यमेतद्दुःखस्य यदेतन्नानुचिंतयेत् चिंत्यमानं हि चाभ्येति भूयश्चापि प्रवर्तते २ प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ३ ॥ ॥ ॥

एकारणाव्याप्तिरिंद्रियादयः स्वस्वकारणं न बुध्यंते सूक्ष्मं तु विद्वांसः सर्वे पश्यंति न हि तु विद्वांस इतरे स्वस्वकार्यं पश्यंतीत्यर्थः २० विंशः दुःखोपघाते इति दुःखरूपे उपघाते प्रागुक्ते योगे विघ्ने सति । शारीरे व्याध्यादौ मानसे शोकादौ च यस्मिन् सति यत्नो योगाभ्यासः कर्तुं न शक्यते तं दुःखोपघातं नानुचिंतयेत् अचिंत अचिंतयैव तत्परिहार इत्यर्थः १ एतदेवाह भैषज्यमिति ३

अज्ञामेवाहानित्यमितिनगच्छेन्नगर्हे कुर्यात् ४ उपक्रमं प्रतीकारोपायं ५ प्रसंगं भवति ६ तेचाभ्यासमिगताः ७ पालनेचतेषांचेल्लेशसंबंधः दुःखि
पिचसतिनाधिगम्यते कदाचित् ८ एवं दुःखनिवृत्त्युपायं वैराग्यमुक्त्वा सर्वपापाघं ब्रह्मात्मज्ञानमाहुर्ज्ञानमिति ज्ञानं ब्रह्मज्ञेयं अहंकारादिषु
दांतं तदात्मनात्मभिनिर्वृत्तं अविद्यानिष्पन्नं अंतरवमनः ज्ञानगुणं ज्ञानस्यधर्मः पानकास्येवकटकं प्रज्ञाकारणं ज्ञानेंद्रियैः संपन्नं नचेतसाम्नाति

अनिर्यंत्रोवनं ह्यपंजीवितं द्रव्यसंचयः आरोग्यंप्रियसंवासोगच्छेत्तत्रनपंडितः ४ नज्ञानपदिकं दुःखमेकः शोचित
महेति अशोच्यस्त्वतिकुर्वीत परिपण्यप्युपक्रमं ५ सुखाद्बहुतरं दुःखं जीविते नास्ति संशयः स्निग्धस्येंद्रियार्थेषु मो
हान्मरणमप्रियं ६ परित्यजतियोदुःखं सुखं वाप्युभयं नरः अभ्येति ब्रह्मसोत्यंतं न तं शोचंति पंडिताः ७ दुःखमर्था
हि युज्यंते पालने न च ते सुखं दुःखेन चाधिगम्यंते नाशमेषां न चिंतयेत् ८ ज्ञानं ज्ञेयाभिनिर्वृत्तं विद्धि ज्ञानगुणं मनः प्रज्ञा
करणसंयुक्तं ततो बुद्धिः प्रवर्तते ९ ॥ ॥ ॥ ॥

ततोऽनंतरं बुद्धिर्विषयाकारावृत्तिर्भवति एतेन पदेन दुःखमनवस्थापकम्य सर्वोपायेन ज्ञानिर्यज्ञानस्य नामधेयाभिमवंदेश यह्नैः यदंदस्यापरिताबज्ञापरि
शपज्ञानेनश्रेष्ठं तेन करणदेवताभूतानां भौतिकानामपि नाण्डज्ञानं संप्रज्ञाप्रतिष्ठलं च हारककर्मापयेनोत्क्रोतोमेव पज्ञां ब्रह्मेति यदंता ज्ञानेरर्थां वस्तादृतं
पारत्र्येणादर्शितं यतर्थं न तत्कारणवियोगहेतुः बुद्धिरिति चोक्तं ९ ९ ॥ ८५ ॥ ॥ ॥ ॥ ॥ ॥

बुद्धेर्निग्रहस्तदभिव्यक्तिहेतुरित्याह यदेति यदा कर्मगुणैः कर्माशयैः संस्कारैः सहिता बुद्धिः मनसि मननात्मिकायां धीवृत्तौ वर्तते तेन तदा मनःपरिणामेन तत्र हृदि ब्रह्म
प्रज्ञायते नाहं शरीरात्प्रत्युदेतीत्यत्र हेतुमाह ध्यानेति ध्यानं यमनियमादिभिः स्वांगैः सहितं ध्यानं ध्येयाकारप्रत्ययसंततिः सर्वयोगाख्यस्तदनिधि ध्यानेन समाधिना ब्र
ह्माकारवृत्तिविशेषेण कर्मशोधितेन निपादकर्मणः वाह्यविषयप्रकाशनाद्येनेति व्याख्येयं १० गुणवती इंद्रियादिमती गुणेषु रूपादिषु अपरोक्षज्ञानात् ११ स२
यदा त्वसाननाशकाले ध्यानं ध्येयं वस्तु मनसि धीवृत्तौ प्राप्नोति अभिव्यज्यते पूर्वजं मिथ्याज्ञानस्यापि कारणं तस्माद्व्यक्तमुत्पन्नमित्यादि स्मृतेः निकषे यथा व

यदा कर्मगुणोपेता बुद्धिर्मनसि वर्तते तदा प्रज्ञायते ब्रह्म ध्यानयोगसमाधिना १० सेयं गुणवती बुद्धिर्गुणेष्वेवाभिवर्तते
अवरोहनिशः स्रवन्तं गिरेः शृङ्गादिवोदकं ११ यदा निर्गुणमाप्नोति ध्यानं मनसि पूर्वजं तदा प्रज्ञायते ब्रह्म निकषं निकषे
निकषे यथा १२ मनस्त्वपहृतं पूर्वमिन्द्रियार्थनिदर्शकं न समक्षगुणापेक्षि निर्गुणस्य निदर्शनं १३ ॥ ॥

णेनिकषं स्वर्णरेखाप्रकर्षेण निःसंशयं ज्ञायते १२ विषयत्वेन निकषं न ब्रह्म प्रज्ञायते नैव तत्साम्यं ब्रह्मणश्चापद्येतेत्याशंक्याह मनस्त्विति मनो ब्रह्माकारा
वृत्तिः सर्वं चाखंडवेत्त्याभिव्यक्तेः प्रागेवापहृतं अखंडप्रकाशेन तिरोभूतं क्रमः यस्मादिंद्रियार्थानां शब्दादीनामेव तन्निदर्शकं तदपि अवाच्यत्वानैव साक्षात् समक्षं
दिप्रसन्निकृष्टं गुणं रूपादिं अपेक्षते तत्तथा। अतो हेतोः निर्गुणस्य रूपादिहीनस्य तच्च निदर्शकं मनो न ब्रह्मणो न व्याप्तिः १ १३ ॥ ॥ ॥

उपसंहरति सर्वाणीति द्वाराणि इंद्रियाणि। संवार्य पिधाय मनसि संकल्पमात्रेण स्थितः मन्नतमपि मनसि बुद्धौ कृत्वा अविलाप्य एकाग्रतां सूक्ष्मीसात्मनमात्राका
रतां प्राप्य तत्परं ततः एकग्रतातः परं १४ तमेतं लयक्रमं युक्तागुपपादयति यथेति गुणांशः तन्मात्ररूपो पंचीकृतभूतसंज्ञाः तेषां स्थूलो सूक्ष्मेष्वतितत्कार्या
णि महाभूतानि नश्यंति। तथा हि श्रुतिः कारणनाशपूर्वकं कार्यनाशमस्वर्शयिपति सयथा सैंधवखिल्य उदके प्रास्त उदकमेवानुविलीयेत इति उदकं विलीनम
नु खिल्यो लीयत इति श्रुत्यर्थः तथा चार्षेः जलप्रस्थे खिल्यप्रस्थ उदके पेकारकाप उदके पेरवपरिमाणानतिरेकात खिल्योपादानं जलं स्वोपादाने रसतन्मात्रे विलीय

सर्वाण्येतानि संहार्य द्वाराणि मनसि स्थितः मनस्येकाग्रतां कृत्वा तत्परं समुपैष्यति १४ यथा महांति भूतानि निवर्त्तंते
गुणक्षयेत् तथेंद्रियाण्युपादाय बुद्धिर्मनसि वर्त्तते १५ यदा मनसि सा बुद्धिर्वर्त्तते तरचारिणी व्यवसायगुणोपेता तदा संपद्यते मनः
॥ १६ ॥

तेन तज्जलप्रस्थे तस्मिन् तदनुपादानत्वात् तस्मात्सूक्ष्मं स्थूलस्याजलनाशात् खिल्यनाश इति स्मर्या च गुणक्षयात् भूतक्षय इति यथा पंचदर्शनतः तथा मनसि ग्रहंकारे लीयमा
ना बुद्धिः स्वकार्याणींद्रियाणि गृहीत्वैव लीयते १५ ननु कारणे लीयमानं कार्यं स्वहेतोर्धर्माकारणमपि दूषयेत् जलक्लिन्नत्वम् इव खिल्य इव जलं स्वरसेनेत्याशंक्या
ह यदेति। बुद्धिर्व्यवसायो निश्चयः स एव गुणो धर्मः तेन उपेतापि स्वं तोहंकारे वर्त्तती निर्मत्या यथा आकृतं तेनरोपेतमपि कुंडलं स्वर्णस्थमेव न दृश्ता। मनसि परा बु
द्धिर्भवति तदा मनः एव भवति मधुरं जलं तत्र खिल्यप्रकाराणामिति तेन न दूषणं विजातीयसंसर्गेमेवेत्यर्थः १६ ॥ ॥ ॥ ॥

हृपादि मद्दिर

ननु त्रिगुणात्मको मनः शब्दितोहंकारो विज्ञानी ये निर्गुणे लीयमानः स्वधर्मैर्गुणैरपि हृदये रेव नाशंकाह गुणवद्भिरिति ध्यानेन गुणाः सत्त्वोऽल्वाबोधोपद्धि
न्नत तथ्यानगुणं मनोहंकारः गुणवद्भिर्विषयैः सह पदं गुणोपेतं गुणात्मतत्त्वाहंकारल पद्म निमित्ति यावत्तं स्वमकाख्यं उपेतं प्राप्तं भवति तदा सर्वान्गुणा
न सर्वगुणात्मकमव्यक्तमपि हित्वा निर्गुणं ब्रह्म निर्गुणं प्रविलाप्य निर्गुणं प्रतिपद्यते यदि सत्त्वादयोऽन्य प्रविलाप्याः स्युर्न हितेषु लीनं मनः सलिलव
योरिव न तन्मजेन कारणस्यानाशात् न चैहेष्टं त्वनिमित्तो न णभावान्नोन्मज्जतीति वाच्यं कर्तव्यकृतकल्पनायसंगात् तत्त्वमसीति वाक्यार्थज्ञानात् कृतं
९२१

गुणवद्भिर्गुणोपेतं पदं ध्यानगुणं मनः तदा सर्वान्गुणान्हित्वा निर्गुणं प्रतिपद्यते १०

त्वसंस्वरूपेण ज्ञानादेवं सर्वपाशापहानिरिति श्रुतेः न त्वहंकारस्य प्रधाने प्रलयात् कृतकृत्यत्वं निमित्तमप्रयोजकमिति न वस्तुतः कृतैवाहष्टस्य प्रयोजकत्वाभि
धानात् तस्मात्सत्त्वमपि प्रविलापनीयं न च गुणात्मकस्य तस्य निर्गुणे तत्त्वं भवति उक्तदोषापातात् अतो रज्ज्वुरगादिवत्त्वाध एवास्य प्रलयः तदिदमुक्तं मनो गुणा
न्हित्वा निर्गुणं प्रतिपद्यते गुणानुपादाय तस्यार्थः हित्वेति दध्यानेः हृपं न तत्त्वज्ञानेः नहि कारणं मत्कार्यस्यासाप्राप्तिः तस्मात्मनो लेपाधिष्ठाने ब्रह्मणि मानस
ष्ट्रप्रसक्तिरिति दिक् १० ॥ ॥ क१

मो०
९९

अहंकाराद्युपादानं परस्य व्यक्तास्यं गुणात्रयं तस्य सत्त्वरूपं पूर्ववदेवमित्याह । अव्यक्तस्येति । निदर्शनं दृष्टान्तः अव्यक्तं न सत् नेह नानास्ति किंचनेति श्रुत्या बाधात् । नापि न
रशृंगवदसत् । तत्कार्यस्योपलंभात् । नापि सदसत् विरोधात् । तस्मादनिर्वचनीयमित्याह । यदन्या सो वा अपरो यत्र नास्ति । अत एव तत्र निदर्शनमपि नास्तीत्य
र्थः । अत एव तद्द्वासिरपि न संभवतीत्याह कश्चिदिति १८ अतः श्रवणादिजन्येन साक्षात्कारेणैवात्मनस्तत्त्वं निश्चिनुयादि त्याह तपसेति तपसा आलोचनेन ध्यान

99

अव्यक्तस्येह विज्ञानेनास्ति तत्त्वं निदर्शनं यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात् १८
तपसा चानुमानेन गुरोर्ज्ञान्याश्रुतेन च निनीषेत्परमं ब्रह्म विशुद्धेनान्तरात्मना १९

न१
जेन साक्षात्कारेण अनुमानेन मननाख्येन युक्त्यनुसंधानेन गुरोः शमदमादिभिः ज्ञात्या आत्मचित्तस्वधर्मेणाश्रुतेन वेदान्तश्रवणेन विशुद्धेनान्तरात्मना मनसा । परमं ब्र
ह्मनिनीषेत् ज्ञातुमिच्छेत् । परमं शोधितत्वंपदार्थं ब्रह्मतत्पदार्थत्वेन प्राप्तुमिच्छेदिति वा नपुंसकत्वात् १९ ॥ ॥ ॥ ॥
ते१

एम०
९९

उक्तविषयानन्तदर्शिनो नेतेवहिश्वतत्त्वतद्द्रष्टुभानं नास्तीत्याह गुणाहीनइति। नेतिनिष्प्रपंचं मार्गं वहिरचयेनापि अनुवर्त्तते अनुसरति। हेतंतत्पश्यन्नपि न पश्यतीत्य र्थः ननुवहिः कार्यात्मनाभेदः अन्तः कारणात्मना भेदः यथा सवर्णोत्स्वरूपेण कुंडलादिरूपेण चाभिन्नं चेतिय परेष्टुं शक्यं न हि दृष्टमपि स्यात् किमिति वहि रपि भेदावभासः घटसक्तादिप्रमाणसिद्धोऽपलप्यत इति चेत् न यथा सैन्धवघनोऽनंतरोऽवाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्माऽनंतरोऽवाह्यः कृत्स्नः प्रज्ञानघन एवेत्यात्मन एकरसत्वश्रुतेः अन्तः कारणं वा वाह्यं कार्यं तयोरभावात् एवं कृत्स्नः प्रज्ञानमात्र इति श्रुतेरर्थः वहिरपि ज्ञेये नकुद्देन चिदात्मना संमितं। न हेतुः गुणाभावात् मूलप्रकृतेस्तुच्छत्वात्। प्रकृत्या वा चिन्त्याभाव्याहारकैकगम्याः प्रधानपरमाण्वस्वभावश्रुत्सवादात्तकाः नहि हितं निस्तर्कः। तस्मा

गुणाहीनो हितं मार्गं वहिः समनुवर्त्तते गुणाभावात् प्रकृत्या वा निस्तर्कोऽज्ञेय संमितं २० नैर्गुण्यात् ब्रह्म वाप्नोति सगुणात्वा न्निवर्त्तते गुणप्रचारिणी वुद्धिर्हुताशन इवेंधने २१ यथा पंचविमुक्तानि इंद्रियाणि स्वकर्मभिः तथा हि परमं ब्रह्म विमु क्तं प्रकृतेः परं २२ ॥

दंतर्वहिरेकरसं ब्रह्म एकरसं ब्रह्म एकस्मिन् वस्तुनि परस्परविरुद्धयोर्भेदाभेदयोः समानसत्ताकत्वं वक्तुमशक्यमित्यवश्यमेकेयेऽन्यतरस्मिन्। व्यभिचारित्वादेव एव हेयइति निर्विवादमेकरसमित्याकरेति स्तरः २० वुद्धिः नैर्गुण्यं निर्विषयत्वात् ब्रह्म प्राप्नोति। सगुणत्वात्सविषयत्वात् निवर्त्तते ब्रह्मणः सकाशादिति शेषः गुणेषु प्रचारिणी २१ यथेति सुषुप्तौ यथा कार्यत्यागेन कारणाऽज्ञानात्मनावस्थानं एवं तुरीये कारणत्यागेन चिन्मात्रात्मनावस्थानमपि संभवतीति भावः २२

एवमिति लौकिकदृष्टान्ताभिनयः प्रकृतितः अज्ञानात् शरीरिणः चिदाभासाः जीवात्मानः निवृत्तौ अज्ञानस्य यथा ज्ञानात् शुक्तिरजतादावि[illegible]व प्रवर्त्तन्ते कर्म[illegible] तन्नि
वृत्तौ निवर्त्तन्ते अनिवृत्तौ तत्स्वर्गप्रवृत्तिफलं २३ पुरुषः जीवः अतिमानः इदमित्थमेवेति धीः विपर्ययो वा भूतसंज्ञा फलं विना शिल्पनिश्चयः २४ ननु प्रवाहतो
ऽस्य वि[illegible]पदादेः कुतो विनाश इत्याशंक्याह एतस्येति एतस्य भूतसंघस्य आद्या प्रवृत्तिः प्रथमसर्गः प्रधानान्मायापाशबलाद्व्याकृता देवनन्दनं तरां मिथुनानन्तरं

एवं प्रकृतितः सर्वे प्रवर्त्तन्ते शरीरिणः निवर्त्तन्ते निवृत्तौ च स्वर्गं वै वा प्रयान्ति च २३ पुरुषः प्रकृतिर्बुद्धिर्विषयाश्चेन्द्रियाणि
च अहंकारोऽभिमानश्च सप्तदशो भूतसंज्ञकः २४ एतस्याद्या प्रवृत्तिस्तु प्रधानात् संप्रवर्तते द्वितीया मिथुनव्यक्तिमविशेषा
न्नियच्छति २५ धर्मादुत्कृष्यते श्रेयस्तथाश्रेयोऽप्यधर्मतः रागवान् प्रकृतिं याति विरक्तो ज्ञानवान् भवेत् २६ शांतो मोक्षधर्मेषु
हस्पति [illegible] संवारे ॥ ॥ ॥

कस्मादेतद्व्यक्तिमभिव्यक्तिं च अविशेषात् विशेषाः पंचमहाभूतानि तदन्ये अविशेषाः पंचतन्मात्राणि एकादशेन्द्रियाणि अहंकारश्च तान्यभिप्रायेणैव वचनं द्विती
ताद्यप्रवृत्तिः मिथुनादभिव्यक्तिं नियच्छति नियमयति न पुनर्यादृच्छिकी सृष्टिरित्यर्थः एवं च यथा घटशरावोदंचनादीनां च विशेषाणाम् अविशेषो मृन्मात्रं एवं विष
यादिविशेषाणामप्यस्त्यविशेषः प्रधानमिति न प्रवाहनित्यत्वं सृष्टेरिति भावः २५ प्रकृतिं प्रलयकाले ऽभ्येति विरक्तो ज्ञानवान् प्रकृतिबाधेनात्मज्ञानं भवति मुच्य
त इत्यर्थः २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ नवा१ ॥ ॥

न २ न १

यस्मादुत्क्रम्यते श्रेयस्तेन श्लोकं व्याकुर्वन्नुक्तमर्थमुपसंहरति यदा तैः पंचभिः पंचेन्द्रियादीनां ध्यायेन पंचभिः शब्दादिभिः स्वविषयैः सह पंचेन्द्रियाणि मनसा कं पि
सह युक्तानि निगृहीतानि मनसेत्यत्रैव वृद्धेरपि यद्ग्रहणं कृतिं पदार्पं चावतिष्ठते ज्ञानानि मनसा सह बुद्धिस्त्वन विचेष्टति तामाहुः परमां गतिमिति श्रात्मा नात्मनो
रनंतविविक्तत्वं मणिसूत्रदृष्टांतेनोक्तं १ ऐकात्म्यसिद्ध्यर्थमनेनैव दृष्टांतेन सर्वत्रात्मव्याप्तिमाह तदेवेति २ प्रसक्तात्मा श्रासक्तचित्तः श्रासंगे हेतुमाह स्व

मनुरुवाच यदा तैः पंचभिः पंचयुक्तानि मनसा सह अथ तत्र स्वयं तद्ब्रह्म मणौ सूत्रमिवार्पितं १ तदेव च यथा सूत्रं सुव
र्णे वर्तते पुनः मुक्तास्वथ प्रवालेषु मृन्मये राजते तथा २ तद्गोश्वमनुष्येषु तद्वद्धस्तिमृगादिषु तद्वत्कीटपतंगेषु प्रसक्ता
त्मा स्वकर्मभिः ३ येन येन शरीरेण यद्यत्कर्म करोत्ययं तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ४ यथा ह्येकरसा भूमिरोष
ध्यर्थानुसारिणी तथा कर्मानुगा बुद्धिरंतरात्मानुदर्शिनी ५ ज्ञानपूर्वा भवेल्लिप्सा लिप्सापूर्वाभिसंधिता अभिसंधिपूर्व
कं कर्म कर्ममूलं ततः फलं ६ ६

कर्मभिरिति ३ येन येन पित्र्येण दैवेन गांधर्वेण प्राजापत्येन वा ब्राह्मणेन देहेन तत्तेन यस्य यस्य देहस्य प्राप्यमित्यर्थः यद्यत्कर्म यज्ञादिकं ४ कर्मभेदाद्देह विशेषसंयोगे दृ
ष्टांतमाह यथेति अंतरात्मा अनुदर्शिनी स्मः सा तथा साक्षीत्यर्थः सा हि प्रकाश्यापि प्राक्कर्मानुसारिणी एव बुद्धिर्भवतीत्यर्थः ५ ततोऽभिसंधिः इदं साधयेयमिति यत्नः ततः का
र्मसंदः ततः फलावाप्तिः ६ ६ ६ ६ ६ ६ ६ ६

१०२

फलमिति अनेनक्रमेणानन्तदेहधारणादिरूपंफलंकर्मात्मकंकर्मप्रभवंकर्मतत्तेयात्मकं अहमर्थोद्भवं अहमर्थोपितानात्मजीवरूपः सोपिसदसदात्माचित्तत्वरू
पः ७ ज्ञानानांविज्ञप्तीनांफलानांदेहानां ज्ञेयानांबुद्धीनांकर्मणांसंचितानांचक्षयांतेपरमफलमिवफलंआत्मनस्तत्वप्रकाशः विषयावस्थाकारवर्मांतःकरणा

न्मा१

फलंकर्मात्मकंविद्यात्कर्मज्ञेयात्मकंतथा ज्ञेयंज्ञानात्मकंविद्याज्ज्ञानंसदसदात्मकं ७ ज्ञानानांचफलानांचज्ञेयानांकर्म
णांतथा क्षयांतेयत्फलंदिव्यंज्ञानंज्ञेयप्रतिष्ठितं ८ महद्धिपरमंभूतंयत्पश्यंतियोगिनः अबुधास्तंनपश्यंतिह्या
त्मस्थंगुणाबुद्धयः ९ पृथिवीरूपतोरूपमपामिहमहत्तरं अद्भ्योमहत्तरंतेजस्तेजसःपवनोमहान् १० पवनाच्चमहद्व्यो
मतस्मात्परतरंमनः मनसोमहतीबुद्धिर्बुद्धेःकालोमहान्स्मृतः ११ कालात्सभगवान्विष्णुर्यस्यसर्वमिदंजगत् नादिर्नम
ध्यंनैवांतस्तस्यदेवस्यविद्यते १२ ॥ श्री॰ श्री॰

इत्याज्ञानसाक्षात्कारेयस्मनन्तविद्यास्तानं दिव्यंज्ञानमितिपाठेदिविहान्हकाशात्मकारणंब्रह्मणामवंदिव्यंज्ञेयवस्तुनिप्रतिष्ठितंज्ञानं ८ ज्ञेयस्वरूपमाहमहद्धि
ति महत्तत्त्वविधपरिच्छेदशून्यंअतएवपरमंमागुद्धिःसापराहरेभूतायस्मान्नरताभूतंनित्यसिद्धं आत्मस्थंबुद्धिस्थं गुणोषुविषयेषुबुद्धिर्येषां ९ महत्वंव्याचष्टेपृथि
वीतित्रिभिः १० कालःअव्यक्ताख्यंजगत्कारणं ११ विष्णुःपरंब्रह्म ॥ ॥ ॥ ॥

१२

शे१

महत्त्वहेतुकं परमं त्वं यावच्छेनाहित्वादित्तिहाभ्यां। अव्ययः अपहृपश्रुतः अनवतज्ञानं ...पविभागवत् यत्रामनश्यमनच्छुणोतितनदत्वंतन्मर्यैततनुः खमितित
तस्पदुः खलक्ष्यते १३ धामेवधामन्याश्रयः योप्यगलाइात्वाकालविषयात्अनित्यातनुः खात्मकात् १४ गुणेष्विति एते मुक्ताः शुद्धचिदात्मानः गुणेषुमान

अनादित्वादमध्यत्वादनंतत्वाच्च सोऽव्ययः अतोऽतिसर्वदुःखानि दुःखं सन्न वदुच्यते १३ तद्ब्रह्म परमं प्रो
क्तं तद्धाम परमं पदं तज्ज्ञात्वा कालविषयाद्विमुक्ता मोक्षमाश्रिताः १४ गुणेष्वेते प्रकाशंते निर्गुणत्वात्ततः
परं निवृत्तिलक्षणो धर्मस्तथानंत्याय कल्पते १५ ॥ ॥ ॥ ॥ ॥

स्प१

मेपव्यवहारेषु प्रकाशंते ज्ञानरूपेणामेयेषु वा ...लेन घटः सन् पटः सन्निति एवरूपेण। सुखात्मना वा अनत एवोक्तं अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यं
त्रयं ब्रह्मरूपं ततो द्वयमिति। ततः गुणेभ्यः परं उत्कृष्टं ब्रह्म। निर्गुणत्वादेव ततनिवृत्तिलक्षणः शमदमोपरमादिरूपो धर्मो निर्विकल्पकः स च ज्ञानतः सन् आनं
त्याय मोक्षाय १ ॥ ॥

मो०
१०२
102

म

न्त्वइति अध्ययनादिधर्माः लक्ष्यन्ते शरीराणि लिङ्गशरीराणि अपाश्रिताः तत्संस्कारकत्वेन तद्गताः न तत्त्वनाधेयातिशये चिदात्मनि गताः अत एव यत्नसाध्याः
अविनाशिनश्च १६ ब्रह्मणि तद्विपर्ययमाह नचेति। शरीरमाश्रित्य संभवत्याविर्भावो यस्य तत्तादृशमपि यत्नसाध्यं न भवति धर्मवत् यतोऽनादिमध्यं नैवं क्षेत्रवन्ममात्मा:

६३

अचोयत्नंषिसामानि शरीराण्यपाश्रिताः त्रिक्वाग्रेषु प्रवर्त्तन्ते यत्नसाध्या विनाशिनः १६ नचैवमिष्यते ब्रह्म
शरीराश्रयसंभवं न यत्नसाध्यं तद्ब्रह्म नादिमध्यं न चान्तवत् १७ ऋचामादिस्तथा साम्नां यजुषामादिरुच्यते
अन्तश्चादिमतां दृष्टो न त्वादिर्ब्रह्मणः स्मृतः १८ अनादित्वादनन्तत्वात्तदनन्तमथाव्ययं अव्ययत्वाच्च निर्द्वन्द्वं
द्वन्द्वाभावात्ततः परं १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ब्रह्मभावस्यासाध्यत्वेन निश्चितमनित्यत्वं स्यादित्यर्थः यद्वा शरीरं लिङ्गं आश्रयते पुण्यपापरूपो नेति शरीराश्रयं शरीरात्संभवतीति तादृशं च धर्मस्वरूपं। ब्रह्म न तदाश्रयं शरीरं उदासी
नं चेत्यर्थः १७ ऋचामिति ब्रह्मभावस्यादिमत्त्वे क्षयश्च विनाश इति भावः १८ अनादित्वात् अजन्यत्वात् अनन्तत्वात् ध्वंसाभावत्वात् अत एव च अनन्तं व्यापकं अव्ययं पंचयोगम
भवत द्वन्द्वानि मानापमानाद्वीनि १९ ॥ ॥

एमे०
१०२

क्षु१ त१

ननु असाध्यं नित्यं वात्म[illegible]सुखं वेत्किमिति तत्र सर्वे न स्पृशंतीत्याशंक्याह अदृष्टत इति। अदृष्टं भाग्यं तदालंब्य अनुपायात [illegible] उपायाभावात् अत्रादृष्टत इति च तद्विधा
ध्यात्मिकत्वं [illegible] पलं क्षणं तथा कर्मणः विषयभोगाख्यस्य प्रतिसंधिः प्रतीपः संधिर्वियोगः विषयेभ्य उपरम इति यावत् तेन पंचविधा वा स्यात्तुष्टिरुक्ता। तेन तत्तुष्टिरूपेण हे
तनाउपायेषु प्रवर्त्तमानाः पुरुषा येनोपायेन तत्परं गच्छंति तत्र पश्यंति। तदुपलक्षणः सांख्यसप्तत्यां। आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः बाह्या विष
योपरमात् पंच च नव तुष्टयोभिहिता इति आसामर्थः शास्त्रात् प्रकृतिपुरुषयोर्विवेको ज्ञानं तत्साक्षात्कारस्तु न निरूपः प्रकृतेः परिणामः स च स्वयमेव परिणामक्रमेणाय
विष्यति किं ध्यानाभ्यासेनेति प्रकृत्याख्या तुष्टिरंभ इत्युच्यते। एतावतापि नैतत्कृतता सर्वे स्याप्यनायासेन विवेकख्यातिः प्राप्तेरनर्थी प्रव्रज्याविधिः सा हि तत्त्वमात्रेण कृत
कृत्यता किं ध्यानेनेत्युपादानाख्या तुष्टिः सलिलमित्युच्यते प्रव्रज्यापि कालविशेषापेक्षैव कैवल्यहेतुरित्यलमुन्मतये तित्तस्मीमवस्थानेकालाख्या तुष्टिः ओघ

ऋत२

अदृष्टतोनुपायाच्च प्रतिसंधेश्च कर्मणः न तेन मर्त्याः पश्यंति येन गच्छंति तत्परं २०

इत्युच्यते कालोपि पूर्वपुण्यवशादेव विवेकसाक्षात्कारं मदालसापत्यानां बालानामिव जनयिष्यति किं ध्यानाभ्यासेनेति तुष्टिर्भाग्याख्या वृष्टिशब्देनोच्यते। सैवेह मुख्यत्वाद
[illegible] दृष्टत इत्यनेन गृहीता अनयैव सर्वासां तुष्टीनामाक्षेपतो लाभादिति विषयांश्च तेषु वैराग्यापायपि पंचवत्त[illegible]र्जने दुःखं दृष्ट्वा या उपरतिः सा पारं राज्ञचौर
दिनाधननाशेदुःखं दृष्ट्वा या सा उपारं भोगेनापि धननाशं दृष्ट्वा यद्दुःखं तज्जा उपरतिः पारापारं भोगेपि वृद्धिपित्वादि दोषदर्शनाया उपरतिः सानुत्तमांभः नानुप
हत्यभक्तानि भोगः संभवतीत्यायेन भोगे हिंसादोषदर्शनाया उपरतिः सा उत्तमांभः एवं विषयोपरमात् पंच तुष्टयोत्र कर्मप्रतिसंधिशब्देनोच्यंते एवं नव तुष्टयः
तन्मात्रेण कृतकृत्यतां मत्वा न स्म उपायेषु प्रवर्त्तंते तेन तत्त्वदर्शनं भवतीत्यर्थः २० ॥ ॥

त३

वा १ गा २

कदाचित्तुष्टेनैकं जित्वा ध्यानेऽप्रवृत्तोऽपि ध्यानजसिद्धिविपर्ययादात्मतत्त्वं न पश्यतीत्याह विषयेषु चेति तत्र प्राणिनां स्वाभाविको विषयेषु संगः विषयाश्चाहारादिकाः शाश्वत
लोकगताः शाश्वताः मधुमत्यां योगभूमौ स्थितस्य योगिनः संकल्पमात्रोपनताः इमे सत्याः कामा अनृतापिधाना देहेतो याधिनाऽऽच्छादिताः संकल्पादेवास्य पितरः समुत्ति
ष्ठंतीत्यादिश्रुतिभ्यः अतो हेतोरविरक्तो योगी मनसाऽन्यत्यागैश्वर्यसुखं इच्छन् सकलकामनिर्मूलनप्राप्यं परं ब्रह्म न प्रतिपद्यते न साक्षात्करोति। अत्र अत्र च नास्तित्वेन न सिद्धिवि
पर्ययो दर्शितः तत्र सिद्धयः सांख्यमतसंज्ञाः ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽंकुशस्त्रिविध इति। अस्यार्थः ऊहः वितर्कः श्रु
तस्यार्थस्य युक्त्या चिंतनं [illegible] मननमित्यर्थः शब्दः शब्दजं ज्ञानं मोक्षशास्त्रस्य उपक्रमोपसंहारपर्यालोचनपातात्पर्यज्ञानं अध्ययनं उपनिषदर्थस्याभ्यासः आध्यात्मिकाधिभौतिका
धिदैविकभेदेन त्रिविधं दुःखमतस्तद्विघाता अपि त्रयः तास्त्रमुख्याः सिद्धयः तथा सुहृत्प्राप्तिः परविद्यावत्सदाचार्यलाभः दानं वित्तशुद्धिजन्या विवेकप्राप्तिः देहशोधनेन तस्य

विषयेषु च संसर्गाच्छाश्वतस्य च दर्शनात् मनसा चान्यदाकांक्षन्परं न प्रतिपद्यते २१ ॥

स्यापेक्षत्वा अष्टौ सिद्धयः तत्र ऊहशब्दाध्ययनसुहृत्प्राप्तयः तारं सुतारं तारतारं तारल्लम्यकं चेति क्रमेण गीयंते दानाध्ययनत्रयं सदामुदितं प्रमोदो मुदितं मोदमाना इति च गीयंते
एता अपि सदाप्रसादसौपानतया अपि कुयोगिनं प्राप्य विपर्यस्तफलाः सुः तदिदमुक्तं सिद्धेः पूर्वोऽंकुशस्त्रिविधः सिद्धेर्मोक्षकैरागाश्चांकुशस्व [illegible] निवा [illegible] कस्त्रिविधः
एको विद्यादिः पंचविधो विपर्ययः द्वितीयाऽशक्तिः सा च एकादशेंद्रियवधाः सप्तदशबुद्धिवधैः शक्तिरुद्दिष्टा तृतीया विरागादय एकादशेंद्रियवधाः तुष्टीनां पूर्वोक्तानां सिद्धीनां
चाष्टौ उक्तानां विपर्ययात्सप्तदश बुद्धिवधाः अतएवोक्तं वलीवर्दन्यायेन तुष्टीः पृथक्कृत्य विपर्ययाशक्तितुष्ट्य इति त्रिविधो अंकुशः मनसा चान्यदाकांक्षन्नित्यनेन सूचितः २१ ॥ ॥

पा १ ता १

हा १ गुरुस्व २

तत्राप्यस्माकं कथं तं हेतुमाह। गुणानिति गुणान्विषयान् यतः यस्मात् परं निर्विषयं गुणार्थिनः गुरूपाः २२ अतिमोक्षार्थ्यगुणासक्तापामो गिगम्यान्विषयान्नावर्तनीत्याह
गुणैरिति। उभयेषां तुल्यत्वेपिद्यांतरेर्गुणैर्विशेषणाः स्वरूपभूतैः सत्यकामत्वादिभिः परं उपलक्ष्यते सूक्ष्मेनेव गिरिशास्त्वारोहेरो नुंति उभयेषां तुल्यत्वेपिद्यांतरेर्गुणैर्विशेषणाः स्वरूपभूतैः
सत्यकामत्वादिभिः परं उपलक्ष्यते सूक्ष्मेनेवाग्निशास्त्वारोहेरोवा चेदृक्कलामित्याह अनुमानादिति २३ अत्रत्यानुभवप्रमाणापन्निमग्नेनाध्याननिशितेन दृश्यते लक्षणया वुद्ध्या स
पा४ क्ष्मेण सूक्ष्मदर्शिभिरिति श्रुतेः शब्दश्रोत्रगंधघ्राणादिषु प्रकाश्यप्रकाशकयोः आकाशभूम्यादिरूपैकोपादानकत्वनियमात् उपादानोपादेयोश्चाभेदात्घटादिरूपं मन

गुणान्यदि हि पश्यंति तत्र दिग्धत्यपरे जनाः परं नैवाभिकांक्षंति निर्गुणत्वाद्गुणार्थिनः २२ गुणैर्यस्त्ववैर्युक्तः कथं विद्यात्परं गु
णान् अनुमानाद्धि गंतव्यं गुरोरवयवैः परं २३ सूक्ष्मेण मनसा विद्मो वाचा वक्तुं न शक्नुमः मनो हि मनसा ग्राह्यं दर्शनेन च दर्शनं
२४ ज्ञानेन निर्मलीकृत्य बुद्धिं बुद्ध्या मनस्तथा मनसा चेंद्रियग्राममक्षरं प्रतिपद्यते २५ ॥ ॥ ॥

स्वच्छक्षरादिरूपेण मनसा यथा प्रत्यक्षे। एवं दृश्यदृश्ये अपि दर्शनमात्रोपादाने दर्शनाद्भिन्ने इत्यर्थः २४ ईदृगभेदस्य हेतुमनुभवमेवाह। ज्ञानेनेति ज्ञानं ब्रह्मात्माकाराधी
वृत्तिः तया बुद्धिं देहाद्यात्मभ्रमकलुषितां निर्मलीकृत्य सर्वसंशयहीनां कृत्वा तथा बुद्ध्येति भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे पराव
रे इति। तथा बुद्ध्या मनोपि संकल्पात्मकं संकल्प्य संकल्पकरूपेण स्वप्नादौ स्थितमिति निश्चित्य। तथा जाग्रत्कालेपि मनसा इंद्रियग्रामं शब्दादिसहितं मनोमात्रमिति
निश्चित्य विलोमक्रमेणाक्षरं क्षरतीति अक्षरं तस्माद्दृष्टदृश्ये परिणामिन पाविकारीत द्भिन्नं चिन्मात्रं दर्शनं प्रतिपद्यते २५ ॥ ॥ ॥

मो०
१०५

104

बुद्ध्याचरमइन्त्याध्यानपरिपाकोस्य पाहीनः निर्ह्रीनिकः मनसा विचारात्मकेन समस्थः सर्वमिति शेषः अवगामकनयानित्यर्थः निराशिषं आशीः प्रार्थना तद्रहितं स्वेनैव रूपे
णापरमानंदत्वात् ।। निर्गुणं आत्मानं उपैति प्राप्नोति । विलीयमानाः आशीर्भिः पकुली क्रियमाणाः यथा वायुः काष्ठांतर्गतं वह्निं नोदीपयति एवमेते पि अंतःस्थमात्मानं
तं प्रज्वलयंतीत्यर्थः २६ उक्तमेवार्थं स्पष्टयति । गुणेति विषयाणामादाने आभिमुख्येन स्वीकारे अन्यत्र विविक्तविलापने कृते सति मनः बुद्धिपराय बुद्धिपरा बुद्ध्यपेक्षयापायत्तं ब्रह्म
न १

बुद्धिग्रहीरागो मनसा समस्थो निराशिषं निर्गुणमभ्युपैति परं स्पृजंतीह विलीयमाना हुताशनं वायुरिवेंधनस्थं २६ गुणा
दाने विप्रयोगे च तेषां मनः सदा बुद्धिपरावराभ्यां अनेनैव विधिना संप्रवृत्तो गुणापाये ब्रह्मशरीरमेति २७ ।। ।।

तस्मैनत्वासयेभवति तेषां गुणानां विप्रयोगे पृथक्करणे अग्रहणे सति मनः सदा सर्वस्मिन्नपि युगे बुद्ध्यपेक्षयापायदवरं बुद्धिकल्पितं ब्रह्मलोकांतमैश्वर्यं परं अर्वाचं तमनैश्वर्यं च
तत्त्वासयेभवति अनेन प्रकारेण विधिना । वंधाय विषयासक्तं मुक्त्यै निर्विषयं मनः इत्यादि वचनेन गुणादाने संप्रवृत्तः ब्रह्मशरीरं ब्रह्मस्वरूपं प्राप्नोति शारीरमिति पाठे शा
रीरो जीवस्तयोर्ब्रह्मशारीरयोरभेदं सामानाधिकरण्यं २७ २७ ।। ।। ।। ।।

रामं०
१०५

ननु लोके च तद्धोऽभेदो दृश्यते यथा सुवर्णकुंडलमिति तयोरुपादानोपादेयभावेन यथा वा शुक्तिः पट इति तयोर्गुणगुणिभावेन। यथा वा शुक्तीरजतमित्यधिष्ठानाध्यस्तभावेन। यथा वा सिंहो देवदत्त इति तीव्रत्वगुणयोगेन। नाद्यः ब्रह्मणो विकारित्वापत्त्या कूटस्थत्वनाशापत्तेः न द्वितीयः आश्रयनाशं विना गुणनाशासंभवान्मुक्तौ जीवतत्त्वनाशे ब्रह्मणोऽपि नाशापत्तेः न तृतीयः मिथ्याभूतस्य जीवस्य मुक्त्यनुपायोगात् परिशेषात्तुर्य एव पक्षः शिष्यते। तत्रापि यथाऽनेना विष्णुर्देवा इति च ब्रह्मसाम्यान्मनसि विद्वद्देवसंपत्तिस्तथा देहादिहंहकत्वं योगाज्जीवेपि ब्रह्मशब्दः यद्वा यो षा वाव गौतमाग्निरित्यत्र स्त्रीरूपं प्रतीकमविद्यमानवत्कृत्वा तत्राग्नेरूपासनं एवं जीवमविद्यमानवत्कृत्वा तत्र ब्रह्मोपास्यं यद्वा यथा मनो ब्रह्मेत्युपासीतेति मन एव ब्रह्मभावारो

अव्यक्तात्मा पुरुषो विश्वकर्मा सोऽव्यक्ततां गच्छति सोऽन्तकाले तैरेवायं चेन्द्रियैर्वर्धमानैर्म्लापि डिविर्वित्तेकामरूपः २८ ॥ ॥

पेणोपास्यं एवं जीवेपि ब्रह्मभावं आरोप्यात्मतत्त्वकामस्यात्मोपासनं विधीयते आत्मेत्येवोपासीतेत्यादि श्रुतिषु इत्याशंक्याह अव्यक्तात्मेति अव्यक्तेति वाङ्मनसागोचरस्तोत्यामनसा दिवसतीकत्वादिकं निरस्यते आत्मेति व्यापकत्वं वैनमरूपत्वोक्त्या कीटभृंगवत्प्रवांतरस्यालभ्यत्वमुच्यते। पुरुष इति पुरि शेते इति मुख्यत्यागोणात्मत्वं निरस्यति। व्यक्तकर्मेति देहाद्युपाधियोगात्कर्मसमवायो दृश्यते। अत एव श्रूयते आराममस्य पश्यंति न तं पश्यति कश्चनेति। अंतकाले स सपि बलयमोक्षणा मनन्त मकाले वाव्यक्त एवातो सव्यक्तत्वं मंतरालेव गतं मयैव। ततश्चाव्यक्तस्यात्मनोः ॥ राम

स१

व्यक्तेन ब्रह्मणाऽहिलक्षणो भेदाभावाद्देहेन घटेन तत्र निर्विंबप्रतिविंबन्यायेनौपाधिकस्तयोर्भेदः स चोपाधिभूताया अविद्याया निवृत्तौ निरवशेषे गालीयत इति युक्तमुक्तं
ब्रह्मशरीरमेतीति। ननु चैवंविधे चात्मनि कुतो दुःखित्वप्रतीतिरित्याशंक्याह तैरेवेति नैः प्रसिद्धैः आकाशमरूपत इति दृष्टैः जलसूर्यप्रापनमध्ये वात्मनि दुःखित्वादि
भ्रममस्त्याह ग्लायद्भिर्वा वाशब्द उपमार्थे ग्लायत्स्विव आवर्तैर्लोकहृद्ये संचरति घटाकाशवत्। तथा च सर्वं तत एव वोपमा सूर्यकादिवदिति। सूर्यवति इति प्रति
विंबसूर्यः आदिपदाद्गृहाकाशः तथा चात्मनि भेदगतिं वचारयंति श्रुतयः यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियेत
भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा घटसंवृतमाकाशं नीयमाने यथा घटे घटो नीयेत नाकाशं तद्वज्जीवो नभोपम इत्यादयः २८ ॥ ॥ ॥ ॥

सर्वैरिति। अयं चिदाभासः देहं लिंगशरीरं प्राप्तः पंचभूतानि स्थूलदेहाकारेण परिणतानि तदाश्रयश्च स्यात् अतः परमेण विवशतेन अंतर्यामिणा हीनः सन् न गच्छ
तिगतिरूपलक्षणं किमपि कर्त्तुं न शक्नोतीत्यर्थः। कुतः असामर्थ्यात् कुत्र कर्मणि कर्मकर्त्तृत्वमित्यर्थः। इति श्रौतं प्रसिद्धं एष ह्येव साधु कर्म कारयतीत्यादिकां द्योत
यति। अयं भावः जलसूर्यघटाकाशयोरिवाल्पगमनेऽप्यात्मनि दुःखित्वादिकं भासमानमपि परमार्थतो नास्ति नाप्यसत् तत्परिहारे सामर्थ्य[illegible]मस्ति उपाधिपक्ष
पातित्वात्। उपाधेश्च स्वाधीनकर्मानुरोधीश्वरेच्छया चेष्टाश्रयत्वात् अतोंतर्यामित्वं चेश्वरस्य युक्तमिति २९ ननु प्राधान्यं तर्यामिणोः अनादित्वाल्लिप्यपोः प्रवर्त

सर्वैरयं चेंद्रियैः संप्रयुक्तो देहं प्राप्तः पंचभूताश्रयः स्यात् नासामर्थ्याद्गच्छति कर्मणो ह हीनस्तेन परमेणात्मरूपेण २९ ॥
ध्यानेन पश्यति नांतमस्यात्यंतस्वास्याभविता चेति विद्धि परं नयं तीह विलोड्यमानं यथाज्यं वा पुरि वार्णिवस्थं ३०

प्रवर्त्तकयोः सतोः कथं चिदाभासस्य दुःखान्मुक्तिः स्यादित्याशंक्याह ध्यानेति यथाऽग्नेरदृष्टोऽपि रथ्याज्यं तो लिङ्गविभुत्वात्। एवं दुःखसंततेरप्यंतोऽस्ति
जनमत्वात् यथा वा वायुरणीवस्थं तृणादिकं यथाज्यं वं यथा प्रवाहं वायुनैव लोड्यमानं इति तत्र न स्यमानं वायुरेव परं पारं नयति। एवं कर्मवायुभिः ऊह्यमानं मनसास
मुद्रस्थं जीवं योनं कर्माण्येव चित्तशुद्ध्यादिजननद्वारा परं पारं नयतीत्यर्थः। यथोक्तं कर्मणैव हि संसिद्धिमास्थिता जनकादय इति संसिद्धिं ज्ञानयोग्यतां ३० ॥

प्रथास्तपरिरश्मीनामुदयास्तमयाएवंचैतन्यमात्मानमपिलक्षयन्नाह दिवाकरइति। गुणं रश्मिमंडलेनजगद्व्यापित्वंप्रकाशोवा सत्वांचवितनुमुद्दीप्तोऽस्तानोदृश्येसतिराद्धेदिवत्तनसंस्थाल
पोरदृश्योपश्यतीत्यर्थः निर्गतः विशेषवानमविलादिवमेवानस्त्वहंकारोयस्मात्तस्मनिर्विशेषवान ३१ एकारणार्थमुपसंहरति अनागतमिति। अनादौसंसारेसर्वमपि
स्वरंवपुरुषस्यकचिजन्मनिधाममेवास्तिइदंतुमनतत्वेऽनागतंआगतस्यनिहत्ययोगात् स्वयंभुवंअजंजन्मजन्मस्यावश्यविनाशित्वात्। प्रभवत्यस्मात्निधीयतेली
लीयतेस्मिन्कार्यजातमितिप्रभवनिधानं एवमपिअव्ययंप्रधानवत्परिणामिनित्यं। परिणामिनोनाशावश्यभावेननिम [illegible] त्वायोगात्। सनातनंयस्मातं
आदिमध्यांतशून्यसंमोक्षस्वरूपं। अनादिमध्यामतमित्यपिपाठः अयंनाशहीनं। यतः ध्रुवंअविचाल्यं। ईदृशंप्रत्यगभिन्नंवस्तुनिर्वाप्यज्ञात्वाततवेदप्रसिद्धंपरंअ

दिवाकरोगुणमुपलनिर्गुणोयथाभवेदपगतरश्मिमंडलः तथाप्यसौमुनिरिहनिर्विशेषवानसनिर्गुणंप्रविशतिब्रह्म
चाव्ययं ३१ अनागतंसुकृतवतांपरंगतिंस्वयंभुवंप्रभवनिधानमव्ययं अनादिमध्यामतमव्ययंध्रुवंनिर्वाप्यतत्परम
मृतत्वमश्नुते ३२ शांतोमोक्षधर्मेषुमनुबृहस्पतिसंवादः॥ ॥

गौणंअमृतत्वंमोक्षंचाश्नुतेप्राप्नोतिअपामसोममभूमअमृताअभूमे
तिकर्मप्राप्यममृतत्वंश्रूयतेतच्चगौणंकर्मजस्यनित्यत्वायोगात्तदुक्तंयथेहकर्मजितोलोकः क्षीयतएवमेवामुत्रपुण्यजितोलोकः क्षीयतइति [illegible] श्रुतेश्च। यथाहुः
आभूतसंप्लवंस्थानममृतत्वंहिभाष्यतइति। मुख्यममृतत्वंप्राप्तस्तुनपुनरावर्तते संसारमंडले। तस्मात्सनातनादिविशेषणविशिष्टंनित्यंसर्वमोक्षाख्यंतत्वतःसिद्धमप्य
ज्ञानादप्राप्तमिवकंठगतविस्मृतचामीकरवत्प्राप्तव्यं। अज्ञानापगममात्रेणेतिसिद्धं ३२ इतिनीलकंठीयेभारतभावदीपेशांतिमोक्षधर्मेषुमनुबृहस्पतिसंवादार्थ
प्रकाशोनामद्वात्रिंशोध्यायः॥ ॥ छ॥

२।१३

पृथिव्यां यांते निवाप्यतस्य मम ज्जन्ममच्युते इति ब्रह्मसाक्षात्कारस्य मोक्षहेतुत्वमुक्तं तच्चानि गुणदर्शनं सगुणज्ञानपूर्वकमिति मत्वा सन्निहितं श्रीकृष्णं प्रागेवम
हर्षीणां मुखात्स्वमात्मायमिति ज्ञातवता राज्ञा इति संवादाय कृष्णतत्त्वं पृच्छति पितामहेत्यादिना। ननु इह पुंडरीकाक्षपदेन विग्रहमुपलक्ष्यते त्वच्युतत्वादिवि
शेषणानामसंगतत्वं नहि कृष्णशरीरं रामादेहवैरेवोत्पन्नमिति पक्षेऽपि परादृशानां जन्मविनाशवत्त्वान्नतत्र विग्रहस्यापि तद्वत्तं सत्यात्मनां शकोविग्रहो विवक्षायां त
स्माकमप्यच्युतत्वादिकं समानमिति किं पुंडरीकाक्षेति विशेषणेनेति चेत्सत्यं न व सः भूबीजांकुरतरुफलोपमानि पंच परमेश्वररूपाणि ब्रह्म सबलब्रह्म विराट्वि
ष्णुसंज्ञानि यथा पृथिव्यामोषधयः संभवंतीति श्रीहर्षं (नर) ज्ञानगुरोपनमूलत्वात्पायां विनितन्तन्ति रिक्ताबीजादिवत्स्यामायाशबलोदयः संतितत्र वृक्षाख्यमपि

युधिष्ठिर उवाच पितामह महाप्राज्ञ पुंडरीकाक्षमच्युतं कर्तारमकृतं विष्णुं भूतानां प्रभवाप्ययं १

पि फलं त्वनेकबीजगर्भत्वात्तद्बीजांकुरतरूपो महत्तरं एवं विष्वाख्यं विग्रहवद्ब्रह्मापि त्वनेकशबलादिगर्भत्वात्ईशसूत्रविराड्भ्यो महत्तरं त्वत एव ब्रह्मरोपेत्वादिस
भुरूपंहिरण्यश्मश्रुर्हिरण्यकेश इति विग्रहधर्मैर्विशेषयिवान्तस्यर्कसामचगेष्णाविनितदंगुलिपर्वत्वेन कृष्णामशब्दाभिहितः कृत्स्नः प्रपंचो निरूपितः न च तस्मा
मर्त्यैः निनत्वं शक्यं। देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्नेति तदा लोके सा नित्याप्यभिधीयत इति जीवाहष्टानुरोधेन नित्यायाश्चपि तस्याश्चाविर्भा
वतिरोभावावेव उत्पत्तिलयशब्देनव्यवह्रियेते इत्येतत्स्मार्थं स्पष्टजि पादकेनागमेन विरोधात अत्र पद्मकल्पेन तस्यागे वोक्तं। तस्मात्पुंडरीकाक्षेऽप्यच्युतत्वादि
कं विशेषणं युज्यत एव तत्र अच्युतं कृपहीनं कर्तारं अर्थात्कार्यमात्रस्य अकृतं उत्पत्तिहीनं विष्णुं व्यापकं बीजफलन्यायेन कारणस्यापि कारणत्वात्तत एव भूतानां
वियदादीनां प्रभवाप्ययं योनिं १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०
१०७

अपराजितं देहादिधर्मैर्जरादिभिरिति शेषः २ तत्त्वतः तत्त्वात् वचनात् ३ महत्तम माहात्म्यं ४ भगवान् ऐश्वर्यस्य समग्रस्य ज्ञानस्य यशसः श्रियः वैराग्यस्य च धर्मस्य
षण्णां भग इतीङ्गना एतदुक्तलक्षणगुणवान् ईश्वरोऽन्तर्यामी प्रभुः राजवद्बहिः स्थित्वा नियन्ता विभुर्व्यापकः ५ किं त्विति यानि कर्माणीत्युत्तरेण संबंधः अनंतमपि हो

107

नारायणं हृषीकेशं गोविंदमपराजितं तत्त्वेन भरतश्रेष्ठ श्रोतुमिच्छामि केशवं भीष्म उवाच श्रुतोयमर्थो रामस्य जामदग्न्य
स्य जल्पतः नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ३ असितो देवलस्तात वाल्मीकिश्च महातपाः मार्कंडेयश्च गोविंदे
कथयत्यद्भुतं महत् ४ केशवो भरतश्रेष्ठ भगवानीश्वरः प्रभुः पुरुषः सर्वमित्येव श्रूयते बहुधा विभुः ५ किं तु यानि
विदुर्लोके ब्राह्मणाः शार्ङ्गधन्वनि महात्म्यानि महाबाहो शृणु तानि युधिष्ठिर ६ यानि चाहुर्मनुष्येंद्र ये पुराणविदो जनाः
कर्माणि त्विह गोविंदे कीर्तयिष्यामि तान्यहं ७ महाभूतानि भूतात्मा पुरुषोत्तमः वायुर्ज्योतिस्तथा चापः खं च गां चाव
कल्पयत ८ स सृष्ट्वा पृथिवीं चैव सर्वभूतेश्वरः प्रभुः अप्स्वेव शयनं चक्रे महात्मा पुरुषोत्तमः ९ ॥ ॥ ॥

स्व३ महात्मा२

माहात्म्यं लेशतो वक्ष्य इति भावः ७ भूतात्मेत्यादिना क्रमेण पदत्रयोक्तानां वाय्वादिमहाभूतकर्तृत्वं सामानाधिकरण्यादभेदश्चोक्तः ८ तत्र तत्सृष्ट्वा तदेवानुप्रावि
शदिति श्रुतेर्देहादिप्रवेशान्तां ऐशीं सृष्टिमाह। स इति। चात् खवादीन्। अप्स्वापः पुरुषवचस इति श्रुतेर्नौर्व्यहलेषु देहेषु ९ ॥ ॥ ॥

ग्र१

शां०प०
१०७

८२

नायहादिविमोक्रान्तां जेवीमहिमाहसर्वैन्यादिनातेनोपयः वासनामयं ज्ञाथहूस्तनामपिमवश्रहष्टिरितेनजमपरप्रयोगात्तात स्मिन्नग्रेयेदेहे संकर्षणो अहंकारं १० मनसा सहत्त्वकल्पयदितिपूर्वेणसंबंधः सःमेनस्कोहंकारः सोहमित्यर्थमाहरत्नतोहंनामाभवदित्यहंकारस्ष्टिमुक्त्वा सोपिमेतस्मनारमतेतितदेतदवादेनभयारत्यादिमैनोधर्म सप्रवणात्तत्स्पेश्वरत्रविवक्षणात्ता सेषोबुद्धरोगातिसष्टिर्यन्मर्त्यःसन्नमतानसृजनेतेतिष्कृतिसाम्यादपिर्जीवस्रष्टिप्रकारमामिदमित्यवसीयते ११ नाभ्यां पद्ममिति सप्तवहहिरिवभासमानमपिच्चंतरेव ब्रह्मांडमतिमानसत्वात्स्पेसेनिद [illegible] शितं नाभ्यामुपरितिरहितिविश्वस्यायतनंमहदितिसूचितः १२ पुष्करेनाभिकमले अथयदि

८१ ८१

सर्वज्ञो मय्यसिं छ्यानः पुरुषोत्तमः सोयं जनस्सर्वभूतानां संकर्षणो नाम कल्प्यते १० अयं प्रपंचं सर्वभूतानां मनसानीह शुश्रुम ॥
सधारयति भूतानि उभे भूतभविष्यती ११ ततस्तस्मिन्महाबाहो प्रादुर्भूते महात्मनि भास्करप्रतिमं दिव्यं नाभ्यां पद्ममजायत
१२ स तत्र भगवान्देवः पुष्करे भासयन् [illegible] दिशः ब्रह्मा समभवत्तात सर्वभूतपितामहः १३ तस्मिन्नपि महाबाहो प्रादुर्भूते महा
त्मनि तमसः पूर्वजो जज्ञे मधुर्नाम महासुरः १४ ॥

८१

स्मास्मिन्नब्रह्मणोरेहहापुंडरीकेवश्मेत्यादिक्रमेणांतरमेवपुष्करमिहप्रतिपन्नं यत्नवाल्यं अत्रपुरोपलब्धिस्थानेशरीरेदहांतस्थं सं समनस्कोहंकारः पुष्करेस्थित्वा ब्रह्मासमभ
नस्त्वष्टाततमभवदितिसंबंधः हृदयपुंडरीकाद्दौनिस्कृतंमनएवसर्वेश्वरइत्यतत्क्षहावेदितं १३ तस्मिन्निति एवंहृत्पुंडरीकेब्रह्मणाआविर्भावमतितमोगुणकार्यभूतोम
धुर्नाममलयापर [illegible] नामायोगविघ्नःदैवंदिनलयाभ्यासात्प्रवृत्तोः नादिर्ब्रह्मयासापत्नआविर्भवति १५ ॥ ॥ ॥ ॥ ॥

नामिति। अपचितिं उन्नतिं पुरुषोत्तम रविवात्मा योगेउ यस्थितं लयं बोधे नैव शमपेरित्यर्थः एतच्च विद्वेषादेरप्युपलक्षणं। यदाहुः संप्रदायविदः लयेसंबोधयेच्चित्तं विक्षि
संशमयेत्पुनरित्यादि १५ तस्येत्सारिनाच्यांतरस्तिष्ठिद्रूपं चोयावदस्यापसमाप्ति सात्तपरमात्मा नद्गतां सात्वतां पायोगिनामित्यर्थः १६ अहंकारिमानसत्वं योगिनश्चेमलि
स्तेश्वरयद्यपिनत्वं तथापियोगिनांजितमनस्कत्वात्स्थिर्नेदुःखदा मदानांतुअनथात्वानदुःखदा ज्ञानाज्ञानकृतावेवहिमोक्षबंधाविति भावः। अत्रदयाहप्रजाप

तस्य यस्य यकर्माणामुयं कमसेसमा। स्थितं ब्रह्मणोपचितिं कुर्वन्तं ज्ञानपुरुषोत्तमः १५ तस्मात्तानवधाक्तवैदेवदानवमानवाः मधुसूद
नमित्याहुर्क्लेषमं सर्वसात्वतां १६ ब्रह्मातुससृजेपुत्रान्मानसान्दक्षसत्तम मरीचिमत्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं॥ १७ मरीचि
ःकश्यपं तातपुत्रमयजमयजः मानसं जनयामास तेजसं ब्रह्मवित्तमं १८ अंगुष्ठात्ससृजे ब्रह्मा मरीचेरपि पूर्वजं सोभवद्भरतश्रेष्ठद
क्षो नाम प्रजापतिः १९ तस्य पूर्वमजापंतदशतिस्रश्चभारत प्रजापतेर्दुहितरस्तासां ज्येष्ठाभवद्दिति २० २० २० २०

त्यादेवाश्चासुराश्चतत्रकानीयसाएवदेवाज्यायसाअसुराः तएषुलोकेष्वस्पर्द्धन्तेति श्रुत्यनुसारेणशमादयोदेवाः शास्त्रबलेननिष्पाद्यतयायत्नसाध्यत्वात्कनिष्ठाः कामा
दयोऽसुराः स्वाभाविकत्वाज्ज्येष्ठाः तेषां ज्यात्मानं मोचयितुं मोहपाशैर्बद्धुंच मिथः स्पर्द्धमानानां पहाविष्ठाव्यं सत्वं वद्धे नेतदा देवानां श्रेयो [illegible] रणं
परागपश्चात्मविमोकहेतुर्भवतीत्याख्यायिकातात्पर्यं पदार्थः स्पष्टः २०

रनराः कश्यपस्त्रिपः प्रजापतंताव्रजनयंत २९ पश्चाप आलोच्यमः मधुसूदनः पृथिवीमिनिस्थिर्वीस्यसर्वभूतोपलक्षणं ३० शतंसहस्रंनंतं ३१

ति४

सर्वधर्मविशेषज्ञः पुण्यकीर्तिर्महायशाः मारीचः कश्यपस्तात सर्वासामभवत्पतिः २१ उत्पाद्य तु महाभागस्तासामवरजा दश द
दौ धर्माय धर्मज्ञो दक्ष एव प्रजापतिः २२ धर्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः विश्वेदेवाश्च साध्याश्च मरुत्वंतश्च भारत २३ अप
राश्च यवीयस्यस्ताभ्योन्याः सप्तविंशतिः सोमस्तासां महाभागः सर्वासामभवत्पतिः २४ इतरास्तु व्यजायंत गंधर्वांस्तुरगान्द्विजा
न् गाश्च किंपुरुषान्मत्स्यानुद्भिज्जांश्च वनस्पतीन् २५ आदित्यानदितिर्जज्ञे देवश्रेष्ठान्महाबलान् तेषां विष्णुर्वामनो भूद्गोविंदश्चा
भवत्प्रभुः २६ तस्य विक्रमणाच्चापि देवानां श्रीर्व्यवर्द्धत दानवाश्च पराभूता दैतेयी चासुरी प्रजा २७ विप्रचित्तिप्रधानांश्च दानवान्
सृजद्दनुः दितिस्तु सर्वानसुरान्महासत्वानजीजनत् २८ अहोरात्रं च कालं च यथर्तु मधुसूदनः पूर्वाह्णं चापराह्णं च सर्वमेवा
न्वकल्पयत् २९ ध्यात्वा यसोसृजन्मेघांस्तथा स्थावरजंगमान् पृथिवीं सोसृजद्विश्वां सहितां भूरितेजसा ३० ततः कृष्णो महाभा
गः पुनरेव युधिष्ठिर ब्राह्मणानां शतं श्रेष्ठं मुखादेवासृजत्प्रभुः ३१ बाहुभ्यां क्षत्रियशतं वैश्यानामूरुतः शतं पद्भ्यां शूद्रशतं चैव के
शवो भरतर्षभः ३२ ॥

मो०
१०९

109

धातारंसमसृजद्धंकारं ३३ ततएवचतन्मुखादयोजानाद्दस्मात्तवेदेसाद्दिना ३४ समवर्त्तिनंयमंसमवर्त्तीपरंतराद्दित्यमरः ४५ ७ ॥ ॥ ॥

७४

सस्रष्ट्वंचचतुरोवर्णान्समुत्पाद्यमहातपाः अध्यक्षंसर्वभूतानांधातारमकरोत्प्रभुं ३२ वेदविद्याविधातारंब्रह्माणममितद्युतिं भूत
मातृगणाध्यक्षंविरूपाक्षंचसोसृजत ३४ शासितारंचपापानांपितृणांसमवर्तिनं असृजत्सर्वभूतात्मानिधिपंवधनेश्वरं ३५ या
दसामसृजन्नाथं ३५ वरुणंचजलेश्वरं वासवंसर्वदेवानामध्यक्षमकरोत्प्रभुः ३६ यावद्यावदभूच्छ्रद्धादेहंधारयितुं
नृणां तावत्तावदजीवंस्तेनासीद्यमकृतंभयं ३७ नचैषांमैथुनोधर्मोवभूवभरतर्षभः संकल्पादेवचैतेषामपत्यमुपपद्यते ३८ न
तत्त्रेतायुगेकालेसंस्पर्शाज्जायतेप्रजा नह्यभून्मैथुनोधर्मस्तेषामपिजनाधिप ३९ द्वापरेमैथुनोधर्मः प्रजानामभवन्नृप तथाक
लियुगेराजन्द्वंद्वमापेदिरेजनाः ४० एषभूतपतिस्तातस्वध्यक्षश्चतथोच्यते निरपेक्षांश्चकौंतेयकीर्तयिष्यामितच्छृणु ४१ दक्षि
णापथगामिनःसर्वेनरवरांध्रकाः गुहाःपुलिंदाःशवराश्चुचुकामद्रकैःसह ४२ उत्तरापथजन्मानःकीर्तयिष्यामितानपि यौनकां
वोजगांधाराःकिरातावर्वरैःसह ४३ एतेपापकृतस्तातचरंतिपृथिवीमिमां श्वपाकवलगृध्राणांसधर्माणोनराधिप ४४ नैतेकृत
युगेतातचरंतिपृथिवीमिमां त्रेताप्रभृतिवर्त्तंतेतेजनाभरतर्षभः ४५ ॥ ॥ ॥

५८

५३

शां०
१०९

एवमिति प्रादुर्भूतो नित्यसिद्ध एव सन्न लभ्यात्मतः अत एव भूतो नात्निरित्यध्यापनाम संगच्छते महात्मना श्रीकृष्णेन हेतुना ४८ विग्रहवशिष्ठ स्वकृष्णस्य प्रति पादि
तं जगद्धेतुत्वमुपसंहरति। एवमेष इति। केवलमानुषो न अपितु परमात्मैव अत एव अचिंत्यः ४९ भूतोत्पत्तिरुपदिशन्॥ ॥ पूर्वाध्याये कृष्णमाहात्म्यमुक्तं तत्र ध्यान

ततस्तस्मिन्महाघोरे संध्याकाल उपस्थिते राजानः समसज्जंत समासाद्येतरेतरं ४६ एवमेष कुरुश्रेष्ठ प्रादुर्भूतो महात्मवान् देवं दे
वर्षिराचष्ट नारदः सर्वलोकदृक् ४७ नारदोप्यथ कृष्णस्य परं मेने नराधिप शाश्वतत्वं महाबाहो यथावद्भरतर्षभ ४८ एवमे
ष महाबाहुः केशवः सत्यविक्रमः अचिंत्यः पुंडरीकाक्षो नैष केवलमानुषः ४९ शांतौ मोक्षधर्मेषु सर्वभूतोत्पत्तिः॥ ॥

युधिष्ठिर उवाच को पूर्वमासन्मनवः प्रजानां भरतर्षभ के वर्षयो महाभागा दिक्षु चैकशः स्मृताः १ भीष्म उवाच श्रूयतां भरतश्रेष्ठ
यन्मां त्वं परिपृच्छसि प्रजानां पतयो ये स्म दिक्षु ये चर्षयः स्मृताः २ एकः स्वयंभूर्भगवानाद्यो ब्रह्मा सनातनः ब्रह्मणः सप्त वै पुत्रा म
हात्मानः स्वयंभुवः ३

प्रतिपक्षाः कामादयश्चांतराः शत्रवः संति तेषां प्रशमाय पूर्वेषां गुरूणां स्मरणं कर्तव्यमित्येतदर्थोयमध्याय आरभ्यते। असतो मा सद्गमय तमसो मा ज्योतिर्गमयेति वेदे त्व
भ्यारोहमंत्र इवात्र वानर्वर्णं समाधारणेन योगारोहाय जप्तोयं सर्वे दिग्गता विघ्नान् शमयंतीति [illegible] दिशां स्वस्तिकमित्यस्य नाम को पूर्वमासन्मनव इत्यादिरध्यायो नतासद्य

प्रदेशाः प्रदिशंतिआज्ञापयंतीतिप्रदेशा दर्शनशीलाश्चर्षयः प्रभावनाः प्रकर्षेणावनशीलाः १५ ॥ ॥ ४

मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः वसिष्ठश्च महाभागः सदृशो वै स्वयंभुवा ४ सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः अत ऊर्ध्वं प्रवक्ष्यामि सर्वानेव प्रजापतीन् ५ अत्रिवंशसमुत्पन्नो ब्रह्मयोनिः सनातनः प्राचीनबर्हिर्भगवांस्तस्मात्प्राचेतसो दश ६ दशानां तनयस्त्वेको दक्षो नाम प्रजापतिः तस्य द्वे नामनी लोके दक्षः क इति चोच्यते ७ मरीचेः कश्यपः पुत्रस्तस्य द्वे नामनी स्मृते अरिष्टनेमिरित्येकं कश्यपेत्यपरं विदुः ८ अंगेश्चैवौरसः श्रीमान्राजा भौमश्च वीर्यवान् सहस्रं यश्च दिव्यानां युगानां पर्युपासिता ९ अर्यमा चैव भगवान्ये चास्य तनया विभो एते प्रदेशाः कथिता भुवनानां प्रभावनाः १० शशबिंदोश्च भार्याणां सहस्राणि दश चाच्युत एकैकस्यां सहस्रं तु तनयानामभूत्तदा ११ एवं शतसहस्राणि दश तस्य महात्मनः पुत्राणां च न ते कंचिदिच्छंत्यन्यं प्रजापतिं १२ प्रजामाचक्षते विप्राः पुराणाः शाशबिंदवीं स वृष्णिवंशप्रभवो महान्वंशः प्रजापतेः १३ एते प्रजानां पतयः समुद्दिष्टा यशस्विनः अतः परं प्रवक्ष्यामि देवांस्त्रिभुवनेश्वरान् १४ भगोंऽशश्चार्यमा चैव मित्रोऽथ वरुणस्तथा सविता चैव धाता च विवस्वांश्च महाबलः १५ त्वष्टा पूषा तथैवेंद्रो द्वादशो विष्णुरुच्यते इत्येते द्वादशादित्याः कश्यपस्यात्मसंभवाः १६ ॥ ५१ ॥

स्वजात। स्वयंकामतो: कामतस्त्वकृतात। अप्रकृतास्त्वप्रसंसर्गजात २९ ॥ ॥

नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनावपि मार्त्तंडस्यात्मजावेतावष्टमस्य महात्मन: १७ ते च पूर्वं सुराश्चेति विविधा: पितर: स्मृता:
त्वष्टुश्चैवात्मज: श्रीमान विश्वरूपो महायशा: १८ अजैकपादहिर्बुध्न्यो विरूपाक्षोथ रैवत: हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वर: १९
सावित्रश्च जयंतश्च पिनाकी चापराजित: पूर्वमेव महाभागा वसवोष्टौ च कीर्त्तिता: २० एत एवंविधा देवा मनोरेव प्रजापते: ते च
पूर्वं सुराश्चेति द्विविधा: पितर: स्मृता: २१ शीलयौवनतस्त्वन्ये तथान्ये सिद्धसाध्ययो: ऋभवो मरुतश्चैव देवानां चोदिता गणा:
२२ एवमेते समाम्नाता विश्वेदेवास्तथाश्विनौ आदित्या: क्षत्रियास्तेषां विशश्च मरुतस्तथा २३ अश्विनौ तु स्मृतौ शूद्रौ तपस्युग्रे
समास्थितौ स्मृतास्त्वंगिरसो देवा ब्राह्मणा इति निश्चय: २४ इत्येतत्सर्वदेवानां चातुर्वर्ण्यं प्रकीर्त्तितं एतान्वै प्रातरुत्थाय देवान्
स्तु प्रकीर्त्तयेत २५ स्वजादन्यकृताच्चैव सर्वपापात्प्रमुच्यते यवक्रीतोथ रैभ्यश्च अर्वावसुपरावसू २६ औशिजश्चैव कक्षीवान्
लश्चांगिरस: स्मृत: ऋषिर्मेधातिथे: पुत्र: कण्वो बर्हिषदस्तथा २७ त्रैलोक्यभावनास्तात प्राच्यां सप्तर्षयस्तथा उन्मुचो विमु
खश्चैव स्वस्त्यात्रेयश्च वीर्यवान २८ प्रमुचश्चेध्मवाहश्च भगवांश्च दृढव्रत: मित्रावरुणयो: पुत्रस्तथागस्त्य: प्रतापवान २९

२०७ चतःष्टिंशोध्यायः॥ ॥एवंवृत्तस्यपन्नपूर्वकंकृ[illegible]ध्यायतःपरुषस्यचत्रिंतराविर्भूतःकृष्णःस्तद्गतानककामादीन्योगप्रतिपक्षान्नाशयतीतित्रिंतनमभिक्षीउ

एतेब्रह्मर्षयोनित्यमास्थितादक्षिणांदिशं उषंगुःकवषोधौम्यःपरिव्याधश्ववीर्यवान् ३० एकतश्चद्वितश्चैवत्रितश्चैवमहर्षयः
आत्रेःपुत्रश्चभगवांस्तथासारस्वतःप्रभुः ३१ एतेचैवमहात्मानःपश्चिमामाश्रितादिशं आत्रेयश्चवशिष्ठश्चकाश्यपश्चम
हानृषिः ३२ गौतमोथभरद्वाजोविश्वामित्रोथकौशिकः तथैवपुत्रोभगवानृचीकस्यमहात्मनः ३३ जमदग्निश्चसप्तैतेउ
दीचीमाश्रितादिशं एतेप्रतिदिशंसर्वेकीर्तितास्तिग्मतेजसः ३४ साक्षिभूतामहात्मानोभुवनानांप्रभावनाः एवमेतेमहा
त्मानःस्थिताःप्रत्येकशोदिशं ३५ एतेषांकीर्तनंकृत्वासर्वपापात्प्रमुच्यते यस्यांयस्यांदिशिह्येतेतांदिशंशरणंगतः ३६
मुच्यतेसर्वपापेभ्यःस्वस्तिमांश्चगृहान्व्रजेत् ३७ शांतौमोक्षधर्मेषुदिशांस्वस्तिकंनाम युधिष्ठिरउवाच पितामहमहाप्राज्ञयुधि
सत्यपराक्रम श्रोतुमिच्छामिकार्त्स्न्येनकृष्णमव्ययमीश्वरं १ यच्चास्यतेजःसुमहद्यच्चकर्मपुराकृतं तन्मेसर्वंयथातत्त्वंप्रब्रूहित्वं
(२०९) पुरुषर्षभ २ तिर्यग्योनिगतोरूपंकथंधारितवान्प्रभुः केनकार्यनिसर्गेणतन्माख्याहिमहाबल ३ ॥ ॥ ॥

नारायणंलध्यायेवराहस्याग्रिकामुखेनप्रतिपाद्यतेपितामहमहाप्राज्ञेत्यादिना १ १ १ १

पृथिवीं बुद्धिवासनाबीजानां क्षेत्रभूतां दानवैः कामक्रोधाद्यैरभिसंस्तीर्णां ध्यासां १३ वराहरूपिणं श्रेष्ठकृतयोगं गा४१ तत्ररूपितं त्वाविर्भावितं शीलमसातं· त्र्यहः या

प्र२

भीष्म उवाच पुराहं मृगयां यातो मार्कंडेयाश्रमे स्थितः तं चापश्यन्मुनिगणान्समासीनान्सहस्रशः ४ ततस्ते मधुपर्केण पूजां च
क्रुर्थ्यो मपि प्रतिगृह्य च तां पूजां प्रत्यनंदमृषीनहं ५ कथेयं कथिता तत्र काश्यपेन महर्षिणा मनःप्रह्लादिनी दिव्या तामिहैकमनाः
शृणु ६ पुरा दानवमुख्या हि क्रोधलोभसमन्विताः बलेन मत्ताः शतशो नरकाद्या महासुराः ७ तथैव चान्ये बहवो दानवा युद्धदुर्मदाः
न सहंते स्म देवानां समृद्धिं तामनुत्तमां ८ दानवैरर्द्यमाना तु देवा देवर्षयस्तथा न शर्म लेभिरे राजन् विशमाना स्ततस्ततः ९ पृ
थिवीमार्तरूपां ते समपश्यन्दिवौकसः दानवैरभिसंस्तीर्णां घोररूपैर्महाबलैः १० भाराक्रांतामपकृष्टां चरुः खिन्नां संनिमज्ज
तीं अथादितेयाः संत्रस्ता ब्रह्माणमिदमब्रुवन् ११ कथं शक्ष्यामहे ब्रह्मन्दानवैरभिमर्दनं स्वयंभू - स्तानुवाचेदं निसृष्टोत्र
विधिर्मया १२ ते वरेणाभिसंपन्ना बलेन च मदेन च नावबुध्यंति संमूढा विष्णुमव्यक्तदर्शनं १३ वराहरूपिणं देवमधृष्यम
मरैरपि एष वेगेन गत्वा हि यत्र ते दानवाधमाः १४ अंतर्भूमिगता घोरा निवसंति सहस्रशः शमयिष्यति तच्छ्रुत्वा जग्मुः सुरसत्तमाः १५

इसकृत्वा चिंतं ग्रह्मः स्वः कृता विस्तादिपुरुषं १४ १५

सनातनं(ग:) ततं ऋतं निर्भक्तानुग्रहार्थं वै धृतम् इति सनातनं सनातनत्वात्सर्वेषु क्षितेर्दकारस्थानेन कारेणेह रुक्ताः स्मृतार्थो ध्यायशेषः २८ ॥ ॥ ॥ ॥

ततो विष्णुर्महातेजा वाराहं रूपमास्थितः अन्तर्भूमिं संप्रविश्य जगाम दितिजान्प्रति १६ दृष्ट्वा च संहिताः सर्वे दैत्याः सत्त्व
ममानुषं प्रसह्य न रसास्सर्वे संतस्थुः कालमोहिताः १७ ततस्ते सममभिद्रुत्य वाराहं जगृहुः समं संक्रुद्धाश्च वराहं तं व्यकर्ष
न्त समन्ततः १८ दानवेंद्रा महाकाया महावीर्यबलोच्छ्रिताः नाशक्नुवंश्च किंचित्ते तस्य कर्तुं तदा विभोः १९ ततो गच्छन्न वि
स्मयं ते दानवेंद्रा भयं तथा संशयं गतमात्मानं मेनिरे च सहस्रशः २० ततो देवाधिदेवस्य योगात्मा योगमास्थितः योगमा
स्थाय भगवांस्तदा भरतसत्तम २१ विननाद महानादं क्षोभयन्दैत्यदानवान् संनादिता येन लोकाः सर्वाश्चैव दिशो दश
२२ तेन संनादशब्देन लोकानां क्षोभ आगमत् संत्रस्ताश्च भृशं लोके देवाः शक्रपुरोगमाः २३ निर्विचेष्टं जगच्चापि बभूवा
तिभृशं तदा स्थावरं जंगमं चैव तेन नादेन मोहितं २४ ततस्ते दानवाः सर्वे तेन नादेन भीषिताः पेतुर्गतासवश्चैव विष्णुतेजः
प्रमोहिताः २५ रसातलगतश्चापि वराहस्त्रिदशद्विषः खुरैर्विदारयामास मांसमेदोस्थिसंचयान् २६ नादेन तेन मह
ता सनातन इति स्मृतः पद्मनाभो महायोगी भूताचार्यः स भूतराट् २७ ततो देवगणाः सर्वे पितामहमुपाद्रवन् तत्र गत्वा म
हात्मानमूचुश्चैव जगत्पतिम् २८ ॥ ॥ ॥ ॥

३६ पंचत्रिंशः॥ ॥एवमध्यायत्रयेणाईश्वरप्रणिधानमुक्तं येन शीघ्रतरं योगः सिद्ध्यति योगांतरायाश्च व्याधिदुःखादयो न स्पृशंति। अथेदानीं प्रधानभूतं योगमेवाभि

नाहं यं कीदृशो देवनेनं विघ्नवपं प्रभो कोसौ हि कस्य वानाद्यो येन विह्वलितं जगत् २९ देवाश्च दानवाश्चैव मोहिता यस्य तेजसा
एतस्मिन्नंतरे विघ्नराजो राहं स्वमास्थितः उत्तिष्ठन्महाबाहो स्तूयमानो महर्षिभिः ३० पितामह उवाच गिरा स्वरेणैव पती त्वमहा
वक्षा महाबलः एष देवो महायोगी भूतात्मा भूतभावनः ३१ सर्वभूतेश्वरो योगी यो निरात्मा तथात्मनः। स्थिरीभव तत् कृष्णाय
सर्वविघ्नविनाशनः ३२ कृत्वा कर्मोत्तमाश्चेन तदृश कथमिमित प्रभुः समायातः स्वमात्मानं महाभागो महाद्युतिं ३३ पद्मनाभो म
हायोगी महात्मा भूतभावनः न संतापो न भीः कार्या शोको वा पुरसत्तमाः ३४ विधिरेष प्रभावश्च कालः संहारकारकः लोकान्
धारयतानेन कृष्णे मेघं सुश्रुंनर्भूमिविक्रीडितं नाम॥ ॥युधिष्ठिर उवाच योगं मे परमं तात मोक्षस्य वद भारत तमहं तत्त्वतो ज्ञातुमि
च्छामि वदतां वर १ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह २ ॥ ॥

ज्ञातः पृच्छति। योगं मे इति। परमं सबीजयोगात् परमं निर्बीजयोगं। मोक्षस्य हेतुं। मोक्षं हेमइति पाठे उपायोपेयविषयौ हौ प्रश्नौ तं संयोगं मोक्षं १ २ २

कश्चिदिति श्लोकाभ्यां क्रमेण गुरुशिष्ययोर्गुणा दर्शिताः ५ त्वं चाहं च कुतः उपादानकुतो वा निमित्तात् अस्मत्तो त्वं तत् ब्रूहि यत् परं श्रेष्ठं उपादानं निमित्तं च न तत् मातापितृ
वस्तुरूपा पूर्णपरब्रह्मांतरालिकं ६ भूतेषु पंचसु उपादानकारणेषु समेषु सत्सु विपरीता विषमाः कथं कृयोः यानि वर्त्तंते येषु वेदेषु यद्वाक्यं वर्णाश्रमव्यवस्थापरं ब्राह्मणो व

कश्चिद्ब्राह्मणमासीनमाचार्यमृषिसत्तमं तेजोराशिं महात्मानं सत्यसंधं जितेंद्रियं ३ शिष्यः परममेधावी श्रेयोर्थी सुसमाहि
तः चरणा उपसंगम्य स्थितः प्रांजलिरब्रवीत् ४ उपासनात् त्वमस्मत्तो मिय दिवि भगवन् मम संशयो महान् कश्चित्तन्मे व्याख्यातुम
र्हसि ५ कुतश्चाहं कुतश्च त्वं तत्सम्यग् ब्रूहि यत् परं कथं च सर्वभूतेषु समेषु द्विजसत्तम ६ सम्यग्वृत्ता निवर्त्तंते विपरीताः कृयोर
याः वेदेषु चापि यद्वाक्यं लौकिकं व्यापकं च यत् एतद्धि हं यथा तत्त्वं सर्वं व्याख्यातुमर्हसि ७ गुरुरुवाच शृणु शिष्य महाप्राज्ञ ब्रह्मगु
ह्यमिदं परं आध्यात्मं सर्वविद्यानामागमानां च यद्वसु ८ वामदेवः परमिदं विश्वस्य ब्रह्मणोऽभुव सद्यज्ञानमयो यत्तत् स्थितिं कृतः इस
श्रा जैव ९ ॥ ॥ ॥ ॥ ॥ ॥

हस्ति सर्वेन यज्ञेन राजा राजसूयेन यज्ञेन वैश्यो वैश्यस्तोमेन यज्ञेन तस्माच्छूद्रो यज्ञेन वर्जितः स्यात् इत्यादि लौकिकं स्मृतिवाक्यं तादृशं । व्यापकं सर्ववर्णाश्रमसाधारणं न हि स्यात् स
र्वभूतानी त्यादि इदमपि कथं हे तत् साम्ये पि कार्यवैषम्ये किं बीजं तत् ब्रूहीत्यर्थः ७ ब्रह्मगुह्यं वेदगोप्यं वा सबंधनं न दृतर कृणी यमुपकारकं वा ८ ब्रह्मणो मुखं वेदादि स्थिताः
उपायोपेययोरभेदात् प्रणवादीनां वामदेवत्वं ९ ॥ ॥ ॥ ॥ ॥ ॥

रूपेय स्वरूपमाहुः पुरुषमिति १० एतेन देवायं कृत्स्नस्य आहतं दिति। वार्ष्णेयं वृष्णिषु कुलावतारं इति हा से न तत्त्वरूपप्रकाशन परं यं १२ वार्ष्णेयं कृष्णमाख्यातं। यत्परं
कालचक्रं न त्ववाचीनं संवत्सराख्यं तत्तं केशवं वदंतो। तत्र रेणात्मयः भावाभावौ सृष्टिप्रलयौ सर्वलोकानां स्वरूपज्ञापकौ यस्य। आयारोपापवादाभ्यां। नेष्प्रपंचं निल्

पुरुषं सनातनं विष्णुं यं तं वेदविदो विदुः सर्गस्थितिलयकर्तारमव्यक्तं ब्रह्म शाश्वतं १० तदिदं श्रव सर्व वार्ष्णेयमितिहासं शृणुष्व मे
ब्राह्मणो ब्राह्मणैः श्राव्यो राजन्यः क्षत्रियैस्तथा ११ वैश्या वैश्यैस्तथा श्राव्याः शूद्रैर्महामनाः माहात्म्यं देवदेवस्य विष्णोरमि
ततेजसः १२ अर्हस्त्वमसि कल्याणं वार्ष्णेयं शृणु तत्परं कालचक्रमनाद्यंतं भावाभावस्वलक्षणं १३ त्रैलोक्यं सर्वभूतेशे
चक्रवत्परिवर्त्तते यत्र तत्क्षरमव्यक्तममृतं ब्रह्म शाश्वतं वदंति पुरुषव्याघ्रं केशवं पुरुषर्षभं १४ पितॄन्देवानृषींश्चैव तथा वै
यक्षराक्षसान् नागासुरमनुष्यांश्च सृजते परमोऽव्ययः १५

यत्तद्वृत्तिमायेन वज्ञातं शक्यं न तत्स्वरूपं गयाहिक यागवाक्य वदित्यर्थः १३ सर्वभूतेशे यस्मिन् त्रैलोक्यं चक्रवत् चक्रात् रपिपीलिकावत् परवशत्वेन परिवर्त्तते। कोशैरि
वचिद्दृश्मभिः वातिसर्वं व्याप्नोतीति केशवस्तं पुरुषर्षभं पुरुषाच्छ्रन्नमयादयः पंचते षां ऋषभं श्रेष्ठं तमं मेघ षष्ठमित्यर्थः १४ पितॄनिति। अव्ययः अपरिणामी १५

तथैवेति। वेति वेदकर्तृत्वं ब्रह्मणः महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतिसिद्धं। वाचा विरूपनित्ययेति वेदनित्यत्ववचनं तद्वर्णपदाद्यानुपूर्व्या विध्वंसमात्रपरं प्रलीय
तेऽस्मिन्महदादिकार्यप्रपञ्चलयसंप्रकरोतीति। तीलयो यस्मिन्निति स्थानं मायाशबलमविसृज्जेऽस्यार्थः तथा च श्रुतिर्नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो य
दितिपृहस्रजः शक्तीनां प्रधानसूक्ष्मपरमाणूनामानुमानिकानामिव श्रौतस्य परव्योम्नोऽपि मायाशबलापरमात्मनः सृष्टेः प्रागभावं वदंतीतस्यापि जन्यत्वे दर्शयति
मायायास्तु कूटस्थत्वात् ब्रह्मणश्च असंगत्वात् तयोरैकीभावं लक्षयति। त्विकं शबलं संभवति तच्छ्रौतानाम्यपि हि नेयदासीत् तत्संगोऽस्त्यप्रत्यय इति श्रुतिभ्यां। तस्मात्सृष्टेः प्रा

तथैव वेदशास्त्राणि लोकधर्मोऽस्य शाश्वतान् प्रलयं प्रकृतिं प्राप्य युगादौ सृजते पुनः १६ यथार्तावृतुलिंगानि नानारूपाणि
पर्यये दृश्यंते तानि तान्येव तथा भावा युगादिषु १७ अथ यद्यद्यदाभाति कालयोगाद्युगादिषु तत्तदुत्पद्यते ज्ञानं लोकयात्रा
विधानजं १८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ङ्मायाशबलं ब्रह्मासीदिति युक्तिर्मायायां स्थितेत्वेव प्रकाशनतवस्तुत्यत्या। तथोक्तं अस्याविधेयविधायामेव मायेस्तितापकल्पइति। अथ्योतोयुक्तमुक्तं प्रकृतिं सृजते इति। उत्तर
गवद्वतीति समकालाया स्वतंत्रस्रष्टेरुपगमादिति क्र १६ यथेति ऋतवः कृपया यथावसंते आम्रवृक्षादयः ग्रीष्मे मल्लिकाः वर्षासु कदंबा वा नियमेन पुष्पितास्तथैव निरंतर ब्रह्म
हरविष्ण्वादिसृष्टिकल्पं सृष्टिप्रलयस्थितिकर्तृत्वेन देवा आविर्भवंति १७ एतदेव व्याचष्टे अथेति। तत्तत् तस्मिन्विषये। लोकयात्राव्यवहारः तस्य विधानं प्रमाणेन
प्रमेयस्थापनं तज्जं तेन सोपाधिकमेव ज्ञानं उत्पद्यते न निरुपाधिकमित्युक्तं भवति १८ ॥ ॥ ॥

युगांते युगादौ अंतर्हितान् पूर्वयुगे येभ्यस्तान्तान् अनुज्ञाताः उपदिष्टाः स्वयंभुवा ब्रह्मणा १९ वेदवित् भगवान् ब्रह्मा वेदांगानि बृहस्पतिर्वेदेति संबंधः २१ न्यायतंत्राणिता
र्किकवैशेषिककापिलपातंजलादीनि हेतुर्युक्तिः आगमो वेदः समाचारः प्रत्यक्षं तैः प्रमाणैः कृत्वा एतैर्मुनिभिर्यद्ब्रह्म उक्तं तत्तदुपास्यतां अमुख्यत्वात्तदुपास्यमेव न वेद।

युगांतेंतर्हितान्वेदान्सेतिहासान्महर्षयः लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा १९ वेदविद्वेद भगवान्वेदांगानि बृहस्पतिः भार्गवो नी
तिशास्त्रं तु जगाद जगतो हितं २० गांधर्वं नारदो वेद भरद्वाजो धनुर्ग्रहं देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितं २१ न्यायतंत्राण्यने
कानि तैस्तैरुक्तानि वादिभिः हेत्वागमसदाचारैर्यदुक्तं तदुपास्यते २२ अनाद्यं तत्परं ब्रह्म न देवा नर्षयो विदुः एकस्तद्वेद भगवान्धा
ता नारायणः प्रभुः २३ नारायणादृषिगणास्तथा मुख्याः सुरासुराः राजर्षयः पुराणाश्च परमं दुःखभेषजं २४ ॥ ॥ ॥

तद्विशेषणमित्यर्थः तस्याचोपास्यस्य ब्रह्मत्वं श्रुतिराह तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति २२ अनाद्यं नास्ति आद्यं कारणं यस्य तत्। यद्वा आदौ विदितं आद्यं तदन्यत् अ
नाद्यं सर्गादौ अविदितमित्यर्थः कथं तर्हि देवा न विदुरित्यत आह एक इत्यादि २३ २४ ॥

मो०
११५

ब्रह्मज्ञानस्यात्यंतिकदुःखनिवर्त्तकत्वमुक्त्वाध्यारोपापवादन्यायेन ब्रह्म निरूपयति। पुरुषेति। पुरुषेण अधिष्ठितान् आलोचितान्। सोऽकामयत बहु स्यां प्रजायेये
ति श्रुतेः। तेन सांख्याभिमतं प्रकृतेः स्वातंत्र्यं निरस्तं। अचेतने चेतनानधिष्ठिते शकटादौ प्रवृत्त्यदर्शनाच्चायुक्तं तत् सूयते प्रसवोन्मुखी जायते। भगवान् महदादीनां हेतुः
धर्माधर्मौ ताभ्यां युक्तं। अत एव सर्गादावपि तारतम्यमुक्तं। अत एवेशानं हेतुयुक्तमिति सांख्यमतं प्रकृतेर्धर्मादिप्रवर्त्तित्वं निरस्तं। तेषां हि जलवत्स्वतः प्रवर्त्तमानानां प्रकृतेः
पापं सुखपरिणामं प्रतिबध्नाति पुण्यं च दुःखपरिणामं तत्रान्यतरेणान्यतरस्य स्वोदये प्रतिबंधशक्तिरुपनीयत इति २५ दीपादिति। हेतुयुक्तमित्यत्रापि वर्त्तते। तेलव

115

पुरुषाधिष्ठितान्भावान्प्रकृतिः सूयते यदा। हेतुयुक्तमतः सर्वं जगत्संपरिवर्त्तते २५ दीपादन्ये यथा दीपाः प्रवर्त्तन्ते सहस्रशः।
प्रकृतिः सूयते तद्वदानंत्यान्नापचीयते २६ अव्यक्तात्कर्मजा बुद्धिरहंकारमसूयते। आकाशं चाप्यहंकाराद्वायुराकाशसंभवः
२७ वायोस्तेजस्ततश्चापस्त्वद्भ्यो वसुधोद्गता। मूलप्रकृतयो ह्यष्टौ ताज्जगदेतास्ववस्थितं २८ ॥ ॥ ॥

र्थादिहेतौ सति यथा दीपादन्ये केदीपाः प्रभवंतीत्येवमदृष्टोपग्रहात्प्रकृतिः महदादिकार्यं सूते दीपवदानंत्याच्च नापचीयते ईशादृष्टाभ्यां प्रकृतिः प्रवर्त्तत इति
श्लोकद्वयतात्पर्यं २६ सृष्टिक्रममाह। अव्यक्तादिति। कर्मजेति ईशादपि कर्मप्राबल्यं दर्शयते तस्य कर्मापेक्षयैव सदसत्फलदत्वात् बुद्धिर्महत्तत्वं। तथा च सर्गादौ कर्मैव
प्रकृतिं प्रवर्त्तयतीत्यर्थः। आकाशादिपदैः शब्दतन्मात्रादीनि ज्ञेयानि २७

अतःपुरुषाधिष्ठितप्रकृत्याघटकात्तविषयाइतिशब्दाद्याश्रयाःस्थूलाकाशादयःवाय्वाकाशयोरपिस्पर्शशब्दलिंगानुमेयतयाविषयत्वं २९ वाक्कर्मणीइत्य
त्रवागिंद्रियं। कर्मशब्देनसर्वेषामिंद्रियाणांकर्माणिवचनादानगतिविसर्गानंदाख्यानिज्ञेयानि ३० शब्दइति शब्दादयःचित्तमितिविज्ञेयं। चित्तमात्रोपादानाइ
त्यर्थःपदाहुर्भगवंतोऽक्षपादाचार्याःदोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइतिप्रमेयस्यचित्तमात्रत्वमुक्त्वाप्रमाणास्थापितदार्ढ्यात्तस्थितितेषुशब्दादिष्वपिसर्वं

ज्ञानेंद्रियाण्यतःपंचपंचकर्मेंद्रियाण्यपि विषयाःपंचचैकंचविकारेषोडशंमनः २९ श्रोत्रंत्वक्चक्षुषीजिह्वाघ्रा
णंज्ञानेंद्रियाण्यथ पादौपायुरुपस्थश्चहस्तौवाक्कर्मणीअपि ३० शब्दःस्पर्शश्चरूपंचरसोगंधस्तथैवचविज्ञेयंव्या
पकंचित्तंतेषुसर्वगतंमनः ३१ रसज्ञानेतुजिह्वेयंव्याहृतेवाक्तथोच्यते इंद्रियैर्विविधैर्युक्तंसर्वंव्यक्तंमनस्तथा ३२

षुगतंश्रोत्रादिरूपेणोपगतमनएव ३१ एतदेवस्पष्टयति। रसेतिरसज्ञानेमनएवइमंजिह्वेत्यर्थःमनसाह्येवपश्यतिमनसाशृणोतीत्यादिश्रुतेःव्याहृतेशब्दप्रयो
गेइदंद्वयंज्ञानकर्मेंद्रियपंचकद्वयस्योपलक्षणमित्याह। इंद्रियैरिति। सर्वंआंतरंबुद्धिसुखदुःखादिबाह्यंविषयशब्दादितथाव्यक्तंमहदादिघटांतंमनएव। तथाच
श्रुतिःअसतोधिमनोऽसृज्यतमनःप्रजापतिमसृजतप्रजापतिःप्रजाअसृजंत। तद्वाइदंमनस्येवपरमंप्रतिष्ठितंयदिदंकिंचेति ३२ ॥ ॥ ॥ ॥ ॥

षोडश दशेंद्रियाणि मनः पंच महाभूतानि क्षेत्रान कर्त्तारं विस्तानात्मानं उपासीनं अर्पात्परात्मानं तस्यापि संहतत्वेन असंहतपुरुषशेषत्वात् ३३ रसात्मकत्वात्सोमो
जलं तस्य गुणः कार्यं जिह्वा गंधो गंधग्राहकं घ्राणं ग्राह्यग्राहकयोरभेदात् ३२ स्पर्शस्पर्शनेंद्रियं जिह्वादीनां जलादिकार्यत्वं तद्गतरसादिग्राहकत्वात् ग्राह्यग्राह
कयोः समानजातीयत्वनियमोनेन सूचितः ३४ सत्वगुणः सत्वकार्यं अव्यक्तजं प्रधानकार्यं सर्वेषां भूतानामात्मभूतः ईश्वरः तस्यं उपाधित्वेन तत्र स्थितं ॥ ॥

विधात्रा षोडशैतानि दैवतानि विभागशः देहेषु देहकर्त्तारमुपासीनमुपासते ३१ तद्वत्सोमगुणा जिह्वा गंधस्तु पृथिवीगुणः श्रोत्रं
नभोगुणं चैव चक्षुरग्नेर्गुणास्तथा ३३ स्पर्शं वायुगुणं विद्यात्सर्वभूतेषु सर्वदा मतः सत्वगुणं प्राहुः सत्वमव्यक्तजं तथा सर्वभूतात्म
भूतस्थं तस्माद्बुध्यति बुद्धिमान् ३५ एते भावा जगत्सर्वं वहंति सचराचरं श्रितां विरजसं देवं यमाहुः प्रकृतेः परं ३६ नवद्वारपुरं पुण्य
मेतैर्भावैः समन्वितं व्याप्य शेते महानात्मा तस्मात्पुरुष उच्यते ३७॥

सर्वांतरंगं सत्वं ज्ञानीयानां सत्वविशिष्टस्य ज्ञेयत्वेपि चिदचिद्विवेके परिशेषाद् चितः सत्वस्यैव ज्ञेयत्वमस्तीति सत्वमेव बुध्यते इत्युक्तं ३५ एतेन सत्वादयः ईशाद
योवा विरजसं सर्वप्रवृत्तिशून्यं कूटस्थं ३६ नवज्ञानेंद्रियपंचकं बुद्धिमनसी देहप्राणौ च द्वाराणि विषमप्रकाशो यस्मिन् तन्नवद्वारं भावैः शब्दादिभिः ३७

अजरामरइतिदेहधर्मास्पर्शउक्तः। व्यक्तं मूर्त्तं अव्यक्तं अमूर्त्तं तदुभयात्मनाउपदिश्यते वेदे द्वेवा ब्रह्मणोरूपे मूर्त्तं चैवामूर्त्तं चेत्यादिना यः सव्यक्ताव्य
क्तोपदेशः कार्यकारणात्मा तद्वानतदधिष्ठानभूतो नेति नेतीत्यागमविषयः। एवंविधोपि व्यापकः कारणात्मा सगुणः यः सर्वज्ञ इत्यादिश्रुतेः सार्वज्ञ्यादिगु
णायुक्तः सूक्ष्मः दुर्लक्ष्यः सर्वाणि भूतानि गुणाश्च सत्वादयस्तेषामाश्रयोधिष्ठाने ३८ यथेति उपाधिवशान्महत्वमल्पत्वं वा प्राप्तोपि दीपवत्सर्वजंतुषु सम

अजरः सोऽमरश्चैव व्यक्ताव्यक्तोपदेशवान व्यापकः सगुणी सूक्ष्मः सर्वभूतगुणाश्रयः ३८ यथा दीपः प्रकाशात्मा ह्रस्वो वा
यदि वा महान ज्ञानात्मानं तथा विद्यात्पुरुषं सर्वजंतुषु ३९ श्रोत्रं वेदयते वयं स शृणोति स पश्यति कारणं तस्य देहोयं स
कर्त्ता सर्वकर्मणां ४० अग्निर्दारुगतो यद्वच्छिन्ने दारौ न दृश्यते तथैवात्मा शरीरस्थो भिन्ने देहे न दृश्यते ४१ अग्निर्यथा
ह्युपायेन मथित्वा दारु दृश्यते तथैवात्मा शरीरस्थो योगेनैवात्र दृश्यते ४२ नदीष्वापो यथा युक्ता यथा सूर्ये मरीचयः संत
तत्वाद्यथा यांति तथा देहाः शरीरिणां ४३ ॥

एवेत्यर्थः ३९ येन श्रोत्रं शृणोति हि। येन चक्षुश्च पश्यतीत्यादिश्रुतिभ्यः। अयं देहस्तत्तस्य शब्दादिवेदनस्य कारणं निमित्तं न तु वेत्ता। किंतु स एव कर्त्ता
४० एवंविधस्यापि देहे कुतो नुपलंभ इत्याशंक्योपायाभावादित्याहाग्निरिति दारुभेदे छेदेपि न दृश्यते अयोगे योगाभावे सति नैवानुदृश्यते ४१ व्य
तिरेकमुक्त्वाऽन्वयमाह। दारुदारुणि। योगेनैव नान्येनोपायेन ४२ योगाभावे देहसंबंधो न विछिद्यत इत्याह नदीष्विति ४३ ॥ ॥ ॥

देहांतरप्रवेशोपि न शालाचैत्रवत्किंतु स्वप्नवदित्याह स्वप्नेति तथैव मरणांते देहमुत्सृज्य देहांतरं प्राप्नोतीत्युपलभ्यते शास्त्रदृष्ट्या योगेन वा लभ्यते ७४ के
न हेतुना देहांतरं यातीत्यत आह कर्मणेति रूपं प्राचीनं शरीरं बाध्यते न तु निवर्त्तते भ्रांतिगृहीतस्य घटवन्निवृत्त्ययोगात् ७५ एतदेव विशदयितुं प्रतिज्ञा
नीतं स्मृत्वेति ७६ वार्ष्णेयाध्यात्मं षड्विंशः ॥ ॥ प्रतिज्ञातं निरूपयति चतुरिति नव्यक्तः प्रभवो देहांतरप्राप्तिर्येषां नव्यक्तं निधनं पूर्वदेहवियोगो ये

स्वप्नयोगे यथैवात्मा पंचेंद्रियसमायुतः देहमुत्सृज्य वै याति तथैवात्रोपलभ्यते ७४ कर्मणा चोद्यते पूर्वं कर्मणा चोपल
भ्यते कर्मणा नीयतेन्यत्र स्वकृतेन बलीयसा ७५ स तु देहाद्यथा देहं त्यक्त्वान्यं प्रतिपद्यते तथान्यं संप्रवक्ष्यामि भूतग्रामं स्व
कर्मजं ७६ शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मं ॥ ॥ भीष्म उवाच चतुर्विधानि भूतानि स्थावराणि चराणि च अव्यक्तप्र
भवान्याहुरव्यक्तनिधनानि च १ अव्यक्तलक्षणं विद्यादव्यक्तात्मात्मकं मनः यथाश्वत्थकणीकायामंतर्भूतो महाद्रु
मः निष्पन्नो दृश्यते व्यक्तमव्यक्तात्संभवस्तथा २ ॥

षां स्वप्नवत्सर्वापरदेहत्यागयोगौ न गृहांतरप्रवेशवत्स्पष्टाविति भावः १ अत्र हेतुमाहार्द्धेन अव्यक्तेति यतो नव्यक्तं लक्षणं ज्ञापकमस्य ताहशं
अतो व्यक्तलक्षणं अत्र हेतुः अव्यक्तात्मात्मको अव्यक्तो य आत्मा तदात्मकं हि तौ यद्वद्वन्नैत्रैव कल्पितौ अतः स्वात्कल्पितं प्रभवनिधने अपि त्व
व्यक्ते एवेति भावः २ नन्वेवमप्यपि देहादिरव्यक्त एव स्यादाद्यंतयोरव्यक्तत्वादित्यत आह यथेति प्राग्रूर्ध्वं चाव्यक्तोप्यश्वत्थो मध्ये व्यक्तो भवति एव
मव्यक्तात्मनः संभवो व्यक्तिर्दृश्यत इति भावः २

अभीतिपाठः अयस्कांतं लोहचुंबकपाषाणं प्रत्यचेतनमप्ययो लोहं अभिमुखं गछति एवं देहं व्यक्तिं गतमनुस्वभावः पूर्वसंस्कारो हेतुर्येषां कर्मणां तज्जाः धर्माधर्मादि
यो भावाः अपी अभिद्रवंति पश्चात्तदपि ईदृशं अविद्यादिकं तदपि अभिद्रवति ३ इममेव न्यायं अन्यत्राप्यतिदिशति तद्वदिति अव्यक्तजाः अविद्योत्थाः भावाः का
मकर्मवासनादेहेंद्रियादयश्चाचेतना अभितः संहिताः एवं कर्तुश्चेतनस्य कारणलक्षणाः कारणं ब्रह्म लक्षयंतीति कारणात् ब्रह्मणः सकाशात् तस्य चित्वानंदत्वा

अभिद्रवत्ययस्कांतमयो निश्चेतनं यथा स्वभावहेतुजा भावा यद्वदन्यदपीदृशं ३ तद्वदव्यक्तजा भावाः कर्तुः कारणलक्षणाः
अचेतनाश्चेतयितुः कारणादभिसंहृताः ४ न मृत्तेर्न वयोर्मूर्तानि निमेषयोः न सुरासुराः नान्यदासीदृते जीवमासेदुर्न तु संहृतं ५॥

योपि भावा अभिसंगताः यथा पूर्वं कृत्स्नो प्यात्मा नात्मगुणागुणाः देहांतरप्राप्तौ संहन्यत इत्यर्थः ४ न तु शुक्रशोणितसंयोगादिक्रमेण देहबुद्ध्यादिकं दृश्यते तत्क
यं स्वाप्नदेहवदाकस्मिकी देहांतरप्राप्तिरित्याशंक्याह न मृत्तेरिति ह्यंभोजीवं चिद्धातुं विनाभ्वादयो वा अवयवाः प्राणाः प्राणा वा अवयव इति श्रुतेः सुरासुराः शमकामादयः
इत्येवमादिकं अनन्ते वासीत प्रागुत्पत्तेः संहतं अज्ञानोपाधिं जीवं एते राजानं भृत्या इव नाप्यासेदुः पश्चादपि नासादितवंतः भावादयो नित्यं जीवेन संगता इत्यर्थः ५

कथं तर्हि तत्संबंधस्य जीवे प्रतीतिरत आह पूर्वमिति ॥ तत्र जीवेष्वादितादात्म्यं अज्ञानकर्ममायाकार्यं इति निर्दिष्टं वेदे इंद्रो मायाभिः पुरुरूप ईयते इत्यादौ ॥ पूर्वं अनादि नित्यं
अज्ञानेनात्मनुच्छेद्यं ॥ सर्वगतं विद्वदविद्वत्साधारणं व्यवहारकाले पयोक्तं पश्वादिभिश्चाविशेषादिति मनोहेतुं मनोजन्यं अलक्षणं अनिर्वचनीयाकारणं पूर्ववासनासैव
लक्षणं विशेषणं ज्ञापकं यस्य प्राग्भवीयवासनावशादेव तत्तन्नपश्वादिदेहतादात्म्यं आत्मनः प्रतीयते यथा स्वप्ने ऽराज्ञोपि राजास्मीति प्रतीतिस्तद्वद्बालस्यापि बालोस्मीति दे

118

पूर्वं नित्यं सर्वगतं मनोहेतुमलक्षणं अज्ञानकर्म निर्दिष्टमेतत्कारणलक्षणं ६ तत्कारणैर्हि संयुक्तं कार्यसं
ग्रहकारकं येनैतद्वर्तते चक्रमनादिनिधनं महत् ७ ७ ॥

हांतरप्राप्तोपि प्रतीतिर्जीयत इत्यर्थः ६ ततश्च किमित्यत आह तदिति तत्तज्जीवस्वरूपं कारणैर्वासनाभिर्युक्तं कार्यस्य कर्मणः संग्रहं कारयतीति तथा ॥ जीवः प्राग्वासनाव
शात्कर्मणि प्रवर्त्तत इत्यर्थः ॥ येन संग्रहेण तत्तत्तादात्म्यं वर्त्तते ऽनुवर्त्तते ॥ वासनावशात्कर्म ॥ कर्मवशाच्च वासना इति चक्रं चक्रवदनवरतप्रवाहं ७ ॥ ॥ ॥

अव्यक्तं धीवासनावृंदं नाभिवदंतरंगं पस्याव्यक्तं देहेंद्रियादि अराः नाभिनेमिसंधानकाष्टानितद्वत्बहिरंगंपस्सविकारः स्तान्क्षित्यादिः परिमंडलं नेमिः तद्वत्व्यापकं स्नि
ग्धं रंजनात्मकं रंजः अक्षइव चालकं पस्य चक्रं जन्ममरणप्रवाहसंघातः क्षेत्रज्ञेनाधिष्ठितं भ्रमविचाल्यं वर्त्तते ॥ स्निग्धत्वात् रजोगुणाक्रांतत्वात् तिलपीडैः तैलिकैः भोगैः

अव्यक्तनाभं व्यक्तारं विकारपरिमंडलं क्षेत्रज्ञाधिष्ठितं चक्रं स्निग्धाक्षं वर्त्तते ध्रुवं ॥ स्निग्धत्वात् तिलवत्सर्वं
चक्रेऽस्मिन्पीड्यते जगत् तिलपीडैरिवाक्रम्य भोगैरज्ञानसंभवैः ९ कर्म तत्कुरुते तर्षादहंकारपरिग्रहः कार्यका
रणसंयोगे स हेतुरुपपादितः १०

सुखदुःखयोगैः ९ कर्मेति तत्संघातात्मकं चक्रं आवर्षात् फलतृष्णया अहंकारोऽभिमानस्तत्परिग्रहात् तेन स्वीकृतं स तत्कर्म कुरुते कार्यकारणसंयोगे देहा
स्नानयोगे आगामिनि स हेतुः तत्कर्मकारणं विधेयापेक्षं पुंस्त्वं उपपादितः समर्पितः १० १०

मो०
११९

119

ननुकारणाभिन्नंकार्यमितिसांख्याः नहिकुंडलंकनकादन्यत्किंतुकनकमेवसंस्थानविशेषविशिष्टंकुंडलमित्युच्यते तथाकारणात्कार्यंभिन्नमभिन्नंचेत्यौडुलो
मिः। उक्तमिष्यतएवंभावादितिसौडुलोमिरितिशास्त्रेतदनुवादात् प्रपंचः कार्यावस्थायांब्रह्मणः भिन्नोपिकारणावस्थायामभिन्नइतिसूत्रार्थः अस्मिन्मतेपि
कारणांशेनकार्यस्यकारणादभेदोस्त्येवतुकारणयोर्गवाश्ववद्भेदमिच्छंतितेषामपितयोरदृष्टपक्षिस्वद्वत्वमस्ति अतोमल्लयोरिवनकार्यकारणयोः संयोगः कर्म
निमित्तोयुज्यतइत्याशंकाविवर्त्तवादाश्रयेणपरिहरतिनाभ्येतीति रज्जूरगयोरिवकार्यकारणयोर्विषमसत्ताकत्वादन्योन्यस्मिन्प्रवेशः कनककुंडलादिवन्न

कार्यां।१२

नाभ्येतिकारणंकार्यंनकार्यंकारणंतथा कार्याणांरूपकरणेकालोभवतिहेतुमान् ११ ॥ ॥ ॥ ॥

घटतइत्यर्थः नाभ्येतीतिपाठेपिनातिक्रामतिनव्याप्नोतीत्यर्थः कुतस्तर्हिगवाश्ववदत्यंतभिन्नयोः कार्यकारणभावइत्याशंक्याहकार्यव्यक्तेनकरणेइति भावेनि
ष्ठाहेतौतृतीया अभिकरणेस्तुदृक्करणेअधिष्ठानेकार्याभिव्यक्तयेहेतुमान् अदृष्टादिसहायांतरवान्कालः भवतिप्रभवति अयंभावः नमद्दृष्टन्यायेनप्रतीचिप्र
पंचाभिव्यक्तयेकारकव्यापारोऽपेक्ष्यतेकिंतुभोगप्रदकर्मोद्बोधहेतुः कालएवरज्ज्वामिवोरगोत्पत्ताविति कार्याणांरूपकरणेइतिपाठेतुउपकरणसत्ताप्रदानेरूपाप
कारेकालएवप्रभवतिनकारकव्यापारइत्यर्थः तथाचनिरधिष्ठानकभ्रमासंभवात् अधिष्ठानाध्यस्तयोः सत्यमिथ्यावस्तुनोरत्यंतभेदेपिकार्यकारणभावोयुज्यत
इत्यर्थः ११

राम०
११९

एवमविद्यानाध्यस्तयोः संबंधे कर्महेतुरित्युक्त्वाऽध्यस्तानामपि प्रकृत्यादीनां मिथः संयोगे कर्मैव हेतुरित्याह हेत्विति। हेतुयुक्ताः कर्मयुक्ताः अभिवर्त्तंते संहन्यंते।
प्रकृतयोऽष्टौ विकाराः षोडशेति चतुर्विंशतिः पूर्वोक्ताः १२ एवं देहारंभप्राप्तिच्युतादनप्रसंगात्कृत्स्नस्य कार्यस्य प्रलयविवर्त्तनमुक्त्वा प्रकृतमनुसरति राजसैरिति।
च्युतः पूर्वदेहात् विभ्रष्टो जीवः भावैः प्राणोर्मूर्त्तसूक्ष्मैः संस्कारैः समन्वितः इत्येकदेशोऽप्युपलक्ष्यते। हेतुना कर्मणा बलेन पूर्वप्रज्ञया विद्यया च समन्वितः क्षेत्रज्ञं परमात्मा

हेतुयुक्ताः प्रकृतयो विकाराश्च परस्परं अन्योन्यमभिवर्त्तंते पुरुषाधिष्ठिताः सदा १२ राजसैस्तामसैर्भावैश्च्युतो हेतु
बलान्वितः क्षेत्रज्ञमेवानुयाति यांत्युर्वीतेरितो यथा १३ नचैतैः स्पृश्यते भावैर्नितैतेन महात्मना सरजस्कोरजस्कश्च वै ने
ववायुर्भवेन्नृपा १४

नेत्यत्र तु लक्षयति लोकांतरं प्रति प्राज्ञेनात्मना संपरिष्वक्त उत्सर्जन्याति। तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च तमुत्क्रामंतं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनू-
त्क्रामंतीति श्रुतिभ्यः १३ नाभ्येतीति श्लोकोक्तकार्यकारणयोरध्यस्ताधिष्ठानत्वे देहदेहिनोरप्याह नचेति तैः रजःसत्वतमोजैर्देहेंद्रियभूतसूक्ष्मारब्धैर्भावैः हेतुब-
लाभ्यां च पूर्वोक्ताभ्यां न स्पृश्यते। अध्यस्तधर्माणामधिष्ठाने नन्वयात्तेन देहिना तेभ्यावादयोऽपि न स्पृश्यंते। असंगत्वात्। यथा वायोः सरजस्कत्वमात्मनीरज-
स्कत्वं सततः एवमात्मनि देहादिसंगासंगौ १४

एतयोः वा पुरुषयोः अंतरं पृथग्भावः अभ्यासात् देहादितादात्म्याभ्यासात्। प्रकृतिं शुद्धं स्वरूपं न गच्छेन्न जानीयात् १५ नन्वगुणत्वात्स्वभावबद्ध इति केचित् देह
संमित इत्यन्ये विभुरपि स्वभावबद्ध इत्यपरे। असंग इत्यपरे। तत्र किं [illegible] मुपादेयं किं हेयमित्याशंक्य संदेहं आर्षिर्मैत्रः अनन्यमन्योऽभिवाकशीति असंगो ह्ययं
पुरुष इत्यादिः अच्छिनत्। न तु स्वर्गकामो यजेतेति संगित्वमपि स्फुरयेत्तत्कथमसंगत्वमिति स्वपइत्याशंक्याह तथेति कृतं कृपया निष्पादितं पदं लक्षणं
मूर्द्धाभिषिक्तत्वादि तेन संमितां तदनुरोधिनी वार्त्तां सुखदुःखप्राप्तिपरिहारोपायभूतां क्रियां समीक्षेत तत्तदात्मानं क्रियाविष्टं कर्तारमीक्षेत। यथा देहाद्रिक्तोऽस्मा

तपैतदंतरं विद्यात्मतत्वक्षेत्रज्ञयोर्बुधः अभ्यासात्स तथा युक्तो न गच्छेत्प्रकृतिं पुनः १५ संदेहमेतमुत्पन्नमच्छिनद्भगवानृषिः
तथा वार्त्तां समीक्षेत कृतलक्षणसंमितां १६ बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पु
नः १७ शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मे भीष्म उवाच प्रवृत्तिलक्षणो धर्मो यथा यमुपलभ्यते तेषां विज्ञाननिष्ठानामन्यत्तत्वं न रो
चते १

त्मानं ज्ञानन्नेव राज्ञा राजसूयेन स्वाराज्यकामो यजेतेति वाक्यात् देहसंमितं क्षत्रियं मूर्द्धाभिषिक्तत्वरूपं लक्षणं राजसूयाधिकारिविशेषणं क्रियाकालेऽपेक्षते।
एवं कर्तृत्वादिविशेषणं मुमुक्षुरपि विद्यासाधनकाले। फलकाले तु राज्ञा देहमिव मुमुक्षुः कर्तृत्वादि बुद्ध्या जहातीति भावः १६ एतद्विज्ञानफलं मोक्षमाह बीजानीति क्ले
शैः अविद्यादिभिः १७ सप्तत्रिंशः॥ ॥ अस्मिन्नध्याये क्लेशादयं हेतुहानाय उपादानाय च प्रदर्शिते प्रवृत्तीत्यादिना। तेषां कर्मनिष्ठानां यथा धर्मः समुपपद्य
ते तथा विज्ञाननिष्ठानां विज्ञानादन्यन्न रोचते १

वेदोक्तेषु अग्निहोत्रादिषु शमादिषु च यथाधिकारं व्यवस्थिताः निष्ठावंतः प्रयोजनं स्वर्गमोक्षौ तयोर्मध्ये संस्कृतं प्रशस्यतरं [illegible] मोक्षमा
र्गनिवृत्तिरूपं महत्वादित्येति बुद्धिमत्तराः इति शेषः २ ननु ज्ञानमयमग्निहोत्राधमस्मोतशरीरमित्यादयो यावज्जीवं कर्मानुष्ठापका विधयः तत्परुष्योरन्तिवृत्तिमार्गी
देऽइत्याशंक्याह सद्भिरिति। एतद्वृत्तं वैतन्वेर्वैविद्वांसो महाशाला महाश्रोत्रिया अग्निहोत्रं न जुहवांचक्रिरे इत्यादिश्रुतेरेतत्कर्मत्यागात्मकं वृत्तं न निंद्यं। आ
रुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते इति भगवतैव प्रवृत्तिमार्गयोरधिकारभेदेन व्यवस्थापितत्वात् इयं निवृत्तात्मिका
निवृत्ति।

दुर्लभा वेदविद्वांसो वेदोक्तेषु व्यवस्थिताः प्रयोजनं महत्वात्तु मार्गमिच्छंति संस्कृतं २ सद्भिराचरितत्वात्तु वृत्तमेतदगर्हितं
इयं सा बुद्धिरन्येयं यया याति परां गतिं ३ शरीरवान्प्राप्नुयाद्देहं मोहात्सर्वान्परिग्रहान् क्रोधलोभादिभिर्भावैर्युक्तो राजसताम
सैः ४ नाशुद्धमाचरेत्तस्मादभीसन्देहयापनं कर्मणो विवरं कुर्वन्लोकानाप्नुयाच्छुभान् ५ लोहयुक्तं यथा हेम विपक्वं न
विराजते तथापक्वकषायाख्यं विज्ञानं न प्रकाशते ६ ॥ ॥ ॥ ॥ ॥ ॥

परां गतिं मोक्षं ३ एतदभावे ऽनिष्टमाह शरीरेति। शरीरवान् शरीराभिमानवान् ४ देहयापनं देहसंबंधविछेदं अशरीरताख्यं मोक्षं तत्रोपायमाह कर्मणेति। विवरं
आत्मविविदिषाख्यं द्वारं। शुभान्स्वर्गादीन् कर्मफलभूतान्नाप्नुयात् स्वीकुर्यात् फलत्यागपूर्वकं चित्तशुद्ध्यर्थं कर्मारोपं वा चरेदिति सर्पः ५ चित्तशुद्ध्यभावे दोषमा
ह लोहेति। विपक्वं पाकहीनं भावे निष्ठा अविपक्वकषाये पुंसि आख्या उपदेशो यस्य अजितरागादिदोषस्य उक्तमिति सर्पः ६ ॥ ॥ ॥ ॥

कषायाणामपाके दोषमाह यस्येति। अनुप्लवन् अनुसरन्। आक्रम्य उपमर्घायेति पाठः स्वच्छः ७ संरागः रागाधिक्यं व्रजने दोषमाह क्रोधइ
ति। क्रोधो राजसः हर्षः सात्विकः विषादस्तामसः ८ अभिद्रुवते अभिद्रौति। चितः अविकारित्वाद्विकारिणश्च चेतसो जडत्वात् कान्या क्रोशो निरास्यदाविन्यर्थः ९ वि
ज्ञानात् विपर्ययबुद्धेः आत्मानं देहं पार्थिवं पृथ्वीविकारं गुणां १० देहस्य पार्थिवत्वे युक्तिमाह द्याभ्यां मन्नमन्नमिति शररांग हमद्विकारमन्नादिकं प्राप्य न नश्यति

यस्ताधर्मं चरेल्लोभात्कामक्रोधावनुप्लवन् धर्म्मयं प्राप्नमाक्रम्य सानुबंधो विनश्यति ७ शब्दादीन्विषयांस्तस्मात्संरागादयं व्रजेत् क्रो
धो हर्षो विषादश्च जायंते ह्यपरस्पराग् ८ पंचभूतात्मके देहे सत्वे राजसतामसे कमभिद्रुवते चायं किंचाक्रोशति किं वदन् ९ स्पर्शरूपरसा
द्येषु संगं गच्छंति बालिशाः नावगच्छंति विज्ञानादात्मानं पार्थिवं गुणां १० मन्नमयं शररांयद्वन्मृदैव परिलिप्यते पार्थिवोयं तथा देहो मृद्वि
कारान्न नश्यति ११ मधुतैलं पयः सर्पिर्मांसानि लवणं गुडः धान्यानि फलमूलानि मृद्विकाराः सहांभसा १२ यद्वत्कांतारमातिष्ठन्नौत्सु
क्यं समनुव्रजेत् यात्रामाहारमादद्यात्स्यादपि हि यापने १३ तद्वत्संसारकांतारमातिष्ठन्श्रमतत्परः यात्रार्थमद्यादाहारं व्याधितो भेषजं य
था १४

जीवतीत्यर्थः ११ [illegible] १२ मद्विकारानाहमधुति १३ कांतारमातिष्ठन् सन्यासी। औत्सुक्यं मिष्टान्नादौ रागं न समनुव्रजेत्। आहारं अन्नं यापने
देहनिर्वाहके १४ सन्यासिवद्गृहिणापि विरक्तेन स्थेयमित्याह तद्वदिति संसारः गृहं यात्रार्थं वेदांतश्रवणादिनिर्वाहार्थं न तु इंद्रियप्रीत्यर्थं १४ ॥ ॥ ॥

प १

एवं द्वयोरपि मिथ्यात्वाद्दैवैराग्यमुक्त्वा यावत्समदृष्ट्या साधारणान्मोक्षधर्मानाह सत्येति सत्यं यथार्थभाषणं शौचं मृज्जलाभ्यां बाह्यं भावशुद्धिरांतरमिति द्विविधं आर्ज
वं अकौटिल्यं त्यागो वैराग्यं वर्चः अध्ययनादिजं तेजः तेन तत्कारणं लक्ष्यं विक्रमो मनोजयः शौर्यं बुद्ध्या अवगाहनं यया धृत्या क्लेशकालेऽपि चित्तविधारकयत्ने
नाभवत्स्मा क्रियमाणेन तपसा साध्यसाधुनोः आलोचनेन भावान्समीक्षेत् तुत्तरेणान्वयः १५ संभवेत यथाक्रममिति पाठे यथाक्रमं संसारी चेत्कामादिनामुमु

सत्यशौचार्जवत्यागैर्वर्चसा विक्रमेण च क्षांत्या धृत्या च बुद्ध्या च मनसा तपसैव च १५ भावान्सर्वाननुप्राप्तान्समीक्ष्य विषया
त्मकान् शांतिमिच्छन्नदीनात्मा संपश्येदिंद्रियाणि च १६ सत्वेन रजसा चैव तमसा चैव मोहिताः चक्रवत्परिवर्तंते ह्यज्ञानाज्जं
तवो भृशं १७ तस्मात्सम्यक्परीक्षेत दोषानज्ञानसंभवान् अज्ञानप्रभवं दुःखमहंकारं परित्यजेत १८ महाभूतानींद्रियाणि गु
णाः सत्वं रजस्तमः त्रैलोक्यं सेश्वरं कर्म अहंकारे प्रतिष्ठितं १९ यथेह नियतः कालो दर्शयत्यार्तवान्गुणान् तद्वद्भूतेष्वहंकारं वि
द्यात्कर्मप्रवर्तकं २०

क्षुश्चेत् शमादिना संभवेत संयुज्येतेत्यर्थः अदीनात्माऽनुद्धरचित्तः १६ विपक्षे दंडमाह सत्वेनेति १७ अज्ञानात्संभवो उत्पत्तिर्येषां तं १८ महेति ईश्वरादिकं सर्वम
हंकारकल्पितमित्यर्थः १९ नन्वेतदहंकारकल्पितं चेत्सर्वमन्वितमभिनवसंस्थानं स्यादित्याशंक्य पूर्वसंस्कारानुरोधात्समानरूपमेव कल्पयतीति सदृष्टां
तमाह यथेति भूतेति भूतेंद्रियादीनामुपलक्षणं २० ॥ ॥

त्रिगुणात्मकस्याहंकारस्य गुणाः कार्याणि विभजते संमोहकमिति कृष्णं अंधकारवदप्रकाशात्मकं प्रीतिदुःखे क्रमात्सात्विकराजसे २१ तान्कार्यभूतान्विशेषगुणान् २२ कामादयो राजसाः विषादादयस्तामसाः २३ असंविभागस्य प्रयोजनमाह दोषाणामिति आत्मनि संस्थानं स्थितिं एकैकं प्रत्येकं अनुल

संमोहकं तमो विद्यात्कृष्णमज्ञानसंभवं प्रीतिदुःखनिबद्धांश्च समस्तांस्त्रीनथो गुणान् २१ सत्वस्य रजसश्चैव तमसश्च निबोधत। न प्रसादो हर्षजा प्रीतिरसंदेहो धृतिः स्मृतिः एतान्सत्वगुणान्विद्यादिमान्राजसतामसान् २२ कामक्रोधौ प्रमादश्च लोभमोहौ भयं क्लमः विषादशोकावरतिर्मानदर्पावनार्यता २३ दोषाणामेवमादीनां परीक्ष्य गुरुलाघवं विमृषेदात्मसंस्थानमेकैकमनुसंततं २४ युधिष्ठिर उवाच के दोषा मनसा त्यक्ताः के बुध्या शिथिलीकृताः के पुनः पुनरायांति के मोहादफला इव २५ केषां बलाबलं बुध्या हेतुभिर्विमृषेद्बुधः एष मे संशयस्तात तन्मे ब्रूहि पितामह २६

श्लीकृत्य विमृशेत् को दोषः कियान् क्षीणः कियान् शिष्ट इति नित्यमालोचयेदित्यर्थः २४ त्यक्ताः पूर्वैर्मुमुक्षुभिरिति शेषः के पुनरिति अपरिहार्या इत्यर्थः। पंचात्र प्रश्नाः अफलाः आगता अपि निष्फला इत्यर्थः २६

दोषैरिति सार्द्धश्लोकः एकं वाक्यं मूलात् मूलं च आद्यानां तदारभ्य अवच्छिन्नैः लूनैर्मूलच्छेदैर्नैव दोषान् छिघांत तत्स्वतेपश्चाच्छिन्नमूलत्तरुविलसितवत् केचित्का
लमनुवर्तमाना अप्यफलाः एव तापः मूलच्छेदे उपायं सदृष्टां तमाह विनाशयतीति। संभूतमुत्पन्नमपस्मयं लोहनिगडं अयःवास्मधारामयं एवं कृतात्मा
ध्यानसंस्कृता बुद्धिः तामसैः विपर्यासरूपैरविद्यादिदोषैः सहजैः रागादिभिः सहनश्यतितान्नाशयिताः स्वपमपिकर्तकरजो वत्तशाम्यति अत्र वास्मधारा निग

भीष्मउवाच दोषैर्मूलादुपाछिन्नैर्विमुद्धात्माविमुच्यते विनाशयति संभूतमपस्मयमयोमयं तथाकृतात्मा सहजै
र्दोषैर्नश्यति तामसैः १७ राजसं तामसं चैव मुद्धात्मकमकल्मषं तत्सर्वं देहिनां वीजं सत्वमात्मवतः समं १८ तस्मादात्म
वता वर्ज्यं रजश्च तमएव च रजस्तमोभ्यां निर्मुक्तं सत्वं निर्मलतामियात् १९ ॥ ॥ ॥ ॥

डं छित्वा स्वपमपि नश्यतीति विवक्षया दृष्टांतदार्ष्टांतिकयोः साम्यं १७ चतुर्थप्रश्नोत्तरमुक्त्वा तृतीयप्रश्नोत्तरं पादत्रयेणाह राजसमिति। मुद्धात्मकं सत्वं तत्
चाकल्मषं काममोहरहितमात्। गुणात्रयं देहिनां देहप्राप्तौ वीजं आत्मवतो जितचित्तस्य तु सत्वं समं ब्रह्म तत्प्रापकं। निर्दोषं हि समं ब्रह्मेति समशब्दस्य ब्रह्मणि प्र
योगात् १८ प्रथमप्रश्नोत्तरमाह तस्मादिति। सत्वं बुद्धिः १९ ॥

अपवेति। आत्मादानेबुद्धिवशीकारणपविहितंमंत्रवत्तमंत्रयुक्तंपश्वादिकंकर्मकेचित्दुष्कृतमितिब्रुवुः सांख्याःपशुवीजादिहिंसाहीनःधीमुद्धुपायःश्रेय
नितिभावः। अत्रायंसांख्यवृद्धानामभिप्रायः नहिंस्यात्सर्वाभूतानीतिनिषेधःपुरुषार्थः नतुक्रत्वर्थः येनास्याग्नीषोमीयंपशुमालभेतेत्यनेनसमानविषयत्वं
स्यात्। यथाआहवनीयेजुहोतीतिहोमार्थस्याहवनीयस्यजुहोतीतिहोमार्थेनैवपदेनापवादस्तद्वत्। नचपुरुषार्थस्यसतःक्रत्वर्थत्वमपिनिषेधस्यवक्तुंयु
क्तं। कर्त्रविकरणविरोधात्तत्रहिपुरुषार्थेनान्तंवदेदितिनिषेधेसत्यपिदर्शपूर्णमासप्रकरणेपुनःक्रत्वर्थतयानानृतंवदेदित्यनृतवदनंनिषिध्यते।
क्रतुमध्येकारणविशेषात्पुरुषार्थनिषेधोल्लंघनेपिक्रतुवैकल्यंमाभूदिति। तस्माद्भिन्नविषयत्वाद्धिंसाविधितन्निषेधशास्त्रयोःपरिहृत्यापवादमु

अपवामंत्रवद्भूपुरात्मादानापदुक्तं सैवहेतुरात्मादानेपुद्धधर्मानुपालने ३०

त्सर्गःप्रवर्त्ततेइत्यस्यन्यायस्याप्रवृत्तिः अधिकारभेदादपितत्रतदप्रवृत्तिःगृहासक्तोहिहिंसाशास्त्रेधिक्रियतेनतुविरक्तः तस्यपदहरेवविरजेत्तदहरेव
प्रव्रजेदितिप्रव्रज्याविधानात्। नचगृहाश्रमोपिनित्यःतस्यरागतःप्राप्तत्वात्प्रसले चर्यादेवप्रव्रजेदितिविधिविरोधाच्च। तस्माद्यथाश्येनेनाभिचरन्यजेतेति
शास्त्राच्छत्रुमारणकामस्यश्येनोविधीयमानोहिंसात्मकफलद्वारानहिंस्यादितिशास्त्रेनिरुध्यतेतद्वत्स्वर्गपश्वादिकामस्यगृहमेधिनःज्योतिष्टोमेनस्वर्गका
मोयजेतचित्रयायजेतपशुकामइत्यादिविधिःपशुवीजादिहिंसा

त्मकसाधनद्वारा न हिंस्यादिति शास्त्रेण निरूपणाद्वितत एव पुरुषः प्रत्यवैतीति यथोक्तं दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त इति। यथा दृष्टः
सुखोपायो दोषादियुक्तः एवं वैदिकोपीति सांख्यकारिकार्थः स्वमतमाह सैवेति सैवेति पाठेपि सैषदाशराधिरितिवत्संधिः सः नैव वानप्रस्थादिधर्मः अना
दाने वैराग्यनिमित्तं भवति चित्तशुद्धिद्वारा नित्यानित्यवस्तुविवेकादिप्रणाल्या भवतीति तथा शुद्धधर्मः शमादिः तस्यापि रक्षणे समर्थ एव यज्ञादिधर्मो भवति। अ
यमर्थः विविदिषंति यज्ञेनेत्यादिश्रुतेरश्वेन जिगमिषतीत्यादौ गतावश्वस्येव विद्यायां यज्ञादीनां हिंसायुक्तधर्माणां साधनत्वं गम्यते। तथा शांतो दांत इ
त्यादिना निवृत्तिरूपस्यापि अहिंसादेर्धर्मस्य विद्यासाधनत्वं गम्यते यथा द्वौ अश्वौ रथे नियुक्तौ अविरुद्धदिक्क्रियौ संतावेव इष्टं देशं रथिनं नयतः न
तु तयोरन्यतरस्य ईषदपि विरुद्धदिक्क्रियत्वे एवं यज्ञ ईषदपि हिंसाशास्त्रविरोधी चेत्तं न सहेत कार्ष्ण्यं न भजेदिति यज्ञादिव्यतिरिक्तहिंसाया एवा
हिंसाशास्त्रेणानर्थहेतुता बोध्यत इति तथा च सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति। यस्तु काम्यो यज्ञस्तस्य त्वंशतो दोषहेतुत्वं न नः
किंचिच्छिन्नं। स्वल्पः संकरः सपरिहारः सप्रत्यवमर्श इति सांख्याचार्यवचनमपि तद्विषयमेव। पुराणे कर्मणि स्वल्पो हिंसाजन्योऽधर्मसंकरः स्वल्पे
नापि प्रायश्चित्तेन परिहर्तुं शक्योऽपरिहारे वा फलकाले सोढुं शक्यः सुखसमुद्रमग्नो दुःखकणिकां सोढुमर्हतीति सर्वमनवद्यं ३० ॥॥

वैदिकोपिकर्मणिराजसंतामसंकाम क्रोधादिहेतुकंत्याज्यं सात्विकं सेव्यमित्याह श्लोकत्रयेण रजसेति अधर्मेतिच्छेदः लौकिकं तु राजसं तामसं
क्रोधजं कर्मसुतरां त्याज्यमितिभावः ३२ सात्विकं तु मुमुक्षुणापथ्यमित्यर्थः ३३ अध्यायः पूर्वाध्यायोक्तिमं श्लोकत्रयं व्याख्यातुमयमध्याय आरम्भ
तेरजसेतिरजस्तमसोः कार्यंमोहः विपर्ययः अनात्मनिआत्मबुद्धिः अज्ञानस्यहिद्वेशक्तीआवरणशक्तिर्विक्षेपशक्तिश्चतत्राद्ययावस्तुस्व

रजसाधर्मयुक्तानिकार्याण्यपिसमाप्नुते अर्थयुक्तानिचात्यर्थंकामान्सर्वांश्चसेवते ३१ तमसालोभयुक्तानिक्रोधजानिचसे
वते हिंसाविहाराभिरतस्तंद्रीनिद्रासमन्वितः ३२ सत्वस्थः सात्विकान्भावाञ्शुद्धान्पश्यतिसंश्रितान् सदेहीविमलः श्री
मांश्छ्रद्धाविद्यासमन्वितः ३३ शांतौमोक्षधर्मेषुवार्ष्णेयाध्यात्मे॥ भीष्मउवाच रजसासाध्यतेमोहस्तमसाभरतर्षभ॥
क्रोधलोभौभयंदर्पएतेषांसादनाच्छुचिः १ परमंपरमात्मानंदेवमक्षयमव्ययं विष्णुमव्यक्तसंस्थानंविशुद्धंदेवसत्त
मं २

रूपंरज्ज्वादिआवृणोतिद्वितीययासर्पादिस्वरूपंविक्षिप्यते तेउभेअत्रक्रमेणतमोरजःशब्दाभ्यामुच्यतेमोहजाःक्रोधादयः १ शुद्धेःफलंजीवब्रह्मणैक
ज्ञानमित्याहपरममिति परमं आत्यंतिकंपरंब्रह्मकोशपंचकातीतं आत्मानंप्रत्यंचं परमात्मानमात्मानमितिपाठांतरंस्पष्टार्थं अक्षयंनाशहीनंअव्ययं
ह्रासहीनं विष्णुःप्रांचःशुचयइति इदानींजनोपिशुचिर्विदितीत्यर्थः २

पिनद्धांगादिभिर्जडीकृतेंद्रियाभ्युतस्वनष्टज्ञानाः ततोविचेतसः निर्विवेकाः ज्ञानसंमोहात्ताबुद्धिवैकल्यात्ताज्ञानाद्वाक्रोधंविक्षिप्तचित्ततां ३
मान मात्मनिपूज्यताबुद्धिः दर्पः उद्धतत्वखलत्वं अहंकारः परेषांतुच्छीकरणं ४ जन्माजन्मकृतलक्षणाः जन्ममरणयोः कृतस्वीकाराः ५ तैः क्रोधादिभिः
वद्धस्तानश्चाभितः परिप्लववंतस्तुनिश्छन्नहेतौ शत्रुप्रतपः मयामंयोषितोहे पत्त्वेनजानीयात पतंतः संसार पद्मस्यातेत्रमिवतंतेतेतु वितानंतंतुवा पदेहेति ७ ॥

७३

तस्मात्पापिनद्धांगाज्ञानभ्रष्टाविचेतसः मानवाज्ञानसंमोहात्ततः क्रोधंप्रयांतिवै ३ क्रोधात्कामभवाप्यापलोभ
मोहौचमानवाः मानदर्पावहंकारमहंकारात्ततः क्रियाः ४ क्रियाभिः स्नेहसंवंधात्स्नेहात्तच्छोकमनंतरं सुख
दुःखक्रियारंभाज्जन्माजन्मकृतलक्षणाः ५ जन्मतोगर्भवासंतुशुक्रशोणितसंभवं पुरीषमूत्रविक्लेदंशोणितप्रभ
वाविलं ६ तत्साभिभूतस्तैर्वद्धस्तानेवाभिपरिप्लवन् संसारतंत्रवाहिन्यस्तत्रवुध्येतयोषितः ७ प्रकृत्याः क्षेत्रभू
तास्तानराः क्षेत्रज्ञलक्षणाः तस्मादेताविशेषेणनचाभीयुर्विपश्चितः ८ कृत्याहेताघोररूपामोहयंत्यविचक्ष
णान् रजोह्यंतर्हितामूर्त्तिरिंद्रियाणांसनातनी ९

यप्याप्रकृतिः क्षेत्रसंवध्नातिस्वभेताअपत्योत्पत्तिक्षेत्रभूताः जीवंवध्नंतीत्यर्थः अतीपात अतिक्रामेतसन्यसेदित्यर्थः नचाभीयुरितिपाठेनानुसरेयुरित्य
र्थः ८ शत्रुमारणार्थमंत्रमयीशक्तिः कृत्यासैवएताः । रजसिरजोगुणोंतर्हिताः सूक्ष्मरूपेणाग्न्यदिघटाइवस्थिताइंद्रियाणांमूर्त्तिरिंद्रियैः कल्पितेत्य पं

तदात्मकात्स्त्रीप्रधानात् एतेन सार्द्धश्लोकेन दोषनिमित्तं रूपादयो विषयाः संकल्पकृता इति गौतमसूत्रार्थो दर्शितः अस्वसंज्ञानमनुषेति संज्ञाहीनान्नह
मीनप्रकाशिक्ष्यादीनन् अस्वकात् अनाप्नात् १० भुक्तान्नः रेतोरूपात्स्नेहात् इवांशतः पुत्राः रसतः स्वेदरूपात्स्नेहात् एकादयः एषां जंतवः स्वभा
ववादेहस्थवादेष समानेवेत्यर्थः ११ एवं हेयमुक्त्वा सर्वमाहर्तुं इति महत्त्रिप्रकाशात्मके रजः सत्वे तमसि लीयते तद्वत्तमः अज्ञानाख्यं ज्ञानाधिष्ठा
मा१

तस्मात्तदात्मिकात् रागाद्बीजाज्जायंति जंतवः स्वदेदजानस्वसंज्ञानदृढरागात्कर्मीसृपादेत स्वसंज्ञानस्वकोस्त
द्वस्तुतसंज्ञानदृकर्मीसृपाडेत १० भुक्तेतोरसतश्चैव देहाज्जायंति जंतवः स्वभावात्कर्मयोगाद्वा तान्नुपेक्षे
तबुद्धिमान् ११ रजस्तमसि पर्यस्तं सत्वं च रजसि स्थितं ज्ञानाधिष्ठितमव्यक्तं बुद्ध्यहंकारलक्षणं १२ तद्बीजं देहिनामाहुस्त
द्बीजं देहसंज्ञितं कर्मणा कालयुक्तेन संसारपरिवर्तनं १३ रमत्यपंपश्यास्वप्नेमनसा देहवानिव कर्मगर्भगुणो देही गर्भे
तदुपलभ्यते १४

तेऽअधिष्ठानभूते ज्ञाने ध्वस्तं सतु बुद्ध्यहंकारयोर्लक्षणं ज्ञापकं भवति १२ ततबुद्ध्यहंकारविशिष्टमज्ञानं देहिनां जीवानां देहप्राप्तौ बीजं तस्य सकार्यस्याज्ञानस्य बी
जं अधिष्ठानभूतं ज्ञानं तं देवजीवसंज्ञितं देहिशब्दवाच्यात् ज्ञानं बीजसंज्ञितमिति पाठतत् अज्ञानविशिष्टं ज्ञानं बीजं ईश्वरस्तत्संज्ञां रम्य र्वर्षमेवाहकर्मणेति १३
अयं जीवः ईश्वरेवागर्भमातुरुदरे १४ १४

तत्रमांसपिंडभूतोसौपूर्ववासनावशाद्यंयंविषयंस्मरतितत्तद्ग्राहकमिंद्रियमस्याविर्भवतीत्याहकर्मणेत्यादिना १५ घ्राणंगंधचिकीर्षयेतिएतस्यैववासनावशात्वसृष्टत्वंदर्शितं १६ यापनंदेहयात्रानिर्वाहः १७ संजातैःसम्यङ्निष्पन्नैःगात्रैःश्रोत्रादिभिःकृत्वानरोब्रह्मणाशरीरेणावृतःसन्जायतेब्रह्मणासहेतिपाठा

कर्मणाबीजभूतेनचोद्यतेयद्यदिंद्रियं जायतेतदहंकाराद्रागयुक्तेनचेतसा १६ शब्दरागाच्छ्रोत्रमस्यजायतेभावितात्मनः रूपरागात्तथाचक्षुर्घ्राणंगंधचिकीर्षया १६ स्पर्शनेत्वक्तथावायुःप्राणापानव्यपाश्रयः व्यानोदानौसमानस्तुपंचधादेहयापनं १७ संजातैर्जायतेगात्रैः कर्मजैर्ब्रह्मणावृतः दुःखाद्यंतैर्दुःखमध्यैर्नरःशारीरमानसैः १८ दुःखंविद्यादुपादानादभिमानाच्चवर्द्धते त्यागात्तेभ्योनिरोधःस्यान्निरोधज्ञोविमुच्यते १९ इंद्रियाणांरजस्येवप्रलयप्रभवावुभौ परीक्ष्यसंचरेद्विद्वान्यथावच्छास्त्रचक्षुषा २० ॥

तरं १८ दुःखाद्यंतैरित्येतद्व्याचष्टेदुःखमितिउपादानात्देहेंद्रियादीनांगर्भेस्वीकारात् अभिमानाज्जन्मानंतरंदुःखंदेहवद्वर्द्धते सर्वस्मात्त्यागान्मरणादपिवर्द्धते तत्तेभ्योहेतुभ्यःनिरोधाद्दुःखस्यस्यात्कर्त्तव्यःयतोनिरोधज्ञोविमुच्यते १९ रजस्यंतर्हितामूर्त्तिरिंद्रियाणामित्युपक्रांतमिंद्रियाणांरजोमात्रत्वमुपसंहरतिइंद्रियाणामिति।परीक्ष्येति रजोरूपप्रकृतिनिरोधनेंद्रियनिरोधात्दुःखनिरोधोभवतीत्यर्थः २०

अतर्षुलं तृष्णाहीनं ज्ञानेंद्रियाणि चोपसर्पति नवा प्रवर्तते। इंद्रियार्थान्प्राप्यापीति शेषः तत्फलमाह हीनैरिति हीनैः क्षीणैः करणैरिंद्रियैः २१ ऊनचत्वारिंशः
॥ ॥ अत्र इंद्रियजये। ज्ञानात् ज्ञानं प्राप्य चरतः शमादीननुतिष्ठन् १ पुरुषा मनुष्याः द्विजाः त्रैवर्णिकाः मंत्रदर्शिनो ब्राह्मणाः २ तत्त्वार्थप्रतिगतः निश्चयो येषां

ज्ञानेंद्रियाणींद्रियार्थान्नोपसर्पत्यतर्षुलं हीनैश्च करणैर्देही न देहं पुनरर्हति २१ शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मे ॥
भीष्म उवाच अत्रोपायं प्रवक्ष्यामि यथावच्छास्त्रचक्षुषा तद्विज्ञानाच्चरन्राजन्प्राप्नुयात्परमां गतिं १ सर्वेषामेव भूता
नां पुरुषः श्रेष्ठ उच्यते पुरुषेभ्यो द्विजानाहुर्द्विजेभ्यो मंत्रदर्शिनः २ सर्वभूतात्मभूतास्ते सर्वज्ञाः सर्वदर्शिनः ब्राह्मणा
वेदशास्त्रज्ञास्तत्त्वार्थगतनिश्चयाः ३ नेत्रहीनो यथा ह्येकः कृच्छ्राणि लभतेऽध्वनि ज्ञानहीनस्तथा लोके तस्माज्ज्ञान
विदोऽधिकाः ४ तांस्तानुपासते धर्मान्धर्मकामा यथागमं न त्वेषामर्थसामान्यमंतरेण गुणानिमान् ५ वाग्देहमनसां
शौचं क्षमा सत्यं धृतिः स्मृतिः सर्वधर्मेषु धर्मज्ञा ज्ञापयंति गुणाञ्छुभान् ६ ॥ ॥ ॥ ॥ ॥ ॥

३ ज्ञानविदो ब्रह्मविदः ४ एवमुपायज्ञात्प्रशस्य तद्गुणानाह तांस्तानिति यथागमं यथाशास्त्रं तांस्तान् दृष्टादृष्टार्थान् अर्थसामान्यं फलसाम्यं मोक्षाख्यं नि
रतिशयं। इमान् वक्ष्यमाणान् ५ गुणानेवाह वागिति। अवृत्तहिंसाकामादिराहित्यं वागादीनां शौचं। सर्वेषु प्रवृत्तिनिवृत्त्यात्मकेषु धर्मेषु ६ ॥ ॥ ॥

ब्रह्मणि चर्या ब्रह्मचर्यं योगधर्मः ब्रह्मणो रूपं ब्रह्मप्रापकत्वात्तदभिन्नं परां गतिं मोक्षं ७ गतिमेव विशिनष्टि लिंगमिति लिंगं पंच प्राणा मनो बुद्धिर्दशेंद्रियसं
घातरूपं तेन यत्र संयोगो नास्ति अत एव शब्दादिहीनं श्रोत्रेणाउपाधिना तदेव श्रवणं शब्दानुभवरूपं स्वरूपाद्यनुभवात्मकं तथा च शब्दादीनां व्यभिचारि
त्वात् केवलानुभवरूपं तदेव मुख्यं ब्रह्म निर्विकल्पकावस्थापरब्रह्मप्रापिकेत्यर्थः ८ वाचा संभाषा कथनं प्रवृत्तं यस्मिंस्तत्तथाभूतं यत्तद्ब्रह्मचर्यं तत्र मनः

यदिदं ब्रह्मणो रूपं ब्रह्मचर्यमिति स्मृतं परं तत्सर्वधर्मेभ्यस्तेन यांति परां गतिं ७ लिंगसंयोगहीनं यच्छब्दस्पर्शविवर्जितं श्रो
त्रेण श्रवणं चैव तच्चक्षुषा चैव दर्शनं ८ वाकं भाषाप्रवृत्तं यत्तन्मनः परिवर्जितं बुद्ध्या चाध्यवसीयीत ब्रह्मचर्यमकल्मषं ९
सम्यग्वृत्तिर्ब्रह्मलोकं प्राप्नुयान्मध्यमः सुरान् द्विजाग्र्यो जायते विद्वान्कन्यसीं वृत्तिमास्थितः १० सुदुष्करं ब्रह्मचर्यमुपायं
तत्र मे शृणु संप्रवृत्तमुदीर्णं च निगृह्णीयाद्द्विजो रजः ११ योषितां न कथाः श्राव्या न निरीक्ष्या निरंबराः कदाचिद्दर्शनादासां
दुर्बलानाविशेद्रजः १२

मनोमात्रेणावस्थानं परिवर्जितं विषयेंद्रियहीनं शब्देन वक्तुं योग्या सविकल्पकावस्थेत्यर्थः यत्तु बुद्ध्या श्रवणमननोत्थया अध्यवसीयीत निश्चितुयात् निर्विचिकि
त्सं परोक्षज्ञानमित्यर्थः ९ ब्रह्मचर्याणां क्रमेण फलमाह सम्यगिति ब्रह्मैव लोकस्तं मोक्षं सुरान् स्वर्गलोकं कन्यसीं कनीयसीं १० संप्रदीप्तं समुत्पन्नं उदीर्णं वृद्धिंग
तं रजः कामादिरूपं ११ रजो रागः १२ ॥

मो०
१२७

127

कृष्णं च अहं मातस्त्वमहं सा पंच अहमथादपाचितं अहंपरंचनाम्नीपायाज्ञापतेपापमुच्यत इत्यादिनाउक्तलक्षणं महार्त्तिः मुक्तबद्धात्मं तपीडितः अद्भिस्त्रिरिति वा
पाठः स्वप्नेचरेतः स्नावेः सुमग्नः अघमर्षणां कृ तं च सम्यंचेत्कृत्यं १३ रागयुक्तेनेत्यपपाठः मनसा निर्दहेदिति संबंधः १४ कुणपमिति शरीरं तद्गतं मलात्रेतं तत्व
पाद्दृढंबंधन सर्वदेहत्रात्मनोदृढबंधनमित्यर्थः १५ शिरानाड्यः तासां जालैः १६ दशवातादिदशकवहाः धमन्योनाड्यः पंचस्विंद्रियेषु गुणांस्वस्वविषयग्रह

रागोत्पन्नश्चरेत्कृष्णमद्भिस्त्रिः प्रविशेदपः मग्नः स्वप्नेच मनसा त्रिर्जपेदघमर्षणं १३ पाप्मानं निर्दहेदेवमंतर्भूतरजोमयं
ध्यानयुक्तेन मनसा संतप्तेन विचक्षणः १४ कुणपामेध्यसंयुक्तं यद्वद्दृढछिद्रबंधनं तद्वद्देहगतं विद्यादात्मानं देहबंधनं १५
वातपित्तकफाद्यक्तैस्त्वङ्मांसस्नायुमस्थिच मज्जां देहं शिराजालैस्तर्पयंति रसान्रुणां १६ दशविधाद्धमन्योत्र पंचेंद्रिय
गुणावहाः याभिः सूक्ष्माः प्रतायंते धमन्योन्याः सहस्रशः १७ एवमेताः शिरानद्योरसोदा देहसागरं तर्पयंति यथा कालमाप
गाइवसागरं १८ मध्ये च हृदयस्यैका शिरा तत्र मनोवहा मुक्तं संकल्पजं न्हणां सर्वगात्रैर्विमुंचति १९ ७ ॥ ॥

णापारवं च अत्र रसार्पणाद्वारा आवहंतीति यथा याभिरश्वत्थपर्णशंकुतुल्याभिः १८ हृदयस्य कदंबकुसुमाकारस्य मांसपिंडस्य मध्ये मनोवहा अन्नमयं हि
सोम्यमन इति श्रुतेरन्नरसैर्हृदयांतर्वर्त्तिमनः प्रीणनकरी नाडी यथोक्तं अश्वत्थपत्रनाडीवत् हि सप्तति शताधिका। नाडी मनोवहेत्युक्तं योगशास्त्रविशारदैरिति सा
हि सर्वगात्रेभ्यः मुक्तमादायपापस्यान्मुखं करोति १९ ॥

राम०
१२७

एकाशिराकंपं सर्वगात्रैः संबद्धत्वात् तत्राह सर्वगात्रेति तैजसं गुणं ऊष्माणं २० खजैः मंथनदंडैः देहस्यांतः संकल्पात् खे भूइंद्रियैरप्यखजातैः संकल्पजैः खजैः स्त्रीद
र्शनस्पर्शनादिभिः २१ शुक्रं संकल्पजमित्यत्र हेतुः पादपतितः स्वप्नेऽपीति स्त्रीसंगाभावेऽपि संकल्पजं रजः स्त्रीसंगः यथा अभ्येति तथैव मनोवहा नाडी शुक्रं सृजति २२ श्रीशि
अत्र रसो मनोवहा नाडी संकल्पश्चेति बीजानि यस्मात् बीजमित्यपपाठः २३ प्रजानां शुक्रोद्रेकात् तत्र अनुलोमप्रतिलोमगमनाद् वर्णसंकरकारिकां विद्युर्विचारयेयुः वि

सर्वगात्रप्रतापिन्यस्तस्याह्यनुगताः शिराः नेत्रयोः प्रतिपद्यंते वहंत्यस्तैजसं गुणं २० यथा स्वंतर्हितं सर्पिर्यद्भिर्निर्मथ्यते
खजैः शुक्रं निर्मथ्यते तद्वद्देहसंकल्पजैः खजैः २१ स्वप्नेऽप्येवं यथाभ्येति मनःसंकल्पजं रजः शुक्रं संकल्पजं देहात्सृज
त्यस्य मनोवहा २२ महर्षिर्भगवानत्रिर्वेद तच्छुक्रसंभवं त्रिबीजमिंद्रदैवत्यं तस्मादिंद्रियमुच्यते २३ ये वै शुक्रगतिं
विद्युर्भूतसंकरकारिकां विरागा दग्धदोषास्ते नाप्नुयुर्देहसंभवं २४ गुणानां साम्यमागम्य मनसैव मनोवहं देह
कर्मा नुदन्प्राणानंतकाले विमुच्यते २५ ॥

चापि विरागाः दग्धदोषाः निर्वासनाः २४ देहानवाप्तौ अनुष्ठेयांतरमाह गुणानामिति मनसैव गुणसाम्यं निर्विकल्पत्वं आगम्य योगबलेनासाद्य मनोवहं
सत्यलोकप्रदं सर्वोत्कृष्टं सुषुम्नाख्यनाडीमार्गं प्रतिश्रित्य अंतकाले प्राणानुदन् प्रेरयन् विमुच्यते कः यः देहकर्मा देहनिर्वाहमात्रार्थकर्मा यस्यावाद्यप्रवृत्तिशून्य इत्यर्थः २५ ॥

देहबंधच्छेदे योगमार्गक्रममुक्तिदमुक्त्वा जीवन्मुक्तिकरं ज्ञानमार्गमाह भवितेति मनसो विश्वात्मकस्य ज्ञानं भवितामविष्यति कीदृशं तत्तज्ज्ञानं मनस्येव भज्ञापत इति स्वप्नव
वत्सर्वविषयाकारं भवतीति ॥ एतज्ज्ञानवतः फलमाह ॥ मंत्रसिद्धं प्रणवोपास्तिसिद्धं मनः नित्यं अनादि मायामात्रं सत् विरजं निर्वासनं ज्योतिष्मत् प्रकाशवत् सर्वज्ञं सर्वश
क्तिच भवति यथोक्तं वासिष्ठे ॥ विगतवासनमाशुचिपाशतामुपगतं मनआत्मतयोदितं यदभिवांछति तत्त्वतिक्षरात्मकत्वशक्तिमयो हि महेश्वर इति २६ तद

128

भवितात्मनसो ज्ञानं मनस्येव प्रजापते ज्योतिष्मद्विरजो नित्यं मंत्रसिद्धं महात्मनां २६ तस्मात्तदभिघाताय कर्म कुर्यादकल्म
षं रजस्तमश्च हित्वेह यथेष्टां गतिमाप्नुयात् २७ तरुणाधिगतं ज्ञानं जरादुर्बलतां गतं विपक्वबुद्धिः कालेन आदत्ते मानसं
बलं २८ सुदुर्गमिव पंथानमतीत्य गुणबंधनं यथा पश्येत्तथा दोषानतीत्यामृतमश्नुते २९ शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मे
भीष्म उवाच दुरंतेष्विंद्रियार्थेषु सक्ताः सीदंति जंतवः ये त्वसक्ता महात्मानस्ते यांति परमां गतिं १ ॥ छ ॥ छ ॥

भिघाताय मनोनाशाय अकल्मषं निष्कामत्वरूपं यथायेन प्रकारेणाभीष्टां गतिं मोक्षं २७ जरया दुर्बलता जरादुर्बलता तां तां प्रतीयात् क्रूतार्थेनेति समासः मा
नसं बलं संकल्पं आदत्ते संहरति ॥ कालेन पूर्वभाग्येन न तु हठयोगपतया २८ गुणा देहेंद्रियादयस्तदेव बंधनं २९ चत्वारिंशः पूर्वोक्ते बंधने ऽत्यंतबाधिका
रिभेदानाह दुरंतेष्विति १ ॥

क्लमैः क्लेशैः संततंव्याप्तंदृष्ट्वैवनतुममइदानींक्लेशोनास्तीत्युपेक्षेत १ घटनमेवाहाध्यायेनवागिति ३ अपवेतस्पर्शेभूतानुकंपयापिमनसःसंगंवं
धंपश्येत्। यथोक्तं कृपयापिकृतःसंगः पतनायैवयोगिनां।इतिसंदर्शयन्नाहभरतस्मरणपोषणमिति ५ शुभंकर्माहाहिंसेति ६ बुध्याइदंसर्वपद

जन्ममृत्युजरादुःखैर्व्याधिभिर्मानसक्लमैः दृष्ट्वैवसततंलोकंघटेन्मोक्षायबुद्धिमान् १ वाङ्मनोभ्यांशरीरेणाशुचिःस्या
द्नहेतुकृतः प्रशांतोज्ञानवान्भिक्षुर्निरपेक्षश्चरेत्सुखं ३ अपवामनसःसंगंपश्यन्भूतानुकंपया तत्राप्युपेक्षांकुर्वीत
ज्ञात्वाकर्मफलंजगत् ४ यत्कृतंस्याच्छुभंकर्मपापंवायदिवाश्नुते तस्माच्छुभानिकर्माणिकुर्याद्वाबुद्धिकर्मभिः ५
अहिंसासत्यवचनंसर्वभूतेषुचार्जवं क्षमाचैवाप्रमादश्चयस्यैतेससुखीभवेत् ६ तस्मात्समाहितंबुध्यामनोभूतेषुधा
रयेत् यश्चैवंपरमंधर्मंसर्वभूतसुखावहं ७ दुःखनिःसरणंवेदसर्वज्ञःससुखीभवेत् तस्मात्समाहितंबुध्यामनो
भूतेषुधारयेत् ८ ॥

यमात्मेतिशास्त्रोत्त्ययासमाहितंस्थिरंरागद्वेषशून्यंएनंअहिंसादिरूपं ८ ॥ ॥ ॥ ७ ॥ ॥ ॥

अशुभं वर्जमित्याहाद्वैदनेनायेति। नापध्यायेत् परशानिष्टं न चिंतयेत् अवद्धं स्वस्यायोग्यं राज्यादिकं न स्पृहयेत्। असत् नष्टं भाविवा स्त्रीपुत्रादिकं न चिंतयेत्। अमो
घेति यत्नस्यावश्यं भाविफलत्वं सूचितं ज्ञाने ज्ञानसाधने अमानित्वादौ श्रवणादौ च। वाचामोघप्रयासेनेति पाठे वाचा वेदांतवाक्येन अवाशोघप्रयोगेनेति पाठे। वागि
ति वागादींद्रियव्यापारो लक्ष्यते ओघ इति कालपरिणाममपेक्ष्य क्रतुलिंगवत्स्वयमेव ज्ञानारंभश्चित्तपरिणामो भविष्यति किंतु न प्रतत्पेत्युपदेशपाश्चेयो बुद्धिः

नापध्यायेन्न स्पृहयेन्नावद्धं चिंतयेदसत् अपामोघप्रयत्नेन मनो ज्ञाने निवेशयेत् वाचामोघप्रयोगेण मनो ज्ञं तत् प्रवर्त्त
ते ९ विवक्षता च सद्वाक्यं धर्मं सूक्ष्ममवेक्षता सत्यां वाचमहिंस्त्रां च वदेदनपवादिनीं १० कल्कापेतामपरुषामनृशंसामपै
शुनां ईदृगल्पं च कर्त्तव्यमविक्षिप्तेन चेतसा ११ वाक्प्रबद्धो हि संसारो विरागाद्व्याहरेद्यदि बुध्याप्यनुगृहीतेन मनसा कर्मता
मसं १२ रजोभूतैर्हि करणैः कर्मणा प्रतिपद्यते स दुःखं प्राप्य लोकेस्मिन्नरकायोपपद्यते १३ १३ ॥ ॥ नो० ॥ ॥

साकाल्यारव्यातुष्टि रोघ शब्दार्थः तदुभयं यत्र नास्ति तादृशः यमनियमादीनां योगांगानामप्रयोगस्तेन तत्र ज्ञानं प्रवर्त्तते ९ सद्वाक्यं विवक्षता पुरुषेण ईदृक्
वक्तव्यं ईदृक्त्वं यत् अहिंस्त्रां वाचं वदेदिति द्वयोः संबंधः १० कल्कापेतां शाठ्यहीनां ११ संसार ऐहिकः आमुष्मिकोपि सर्वो वाचैव प्रबद्धोस्ति अतः साध्वीमेव
वाचं वदेत् वैराग्यं चेत्तर्हि नाम सहिंसादिकं कर्मणा स्वीयं व्याहरेत् पुराप्यपायं वा कर्म स्वमुखेन प्रकाशितं चेद्व्यपनीतमिति भावः १२ रजोभूतैः प्रवृत्तिपरैः १३ ॥ ॥

फलितमाहार्द्धेन तस्मादिति १४ सदृष्टांतं कर्मसंन्यासमाह प्रकीर्णमिति द्वाभ्यां आमिषभारं वहंतं चोराः गम्यां दिशं राजकीयां पथवरोधात्प्रतिकूलां बुद्धा आमिषं त्यक्त्वान्यां दिशं ग
च्छंतो यथानवध्यंते एवमविद्यकं कर्मादाय कामादिभिर्मुखं संसारभयं बुद्धा कर्माणि त्यक्त्वा न वध्यंते इति तात्पर्यं प्रकीर्णमेषः विशसनमेष आमिषमित्यर्थः। तस्य भारः क्लीव
त्वमार्षं १५ अनीहः चेष्टाशून्यः तपस्वी मनसश्चेंद्रियाणां चैकाग्र्यं परमं तपः तद्वान् १६ प्रयोगो योगांगानामनुष्ठानं तत्र रतिः प्रीतिर्यस्य निःप्रचारेण निरुद्धेन। बुद्धिश्व

तस्मान्मनोवाक्शरीरैराचरेद्बुद्धिमात्मनः १४ प्रकीर्णामिषभारं हि यद्वद्धार्येत दस्युभिः प्रतिलोमां दिशं बुध्वा संसारमबुधा
स्तथा १५ तामेव च यथा दस्युः क्षिप्त्वा गच्छेच्छिवां दिशं तथा रजस्तमः कर्माण्युत्सृज्य प्राप्नुयात्सुखं १६ निःसंदिग्धमनीहो
वै मुक्तः सर्वपरिग्रहैः विविक्तचारी लघ्वाशी तपस्वी नियतेंद्रियः ज्ञानदग्धपरिक्लेशः प्रयोगरतिरात्मवान् निःप्रचारेण
मनसा परं तदधिगच्छति १७ धृतिमानात्मवान्बुद्धिं निगृह्णीयादसंशयं मनो बुध्या निगृह्णीयाद्विषयान्मनसात्मनः १८
निगृहीतेंद्रियस्यास्य कुर्वाणस्य मनो वशं देवताः संप्रकाशंते हृष्टा यांति तमीश्वरं १९ ॥ ॥ ॥ ॥ ॥

न विचेष्टति तामाहुः परमां गतिमिति श्रुतेः १७ आत्मवान् बुद्धिमान् बुद्धिं अहं ब्रह्मास्मीति वाक्यजां धीवृत्तिं मनः संकल्पविकल्पात्मकं बुध्या तया हत्वा मनसा विष
यान् शब्दादीन् तेषां विशेषणं आत्मन इति मनोरूपाणि मर्यः १८ योगावांतरफलमाह निगृहीतेति तत्र तस्य मनवस्थायां देवताः इंद्रियाणि तं योगिनं ईश्वरं यांति प्रवि
शंति स्वेन तत्तदुत्पन्नत्वमपि ज्ञेयं १९

तामिर्देवताभिः संपुक्तं एकांतसंगतेमनः [illegible] यस्यधीमात्रेणास्यापितः सत्वेधीमात्रेब्रह्मरूपायब्रह्मभावायप्रभवोभावेइतिकथ्य १९ नप्रवर्त्तेततपोगेष्व
र्थे नप्रकाशेतेतिपाठेएश्वर्येणायोगीविदितोनप्रभवेत् योगतंत्रैर्निरोधप्रधानैरेवयत्नैरुपक्रमेत् सत्यसंकल्पादीन्‌नभावयेत्‌किंतुअस्थूल[illegible]त्वादीनेवेत्यर्थः ननुक
यमेकस्यात्मवस्तुनः सगुणत्वंचेत्यतआहयेनेति।तंत्रैतंत्रप्रतिपाद्येयोगे तंत्रयतः अनुतिष्ठतः येनरूपेणाविशिष्टाहृत्तिः स्यात्तत्तदाचरेत् सविशेषत्वंहत्नुपाधिक

ताभिःसंसक्तमनसोब्रह्मतत्त्वंप्रकाशते एतैश्वापगतैः सर्वैर्ब्रह्मभूयायकल्पते २० अथवानप्रकाशेतयोगतं
त्रैरुपक्रमेत् येनतंत्रयतस्तंत्रेवृत्तिःस्यात्तत्तदाचरेत् २१ कणकुल्माषपिण्याकशाकयावकसक्तवः तथामूलफ
लंभैक्ष्यंपर्यायेणोपयोजयेत् २२ आहारंनियमंचैवदेशेकालेचसात्विकं तत्परीक्ष्यानुवर्त्तेततत्प्रवृत्त्यनुपूर्वकं २३
प्रवृत्तेनोपरुंधेतशनैरग्निमिवेंधयेत् ज्ञानेषितंतथाज्ञानेकर्मवत्तत्प्रकाशते २४ ॥ ॥ ॥

तंस्वतस्तुनिर्विशेषत्वमेवेतिभावः २१ कणोति कणादीनपिभक्षयेन्नतुयोगेश्वर्यंउपजीवेतेत्यर्थः कुल्माषाः पक्वमाषाः यावकंयवचूर्णंउष्णजलोष्मपक्वाः सक्तवः
सक्तून् २२ प्रवृत्तेकर्मतदनुरोधेनयोगंअनारंभंनकुर्यात्‌ज्ञानाविंतंकर्मक्रमेणाइंधयेत्तात्याकुर्वतःज्ञानंब्रह्मप्रकाशते २४ ॥ ॥ ॥ ॥ ॥

नन्वात्माभिन्नस्य ज्ञानस्याप्रकाशायोगात्कथंप्रकाशतइत्युक्तिरतआह ज्ञानेति त्रींल्लोकान्जाग्रदादीन् विज्ञानंबुद्धिस्तदनुगतंसधीःस्वप्नोभूत्वाध्यायतीवलेला
यतीवेत्यादिश्रुतेः अज्ञानेनआत्मनादेहआत्मादिबुद्धिरूपेणविपर्ययेण प्रकाशमानमपिज्ञानंअवस्थात्रयकालुष्यादप्रकाशमानमिवेत्यर्थः २५ ननुसांशंचेत्प्रकाशतः
प्रकाशतेनतुनिरंशमतोस्यसर्वात्मनाऽप्रकाशःप्रकाशोवावाच्यइत्याशंक्याह पृथक्त्वादिति अवस्थात्रयातीतमपितत्संप्रयुक्तत्वेनगच्छन्नत्रसमुःशा
श्वतमनुपाधिमात्मानंदूषयन्तंनवेदतयोःपृथक्त्वात्पृथक्त्वयोरपवर्गपर्यंतं।उपवृत्तमितिपाठेस्वभावरूपंअवाध्यत्वेनवाध्यत्वेनचजानन् २६ व

ज्ञानाधिष्ठानमज्ञानंत्रींल्लोकानधितिष्ठति विज्ञानानुगतंज्ञानमज्ञानेनापकृष्यते २५ पृथक्त्वात्संप्रयोगाच्चना
स्यूर्वेदशाश्वतं सतयोरपवर्गज्ञोवीतरागोविमुच्यते २६ वयोतीतोजरामृत्यूजित्वाब्रह्मसनातनं अमृतं
तदवाप्नोतियत्तदक्षरमव्ययं २७ शांतौमोक्षधर्मेषुवार्ष्णेयाध्यात्मे॥ ॥भीष्मउवाच निष्कल्मषंब्रह्मचर्यमिच्छताच
रितुंसदा निद्रासर्वात्मनात्याज्यास्वप्नदोषमवेक्षता १ १ १ ॥ ॥ ॥ ॥ ॥

योतीतःजितकालःपाठांतरंसुगमं २७ एकचत्वारिंशः॥ ॥ पूर्वत्रयोगैश्वर्यमनुभूयाननुभूयवाब्रह्मप्रविशेदित्युक्तंतत्रऐश्वर्यानुभवंनिंदितुमारभतेनिःक
ल्मषमितिनिष्कामंब्रह्मचर्ययोगंनिद्राऽविद्यामोहकत्वात्त्याज्यास्वप्नेति।तस्यत्रयपञ्चावसथास्त्रयःस्वप्नाइतिश्रुतेःजाग्रत्स्वप्नाविवयोगैश्वर्यमपिसंप्रज्ञा
तकालिकंस्वप्नएवातत्रदोषाःदेवांगमंत्ररागादयःतान् १॥

स्वप्नेहि विधेपि देही योगी अयोगी वा २ उक्तनिद्राप्रतियोगिजागरणमाह ज्ञानाभ्यासादिति तच्चिंतनं तत्कथनं अन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ज्ञानाभ्या
संविद्बुधा इत्युक्तविधात् ज्ञानाभ्यासात् तज्जिज्ञासा विचारोर्थः प्रयोजनमस्य तज्जागरणात् अनंतरं अनवरतं ज्ञाततत्वस्य तु मुख्यं जागरणमित्याह विज्ञानेति ३
अत्राह पूर्वपक्षीति शेषः स्वप्नदृश्यमानोपि देहादिर्भावः पदार्थः कोनु नु वितर्के किं सत्योऽसत्यो वेति विकल्प्याद्ये बाधानुपपत्तिरिति सूचयति विषयवानिवे
ति इवकारेणावस्तुत्वेन विषयवानित्यर्थः ननु यथा उपरिस्थोर्कः जलेऽधस्थ इव भाति तद्वज्जाग्रद्देहादिरेवान्यथा स्वप्ने भातीति न तावता स्वप्नस्य निर्विषय

स्वप्नेहि रजसा देही तमसा चाभिभूयते देहांतरमिवापन्नस्त्वपगतस्पृहः २ ज्ञानाभ्यासाज्जागरणं जिज्ञा
सार्थमनंतरं विज्ञानाभिनिवेशात्तु जागरत्यनिशं सदा ३ अत्राह कोन्वयं भावः स्वप्ने विषयवानिव प्रलीनै
रिंद्रियैर्देही वर्त्तते देहवानिव ४ ॥

त्वमित्याशंक्याह प्रलीनैरिति दृष्टांते जलोपरि संहतरश्मिपिंडेनार्कतेजसा प्रतिहतं चाक्षुषं तेजोऽप्रविलीनं प्रतिस्रोतः प्रवृत्तं सदुपरिस्थमप्यर्कं स्वात्मकप्रवृत्तवृत्ति
संस्कारादधस्थं इव विषयीकरोति अत्र त्विंद्रियाणि विलीनानीति भेदः अन्यथा प्रतिबिंबभ्रमस्य पुरोवर्तिद्रव्यांतरवद्धातुदशादिकमपि स्वप्ने दृश्येत तस्मा
त्स्वाप्नो भावः न सत्य इत्यर्थः नाप्यसत्यः असत्यस्य शशशृंगादेर्भानायोगात् ४

एवंयुक्त्यानिरुद्धगतिकःसिद्धांतीअनुभवबलेनैवोत्तरयतिअत्रोच्यतइति योगेश्वरइतिहरिरितिचहेतुगर्भंविशेषणद्वयं योगिसंकल्पमात्रस्व
स्वाप्नोभावःवस्तुत्वात्तुतदभावस्येतिभावः एतद्यथाहरिर्वेदतथामहर्षयोवर्णयंतिउपपन्नार्थंयुक्तिमद्वेतदित्यर्थःसंकल्पादेवास्यपितरःसमुत्तिष्ठं
तीतिश्रुतेःयथायोगिसंकल्पजोपित्रादिकंतथास्मत्संकल्पजंरथादिकमितिसुवचमित्याशयः ५ सर्वगतंसर्वप्राणिसिद्धंइंद्रियाणामनुपरमेसंकल्पस्व
भावस्यमनसोनुपरमःस्वप्नइत्यर्थः तत्रतस्मिन्स्वप्नविषयेतत्प्रसिद्धंवक्ष्यमाणंनिदर्शनंदृष्टांतः ६ तमेवाहकार्यइतिमनोरथवृत्तिवत्स्वाप्नवृत्ति

अत्रोच्यतेयथाह्येतद्देहेयोगेश्वरोहरिः तथैतदुपपन्नार्थंवर्णयंतिमहर्षयः ६ इंद्रियाणांश्रमात्स्वप्नमाहुः
सर्वगतंबुधाः मनसस्त्वप्रलीनत्वात्तत्रदाहुर्निदर्शनं ६ कार्य्यंह्यासक्तमनसःसंकल्पोजाग्रतोह्यपि यद्व
न्मनोरथैश्वर्यंस्वप्नेतद्वन्मनोगतं ७ संसाराणामसंख्यानांकामात्मातदवाप्नुयात् मनस्यंतर्हितंसर्ववेद
सोत्तमपूरुषः ८

रपिसंकल्पमात्रशरीरात्तथाप्याद्येइंद्रियैर्विक्षिप्तात्मकत्वप्रतिभासःस्वप्नेतदभावाज्जाग्रद्दृष्टानांसम्यग्ज्ञानमितिविशेषइत्यर्थः ७ स्वप्नादेर्मनोगत
त्वंव्याचष्टेसंसाराणामिति।प्राचीनानितेजन्मजसंस्कारात्कामात्माविषयासक्तचित्तः ततस्वप्नाद्यैश्वर्यंअवाप्नुयात् कथंतदवाप्तिरत्राहसउत्त
मपूरुषःअसंहतःसाक्षीमात्मानमेयाकारंमनःवेदप्रकाशयति।नविक्रियारूपंभोक्तृत्वंसाक्षिणःअपितुसाक्ष्यप्रकाशकत्वमात्रं यस्तुविक्रि
यावान्प्रमातासंदेशयकोटिस्थएवनतुसाक्षीत्यर्थः ८ ॥

गुणानांसत्वादीनांमध्येयघातकर्मणाप्राचीनेनसत्वंरजस्तमोवाउपस्थितंभवतियेनचकर्मणाभावितंसंस्कृतंमनोयत्रभवतितद्भूतानिसूक्ष्माणितन्मात्रशंसं
जितंतस्याधाकारंस्वप्नेनिवेदयंतीत्यर्थः ९ ततः आकारदर्शनानंतरं। आनंतर्यफलोदयं अनंतरमेवसुखदुःखोदयंयथासमुपसर्पतीति १० असंबुध्याः ज्ञाना

गुणानामपियथेतत्कर्मणाचाप्युपस्थितं तत्रस्थं संतिभूतानिमनोयस्त्राविंतंयथा ९ ततस्तमुपवर्त्तंतेगुणाराजसतामसाः
सात्विकावायथायोगमानंतर्यफलोदयं १० ततःपश्यंत्यसंबुध्यावातपित्तकफोत्तरान् रजस्तमोगतैर्भावैस्तद्यथाहुर्हुरस्य ये
११ प्रसन्नैरिंद्रियैर्यद्यत्संकल्पयतिमानसं तत्रस्वप्नमुपगतेमनोदृष्टिर्निरीक्षते १२ व्यापकंसर्वभूतेषुवर्त्ततेप्रतिघंम
नः आत्मप्रभावात्तेविद्यात्सर्वाह्यात्मनिदेवताः १३

तद्वाताद्युत्तरान्त्रिधातुकान्देहान्पश्यंतितत्देहदर्शनांतंदुरत्ययंप्राग्वासनाप्राबल्यात्योगंविनापरिहार्यं ११ तत्रतत्रतस्मिन्तस्मिन् १२ व्यापकंउपादानत्वात्अप्रतिघं
प्रतिघातशून्यं तत्रहेतुः आत्मप्रभावात्तं आत्मानं देवताः आकाशाद्याः आत्मज्ञानात्सार्वज्ञंसार्वात्म्यंचप्राप्नोतीत्यर्थः १३ ॥ ॥

एवंस्वप्नावस्थामुक्त्वासुषुप्त्यवस्थामाहमनसीतिसोऽहंनहारंस्वप्नप्रदर्शनद्वारभूतंस्थूलंदेहंमनस्यंतर्हितंआस्थापतत्रैवदेहेस्वपितिसंआत्मानंअपिगच्छति।कुत्रअ
स्मिन्नव्यक्तेसदसदात्मकेमायापाशवलेनदर्शनंनिश्चितदर्शनंसाक्षिरूपं तदेवसर्वेषांभूतानामात्मभूतोहंकारस्तत्रप्रतिविंबात्मनातिष्ठतीतितस्य।अध्यात्म
गुणंआत्मानंअहंकारंगुणाश्चप्रकृतिरूपाःतेषांउपरीतिअध्यात्मगुणाअहंकारादिगुणैरस्पृष्टंविंबात्मत्वात्सुषुप्तोशुद्धसाक्षिरूपवाहंकारादयोलीयंतइत्यर्थः
१४ दृष्टांतभूतेस्वप्नसुषुप्तीउक्त्वादार्ष्टींतिकेसवीजनिर्वीजावस्थेयोगिगम्येतत्राद्यांसंप्रज्ञातावस्थामाहलिप्सेतेति ऐश्वर्यंगुणांज्ञानवैराग्यैश्वर्यधर्मैर्बध्यतमे।

मनस्यंतर्हितंद्वारंदेहमास्थायमानुषं यथात्सदसद्व्यक्तेस्वपित्यस्मिन्निदर्शनं सर्वभूतात्मभूतस्थंतमध्यात्मगुणं
विदुः १४ लिप्सेतमनसायश्चसंकल्पादैश्वरंगुणं आत्मप्रसादजंविद्यात्सर्वाह्यात्मनिदेवताः १५ एवंहितप
सायुक्तंकामवत्तमसःपरं त्रैलोक्यप्रकृतिर्देहीतमसोंतेमहेश्वरः १६

आत्मप्रसादेचित्तप्रसादजंशुद्धंमनःसर्वईश्वरइत्यर्थः १५ तपसाविषयाद्यालोचनेनयुक्तंमनःसर्वंभूतंभवतीतितमसःपरंप्राप्तंतुमनःअर्कवत्तज्ज्ञप्तिमात्रमेवभवति।
तत्रोभयविधंब्रह्मभावंदेहिनआह।त्रैलोक्येतिदेहीजीवःत्रैलोक्यप्रकृतिःकारणंब्रह्मेत्यर्थःकारणीभूततमसोंतेतुसर्वएवमहेश्वरःशुद्धब्रह्मभूतस्वेत्यर्थः।यथोक्तं
सोपाधिर्निरुपाधिश्चद्वेधाब्रह्मविदुच्यते।सोपाधिकस्यात्सर्वात्मानिरुपाख्योनुपाधिकइति १६

तप इति अग्निहोत्रादिकं तपः तमः दंभदर्पादि एतद्ब्रह्म तु देवासुरैः हेतुभूतैः रजस्तमोमयैर्न प्राप्यमिति गुप्तं प्रजापतिना कीदृशं ज्ञानलक्षणं ज्ञान
स्वरूपं १७ इममेव विभागं विभजते सत्वमिति १८ तत्परमं तेभ्यः सात्विकासात्विकेभ्यः भावेभ्यः उत्कृष्टं ज्ञानमेव न तु ज्ञेयं अमृतं ज्ञानांतराबाध्यं ज्योतिः स्वप्रकाशं
अक्षरं व्यापकं भावितात्मानः ध्यानादिना शोधितचित्ताः १९ उपसंहरति हेतुमदिति ज्ञानचक्षुषा तत्वदर्शिना एतावत् एव वाच्यं हेतुमत् सगुणं लक्षणया च निर्गुणं हेतुमत्

तपो हविरिति देवैस्तपो ह्यसुरैस्तमः एतद्देवासुरैर्गुप्तं तदाहुर्ज्ञानलक्षणं १७ सत्वं रजस्तमश्चेति देवासुरगुणान्विदुः
सत्वं देवगुणं विद्यादितरावासुरौ गुणौ १८ ब्रह्म तत्परमं ज्ञानममृतं ज्योतिरक्षरं ये विदुर्भावितात्मानस्ते यांति परमां ग
तिं १९ हेतुमच्च कथमाख्यातुमेतावज्ज्ञानचक्षुषा प्रत्याहारेण वा शक्यमक्षरं ब्रह्म वेदितुं २० शांतौ मोक्षपर्वेषु वार्ष्णे
याध्यात्मं॥ ॥

युक्तियुक्तमपि यथार्थं यथाख्यातुं शक्यं न तु सर्वं ग्राहिकया प्रदर्शयितुं श्रवणमननाभ्यां विदितशब्दयुक्तिं तत्त्वं सप्रत्याहारेण विषयेभ्य इंद्रियाणामाकर्ष
णेन ब्रह्म वेदितुं शक्यं योगांगेषु प्रत्याहार एव दुःशकः इतरत्सुसंपादमतो ब्रह्मप्राप्तिकामेनेंद्रियाणि जेतव्यानीत्यर्थः २० ॥ ॥ ॥ ॥

उक्तंवक्ष्यमाणंचसाधनजातंसमुच्चिनोतिनसइतिधर्ममितिपाठेऽयंतुपरमोधर्मोयद्योगेनात्मदर्शनमितियाज्ञवल्क्योक्तलक्षणंधर्मंचतुष्टयंपूर्वोक्तंद
ध्यानभूतंस्वप्नसुषुप्त्याख्यंद्वयंदर्शितिकिंचसगुणनिर्गुणब्रह्मभावाख्यंद्वयमितिचतुष्टयं व्यक्तंदृश्यं अव्यक्तंचिदात्मा यत्तत्त्वमनारोपितंरूपं
यस्यतत्परमर्षिणानारायणेन १ व्यक्ताव्यक्तयोस्तत्त्वंस्वरूपतः फलतश्चाहद्वाभ्यां । व्यक्तमिति ऋषिर्वेदःसएवनारायणोवाकारत्वान्नारायणः

भीष्मउवाच नसवेदपरंब्रह्मयोनवेदचतुष्टयं व्यक्ताव्यक्तंचयत्तत्त्वंसंप्रोक्तंपरमर्षिणा १ व्यक्तंमृत्युमु
खंविद्यादव्यक्तममृतंपदं प्रवृत्तिलक्षणंधर्ममृषिर्नारायणोब्रवीत् २ तत्रैवावस्थितंसर्वंत्रैलोक्यंसचराचरं नि
वृत्तिलक्षणंधर्ममव्यक्तंब्रह्मशाश्वतं ३ प्रवृत्तिलक्षणंधर्मंप्रजापतिरथाब्रवीत् प्रवृत्तिःपुनरावृत्तिर्निवृत्तिःप
रमागतिः ४ तांगतिंपरमामेतिनिवृत्तिपरमोमुनिः ज्ञानतत्त्वपरोनित्यंशुभाशुभनिदर्शकः ५ ॥ ॥ ॥

२ ब्रह्माण्डाधिपत्यांतंसर्वकर्मफलंतत्त्वमितिमर्थः निवृत्तिर्देहेन्द्रियाहंकारांतानांबाधः तल्लक्षणोधर्मस्तत्त्वब्रह्मैव ३ प्रजापतिःस्रष्टारजोमयत्वात् ४ तां
एषोऽस्यपरमआनंदएषास्यपरमासंपदितिश्रुतिप्रसिद्धांकैवल्यावस्थां । शुभाशुभेमुक्तिसंसारौनिश्चयेनद्रष्टुमिच्छन्नतुमुनयोलौकिक्रियायांक्रियायांपा
मितिरावुत्वा ज्ञानतत्त्वंचिदात्मतत्त्वंतद्विचारपरोनित्यंस्यात् ५ ॥

तत्तत्र तत्वविचारे कर्त्तव्ये एवं वक्ष्यमाणं प्रकारं जानीयात्। अव्यक्तं प्रधानं। पुरुषः क्षेत्रज्ञो जीवः महत्तरः ईश्वरः प्रधानक्षेत्रज्ञपतिर्गुणेशः इति श्रुति
प्रसिद्धं त्रयं ६ तेषु यन्महत्तरं। तं विशेषं क्लेशादिभिरपरामृष्टं तया विशिष्टं परमात्मानं अवेक्षेत साक्षात्कुर्यात् विशेषेण अबाध्यत्वा बाध्यत्वलक्षणे।
न वैपरीत्येन विशेषमेवाहानादीति। उभौ प्रधानक्षेत्रज्ञो अनादी अनंतौ अलिंगौ मानांतराविषयौ ७ यौ नित्यौ कूटस्थापरिहार्यौ एवमादि पुंप्रकृ

तदेवमेतौ विज्ञेयावव्यक्तपुरुषावुभौ अव्यक्तपुरुषाभ्यां तु यत्स्यादन्यन्महत्तरं ६ तं विशेषमवेक्षेत विशेषेण
विचक्षणः अनाद्यंतावुभावेतावलिंगौ चाप्युभावपि ७ उभौ नित्यावविचलौ महद्भ्यश्च महत्तरौ सामान्यमेतदु
भयोरेवं ह्यन्यद्विशेषणं ८ प्रकृत्या सर्गधर्मिण्या तथा त्रिगुणधर्मया विपरीतमतो विद्यात्क्षेत्रज्ञस्य स्वलक्ष
णं ९ प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितं अग्राह्यौ पुरुषावेतावलिंगत्वादसंहतौ १० ॥ ॥ ॥

त्योः साधर्म्यं विशेषणं व्यावर्त्तकं वैधर्म्यं तु एवं विद्यात् ८ एवं कथं तदाह प्रकृत्येति। अप्रसवधर्मा निर्गुणश्च पुरुष इति विपरीतं ९ विकाराणां मह
दादीनां द्रष्टारं न तु दृश्यं। एवं प्रधानक्षेत्रज्ञयोः साधर्म्यवैधर्म्ये उक्त्वा क्षेत्रज्ञेश्वरयोरपि साधर्म्यमाह अग्राह्याविति। अग्राह्यौ यतः पुरुषौ चिद्रूपौ। अलिं
गौ लिंग्यते ज्ञाप्यते अनेनेति गुणादिकं प्रति संबंधि लिंगं तद्राहित्यात् असंहतौ असंतविविक्तौ १० १० १६ १० १०

नन्वलिंगयोर्जीवेशयोर्लिंगभेदमयुक्तोभेदः कुतःस्यादित्याशंक्यौपाधिकस्तयोर्भेदोनस्वतइत्याशयेनाहसंयोगेति संयोगोदृग्दृश्यसंबंधःलक्ष
णंज्ञापकंअस्यास्तिराविर्भावेहेतुःस्वयस्यसःसंयोगलक्षणोत्पत्तिःकर्त्रीतिकर्त्तृत्वंबुद्धौचित्प्रतिबिंबस्यलक्षणमुक्तं ननुबुद्धिरेवचिच्छायापन्नाक
र्त्रीकिंतदुभयेतरेणकर्त्रेत्याशंक्याहकर्मनिर्वृत्तिरितिकर्मणांशास्त्रीयाणांलौकिकानांचनिर्वृत्तिर्निष्पत्तिर्यस्मात्। अयमर्थःकर्त्ताशास्त्रार्थवत्त्वा
दितिन्यायेनविधिनिषेधशास्त्राक्षिप्तःकश्चिन्नियोज्यस्तावदस्ति।सचनबुद्धिःतस्याःकाष्ठलोष्ठसमत्वेनानियोज्यत्वात्तनापिपुरुषःअकर्तृत्वा
त्।अतःशास्त्राद्यर्थवत्त्वायतदुभयसंयोगजःकर्त्ताऽवश्यंप्रधानेश्वरव्यतिरिक्तउक्तलक्षणोऽभ्युपेयइति सःकर्त्तायद्यत्प्रयापयाकरणै

संयोगलक्षणोत्पत्तिःकर्मजाग्युपहतेयया करणैः कर्मनिर्वृत्तिःकर्त्तायच
हिचेष्टते ११ कीर्त्तितेशब्दसंज्ञाभिःकोहमेषोप्यसाविति ॥ ॥ ॥ ॥

रिंद्रियादिभिःसाधनैर्विचेष्टतेकर्मकुरुतेतयातयातयोनिप्रदेनकर्मणासहितोऽभूतो। अतःसमानेपिदृग्दृश्यसंयोगेदृश्योपाधिस्वरूपभेदात्
कर्तृभेदइत्यर्थः ११ अयंचकर्तृव्यवहारतस्तुतीयोपिपरमार्थतोदृक्कोटिरेवनतुदृश्यकोटिरिति दृष्टांतमुखेनाहार्द्वेनाकीर्त्तितइति।यथास्वस्य
कौंतेयत्वमजानानःकर्णःकःकौंतेयइतिपृच्छतिसएवसूर्येणप्रबोधितोऽहंकौंतेयइतिवक्तिएवं अतःकिंब्रह्मेतिपृच्छतिसस्कन्नत्रअहंब्रह्मेतिजा
नाति।एवमेकस्मिन्नपिवस्तुनिउपाधिभेदात्ज्ञानाज्ञानकृतभेदात्विभिन्नौशब्दप्रत्ययौभवतःसंज्ञाप्रत्ययःएवंदृश्येपिएषोसाविति सामी
प्यासामीप्यकृतौशब्दप्रत्ययौएकत्रापिभिन्नौभवतः। एवंजीवेशाविति १२

मो०
१३५

ननुविनिगमकाभावात्दृश्यकोटिरेवकर्त्रीकथंनेत्याशंक्याहउष्णी षवानिति। वस्त्रैःवस्त्रवदाच्छादकैःत्रिभिःस्थूलसूक्ष्मकारणदेहैःयथोउ
ष्णीषादन्यःस्वंदेहीगुणेभ्योऽन्यइत्यर्थःनहिप्रतिबिंबमुखंदर्पणेदृश्यमानमपिदर्पणकोटिगतंतथाज्ञोवापीतिभावः १३ चतुष्टयंदेहप्रधानयोः
साधर्म्यवैधर्म्येद्वेजीवेश्वरयोश्वसाधर्म्यवैधर्म्येइति।एतैः एवोक्तैः अनाद्यनंतत्वेनचिज्जडत्वेन असंहतत्वेनकर्तृत्वेनचेतिचतुर्भिर्हेतु

उष्णीषवान्यथावस्त्रैस्त्रिभिर्भवतिसंवृतः संवृतोयंतथादेहीसत्वराजसतामसैः १३ तस्माच्चतुष्टयंवेद्य
मेतैर्हेतुभिराहृतं यथासंज्ञोह्ययंसम्यगंतकालेनमुह्यति १४ त्रिपदंदिव्यमभिप्रसुवर्ष्मीवान्मनसाशुचिः
शारीरैरिंद्रियैरुग्रैस्त्वेरक्षिकल्मषंतपः १५

भि० आवृतंयथासम्यग्व्याख्यातमित्यर्थः यथासंज्ञोउक्तविधंज्ञानमनतिक्रांतः अंतकालेसिद्धांतसमये १४ एतच्चतुष्टयंज्ञात्वाय
त्कर्तव्यंतदाहत्रिपदमितिदिव्यादिविहार्दाकाशेब्रह्मणिआभवांवर्ष्मवान्देहवान् शारीरैः शरीरनिर्वर्त्यैः नियमैः शौचसंतोषतपःस्वाध्याये
श्वरप्रणिधानाख्यैः निष्कल्मषंनिष्कामंतपः योगं १५ १५

राम०
१३५

135

तपसायोगेनतद्बलेनसूर्यः अंतर्भूतेनअांतरेण नतुसमीलुक्षाऽपपद्यआदिवाहृद्रवसाध्येनभास्वतावैतान्मप्रकाशवतादिविहार्दकाशोसूर्यादि
कंतपसायोगेनभासतेयावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेउभावग्निश्चवायुश्चसूर्याचं
द्रमसावित्यादिश्रुतेः सर्वस्यतदंतर्गतत्वावगमात् अतएवयोगिनांव्यवहितादिसाक्षात्कारउपपद्यते १६ प्रकाशोविकसनेफलमित्यर्थः तप

त्रैलोक्यंतपसाव्याप्तमंतर्भूतेनभास्वता सूर्यश्चचंद्रमाश्चैवभासतस्तपसादिवि १६ प्रकाशस्तपसो
ज्ञानंलोकेसंशब्दितंतपः रजस्तमोघ्नयत्कर्मतपसस्तत्स्वलक्षणं १७ ब्रह्मचर्यमहिंसाचशारीरंतप
उच्यते वाङ्मनोनियमःसम्यङ्मानसंतपउच्यते १८ विधिज्ञेभ्योद्विजातिभ्योग्राह्यमन्नंविशिष्यते आ
हारनियमेनास्यपाप्माशाम्यतिराजसः १९ वैमनस्यंचविषयेयांत्यस्यकरणानिच तस्मात्तन्मात्रमाद
द्याद्यावदत्रप्रयोजनं २०

सोयोगस्तस्यासंशब्दितंयोगिनस्तेप्रपश्यंतिभगवंतंसनातनमितिसर्वत्रख्यातंज्ञानहेतुत्वेनातस्यस्वलक्षणंअसाधारणंरूपंरजस्तमोघ्नंयत्प्र
त्यावरणयोनीशकंकर्मवैराग्यपूर्वकंवेदांतश्रवणं १७ तपोविशेषावाहब्रह्मेति १९ वैमनस्यंवैराग्यंविषयेशब्दादौकरणानिइंद्रिया
णिअस्यशिष्टान्नभुजःतावन्मात्रंआहारमात्रेणनतुधनादिकंशिष्टेभ्योप्याददीत २० ॥ ॥ ॥ ॥

मो०
१३६

136

पं:

एवंविधसाधनेसंपत्त्यभावेपिमोक्षेउपायांतरमस्तीत्याह अंतेतितत्स्नानांअंतकालेवलोत्कर्षात्कुर्यात् पस्नानंयोगयुक्तेनमनसाशनैः उपपद्यतेइत्यन्व
यः अपमार्श आदिपर्वणिविस्मनुगृह्योदेवाअमंतेलभिरेराहुस्कछलेनामृतंपीदेवपंक्तिस्थादहमेदेनसहैवतल्लेभेइत्युपाख्यातंतत्राख्यायिकानो
स्वार्थतात्पर्याभावात् ततः कश्चिद्विधेयोर्थउन्नेयः सचयथोक्तसाधनानुष्ठानात्सात्विकामुक्तिभाजः स्युः असात्विकोपिमोक्षक्षेत्रेमरणाका
लेमुक्तिमाप्नोतीति तथाचाग्नेयेमथिके संवर्त्तमरुत्तीयेकाश्यपोवसतः संवर्त्तस्य शवदर्शनेनशिवदर्शनसिद्धिः सूचितातेनकाश्यपोक्तस्यशिवते

अंतकालेवलोत्कर्षाद्यत्नेः कुर्याद्नातुरः स्वयंयुक्तेनमनसास्नानंयदुपपद्यते २१

नतत्प्रतिमावत्तच्छरीरस्यलिंगत्वंसूच्यते तथाइहापिवलोत्कर्षादंतकालेस्नानंकुर्यादित्युच्यते तेनसर्वैर्गौतेनवाकसंदर्भेणात्रहिजंतोः प्राणेषुरु
द्धस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेताविमुक्तंनविमुंचेदितिस्याच्छ्रुतेरर्थः काश्यांम्रियमाणस्यरुद्रमुखा
त्तारकोपदेशप्राप्त्यामुक्तिप्राप्तिरितिसमस्तपुराणोपबृंहितः सूचितइतिगम्यते वलोत्कर्षादितिपदेनकाश्यांवासात् अंतकालेस्नानंकुर्यात्तई
शोपदेशात्संपादयेत् २१

अन्तकालेषु २

राम०
१३६

एवंमोक्षसाधनांतरमुक्त्वा आपेक्षिकत्वमप्याह रजइति अयंदेहीरजोवर्ज्यः वाह्येंद्रियप्रवृत्तिशून्यः समाधौसंत्यक्तस्थूलदेहोपिदेही पुरुषः देहवान
भूत्वाशब्दवत्शब्दादिमत्तत्कार्येसूक्ष्मशरीरंचरेत्। यस्तुकार्यैरव्याहतमतिः सः वैराग्यात सूक्ष्मभोगेष्वपिनिस्पृहः प्रकृतौलीयतेनतुप्रकृतेः परंपुरुषं
माप्नोति। अयंभावः स्थूलसूक्ष्मकारणशरीरैर्मुक्तो योगीसद्योमोक्षमश्नुते। स्थूलमात्रविहीनो विदेहः स्थूलसूक्ष्माभ्यांविहीनः प्रकृतिलयः
एतौहिसुषुप्तिस्थवत्तउत्तरकल्पांतमविविक्षतौमध्येलयेनाभिभूतौनिर्विकल्पंपदमनुभवतइव। अतएवैतयोरसंप्रज्ञातः संसारहेतुः तथाच

रजोवर्ज्योप्ययंदेहीदेहवांछब्दवच्चरेत् कार्यैरव्याहतमतिर्वैराग्यात्प्रकृतिस्थिरः २२
आदेहादप्रमादाच्चदेहांताद्विप्रमुच्यते हेतुरुक्तः सदासंगीभूतानांप्रलयस्तथा २३

स्मृतिंभवप्रत्ययोविदेहप्रकृतिलयानामिति २२ आदेहात्देहपातावधि अप्रमादात् अनवधानत्वाभावात् देहानांस्थूलसूक्ष्मकारणा
नां अंतात् बाधात् विशेषेणासद्यएवमुच्यते एवंतुक्रममुक्तिभाजामित्याह हेत्विति। हेतुर्मूलाज्ञानं तन्नाशाद्धि देहादीनां अन्येषांचभूतानां क
र्मीविनाशस्ततः सर्गप्रलयौजन्ममरणेस्तइत्यर्थः २३ ॥

मो०
१३७

137

परब्रह्मपसर्गेषु ब्रह्मसाक्षात्कारोदये यतिर्यतिर्धर्माधर्मैर्नानुवर्त्तते शुद्धब्रह्मविदः तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशाविति न्यायेन पूर्वपापस्य नाश उत्तरस्या संश्लेषश्च भवती त्यागामिजन्मकारणाभावान्मुक्तिरित्यर्थः परब्रह्मपाभावे संसारानर्थयोगइत्याह भावेति ये विपर्ययं अनात्मसु अहंत्वादि देहादितेषु आत्मंतमस्मिन्नतत्त्वमुदायेवा आत्मबुद्धिं कृत्वा आसते तेभावानां महदादीनां अंतप्रभवयोर्नाशोदययोरेव प्रज्ञा बुद्धिर्येषां ते तथा भवंति विपर्ययस्तमतीनां मोक्षकथापिनास्तीत्यर्थः २४ धृत्वा आसनाद्यभ्यासाद्देहान्धारयंतो योगिनः बुद्ध्या संक्षिप्तं विषयेभ्यः प्रत्याहृतं चेतो यैस्ते स्थानेभ्यः अक्षादिभ्य

परब्रह्मपसर्गेतु निपतिर्नातिवर्त्तते भावांतप्रभवप्रज्ञा आसते ये विपर्ययं २४
धृत्वा देहान्धारयंतो बुद्धिसंक्षिप्तचेतसः स्थानेभ्योऽर्द्धसमानाः स्वसूक्ष्मत्वात्ता
नुपासते २५

इंद्रियगोलकेभ्योऽर्द्धसमानाः च्युताः स्यक्तान्नमयकोशाः सूक्ष्मत्वात् अन्नमयापेक्षया न तु वस्तुतः तान् प्राणेंद्रियादीन् उपासते आत्मत्वेन चिंतयंति यथोक्तं पुराणांतरे दश मन्वंतराणीह तिष्ठंतीद्रियचिंतकाः भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः बौद्धा दश सहस्राणि तिष्ठंति विगतज्वराः पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्तचिंतकाः पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यत इति २५

रम०
१३७

यस्मादेवंतस्मात्‌यथागमं। इंद्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परंमनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्‌ परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः
पुरुषान्नपरंकिंचित्साकाष्टासापरागतिरितीमं वेदमनतिक्रम्यततस्ततः परंपरंस्थानंगत्वातत्र परस्यां काष्टायां विषये स्वयमेव वुध्याधीहत्यावु
ध्यतेजानातिपराकाष्टांदेहांतंअव्यक्तादपिपरं एतेनाव्यक्तात्पुरुषः परइतिश्रौतंव्यक्तपदंदेहपरंननुसांख्याभिमताव्यक्तपरमितिव्याख्यातं
आनुमानिकाधिकरणेचैतत्स्पष्टं तंदेहांतंकश्चिदेवभावितात्मायोगशोधितमतिरन्वास्तेऽमुंशास्त्राचार्योपदेशमनुप्राप्यास्ते। निराश्रयं स्वप्र
तिष्ठमप्रतिष्ठंपरकाष्टारूपत्वात्‌ २६ युक्तमिति धारणयाधारणाविषयेणामूर्तब्रह्मणाऽकृष्णादिनायुक्तंतादात्म्यसंबंधेनसेव्यसेवकभावेनवा

यथागमंचमत्वावैवुध्यातत्रैववुध्यते देहांतंकश्चिदन्वास्तेभावितात्मानिराश्रयं २६
युक्तंधारणयासम्यक्सततंकेचिदुपासते अभ्यसंतिपरंदेवंविद्युत्संशब्दिताक्षरं २७

युक्तंनिवद्धंआत्मानंकश्चिदुपास्योसततइतिकर्मणिषष्टी अविद्याशवलंकेचिदुपासते अपरेपरंशवलादुत्कृष्टंनिर्गुणंब्रह्मअभ्यसंतिपुनः
पुनरनुभवविषयतामापादयंति। विद्युत्संशब्दितंसकृद्विभातोह्येषब्रह्मलोकइतिश्रुतेर्विद्युद्वत्सकृद्विभातत्वेनविद्युत्संशब्दितंकेनेषितमित्यु
पनिषत्प्रसिद्धमिदंविशेषणं अक्षरंअपरिणामि। ननुदेहांतपदेनैवेतदुक्तं सत्यंतत्रज्ञेयत्वेनोक्तंइहतुउपास्यत्वेनोच्यते कः पुनरेतावताभे
दः श्रणु आद्येश्रवणादिभिरण्यासस्त्वानात्मनिरसनेनात्मतत्वावाप्तिः सर्वपवाधेनैवरज्जुवद्गतिः द्वितीयेतुमूलप्रमाणाभावेपितद्यथा
रोपंचरत्नानीतिवदतः वाक्यंकदाचिन्मवाधेतेनदरत्वब्रह्मासीतिगुरुवाक्येविश्वासमात्रात्प्रवृत्तआत्मनोब्रह्मभावंचिंतयनततमनुभवतिसे

अंतेतित्तपसाविमुक्तोपासनेन अंतकालेउपासंतेब्रह्मप्राप्नुवंतिअसगतावितृष्णस्वरूपाः एतेपंचपदापोगंपरमांनिर्विशेषांगतिंक्रमेणसद्योवागच्छंति २८ सूक्ष्ममिति
विशेषणंव्यावर्त्तकमुपाधिभूतंतेषांसोपाधिकब्रह्मणांअवेक्षेतहेलननयाहेयत्वेनपश्येत यथोक्तंकल्पतरौनिर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः येमंदास्तेऽनुकं
पंतेसविशेषनिरूपणैःमनः स्पृष्टरीकृत्यतेननेषांसगुणब्रह्मचिंतनात् तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनमितिदेहांतंअव्यक्तलयाधिष्ठानंदेहंत्वितिपाठेअ

अंतकालेह्युपासंतेतपसादग्धकिल्बिषाः सर्वएतेमहात्मानोगच्छंतिपरमांगतिं २८ सूक्ष्मंविशेषणंतेषामवेक्षे
शास्त्रचक्षुषा देहंतुपरमंविद्याद्विमुक्तमपरिग्रहं २९ अंतरिक्षादन्यतरंधारणासक्तमानसं मर्त्यलोकाद्विमु
च्यंतेविद्यासंसक्तचेतसः ३० ब्रह्मभूताविरजसस्ततोयांतिपरांगतिं एवमेकायनंधर्ममाहुर्वेदविदोजनाः ३१ ॥

व्यक्तमेवपरमंचर्मविशेषणंनततःपरमन्यद्ध्येयमस्तीत्यर्थः विमुक्तमपरिग्रहमित्यादिपादेनश्लोकएकंवाक्यंवितृकंस्थूलदेहाध्यासहीनंअपरिग्रहंसन्या
सिनं २९ धारणासक्तमानसंयोगिनंअंतरिक्षात् । अंतरिक्षंहार्दाकाशस्तमारभ्यअन्यतरंईशंसूत्रात्मानंवाविद्यादित्यर्थः मर्त्येति यत्किंचित् श्रोतोपास्ति
युक्तःमर्त्यदेहाद्विमुच्यंतेततः । अर्चिरादिक्रमेणपरांगतिंयांति ३० एकायनंएकंब्रह्मैवायनंप्राप्तिस्थानंयस्मिन् ३१ ॥ ॥ ॥

कषायेतिरागादिहीनमचलं येषांशास्त्रीयं परोक्षमपिज्ञानमुत्पद्यतेतेपियथावल्लंयथावैराग्यंमुच्यते ३२ भगवंतंसर्वैश्वर्यवंतं ३३ आत्मस्थंकोशपंचकांतर्गतं
३४ संक्षेपेराशेयंहेयंचाहमेतावदिति। अस्मिन्नवास्तिचेत्यनेनरज्जूरगादिवज्जगतभ्रांताभ्रांतयोर [illegible] स्तिनास्तित्वेनानिर्वचनीयमित्युक्तंजगन्मिथ्यात्वं

यथाज्ञानमुपासंतः सर्वेयांतिपरांगतिं कषायवर्जितंज्ञानंयेषामुत्पद्यतेचलं यांतितेपिपरान्लोकान्वित्युच्यंतेयथावलं
३२ भगवंतमजंदिव्यंविष्णुमव्यक्तसंज्ञितं भावेनयांतिशुद्धायेज्ञानतृप्तानिराशिषः ३३ ज्ञात्वात्मस्थंहरिंचैवननिव
र्तंतितेव्ययाः प्राप्यतत्परमंस्थानंमोदंतेक्षरमव्ययं ३४ एतावदेतद्धिज्ञानमेतदस्तिचनास्तिच तस्मावद्ईजगत्सर्वंचक्रव
त्परिवर्त्तते ३५ विसतंतुर्यथैवायमंतस्थःसर्वतोविसे तस्मात्तंतुरनाद्यंतस्तथादेहगतःसदा ३६ सूच्यासत्त्रंयथावस्त्रे
संसारयतिवायकः तद्वत्संसारसत्रंहितत्मासूच्यानिवध्यते ३७ विकारंप्रकृतिंचैवपुरुषंचसनातनं योयथावद्विजाना
तिसवितृस्नोविमुच्यते ३८ प्रकाशंभगवानेतदृषिर्नारायणोऽमृतं भूतानामनुकंपार्थंजगादजगतोगतिः ३९ शांतेमोक्ष
धर्मेषुवार्ष्णेयाध्यात्मे ८ ॥

ज्ञेयंतस्माचतमाज्ञेयमर्थः ३५ विसंमन्यगालं ३७ तस्मात्यागोपायमाहविकारमितिकार्यंकारणंशुद्धंचज्ञानन्वितस्नोमुत्वाविमुच्यते ३८ प्रकाशंस्पष्टंअमृतंमो
क्षसाधनं ३९ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्द्धरवंशावतंसगोविंदसूरिसूनुनीलकंठकृतेभारतभावदीपेशांतेमोक्षधर्मेषुवार्ष्णेयाध्यात्मार्थप्रकाश
स्त्रिचत्वारिंशोध्यायः ॥ ॥

सर्वसंक्षेपेणपुंप्रकृत्योर्वैधर्म्यमुक्तं। तद्विवरणाय पंचशिखवाक्यमध्यायद्वयेनारभते। तत्र तस्मात्त्यागो मुख्यं मुक्तिसाधनं स च राज्ञो दुःशक इति मन्वानः मिथि
लायां प्रदीप्तायां न मे किंचन दह्यतीति पूर्वोक्तं स्वमतविरुद्धं जनकवचनं स्मरन्तद्धेतुं पृच्छति केनेति १ महत्सुखं मोक्षं २ जनको जनकवंश्यः नाम्ना जनदेवः

युधिष्ठिर उवाच केन वृत्तेन वृत्तज्ञ जनको मिथिलाधिपः जगाम मोक्षं मोक्षज्ञो भोगानुत्सृज्य मानुषान् १
भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं येन वृत्तेन वृत्तज्ञः स जगाम सुमहत्सुखं २ जनको ज
नदेवस्तु मिथिलायां जनाधिपः और्ध्वदेहिकधर्माणामासीद्युक्तो विचिंतने ३ तस्य स्म शतमाचार्या वसं
ति सततं गृहे दर्शयंतः पृथग्धर्मान्नानाश्रमनिवासिनः ४ ॥ ॥ ॥ ॥ ॥

ऊर्ध्वदेहाद्दीनस्थूलदेहमशरीरं ब्रह्म तत्प्राप्तिकराणां और्ध्वदेहिकानां विचिंतने युक्तो अवहित आसीत् ३ धर्मान् उपासनामार्गान् पाठांतरे। पा
षंडाः लोकायतादयः तेषां वादिनः प्रतिभटत्वेन जेतारः पाखंडवासिन इति पाठे पाखंडान् वासयंति आच्छादयंति तिरस्कुर्वंतीति ते तथा ४ ॥

तत्रकेचित्पाखंडादेहनाशादात्मनाशमिच्छंति अन्येपुनर्देहस्यैवनाशंनेच्छंति तत्राद्येजगद्वैचित्र्यानुपपत्तिमंतेप्रत्यक्षविरोधंचोत्प्राव्पतांतेषांप्रेत्यभावे
अस्माद्देहादुत्क्रम्यभावेसत्त्वापांप्रेत्यजातौजन्मांतरलाभेचविषयेविनिश्चयेसभूयिष्ठंनतुष्यतिपतः आगमस्थः तत्रतार्किकाणांविभूतानामात्मनांपू
र्वदेहेंद्रियवियोगोमरणं अपूर्वदेहेंद्रियसंबंधोजन्मेतिविनिश्चयः सांख्यानांतुआत्मनांकरणानांचविभूतानामेवसतांअरणापानस्येनारेवतत्रवृत्तिला
भोजन्मवृत्तिविलयोमृत्युरितिविनिश्चयः तथाकर्त्ताभोक्ताविभुरात्मेतिपूर्वेषामात्मतत्वंपरेषांतुभोक्तैवनकर्त्तेतितत्रापारवंदृत्वाकिंचिन्नतुष्यन्त

सतेषांप्रेत्यभावेचप्रेत्यजातौविनिश्चये आगमस्थःसभूयिष्ठमात्मतत्वेनतुष्यति ५ तत्रपंचशिखोनामकापिलेयोमहा
मुनिः परिधावन्महींकृत्स्नांजगाममिथिलामपि ६ सर्वसन्यासधर्माणांतत्वज्ञानविनिश्चये सुपर्यवसितार्थश्चनिर्द्वंद्वोन
ष्टसंशयः ७ ऋषीणामाहुरेकंयंकामादवसितंनृषु शाश्वतंसुखमत्यंतमन्विच्छंतंसुदुर्लभं ८ यमाहुःकपिलंसांख्याः
परमर्षिंप्रजापतिं समन्येतेनरूपेणविस्मापयतिहिस्वयं ९

पिभूयिष्ठंनतुष्यति आगमविरोधात् आगमोहिस्वप्नवत्पूर्वदेहनाशोत्तरदेहप्राप्तीवदति आत्मानंचाकर्त्तारमभोक्तारमेकंचनतेषामितिपाठे आत्मतत्वेनेतितृतीया ५
कापिलेयःकपिलायाःपुत्रः परिधावन्एकत्रवासमकुर्वन् ६ सुपर्यवसितार्थःसम्यङ्निश्चितप्रयोजनः ७ कामैरनावृतंकामादवसितमितिपाठेयदृच्छयाप्यस्यतानृषुसुखंअन्वि
च्छंतंस्थापयितुमितिशेषः ८ सःकपिलःतेनपंचशिखसंज्ञेनतत्प्रशिष्यत्वात्तत्तुल्यतं ९

पंचस्रोतसि विषयकेदारप्रणालिकाः पंच यस्य तस्मिन्मनसि मानसं सत्रमित्यर्थः १० यत्र यत्समीपे कापिलं कापिलमतानुसारि मंडलं मुनिसमूहं प्रति परमार्थं प्य
न्यवेदयदित्युत्तरेणास्य संबंधः पंचस्रोतसि मनसि निष्णातः ऊहापोहकौशलवान् पंचरात्रो नाम विष्णुत्वप्रापकः क्रतुः पुरुषो ह वै नारायणोऽकामयतातिष्ठेयं स
र्वाणि भूतान्यहमेवेदं सर्वं स्यामिति स एतं पंचरात्रं पुरुषमेधं यज्ञक्रतुमपश्यदिति शतपथोक्तः तत्र विशारदः अनुष्ठिताखिलकर्मेत्यर्थः ११ पंचज्ञः अन्नम
यप्राणमयमनोमयविज्ञानमयानंदमयान् कोशान् मिथ्यात्मनश्च विविक्तान् जानातीति पंचज्ञः अत एव पंचकृत् पंच तद्विषयाण्युपासनानि अस्य मुखं वाक् शिरः
इत्यस्यामुपनिषदि स तपस्तप्त्वान्नं ब्रह्मेति व्यजानादित्यादिविहितानि करोतीति स पंचकृत् पंचगुणः शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं प

140

आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनं पंचस्रोतसि यः सत्रमास्ते वर्षसहस्रिकं १० यत्रचासीनमागम्य कापिलं मंड
लं महत् पंचस्रोतसि निष्णातः पंचरात्रविशारदः ११ पंचज्ञः पंचकृत् पंचगुणः पंचशिखः स्मृतः पुरुषावस्थमव्यक्तं पर
मार्थं न्यवेदयत् १२ ॥

श्यतीत्युक्ताः शांत्यादयो गुणा यस्मिन् स पंचगुणः ततश्च ब्रह्मविद्भवतीत्युक्तेः पंचभ्योऽतिरिच्यमानत्वात् पंचशिखेवेति पंचशिखः पुच्छं ब्रह्म
तस्य ज्ञातत्वात् मुनिरपि पंचशिखः ननु पंचकृत् कथं षड्जः स्यादिति चेत् श्रूयतां यथाऽन्नमयविकारमुपासीनः स्वात्मकृतिमन्नं विराडाख्यं एति । एवं मायया विकृतमा
नंदं आनंदमयाख्यमुपास्य अविकृतमानंदं तत्र अकृतमेतीति न षष्ठ्युपास्तिः पृथग्वक्तव्यास्ति पंचानां यतस्य पंचम्योपास्तिफलत्वात् आनंदेन दार्ढ्य पुरुषेति पुरुषा
अन्नमयादयः पंच अवस्थत्वा बाधिततया तिष्ठंतीत्यस्मिन्निति पुरुषावस्थं अत एव शिरआद्यवयवरहितत्वादव्यक्तं अबाध्यत्वाच्च परमार्थं न्यबोधयत् १२

तस्यापिगुरुर्मोहेत्यादिना। द्रष्टसत्रेणात्रात्मयज्ञेनेहेतौ तत्जीपाऽध्यापनेनवसतीतिवृत्तसम्यक्पृष्टंप्रश्नोपसस संपृष्टः आत्मज्ञानार्थंकृतप्रश्नइत्यर्थः
व्यक्तिंबाध्यत्वाबाध्यत्वेनस्पष्टतांदेवदर्शनः दिव्यदृष्टिरित्यर्थः १२ सांख्यसंमतगुणपुरुषांतरज्ञानात्केवलंप्रधानंचोपादानमितिपक्षंनिरस्यतियत्तदिति।

इष्टसत्रेणसंपृष्टोभूयश्चतपसासुरिः क्षेत्रक्षेत्रज्ञयोर्व्यक्तिंबुबुधेदेवदर्शनः १२ यत्तदेकाक्षरंब्रह्म
नानारूपंप्रदृश्यते आसुरिर्मंडलेतस्मिन्प्रतिपेदेतदव्ययं १३ तस्यपंचशिखःशिष्योमानुष्यापयसाभृतः
ब्राह्मणीकपिलानामकाचिदासीत्कुटुंबिनी १४ तस्याःपुत्रत्वमागम्यस्त्रियाःसपिबतिस्तनौ ततःसका
पिलेयत्वंलेभेबुद्धिंचनैष्ठिकीं १५ एतन्मेभगवानाहकापिलेयस्यसंभवं तस्यतत्कापिलेयत्वंसर्ववित्त्वम
नुत्तमं १६ सामान्यंजनकंज्ञात्वाधर्मज्ञोज्ञानमुत्तमं उपेत्यशतमाचार्यान्मोहयामासहेतुभिः १७ जन
कस्त्वभिसंरक्तःकापिलेयानुदर्शनात् उत्सृज्यशतमाचार्यान्पृष्ठतोनुजगामतं १८ तस्मैपरमकल्पा
यप्रणतायचधर्मतः अब्रवीत्परमंमोक्षंयत्तत्सांख्यंविधीयते १९ ॥ ॥ ॥ ॥

अक्षरमेवजगदुपादानंतयानानारूपंनतुक्षरंप्रधानं अव्ययंब्रह्मैवप्रतिपेदेज्ञातवान्नतुगुणपुरुषांतरं १५ भगवान्मार्कंडेयःसनत्कुमारोवा १६
सामान्यंसर्वेष्वाचार्येषुसमबुद्धिं १७ अभिसंरक्तोभक्तः १८ कल्पायसमर्थायसांख्येउपनिषत्कांडेभिधीयतेअपूर्वतयाज्ञाप्यतेनतुयुक्त्याऽनूद्यते १९ ॥
२१

जातिर्जन्म कर्म यागादि सर्वं ब्रह्मलोकान्तं तेषु निर्वेदो दुःखरूपत्वाद्दोषयुक्तत्वात्क्षयिष्णुत्वाच्च २० तं मोहमब्रवीदिति पूर्वेणान्वयः तं कं यस्य मोहस्यार्थे
कर्म तत्फलं च कांक्षते अनाश्वासिकं अविश्वसनीयं भुक्तिरेव तावत्सद्विषवत्प्रदर्शिकत्वात् विनाशि चलं ध्वंसि अनियतकालं च अध्रुवं सत्त्वासत्त्वेन वा न
निश्चितं २१ तमिमं मतं तस्मिंस्तद्बुद्धिलक्षणो मोहं विवरीतुं लोकायतानां मतमुपन्यस्यति दृश्यमाने इत्यादिना ते हि पार्थिवाप्यतैजसवायवीयाः परमाणवः
खरस्नेहोष्णेरणस्वभावाः स्वयमेव देहाद्याकारेण संहन्यमानानां मदशक्तिवच्चैतन्यं जनयन्तीति देहे एव न तु घटादौ स्वभावादिति सन्तमात्मानं नास्तीत्याहुः

जातिनिर्वेदमुक्त्वा स कर्मनिर्वेदमब्रवीत् कर्मनिर्वेदमुक्त्वा च सर्वनिर्वेदमब्रवीत् २० यदर्थं धर्मसंसर्गः कर्मणां
च फलोदयः तमनाश्वासिकं मोहं विनाशि चलमध्रुवं २१ दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके आगमा
त्परमस्तीति ब्रुवन्नपि पराजितः २२ अनात्मा ह्यात्मनो मृत्युः क्लेशो मृत्युर्जरामयः आत्मानं मन्यते मोहात्तदस
म्यक् परं मतं २३

असन्तं च देहं सन्तमाहुस्तदेतदाह विनाशे देहरूपात्मध्वंसे प्रत्यक्षे सति देहात्परं आत्मतत्त्वं आगमप्रमाणादपि अस्तीति ब्रुवन् लोकविरुद्धागमप्रामाण्यवा
दी पराजित एव तार्किकः २२ ननु देहस्यैवात्मत्वे स्वर्गकामो यजेतेत्यादेः परलोकफलस्यादनादुपरुध्येरन्नित्याशंक्याह अनात्मेति द्वाभ्यां आत्मनो मृत्युः अना
त्मा स्वरूपाभाव एव क्लेशो दुःखं जरा व्याधिः आमयो रोगश्च आत्मनो मृत्युरेव अंशेन स्वरूपनाशः गृहस्येव दुर्बलो दुर्बलमङ्गं पूर्वं पूर्वतरं नश्यतीति सोंशे
न गृहनाशः एवं इन्द्रियादिनाशेनाप्यंशत आत्मैव नश्यतीत्यर्थः एवं सति य आत्मानं मोहात् परं देहादन्यं मन्यते तत्तन्मतं असम्यक् २३ ॥ ॥

स्वर्गकामचोदनात्तु पयारासोऽग्निरत्वामरत्वाद्याशीरुपचारः एवं दृष्टसुखे एव स्वर्गोपचारः तस्माद्धूमस्याग्नेर्दिवाद्दर्शनार्थिः तस्मादेदिवैवाग्नेर्नक्तं ददृशे न धूम इत्या
दिवत्प्रत्यक्षविरुद्धाश्रुतिर्न स्वार्थे प्रमाणमित्याहोपि तत्तथाहि अग्निहोत्रादेवैयर्थ्यमुदाहरंति अग्निहोत्रं त्रयो वेदास्त्रिदंडं भस्मगुंठनं बुद्धिपौरुषहीनानां जीवि
केति बृहस्पतिरिति २४ एवं प्रत्यक्षविरोधात् श्रुतिप्रामाण्यं दूषयित्वा व्याप्तिग्रहादनुमानस्यापि तद्दूषयति अस्ति नास्तीति यथा चंद्रतारके गतस्य भावो वास्ति नास्ती

अथ चेदेवमप्यस्ति यल्लोकेनोपपद्यते अज्ञेयमस्त्यमुश्चराजासौ मन्यते यथा २४ अस्ति नास्तीति चाप्येतन्नास्मि
न्नसति लक्षणे किमधिष्ठाय तद्ब्रूयाल्लोकयात्राविनिश्चयं २५ प्रत्यक्षं ह्येतयोर्मूलं कृतांतैतिह्ययोरपि प्रत्यक्षेणा
गमो भिन्नः कृतांतो वा न किंचन २६ यत्र यत्रानुमानेऽस्मिन् कृतं भावयतेऽपि च नान्यो जीवः शरीरस्य नास्तिकानां
मते स्थितः २७

ति संशयेऽस्ति गगनस्यानुपलब्धेरिति प्राप्ते नास्ति देशांतरप्राप्तेरित्यनुमानेन गत्यादिसाधनं तदपि असति लक्षणे ज्ञापके हेतौ शत्रुशः सहचरितयोरपि व्यभिचारद
र्शनादसति किं लिंगमधिष्ठाय अलं व्यलोकयात्राव्यवहारादिव्यवहारविनिश्चयं ब्रूयान्न किमपीत्यर्थः २५ कृतांतैतिह्ययोः अनुमानागमयोः भिन्नः बाधि
तः न किंचन प्रमाणमित्यर्थः २६ फलितमाह यत्रेति यत्र कुत्राप्यनुमाने ईशादृष्टनित्यात्मान्यतमसाधके साध्यसिद्धं भावयतः कृतं अलं भावनयालमित्य
र्थः उक्तविधयाऽनुमानस्याप्रमाणत्वात् शरीरस्य शरीरात् २७ ॥

अनुमानस्यप्रामाण्यापगमेतु तत एव देहादन्यात्मसिद्धिरित्याहुरेतइति यथा समानेपि भूतचतुष्टयसंयोगे वटकणिकायां वटपत्रपुष्पफलमूलत्वगादिरू
परस्मादयोंतर्हिताः एवंतत्तत्रेतसि समानेप्युपष्टंभकभागेमनोबुद्ध्यहंकारचित्तशरीराकारगुणादयोंतर्हिताः संतश्चाविर्भवंति यथावा एकस्मादेव
धेनूपभुक्तात्तृणादेकात्पयःसर्पिषीदृष्टेपृथक्त्वभावे यथावा वहुद्रव्यकल्कादित्रिरात्रमधिवासितान्मदशक्तिरुनघततर एवंरेतसउपलभ्योपल
ब्धेशौवाभूतसंयोगाद्वाचैतन्यंजन्यते जातिर्जन्मात्स्मादेः यथावाकाष्ठद्वयसंश्लेषात्तत्प्रकाशकोग्निर्जायते एवंभूतयोगादपितत्प्रकाशकंचैतन्यमुत्पद्य

रेतोवटकणीकायांघृतपाकाधिवासनं जातिस्मृतिरय
स्कांतःसूर्यकांतोंबुभक्षणं १९

तेइति जाड्यद्वयादजडोत्पत्तौदृष्टांतांतरंपराभिमतंस्मृतिरितियथातर्कमतेजडयोरप्यात्ममनसोर्योगादजडंस्मृत्यादिरूपंज्ञानंजायते तद्वदन्या
पिभविष्यति एवमुत्पन्नेचैतन्येअयस्कांतमणिर्लोहमिवइंद्रियसंघातंचालयिष्यति कार्यवैचित्र्यमणिपार्थिवांशगतजातिभेदादेवभविष्यति सू
र्यकांतयोगादेवसूर्यरश्मयोग्निंसुवतेनपृथ्व्यंतरयोगात्तद्वत् एवंभोक्तृत्वेवह्नेर्जलशोषकत्ववत्संघातस्यैवयुज्यतेइतियुक्तंशरीरादन्योजीवोना
स्तीति १९

एतद्रूपयतिप्रेत्येति प्रेत्य मृते देहे चैतन्यात्ययो देहातिरिक्तात्मास्तित्वे प्रमाणमित्यध्याहृत्य योज्यं यदि देह एव चेतनः स्यात्तर्हि मृतेपि देहे चैतन्यमुप
लभ्येत ततो न देहधर्मश्चैतन्यमित्यर्थः प्रेत्य भूतात्यय इति पाठे मृत्वा भूतनाशः यस्मिन्सति देहो न नश्यति असति च नश्यति स देहादन्य इत्यर्थः तथा शी
तद्वारनिवृत्त्यर्थमंत्रप्रतिपाद्यदेवतालोकाप्राप्तिकेन प्राप्यते सा चेन्मूर्तमपी स्यात्तर्हि घटादिवद्दृश्येत सूक्ष्मशरीरस्य लोकांतरसंचारक्षमस्या
स्वीकारात् आदिपदात् भूतावेशोपि ग्राह्यः यस्मिन्शरीरे भूतांतरमाविशति तदा तद्देहपीडया मुख्यो देहपतिर्न बाध्यते किंतु आविष्ट एव तदा

प्रेत्यभूतात्ययश्चैवं देवताद्युपपाद्यतं मृते कर्मनिवृत्तिश्च प्रमाणानीति निश्चयः २९
नैवैते हेतवः संति ये केचिन्मूर्तिसंस्थिताः अमूर्तस्य हि मूर्तेन सामान्येनोपलभ्यते ३०

नीतस्यैव देहाभिमानात् तदपगमे तु मुख्य एव बाध्यते ऽतो न देह आत्मा दृष्टविरोधादित्यर्थः मृते कर्मनिवृत्तिः कृतनाशः चात् उत्पत्तौ अकृताभ्या
गमश्च दोष इत्यर्थः २९ एवं स्वमते साधकान्युक्त्वा परोक्तान्हेतूनाभासयति नैवैत इति मूर्तिसंस्थिताः जडमेवाग्न्यादिकमिति सर्वे पूर्वोक्ता हे
तवः जडात् जडसिद्धावेव पर्यवस्यंति न त्वजडसिद्धौ हि यस्मात् मूर्ताद् मूर्तस्य ज्ञानस्योत्पत्तौ पृथिव्यादिचतुष्टयादाकाशोप्युत्पद्येतेत्यर्थः सामा
न्यं सादृश्यं कार्यकारणयोः न सहावगतं मृद्घटादौ न तु मूर्तामूर्तयोरत्यंतविलक्षणयोस्तदुपपद्यते यदपि तर्कमते जडयोरात्ममनसोर्योगा
द् जडं ज्ञानमुत्पद्यते तदपि दृश्यादृष्टजन्मासंभवात् समाख्येयमेव ३०

एवंलोकायतमतंनिरस्यसौगतमतंनिरसितुमुपन्यस्यति अविद्येत्यादिभिस्त्रिभिः तेहिलोकायताभिमतात्संघाताद्बाह्यादन्यं आध्यात्मिकंसंघातंरूपविज्ञा
नवेदनासंज्ञासंस्काराख्यपंचस्कंधात्मकं ऐहिकामुष्मिकव्यवहारास्पदं अभ्युपगच्छंति। अतोनतेषांप्रेतीभूतानामपादृपोदोषाः संति। पृथ्व्येतेषामपीतरवात
स्थिरोभोक्ताप्रशासितावाचेतनः संहतानास्तितथापि अविद्या १ संस्कारा २ विज्ञानं ३ नाम ४ रूपं ५ षडायतनं ६ स्पर्शो ७ वेदना ८ तृष्णा ९ उपादानं १० भ
वो ११ जातिः १२ जरामरणं १४ शोकः १५ परिदेवना १६ दुःखं १७ दुर्मनस्ता १८ इत्यष्टादशकचित्संक्षेपेणाकचिद्विस्तरेणचोक्ताः सर्वेषांसौगतानामप्रत्या

अविद्याकर्मतृष्णानांकेचिदाहुःपुनर्भवे कारणंलोभमोहौतु दोषाणांचनिषेवणं ३१
अविद्यांक्षेत्रमाहुर्हिकर्मबीजंतथाकृतं तृष्णासंजननंस्नेहमेषतेषांपुनर्भवः ३२

ख्यपाः पूर्वपूर्वउत्तरेषांनिमित्तभूताः घटीयंत्रवद्वावर्त्तमानाः संघातस्वाश्रयत्वपाऽक्षिपंति। षडायतनंशरीरंचेतस्यस्कंधपंचकस्यतदुपादानस्याष्
ष्टस्यविज्ञस्यच आश्रयभूतत्वात्। एवंचसंघातोस्पन्नेलौकिकमात्रापाश्वनिर्वाहेसतिनस्थिरआत्माभ्युपपद्यइतिवदंति तत्राविद्याखशब्दोपात्ताकर्म
चेष्टालोभमोहशब्दैःसंस्कारोपादानतृष्णादुर्मनस्ताः इतरेदोषपदेनसंगृहीताः। केचित्सौगताअविद्यादिकंपुनर्भवेदेहांतरप्राप्तौकारणमाहुरि
तियोजना ३१ एतदेवसदृष्टांतंविवेचति अविद्याक्षेत्रमपूर्वकृतंकर्मबीजंतृष्णास्नेहाश्रयजलरूपांएवंप्रकारस्तेषामविद्यादीनांपुनर्भवःपुनःपुन
रुत्पत्तिप्रकारः ३२ ३२

तस्मिन्न् अविद्यादिकलापे गूढे सुप्तिप्रलययोः संस्कारात्मनास्थिते तेन निमित्तभूते सति एकस्मिन्मरणधर्मिणि देहे भिन्ने विनष्टेपि अन्योस्मात्तत एवाद्यादे
देहोन्यः जायते।तस्मिन् ज्ञानेन दग्धे च सति देहनाशात् सत्वसंक्षयं मोक्षमाहुः सत्वस्य धीधातोः संक्षयः सम्यगपवर्गं तिविषयप्रवाहितत्वं कैवल्यमित्याहुः
३३ एतद्दूषयति यदेति।स्वरूपतोन्यत्वं तु क्षणिकानां विज्ञानादीनां यदा च जातीतः आलयविज्ञानं वाह्यविज्ञानमिति तेषामन्यत्वं यदा च शुभतः

तस्मिन्नाढे च दग्धे च भिन्ने मरणधर्मिणि अन्योस्माज्जायते देहस्तमाहुः सत्वसंक्षयं ३३ यदा सरूपतश्चा
न्योजातितः शुभतोर्थतः कथमस्मिन्स इत्येव संबंधः स्यादसंहितं ३४ एवं सति च का प्रीतिर्दानविद्यातपोब
लैः यदन्याचरितं कर्म सर्वमन्यः प्रपद्यते ३५ अपि ह्यपमिहैवान्यैः प्राकृतैर्दुःखितो भवेत् सुखितो दुः
खितो वापि दृश्यादृश्यविनिर्णयः ३६

शुभात् अशुभतः पुण्यपापतः अर्थतः बंधमोक्षतः विज्ञानानां पृथक्पृथक्त्वं तदा वा स्यैकपंसोयमिति भेदप्रत्यभिज्ञानं प्राकृदृष्टस्य घटस्ये
व वार्तमानिकादन्यत्वात्।एवं असंहितं अनभिसंहितं भोगमोक्षादिकं वा स्यात् अन्यो मुमुक्षुरन्यः साधनाविष्टोऽन्यो मुक्त इत्यापत्तेः
३४ एवं च सति दानाद्यपनर्थकं फलभोगकाले दातुरभावादित्याह एवमिति।अन्येन विज्ञानेनाचरितं अन्यत् विज्ञानांतरं प्रतिप्रवर्त्तते फ
लं दातुं गच्छति ३५ इष्टापत्तिमाशंक्याहापीति।अनंतत्वाविशेषाच्चैत्रपुरोपरि मैत्रः सुखी भवेदित्यर्थः दृश्यः स्पष्टः ३६

गा१

तथाहीति चैत्रज्ञानात् मैत्रज्ञानं पृथक् किं विसदृशं येन तैर्वै ज्ञातेन एतत्पूर्वश्लोकोक्तं दूषणं नोपपद्यतेऽतः चैत्रज्ञानधारैव सजातीया विवक्षितेति चेत्तर्हि उत्पद्य
मानस्य सदृशज्ञानस्य किं उपादानं न तावत् पूर्वज्ञानं तस्य क्षणिकत्वेन उत्तरोत्पादे व्यापारायोगात् तत्राशश्वत् मुसलैर्हताच्छरीरादपि अन्यत् शरीरं पुन
र्भवेत् ३७ किंच कृतत्वादिवज्ज्ञातेऽपि मोक्षे पुनः पुनरागत्य निवर्तेत ज्ञानधाराया आनंत्यादित्याह ऋत्विति तिष्यः कलिः शिति पुंनामसुपलक्षणं बहुदोषस्य
सत्वात् क्षणिकविज्ञानवादोऽनुपपन्न इत्यर्थः ३८ अस्तु तर्हि विज्ञानानामाश्रयः स्थिरः कश्चिदात्मेति तर्कमतमाशंक्याह जरयेति उपपन्नप्रपन्नधर्मोवि

तथाहि मुसलैर्हन्तुः शरीरं तत्पुनर्भवेत् पृथग्ज्ञानं पदस्यत्वपैनैतन्नोपलभ्यते ३७ ऋतुसंवत्सरौ तिष्यः शीतोष्णे
यप्रियाप्रिये यथातीतानि पश्यन्ति तादृशः सत्वसंक्षयः ३८ जरयाभिपरीतस्य मृत्युना च विनाशिना दुर्बलं दुर्बलं पू
र्वं गृह्णस्येव विनश्यति ३९ इंद्रियाणि मनो वायुः शोणितं मांसमस्थि च आनुपूर्व्या विनश्यंति स्वं धातुमुपयांति
च ४० लोकयात्राविघातश्च दानधर्मफलागमे तदर्थं वेदशब्दाश्च व्यवहाराश्च लौकिकाः ४१ ॥॥

करोतीति हि धर्मिणामिति न्यायेन नातिरिक्त धर्माश्रयस्य धर्मिणो क्कचन पक्षयादिना नाश इत्यर्थः ३९ अनित्यधर्माश्रयोऽप्याकाशादिवन्न नश्यतीत्याशंक्याह इंद्रिया
दिवन्नश्यत्येवेत्याह इंद्रियाणीति मनसो नाशः सांख्यसंमतः प्रोक्तः ४० अस्तु तर्हि बुद्ध्यादिगुणानामनाश्रयः शुद्धस्तर्हि अकर्तुर्भोक्तुश्शश्वतस्य दानादिफ
लाप्राप्तेर्दानादिवैयर्थ्यं तस्य सर्वस्यापि आत्मसुखार्थस्य लोकवेदव्यवहारस्योच्छेद इत्यर्थः ४१ ॥ ॥ ॥ ॥

इत्तीतिामनः प्रभवेष्वनेकेषुतर्केषुपन्नाः ऽन्यतरोपिनिर्धारयितुंनशक्यतइतिभावः ४२ विमृशतांविचारयतां ४३ निरामयकंमानमाहरएवमिति ४४
वेदोदितज्ञानेग्रेविवक्षितेमोतुरधिकारसंपपन्निविधत्ते। अर्थानीत्यादिना ४६ रतिःशरीरे ४७ अनुपधिश्छमविप्रलंभादिरहितंवेदमूलकत्वात्।

इतिसमङ्मनस्येतेवहवः संतिहेतवः एतदस्तीदमस्तीतिनकिंचित्प्रतिदृश्यते ४२ तेषांविमृशतामेवतत्तत्स
मभिधावतां क्वचिन्निविशतेबुद्धिस्तत्रजीर्यतिवृक्षवत् ४३ एवमर्थैरनर्थैश्चदुःखिताः सर्वजंतवः आगमैरप
कृष्यंतेहस्तिपैर्हस्तिनोयथा ४४ अर्थांस्तथात्यंतसुखावहांश्चलिप्संतएतेवहवोविमुक्ताः महत्तरंदुःखम
नुप्रपन्नाहित्वामिषंमृत्युवशंप्रयांति ४५ विनाशिनोह्यध्रुवजीवितस्यकिंबंधुभिर्मित्रपरिग्रहैश्च विहा
ययोगच्छतिसर्वमेवक्षणेनगत्वाननिवर्ततेच ४६ भूव्योमतोयानलवायवोपिसदाशरीरंप्रतिपालयंति इ
तीदमालक्ष्यरतिःकुतोभवेद्विनाशिनोह्यस्यनशर्मविद्यते ४७ इदमनुपधिवाक्यमच्छलंपरमनिरामयमा
त्मसाक्षिकं नरपतिरभिवीक्ष्यविस्मितः पुनरनुयोक्तुमिदंप्रचक्रमे ४८ शांतौमोक्षधर्मेषुपंचशिखवा
क्ये ॥ ॥

अच्छलंवैदिकमपिकर्मकांडवन्नमायामूलंवा। अनुयोक्तुंपूर्वपक्षंकर्तुं ४८ पंचशिखवाक्योपाखंडखंडनंचतुश्चत्वारिंशः ॥ ॥ ॥ ॥ ॥

मो॰
१४५

ज्ञपितः निशामितः निशामनेमित्यात्तत्त्वं एतदस्तीदमस्तीति न किंचिन्नास्ति दृश्यत इममनेकमतोपन्यासपूर्वकं जगतोऽनिर्वचनीयत्वं श्रावितः सांपरायेण
रणो भवाभवौ संसारमोक्षौ १ ननु यदि सत्त्वासत्त्वाभ्यामनिर्वचनीयः संसारस्तर्हि रज्जुरगवन्मिथ्यात्वस्य तस्य विनाशाय यत्नो निष्फलः नित्यनष्टत्वात्तस्येति शंक
ते भगवन्निति प्रेत्य प्रमादत्वादेरुदकत्वसंज्ञाविशेषविज्ञानं सुप्तिमूर्छावत् अत्यंतविस्मृतिरूपे मोक्षेपि नास्ति चेत् ज्ञानाज्ञानकृतो न कश्चिद्विशेषोस्ति २ तत

145

भीष्मउवाच जनकोजनदेवस्तु ज्ञपितः परमर्षिणा पुनरेवानुपप्रच्छ सांपराये भवाभवौ १ जनकउवाच भगवन्यदि न प्रे
त्य संज्ञा भवति कस्यचित् एवं सति किमज्ञानं ज्ञानं वा किं करिष्यति २ सर्वमुच्छेदनिष्ठं स्यात्पश्य चैतद्द्विजोत्तम अप्रमत्तः
प्रमत्तो वा किं विशेषं करिष्यति ३ असंसर्गो हि भूतेषु संसर्गो वा विनाशिषु कस्मै क्रियेत कल्प्येत निश्चयः कोऽत्र तत्त्वतः
४ भीष्मउवाच तमसा हि प्रतिच्छन्नं विभ्रांतमिव चातुरं पुनः प्रशमयन्वाक्यैः कविः पंचशिखोऽब्रवीत् ५ ॥ ॥

श्च यत्नो नैष्फल्यमित्याशंक्याह सर्वमिति उच्छेदनिष्ठं आत्मनाशपर्यवसायि सर्वं प्रमत्तः प्रमादि ३ असंसर्ग इति यदि मोक्षे भूतेषु दिव्यांगनादिषु संस
र्गो नास्ति सन्नपि संसर्गः स्वर्गवद्विनाशिष्वेव चेत्स्यात् तर्हि अतिशयाभावात् कस्मै फलाय कोऽत्र तत्त्वतो निश्चयः । क्रियेत क्रियमाणो वा कथं कल्प्येत घ
टेत तस्मादविनाशिस्वर्गसुखमेव मोक्षः स च निर्वचनाय एवेत्याशयः ४ कविः क्रांतदर्शी ५

राम॰
१४५

श्री

विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति देहाद्युत्थितस्य उपाधिविशिष्टस्वरूपस्य नाशाद्विशेषविज्ञानाभावे याज्ञवल्क्येनोक्ते मैत्रेय्यात्मोच्छेदबुद्ध्या अत्रैव मा भगवान्मोहमुहदिति तमुपालभ्य न वा अरे मोहं ब्रवीमीत्यादिना पुनर्याज्ञवल्क्येन बोधिता तद्वदिहापि व्याकुले राजानं आश्वासयन्नाह नेहोच्छेद इति उच्छेदनिष्ठा नाशपर्यवसानं न नापि भावनिष्ठा विशेषपर्यवसानमस्ति किंतु अविद्यया आत्मन्यारोपितं बुद्धीन्द्रियादिकं रज्जूरगवत् केवलमपोह्यते तावतैवानर्थनिवृत्तिः स्वरूपानंदस्य च कंठगतविस्मृतचामीकरवत्प्राप्तिरिति कृतकृत्यतास्ति अतस्तदर्थं प्रयत्नो न निष्फल इति भावः तथा च श्रुतिः अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवतीति मात्राः प्रमात्रा अनर्थस्य प्रमातृता प्रमुखं कर्तृत्वभोक्तृत्वमिति तदसं

उच्छेदनिष्ठा नेहास्ति भावनिष्ठा न विद्यते अयं ह्यपि समाहारः शरीरेन्द्रियचेतसां वर्त्ततेऽप्यगतोऽन्यत्र मप्याश्रित्य क
र्मसु ६ धातवः पंचधातो यं खं वायुर्ज्योतिषो धरा तेऽस्वभावेन तिष्ठंति वियुज्यंते स्वभावतः ७ ॥ ॥ ॥ ॥

संसर्गो मोक्ष इति प्रतिपादयति आत्मनि देहाद्यध्यारोपमेवाह अयमित्यादिना समाहारः संघातः अस्मिन्नत्रिकेऽन्यतमनाशेऽपि संघातनाश इत्यन्योन्यमपाश्रित्येत्यस्यार्थः ६ शरीरादीनामनात्मत्वं वक्तुं तत्प्रकृतीराह धातव इति धीयते निलीयते कार्यमेष्विति धातव उपादानानि ज्योतिषो धरेत्यनयोर्मध्ये जलमित्यपि ज्ञेयं पाठांतरं सुगमं स्वभावेनेति सांख्यमताभिप्रायेण तेषां हीश्वरकालयोरभावात् जीवानां चोदासीनत्वात् अदृष्टस्य च कार्यत्वेन कारणप्रवर्त्तकत्वात् स्वभावत एव संगमा
नां प्रवृत्तिरिति मतं ७

मो०
१४६

प्रवृत्तानि भूतानि शरीराकारेण परिणमंते इत्याह। आकाश इति। पानि खानि स आकाशः। पः प्राणः स वायुः। पऊष्मा सोऽग्निः। पल्लोहितादि स्नेहवत्तदापः
पत्कठिनमस्थ्यादि तत्पृथिवी। तत्पर्यैः नैकधेति ज्ञानपुत्रादिभेदेन ८ शरीरे तत्त्वान्युक्त्वा इंद्रियोत्पत्तिमाह। ज्ञानमिति। शरीरे बुद्धिर्जठरः प्राणश्च सर्वक
र्मसंग्राहको गणः कुतः यतोऽत्र इंद्रियाद्युपदर्शकं निःस्तं अर्थाः शब्दादयः स्वभावोऽर्थप्रकाशकत्वं चेतना घटाद्याकारा वृत्तिः मनः संकल्पादिरू
पं एतत् ज्ञानकार्यं। वायुकार्यं तु प्राणापानौ तौ च व्यानादीनामप्युपलक्षणं। विकारोऽशितपातादिपाचनेनेंद्रियादीनामाप्यायनादिर्जठरकार्यं ९

146

आकाशं वायुरूष्मा च स्नेहो यश्चापि पार्थिवः एष पंचसमाहारः शरीरमपि नैकधा ८ ज्ञानमूष्मा
च वायुश्च त्रिविधः कार्यसंग्रहः इंद्रियाणींद्रियार्थाश्च स्वभावश्चेतना मनः प्राणापानौ विकारश्च
धातवश्चात्र निःसृताः ९ श्रवणं स्पर्शनं जिह्वा दृष्टिर्नासा तथैव च इंद्रियाणीति पंचैते चित्तपूर्वंग
मा गुणाः १० तत्र विज्ञानसंयुक्ता त्रिविधा चेतना ध्रुवा सुखदुःखेति यामाहुरदुःखामसुखेति च ११ श
ब्दः स्पर्शश्च रूपं च रसो गंधश्च मूर्तयः एते ह्यामरणात् पंच षड्गुणा ज्ञानसिद्धये १२ ॥ ॥ ॥

श्रवणं श्रोत्रं स्पर्शनं त्वगिंद्रियं नासा घ्राणं चित्तं सर्वकारणं यस्य पूर्वंगमाः स्पष्टं चित्तपूर्वं चित्तमात्रोपादानकं गताः प्राप्ताः गुणाः गुणकार्यभूताः १०
विज्ञानसंयुक्ता चित्प्रतिबिंबगर्भा चेतना वृत्तिः विषयस्योपादेयत्वहेयत्वोपेक्षणीयत्वैस्त्रिविधा ११ मूर्तयः रूपाश्रयद्रव्याणि वाय्वाकाशयोरमूर्त्ते
त्वस्फुटत्वं बहिरिंद्रियाग्राह्यत्वात् पंच शब्दाद्या मूर्तिभिः सह षड्गुणाः विषयाः ज्ञानं प्रमा तस्याः सिद्धये विषयकरणयोगादिनज्ञाप्यते १२ ॥ ॥

रामं०
१४६

किंचतेषुश्रोत्रादिषुकर्मस्वर्गसाधनंविसर्गः संन्यासः ब्रह्मलोकदः सन्यासाद्ब्रह्मणः स्थानमितिस्मृतेः सर्वतत्वार्पितिश्चयः मोक्षहेतुः तंतत्वनिश्चयंपरमंश्रेष्ठंसंप्रु
क्तंमोक्षबीजंबुद्धिरितिअव्ययंमोक्षदत्वादव्ययमितिचाहुः महतब्रह्मतत्मदत्वात् १३ इममिति अस्मिन्संघातेअनात्मनिआत्मबुद्धिरनर्थहेतुरित्यर्थः १४ एवम
ध्यारोपमुक्त्वाऽपवादमाहानात्मेत्यादिना। इतिपदस्थंतदनात्मेतिसंबंधः स्वात्मनिहन्तिविरोधादिदंतयायदृष्टंअहंकारादितत्। आत्मनेत्यर्थः नहिदृश्यंद्रष्टु
रात्मेतियुक्तं। तेननकारेणनअहमितिनममेतिचनवर्त्तते। यद्यत्राभेदेनप्रतीयेततन्मिथ्यायथाशुक्तिरजतं अहंकारदेहेन्द्रियादिकंचात्मन्यभेदेनप्रतीयतेऽयमह

तेषुकर्मविसर्गश्चसर्वतत्वार्पितिश्चयः तमाहुःपरमंप्रोक्तंबुद्धिरित्यव्ययंमहत् १३ इमंगुणसमाहारमात्मभावेनपश्यतः
असम्यग्दर्शिनैर्दुःखमनंतंनोपशाम्यति १४ अनात्मेतिचयद्दृष्टंतेनाहंनममेत्यपि वर्त्ततेकिमधिष्ठानाप्रसक्तादुःख
संततिः १५॥

मस्मिकारोऽहंगौरोऽहमितिअतोमिथ्यातत्तत्संबंधिममकारास्पदंपुत्रादिकमपिमिथ्या। अतोऽहमितिममेतिचनवर्त्ततइतियुक्तमुक्तं अनात्मेतिहवि
दृष्टंचनाहंनचममेत्यपीतिपाठेइतिहिइदमित्येवमाकाराप्रतीतिरेतिद्दृश्यंस्वार्थेष्यञ्। अतएवविद्यापरिसमाप्तिर्यस्यतद्विषयइत्यर्थः सर्वोप्यनात्माऽतोऽहमिति
नवर्त्ततेममेत्यपिनवर्त्ततइतियोजना। पाठांतरंत्वनाकरं एवंसतियाप्रप्रतीयमानादुःखसंततिःसाकिमधिष्ठाना आत्मनोऽसंगत्वात् अहंकारस्य
चमिथ्यात्वात्रज्जूरगाभीषणत्ववन्निरधिष्ठानैवयादृशोयक्षस्तादृशोबलिरितिन्यायेनाहंकारवन्मिथ्यैवेत्यर्थः १५ ॥ ॥ ॥ ॥

मो० १४७

147

अत्रेति हंतिर्गुणानार्ष्येंद्रोतिःशास्त्रेप्रसिद्धःसम्यक्वधोगुणानंपुनःपुनरभ्यसंतेतत्वान्यस्मिन्निति सम्यग्वधोनामसांख्यशास्त्रंसम्यङ्गनइतिपा
ठेसम्यक्संदेहनिर्मुक्तंमनोयेनेतितदेवत्यागप्रधानंशास्त्रंत्यागशास्त्रं १६ तदेवाहत्यागइति मुक्तानामुक्तयर्थेनित्यायुक्तानांपुंसांसर्वेकर्मत्याग
स्त्वनित्यंमतः कर्मणामितिधनादेरप्युपलक्षणंयेत्वमिथ्याविनीताःत्यागेविनाशोत्पादिपरास्तेषांक्लेशोविघादिरूपोमतः १७ सर्वेशास्त्रता
त्पर्येत्यागस्यैवेत्याहद्रव्येति द्रव्यादित्यागनिमित्तंयज्ञकर्मादीन्युपदिशंतीतिशेषः।सर्वत्यागनिमित्तंयोगंउपदिशंतियतस्मात्त्यागस्यसमापनास

अत्रसम्यग्वधोनामत्यागशास्त्रमनुत्तमं श्रणुयत्तवमोक्षायभाष्यमाणंभविष्यति १६ त्यागएषहिसर्वेषांयुक्तानामपिक
र्मणां नित्यंमिथ्याविनीतानांक्लेशोदुःखवहोमतः १७ द्रव्यत्यागेतुकर्माणिभोगत्यागेव्रतान्यपि सुखत्यागेतपोयोगःसर्व
त्यागेसमापना १८ तस्यमार्गोयमद्वैधःसर्वत्यागस्यदर्शितः विप्रहाणायदुःखस्यदुर्गतिस्त्वन्यथाभवेत् १९ पंचज्ञानेंद्रि
याण्युक्त्वामनःषष्ठानिचेतसि बलषष्ठानिवक्ष्यामिपंचकर्मेंद्रियाणितु २० हस्तौकर्मेंद्रियंज्ञेयमथपादौगतींद्रियं
प्रजनानंदयोःशेफोविसर्गेपायुरिंद्रियं २१

प्राप्तिःपराकाष्टेत्यर्थः १८ तस्येति अयंवक्ष्यमाणोयोगःअद्वैधःप्रकारभेदशून्यःतथाचत्यागस्यैवप्राधान्यंमाहुर्विशारवनःसमामनं
ति।त्यागएवहिसर्वेषांमोक्षसाधनमुत्तमं।त्यजतैवहितज्ज्ञेयंत्यक्तुःप्रत्यक्परंपदमिति। अन्यथात्यागाभावे १९ साङ्गंगणमाहपंचेति
चेतसिबुद्धौसंतीतिबुद्धित्यागेसर्वाणिसक्तानिस्युरितिभावः।बलंप्राणशक्तिः २ शेफःशिश्नंपायुर्गुदं २१ ॥ ॥ ॥

८२

राम० १४७

पंचान्वितंमनइतिबुद्ध्वाबुद्ध्याविसृजेत मनस्त्यागेसविषयाणांकर्मेन्द्रियाणां [illegible] त्यागःबुद्धित्यागेसमनस्कानांज्ञानेंद्रियाणांचत्यागःसिद्धइ
तिप्रघट्टकार्थः २२ एतमेवस्पष्टयतिकरणविस्तादिना। करणंश्रोत्रंकरणेशब्दोविषयःचित्तंकर्त्ताश्रवणंक्रिया २३ पंचत्रिकाःसर्वाण्यपिविषयकार
णद्वंद्वानिसमनस्कानीतित्रिकाइत्युक्तंएतेगुणाःतदुपलब्धयेशब्दादिज्ञानाभिव्यक्तयेभवंति येनअनुभवाभिव्यंजनेननिमित्तेनायंत्रिविधोभावःकरणा

वाक्कशब्दविशेषार्थमितिपंचान्वितंविदुः एवमेकादशैतानिबुध्याम्युविसृजेन्मनः २२ करणंशब्दश्चचित्तंचत्रयः
श्रवणसंग्रहे तथास्पर्शेतथारूपेतथैवरसगंधयोः २३ एवंपंचात्रिकाह्येतेगुणास्तदुपलब्धये येनायंत्रिविधो
भावःपर्यायात्समुपस्थितः २५ सात्त्विकोराजसश्चापितामसश्चापितेत्रयः त्रिविधावेदनायेषुप्रसृतासर्वसा
धनाः २६ प्रहर्षःप्रीतिरानंदःसुखंसंशांतचित्तता अकुतश्चित्कुतश्चिद्वाचित्ततःसात्त्विकोगुणः २७ अतुष्टिः
परितापश्चशोकोलोभस्तथाऽक्षमा लिंगानिरजसस्तानिदृश्यंतेहेत्वहेतुतः २८

कर्मकर्तृरूपःपर्यायात्एषयगर्पत्तथास्ति २५ त्रैविध्यमेवाहसात्त्विकइतिवेदनाःअनुभवाःसर्वान्प्रहर्षादीन्साधयंतीतिसर्वसाधनाः २६ इष्टप्र
वणादर्शनप्राप्तिपरिष्वंगजानिसुखानिप्रहर्षप्रीत्यानंदसुखशब्दितानिशांतचित्तताअभुक्तेभुक्तेवाऽनुत्सुकता। अकुतश्चिततवैराग्यात्स्वतएवकुतश्चि
दितिइष्टलाभात। चिंतितोविचारितःचित्ततइतिपठेचित्ततः २७ अक्षमेतिछेदःहेत्विति पूर्ववत् २८

कथंचिदितिहेत्वेहेतुभिरित्यर्थः २९ अपेक्षेतेत्युक्तेरुच्चरयोर्हेयत्वमुक्तं ३१ एवंशब्दादीनांश्रोत्रादीनांचत्रिगुणात्मकचित्तमात्रत्वमुक्तंचित्तत्यागेनैवगुणाकरण
विषयाणांत्यागोभवतीतिज्ञानायइदानींविपदादिभ्योऽनन्यत्वेनशब्दश्रोत्रादीनामुच्यतेतत्प्रविलापनेनैवविपदादिप्रविलापनंभवतीत्येतदर्थंश्रोत्रमितिद्वा
भ्यां। आकाशाख्यंभूतमेवाकर्णशष्कुल्यवच्छेदेननभसएवश्रोत्रत्वात्। एवंश्रोत्रादीश्रितःशब्दोपिपरंपरयाभूतमेवाएवंसतिशब्दविज्ञानेउभयोर्व्योमश्रोत्रे
विज्ञानस्यविषयोनानहिशब्दंज्ञाननताश्रोत्राकाशौअपिज्ञायेते तर्हिअज्ञातावेवतौभवतांकिंनश्छिन्नमित्याशंक्याहइतरस्यविज्ञानादन्यस्यअज्ञानस्य

अविवेकस्तथामोहः प्रमादः स्वप्नतंद्रिता कथंचिदपिवर्त्तंतेविविधास्तामसागुणाः २९ अत्रयत्प्रीतिसंयुक्तंका
येमनसिवाभवेत् वर्त्ततेसात्विकोभावइत्यपेक्षेततत्तथा ३० यत्वसंतोषसंयुक्तमप्रीतिकरमात्मनः प्रवृत्तंरजइ
त्येवंततस्तदपिचिंतयेत् ३१ अथयन्मोहसंयुक्तंकायेमनसिवाभवेत् अप्रतर्क्यमविज्ञेयंतमस्तदुपधारयेत्
३२ श्रोत्रंव्योमाश्रितंभूतंशब्दःश्रोत्रंसमाश्रितः नोभयंशब्दविज्ञानेविज्ञानस्येतरस्यवा ३३ ॥ ॥

वाविषयौश्रोत्राकाशौनभवतः शब्दस्यतदुभयानन्यत्वात्तनहिघटरूपादिवदात्मपान्निष्कृष्ययोः शब्दश्रोत्रयोराकाशगुणकार्ययोः ग्रहणंप्रविला
पनंवाकर्तुंशक्यं। तस्मात्श्रोत्रादिप्रविलापनेनैवतदनन्यशब्दाकाशादेरपिप्रविलापनंयुक्तंश्रोत्रादीनां। चचित्तादनन्यत्वात्तानिशब्दाकाशादीन्य
पिस्मरणात्मकंचित्तमेवचित्तमपिमनसोध्यवसायात्मकादनन्यदितिधीमात्रेसर्वंमनसिलीनेलीनंभवतीत्यर्थः ३३ ॥ ॥ ॥ ॥

३४ सर्वेषां मनोमात्रत्वे युक्तिमाह। स्वकर्मेति। एतेषु दशसु विषयेंद्रियपंचकद्वये एकादशं चित्तमनुगतं तिष्ठतीति विद्धि। घटशरावादिष्विव मृत्तत्त्वम्। अत्र हेतुः स्वकर्मयुगपद्भाव इति पंचम्यर्थे प्रथमा। स्वेषामिंद्रियविषयाणां कर्माणि श्रवणस्पर्शनदर्शनादीनि तेषां यौगपद्यात्। सुप्तोत्थितमात्रस्य पुंसो लब्धात्मकं मनो युगपदवस्थितान् शब्दादीननुभवति। तच्चैतेषां मनस्त्वात्मकत्वाभावेन संगच्छते। उपादाने हि स्वकार्यैर्युगपत्संगतं भवति। अनुपादाने तु क्रमेणेति। सत्यपि तु युगपज्ज्ञानानुपलब्धिर्मनसो लिंगमिति ज्ञानायौगपद्यमेवानुपादानस्य मनसः साधकं लिंगमाहुस्तेषां गंगाह्रद इति मग्नस्य युगपत्सर्वांगीणशैत्यानुभवेन हेतोर्बाध इत्यास्तां तावत्। चित्तस्यापि व्यापिका बुद्धिर्द्वादशमी द्वादशी आर्षो मट्प्रत्ययः ३५ तेषां द्वादशानामात्म

एवं त्वक्चक्षुषी जिह्वा नासिका चेति पंचमी। स्पर्शे रूपे रसे गंधे तानि चेतो मनश्च तत् ३४ स्वकर्मयुगपद्भावो दश
स्वेतेषु तिष्ठति चित्तमेकादशं विद्धि बुद्धिर्द्वादशमी भवेत् ३५ तेषामयुगपद्भावे उच्छेदो नास्ति तामसः आस्थितो यु
गपद्भावो व्यवहारः स लौकिकः ३६

न्यारोपितानां अयुगपद्भावे दृष्टदृश्योपरतौ चित्तं सर्वार्थमिति योगप्रसिद्धं चित्तस्य सर्वार्थत्वमिह बुद्ध्यादियुगपद्भाव इत्युच्यते तदन्यो विशेषविज्ञानराहित्यलक्षणः स्यात् स यज्ज्ञाने यौगपद्याभावस्तामसः निद्रारूपस्तमोमयः सुषुप्तिकालीनस्तस्मिन्सत्यपि आत्मनः उच्छेदो नास्ति उत्थितस्य सुखमहमस्वाप्समित्यादिपरामर्शात्। सता सौम्य तदा संपन्नो भवतीति सुषुप्तौ ब्रह्मसंपत्तिश्रवणात्। स एव मुक्तो नानुस्मृतिशब्दविधिभ्य इति न्यायाच्च। अयुगपद्भाव एव आत्मनो वास्तवं तत्त्वं युगपद्भावस्तु स्वप्नवदज्ञानकृत इत्याह। आस्थित इति लौकिको न तु पारमार्थिकः ३६

149

व्यावहारिकं युगपन्नावमुक्त्वा प्रातिभासिकं स्वाप्नकालिकं तमाहेंद्रियाणीति पूर्वं श्रुतं श्रवणात्क्रिया सा च स्पर्शनादीनामप्युपलक्षणं तत्पाणपादादीनां आ-
गमः प्राप्तिः पूर्वानुभववासनातः इत्यर्थः सूक्ष्माणि इंद्रियाणि पूर्वकादृशं दृष्ट्वा चिंतयन्विषयसंगं भावयन्नत्र पुरुषः स्वप्नदर्शी त्रिभिर्गुणैः सत्वादिभिर्युक्तः अनु-
पर्येति जाग्रदवस्थामनुसंचरति स्वप्नकाले इत्युत्तरादपकृष्यते । स्वशरीरे यथाकामं परिवर्त्तत इति श्रुतेः २७ तमोपहतं तमोगुणेनाभिभूतं आसु संहारं आत्मानं प्रवृ-
त्तिप्रकाशात्मकं संहृत्य अक्षवं नोक्षवदानंत्यहीनमुपरमं पूर्वोक्तयुगपन्नावस्योछेदं करोति तत्सुखं तामसं अज्ञानप्रधानेन शरीरेण वसुषुप्तावनुभूयते २८ सुषु-

इंद्रियाण्यपि सूक्ष्माणि दृष्ट्वा पूर्वं श्रुतागमान् । चिंतयन्ननुपर्येति त्रिभिरेवान्वितो गुणैः २७ यत्तमोपहतं
चित्तमाशुसंहारमक्षवं । करोत्युपरमं कायेतदाहुस्तामसं बुधाः २८ यद्यदागमसंयुक्तं न कृच्छ्रमनुशाम्यति
आर्यतत्राप्युपादत्ते तमोव्यक्तमिहान्तरं २९

प्तिसादृश्यं कैवल्यस्याह यद्यदिति यत्सुखं आगमसंयुक्तं आनंदाब्रह्मणो विद्वानिति वेदबोधितं यत्र यस्मिन्वल्कक्षं द्वैतदुःखं नानुपश्यति पाठांतरे यत्र न किंचित्सुखं दुःखं वा ज्ञा-
तात् ज्ञेयं वास्ति किंतु दग्धेंधनानलवदाचार्योपदेशमनुशाम्यत्येवं तत्र तस्मिन्नपि सुखे अव्यक्तं अन्तं तम उपादत्ते इव वस्तुतस्तमो नास्ति तथापि द्वैतदर्श-
नाभावसाम्येन आवृतमव्यक्तं च ज्ञात्रादिविभागाभावात् ॥ २९ ॥

एवं सुषुप्तिवन्मोक्षेपि एषो ऽहंकारादिघटितो दृश्यमानः गुणः भोगापवर्गः स्वकर्मप्रत्ययः कर्महेतुकाविर्भावः प्रसंख्यातः प्रत्याख्यातः केषांचिदविद्यावतां वज्रपंजरवद्व
र्त्तते केषांचिद्विद्यावतां कालत्रयेपि नह्यस्ति ८० एतत् एतं समाहारं संघातं क्षेत्रमाहुः एतदिति विधेयापेक्षं क्लीबत्वं मनसि संघातबीजभूते यो भावः यासत्तास
क्षेत्रस्य शुक्तिरजतवदध्यस्तस्य मनसः सत्तास्फूर्त्तिप्रदः ८१ एवमिति भूतेषु चतुर्विधेषु हेतुतः अनाद्यविद्याकामकर्मवशतः स्वभावात् सत्यानृतयोरात्माना
त्मनोर्मिथुनीकरणात् व्यवहारे वर्त्तमानेषु सत्सु क उच्छेदः उच्छेदवान् को वा शाश्वतः स्यात् नासतो विद्यते भावो नाभावो विद्यते सत इति न्यायेनासतः संघातस्य स्व

एवमेष प्रसंख्यातः स्वकर्मप्रत्ययो गुणः कथंचिद्वर्त्तते सम्यक् केषांचिद्वा निवर्त्तते ८० एतदाहुः समा
हारं क्षेत्रमध्यात्मचिंतकाः स्थितो मनसि यो भावः स वै क्षेत्रज्ञ उच्यते ८१ एवं सति क उच्छेदः शाश्वतो वा
कथं भवेत् स्वभावाद्वर्त्तमानेषु सर्वभूतेषु हेतुतः ८२ यथार्णवगता नद्यो व्यक्तीर्जहति नाम च नदाश्च
ता नियच्छंति तादृशः सत्त्वसंक्षयः ८३

रूपाभावादेव नोच्छेदप्रसंगः अत एव शाश्वतत्वं चान्यस्येत्यर्थः यद्वा शाश्वत आत्मा वा कथं उच्छेदवान् भवेदिति यापूर्वं त्वया आत्मोच्छेदशंका कृता सा निनिरालं
वेनेत्यर्थः एतेन पुं प्रकृत्योरत्यंतवैधर्म्यमुपपादितं ८२ यथेति नद्यो नदाश्च व्यक्तीः रूपाणि नाम च जहति त्यजंति नदाश्च ताः नदीः नियच्छंति स्ववशे कु
र्वंति यथा क्षुद्रनदी महानद्यां नामरूपे जहाति महानदी च समुद्रे लीयते तद्वत्सत्त्वस्य महदादिघटितात्मनः स्थितस्य उत्पत्तिविपरीतक्रमेण संक्षयः स्थूलं सूक्ष्मे
लीयते सूक्ष्मं कारणे तच्च शुद्धे इत्यर्थः ८३ ॥

प्रतिसंयुक्तेउपाधिमिश्रेजीवेसर्वतः सर्वात्मनाऽदर्पणस्येवमुखवत्गृह्यमाणेसतिप्रेत्यभावेउपाध्यपायेसंज्ञाअपनहंदेवदत्तोस्मीतितद्ग्रहणंकुतःस्यान्नकुतश्चित्तन्नापि
ग्रहणाभावान्मुखस्येवात्मनउच्छेदोप्यस्तीतिनेत्युक्तंशंकावकाशइत्यर्थः ७४ विद्याफलमाह इमामितिवेदशास्त्रतःअन्विच्छतिशमादिपरोभवतिविसस्यमृणालस्य ७५
पाशैःस्नेहकर्मनिमित्तैःतेषांग्रहणंप्रज्ञेत्यादिनाअलिंगःपंचप्राणमनोबुद्धिदशेंद्रियात्मकलिंगहीनः ७६ श्रुतिप्रमाणंतत्वमसिवाक्यंआगमोमंगलं

150

एवंसतिकुतःसंज्ञाप्रेत्यभावेपुनर्भवेत् प्रतिसंमिश्रितेजीवेगृह्यमाणेचसर्वतः ७४ इमांचयोवेदविमो
क्षबुद्धिमात्मानमन्विच्छतिचाप्रमत्तः नलिप्यतेकर्मफलैरनिष्टैःपत्रंबिसस्येवजलेनसिक्तं ७५ दृढैर्हि
पाशैर्बहुभिर्विमुक्तःप्रजानिमित्तैरपिदैवतैश्च यदाह्यसौसुखदुःखेजहातिमुक्तस्तदाग्र्यांगतिमेत्यलि
गः ७६ श्रुतिप्रमाणागममंगलैश्चशेतेजरामृत्युभयादभीतः क्षीणेचपुण्येविगतेचपापेततोनिमि
त्तेचफलेनिविष्टे ७७ अलेपमाकाशमलिंगमेवमास्थायपश्यंतिमहत्यसक्ताः ॥ ॥ ॥

साधनंशमादिनिमित्तेमोहोस्येफलेसुखदुःखात्मके ७७ महतीतिबुद्धितत्वेऽस्मितामात्रेपश्यंति तत्रैवहिसांख्यानांगुणपुरुषांतरज्ञानंअस्माकंचप्रतीचोब्रह्म
भावावगमःप्रसिद्धःअसक्ताःविरक्ताःआकाशंहार्दाकाशाख्यंसगुणंब्रह्मास्थायआश्रित्यअलिंगंनिर्गुणंपश्यंतीतियोजना ७७ ७७ ७७

यथेति ऊर्णनाभिर्लूता कीटः तंतुक्षये तंतुमध्ये गृहा यथा तिष्ठति तथैव पात्यमानो विद्यावशो जीवः कर्मतंतुगृहे तिष्ठति। यथा चोर्णनाभस्तंतुक्षयं प्रजहाति एवं
विमुक्तोपि हानेफलमाह दुःखं विध्वंसत इति। तत्र दृष्टांतो लोष्ट इति। पांसुपिंडः। अ[illegible]द्रिं पाषाणं ऋच्छन् वेगेन प्राप्नुवन् ४८ रुरुमृगभेदः ४९ पराद्धी

यथोर्णनाभिः परिवर्त्तमानस्तंतुक्षये तिष्ठति पात्यमानः तथा विमुक्तः प्रजहाति दुःखं विध्वंसते लोष्ट इवाद्रिमृ-
च्छत् ४८ यथा रुरुः शृंगमथो पुराणं हित्वा त्वचं वाप्युरगो यथा च विहाय गच्छत्यनवेक्षमाणस्तथा विमु-
क्तो विजहाति दुःखं ४९ द्रुमं यथा वाप्युदके पतंतमुत्सृज्य पक्षी निपतत्यसक्तः तथा ह्यसौ सुखदुःखे विहा-
य मुक्तः परार्ध्यां गतिमेत्यलिंगः ५० अपि च भवति मैथिलेन गीतं नगरमुपाहितमग्निनाभिवीक्ष्य न खलु मम हि द-
ह्यतेत्र किंचित्स्वयमिदमाह किल स्म भूमिपालः ५१ इदममृतपदं निशम्य राज्ञा स्वयमिह पंचशिखेन भाष्यमाणं
निखिलमभिसमीक्ष्य निश्चितार्थः परमसुखी विजहार वीतशोकः ५२ इमं हि यः पठति मोक्षनिश्चयं महीपते
सततमवेक्षते तथा उपद्रवान्नानुभवत्यदुःखितः प्रमुच्यते कपिलमिवैत्य मैथिलः ५३ शांतो मोक्षधर्मेषु पंचशि-
खवाक्यानि॥ ॥

अत्रैवं ५० केन वृत्तेन वृत्तज्ञो जनको मिथिलाधिप इति। युधिष्ठिरप्रश्नबीजमुपन्यस्यति। अपि चेति ५१ अवेक्षेत अर्थतः पर्यालोचयति। कपिलं कपि

किंकुर्वन्सुखमाप्नोतिकिंकुर्वन्दुःखमाप्नुयादित्यारभ्यआद्यंतंसर्वभूतानांज्ञातुमिच्छामिकौरवेत्यतःप्राक्तनीएकादशाध्यायाउक्तवक्ष्यमाणस्वरूपज्ञानला
भार्यसाधनसंपद्विधानार्थाःप्रायेणास्पष्टार्थात्पापिविषमाणिपदान्यत्रव्याख्यायंते १ श्रुतिसमाधयोवेदद्रष्टारः २ दमोवाह्येंद्रियनिग्रहः तद्वर्जितःअदांतः५

युधिष्ठिरउवाच किंकुर्वन्सुखमाप्नोतिकिंकुर्वन्दुःखमाप्नुयात् किंकुर्वन्निर्भयोलोकेसिद्धश्चरतिभारत १ भीष्म
उवाच दममेवप्रशंसंतिवृद्धाःश्रुतिसमाधयः सर्वेषामेववर्णानांब्राह्मणस्यविशेषतः २ नादांतस्यक्रियासिद्धिर्यथा
वदुपपद्यते क्रियातपश्चसत्यंचदमेसर्वंप्रतिष्ठितं ३ दमस्तेजोवर्द्धयतिपवित्रंदमउच्यते विपाप्मानिर्भयोदांतःपुरुषो
विंदतेमहत् ४ सुखंदांतःप्रस्वपितिसुखंचप्रतिबुध्यते सुखंलोकेविपर्येतिमनश्चास्यप्रसीदति ५ तेजोदमेनधि
यतेतन्नतीक्ष्णोधिगच्छति अमित्रांश्चबहून्नित्यंपृथगात्मनिपश्यति ६ क्रव्याद्भ्यइवभूतानामदांतेभ्यःसदाभयं
तेषांविप्रतिषेधार्थंराजासृष्टःस्वयंभुवा ७ आश्रमेषुचसर्वेषुदमएवविशिष्यते यच्चतेषुफलंधर्मेभूयोदांतेतदुच्य
ते ८ तेषांलिंगानिवक्ष्यामियेषांसमुदयोदमः अकार्पण्यमसंरंभःसंतोषःश्रद्दधानता ९ ॥ ॥ ॥

तीक्ष्णोराजसःअमित्रान्कामादीन् ६ क्रव्याद्भ्यःव्याघ्रादिभ्योमांसभक्षकेभ्यः ७ भूयोधिकं ८ लिंगानिस्वरूपाणिसदैन्यस्मादितिसमुदयोहेतुःअकार्पण्यम
मदीनत्वंअसंरंभोऽभिनिवेशाभावः ९

अतिवादोलौकिकार्यभाषणं अभिमानितागर्वः १० जनवादोराजादिवार्त्तासाधुकामोमोक्षार्थीप्रत्ययेषुसुखदुःखाद्यनुभवेषु आपतितंउत्तरकालंनस्पृहयेतप्राप्तंसुखा
दिकंभुंजीतनतुकालांतरीयंतज्जोहर्षविवादौचिंतनीयावित्यर्थः नायतिंप्रत्ययेष्वितिपाठेफलसंवादेनविश्वस्तोऽन्येषु आदरंनकुर्यातकिंतुप्रागेव अहेतुकार्येषुसा

अक्रोधश्चार्जवंनित्यंनातिवादोभिमानिता गुरुपूजानसूयाचदयाभूतेष्वपैशुनं १० जनवादमृषावादस्तुतिनिंदावि
वर्ज्जनं साधुकामश्चस्पृहयेन्नायतिंप्रत्ययेषुच ११ अवैरकृत्सूपचारःसमोनिंदाप्रशंसयोः सुवृत्तःशीलसंपन्नःप्रस
न्नात्मात्मवान्प्रभुः १२ प्राप्यलोकेचसत्कारंस्वर्गंवैप्रेत्यगच्छति दुर्गमंसर्वभूतानांप्रापयन्मोदतेसुखी १३ सर्वभूतहितेयुक्तोन
स्मयोद्विषतेजनं महाह्रदइवाक्षोभ्यःप्रज्ञातृप्तःप्रसीदति १४ अभयंयस्यभूतेभ्यःसर्वेषामभयंयतः नमस्यःसर्वभूतानांदां
तोभवतिबुद्धिमान् १५ नहृष्यतिमहत्यर्थेव्यसनेचनशोचति सवैपरिमितप्रज्ञःसदांतोद्विजउच्यते १६ कर्मभिःश्रुतसंपन्नः
सद्भिराचरितःशुचिः सदैवदमसंयुक्तस्तस्यभुंक्तेमहाफलं १७ अनसूयाक्षमाशांतिःसंतोषःप्रियवादिता सत्यंदानमनाया
सोनैषमार्गोदुरात्मनां १८

धुषुविश्वासोनकर्तव्यइत्यर्थः ११ सूपचारःशाठ्यवर्ज्जितादरःप्रसन्नात्माशुद्धचित्तः आत्मवान्धृतिमान्प्रभुर्जितकामादिदोषः १२ दुर्गमंदुःकालदुर्लभ
मन्नादिप्रापयन्दयावानित्यर्थः १३ स्मेतिपूरणकपदं १८

२० षट्चत्वारिंशः ।भूतानामभयं यत इत्यहिंसाविधिः किं अग्नीषोमीयं पशुमालभेत सुराग्रहं गृह्णातीति वैदिकं ब्राह्मणां कर्मप्रवर्तनावाक्यं तथा प्रीणाये चंडिकां मत्स्यानां सेन सु
रपानं पेयं वैदिकं ब्राह्मणां। सविधिः किमेतत्सर्वं विरुध्यते न वेति प्रश्नार्थः द्विजातयः त्रैवर्णिकाः व्रतं पयस दीक्षां तत्र दीक्षा च तद्युक्ताः हविः देवताशेषं अन्नं अदनीयं मांसमत
स्यादि। ब्राह्मणां पूर्वोक्तं द्विविधं तत्रोक्तोऽपरं कामः स्वर्गपुत्रादिस्तस्मै। यत भुंजते तदिदं कथं युक्तमयुक्तं वेति पदार्थः १ अवेदोक्तेति। भुंजानाः अभोज्यं मांसादिति शे

152

कामक्रोधौ च लोभश्च परस्येर्ष्याविकत्थना कामक्रोधौ वशे कृत्वा ब्रह्मचारी जितेंद्रियः १९ विक्रम्य घोरे तमसि ब्राह्मणाः संशित
व्रतः कालाकांक्षी चरेल्लोकान्निरपाय इवात्मवान् २० शांतिमोक्षधर्मेषु दांताध्यायः युधिष्ठिर उवाच द्विजातयो व्रतोपे
ता यदिदं भुंजते हविः अन्नं ब्राह्मणकामाय कथमेतत्पितामह १ भीष्म उवाच अवेदोक्तव्रतोपेता भुंजानाः कार्यका
रिणः वेदोक्तेषु च भुंजाना व्रतलुप्ता युधिष्ठिर २ युधिष्ठिर उवाच यदिदं तप इत्याहुरुपवासं पृथग्जनाः एतत्तपो म
हाराज उताहो किं तपो भवेत ३

षः कार्यकारिणः कामचारवंतः इहैव पतिता इत्यर्थः व्रतलुप्ताः दीक्षोक्तफलानुरागिणः स्वर्गं प्राप्य पतिष्यंतीत्यर्थः लुप्ता इति पाठे व्रतविध्निना वंचिता इत्यर्थः २
एवं परपीडाकरं यागादिकं विनिंद्य देहपीडाकरमपि धर्मं मुमुक्षूणामनुपादेयं निंदति प्रश्नोत्तराभ्यां यदिति ३ ३

आत्मतंत्रं आत्मविघातस्याऽउपघातो विघ्नः ४ आत्मविघोपकारकं तप आहुस्त्यागइति भूतमयंकरकर्मसंन्यासस्त्यागः सन्नतिः भूताराधनं असंन्यासिनामपिग्र
र्भिताह सदेति स कुटुंबिकोपि सदोपवासीइत्यादिविशेषणवान्भवेत् ५ कर्मकामः न तु फलकामः अस्वप्नइति छेदः ७ अतिथिर्वैश्वदेवांते प्राप्तः देवतावत् द्विजा

भीष्मउवाच मासपक्षोपवासेन मन्यंते यत्तपोजनाः आत्मतंत्रोपघातस्तु न तपस्तत्सतां मतं ४ त्यागश्च सन्नतिश्चैव शिष्यते तपउत्त
मं सदोपवासी स भवेद्ब्रह्मचारी सदा भवेत् ५ मुनिश्च स्यात्सदा विप्रो दैवतं च सदा भवेत् कुटुंबिको धर्मकामः सदास्वप्नश्च भारत ६ अ
मांसादी सदा च स्यात्पवित्रश्च सदा भवेत् अमृताशी सदा च स्याद्दैवतातिथिपूजकः ७ विघसाशी सदा च स्यात्सदा चैवातिथिव्रतः
श्रद्दधानः सदा च स्याद्देवतद्विजपूजकः ८ युधिष्ठिरउवाच कथं सदोपवासी स्याद्ब्रह्मचारी कथं भवेत् विघसाशी कथं च स्यात्स
दा चैवातिथिव्रतः ९ भीष्मउवाच अंतरा प्रातराशं च सायमाशं तथैव च सदोपवासी स भवेद्यो न भुंक्तेऽतरा पुनः १० भार्यां गच्छन्ब्र
ह्मचारी ऋतौ भवति वै द्विजः ऋतवादी भवेन्नित्यं ज्ञाननित्यश्च यो नरः ११ न भक्षयेद्वृथा मांसममांसाशी भवत्यपि ॥ दाननित्यः
पवित्रश्च अस्वप्नश्च दिवास्वपन् १२ भृत्यातिथिषु यो भुंक्ते भुक्तवत्सु सदा सदा अमृतं केवलं भुंक्ते इति विद्धि युधिष्ठिर १३

नां पूजकः ११ वृथा देवपितृशेषं विना अस्वपन्निति छेदः १२ ॥ ॥ ॥ ॥ ॥ ॥

अभुक्तवत्सु अतिथ्यादिषु नाश्नातः अनश्नन् १७ सप्तचत्वारिंशः॥ ॥यदिति इदं संदेहोपवासीत्यादिनादिना विहितं कर्म तस्य कर्तास्ति अस्ति अभवत् पर्ये पुरुषस्तस्य कर्ताभवतिनेवति प्रश्नार्थः कर्तेति काणादाः अकर्तेति कापिलाः आद्ये मोक्षानुपपत्तिः स्वाभाविकस्य कर्तृत्वस्य वह्न्यौष्ण्यवदात्मपनाशमंतरेणाविनाशात् अंते शास्त्रानर्थक्यापत्तिः जडस्याधर्षत्वात् चेतनस्याकर्तृत्वाच्च संशयः ३ तत्वविदां लक्षणमेवज्ञानसाधनमिति मुद्धादं विशिनष्टि असक्तमित्यादिना असक्तं फलेच्छारहितं अस्तब्धं अनलसं अनहंकारं वीतरागं सत्वस्थं सात्विकं अत एव समपरं चित्तशमादौ धर्मे रतं ४

अभुक्तवत्स्वनाश्नानः सततं पस्तु वै द्विजः अभोजनेन तेनास्य जितः स्वर्गो भवत्युत १४ देवताभ्यः पितृभ्यश्च भृत्येभ्योऽतिथिभिः सह अवशिष्टं तु योश्नाति तमाहुर्विघसाशिनं १५ तेषां लोका ह्यपर्यंताः सदने ब्रह्मणा सह उपस्थिताश्चाप्सरोभिः परियांति दिवौकसः १६ देवताभिश्च ये सार्द्धं पितृभिश्चोपभुंजते रमंते पुत्रपौत्रैश्च तेषां गतिरनुत्तमा १७ शांतौ मोक्षधर्मेषु अमृतप्राप्तिकोनाम॥ ॥ युधिष्ठिर उवाच यदिदं कर्म लोकेस्मिन्शुभं वा यदि वाशुभं पुरुषं योजयत्येव फलयोगेन भारत १ कर्तास्ति तस्य पुरुष उताहो नेति संशयः एतदिच्छामि तत्वेन तत्वतः श्रोतुं पितामह २ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं प्रह्लादस्य च संवादमिंद्रस्य च युधिष्ठिर ३ असक्तं धूतपाप्मानं कुले जातं बहुश्रुतं अस्तब्धमनहंकारं सत्वस्थं समये रतं ४॥ ॥ ॥

विदितःप्रभवश्चाप्ययौ अप्ययश्चोत्पत्तिपरिणामोपादानभूतःपरमात्मायेनतं ६ आत्मनिप्रतीचिश्रेयसि आनंदरूपेज्ञानेचिन्मात्रेधीरंकृतकर्मानिभृतं अतएवनिश्चितनिश्च
यंपरःहिरण्यगर्भः अवरोनीचोयस्मात्ईश्वरात्तत्त्वज्ञो अतएवसर्वज्ञ आत्मनोवा अवरेदर्शनेनेदंसर्वंविदितमित्यात्मज्ञानात्सार्वज्ञ्यश्रुतेःसमंनिर्विशेषंतद्दर्शनवंतं

तुल्यनिंदास्तुतिंदांतंशून्यागारनिवेशनं चराचराणांभूतानांविदितप्रभवाप्ययं ५ अक्रुध्यंतमहृष्यंतमप्रियेषुप्रियेषुच कांचनेवाथलो
ष्टेवाउभयोःसमदर्शनं ६ आत्मनिःश्रेयसिज्ञानेधीरंनिश्चितनिश्चयं परावरज्ञंभूतानांसर्वज्ञंसमदर्शनं ७ शक्रः प्रह्लादमासीनमेकां
तेसंयतेंद्रियं बुभुत्समानस्तत्प्रज्ञामभिगम्येदमब्रवीत ८ यैःकश्चित्संमतोलोकेगुणैःस्यात्पुरुषोनृप भवत्यनपगान्सर्वांस्तान्गु
णान्लक्षयामहे ९ अथतेलक्ष्यतेबुद्धिःसमाबालजनैरिह आत्मानंमन्यमानःसन्श्रेयःकिमिहमन्यसे १० बद्धःपाशैश्च्युतः
स्थानाद्द्विषतांवशमागतः श्रियाविहीनःप्रह्लादशोचितव्येनशोचसि ११ प्रज्ञालाभात्तुदैतेयउताहोधृतिमत्तया प्रह्लादसुस्थरू
पोसिपश्यन्व्यसनमात्मनः १२ इतिसंचोदितस्तेनधीरोनिश्चितनिश्चयः उवाचश्लक्ष्णयावाचास्वांप्रज्ञामनुवर्णयन् १३ ॥

७ बुभुत्समानःसंवेदितुमिच्छन् ८ भवतित्वयिअनपगानस्थिरान् ९ बालजनैःसमारागद्वेषादिराहित्यात् आत्मानमन्यमानःजानन् आत्मज्ञानापेक्षयाकिंश्रेयःप्रशस्ततरंसाधनं

अत्र सांख्यमतमाद्यपकर्तृत्वं निराकरोति प्रवृत्तिमित्यादिना प्रवर्त्तत इति प्रवृत्तिः निवर्त्तत इति निवृत्तिः पुरुषस्य भोगाय वर्गौ साधयितुमनुलोमप्रतिलोमपरिणामव
तीमूलप्रकृतिः तां कर्तृकरणक्रियारूपां आत्मनो न्यायो न बुध्यते तस्मात्मनि बुद्धिधर्मान्कर्तृत्वादीनारोपयत संभोगमेवेत न तु आत्मानं अनुपश्यतः तथा च श्रुतिः तत्र को
मोहः कः शोक एकत्वमनुपश्यत इति १७ रथादिवदचेतना प्रकृतिरधिष्ठातारं विना कथं प्रवर्त्तेतेत्याशंक्याह स्वभावादिति यथा वत्सानने गोस्तनात् वृद्धिनिमित्तं क्षीरं रुधिरपूरे
पिंडवायुधर्मि प्रवर्त्तते न च तदा वात्सल्यादिकं तत्प्रवर्त्तकमस्ति वत्सस्यैवाजातत्वात् जाते तु वत्से वात्सल्यं त्वरयतीति नाम प्रवृत्तिमत् क्षीरे स्वाभाविक्येव तथा तत्त्वसर्वभावाभावाः स्वभावादेव

ब्रह्मोवाच प्रवृत्तिं च निवृत्तिं च भूतानां यो न बुध्यते तस्य संभोगमेवेहात्मन्यात्मनि संभोगं तु पश्यतः
स्वभावात्संप्रवर्त्तंते निवर्त्तंते तथैव च सर्वभावास्तथाभावाः पुरुषार्थो न विद्यते १५ ॥ ॥

प्रकृतितत्त्वसंप्रवर्त्तते नास्ति प्रवृत्तिकोपेक्षेत्यर्थः ननु एवं विदितं सांख्योरित्याशंक्य पुरुषार्थो भोगापवर्गात्मकः पुरुषार्थो न विद्यत इति न हि प्रकृतिः कर्त्री पुरुषो भोक्तेति वदा
मः येन सिद्धांतात्प्रयामः शास्त्रफलप्रयोक्तरि तल्लक्षणात्वादिति न्यायं च पश्यामः किंतु या कर्त्री सैव भोक्त्री आत्मनि तु भोक्तृत्वं जलचंद्रचांचल्यवद्भ्रांतिरिति वदामः १५

नन्वयस्कांतमणिवत्पुरुषस्य उदासीनस्यापि सत्तामात्रेण प्रवर्त्तकत्वमस्त्वित्याशंक्याह पुरुषार्थस्येति भोगापवर्गयोरभावे कारकं कारयिता कथं स्यात् सत्तामात्रेणाकार
यितृत्वमपि विक्रियमाणा सत्त्वाधीनं विक्रियाचनरञ्जरणायमाना याः प्रकृतेर्वा स्तवी संभवतीति न कारकत्वं आत्मनः तत एव न कुर्वतः अकुर्वतस्तस्य इह देहादौ स्वयंमा
नत्वमहमित्यभिमानो भवेत् अविद्ययेति शेषः १६ कस्मात्तावता दोष इत्यत आह इति आत्मनः कर्तृत्वे दृष्टविरोधमाह यदीत्यादिना १८ नन्वदृष्टानुकूल्याभावादारंभविघा

पुरुषार्थस्य चाभावेनास्ति कश्चिच्च कारकः स्वयं न कुर्वतस्तस्य ज्ञातुमानो भवेदिह १६ यस्तु कर्त्तारमात्मानं मन्यते साध्वसा
ध्वा तस्य दोषवती प्रज्ञा अतत्त्वेति मे मतिः १७ यदि स्यात्पुरुषः कर्त्ता शक्रात्मश्रेयसे ध्रुवं आरंभास्तस्य सिद्ध्येयुर्न तु जातु परा
भवेत् १८ अनिष्टस्य हि निर्वृत्तिरनिर्वृत्तिः प्रियस्य च लक्ष्यते यतमानानां पुरुषार्थस्ततः कुतः १९ अनिष्टस्याभिनिर्वृत्तिमि
ष्टसंवृत्तिमेव च अप्रयत्नेन पश्यामः केषांचित्तत्स्वभावतः २० प्रतिरूपतराः केचिद्दृश्यन्ते बुद्धिमत्तराः विरूपेभ्योऽल्पबुद्धिभ्यो
लिप्समाना धनागमं २१

तद्यत आहानि ष्टस्येति हितार्थं यतमानानां स्वतंत्राणामप्यनिष्टादृष्टेष्टानिवृत्तिरप्ययुक्तैवेति भोक्तृत्वसमनियतस्य कर्तृत्वस्याभावे भोक्तृत्वस्याप्यभाव इत्यर्थः १९
ईशः कालश्चेति स्वभावस्यैव नामांतरमित्यभिप्रेत्याहानिष्टस्येति यथाऽनिष्टनिष्पत्तिरिष्टनिरोधानं चायत्नतस्त्वस्वभावादापततीत्येवमन्यदपीत्यर्थः नहि स्वभावजमदृष्टं
स्वभावप्रवर्त्तकं भवति कार्यस्य कारणप्रवर्त्तकत्वादिति भावः २१

मो०
१५५

प्रकृतेः स्वातंत्र्यमुपसंहरति द्वाभ्यां स्वभावेति गुणाः सुखदुःखादयः मानकारणं अहं सुखी कर्त्ता भोक्ता चेत्यभिमानहेतुर्न किमपीत्यर्थः २१ आत्मप्रतिष्ठा मोक्षः प्रज्ञा
आत्मज्ञानं तदपि स्वभावादेव बंधस्येवासत्वान्न त्वात्मयोगिनी मुक्तिरपि च अज्ञानादेवेत्यर्थः तथा च श्रुतिः न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्ये
षा परमार्थतेति २२ ननु पर्जन्यवदीशकालस्थानीया प्रकृतिः साधारणी कर्म तु बीजवदसाधारणमिति शंकते कर्मजमिति। एतन्निरासं प्रतिजानीते कर्मणामिति।
विषयं विशेषकार्यं २३ तदेवाह यथेति काकोच्छिष्टमिव कर्माणि स्वभावं प्रकाशयंति न तु वर्त्तयंतीत्यर्थः। लक्षणं ज्ञापकानि। असाधारणो धर्म इति यावत् अयं भावः

155

स्वभावप्रेरिताः सर्वे निविशंते गुणा यदा शुभाशुभास्तदा तत्र कस्य किं मानकारणं २१ स्वभावादेव तत्सर्वमिति मे निश्चिता
मतिः आत्मप्रतिष्ठा प्रज्ञा वा मम नास्ति ततोन्यथा २२ कर्मजं त्विह मन्यंते फलयोगं शुभाशुभं कर्मणां विषयं कृत्स्नमहं वक्ष्या
मि तच्छृणु २४ यथा वेदयते कश्चिदोदनं वायसो वदन् एवं सर्वाणि कर्माणि स्वभावस्यैव लक्षणं २५ ॥ ॥ ॥

तेन वर्णवपुः स्वकारणं तत् ऊनत्वशौक्ल्यादिकं तु पश्चाद्गतं वैचित्र्यस्य एवं स्वभाव एव जन्ममात्रहेतुः तत्कृतं धर्मादिकं तद्वैचित्र्ये साधारणो हेतुः एतदेवोक्तं योगैः निमि
त्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति। धर्मादिर्गुणानां न प्रवर्त्तकः किंतु तेन गुणप्रवाहस्याधर्मस्रोतः खिलीकुर्वता धर्मस्रोतसः आवरणं दूरीक्रि
यते इति सूत्रार्थः एतदेव कर्मणां स्वभावज्ञापकत्वमिति २५

राम०
१५५

फलितमाह विकारानिति विकारान् धर्माधर्मान् परां प्रकृतिं अर्वाचीनत्रिगुणात्मकप्रकृत्यपेक्षया श्रेष्ठां प्रकृतिमुपादानं ब्रह्म यो न वेद तस्य कर्मप्रधानस्य भेददर्शिनः स्तंभो भव
तिन तु अनुपश्यतः परां प्रकृतिं २६ ब्रह्मविदः कुतः स्तंभो नास्तीत्याशंक्य प्रकृतिरेव कर्त्री न त्वात्मेति बोधादित्याह स्वभावेति कर्तृत्वाभिमानो हि दर्पो देहः कारणं तदभावा
द्दर्पाद्यभाव इत्यर्थः २७ यस्मादेवं जानामि सर्वं मंतवदिति तस्मान्न शोचामीत्यर्थः २८ शोकाभावे हेतुं नाह निर्मम इति मुक्तबंधनः निर्वासनः स्वस्थः स्वरूपप्रतिष्ठः

विकारानेव यो वेद न वेद प्रकृतिं परां तस्य स्तंभो भवेद्बाल्यान्नास्ति स्तंभोऽनुपश्यतः २६ स्वभावभाविनो भावान् सर्वानेवेह निश्च
यात् बुध्यमानस्य दर्पो वा मानो वा किं करिष्यति २७ वेदधर्मविधिं कृत्स्नं भूतानां चाप्यनित्यतां तस्माच्छोकं न शोचामि सर्वं ह्येवेद
मंतवत् २८ निर्ममो निरहंकारो निराशीर्मुक्तबंधनः स्वस्थो व्यपेतः पश्यामि भूतानां प्रभवाप्ययौ २९ कृतप्रज्ञस्य दांतस्य वि
तृष्णस्य निराशिषः नायासो विद्यते शक्र पश्यतो लोकमव्ययं ३० प्रकृतौ च विकारे च न मे प्रीतिर्न च द्विषे द्वेष्टारं च न पश्यामि यो
मामयं ममतापते ३१

व्यपेतः देहाद्यनभिमानेन स्वरूपादप्रच्युतः भूतानां प्रभवाप्ययौ परं ब्रह्म २९ लोकं आत्मानं अव्ययं निरपायं ३० प्रकृतौ विषयकर्मणि विकारे धर्माधर्मफलयोः न मे द्वे
ष्टारमहं न पश्यामि यः स्वं ममतापते मम एवाचरति पुत्रमित्रादिरात्मीयस्तं न पश्यामि ३१

ऊर्ध्वंस्वर्गंअवाक्पातालंतिर्यक्मर्त्यलोकंचनकामयेक्वचित्काले।तत्रहेतुर्नहीति ज्ञेयेविज्ञानेकर्मशर्मतेरेशर्मवानविघ्नतेज्ञानेनहिकिंतुज्ञानेनएवनविघ्नतइतियोजनाविज्ञानेनबुद्धो
ज्ञानेनचिदात्मनि।आत्मनोधर्माधर्मतत्फलाश्रयत्वाभावाद्देहेनकिमपिकामयेइत्यर्थः ३३ प्रज्ञाज्ञानंशांतिस्तत्फलंप्रसादेनबुद्धेर्नैर्मल्येन।आत्मवत्तयाजितेंद्रियतया।

नोर्ध्वंनावाङ्नतिर्यक्चनक्वचिच्छक्रकामये नहिज्ञेयेनविज्ञानेनज्ञानेकर्मविद्यते ३२ शक्रउवाच येनैषालभ्यतेप्रज्ञायेनशां
तिरवाप्यते प्रब्रूहितमुपायंमेसम्यक्प्रह्लादपृच्छतः ३३ प्रह्लादउवाच आर्जवेनाप्रमादेनप्रसादेनात्मवत्तया वृद्धशुश्रूषयाशक्र
पुरुषोलभतेमहत् ३४ स्वभावाल्लभतेप्रज्ञांशांतिमेतिस्वभावतः स्वभावादेवतत्सर्वंयत्किंचिदनुपश्यसि ३५ इत्युक्तोदैत्यपति
नाशक्रोविस्मयमागमत् प्रीतिमांश्चतदाराजंस्तद्वाक्यंप्रत्यपूजयत् ३६ सतदाभ्यर्च्यदैत्येंद्रंत्रैलोक्यपतिरीश्वरः असुरेंद्रमुपामंत्र्य
जगामस्वंनिवेशनं ३७ शांतौमोक्षधर्मेषुशक्रप्रह्लादसंवादः॥ ॥

मद्गतमोक्षं ३४ अनात्मनःकर्तृत्वमुपपाद्योपसंहरतिस्वभावादेवेतिविद्यामुक्तिस्वभाविकेवेत्यर्थः यथोक्तंश्रीमद्भागवतेविद्याविद्येममतनूविद्ध्युद्धवशरीरिणांमोक्षबंधकरी
आद्येमाययामेविनिर्मितेइति।ममनायाविनः ३७ अष्टचत्वारिंशः।

इंद्रियनिग्रहोहंकर्तृत्वाभिमानत्यागश्चकार्यइत्यध्यायद्वयेनोक्तासंपदंचांचल्यात्तत्प्राप्तिनाशयोर्हर्षशोकौनकर्तव्याविति व्याख्यायिकामुखेनाध्यायत्रयेणाह । यया बुद्ध्येति

युधिष्ठिरउवाच ययाबुद्ध्यामहीपालोभ्रष्टश्रीर्विचरेन्महीं कालदंडविनिष्पिष्टस्तन्मेब्रूहिपितामह १ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं वासवस्यचसंवादंबलेर्वैरोचनस्यच २ पितामहमुपागम्यप्रणिपत्यकृतांजलिः सर्वानेवासुरान्जित्वाबलिंपप्रच्छवासवः ३ यस्यस्मददतोवित्तंनकदाचनहीयते तंबलिंनाधिगच्छामिब्रह्मन्नाचक्ष्वमेबलिं सवायुर्वरुणश्चैवसरविःसचचंद्रमाः सोग्निस्तपतिभूतानिजलंचसभवत्युत ५ तंबलिंनाधिगच्छामिब्रह्मन्नाचक्ष्वमेबलिं सएवह्यस्तमयतेसःस्मविद्योततेदिशः ६ सवर्षतिस्मवर्षाणियथाकालमतंद्रितः तंबलिंनाधिगच्छामिब्रह्मन्नाचक्ष्वमेबलिं ७ ब्रह्मोवाच नैतत्तेसाधुमघवन्यदेनमनुपृच्छसि पृष्टस्तुनानृतंब्रूयात्तस्माद्वक्ष्यामितेबलिं ८ उष्ट्रेषुयदिवागोषुखरेष्वश्वेषुवापुनः वरिष्ठोभवितांजंतुःशून्यागारेशचीपते ९ शक्रउवाच यदिस्मबलिनाब्रह्मन्शून्यागारेसमेयिवान् हन्यामेनंनवाहन्यांतद्ब्रह्मन्ननुशाधिमां १० ब्रह्मोवाच मास्मशक्रबलिंहिंसीर्नत्वंबलिर्वधमर्हति न्यायस्तुशक्रप्रष्टव्यस्त्वयावासवकामया ११ भीष्मउवाच एवमुक्तोभगवतामहेंद्रःपृथिवींतदा चचारैरावतस्कंधमधिरुह्यश्रियावृतः १२

त्यादिना कालदंडविनिष्पिष्टोविपद्ग्रस्तः २ स्ववीर्यख्यापनायबलिंस्तौतियस्येत्यादिना ८ गोषुवृषभेषु १० ११ १२ ॥ छ छ ॥ ॥

मो०
१५७

157

अलक्ष्यपद्याकर्षणंविनाधान्यप्रसूः २३ यदाचैतासूक्ष्माग्रःस्थूलमूलःषड्विंशदंगुलोदंडः शम्यासावलवताक्षिप्तापावद्दूरेपतेत्तावद्देकंदेवयजनंएवंसर्वापिपृथि

ततोददर्शसवलिंखरवेषेणासंवृतं यथाख्यातंभगवताशून्यागारकृतालयं १३ शक्रउवाच खरयोनिमनुप्राप्तस्तुषभक्षोसिदानव
इयंतेयोनिरधमाशोचस्याहोनशोचसि १४ अदृष्टंवतपश्यामिद्विषतांवशमागतं श्रियाविहीनंमित्रैश्चभ्रष्टवीर्यपराक्रमं १५ यत्तद्या
नसहस्रैस्त्वंज्ञातिभिःपरिवारितः लोकान्प्रतापयन्सर्वान्यास्यस्मानवितर्कयन् १६ त्वन्मुखाश्चैवदैतेयाव्यतिष्ठंस्तवशासने अकृष्टप
च्याचमहीतवैश्वर्येवभूवह १७ इदंचतेघ्यसनंशोचस्याहोनशोचसि यदातिष्ठःसमुद्रस्यपूर्वकूलेविलेलिहन् १८ ज्ञातीन्विभ
जतोवित्तंतदासीत्तेमनःकथं यत्तेसहस्रसमितानन्नृत्तुर्देवयोषितः १९ वहूनिवर्षपूगानिविहारेदीप्यतःश्रिया सर्वाःपुष्करमालि
न्यःसर्वाःकांचनसप्रभाः २० कथमद्यतदाचैवमनस्तेदानवेश्वर छत्रंतवासीत्सुमहत्सौवर्णंरत्नभूषितं २१ ननृतुस्तत्रगंधर्वाःषट्
सहस्राणिसप्तधा यूपस्तवासीत्सुमहान्यजतस्सर्वकांचनः २२ यत्राददःसहस्राणिअयुतानांगवांदश अनंतरंसहस्रेणतदासी
द्दैत्यकामतिः २३ यदाचपृथिवींसर्वांयजमानोनुपर्यगाः शम्याक्षेपेणविधिनातदासीत्किंनुतेहृदि २४ ॥ ॥

वीशम्याप्रक्षेपविमितातवदेवयज्ञनानामपर्याप्ताभूदित्यर्थः पर्यगाःपरिहृत्यगतवान् २४ २४ ॥ ॥ ॥ ॥ ॥

राम०
१५७

भृंगारः कनकालुकारसौवर्णाउदपात्रविशेषः २६ गुहायां मूलप्रकृतौ निहितानि ३० ऊनंपंचाशत्तमः प्रव्याहाराय प्रकृष्टोध्याये ४५ ॥ ॥ ॥

नैतेपश्यामि भृंगारं नछत्रंव्यजनेनच ब्रह्मदत्तांचतेमालांनपश्याम्यसुराधिप २५ बलिरुवाच नत्वंपश्यसिभृंगारंनछत्रंव्यजने
नच ब्रह्मदत्तां चमेमालांनत्वंद्रक्ष्यसिवासव २६ गुहायांनिहितानित्वंममरत्नानिपृच्छसि यदामेभविताकालस्तदात्वंतानिद्रक्ष्य
सि २७ नत्वेतदनुरूपंतेयशसोवाकुलस्यवा समृद्धार्थोसमृद्धार्थंयन्मांकत्थितुमिच्छसि २८ नहिदुःखेषुशोचंतेनप्रहृष्यं
तिचर्द्धिषु कृतप्रज्ञाज्ञानतृप्ताःक्षांताःसंतोमनीषिणः २९ त्वंतुप्राकृतयाबुध्यापुरंदरविकत्थसे यदाहमिवभावीस्यास्तदा
नैवंवदिष्यसि ३० शांतौमोक्षधर्मेषुबलिवासवसंवादे॥ ॥भीष्मउवाच पुनरेवतुतंशक्रःप्रहसन्निदमब्रवीत् निःश्वसंतंय
थानागंप्रव्याहाराय भारत १ शक्रउवाच यद्यानसहस्रेणज्ञातिभिःपरिवारितः लोकान्प्रतापयन्सर्वान्यास्यस्मानवित
र्कयन् २ दृष्ट्वासुलभरांचेमामवस्थामात्मनोबले ज्ञातिमित्रपरित्यक्तःशोचस्याहोनशोचसि ३ प्रीतिंप्राप्यातुलांपूर्वंलो
कांश्चात्मवशेस्थितान् विनिपातमिमंवाह्यंशोचस्याहोनशोचसि ४ बलिरुवाच अनित्यमुपलक्ष्येहंकालपर्यायधर्मतः त
स्माछक्रनशोचामिसर्वंह्येवेदमंतवत् ५

इदंस्वरूपंत्वंनापराधादपितुकालपर्यायादित्यर्थः ६ जीवितंजीवत्यनेनेतिलिंगंशरीरंस्थूलंजातास्वभावेनादेहाः स्थूलसूक्ष्मभेदेनद्विविधाः तत्रजलालाबुकान्यायेन
मरणेपिलिंगस्यस्थूलदेहांतरसंगतेरपरिहृतत्वात्। स्थूलवल्लिंगमप्युत्पन्नंनाप्याप्स्यते। अन्नमयंहिसोम्यमनआपोमयः प्राणस्तेजोमयीवागितिश्रुतेः विनश्यतः मो
क्षेऽपमत्यर्थः स्थूलसूक्ष्मदेहधर्मैः गर्भवासजन्मशयनादिमत्त्वप्रभृतिभिर्दृश्यद्रष्टाहंततोविविक्तमात्मानंअजानन्व्याकुलीभवामीत्यर्थः ७ एतदेवाहनहीतिईदृशंभावंग

-158

अंतवंतइमेदेहाभूतानांचसुराधिप तेनशक्रनशोचामिनापराधादिदंमम ६ जीवितंचशरीरंचजात्यैवसहजायते उभेसहविवर्द्धे
तेउभेसहविनश्यतः ७ नहीदृशमहंभावमवशःप्राप्यकेवलं यदेवमभिजानामिकाव्यथामेविजानतः ८ भूतानांनिधनंनि
ष्ठास्रोतसामिवसागरः नैतत्सम्यग्विजानंतोनरामुह्यंतिवज्रधृक् ९ येत्वेवंनाभिजानंतिरजोमोहपरायणाः तेकृच्छ्रंप्राप्यसीदंतिबु
द्धिर्येषांप्रणश्यति १० बुद्धिलाभात्तुपुरुषःसर्वंनुदतिकिल्बिषं विपाप्मालभतेसत्त्वंसत्त्वस्थःसंप्रसीदति ११ ततस्तुयेनिवर्तंतेजा
यंतेवापुनःपुनः कृपणाःपरितप्यंतेतैरर्थैरभिचोदिताः १२ १२

णां
दृशंदेहंप्राप्याहंविवशोदेहधर्मैःपराभूतोनभवामीतियोजना। एवंआत्मनोऽसंगत्वं ८ भूतानांस्थूलसूक्ष्माणांनिधनंमरणंनिष्ठापरागतिः नत्वात्मनः नमुह्यंतीति
संबंधः ९ भूतोनश्यतिअतःतद्वत्तरतीत्याहद्वाभ्यांयेत्विति १० सत्त्वस्थःबुद्धिमान्संप्रसीदतिमोहजंकालुष्यंत्यजति ११ ततस्तत्त्वान्निवर्तंतेरजस्तमोभ्यामभिभू
यंतइत्यर्थः अर्थैःकामादिभिः १२

स्वमतद्वैलक्षण्यमाह। अर्थेति १३ अत्र युक्तिमाह हन्तारमिति हन्तारं निर्जीवं देहं हंति न तु जीवं एतेन देहस्यात्मत्वं निरस्तं यो हंति देहादन्योहं हंतेत्यभिमानी कर्त्ता सोपि
हत एव दृश्यत्वाद्देहवदात्मत्वेन मतो यस्मान्नापि जड एव उभौ यो हंति बुध्यात्मवादी यो हतो देहात्मवादी १४ हंतीति हत्वा जयतीति जित्वा उभयत्राप्यन्येभ्योपि दृ
श्यत इति क्त्वानिपातुगागमः। आद्येऽनुनासिकलोपोधिकः हंता जेता च पुरुषाधमः धीतादात्म्यापन्नः कर्तृत्वाभिमानी पुरुषाभासः न तु मुख्यः पुरुषः स हि अकर्त्तैवायो

अर्थसिद्धिमनर्थं च जीवितं मरणं तथा सुखदुःखफलं चैव न द्वेष्मि न च कामये १३ हंता हंति हतो ह्येव यो नरो हंति कंचन उभौ तौ न वि
जानीतो यश्च हंति हतश्च यः १४ हत्वा जित्वा च मघवन् यः कश्चित्पुरुषायते अकर्त्ता ह्येव भवति कर्त्ता ह्येव करोति तत् १५ को हि
त्कालपर्यंतं यथा येन प्रकारेणावर्तते तत्तद्भूतं एकस्तछब्दस्तावछब्दार्थः। तावत्कालपर्यंतं तावद्गुणं स्मृतं। अत्र पूर्वोद्दिष्टक्रमाव्यवस्था स्थूलसूक्ष्मभू
तेष्वेव ज्ञेया स्थूलेषु तु पंचीकरणादूर्ध्वं सर्वाण्यपि पंचगुणानि त्रिवृत्करणपक्षे च आकाशवायू क्रमेणैकद्विगुणकौ। इतराणि पंचगुणान्येवेत्या

181

आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ४ आकाशात्तु विकुर्वाणात्सर्वगंधवहः शुचिः बलवाञ्जा
यते वायुस्तस्य स्पर्शो गुणो मतः ५ वायोरपि विकुर्वाणाज्ज्योतिर्भवति भास्वरं रोचिष्णु जायते शुक्लं तद्रूपगुणमु
च्यते ६ ज्योतिषोपि विकुर्वाणाद्वंत्मायो रसात्मिकाः अद्भ्यो गंधगुणा भूमिः पूर्वेषां सृष्टिरुच्यते ७ गुणाः
पूर्वस्य पूर्वस्य प्राप्नुवंत्युत्तरोत्तरं तेषां यावथ्यायचतत्तत्तावद्गुणं स्मृतं ८ ॥ ॥ ॥ ॥

शयः तत्र पंचीकरणं तु आकाशादीन्प्रत्येकं द्वेधा विभज्य एकस्मिन्भागे स्वेतरभूतचतुष्टयस्यार्द्धीकृतस्य चतुरश्चतुर्थांशान्प्रक्षिप्य एकैकं स्थूल
सूक्ष्मं भूतं भवति तथा त्रिवृत्करणं तेजोबन्नानि प्रत्येकं द्वेधा विभज्य एकस्मिन्नर्द्धे स्वेतरयोरर्द्धार्द्धं प्रक्षिपेदिति एवं संकीर्णेष्वपि आकाशादिसंज्ञाः
स्वभागाधिक्यादिति ज्ञेयं ८ ॥ ॥

एम०
१८१

ननु पंचीकरणपक्षे एकस्मिन्नाकाशे गंधाद्यनुपलंभः कथं वा त्रिवृत्करणपक्षे वायौ गंधोपलंभ इत्याशंक्याद्यः स्थूलाकाशस्याप्रत्यक्षत्वेन तद्गतगं
धादीनामप्यप्रत्यक्षत्वमित्यभिसंधाय द्वितीयं प्रत्याह उपलभ्येति अप्स्विति दृष्टांतार्थं यथाऽप्सु स्थूलत्वेनागादिगंधस्तूपलभ्यते एवं वायावपि आ
गंतुकद्रव्यसंपर्कज एव गंधोऽनुभूयते न तु तज्जन्य इति दूरस्थद्रव्यसंपर्कज इत्यर्थः अनैपुणा[illegible]दिति सूक्ष्मदर्शिनामेवायं पूर्वपक्षो न विदुषां करणादी
नां ते हि युक्तिबलेनैव वायौ गंधाभावं निश्चिन्वंतीति दर्शितं ९ सप्तमनःसहिताः शब्दितौ महदहंकारौ सूक्ष्माकाशादयश्च असमागम्य अमि[illegible]लि

उपलभ्याप्सु चेद्गंधं केचिद्ब्रूयुरनैपुणात् पृथिव्यामेव तं विद्यादपां वायोश्च संश्रयं ९ एते सप्तविधा
त्मानो नानावीर्याः पृथक्पृथक् नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः १० ते समेत्य महात्मा
नो ह्यन्योन्यमभिसंश्रिताः शरीराश्रयणं प्राप्तास्ततः पुरुष उच्यते ११ शरीरं श्रयणाद्भवति मूर्तिमत्सो
डशात्मकं तमाविशंति भूतानि महांति सह कर्मणा १२ ॥ ॥ ॥ ॥ ॥

२

त्वा १० महात्मानो व्यापकाः समेत्य त्रिदंडविष्टंभवदन्योन्यबलमाश्रित्यैकीभूयेत्यर्थः पूरिति शरीरस्य नाम तत्र वसतीति पुरुष इत्यवयवार्थः ११
षोडश पंच स्थूलभूतानि समनस्कान्येकादशेंद्रियाणि च तदात्मकं शरीरं षोडशानां स्पष्ट्यस्कव्यक्तात्मकं मन इति मनःसहिते वोक्तमिति न तेषां एष
कित्वं द्विसार्किकाभिमतमतं व्यातं षोडशात्मकं पुरुषं तदिति पाठे स्थूलशरीरोपक्षपात्जीवत्वं भ. तानि सूक्ष्माणि महांति महत्तत्त्वानि भुक्ता
वशिष्टकर्मसहितानीति। बहुत्वं प्रतिपुरुषं महदादीनां भिन्नत्वप्रतिपादनार्थं तेनैतत्पुरुषोपाधिसूक्ष्मा बुद्धिरेव कर्माश्रयस्तदुपलक्षितोऽहंका

मो०
१८२

182

एवं स्थूले शरीरे लिंगशरीरस्य प्रवेशमुक्त्वा तत्र चैतन्यप्रवेशमाह। सर्वेति। आदिकर्त्ता सर्वभूतानि स्वोपाधिमायैकदेशभूतानि उपादाय तत्र प्रविशतीति विपरिणामे
नानुषज्यते। एतेन तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेरर्थो दर्शितः। तपसः ज्ञानमयस्यालोचनस्य चरणाय तथा च श्रुतिः परमेश्वरस्य तत्तद्रूपाद्यनुसरणं स्वस्वरू-
पख्यापनार्थमेवेत्याह रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति। तमेव उपाधिं प्रविश्य जीवभावमापन्नं "प्रजापतिं ब्रह्मेत्याहुस्तत्त्वमसीत्यादयः श्रुतयः
१३ तत्र हेतुमाह स वै इति। सः शरीरान्तःस्थः वै एव ततः शरीरप्रवेशानन्तरं। एतेन तदनुप्रविश्य सच्च त्यच्चाभवदित्यादि सत्यं चानृतं च सत्यमभवदिति। तथा
श्रुतेरर्थो दर्शितः। सत् पृथिव्यप्तेजांसि। त्यत् वाय्वाकाशौ। सत्यानृते घटरज्जुसर्पादी सत्यं ब्रह्मैवाभवदिति श्रुतिपदानामर्थः। एवमैश्वरीभूतमपीदं वीचयीमपी

सर्वभूतानि चादाय तपसश्चरणाय ह आदिकर्त्ता स भूतानां तमेवाहुः प्रजापतिं १३ स वै सृजति भू-
तानि स्थावराणि चराणि च ततः स सृजति ब्रह्मा देवर्षिपितृमानवान् १४ ॥ ॥ ॥

मिति द्विविधां सृष्टिमभिप्रेत्योक्तं अभियुक्तैः अन्या मांसमयी योषिदन्या काचिन्मनोमयीति। घटो मृन्मय धीमयाविति चात्र पाः सृष्टिद्वयवत्प्रलयद्वयमपि
विदुषो विदेहकैवल्यकाले स्वरूपेणागताः कलाः पंचदश प्रतिष्ठा इति। एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं यन्तीति च। कलाः
प्राणश्रद्धाखं वायुर्ज्योतिरापः पृथिवीन्द्रियमित्याद्याः तत्रैशी व्यावहारिकी सृष्टिर्दृष्टिमभिप्रेत्य प्रतिष्ठासु वाय्वादिषु तत्तदुपादानेषु प्राणादीनां प्रलयः
पुरुषान्तरप्रतीत्या उक्तः विद्वत्प्रतीत्या तु जैवीं प्रातिभासिकीं दृष्टिसृष्टिमभिप्रेत्य पुरुष एव कलाप्रलय उक्तः तस्माद्युक्तमुक्तं सृष्टिद्वयं १४ ॥

राम०
१८२

वपःपक्षी १५ अव्ययंआकाशादिव्ययंघटादिअपक्षपधर्मि १६ तेषांनरकिंनरादीनांप्राक्सृष्ट्यांयेरेषपांजेयांवा प्पापूर्वकल्पेहिंस्रत्वमपुनःक
ल्पांतरेपि [illegible] हिंस्रत्वमेवानुवर्त्ततेसूर्याचंद्रमसौधातायथापूर्वमकल्पयतदिवंचपृथिवींचांतरिक्षमथोस्वरितिश्रुति
रपिपूर्वकल्पसरूपाणेवैश्वरोमपिसृष्टिमाहान्यायोपिसमाननामरूपत्वाच्चावृत्तावप्यविरोधइति।मतिकल्पंइंद्रादीनांनामानिरूपाणिक

लोकान्नदीःसमुद्रांश्चदिशःशैलान्वनस्पतीन् नरकिंनररक्षांसिवयःपशुमृगोरगान् १५
अव्ययंचव्ययंचैवद्वयंस्थावरजंगमं १६ तेषांयेयानिकर्माणिप्राक्सृष्ट्यांप्रतिपेदिरे तान्ये
वप्रतिपद्यंतेसृज्यमानाःपुनःपुनः १७ हिंस्राहिंस्रेमृदुक्रूरेधर्माधर्मावृतानृते तद्भावि
ताःप्रपद्यंतेतस्मात्तत्तस्यरोचते १८

मर्णिचसमानान्येवअतस्तद्वाचिनांवैदिकशब्दानांव्रीह्यादिशब्दवज्जातिवाचित्वेनाऽनाधुनिकत्वेनवेदस्यनित्यत्वंनविरुध्यतेइतिसूत्रार्थः प्रति
कल्पंसृष्टिवैरूप्येतुकृतहानाकृताभ्यागमौप्रसज्येयातामित्येवकारार्थः १८

महाभूतेष्विति। धाता जगद्विंद्रजालविस्तारयिता। नानात्वं भुक्तिरजतवत्प्रतिपुरुषं भिन्नत्वं। महाभूतेषु वियदादिषु। इंद्रियार्थेषु रूपादिषु द्रव्याकृतिषु। भूतानां
जीवानां विनियोगं भोक्तृभोग्यभावेन संबंधं सर्वं दृष्टांतार्थमिदं यथा सुखाद्यनुभवः प्रतिपुरुषं नाना एवमनुभवविषयोपि महाभूतादिर्नानेत्यर्थः १९ धातैवे
त्येवकारव्यावर्त्यान्परपक्षाननुवदन्स्यति केचिदिति कर्मसु स्वस्वपुरुषस्य सामर्थ्यमस्तीति कर्मैव प्रधानमिति मीमांसकाः दैवं अदृष्टादि तदाग्रहाः एवं सदसत्फ

महाभूतेषु नानात्वमिंद्रियार्थेषु मूर्तिषु विनियोगं च भूतानां धातैव विदधात्युत १९ केचित्पुरुषकारं तु
प्राहुः कर्मसु मानवाः दैवमित्यपरे विप्राः स्वभावं भूतचिंतकाः २० पौरुषं कर्म दैवं च फलवृत्तिस्वभावतः
त्रय एते पृथग्भूता नविवेकं तु केचन २१ ॥

लदातार इति दैवज्ञाः स्वभाव एवेति स्वभाववादिनो बाह्याः २० एतेषां समुच्चयमतमाह पौरुषमिति। अपृथग्भूता इति छेदः दैवं कर्म स्वभावानुगृहीतं फ
लाय वर्त्तते। तत्र यत् एते समुदिता ननु एषां विवेकं पृथग्भावं एकैकस्य प्राधान्यं इच्छंति केचन २१ २१ २१ ॥ ॥

आर्हतमतमाह। एतमिति श्लोकपादत्रयेण। एतं विषयं भूतादीनां नानात्वे किं कारणमिति चिंताया विषयं एवमिति विशिष्य न ब्रूयुः न निर्वक्तुं शक्यमित्यर्थः
एवं नेत्यपि न ब्रूयुः अनिर्वाच्यत्वमपि नेत्यर्थः नन्वेकतरस्य न कर्मदैवयोः कारणत्वं सुवचं दुर्वचं वास्तु। समुच्चितयोस्तु सुवचमित्याशंक्याह उभे च न ब्रूयुरिति। अ-
स्तु तर्हि द्वयोरपि दुर्वचत्वमित्याशंक्याह अनुभे च न ब्रूयुरिति। उभयव्यतिरिक्तमपि कारणं नेत्यर्थः कर्मस्था इत्यार्हतानां यौगिकं नाम तेन हि कर्माष्टकवशाद्देवजीवा-
नां बंधः तप्तशिलारोहणादिना निर्जराख्येन धर्मेणैव च मोक्ष इति वदंति। सिद्धांतमाह सत्वस्थाः समदर्शिन इति। अयमर्थः श्रुतौ किं कारणं ब्रह्मेत्युपक्रम्य का-
लः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिंत्यमिति काल इति दैवज्ञानां स्वभाव इति परिणामवादिनां सांख्यानां नियतिरिति कर्मवादिनां मीमांसकानां

एतमेवं च नैवं च न चोभे नानुभे न च कर्मस्था विषयं ब्रूयुः सत्वस्थाः समदर्शिनः १२

स्प१

यदृच्छेत्यनियमवादिनामार्हतानां भूतानीति लोकायतानां पुरुष इति तटस्थेश्वरवादिनां च जगत्कारणविषये मतान्युपन्यैते ध्यानयोगानुगता अपश्यन्देवात्मश-
क्तिं स्वगुणैर्निगूढामिति अनुभवबलेन सिद्धांतः कृतः देवप्रकाशमानो य आत्मा प्रत्यगवस्तु तद्गतां शक्तिमेव कारणमाहुः स्वगुणैः सत्वरजस्तमोभिर्युक्तामपिप-
रोक्षादृशां नितरां गूढां। तस्याः कार्यं आत्मनो जगद्भानं प्रत्यक्षं सा तु न प्रत्यक्षा रज्जूरगहेत्वज्ञानवदिति श्रुत्यर्थः। तदेतदाह सत्वस्थाः रजस्तमोरहितेंऽतःक-
रणसत्वे संप्रज्ञातावस्थायां तिष्ठंतीति सत्वस्थाः योगिनः समं ब्रह्मैव कारणत्वेन द्रष्टुं शीलं येषां ते समदर्शिनः। ब्रह्मैव कारणमिति पश्यंतीत्यर्थः १२ ॥

ब्रह्मावाप्तेः साधनं फलं चाह सार्द्धाभ्यां तप इति। तपो योगः निःश्रेयसं मोक्षहेतुः शमः मनोनिग्रहः दमो बाह्येंद्रियनिग्रहः तेन तपसा तथा च श्रुतिर्योगिनां सर्व
कामावाप्तिं दर्शयति। विशुद्धसत्त्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च कामानिति। जयते प्राप्नोति कामान् २३ तपसेति तत् ब्रह्मदर्शनं ब्रह्मभावः स
र्वेश्वरत्वं च योगस्यैव फलमित्यर्थः अध्यगीषत प्रागजन्मन्यधीतान् योगबलेनैव स्मृतवंतः २४ अनादीति श्लोकस्य उत्तरार्द्धं आदौ वेदमयी दिव्या यतः सर्वाः

तपो निःश्रेयसं जंतोस्तस्य मूलं शमो दमः तेन सर्वानवाप्नोति यान्कामान्मनसेच्छति २३ तपसा तदवाप्नोति यद्भूतं
सृजते जगत् स तद्भूतश्च सर्वेषां भूतानां भवति प्रभुः २४ ऋषयस्तपसा वेदानध्यैषंत दिवानिशं अनादिनिध
ना विद्या वागुत्सृष्टा स्वयंभुवा २५ ऋषीणां नामधेयानि याश्च वेदेषु सृष्टयः नानारूपं च भूतानां कर्मणां च प्रवर्त्तनं
२६

प्रवृत्तय इति। तेषां कचित् तद्दर्शनेपि शारीरकसूत्रभाष्यादौ पुस्तकांतरेषु च दर्शनात्। स्वयंभुवा यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै
इति श्रुतेः परमेश्वराल्लब्धवेदेन तत्तच्छिष्यप्रशिष्यसंप्रदायक्रमेण प्रवर्तिता २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

189

वेदशब्देभ्य एवेति। लोके हि दृष्टादृष्टद्वारकं शब्दानामर्थकारित्वं क्लृप्तं यथा विश्वादिमूर्त्तिसिसृक्षतः शिल्पिनः तदाकृतिप्रतिपादकागमस्मरणं मूले।
यथा वा तक्षकदष्टं वटं जीवयितुमिच्छतः विषघ्नमंत्रोच्चारणं। इंद्रजालपुरं सिसृक्षतो वा शाबरमंत्रोच्चारणं। एवमिहापि सम्भूरिति व्याहरन्स भूमिमसृज
तेति श्रुत्या दृष्टद्वारेवार्थोत्पत्तिं प्रति शब्दस्य हेतुत्वमुक्तं। तथा एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिंदव इति पितृ्स्तिरः पवित्रमिति

वेदशब्देभ्य एवादौ निर्मिमीते स ईश्वरः नामधेयानि चर्षीणां या
श्च वेदेषु सृष्टयः शर्वर्यन्ते सुजातानामन्येभ्यो विदधात्यजः २८

ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रं अभिसौभगायेत्यन्याः प्रजा इति श्रुतेः सृज्यमानपदोच्चारणात् एव देवादिसृष्टिर्गम्यते। नन तु तत्तदर्थस्मारकत्वरूप
दृष्टद्वारेति सर्वथापि वेदशब्दा एव सृष्टिरित्यर्थः २७ शर्वर्यन्ते सर्गादावित्यर्थः २८

185

नामेति। आत्मसिद्धिः आत्मनो मुक्तिर्दशभिः क्रमैः साधनैर्नामादिभिः संहितावेदेषु प्रोच्यते। तत्र नाम वा ऋग्वेद इत्यादिश्रुतेर्नामेति वेदाध्ययनं भेदः अर्हो वा एष आत्मनो यज्ञमस्तीति श्रुतेः पूर्वं हुतस्य सम्यस्य तेजोहारकरणेनार्द्धत्वसंपादनं गार्हस्थ्यमिति यावत्। तपः कृच्छ्रचान्द्रायणादि वानप्रस्थाश्रमाद्य सर्वः कर्म संध्योपासनादि सर्वाश्रमसाधारणं यज्ञो ऽग्निष्टोमादिः आख्या कीर्त्तिकरं तटाकारामादि आपूर्त्तारव्यं आलोक आलोचनं मानसं ध्यानादि धर्मः स च त्रिविधः यज्ञांगेषु अश्वादिषु उषा वा अश्वस्य मेध्यस्य शिर इत्यादि शास्त्रविहिता विराडादिदृष्टिरेका अध्यात्मं जा... ठरादि प्रतीकेषु वैश्वानरारव्यकारणब्रह्मदृष्टिरपरा विधा दहरा घहं ब्रह्मोपास्त्या शुद्धस्वरूपावगतिस्तृतीया तत एव सिद्धिः कैवल्यारव्या जायते एवं मुक्तिरिति दशभिः क्रमैः क्रमेण उल्लंघ्यते सं

नामभेदस्तपः कर्म यज्ञारव्यालोकसिद्धयः आत्मसिद्धिस्तु वेदेषु प्रोच्यते दशभिः क्रमैः
२९ यदुक्तं वेदवादेषु गहनं वेददर्शिभिः तदन्तेषु यथायुक्तं क्रमयोगेन लक्ष्यते ३० ॥

सारदुःखमेभिरेभिः २९ इतोप्यन्तरंगं मोक्षसाधनमाह। यदुक्तमिति गहनं दुःखगाहं ब्रह्म वेदवादेषु वेदोक्तकर्मसु प्रस्तावादि देवतात्वेन उक्तं तदन्तेषु वेदान्तेषु उपनिषत्सु च यथायुक्तं विस्पष्टतरं उक्तं तद्ब्रह्म क्रमयोगेन पूर्वोक्तेन नामादिदशकेन लक्ष्यते तत्त्वमस्यादिवाक्येषु तत्त्वंपदवाच्यार्थयो विशेषणांशभूतमायांतःकरणांशप्रहाणपासीयं देवदत्त इत्यत्र तदेतद्देशकालरूपविशेषणांशप्रहाणपाअखंडं देवदत्तस्वरूपमिव प्रत्यगभिन्नं ब्रह्म लक्ष्यते। न तु शब्देन सूंगग्राहिकया ऽयं गौरयं महिष इतिवदावेद्यते यतो वाचो निवर्त्तंत इति श्रुतेर्ब्रह्मणो ऽपदार्थत्वादवाक्यार्थत्वाच्च ३० ॥ ॥

तत्र ब्रह्मणो लक्ष्यं स्वरूपं दर्शयति कर्मज्ञ इति देहिनः देहाभिमानिनो जीवस्य पृथग्भावः पृथक्त्वं द्वैतदर्शनमिति यावत् तत् कर्मजं कर्मेऽपरमे सुषुप्तौ समाधौ च नास्ती
त्यर्थः द्वंद्वैः सुखदुःखशीतोष्णमानापमानादिभिर्युक्तोऽपि तेन च पृथग्भावं आत्मसिद्धिः आत्ममोक्षरूपः पुरुषः एतेन मुक्तमोक्षयोरभेदवचनेन नानागंतुकं स्वस्व
रूपमात्रं मुक्तिरिति मुक्तं विज्ञानात् सम्यक् वाक्यज्ञात ज्ञानात् जहाति ज्ञाता ज्ञानज्ञेयभावरूपं भेदं त्यजतीत्यर्थः ३१ भेदत्यागोपायमाह द्वइति शब्दब्रह्म प्रणवः

कर्मजोऽयं पृथग्भावो द्वंद्वयुक्तोऽपि देहिनः आत्मसिद्धिस्तु विज्ञानाज्जहाति पुरुषो बलात् ३१ द्वे ब्रह्मणी वे
दितव्ये शब्दब्रह्म परं च यत् शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ३२ आलंभयज्ञाः क्षत्राश्च हवि
र्यज्ञा विशः स्मृताः परिचारयज्ञाः शूद्रास्तु तपोयज्ञा द्विजातयः ३३ त्रेतायुगे विधिस्त्वेष यज्ञानां न कृते
युगे द्वापरे विप्लवं यांति यज्ञाः कलियुगे तथा ३४

निष्णातः प्रणवोपास्तिकुशलः परं मात्रात्रयातीतं तुरीयं ३२ प्रणवोपास्तिमेव इतरनिंदापूर्वकं स्तौति। आलंभेति। आलंभः पशुहिंसा हविः व्रीह्यादिकं प
रिचारः त्रैवर्णिकसेवा तपो ब्रह्मोपासनं ३३ विधिरप्रवृत्तप्रवर्तनं तच्च त्रेतायामेव न तु कृते स्वत एव तत्र तत्सिद्धेः अत्र धर्ममनुतिष्ठन् पुरुषः कृतो।
धर्मानुष्ठानमारभमाणस्त्रेता। आरब्धेऽपि शिथिलद्वापरः तद्विमुखः कलिरिति पूर्वोदाहृत तत्कृतस्यपीनप्रसन्नर्तव्यः ३४ ३४ ॥ ॥

त्रेतायुगे इत्येतं श्लोकं व्याचष्टे पृथगित्यादिना पृथग्धर्माः पृथक्त्वं भेदः तद्वंतः पृथग्धर्मिणः द्वैतिनः तदन्ये अपृथग्धर्मिणः अद्वैतनिष्ठाः मर्त्याः तप एव योगमे
व कृतयुगेऽनुतिष्ठंतीति शेषः ऋगादीनि काम्याइष्टीश्च सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति शास्त्रोक्ताः पृथक्कृतयोमिरालोचनैः दृष्ट्वा तत्फलं अनात्मभूत
स्वर्गादिरूपं दृष्ट्वा तत्परित्यज्य योगपरा एव बभूवुरित्यर्थः २५ त्रेतायां धर्मनिरतास्ततः प्रहत्ममावात् तत्र यंतारः धर्मशास्तारः वेदाश्च संहतापसा घनुष्ठा

अपृथग्धर्मिणो मर्त्या ऋक्सामानि यजूंषि च काम्यामिष्टिं पृथग्दृष्ट्वा तपोभिस्तप एव च ३५ त्रेतायां
तु समस्तास्ते प्रादुरासन्महाबलाः संयंतारः स्थावराणां जंगमानां च सर्वशः ३६ त्रेतायां संहता वेदाय
स्तावर्णाश्रमास्तथा संरोधादायुषस्त्वेते ह्रस्यंते द्वापरे युगे ३७ ह्रस्यंते न च ह्रस्यंते वेदाः कलियुगेऽखि
लाः उत्सीदंते सयज्ञाश्च केवला धर्मपीडिताः कृते युगे यस्तु भवन्ब्राह्मणेषु प्रदृश्यते आत्मवत्सु तपोव
त्सु कृतवत्सु प्रतिष्ठितः ३८

तापसन्नह्यश्चासन्निति सार्द्धश्लोकार्थः ३६ संरोधादिति सार्द्धः स्पष्टार्थः ३८ कृतादिशब्दानां कालवाचित्वं प्रसिद्धवत्कृत्याह कृते इति कृतयुगश्च
तुष्पाद्धर्म उक्तः स इदानीमपि ब्राह्मणेषु दृश्यतेऽतस्त एव कृतयुगरूपा इति भावः आत्मवत्सु जितचित्तेषु तपोवत्सु योगनिष्ठेषु कृतवत्सु वेदांतश्रव
णादिमत्सु ३९

त्रेतायुगव्यवहारमाह। स धर्मैमिति। यथाधर्मं आचारानतिक्रमेण स्वधर्मस्थाः अग्निहोत्रादिपराः वेदान्वदंतो वेदवादाः वैदिकाः यथागमं वेदोक्तक्रमेण रागेण धर्मो
यज्ञादिः तत्सहितं व्रतं एकादश्युपवासादि संयोगस्तीर्थक्षेत्रप्राप्त्यादि तत्सर्वं तैर्विक्रीयते वैदिकात्रपि स्वर्गकामा एव यक्ष्यंते। द्वापरे पुत्रादिकामा एव का
कलौ शत्रुमरणादिकामा एवेति युगे युगे इत्यस्यार्थः ७० तिष्ठंतीति स्थानि स्थावराणि। जंगमानि च स्थानि च [illegible] जंगमस्था
नि भूयांसि वृद्धिमंति राशानि। तथा युगे युगे धर्मा अधर्माश्च वर्द्धंते ह्रसंति च ७१ ऋतुलिंगानि शीतोष्णादीनि तथा ब्रह्महरादिष्वपि सृष्टिसंहारसामर्थ्या

स धर्मव्रतसंयोगं यथाधर्मं युगे युगे विक्रीयंते स्वधर्मस्था वेदवादा यथागमं ७० यथा विश्वानि भूतानि वृक्षा
भूयांसि प्रावृषि सज्यंते जंगमस्थानि तथा धर्मा युगे युगे ७१ यथर्तुष्वृतुलिंगानि नानारूपाणि पर्यये दृश्यंते ता
नि तान्येव तथा ब्रह्महरादिषु ७२ विहितं कालनानात्वमनादिनिधनं तथा कीर्त्तितं तत्पुरस्तात्ते तत्सूते चात्ति च
प्रजाः ७३ दधाति प्रभवति स्थानं भूतानां संयमो मतं स्वभावेनैव वर्त्तंते द्वंद्वयुक्तानि भूरिशः ७४ ॥ ॥ ॥

निवर्द्धंते ह्रसंति चेत्यर्थः ७२ कालनानात्वं चतुर्युगात्मकस्य पुरुषस्य नानात्वं धर्मादिवृद्धिह्रासभेदेन प्रपंचितं तच्चानादिनिधनं सत् प्रजाः सूते वर्द्धयति अ
त्ति च संहरति च ७३ दधातीति यानि भूतानि चतुर्विधानि स्वभावेनैव द्वंद्वयुक्तानि सुखदुःखादिमंति वर्त्तंते तेषां भूतानां संयमः कालः स्थानं अधिष्ठानं
भवतं स एव च तानि भूतानि दधाति धारयति पोषयति च तथा स एव च भूजानि भवति स्वयमेव भूतात्मेत्यर्थः ७४ ॥ ॥ ॥ ॥

सर्गेतिासमयएवसर्गादिकंदधातिभवतीतिचानुषज्यतेनकेवलंमत्तात्मैवकालः अपितुसर्गाद्यात्मापीत्यर्थः सर्गःसृष्टिः कालोदृशादिः क्रियायज्ञाद्याद्दिः वेदाः तत्प्रकाशाःकर्तात्तदनुष्ठाता कार्यंदेहादिपरिस्पंदः क्रियाफलंस्वर्गः सर्वमेतत्कालात्मापुरुषएवेत्यर्थःतथाचश्रुतिः पुरुषएवेदंसर्वमिति ४५ शुकानुप्रश्नेऽष्ट पंचाशत्तमः॥ ॥ क्रमप्राप्तंप्रलयमाह। प्रत्याहारमितिप्रतीपंउत्पत्तिक्रमविपरीतंआहरणंप्रत्याहारः ईश्वरः कालात्मा। अध्यात्मं आत्मनि सूक्ष्मंकारणं॥

सर्गकालक्रियावेदाःकर्ताकार्यंक्रियाफलं प्रोक्तंतेपुत्रसर्वंवैयन्मांत्वंपरिपृच्छसि ४५ शांतौमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥ व्यासउवाच प्रत्याहारंतुवक्ष्यामिशर्वर्यादौगतेहनि यथेदंकुरुतेध्यात्मंसुसूक्ष्मंविश्वमीश्वरः १ दिविसूर्यास्तथासप्तदहंतिशिखिनोर्चिषः सर्वमेतत्तदार्चिर्भिःपूर्णंजाज्वल्यतेजगत् २ पृथिव्यांयानिभूतानिजंगमानिध्रुवाणिच तान्येवाग्रेप्रलीयंतेभूमित्वमुपयांतिच ३ ततःप्रलीनेसर्वस्मिन्स्थावरेजंगमेतथा निर्वृक्षानिस्तृणाभूमिर्दृश्यतेकूर्मपृष्ठवत् ४ भूमेरपिगुणंगंधमापआददतेयदा आत्तगंधातदाभूमिःप्रलयत्वायकल्पते ५ आपस्तत्रप्रतिष्ठंतिऊर्मिमत्योमहास्वनाः सर्वमेवेदमापूर्यतिष्ठंतिचचरंतिच ६

वस्थं १ संकर्षणमुखोद्भूतस्यशिखिनोग्नेरर्चिषःसंप्रतिसंबंधः। अर्चिभिः सौरीभिराग्नेयीभिश्चज्वालाभिः २ ध्रुवाणिस्थावराणि ४ गंधंकाठिन्यहेतुंघृतवद्भूमिः काठिन्यंतत्काजलमात्रंभवतीत्यर्थः प्रलयत्वायकारणभावाय ६

आपोपि आत्तगुणाः अग्निनाशोषितरसाः अग्निमात्रं भवंति ८ रूपं वायुराददते। आङ्‌ःपूर्वस्य ददातेः इत्यस्य रूपं ९ स्वनं शब्दतन्मात्रं १० नादः शब्दस्य सर्वं रूपं वर्णविभागहीनं ११ सर्वेषु लोकेषु वाय्वादिषु दृश्येषु प्रणादितं शब्दोपस्पन्दनया १२ मनसः सकाशात् व्यक्तं स्फुटीभूतं शब्दं मनो ग्रसति अतः मन एव

अपामपि गुणं तात ज्योतिराददते यदा आपस्तदात्वात्तगुणा ज्योतिःषूपरमंति वै ७ यदादित्यं स्थितं मध्ये गूहंति शिखिनोर्चिषः सर्वमेवेदमर्चिर्भिः पूर्णं जाज्वल्यते नभः ८ ज्योतिषोपि गुणं रूपं वायुराददते यदा प्रशाम्यति ततो ज्योतिर्वायुर्दोधूयते महान् ९ ततस्तु स्वनमासाद्य वायुः संभवमात्मनः अधश्चोर्ध्वं च तिर्यक् च दोधवीति दिशो दश १० वायोरपि गुणं स्पर्शमाकाशं ग्रसते यदा प्रशाम्यति तदा वायुः खं तु तिष्ठति नादवत् ११ अरूपमरसस्पर्शमगंधं न च मूर्तिमत् सर्वलोकप्रणादितं खं तु तिष्ठति नादवत् १२ आकाशस्य गुणं शब्दमभिव्यक्तात्मकं मनः मनसो व्यक्तमव्यक्तं ब्राह्मः संप्रतिसंचरः १३

अभिव्यक्तात्मकं शब्दादिस्थूलसर्वदृश्यरूपं तस्मात्तत्र अव्यक्तं सूक्ष्मं एष मनोऽवसानः प्रतिसंचरः प्रलयः ब्राह्मः विराट्‌संबंधी मनः प्रजापतिमसृजतेति श्रुतेः मनः कल्पितो विराट् मनस्येव लीयत इत्यर्थः १३

सूत्रात्मप्रलयमाहात्तदात्मगुणानितिद्वाभ्यांतत्रविराड्पादानंअस्मदीयंपरिच्छिन्नाभिमानिमनःसर्वंकर्मआत्मगुणंनिःसीमज्ञानवैराग्यैश्वर्यधर्मात्मिकंगौण
कर्मआविश्यअंतर्भावितण्यर्थोयंप्रवेश्यग्रसतिचंद्रमाःहेरामगर्भीयंसमष्टिमनःएवंव्यष्टिमनसिउपरतेसतिकुत्रचंद्रमस्यधिष्ठानेतत्रश्चउपतिष्ठतेएतंपु
रुषंआत्मगुणाइतिशेषःअयमर्थःद्वेब्रह्मणीवेदितव्येइत्युपक्रमात्परब्रह्मप्राप्तिकामःप्रणवाख्यमपरंब्रह्मोपासीनःभूतसृष्टोउक्तक्रमेणस्थूल
भूतात्मकविराडंअकारार्थंसंहृत्यसर्वात्मनास्थूलदेहंविस्मृत्यमनोमात्रेणास्थापयतियावता।तच्चसूक्ष्मवंधनमनश्चंद्रसंज्ञंउकारार्थतांप्रतिपन्नंसदैश्वर्य

तदात्मगुणमाविश्यमनोग्रसतिचंद्रमाः मनस्युपरतेचापिचंद्रमस्युपतिष्ठते १४ तंतु
कालेनमहतासंकल्पंकुरुतेवशे चित्तंग्रसतिसंकल्पस्तच्चज्ञानमनुत्तमं १५ ॥

पुक्तंभवति।यथोक्तं।विगतवासनमाशुविपाशतामुपगतंमनआत्मतपोदितं।यदिभिर्वांछतितद्भवतिक्षणात्सकलशक्तिमयोहिमहेश्वरइति १४ तंतु
चंद्राख्यसमष्टिमनउपाधिंसंकल्पंसंकल्पमात्रशरीरंउकारार्थंमहताकालेनवशीकुरुते।मकारार्थकारणेप्रविलापयतियोगी।यतःससंकल्पश्चित्तंविचा
रात्मिकांचेतोवृत्तिंग्रसति।अतःसंकल्पनिरोधोदुःशकःतच्चसंकल्पवशीकरणंमकारार्थत्वेनाहमेवेदंसर्वमस्मीत्येवंरूपेणावस्थानमेवज्ञानंअनुत्तमंश्रेष्ठं १५

ईशस्यापित्वयमाहद्वाभ्यां कालइति। कालः अर्द्धमात्रार्थः शोधितत्वंपदार्थः अस्मीत्येतावन्मात्रप्रत्ययात्माविज्ञानेउक्तलक्षणंसार्वात्म्यानुभवात्मकमतीशंगिर
तिगिलतिग्रसतीत्यर्थः कालमपिबलात्स्याशक्तिर्ग्रसति अयमर्थः अर्द्धमात्रायाः परतः बिंदुनादशक्तिशांतात्याख्याःसन्तस्त्रोवस्थाः तत्राकारउकारमकारानपे
क्ष्यअर्द्धमात्रातुरीयां तामपपेक्ष्यशक्तिर्युत्पादवती जीवन्मुक्तावस्थातुरीयाशांतातातुविदेहकैवल्यंपुनरुत्थानाभावात् नगरानीया तथाचईश्वरग्रासरूकरे
प[illegible]इतिश्रुतिः अस्यायमर्थः विश्वतैजसप्राज्ञतुरीयेषुअकारोकारमकारार्द्धमात्रार्थेषुप्रत्येकमेकेकस्मिन्विश्वादिचतुष्ट[illegible]यमस्तीतितेनेषोडशभेदाभ

कालोगिरतिविज्ञानंकालंबलमितिश्रुतिः बलंकालो
ग्रसतितुतंविघाकुरुतेवशे १८

वंतितत्रतुरीयोयक्तरूपोजागरणंबिंदुर्नाशक्तयउत्तरंसूक्ष्मत्वात्स्वप्नसुषुप्तितुरीयरूपाः तत्रमकारार्थस्यईश्वरस्यग्राससकरीयोऽर्द्धमात्रातस्यापितुरीयः शक्तिरि
ति।साशक्तिरिहबलशब्देनोच्यते।बिंदुनादयोः कालएवांतर्भावंविवक्षित्वाकालंबलमित्युक्तं। अत्रशंकतेबलंकालोग्रसतितुइतितुशब्दउक्तार्थनिवारणार्थः
अस्मीतिजीवानुभवेनब्रह्मणोपलापः क्रियतइत्यर्थः। उत्तरमाहतमितितंकालंविघानेहनानास्तिकिंचनेतिशास्त्ररूपात्अस्मीत्यस्यापिबाधिकासुषुप्तादिदृष्टं
तेनवशेकुरुते। अस्मितामलयसमसमुद्योदयप्रत्यक्षत्वाच्चनद्विशिष्टआत्मेत्यर्थः १८

मो०
१८९

109

विद्याक्रममाह आकाशस्येति। यदा विद्या कालं वशे कुरुते तदा आकाशस्य गुणं घोषं नादं अर्द्धमात्राबिंदुनादक्रमेणातुरीयस्य तत्तीयं ईश्वरं आत्मनि
तद्रूपे कुरुते प्रविलापयति। ततः घोषलयाधिष्ठानं अव्यक्तं घोषादप्यतीतत्वात् परं घोषांतं शब्दब्रह्मापेक्षया श्रेष्ठात देव च शाश्वतं नित्यं निर्दिष्टं अनुत्तमं नास्ति उत्त
मं चरमं यस्मात्तत्तथा। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति श्रुतेः १७ एवमिति सैव प्रतिसंचरः प्रलय उक्तः तत्स्वरूपं तु सर्वाणि भूतानि ब्रह्मण्येव निबा
धायां सामानाधिकरण्यं रज्जूरगवदीप्सरं तत्सर्वभूतबाधनं ब्रह्मैवावशिष्यते स प्रलयो न तु घटध्वंसवन्निवृत्तिमात्रं १८ एतदेव शास्त्रप्रतिपाद्यं वस्तुतत्वमित्याह

आकाशस्य तदा घोषं तं विद्वान्कुरुतेत्मनि तदव्यक्तं परं ब्रह्म तच्छाश्वतमनुत्तमं १७ एवं सर्वाणि भूतानि ब्रह्मण्येव प्रतिसंचरः
यथावत्कीर्तितं सम्यगेवमेतदसंशयं बोध्यं विद्यामयं दृष्ट्वा योगिभिः परमात्मभिः १९ एवं विस्तारसंक्षेपौ ब्रह्माव्यक्ते पु
नः पुनः युगसाहस्रयोरादावह्नो रात्र्यास्तथैव च २० शांतौ मोक्षधर्मेषु भुकानुप्रश्ने ॥ ॥ ॥ ॥ ॥

यथावदिति बोध्यं बोधयितुं योग्यं अन्वर्थनामानं शिष्यं विद्यामयं आसौ लोके येन विद्यार्पितास्तद्विद्यामयं दृष्ट्वा सा त्वा कीर्तितं। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः परमा
त्मवित्वात् योगिनः परमात्मानः इति दर्शयितुं परमात्मभिरिति तद्विशेषणं १९ उपसंहरति एवमिति विस्तारसंक्षेपौ सृष्टिप्रलयौ उक्तावितिशेषः ब्रह्माव्यक्ते
प्रणवप्रत्यगात्मानौ उपायोपेयौ। पुनःपुनर्युगसहस्रांते रात्रिः तथैवाहश्च २० उनषष्टितमः॥ ॥

राम०
१८९

अत्रैस्यैवार्थस्य वैशद्याय विस्तरेण सांख्ययोगौ विवक्षन् तदधिकारिणं निरूपयन्नध्यायद्वयेन भूतग्रामे नियुक्तं यदिन्यादिना ११ ॥

व्यास उवाच भूतग्रामे नियुक्तं यत्तदेतत्कीर्तितं मया ब्राह्मणस्य तु यत्कृत्यं तत्ते वक्ष्यामि तच्छृणु १ जातकर्मप्रभृ
त्यस्य कर्मणां दक्षिणावतां क्रिया स्यादासमावृत्तेराचार्ये वेदपारगे २ अधीत्य वेदानखिलान्गुरुशुश्रूषणे रतः
गुरूणामनृणो भूत्वा समावर्तेत यज्ञवित् ३ आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमं आविमोक्षाच्छरीरस्य सोन्व
तिष्ठेद्यथाविधि ४ प्रजासर्गेण दारैश्च ब्रह्मचर्येण वा पुनः ५ गृहस्थस्त्वेष धर्माणां सर्वेषां मूलमुच्यते यत्र पक्वकषायो
हि दान्तः सर्वत्र सिध्यति ६ प्रजावान् श्रोत्रियो यज्वा मुक्त एव ऋणैस्त्रिभिः अथान्यानाश्रमान्पश्चात्पूतो गच्छेत्तु कर्मभिः ७
यत्पृथिव्यां पुण्यतमं विद्यात्स्थानं तदावसेत् यतेत तस्मिन्प्रामाण्यं गन्तुं यशसि चोत्तमे ८ तपसा वा सुमहता विद्यानां
पारणेन वा इज्यया वा प्रदानैर्वा विप्राणां वर्धते यशः ९ यावदस्य भवत्यस्मिन्कीर्तिर्लोके यशस्करी तावत्पुण्यकृतां लोका
ननन्तान्पुरुषोऽश्नुते १० अध्यापयेदधीयीत याजयेत यजेत वा न वृथा प्रतिगृह्णीयान्न च दद्यात्कथंचन ११ याज्यतः शि
ष्यतो वापि कन्यया वा धनं महत् यदागच्छेद्यजेद्दद्यान्नैकोऽश्नीयात्कथंचन १२ ॥ ॥ ॥ ॥ ॥ छ ॥

गृहमावसथोह्यस्मैनाम्नातीर्थप्रतिग्रहात् देवर्षिपितृगुर्वर्थवृद्धातुरबुभुक्षतां १३ अंतर्हितारितप्तानांयथाशक्तिबुभूषतां द्रव्या
णामतिशक्त्यापिदेयमेषांकृतादपि १४ अर्हतामनुरूपाणांनादेयंह्यस्तिकिंचन उच्चैःश्रवसमश्वंप्रापणीयंसतांविदुः १५ अ
नुनीययथाकामंसत्यसंधोमहाव्रतः स्वैःप्राणैर्ब्राह्मणप्राणान्परित्रायदिवंगतः १६ रंतिदेवश्चसांकृत्योवसिष्ठायमहात्मने
अपःप्रदायशीतोष्णानाकपृष्ठेमहीयते १७ आत्रेयस्त्विंद्रदमनोह्यर्हतेविविधंधनं दत्वालोकान्ययौधीमाननंतान्समहीपतिः १८
शिविरौशीनरोंगानिसुतंचप्रियमौरसं ब्राह्मणार्थमुपाहृत्यनाकपृष्ठमितोगतः १९ प्रतर्दनःकाशिपतिःप्रदायनयनेस्वके
ब्राह्मणायातुलांकीर्तिमिहचामुत्रचाश्नुते २० दिव्यमष्टशलाकंतुसौवर्णंपरमर्द्धिवत् छत्रंदेवावृधोदत्वासराष्ट्रोभ्यपतद्दिवं
२१ सांकृतिश्चतथात्रेयःशिष्येभ्योब्रह्मनिर्गुणं उपदिश्यमहातेजागतोलोकाननुत्तमान् २२ अंबरीषोगवांदत्वाब्राह्मणेभ्यःप्र
तापवान् अर्बुदानिदशैकंचसराष्ट्रोभ्यपतद्दिवं २३ सावित्रीकुंडलेदिव्येशरीरंजनमेजयः ब्राह्मणार्थेपरित्यज्यजगमतुलोकमुत्त
मं २४ सर्वरत्नंवृषादर्भिर्युवनाश्वःप्रियाःस्त्रियः रम्यमावसथंचैवदत्वास्वर्लोकमास्थितः २५

निमीराष्ट्रंचवैदेहोजामदग्न्योवसुंधरां ब्राह्मणेभ्योददौचापिगयश्चोर्वीसपत्तनां २६ अवर्षतिचपर्जन्येसर्वभूतानिभूतकृत् वशिष्ठोजीव
यामासप्रजापतिरिवप्रजाः २७ कारंधमस्यपुत्रस्तुमरुत्तान्नामरुत्तस्तथा कन्यामंगिरसेदत्वादिवमाशुजगामह २८ ब्रह्मदत्तश्चपांचाल्योरा
जाबुद्धिमतांवरः निधिंशंखंद्विजाग्र्येभ्योदत्वालोकानवाप्तवान् २९ राजामित्रसहश्चापिवसिष्ठायमहात्मने मदयंतींप्रियांदत्वातयासह
दिवंगतः ३० सहस्रजिच्चराजर्षिःप्राणानिष्टान्महायशाः ब्राह्मणार्थेपरित्यज्यगतोलोकाननुत्तमान् ३१ सर्वकामैश्चसंपूर्णंदत्वावे
श्महिरण्मयं मुद्गलायगतःस्वर्गंशतद्युम्नोमहीपतिः ३२ नाम्नाचद्युतिमान्नामशाल्वराजः प्रतापवान् दत्वाराज्यमृचीकायगतोलो
कानमुत्तमान् ३३ मदिराश्वश्चराजर्षिर्दत्वाकन्यांसुमध्यमां हिरण्यहस्तायगतोलोकान्देवैरभिष्टुतान् ३४ लोमपादश्चराजर्षिःशां
तांदत्वासुतांप्रभुः ऋष्यशृंगायविपुलैःसर्वकामैरयुज्यत ३५ दत्वाशतसहस्रंतुगवांराजाप्रसेनजित् सवत्सानांमहातेजागतोलोका
ननुत्तमान् ३६ एतेचान्येचवहवोदानेनतपसैवच महात्मानोगताःस्वर्गंशिष्टात्मानोजितेंद्रियाः ३७ तेषांप्रतिष्ठिताकीर्तिर्यावत्स्था
स्यतिमेदिनी दानयज्ञप्रजासर्गैरेतेहिदिवमाप्नुवन् ३८ शांतौमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥व्यासउवाच त्रयीविद्यामवेक्षेतवेदेषू
क्तामथागतः ऋक्सामवर्णाक्षरतोयजुषोथर्वणस्तथा १ तिष्ठत्येतेषुभगवान्षट्सुकर्मसुसंस्थितः वेदवादेषुकुशलाह्यध्यात्मकुशला
श्चये २ सत्ववंतोमहाभागाःपश्यंतिप्रभवाव्ययं एवंधर्मेणवर्तेतक्रियांशिष्टवदाचरेत् ३ असंरोधेनभूतानांवृत्तिंलिप्सेतवैद्विजः

सम्यगागतविज्ञानः शिष्टः शास्त्रविचक्षणः ४ स्वधर्मेण क्रिया लोके कर्मसत्वस्य संचरः तिष्ठते तेषु गृहवान् षट्सु कर्मसु सद्वि
जः ५ पंचभिः सततं यज्ञैः श्रद्दधानो यजेत च धृतिमानप्रमत्तश्च दांतो धर्मविदात्मवान् ६ वीतहर्षमदक्रोधो ब्राह्मणो नावसीद
ति दानमध्ययनं यज्ञस्तपो ह्रीरार्जवं दमः ७ एतैर्वर्द्धयते तेजः पाप्मानं चापकर्षति धूतपाप्मा च मेधावी लघ्वाहारो जितेंद्रियः
८ कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं अग्नींश्च ब्राह्मणांश्चार्चेद्देवताः प्रणमेत च ९ वर्जयेदुशतीं वाचं हिंसां चाधर्म
संहितां एषा पूर्वगता वृत्तिर्ब्राह्मणस्य विधीयते १० ज्ञानागमेन कर्माणि कुर्वन्कर्मसु सिध्यति पंचेंद्रियजलां घोरां लोभकूलां
सुदुस्तरां ११ मन्युपंकामनाधृष्यां नदीं तरति बुद्धिमान् कालमभ्युद्यतं पश्येन्नित्यमत्यंतमोहनं १२ महता विधिदृष्टेन बलेनाप्र
तिघातिना स्वभावस्रोतसा वृत्तमुह्यते सततं जगत् १३ कालोदकेन महता वर्षावर्तेन संततं मासोर्मिणार्तुवेगेन पक्षोलपतृणे
न च १४ निमेषोन्मेषफेनेन अहोरात्रजलेन च कामग्राहेण घोरेण वेदयज्ञप्लवेन च १५ धर्मद्वीपेन भूतानां चार्थकामजलेन
च ऋतवाङ्मोक्षतीरेण विहिंसातरुवाहिना १६ युगह्रदौघमध्येन ब्रह्मप्रायभवेन च धा ॥ ॥ ॥ ७ ७ ॥

ग्रासश्चानिभूतानिकृष्यंतेयमसादनं १७ एतत्प्रज्ञामयैर्धीरानिस्तरंतिमनीषिणः प्लवैरप्लववंतोहिकिंकरिष्यंत्यचेतसः
१८ उपपन्नंहियत्प्राज्ञोनिस्तरेन्नेतरोजनः दूरतोगुणदोषौहिप्राज्ञःसर्वत्रपश्यति १९ संशयंसतुकामात्माचलचित्तोल्प
चेतनः अप्राज्ञोनतरत्येनंयोह्यास्तेनसगच्छति २० अप्लवोहिमहादोषंमुह्यमानोनिगच्छति कामग्राहगृहीतस्यज्ञान
मप्यस्यनप्लवः २१ तस्मादुन्मज्जनस्यार्थेप्रयतेतविचक्षणः एतदुन्मज्जनंतस्ययदयंब्राह्मणोभवेत् २२ अवदातेषु
संजातस्त्रिसंदेहस्त्रिकर्मकृत् तस्मादुन्मज्जनेतिष्ठेत्प्रश्रयानिस्नेरघृणा २३ संस्कृतस्यहिदांतस्यनियतस्ययतात्मनः
प्राज्ञस्यानंतरासिद्धिरिहलोकेपरत्रच २४ वर्त्तेततेषुगृहवानक्रुध्यन्ननसूयकः पंचभिःसततंयज्ञैर्विघसाशीयजेत ॥

तच २५ सतोधर्मेणवर्तेतक्रियांशिष्टवदाचरेत् असंरोधेनलोकस्यवृत्तिंलिप्सेदगर्हितां २६ श्रुतविज्ञानतत्व
ज्ञःशिष्टाचारोविचक्षणः स्वधर्मेणक्रियावांश्चकर्मणासोप्यसंकरः २७ क्रियावानश्रद्दधानोहिदांतःप्राज्ञोनसू
यकः धर्माधर्मविशेषज्ञःसर्वंतरतिदुस्तरं २८ धृतिमानप्रमत्तश्चदांतोधर्मविदात्मवान् वीतहर्षमदक्रोधोब्राह्म
णोनावसीदति २९ एषापुरातनीवृत्तिर्ब्राह्मणस्यविधीयते ज्ञानवत्वेवकर्माणिकुर्वन्सर्वत्रसिध्यति ३० अध
र्मंधर्मकामोहिकरोतीहाविचक्षणः धर्मंवाधर्मसंकाशंशोचन्निवकरोतिसः ३१ धर्मंकरोमीतिकरोत्यधर्ममधर्म
कामश्चकरोतिधर्मं उभेवालःकर्मणीनप्रजानन्सजायतेम्रियतेचापिदेही ३२ शांतौमोक्षधर्मेषुशुकानुप्रश्ने ॥

अथ अतीतानंतराध्यायद्वयोक्तसाधनसंपन्नेरनंतरं एतत्वक्ष्यमाणांशंसारबंधकैवल्यं चेद्बोचयेत तर्हि ज्ञानवान्भवेत् एवं मुमुक्षावान् ज्ञानं साधयेदिति वदन्नावंधस्याज्ञानका
र्यत्वेमिथ्यात्वं दर्शितं यतो ज्ञानमज्ञानस्यैव निवर्तकं तन्निवृत्तौ तत्कृतस्य बंधस्य निवृत्तिः संभाव्यते न तु बंधस्य सत्यत्वपक्षे तथा च श्रुतिः यदन्यद्यत्र द्वावविज्ञातासितव्यमि
ति आत्मनि ज्ञानाविद्याक्षिप्तमावरणमनत्वाघातस्य मिथ्यात्वे प्रसिद्धविषयेवाह एतंब्रह्मलोकं न विंदंत्यनृतेन हि प्रत्यूढा इति तथा असंगो ह्ययं पुरुष इति चात तथा चासंगस्या

व्यास उवाच अथ चेद्बोचयेदेतद्देहेत स्रोतसा यथा उन्मज्जंश्च निमज्जं
श्च निज्ञानवान्स एवबान्भवेत् १ प्रज्ञया निश्चिता धीरास्तारयंत्यबुधान्प्लवैः
नावुधास्तारयंत्यन्यानात्मानं वा कथंचन २ छिन्नदोषो मुनिर्योगान्मुक्तो यु
ञ्जीत द्वादश ३

पिसंगित्वमात्मनि मिथ्यैव सत् ज्ञाननिवर्त्यं भविष्यतीतिसूक्तमुक्तं चेदेतद्बोधयेत्तर्हि ज्ञानवान्भवेदिति। ज्ञानप्लवहीनः संसारस्रोतसा ऊह्यमानः ऊर्ध्वाधोगतीर्गच्छतीत्यर्थः एतेनाथातो
ब्रह्मजिज्ञासेति सूत्रपदानामर्थः साधनसंपत्त्यनंतरं बंधस्य मिथ्यात्वात्तन्निवृत्त्यर्थं ब्रह्मजिज्ञासा स्यादित्येवंरूपो दर्शितः १ प्रज्ञया ध्यानजसाक्षात्कारेण २ छिन्नदोषो रागादिही
नः अतएव योगात् मुक्तः आदिसंगात् द्वादशदेशादीन्योगसहायान्वक्ष्यमाणान्युंजीत समादध्यात् अनुसंदध्यादित्यर्थः ३ ॥ ॥ ॥ ॥

तत्रदेशयोगः समेसुचौशर्करावह्निवालुकाविवर्जितेशब्दजलाश्रयादिभिः मनोनुकूलेननतुचक्षुपीडनेगुहानिवाताश्रयणेप्रयोजयेदितिश्रुत्युक्तः कर्मयोगः युक्ता-
हारस्ययुक्तचेष्टस्यकर्मसुयुक्तस्वप्नावबोधस्ययोगोभवतिदुःखहेतिगीतोक्तः अनुरागः सत्शिष्यः अर्पणंद्रव्याणएधोदकाद्याहरणाद्यासाहारादिचिंतानिरासार्पणतत्पायोगो।
उपाय आसनादियोगः त्रिरुन्नतंस्थाप्यसमंशरीरमित्यादिश्रुतिप्रसिद्धः अपायोरागाद्यपचयः निश्चयः गुरुवेदवाक्यादैक्यफलावश्यंभावबुद्धिः निश्चयइतिसुपांसु-
लुगितितिभिः स्वादेशः उपायापायनिश्चयैश्चक्षुरादिभिश्चसहितानदेशादीनद्वादशयुंजीतेतिपूर्वेणासंबंधः चक्षुः चक्षुरादीनि आहारः आहारशुद्धौसत्वशुद्धिरितिश्रु-
तिप्रसिद्धः संहारः स्वाभाविकविषयप्रवृत्तिसंकोचः मनः संकल्पविकल्पात्मकं दर्शनंजन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं। एतानिद्वादशमुमुक्षुरनुसरेदित्यर्थः

देशकर्मानुरागार्पणानुपायापायनिश्चयैः चक्षुराहारसंहारैर्मनसादर्शनेनच ४ यच्छे
द्वाङ्मनसीबुधायइच्छेज्ज्ञानमुत्तमं शांतेनयच्छेदात्मानंयइच्छेच्छांतिमात्मनः ५ ५

४ एवंद्वादशविशेषणविशिष्टस्याधिकारिणोयत्कर्तव्यंतदाहयच्छेदिति। वागादिबाह्येंद्रियव्यापारमुत्सृज्यमनोमात्रेणावतिष्ठेतमनोपिविषयविकल्पाभिमुखंव्य-
ध्यवसायस्वभावयाबुद्ध्यानियच्छेत्। बुद्धिमात्रेणावतिष्ठेतेत्यर्थः इदमेव उत्तमंज्ञानंइंद्रियमनोतिरिक्तकर्त्रात्मविषयंतेनज्ञानेनसूक्ष्मतमयाबुद्ध्याआत्मानंबुद्धिवि-
विक्तंयच्छेत्बुद्धिमप्यात्मनिप्रविलापयेदित्यर्थः कः यः शांतिंकैवल्यंआत्मनइच्छेत्। एतेनयच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनिज्ञानमात्मनिमहतिनियच्छेत्तद्य-
च्छेच्छांतआत्मनीत्यस्याः श्रुतेरर्थोदर्शितः अत्रश्रुत्युक्तायांमहदाख्यसमष्टिबुद्धेरपिबुद्धिशब्देनैवसंग्रहः अन्यत्समानं ५ ५ ॥

योगफलमाह। एतेषामिति। वागादीनामनुद्रष्टा शांतात्मोपेन ज्ञातः सपुरुषः साधुरसाधुर्वापि भवत्येवेति सार्द्धश्लोकद्वयार्थः ७ एवं पूर्वश्लोकोक्तप्रकारेण।
एवमेतेन तन्वंशांतात्मप्राप्त्यवधियोगेति ज्ञासमानोपि किंसुतानुतिष्ठताशब्दब्रह्मकर्मकांडं अतिक्रम्य वर्त्तते। परोक्षज्ञान वानपि स्वकर्मत्यागजं दोषं न प्रा
प्नोतीत्यर्थः ८ अक्षरं ब्रह्म प्राप्तुकामस्य रथरूपकेण योगमुपायमुपदिशन् तदंगानि बाधान्याह धर्मोपस्थ इत्यादिना। धर्मोपस्थादिः तदेव उपस्थं ज्ञानसारथेरु

एतेषां चेदनुद्रष्टा पुरुषोपि सुदारुणः यदि वा सर्वविद्यो यदि वाप्यनृचो द्विजः यदि वा धार्मिको यज्वा यदि वा
पापकृत्तमः ६ यदि वा पुरुषव्याघ्रो यदि वा क्लैब्यधारितः तरत्येव महादुर्गं जरामरणसागरं ७ एवं ह्येतेन योगेन यु
ञ्जानो ह्येकमंततः अपि जिज्ञासमानोपि शब्दब्रह्मातिवर्त्तते ८ धर्मोपस्थो ह्रीवरूथ उपायापायकूबरः अपाना
क्षः प्राणयुगः प्रज्ञायुर्जीवबंधनः ९ चेतनाबंधुरश्चारुश्चाचारग्रहनेमिमान् दर्शनस्पर्शनवहो घ्राणश्रवणावा
हनः १२ प्रज्ञानाभिः सर्वतंत्रप्रतोदो ज्ञानसारथिः क्षेत्रज्ञाधिष्ठितो धीरः श्रद्धादमपुरःसरः १२ ॥ ॥

पवेशनस्थानं यस्य ह्रीः कार्यान्निवृत्तिः सैव वरूथं रथगुप्तिर्यस्य उपायापायौ प्रागुक्तौ कूबरौ धूर्दंडौ ९ चेतनाप्रावधानता सैव बंधुरः फलकद्वयसंश्ले
षः आचारः शीलं तस्य ग्रहो अंगीकारः दर्शनादि चतुष्टयं वाहनं अश्वादिरूपं १० प्रज्ञा शमादिप्रावरणं नाभिर्मध्यमभागः रथिन उपवेशनस्थानं तत्र शास्त्रं सा
नं तदर्थनिश्चयः ११ ११ ॥ ॥

मा: १

मो०
१९४

सूक्ष्मानुगः नैः संनिपात्योपकारी। शौचमार्गगौवगच्छतीति शौचगः ध्यानं ध्येयैकतानता सैव गोचरः प्राप्यो येन स जीवयुक्तः जीवेन सह मुमुक्षुणा युक्तो
योजितः ब्रह्मैव लोकस्तं नमामि १२ रूपं योगविधिं अंतरंगसाधनं १३ संप्रति देशबंधश्चित्तस्य धारणेति सूत्रितं एकस्मिन् विषये चित्तस्य स्थापनं धा
रणा सा च विषयभेदादनेकधेति सप्त धारणा इत्युक्तं। वाग्यतइति यमनियमादीनामुपलक्षणं एतत् विप्रकृष्टतराः चंद्रसूर्यध्रुवमंडलादिधारणाः

194

त्यागसूक्ष्मानुगः क्षेम्यः शौचगो ध्यानगोचरः जीवयुक्तो रूपेणादिव्यो ब्रह्मलोके विराजते १२ अथ संत
रमाणास्सरूपेणैवं मुमुक्षतः अंतरंगं तु मनसो विधिं वक्ष्यामि शीघ्रगं १३ सप्तैव धारणाः कृत्स्ना वा
ग्यतः प्रतिपद्यते पृष्ठतः पार्श्वतश्चान्यास्ताश्च ताः प्रधारणाः १४ १५ ॥ ॥

अन्याः संतितप्ताः पापिताः प्रधारणाः प्रशिष्यप्रपौत्रादिशब्दवदत्र प्रशब्दार्थः ताः अव्यवहिता इति अत्यंतमव्यवहिताः सप्तैव धारणा इत्यर्थः अ
त्र पुराणांतरे दश मन्वंतराणीह तिष्ठंतींद्रियचिंतकाः भौतिकास्तु शतं पूर्णं सहस्रं त्वभिमानिकाः बौद्धा दश सहस्राणि तिष्ठंति विगतज्वराः
पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्तचिंतका इति अत्र तेष्वभिमानाख्याहंकारोऽव्यक्ते चेति सप्तकापेक्षया इंद्रियबुद्धिधारणे अधिके उक्ते ते अपि अहंकार
धारणायामंतर्भवतः १५

राम०
१९४

क्रमशइति पदः पदमः जलस्य च अग्रे प्रथमा बुद्धितः बुद्धात ततः त्रिविषये स्थिरया तत्तदैश्वर्यं प्रतिपद्यते अत्र पृथ्व्यादिधारणानां स्थान बीज देवता योगिया
ज्ञवल्क्योक्ताः सेयाः पद्या पादादिजानुपर्यंतं पृथिवीस्थानमुच्यते। आजानोः पायुपर्यंतमपांस्थानं प्रकीर्तितं आपायोर्हृदयांतं च वह्निस्थानं तदुच्य
ते। हृन्मध्यात्तु भ्रूमध्यं यावत्तद्वायुकुलं भवेत्। आभ्रूमध्यात्तु मूर्द्धांतमाकाशमिति चोच्यते। पृथिव्यां वायुनास्थाप्य लकारेण समन्वितं। ध्यायंश्चतुर्मु
खाकारं ब्रह्माणं सृष्टिकारणं धारयेत्तं च घटिकाः पृथिवीजयमाप्नुयात्। वारुणो वायुनास्थाप्य लकारेण समन्वितं ध्यायंश्चतुर्मुखाकारं ब्रह्माणं सृष्टि
कारणं धारयेत्तं च घटिकाः पृथिवीजयमाप्नुयात्। वारुणे वायुनारोप्य वकारेण समन्वितं। स्मरन्नारायणं देवं चतुर्बाहुं सुविस्मितं। शुद्धस्फटिकसं
काशं पीतवाससमच्युतं धारयेत्तं च घटिकाः सर्वरोगैः प्रमुच्यते। वह्नौ वनिलमारोप्य रेफाक्षरसमन्वितं। त्र्यक्षं वरप्रदं रुद्रं तरुणादित्यसन्निभं भस्मो

क्रमशः पार्थिवं पश्च वाप्यं स्वं तैजसं पायपः ज्योतिषोयत्तदैश्वर्यमहंकारस्य बुद्धितः अव्यक्तस्य ततैश्वर्यं क्रमशः
प्रतिपद्यते १५

द्धूलितसर्वांगं सुप्रसन्नमनुस्मरन्। धारयेद्घटिकाः पंच वह्निनासौ न दह्यते। मारुतं मरुतां स्थाने यरादि व समन्वितं। धारयेत्तं च घटिका वायुवद्व्योमगो भ
वेत्। वर्णो यकारः देवईश्वरः रूपं रुद्रवत् आकाशं वायुमारोप्य हकारोपरि शंकरं बिंदुरूपं महादेवं व्योमाकारं सदाशिवं चिंतनं चिंतयेत्तत्र स्थं मुहूर्त्तमपि
धारयेत्। अत्र लकारादिबीजस्थानेषु अकारोकारमकारा ईमात्राबिंदुनत्संसेता अव्यक्तधारणायां षष्ठ्यां नादांत देते शुद्धं ब्रह्मैवशिष्यते। तथा च तंत्रे
वोपसंहृते। तं तस्मात्कारणावैने ब्रह्मणापामै सत्रिभिस्त्रिभिः ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे विशुद्धं चेतसा पश्यन्नादांते परमेश्वरमिति। अहंकार
धारणा स्वरूपं तु स्थूलदेहासंगेनाहमेवेदं सर्वोऽस्मीत्यभिमानः अस्यैव तत्त्वमस्यादिवाक्यजाविद्याविनाप्रलयः अव्यक्तधारणा १५ १५ १५

अनुभवक्रमाः १

विक्रमा इति । योगगत उपायतः युक्तेषु योगे प्रवृत्तेषु योगिषु यस्य यस्य योगिनः एते वक्ष्यमाणाः विक्रमाः यथा येन प्रकारेण भवंति तत्तथा वक्ष्यामीति शेषः आ
त्मनि देहाभ्यंतरे पश्यतः ध्यायतः पुरुषस्य युक्तस्य योगस्य सिद्धिं सम्यक्प्रयुक्तयोगसंबंधिनीं सिद्धिं भूजयादिकां वक्ष्यामीति शेषः १६ तत्र विक्रमानाह निर्मुच्य
मान इत्यादिना । पश्यतः प्रत्यगात्मनः इमानि वक्ष्यमाणानि रूपाणि विमुच्यमानः गुरूक्तयुक्त्या स्थूलदेहाध्यानं संत्यजन् सूक्ष्मत्वात्पश्यतीति शेषः नत्वि
मुच्यमानः स्थूलदृष्टिः शैशिरो धूमः अवश्यायो नीहाराख्यः नभः संप्रयतः इत्यनेन नतस्य भुवनकोशव्याप्तिर्देशिता अत्रायं प्रयोगः शमादिसंपन्नो विविक्ते दे

विक्रमाश्चापि यस्यैते यथा युक्तेषु योगतः । तथा योगस्य युक्तस्य सिद्धिमात्मनि पश्यतः ॥ १६ ॥ निर्मुच्यमानः सूक्ष्म
त्वाद्रूपाणीमानि पश्यतः । शैशिरस्तु यथा धूमः सूक्ष्मः संश्रयते नभः ॥ १७ ॥ तथा देहाद्विमुक्तस्य पूर्वरूपं भवत्युत ।
अथ धूमस्य विरमे द्वितीयं रूपदर्शनं ॥ १८ ॥

शे स्थिरसुखमासनमध्यासीनः प्राणायामपुरःसरं गुरूक्तयुक्त्या स्थूलदेहासंगेन पादादिजानुपर्यंतं भूस्थाने चित्तं धारयतः स्थानतिरोधानपूर्वकं नीहारमा
त्रमवभासते यथा रज्ज्वुरगे चक्षुर्धारयत उरगतिरोधानेन रज्जुमात्रात् तदाल्लग्नाधरभागो जानूपरिष्टात् तन एव देहो नीहारमग्नो संदिग्धाविपर्यस्तत्तया भातीत्ययं
भूमिजयः अस्मिन्सिद्धे जान्वादिपायवंते जलस्थाने चित्तं धारयतः धूमः स्थानं च तिरोधीयते तथा पूर्वभागमात्रं च कल्पातीयो बुभग्नं पूर्ववन्नाशितः तदिदं
द्वयं जले भूमिसंहारो जलजयश्चेत्युच्यते । एवमुत्तरत्रापि भूतसंहारजयौ ज्ञेयौ ॥ १७ ॥ १८ ॥

आत्मनि देहाभ्यंतरे। वह्निरूपं लोहितं लोहितांधकारमग्नोमवतीत्यर्थः १९ एतस्मिन्निति। अस्य योगिनः अगतिगच्छतिक्षिप्तिवा हृक्षानितत्तेजोवायुः पीत
शस्त्रः पीतशस्त्रवत्पीतानि गिलितानि शस्त्रवद्विच्छेदकत्वात् वृक्षागारपर्वतादीनि शस्त्राणि पततद्वत् गिलितानि खिलमूतत्ते तेजोरूपः केवलेनभसिसंततंदी
प्यमानः प्रकाशत इत्यर्थः तदेवाक्तं प्राकृवायुर्दीप्यते महान् तदानिरालंबरूपंऊर्णातंतोर्यदूपं अतिलघुत्वेन सवर्णस्य समानरूपस्य ऊर्णातंतुवन्निरालंबगगनेऽतरि
क्षे स्थितस्य वायुवशेस्येत्यर्थः तस्य योगिनोपि रूपं हृदन्तर्ध्याताऽरम्भ उपरितनेन प्रकाशतेन त्वन्यत्किंचिदप्याकाशव्यतिरिक्तं २० अथ ये तेजः संहारवायुलयानंतरं वायुरूपं वायु
संबंधिसूक्ष्मरूपादिहीनं स्वरूपं कर्तव्यंतां प्रवृत्तावरूपरजस्तमोमलशून्यत्वात् प्रकाशमयत्वाच्च स्वच्छां गतिः गम्यते तत्वं प्राप्यते तेन यति स्मृप ध्यादिसूक्ष्मेति आका

जलरूपमिवाकाशे तत्त्ये वात्मनि पश्यति अपां व्यतिक्रमे चास्य वह्निरूपं प्रकाशते १९ तस्मिन्नुपरतेऽजोस्यपी
तवर्णः प्रकाशते ऊर्णारूपसवर्णस्य तस्य रूपं प्रकाशते २० अथ येत्वां गतिं गत्वा वायव्यं सूक्ष्ममप्युत अमुक्तं
चेतसः सौक्ष्म्यमप्युक्तं ब्राह्मणस्यवै २१

शस्यानं गतिः तां गत्वा तत्र विमलत्वं प्राप्य अमुक्तं नीरूपसुषिरमाकाशमात्रं स्यानलयपूर्वकं पूर्ववत्प्रकाशत इति पूर्वेणान्वयः तदिदममुक्तं चेतसः सौक्ष्म्यं
सौख्यमिति पाठे प्रसादकारं ब्राह्मणस्य ब्रह्मबुभूषोरुक्तं शास्त्रे। अपि पादपूरणार्थः अवक्तमिति पाठे लोकाप्रसिद्धं योगैकगम्यं सेयं व्योमसंवित्तवायुलयपत्रा
काशत्रयश्चेत्युच्यते अथमेवं तोत्रिकाणां भूतसुद्धिप्रकारः संप्रदायापरिज्ञानाद्यपावदिदानीं तैर्नानुष्ठीयते २१ ॥ ॥ ॥ ॥ ॥

मो०
१९६

पृथ्व्याप्यतेजोऽनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति श्रुत्युक्तं पंचभूतजयफलं पृथिवीवायुराकाश
आपोज्योतींषीति श्रुतत्सक्तं तत्रोक्तक्रमेण पृथ्वीपतिरेतेष्वित्यादिना जातस्य सिद्धस्य २३ आकाशभूतत्वे हेतुः सवर्णत्वादिति आकाशवत्सर्वगतश्च नित्य इति श्रुतेराका
शेन समानरूपत्वात्सवर्णतः आकृतितः गृह्यते अरूपत्वाद्देवानां हीनशक्तिमपि प्राप्नोतीत्यर्थः जलजयफलमाह कामादिति इच्छया आश्रयान्वा जलस्य वापीकू

एतेष्वपि हि जातेषु फलजातानि मे शृणु जातस्य पार्थिवैश्वर्यैः सृष्टिरन्या विधीयते २२ प्रजापतिरिवाक्षोभ्यः
शरीरात्सृजते प्रजाः अंगुल्यंगुष्ठमात्रेण हस्तपादेन वा तथा २३ पृथिवीं कंपयत्येको गुणो वायोरिति श्रुतिः
आकाशभूतश्चाकाशे सवर्णत्वात्प्रकाशते वर्णतो गृह्यते चापि कामात्पिबति चाश्रयान् २४ न चास्य
तेजसा रूपं दृश्यते शाम्यते तथा अहंकारस्य विजिते पंचैते स्युर्वशानुगाः २५ षण्णामात्मनि बुद्धौ च जितायां
प्रभवत्यथ निर्दोषप्रतिभा ह्येनं कृत्स्ना समभिवर्तते २६

पतटादीन्पिबति आगस्त्यवत् २४ न चेति आकाशतत्प आकृतेरेव आकाशभूततयापिधानं अत्र तु समानमप्याकृतौ अदृश्यत्वमुच्यते उक्तक्रमेण भूतजयं
विना वा पूर्वोक्ताहंकारधारणयाऽहंकारे विजिते नांतरीयकत्वेनैव आकाशादयो जिताः स्युरित्यर्थः २५ षण्णामिति पंचभूतानि अहंकारश्च तेषां आत्मभूतायां बुद्धौ।
एतेनाहंकारात् बुद्धेर्व्यतिरेक उक्तः तेन सप्तैव धारणा प्रभवति ऐश्वर्यवान्भवति निर्दोषप्रतिभा संशयविपर्ययशून्यं ज्ञानं सर्वेश्वरः सर्वज्ञश्च भवतीत्यर्थः २६

राम०
१९६

व्यक्तं बुद्ध्यादिरूपं आत्मानं च अव्यक्तं अव्यक्तत्वेन जीवं जगत्कारणं ब्रह्मभावेन जानातीत्यर्थः २७ अव्यक्तमपीव्यक्तप्राधान्येन मे मत्तः पूर्वं अव्यक्तबोधात् व्यक्
व्यक्तं निबोध २८ पंचेति मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति सांख्योक्तानि तत्त्वानि यो
गे पातंजलीये सांख्ये वेदांतविचारे च तुल्यानि विशेषं शास्त्रभेदप्रयोजकं २९ तत्र व्यक्तलक्षणमाह प्रोक्तमिति तत्त्वमहदादिविकारांतं त्रयोविंशकं। वि

तथैव व्यक्तमात्मानमव्यक्तं प्रतिपद्यते यतो विस्मरतो लोको भवति व्यक्तसंज्ञकः २७ तत्राव्यक्तमपी विद्यां
शृणु त्वं विस्तरेण मे तथा व्यक्तमयं चैव सांख्यं पूर्वं निबोध मे २८ पंचविंशति तत्त्वानि तुल्यान्युभयतः समं
योगे सांख्येपि च तथा विशेषं तत्र मे शृणु २९ प्रोक्तं तद्व्यक्तमित्येव जायते वर्द्धते च यत् जीर्यते म्रियते चै
व चतुर्भिर्लक्षणैर्युतं ३० विपरीतमतो यत्तु तदव्यक्तमुदाहृतं द्वावात्मानौ च वेदेषु सिद्धांतेष्वप्युदाहृतौ ३१

परीतं जन्मवृद्ध्यादिहीनं अव्यक्तं चतुर्विंशं एतेभ्योऽन्यं एकमेव जीवात्मानं प्रतिशरीरं भिन्नमिति सांख्या मन्यंते ततो विशेषमाह द्वाविति द्वौ जीवेश्व
रौ वेदेषु कर्मकांडेषु यजमानः पशुश्चानेन पशुश्च देवताश्चेत न तत्त्वमनिष्ठतो मीमांसकाः परास्ताः सिद्धांतेषु वेदांतेषु जीवब्रह्मरूपौ ३१

३० ३० ३१

मो० १८८

117

कार्योपाधिरयंजीवः कारणोपाधिरीश्वर इत्युक्तमनुसारेणजीवेश्वरविभागमाह चतुरिति। चतुर्लक्षणांजन्मादिविकारवत्महदहंकारपंचतन्मात्रैकादशें
द्रियपंचभूतानितज्ज्ञंतदुपाधिकंचतुर्वर्गार्पितं। सकेंडीवा अव्यक्तंडमायोपाधिमीश्वरं तत्पतितदुभयमपिवुद्धमचेतनंच चिदचिदात्मकमित्यर्थः ३१ अपुज
लचंद्रन्यायेनप्रतिबिंबोजीवः बिंबचैतन्यमीश्वर इति द्वासुपर्णासयुजासखायेत्यादिश्रुतिसंमतंजीवेश्वरविभागमाहसत्वमिति सत्वबुद्धिः क्षेत्रज्ञः। चिदात्मातदे
तत्सत्वेयेनस्वप्नेपश्यत्ययोयंशरीरउपद्रष्टासक्षेत्रज्ञस्तावेतौसत्वक्षेत्रज्ञाविति पैंगिरहस्यब्राह्मणोक्तव्याख्यानात् यद्यपितत्तीयथाकरणत्वेननिर्दिष्टस्यः चेतन
स्यसत्वस्यभोक्तृत्वंनघटतेतथाप्युपद्रष्टुः क्षेत्रज्ञस्यनिर्विकारस्यतत्पापितत्पोरन्यः पिप्पलंस्वाद्वत्तीति सत्वमिति सत्वस्यभोक्तृत्वश्रुतस्त्यानुपपन्नाचेतना

चतुर्लक्षणजंत्वाद्यं चतुर्वर्गंप्रचक्षते व्यक्तमव्यक्तजंचैव तथावुद्धमचेतनं ३१ सत्वंक्षे
त्रज्ञइत्येतत्द्वयमप्यनुदर्शितं ३२ द्वावात्मानौचवेदेषु विषयेषुतुरज्यतः विषयात्प्रतिसंहारः
सांख्यानांविद्धिलक्षणं ३३

नुविद्धत्वंवक्तव्यांयथाह्ययंज्योतिरात्माविवस्वानपोभिन्नावहुधैकोनुगच्छन्। उपाधिनाक्रियतेभेदरूपोदेवः क्षेत्रेष्वेवमजोयमात्मेतिश्रुत्यंतरमव्य एत
तद्द्वयंजीवेश्वरविभागप्रकारद्वयमपिदर्शितंश्रुत्या ३२ अनयोःपक्षयोः क्रमेणामूढामूढदृष्टिभेदेनव्यवस्थामाह द्वाविति। विषयात्शब्दादिविषयमा
रभ्यप्रतिसंहारः उत्पत्तिक्रमवैपरीत्येनसंप्रविलापनंकर्त्तव्यमिति सांख्यानांश्रौपनिषदानांलक्षणंतेनेतिलक्षणंशास्त्रं अयमर्थः मूढानांतात्विकए
वजीवेश्वरादिभेदः वुद्धानांतुविंवप्रतिविंवभावेनेतिप्रतिबिंबोपाधेः सत्वस्यप्रविलयेचिन्मात्रमेवशिष्यतइति ३३ ३२ ॥ ॥ ॥

राम० १८८

ता१

एवंज्ञातत्वस्य जीवन्मुक्तस्य लक्षणान्याह निर्ममइत्यादिना ३३ ध्यातिध्यायति। वाग्दंडः पारुष्यं कर्मतादृशमेव हिंसात्मकं तथा मनोपि परानिष्टचिंतितेषां ३४ ब्रह्माणां चतुर्मुखे ३५ लुती कार्यं वा न निराकृतिः तुच्छेषु विषयेषु न विक्षिप्तः संपादितः मनोरथो यस्य स तथा न भवति। सत्यसंकल्प इत्यर्थः ३६ योगमेव विशेषवेनं प्रतिज्ञानीते यथेति। योगैश्वर्यं अणिमादिपरमार्थभूतं सत आगतिक्रांतं तत् दुर्लंघ्यगतः परवैराग्यवलेनान्तं तमतः सांख्यवं मुक्तिरज्ञातवद्बाधितवान् निष्क्रामति

९

निर्ममश्चानहंकारो निर्द्वंद्वश्छिन्नसंशयः नैव क्रुध्यति न द्वेष्टि नानृतं भाषते गिरः ३४ आक्रुष्टस्ताडितश्चैव मैत्रेण
ध्यातिनाशुभं वाग्दंडकर्ममनसां त्रयाणां च निवर्त्तकः ३५ समः सर्वेषु भूतेषु ब्रह्माणमभिवर्त्तते नैवेच्छति न चानिच्छो
मात्रामात्रव्यवस्थितः ३६ अलोलुपोऽव्यथो दांतो न कृती न निराकृतिः नास्येंद्रियमनेकाग्रेनाविक्षिप्तमनोरथः
अहिंस्रः सर्वभूतानां मैत्रः सांख्यो विमुच्यते ३७ यथा योगाद्विमुच्यंते कारणैर्यैर्निबोध तत् योगैश्वर्यमतिक्रांतो योनिः
क्रामति मुच्यते ३८

वृत्तिसारूप्यादपसरणान्न तु वृत्तिमूलमज्ञानमुच्छिन्नमित्यपमर्षः अस्माकं मिथ्याऽज्ञानोऽन्द्वो देहेंद्रियादिः प्रपंचो विषयाऽज्ञानवाधे सति वाध्यते रज्जुरगादिवत्। योगानां तु सत्यात्प्रधानादुत्पन्नः प्रपंचः सत्यः तदाकाराश्चित्तस्य वृत्तयोपि सत्याः वृत्तिसारूप्यं चैतन्यस्य सत्यमेव तत्र वृत्तीनां निरोधे चितिरूपदाकारतापि निवर्त्तते। तथा च सूत्रितं योगश्चित्तवृत्तिनिरोधः तदा द्रष्टुः स्वरूपेऽवस्थानं वृत्तिसारूप्यमितरत्रेति सोयं सांख्ययोगयोर्विशेषं यथा प्रतिज्ञेऽउपपादितः ३९ ॥

ता१

उपसंहरतिइतीति।भावोवक्तृविवक्षातद्विशेषज्ञाबुद्धिःफलतस्तुनतयोर्भेदोस्तीतिभावः यथोक्तंभगवता यत्सांख्यैः प्राप्यतेस्थानंतद्योगैरपिगम्यते।एकंसांख्यंचयोगंचयःप
श्यतिसपश्यतीतिब्रह्मणःपरंब्रह्मपुरुषमार्ष ३८ द्वाषष्टितमः॥ ॥सांख्ययोगपृष्टयोर्मध्येसांख्यमेवश्रेयइत्याहायेति।शास्त्राचार्योपदेशजंपरोक्षज्ञानरूपंसत्वसंसारसमु
द्धरणसाधनंगृहीत्वाधीरोध्यानवान्आत्मनःशांतिंमोक्षहेतुंज्ञानमेवाभ्यपेत।तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणइतिश्रुतेःसतिशास्त्रतःसंपादितन्निदिध्यासेनवेदितमर्थः

इत्येषाभावजाबुद्धिः कथितातेनसंशयः एवंभवतिनिर्द्वंद्वोब्रह्माणंचाधिगच्छति ३९ शांतौमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥
व्यासउवाच अथज्ञानप्लवंधीरोगृहीत्वाशांतिमात्मनः उन्मज्जंश्चनिमज्जंश्चज्ञानमेवाभिसंश्रयेत् १ शुकउवाच
किंतत्ज्ञानमथोविद्यांययानिस्तरतेद्वयं प्रवृत्तिलक्षणोधर्मोनिवृत्तिरितिवावद २ १ ॥ ॥ ॥

१ अत्रज्ञानशब्दार्थंपृच्छतिकिमिति।तत्संप्रपरीयंज्ञानंकिंविद्यांरज्जुरगन्यायेनाविद्यामात्रनिरासेनवस्तुतत्त्वज्ञापिकांधीवृत्तिंवाब्रूषेउतप्रवृत्तिलक्षणोध्यानेनकी
दृशंगवत्तध्येयसारूप्यप्रापकोधर्मइतिवाआत्मोच्छेदलक्षणाशून्यवादिलौकायतिकयोःसंमतानिवृत्तिरितिवातद्वद यथायेनप्रकारेणद्वंद्वंजन्ममरणादिनिस्तरतेतथावदेति
२२ . १

अत्राहमित्यनुभवे जडोऽहंकारस्तत्प्रकाशश्च प्रतीयेते तद्भूपमात्मेति भावः अहमर्थ एवात्मा प्रकाशस्तस्य गुणः सच त्रिक्षणावस्थायीति तार्किकाः नित्यप्रकाश एवात्मा ऽहमर्थो नात्मेति सांख्याः तत्राप्यात्मानात्मानौ द्वावपि तात्त्विकाविति वृद्धाः अनात्मैव स्थिरश्चिद्रहात्मा तु देहनाशे नश्यतीति लौकायतिकाः। आत्मैव सत्योऽनात्मा न्वेषति वेदांतवादाः द्वयमपि नास्तीति शून्यवादिनः एवं चात्माऽभावे सति ज्ञानानर्थक्यं स्यादित्यंततो वृद्धेषु पतिपन्नास्तीति परस्य भावं अधिष्ठानसत्तां विना स्वभावेनैव अहंकारादि

व्यास उवाच पश्यन्परस्य भावेन विना भावमचेतनः पुष्यते च
पुनः सर्वानप्रपापमुक्तहेतुकान् ३

कं स्वरूपेणैव भातीति पश्यन्निरधिष्ठानकोऽज्ञानमस्तीति वदन्शिष्यान्प्रस्रपापमुक्ताः ऊहापोहकौशलेन रहिताः हेतवो युक्त्युपपत्तयो येषां तान् निर्बुद्धीनित्यर्थः प्रस्रपेतीत्य तीपापात्मार्षोऽलुक् पुष्णाति पुष्णातीति तादृशेन बोधेन रंजयति अचेतनो मूढः सन् किंचन तत्त्वं लभत इत्यस्तु तेषामन्वयः निरधिष्ठानकभ्रमासंभवात् शून्यवादोऽस्तं
तेहेयइति भावः ३

मो०
१९९

एवं नैरात्म्यवादं दूषयित्वा मोक्षोच्छेदवादं लोकायतमतं दूषयत्ति पद्यामिति। येषां लोकायतानां एकांतभावेन हठेन स्वभावादेव क्षीरादिकं दध्यादेः कारणं न त्वीई
शादृष्टाद्यनुग्रहात् ईशादिसत्वे प्रमाणाभावात् प्रमाणस्य प्रत्यक्षेणैव चैतेषामदृष्टत्वादिति मतं ते किं नरा मुंजं पूत्वा संशोध्य तदंतर्गतां प्राग्दृष्टामिषीकामपि किं वा न लभंते।
इति काक्वा दृष्टिविरुद्धवादित्वं तेषामुक्तं। नन्वत्र शब्दोऽप्यर्थो भिन्नक्रमश्चानुपदर्शनमात्रेणाव स्वभावो निरेचतुं शक्यः मुंजांतस्थेषीकाप्राप्त्यप्रसत्वा
पत्तेः श्रुतिश्च मुंजैषीकादृष्टांतेनैव देहादन्यमात्मानमाहतं स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येणेति। श्रुत्वान्नगणमनीषीणां वेति पाठे तेन श्रवणपूर्वकं

येषां चैकांतभावेन स्वभावात्कारणं मतं । पूत्वा तृणमिषीकां वा ते लभंते न किंचन ४ ये चैनं पक्षमाश्रि
त्य निवर्त्तंत्यल्पमेधसः । स्वभावं कारणं ज्ञात्वा न श्रेयः प्राप्नुवंति ते ५ स्वभावो हि विनाशाय मोहकर्मम
नोभवः । निरुक्तमेतयोरेतत्स्वभावपरिभावयोः ६

किंचित्तत्वं न लभंते अपि तु स्वयमेवानुपासिता चार्थाः इत्थं कल्पयंतीत्यर्थः ४ स्वभावादेवसर्वमेतज्जगत्प्रांतिः स्वभावादेव च देहाद्युत्पत्तिरिति पक्षद
यमप्यनर्थकमित्याह ये चेति ५ तदेव दूषयति स्वभावो हीति मोहकर्म मोहकार्यं यन्मनस्तत्स्वभावः नहैर्मतसा कल्पितः इत्यर्थः स्वस्यैव भावः स
त्ता कारणमिति एकांतपक्षः परितः स्वस्य इतरेषां च भावः कारणमित्यन्यः एतयोः स्वभावयोर्निरुक्तं निर्वचनं तत्वं एतत्तत्र वक्ष्यमाणं शास्त्रं इति शेषः ६

शम०
१९९

स्वभावादेव क्षीरदधिन्यायेन सर्वे तत्त्वोत्कृष्यादिर्यत्नः प्रज्ञाकौशलं चानर्थकं स्यादित्याह कृष्यादीत्यादिना ७ गदानां रोगाणां अगदस्य औषधस्य अनुष्ठिताः प्रयोजिताः ८
तुल्यलक्षणाः प्रज्ञाधिकादैश्वर्याधिकाः भाज्ञः ९ भूतानां परं रूपं चिदात्मा अचरं यस्मात् तद्धर्मयज्ञानेन धीवृत्त्यैव बाध्याबाध्यरूपयोपलभ्यते ज्ञायते विषयाधीत्याप

कृष्यादीनीह कर्माणि सस्यसंहरणानि च प्रज्ञावद्भिः प्रक्लृप्तानि यानासनगृहाणि च ७ आक्रीडानां गृहाणां च गदा
नामगदस्य च प्रज्ञावंतः प्रयोक्तारो ज्ञानवद्भिरनुष्ठिताः ८ प्रज्ञा संयोजयत्यर्थैः प्रज्ञा श्रेयोऽधिगच्छति राजानो भुंजते राज्यं प्र
ज्ञया तुल्यलक्षणाः ९ परावरं तु भूतानां ज्ञानेनैवोपलभ्यते विद्यया तात सृष्टानां विद्यैव हि परा गतिः १० भूतानां जन्म स
र्वेषां विविधानां चतुर्विधं जरायुजांडजोद्भिज्जस्वेदजं चोपलक्षयेत् ११ स्थावरेभ्यो विशिष्टानि जंगमान्युपधारयेत् उप
पन्नं हि यच्चेष्टा विशिष्येत विशेष्यया १२ आहुर्वै बहुपादानि जंगमानि द्वयानि तु बहुपाद्भ्यो विशिष्टानि द्विपदानि बहून्यपि १३

रागतिर्लयस्थानं १० एवं धीमयोऽसृष्टिप्रलयावुक्त्वा व्यावहारिकौ ताववाह विद्वत्तरं सार्धं भूतानामिति जरायुजं मनुष्यपश्वादि अंडजं पक्षिसर्पादि उद्भि
ज्जं तृणवनस्पत्यादि स्वेदजं यूकालिक्षादि ११ यत् यस्मात् विशेष्यविशेषं कृत्वा यच्चेष्टा सा विशिष्येत विशिष्टं कुर्यात् वृक्षादीनां पूर्वोक्तरीत्या दर्शनादिम
त्त्वेऽपि प्रत्यक्षेण दर्शनादिमंतो जंगमास्ततः श्रेष्ठा इत्यर्थः १२

20

पार्थिवानिपृथ्वीचराणिमानुषाणिइतराणिखेचराणि १४ उत्तमानिनिर्गतानिमध्यमेष्वेवांतरतारतम्यमाहमध्यमानीत्यादिनाआत्मस्थानिविशिष्टानीमानि

द्विपदानिद्वयान्याहुःपार्थिवानीतराणिच पार्थिवानिविशिष्टानितानिसुन्त्वानिसंज्ञते १४ पार्थिवानिद्वयान्याहुर्मध्यमान्युत्तमा
नितु मध्यमानिविशिष्टानिजातिधर्मोपधारणात १५ मध्यमानिद्वयान्याहुर्धर्मस्थानीतराणिच धर्मस्थानिविशिष्टानिकार्याकार्योपधारणा
त १६ धर्मस्थानिद्वयान्याहुर्वेदस्थानीतराणिच वेदस्थानिविशिष्टानिवेदोह्येषुप्रतिष्ठितः १७ वेदस्थानिद्वयान्याहुः प्रवक्तॄणीतराणि
च प्रवक्तॄणिविशिष्टानिसर्वधर्मोपधारणात १८ विज्ञायंतेहियेवेदाः सधर्माःसक्रियाफलाः सधर्मानिखिलावेदाःप्रवक्तॄभ्या
विनिःसृताः १९ प्रवक्तॄणिद्वयान्याहुरात्मस्थानीतराणिच आत्मस्थानिविशिष्टानिजन्माजन्मोपधारणात २० धर्मद्वयंहियो
वेदसधर्मज्ञःसमसर्ववित सत्यागीसत्यसंकल्पःसत्यःशुचिरथेश्वरः २१ ब्रह्मस्थानप्रतिष्ठंहितंदेवाब्राह्मणंविदुः शब्दब्रह्मणिनि
ष्णातेपरेचकृतनिश्चयं २२ अंतस्थंचबहिःस्थंचसाधियज्ञंसाधिदैवतं ज्ञानान्वितास्हिपश्यंतितेदेवास्तातद्विजाः २३ तेषु
विश्वमिदंभूतंसर्वंचजगदाहितं तेषांमाहात्म्यभावस्यसदृशंनास्तिकिंचन २४

न २० धर्मद्वयंप्रवृत्तिनिवृत्तिरूपं २१ तत्रापिब्रह्मस्थानेप्रतिष्ठासमाप्तिर्यस्यतनुप्रवृत्तिधर्मो शब्दब्रह्मणिवेदशास्त्रे २२ अंतस्थंपरवित्तस्थंबहि
स्थंव्यवहितादितेज्ञानान्विताःद्विजाःदेवाश्चान्येनामब्राह्मणाःअसुराश्चेत्यर्थः २४

८

२४ त्रिषष्टितमः॥ ॥आत्मज्ञानं विना कर्मापि कृतमंतवदेव भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके यजति ददाति तपस्तप्यतेऽपि बहूनि वर्षसहस्राण्यंतवदेवा
स्य भवतीति श्रुतेः अत आत्मानं जिज्ञासुं ज्ञात्वा तत्प्राप्त्यर्थं कर्माणि कुर्वीत विविदिषंति यज्ञेनेत्यादिश्रुतेरित्याह एषेति वृत्तिर्वर्त्तनं पूर्वतरा नित्या एष नित्यो महिमा
ब्राह्मणस्येति श्रुतेः १ तच्च कर्मणि संशयस्थितमेव तर्हि किं कर्मकृतं सत्सिद्धये भवति संशयस्वरूपं विवृणोति किंन्विति किं कर्मस्वभावो नित्यमेव उत ज्ञानं ज्ञानजन
कत्वेन कर्म काम्यं वेत्यर्थः वित्तं चेन्न काम्यं स्यात् काम्यं चेन्न तदकरणे प्रत्यवायः स्यादिति भावः २ तत्र तस्मिन्संशये सति। पुरुषं प्रति ब्रह्मोद्देशेन ज्ञानं ज्ञानजनकं

आद्यंतेनिधनं चैव कर्म चातीत्य सर्वशः चतुर्विधस्य भूतस्य सर्वस्येशाः स्वयंभुवः २४ शांतो मोक्षधर्मेषु मुकानुप्रश्ने॥ ॥
व्यास उवाच एषा पूर्वतरा वृत्तिर्ब्राह्मणस्य विधीयते ज्ञानवानेव कर्माणि कुर्वन्सर्वत्र सिध्यति १ तत्र चेन्न भवेदेवं संशयः
कर्मसिद्धये किं नु कर्मस्वभावोयं ज्ञानं कर्मेति वा पुनः २ तत्र वेदविधिः स्याज्ज्ञानं चेत्पुरुषं प्रति उपपत्त्युपलब्धिभ्यां वर्ण
यिष्यामि तच्छृणु ३

चेत्कर्म स्यात्तर्हि स एव वेदविधिर्नित्यविधिरपि स्यात्। आत्मविविदिषार्थैरपि कर्मभिर्नित्यप्रयोगस्यापि सिद्धिरस्तीत्यर्थः अत्र हेतुद्वयं उपपत्तेरुपलब्धेश्चेति यथा
काम्यापंदारसंग्रहः कन्वर्थोपि भवति नहि कामार्थमन्यास्त्री क्रत्वर्थमन्यास्त्री परिणीयेत्युपपद्यते। उपलभ्यते च संयोगपृथक्त्वन्यायेन नित्यस्यापि खादिर
त्वादेः काम्यत्वं तच्चोदाहृतं न तत्कर्मणामुभयार्थत्वेन प्राधान्यं वर्णयिष्यामहं तं च शृणु ३ ॥

स्वभाववादनिरासमुपक्रांते उपसंहरिष्यन्नमतांतराण्युपन्यस्यति केचिदिति। पौरुषं इह जन्मनि जन्मांतरे वा कृतं कर्म दैवं ग्रहाः काल इति यावत् स्वभावः स्वरू
पमात्रं ४ इति क्रमेण मीमांसकस्य दैवज्ञस्य सूत्रवादिलोकायते स्वमतानुपन्यस्यैतेषां विकल्पसमुच्चयावाह। पौरुषं दैवं च कर्म दृष्टादृष्टयत्नः स्वभावम
नुसृत्य कर्म कालैः फलदा इति तदर्थः अविवेकं समुच्चयं पृथक् पृथक् तेष्वेकमेव प्रधानं नत्वितराणीति तदर्थः ५ आर्हतमतमाह एतदिति। तैर्हि स्यादस्ति। स्या
न्नास्ति। स्यादस्ति च नास्ति च। स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति सप्तभंगीनयः सर्वत्र योज्यते। अतएतदेवमि

पौरुषं कारणं केचिदाहुः कर्मसु मानवाः दैवमेके प्रशंसंति स्वभावमपरे जनाः ४ पौरुषं कर्म दैवं च कालवृत्तिस्वभाव
तः त्रयमेतत् पृथग्भूतमविवेकं तु केचन ५ एतदेवं च नैवं च न चोभे नानुभे तथा कर्मस्था विषयं ब्रूयुः सत्त्वस्थाः सम
दर्शिनः ६

ति स्यादस्तीत्युक्तं। चात् एतत् न एवं च नेति संबंधेन स्यान्नास्ति। स्यादवक्तव्य इति चोक्तं। न चोभे इत्यनेन स्यादस्ति च नास्ति च। स्यादस्ति च नास्ति चावक्त
व्य इति चोक्तं। नानुभे इति स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्य इति चोक्तं। कर्मस्थाः आर्ह[illegible]ताः विषयं घटादिं एतदेवं अस्तीत्यादि ब्रुवीरन्निति सं
बंधः एतेषु पक्षेषु कृतहानाकृताभ्यागमप्रसंगात् स्वभावमात्रपक्षस्तुच्छः बंधमोक्षादिवस्तुमात्रस्वरूपस्यास्ति नास्तीत्यादिविकल्पग्रस्तत्वेनानव
धारणात्मकं आर्हतपक्षोऽपि तुच्छ एव। परिशेषात्समुच्चयपक्ष एव श्रेयान् व्यवहारे। परमार्थस्तु सत्त्वस्थाः योगिनः समदर्शिनः ब्रह्मैवकारणत्वेन प
श्यंति ६॥ ॥

त्रेतायामिति पापात् वंधादेवात्र श्रौतेमते संशयो भवतीत्यर्थः प्रशांताः निःसंशयाः ७ अपृथगिति वेदत्रयेपि भेदमपश्यंतः कामादीन्पृथक्कृत्य तपो ज्ञानं उ
पासते प्राप्नुवंति ८ अतो ज्ञातारमेवं सोतितपइति ९ यद्भूत्वा ब्रह्मभूत्वा तद्भूतः ब्रह्मभूतः १० किं तज्ज्ञानमिति ज्ञानशब्देन विद्या वा कर्मजो निश्चयो वा
आत्मनाशो वेति पृष्टे नत्रोत्यः स्वभाववादनिरासेन निरस्तः आद्यप्रमाणप्रदर्शयन्नन्यमतं निरस्यति तदिति तद्ब्रह्म वेदवादेषु कर्मकांडे घपि प्रमणा वा हि देव

त्रेतायां द्वापरे चैव कलिजाश्च ससंशयाः तपस्विनः प्रशांताश्च सत्वस्थाश्च कृते युगे ७ अपृथग्दर्शनाः सर्वे ऋक्सामसु
यजुःषु च कामद्वेषौ पृथक्कृत्वा तपः कृतमुपासते ८ तपोधर्मेण संयुक्तस्तपोनित्यः सुसंशितः तेन सर्वानवाप्नोति का
मान्यान्मनसेच्छति ९ तपसा तदवाप्नोति यद्भूत्वा सृजते जगत् तद्भूतश्च ततः सर्वभूतानां भवति प्रभुः १० तदुक्तं वेद
वादेषु गहनं वेददर्शिभिः वेदांतेषु पुनर्व्यक्तं क्रमयोगेन लक्ष्यते ११ आरंभयज्ञाः क्षत्रस्य हविर्यज्ञा विशः स्मृताः
परिचारयज्ञाः शूद्राश्च जपयज्ञा द्विजातयः १२ परिनिष्ठितकार्यो हि स्वाध्यायेन द्विजो भवेत् कुर्यादन्यन्न वा कुर्यान्मै
त्रो ब्राह्मण उच्यते १३

तान्वेन उक्तं तपापि गहनं अज्ञातमेव तत्र वेददर्शिभिरपि वेदांतेषु तु तदेव पुनर्विधिकप्राप्यं ब्रह्म व्यक्तमुक्तं कर्मयोगभावनाघात्मके योगे तत्र लक्ष्य
ते ज्ञानहृपासनया कीटभृंगन्यायेन ब्रह्मभावसंप्राप्यत्वं व्यक्तं युक्तं जन्मनेनानित्यत्वापातादित्यर्थः ११ प्रमेयसिद्ध्यर्थं ब्रह्मणि प्रमाणभूतं वेदं स्तौति।
आरंभेत्यादिना १२

मो०
२०२

१६ स्वधर्मस्थाश्चाश्रमाः विक्रीयंते भृतकाध्यापनकृतजन्यपुण्यसमर्पणादिना १७ वर्षतिपुष्णाति अंगानियोगांगानियमादीनिवेदाख्यापितानांपुष्यंती
त्यर्थः १८ कालनानात्वंकालोजीवस्तस्यनानात्वंकृतत्रेतादिरूपेण। तथाहिमन्त्रेकर्मपराङ्मुखःशयानःपुरुषःकलिरित्युच्यते अधर्मंहातुमि
च्छन्संजिहानोद्वापरःधर्ममनुष्ठातुमुद्युक्तउत्तिष्ठन्त्रेता। धर्मंचरन्कृतंभवति। तथाचश्रुतिःकलिःशयानोभवतिसंजिहानस्तुद्वापरःउ

४०२

त्रेतादौकेवलावेदायज्ञावर्णाश्रमास्तथा संरोधादायुषस्त्वेतेव्यस्यंतेद्वापरेयुगे १४ द्वापरेविप्लवंयांतिवेदाः
कलियुगेतथा दृश्यंतेनापिदृश्यंतेकलेरंतेपुनःकिल १५ उत्सीदंतिस्वधर्माश्चतत्राधर्मेणपीडिताः गवां
भूमेश्चयेचापामोषधीनांचयेरसाः १६ अधर्मांतर्हितावेदावेदधर्मास्तथाश्रमाः विक्रियंतेस्वधर्मस्थाःस्था
वराणिचराणिच १७ यथासर्वाणिभूतानिवृष्टिर्भौमानिवर्षति सृजतेसर्वतोंगानितथावेदायुगेयुगे १८
निश्चितंकालनानात्वमनादिनिधनंचयत् कीर्तितंयत्पुरस्तान्मेसृजतेयच्चात्तिचप्रजाः १९ यच्चेदंप्रभवस्था
नंभूतानांसंयमोयमः स्वभावेनैववर्तंतेद्वंद्वसृष्टानिभूरिशः २० ॥

त्तिष्ठंस्त्रेताभवतिकृतंसंपद्यतेचरन्निति। सचकालोऽनादिनिधनःप्रजाःसृजतेऽत्तिचेतिजीवस्यतत्तदाख्याभेदउक्तः १९ यच्चेदंकालाख्यंभूता
नांप्रभवउत्पत्तिःस्थानंपोषणं। संयमःप्रलयःसयमःनियंतांतर्यामी। यत्रवर्तंतेभूतानिस्वभावेनब्रह्मभावेनतुविकृतेनरूपेण २० ॥

राम०
२०२

कालएवसर्गादिकोंतेनज्ञानंनामविधेवप्रतीचः अज्ञानकृतजीवत्वबाधेनब्रह्मभावप्रकाशिकाननिष्पाद्यमन्यातिशयअत्यंतोच्छेदोवेतिअध्यायद्वयेनसमर्थि
तं २१ चतुःषष्टितमः ॥ ॥एवंज्ञानपदार्थव्याख्यानप्रसंगादात्मनोऽनाधेयातिशयत्वमुक्तंतत्रचनकर्मातिमापक्षेउच्छेदपक्षेवामुक्तस्ततः परिशेषात्असंगात्म

सर्गःकालोधृतिर्वेदाःकर्त्ताकार्यक्रियाफलं एतत्तेकथितंतातयन्मांत्वंपरिपृच्छसि २१ शांतोमोक्षधर्मेषुशुकानुप्रश्ने
भीष्मउवाच इत्युक्तोभिप्रशस्यैतत्परमर्षेस्तुशासनं मोक्षधर्मार्थसंयुक्तमिदंप्रष्टुंप्रचक्रमे १ शुकउवाच प्रज्ञावान्
श्रोत्रियोयज्वाकृतप्रज्ञोनसूयकः अनागतमनैतिह्यंकथंब्रह्माधिगच्छति २ तपसाब्रह्मचर्येणसर्वत्यागेनमेधया सां
ख्येवायदिवायोगएतत्पृष्टोवदस्वमे ३ मनसश्चेंद्रियाणांचयथैकाग्र्यमवाप्यते येनोपायेनपुरुषैस्तत्त्वंव्याख्यातुमर्हसि
३ व्यासउवाच नान्यत्रविद्यातपसोर्नान्यत्रेंद्रियनिग्रहात् नान्यत्रसर्वसंत्यागात्सिद्धिंविंदतिकश्चन ४ ॥ ॥ ॥

वादिनोःसांख्ययोगयोर्द्वयव्यवस्थित [illegible] इतितयोर्विभागार्थमध्यायद्वयमारभ्यतेइत्युक्तइत्यादि १ अनागतंप्रत्यक्षानुमा
नाभ्यामज्ञातं अनैतिह्यं यूपाहवनीयादिवल्लौकिकमपिइदमित्थमितिवेदेनापिननिर्दिश्यं २ यथायत्रकारकमैकाग्र्य ३ विद्यादिपदैःक्रमेणाश्रमच
तुष्टयधर्माउक्ताः ४

स्वयंभुवईश्वरस्यमहाभूतानिपूर्वंसृष्टिः तानिचप्राणभृत्क्षेमेजीवसंघेशरीरेषुशरीराभिमानिषुभूतजीवेषुसूक्ष्मपिण्डंनिविष्टानि तैरात्मत्वेनगृहीतानीत्यर्थः पृथक्किलसिद्धि
रितिपाठेभौतिकसृष्टेःपृथग्भावभूतसृष्टिःततःप्राची[illegible]त्वादितिसर्गवार्थः ५ एतेषुनासादिरंध्रेषु ६ योगमतेतआत्माभोक्तैवनतुकर्त्ता सांख्यमतेतुभोक्तानापिकर्त्ते
ति तत्रायंदूषयतिउत्तरस्यैवसिद्धांतत्वंज्ञापयितुं क्रांतेति क्रांतेपादेंद्रियेपावलेपाणींद्रियेविष्णुशक्रौततश्चयोक्ता रौतिह्नतःभटाइवराजकीपरपशकटादौ तत्रप
यामटागतेजपयराजपादिरपगतेज्ञसत्वह्यादिवराजाआत्मन्यभिमानादध्यारोपयति तद्वत्चिदात्मादेवतेंद्रियगतंभोक्तृत्वरवंजत्वादिकंअविवेपास्वस्मि

महाभूतानिसर्वाणिपृथक्किलसिद्धिःस्वयंभुवः अपिष्टंप्राणभृत्क्षेमेनिविष्टानिशरीरिषु ५ भूमेर्देहोजलात्स्नेहोज्योति
षश्चक्षुषीस्मृते प्राणापानाश्रयोवायुःखेष्वाकाशंशरीरिणां ६ क्रांतेविष्णुर्बलेशक्रःकोष्ठेऽग्निर्भोक्तुमिच्छसि क
र्णयोःप्रदिशःश्रोत्रंजिह्वायांवाक्सरस्वती ७॥

ध्यारोपयति अहंभोगीअहंरवंजइति यथाचपूराज्ञोनभ्यस्ततदभिमानाभावात् एवंभोगोपिविसंवादोनास्ति आत्मनित्वविषयैवतन्वानमितिसि
द्धमात्मनोऽकर्तृत्वभोक्तृत्वंचानन्यात्मैवकर्त्ताभोक्ताचास्तु किमंतर्गडुभिर्विष्ण्वादिभिरितिचेन्न अनिर्मोक्षापत्तेः स्वाभाविकस्य कर्तृत्वादेःवह्नेरौ
ष्ण्यवदाश्रयनाशमंतरेणनाशायोगाच्च कर्णौस्थानंश्रोत्रमिंद्रियंदिशोदेवताः जिह्वास्थानंवागिंद्रियंसरस्वतीदेवता एतद्वान्येषामपिस्थानादी
ना[illegible]मुपलक्षणं ७॥

दर्शयंतितानिदर्शनीयानिकर्त्तरिकृतः तानिचतानींद्रियाणिचेतिसमासः विभक्तिलोपश्चार्षः आहारः शब्दादिग्रहः ८ इंद्रियेभ्यएवइंद्रियार्थानकृ
र्मागवत्पृथग्भूतान्विघात ९ मनःकर्दयंतासारथिःभूतात्मावुद्ध्युपाधिर्जीवः १० एषांशब्दादीनांईश्वरंउत्पत्तिस्थितिलयहेतुःनियमसंहारेविस

कर्णौत्वक्चक्षुषीजिह्वानासिकाचैवपंचमी दर्शनीयेंद्रियोक्तानिद्वाराण्याहारसिद्धये ८ शब्दस्पर्शस्तथा
रूपंरसोगंधश्चपंचमः इंद्रियार्थान्पृथग्विद्यादिंद्रियेभ्यस्तुनित्यदा ९ इंद्रियाणिमनोयुक्तेवश्यान्यंतेववा
जिनः मनश्चापिसदायुक्तेभूतात्माहृदयाश्रितः १० इंद्रियाणांतथैवैषांसर्वेषामीश्वरंमनः नियमेचवि
सर्गेचभूतात्मामानसस्तथा ११ इंद्रियाणींद्रियार्थाश्चस्वभावश्चेतनामनः प्राणापानौचजीवश्चनित्यं
देहेषुदेहिनां १२

र्गेसृष्टौ ११ इंद्रियार्थाः घटादयः स्वभावःशीतोष्णादिर्धर्मःचेतनाधीवृत्तिःदेहेषुहृदयगुहायामेववर्त्ततिस्वप्नइवकर्मोदयेततएवाविर्भवतीत्यर्थः १२

ननुदेहस्यापींद्रियाद्यर्थत्वात्देहांतगतिबुद्धौ स्थितिः स्वसंकंधारोहणान्यायमनुसरतीत्याह । सत्वस्य बुद्धेराश्रयोपः प्रागुक्तो देहस्यापि नास्ति स्वप्नदेहवत्तस्यापि
प्रतिभानमात्रत्वात् । कस्तर्हि सत्वस्याश्रयः किंच तस्य रूपमत आह । गुणाइति त्रिगुणात्मिका मूलप्रकृतिरेवास्य विकारस्य वाचारंभणं विकारो नामधेय
मितिश्रुतेः ॥ शब्दमात्रस्वरूपस्य सत्वस्याश्रयइत्यर्थः नतु चेतना सत्वस्याश्रयः स्वरूपं वा असंगत्वादधिकारत्वाच्च । ननु गुणाः बुद्धेरेव धर्माः सं तु तस्या
च सात्विकोयं राजसोयमिति तेषां तदुपाधिके पुरुषे व्यपदेशो मुख्यतइत्याशंक्याह सत्वं हीति तिजः वासनात्वं सृजति ननु गुणान् अनादिवासना

आस्त्रयोनास्ति सत्वस्य गुणाः शब्देन चेतना सत्वं हि तेजः सृजति न गुणान्वै कथंचन १३ एवं समुद्दर्शं देह
वृत्तं षोडशभिर्गुणैः मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि १४ नह्ययं चक्षुषा द्रष्टं पान चसैर्वर्पीद्रियैः मन
सा तु प्रदीपेन महात्मा प्रकाशते १५ अशब्दस्पर्शरूपं तदरसागंधमव्ययं अशरीरं शरीरेषु निरीक्षेत निरिंद्रियं
१६ अव्यक्तं सर्वदेहेषु मर्त्येषु परमाश्रितं योनुपश्यति सप्रेत्य कल्पते ब्रह्मभूयसे १७ ॥ ॥

हि सत्वस्य कारणं सा च त्रिगुणात्मिकेति न सत्वकार्यत्वं गुणानां घटते सात्विकोयमित्यादिर्व्यपदेशस्तु परंपरयापि युज्यतइतिभावः १३ समुद्दर्शं
चिदात्मानं षोडशभिः पंचेंद्रियाणि पंचेंद्रियार्थाः स्वभावेद पश्च षट्ठैः मनीषी मनोनिग्रहशीलः आत्मनि बुद्धौ १५ अशरीरं स्थूलसूक्ष्मका
रणशरीररहितं मर्त्येषु मरणधर्मवत्सु १६ अनुपश्यति गुरुवेदवाक्यमनु ब्रह्मभूयसे निर्विशेषब्रह्मभावाय १७ ॥ ॥ ॥

अभिजनः शिष्यकुलादिः समं ब्रह्मैव पश्यंतीति समदर्शिनः १८ एतदेव प्रसिद्धिविषयमाह सहीति। ध्रुवेषु स्थावरेषु १९ योगफलमाह सर्वभूतेष्विति। संप्र
ज्ञाते सोपाधिकावस्थायां सर्वभूतेष्वात्मानमनुस्यूतं पश्यति अहमेवेदं सर्वोस्मीत्यनुभवतीत्यर्थः आत्मनि निष्कले असंप्रज्ञातावस्थायां सर्वभूतान्यात्मन्येव
विलीनानि पश्यति तत्केन कं पश्येदिति श्रुतेः तथा च द्विविधो ब्रह्मभाव उक्तो भवति स चोक्तः सोपाधिर्निरुपाधिश्चेति द्विधा ब्रह्मविदुच्यते सोपाधिकः स्यात्स

विद्याभिजनसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः १८ स हि सर्वेषु भूतेषु जंगमेषु
ध्रुवेषु च वसत्येको महानात्मा येन सर्वमिदं ततं १९ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि यदा पश्यति भूतात्मा ब्र
ह्म संपद्यते तदा २० यावानात्मनि वेदात्मा तावानात्मा परात्मनि य एवं सततं वेद सोमृतत्वाय कल्पते २१ ॥ ॥

र्वात्मा निरुपाख्यो निरुपाधिक इति २० वेदस्य आत्माशब्दः स च आत्मनि स्वस्वरूपे यावान् देशतः कालतश्च यावत्प्रमाणोस्ति तावान् आत्मा जीवः सर्वो
पाधिवाचो विषय आत्मेत्यर्थः स च परात्मनि अधिष्ठाने स्वस्वरूपेण यथा च श्रुतिः यावद्ब्रह्म विष्ठितं तावती वागिति विष्ठितो विविधाकारेणास्थितं २१ ॥

सर्वेषांभूतानांआत्मभूतस्यभूतस्यरूपस्याविर्भोआकाशतुल्यस्यपरिछेदाभिमानिनोमेवदेवयानःपितृयाणोऽन्योवामार्गोस्ति। अतस्तस्यमार्गेन्वेषणीये
वाअपिमुह्यंतिदेवापीतपरार्षःसंधिर्यविहितक्रिययासंवंधश्च। अपदस्यमार्गरहितस्यपदैषिणःब्रह्मभूषोःतथावक्ष्यतिःनतस्यप्राणाउत्क्रामंत्यत्रै
वसमवनीयंतेब्रह्मैवसन्ब्रह्माप्येतीति। अत्रैवस्वात्मन्येवसमवनीयंतेएकीभावेनलीयंतेअस्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगछं

सर्वभूतात्मभूतस्यसर्वभूतहितस्यच देवापिमार्गेमुह्यंतिअपदस्यपदैषिणः २२ शकुंतानामिवाकाशेमत्स्यानामिवचोदके
यथागतिर्नदृश्येततथाज्ञानविदांगतिः २३ कालःपचतिभूतानिसर्वाण्येवात्मनात्मनि यस्मिंस्तुपच्यतेकालःतंवेदेहनक
श्चन २४ नतदूर्ध्वंनतिर्यक्चनाधोनचपुनःपुनः नमध्येप्रतिगृह्णीतेनैवकिंचित्कुतश्चन २५ सर्वेतत्स्थाइमेलोकावा
ह्यमेषांनकिंचन यद्यजस्रंसमागछेद्यथावाणोगुणाच्युतः २६ ॥ ॥ ॥ ॥ ॥

नीतिप्रकृतंतराश्चविदुष्येवप्राणमनःप्रभृतीनांकलानांप्रलयोध्यवसेयः २२ एतदेवदृष्टांतेनस्पष्टयतिशकुंतानामितिज्ञानविदांब्रह्मविदां २३ कालउक्त
रूपोजीवःपचतिजरयति।पच्यतेजीर्यति।यस्मिन्तंपरमात्मानं २४ ततमुक्तस्वरूपंप्रतिगृह्णीतेविषयीकरोति।एतेनदेशविशेषप्राप्तिर्मुक्तिरितिपक्षःपरास्तः
२५ अंतस्थाःमुक्तस्वरूपांतर्गताःएषांलोकानांमध्येवाह्यंकिंचित्तस्यानंनास्तियद्गतिप्राप्यंस्यात २६

ग्रंतेसंन्निधिं अनंतत्वात्तस्य २७ कारणस्यापेयंस्वरूपमाहतस्मादितिसार्द्धमेनं २८ कालःपचतीत्यादिभिःषड्भिःश्लोकैर्ब्रह्मणःप्रत्यगात्मत्वात्अ
विषयत्वात्सर्वलोकाश्रयत्वात्अनंतत्वात्सूक्ष्मत्वात्विभुत्वात्चब्रह्मविदांदेशांतरप्राप्तिर्नास्तीत्युक्त्वाप्रकारांतरेणाप्येतदाह अक्षरमितिअक्षरंअ
विनाशिचैतन्यं अक्षरंविनाशिजडंसर्वेषुभूतेषुस्थावरजंगमशरीरेषुक्षरःक्षरत्वं ३० न[illegible]महदहंकारपंचतन्मात्राणिअविद्याकर्मचेतिकामस्याहं

नैवांतंकारणस्यापियद्यपिस्यान्मनोजवः तस्मात्सूक्ष्मात्सूक्ष्मतरंनास्तिस्थूलतरंततः २७ सर्वतःपाणि
पादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति २८ तदेवाणोरणुतरंतन्महद्भ्योमह
त्तरं तदंतःसर्वभूतानांध्रुवंतिष्ठन्नदृश्यते २९ अक्षरंचक्षरंचैवद्वैधीभावोयमात्मनः क्षरःसर्वेषुभूते
षुदिव्यंत्वमृतमक्षरं ३० नवद्वारंपुरंगत्वाहंसोहिनियतोवशी ईशःसर्वस्यभूतस्यस्थावरस्यचरस्यच ३१

कारधर्मस्यतद्धेहेरौवअहइतिनवैवगतिद्वाराणियस्मिन्तत्नवद्वारंपुरंगत्वाप्राप्यईशोपिहंसोहमितिगच्छतीतिहंसोगतिमान्भवति सईक्षांचक्रेक
स्मिन्न्वहमुत्क्रांतेउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठा[illegible]स्यामीतिसप्राणमसृजतेतिपरस्मिन्प्राणोपाधिकस्यैवगमनस्यश्रवणा
तानियतोअवंचलःवशीउपाधिदोषानभिभूतःईशोनियंता ३१

मो०
२०६

206

पुरंगत्वाहंसोभवतीत्यत्रहिहंसोनिहानीति। अजस्यपरमेश्वरस्यशरीराणांशरीरांतर्गतानांनवानांपूर्वोक्तमहदादीनांसंबंधिनोयेहान्यादयस्तेषांसच
येनसंग्रहेणाहंसत्वं आह। पारदर्शिनस्तत्वविदः हानिर्गतिः आहा गतावित्यस्यरूपं भंगः दुःखित्वादिकं विकल्पः मनुष्योयंपशुरयंदक्षोयमि
तिविविधकल्पनाबहंसत्वमित्युपलक्षणं भंगादेरपि ३२ एवं आत्मनः क्षराक्षरयोरुक्तान्निमक्षरस्यक्षरद्वारकंगत्यादिकं चेत्युक्त्वा तत्वमसि

हानिभंगविकल्पानांनवानांसंचयेनच शरीरमिदमजस्याहुर्हंसत्वंपारदर्शिनः ३२ हंसोक्तंचाक्षरंचैवकूटस्थं
यत्तदक्षरं तद्विद्वानक्षरंप्राप्यजहातिप्राणजन्मनी ३३ शांतिमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥ व्यासउवाच पृच्छत
स्तवसत्पुत्रयथावदिहतत्वतः सांख्यज्ञानेनसंयुक्तंयदेतत्कीर्तितंमया १ ॥ ॥ ॥

वाक्यार्थप्रतिपादनपुरःसरंविद्वदुपाध्यभावाङ्गत्वमेवमाह। हंसेतिहंसपदेनोक्तंयदक्षरंजीवाख्यंतत्कूटस्थमेवाक्षरं नतु अन्यत्कूटस्थ
मक्षरं अन्यतहंसाख्यमक्षरमितिभेदोस्ति। अयमात्मा अहंब्रह्मास्मीत्यादिश्रुतिशतेभ्यः ततं नस्मादहेतोः विद्वान्हंसः अक्षरं कूटस्थमात्मानंप्राप्यप्राणोत्क्रांत्यादि
साधनेउपाधिंजन्मचजहातिजन्महेतोरविद्यायानाशात् ३३ पंचषष्टितमः॥ ॥ एवंसांख्यतत्वमुक्त्वा योगिनोयत्कृत्यंतंतद्वक्तुंप्रतिजानीतेपृच्छत इति ॥

राम०
२०६

ननुज्ञानादेवतुकैवल्यंनान्यःपंथाविद्यतेऽयनायेतिश्रुतेःसांख्यादन्योमोक्षमार्गोनास्तितत्किंस्वातंत्र्येणयोगकृत्यनिरूपणेनेत्याशंक्ययोगमतेज्ञानशब्दार्थमाहएकत्वमिति घ
यादिवृत्तिद्वारंइंद्रियाणांदुःखादिवृत्तिद्वारंमनः तेषामेकत्वंबुद्धिमात्रेणावस्थानंबुद्धिवृत्तिनिरोधइतियावत् एतदेवज्ञानंअनुत्तमंश्रेष्ठमित्यर्थः नान्यदहंब्रह्मास्मी
तिधीवृत्तिरूपंतथाचश्रुतिः तावन्मनोनिरोद्धव्यंहृदियावत्क्षयंगतं एतज्ज्ञानंचध्यानंचशेषोन्योग्रंथविस्तरइति २ बोद्धव्यंगुरुमुखाद्वेदंगंतव्यं आचार्यवान्पुरु

योगकृत्यंतुतेकृत्स्नंवक्ष्यामितच्छृणु एकत्वंबुद्धिमनसोरिंद्रियाणांचसर्वशः १ आत्मनोव्यापिनस्तातज्ञानमेतद
नुत्तमं तदेतदुपशांतेनदांतेनाध्यात्मशीलिना २ आत्मारामेणबुद्धेनबोद्धव्यंशुचिकर्मणा योगदोषान्समुच्छिद्यपंचयान्क
वयोविदुः ३ कामंक्रोधंचलोभंचभयंस्वप्नंचपंचमं क्रोधंशमेनजयतिकामंसंकल्पवर्जनात् ५ ॥ ॥ ॥

षोवेदेतिश्रुतेः तेनसुषुप्तेघटदुःखादिवृत्त्यभावेनज्ञानत्वंप्रसक्तंतन्निरस्तं आनंदभुक्चेतोमुखः प्राज्ञइतिश्रुतेः तत्रापिनिद्रारूपायाधीवृत्तेः सत्वात्प्रशांतःउपशां
तोजितचित्तः दांतः जितबाह्येंद्रियः अध्यात्मशीलोध्याननिष्ठः आत्मारामआत्मनिरतिमान्बुद्धः ज्ञातशास्त्रतत्वः शुचिकर्मायमनियमादीन् ३ समुच्छिद्यबोद्धव्य
मितिपूर्वेणान्वयः ४ सत्वेनबुद्ध्यासंसेवनंपरिशीलनंत्वप्नोतितेन ५ ॥ ॥ ॥

धृत्या धैर्येण शिश्नोदरं अभिचारादिभ्यः पाणिपादं कंटकादिभ्यः चक्षुः श्रोत्रे साभिलाषपरस्त्रीदर्शनादिभ्यः मनो वाचं दुर्ध्यानादिभ्यः कर्मणा यज्ञादिना ६ एतदे
वाहाप्रमादादिति दंभं लो। अप्रत्नं ७ उशतीं कामप्रधानां विरोधोक्तिरित्यर्थः मनोनुदां मनोभंगकरीं ८ ननु ब्रह्मज्ञानादेव मुक्तिरिति प्रसिद्धं न तु धीनिरोधमात्रादित्या
शंक्य ब्रह्मशब्दार्थमाह ब्रह्मेति। शुक्रं बीजभूतं प्रधानं तेजोमयं प्रकाशात्मकं सत्वगुणप्रधानं महत्तत्वाख्यं तदेव ब्रह्म न ततोन्यत् यस्य शुक्रस्य रसः सारः भवस

सत्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ६ चक्षुः श्रोत्रे च मनसा मनो वाचं च
कर्मणा अप्रमादाद्भयं जह्याद्दंभं प्राज्ञोपसेवनात् ७ एवमेतान्योगदोषान्जयेन्नित्यमतंद्रितः अग्नींश्च ब्राह्मणांश्चा
र्चेद्देवताः प्रणमेत च वर्जयेदुशतीं वाचं हिंसायुक्तां मनोनुदां ८ ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं रसः एतस्य भूतभूत
स्य द्वयं स्थावरजंगमं ९ ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा शौचमाचारसंशुद्धिरिंद्रियाणां च निग्रहः १०
एतैर्विवर्द्धते तेजः पाप्मानं चापकर्षति सिध्यंति चास्य सर्वार्था विज्ञानं च प्रवर्त्तते ॥ ॥ ॥ ॥

अं२

जन्मवतः एतस्माद्द्वयं ईक्षणं एतेन सदेव सोम्येदमग्र आसीत् तदैक्षत बहुः स्यां प्रजायेयेति सैतदात्म्यमिदं सर्वमित्यस्याः श्रुतेरर्थः प्रधानं एकमेव सत् सत्वो
द्रेकादीक्षणकर्तृत्वेन महत्तत्वात्मकं भूत्वा ईक्षणद्वारा सर्वात्मकत्वं गतमिति दर्शितः ९ अस्य ध्यानेनाध्ययनादिना च सत्वोत्कर्षे सति पापनाशः सर्वकामा
वाप्तिरात्मज्ञानं च जायत इत्याह ध्यानमिति ॥

समः रागद्वेषशून्यः लब्ध्वेति यदृच्छालाभसंतुष्ट इत्यर्थः तेजस्वी सत्ववान् ब्रह्मणो महत्तत्वस्य पदं लयस्थानं प्रकृतिं निनीषेत् वशीकर्त्तुमिच्छेत् १२ ऐकाग्र्यं विषये
भ्यो निरोधं कृत्वा आत्मनि बुद्धौ मनो धारयेत् संकल्पात्मकं मनो निरुध्यादित्यर्थः १३ इंद्रियाणामनिरोधे दोषमाह जंतोरिति प्रज्ञा शास्त्रजा बुद्धिः स्रवति विषयप्राव
ण्यात् क्षीयते दृतेश्चर्मकोशस्य १४ मन इति इंद्रियाणां निग्रहो मनोनिग्रहपूर्वक एवेत्यर्थः कुमीनं जालदंशक्षयं मीनं १५ तत इति संकल्पानामेव मनस आ

समः सर्वेषु भूतेषु लब्ध्वा सुखेन वर्त्तयेत् सूतपाप्मा तु तेजस्वी लघ्वाहारो जितेंद्रियः कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं १२
मनसश्चेंद्रियाणां च कृत्वैकाग्र्यं समाहितः पूर्वरात्रापरार्द्धे च धारयेन्मन आत्मनि १३ जंतोः पंचेंद्रियस्यास्य यदेकं छिद्रमिंद्रि
यं ततोऽस्य स्रवते प्रज्ञा दृतेः पादादिवोदकं १४ मनस्तु पूर्वमादद्यात् कुमीनमिव मत्स्यहा ततः श्रोत्रं ततश्चक्षुर्जिह्वां घ्राणं
च योगवित् १५ तत एतानि संयम्य मनसि स्थापयेद्यतिः तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् १६ पंचेंद्रियाणि
संधाय मनसि स्थापयेद्यतिः यदैतान्यवतिष्ठंति मनःषष्ठानि चात्मनि १७

त्मनि बुद्धौ धारणं नाम १६ संधाय ध्येयवस्तुनः अभिसंधानं कृत्वा न तु सुषुप्तिवत्तमोयुक्तत्वेन मनसि स्थापयेत् आत्मनि बुद्धौ प्रसीदंति संकल्पजं कालु
ष्यं त्यजंतीति तत्र हेतुः संस्थापनाशंसाप्यवह्नेरिवास्य स्वरूपनाशानुविनाशे एवं इंद्रियाणां कालुष्यमित्यर्थः ब्रह्म महत्तत्वं १७ ॥ ॥ ॥

मो०
१०८

निर्विषयेवेदनमस्मीत्येतावद्यात्मपमात्रां सएवब्रह्मप्रकाशो योगानां सत्वपुरुषान्यतारव्यातिः शुद्धतत्वंपदार्थः आत्मनिसूक्ष्मबुद्धौ अस्मितामात्रा[illegible]यां १८ सर्वोऽ
हंकारादिर्विकारस्तत्रमहत्यात्मनि। सचमहानात्माकारणत्वेनव्यापकत्वादेवसर्वत्रेत्यर्थः २० परिमितंपरामासमात्रां तथाच श्रुतिः षड्भिर्मासैस्तु[illegible]सनित्ययुक्तस्ययो
गिनः आनंदः परमोगुह्यः सम्यग्योगः प्रवर्त्ततेइति। संशितव्रतः सम्यक्तीक्ष्णानियमः रागादिच्छेदकत्वमिहशितत्वं अक्षरं अस्मितानिर्मुक्तं शुद्धात्मस्वरूपं तेन साम्य

208

प्रसीदंतिच संस्थापयतश्चब्रह्मप्रकाशते विधूमइववदीप्तार्चिरादित्यइववदीप्तिमान् १८ वैद्युतोग्निरिवाकाशे दृश्यतेत्मातथा
त्मनि सर्वस्तत्रससर्वत्रव्यापकत्वाद्धदृश्यते १९ तंपश्यंति महात्मानो ब्राह्मणायेमनीषिणः धृतिमंतो महाप्राज्ञाः
सर्वभूतहितेरताः २० एवंपरिमितंकालमाचरन्संशितव्रतः आसीनोहिरहस्येकोगच्छेदक्षरसाम्यतां २१ प्रमोहोभ्रमआ
वर्त्तोघ्राणश्रवणदर्शने अद्भुतानिरसस्पर्शेशीतोष्णमारुताकृतिः २२ प्रतिभामुपसर्गांश्चाप्युपसंगृह्ययोगतः तांस्तत्व
विदनादृत्यआत्मन्येवनिवर्त्तयेत् २३

तांसमतांलक्षणाभेदाभावांस्वार्थेष्वि[illegible] २१ योगविघ्नानाह प्रमोह इति प्रमोहो लयः भ्रमः विक्षेपः आवर्त्तः उभयात्मश्शीकषायः घ्राणेति दिव्यगंधादिग्रहणं च
मारुताकृतिरिति शीघ्रगतिरदर्शनसिद्धिराकाशगमनं [illegible]चेत्युक्तं २२ प्रतिभांसकलशास्त्रार्थभानं उपसर्गाः दिव्यांगनासंगादयः तांश्चउपसंगृह्ययोग
वलेनलब्ध्वा अनादृत्य चआत्मनिबुद्धावेवनिवर्त्तयेत् संहरेत् बुद्धिकल्पितत्वात्तेषां तत्रैवसंहारस्ययुक्तत्वात् २३ ॥ ॥ ॥ ॥॥

१०८

त्रैकाल्ये प्रातः पूर्वरात्रेऽपररात्रे वा चैत्ये वृद्धमूलतरौ वृक्षाग्रेषु वृक्षपुरतः २४ कोष्ठहृदयपुंडरीके एकाग्र्यं यथा स्यात्तथा नित्यं वस्तु भांडं धनाद्युपकरणं तन्मनाः भांडमिव नित्यमनानित्यं चिंतयेत् २५ येनोपायेन पूर्वोक्तेन व्यक्तालंबनेन अव्यक्तालंबनेन वा २७ नाभिस्वजेत् परिग्रहं क्षीयात् परिग्रहो हि दुःखायेत्युक्तेः २८

कुर्यात्परि च यं योगं त्रैकाल्ये निपुणो मुनिः गिरिशृंगगतो यः चैत्ये वृक्षाग्रेषु च योजयेत् २४ संनियम्येंद्रियग्रामं काष्ठभांडव नाश्व एकाग्रं चिंतयेन्नित्यं योगात्मोद्विजयेन्मनः २५ येनोपायेन शक्येत संनियंतुं चलं मनः तं च युक्तो निषेवेत न चैव विचलेत्ततः २६ शून्यागारगिरिगुहाश्चैव देवतायतनानि च शून्यागाराणि चैकाग्र्ये निवासार्थमुपक्रमेत् २७ नाभिस्वजेत्परं वाचा कर्मणा मनसापि वा उपेक्षको यताहारो लब्धालब्धे समो भवेत् २८ यश्चैनमभिनंदेत यश्चैनमपवादयेत् समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभं २९ न प्रहृष्येत लाभेषु नालाभेषु च चिंतयेत् समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः ३० एवं स्वस्थात्मनः साधोः सर्वत्र समदर्शिनः षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्त्तते ३१ वेदनार्त्ताः प्रजा दृष्ट्वा समलोष्टाश्मकांचनः एतस्मिन्विरतो मार्गे विरमेन्न च मोहितः ३२

अपवादयेत् निंदेत् स्वार्थेषिणा च २९ मातरिश्वनः वायोः सधर्मा तुल्यधर्मा असंगोऽनिकेतश्च ३० शब्दब्रह्म प्रणवः अतिवर्त्तते स्वात्मपरोक्षीकरणेन अस्तं तेप्रकाशेत ३१ प्रजाः कांचनलाभार्थे विदनार्त्ताः दृष्ट्वा एतस्मिन्वित्तार्जनादिमार्गे विरतो विरक्तः विरमेत् वित्तार्जनादिम्यः न च मोहितो भवेत् ३२ ॥ ॥ ॥

मो०
२०९

२०९

श्रद्धावानेवात्राधिकारीत्याह अपीति। वर्णाविकृष्टः शूद्रः एतेन तत्त्वमस्यादिवाक्यार्थविचारात्मके सांख्यमार्गे वर्णिका एवाधिकारिणः मनोनिरोधात्मके योगमार्गे तु स्त्रीशूद्रादयोप्यधिकारिण इति गम्यते ३३ योगविद्यामुपसंहरति। अजमिति। इंद्रियैर्मनोबुद्धियुक्तैर्निश्चलैः सद्भिरुपलक्षितं यत् नामरूपातीतं स्वरूपं तदेव अजं जन्महीनं यतः पुराणं पुरापि नवं अतएव अजरं सर्वभावविकारहीनं अतः सनातनं नित्यमेकरूपं वस्तु उपलभेत तद्वस्तु अणोरण्यणीयः दुर्ल

अपिवर्णाविकृष्टस्तु नारी वा धर्मकांक्षिणी तावप्येतेन मार्गेण गच्छेतां परमां गतिं ३३
अजं पुराणमजरं सनातनं यदिंद्रियैरुपलभेत निश्चलैः अणोरणीयो महतो महत्त
रं तदात्मना पश्यति युक्तमात्मवान् ३४

क्ष्यमित्यर्थः महतोपि महत्तरं अनंतमित्यर्थः तत् आत्मना बुद्ध्या युक्तः आत्मवान् जितचित्तः पश्यति। एतेन यदा पंचावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टति तामाहुः परमां गतिं। तां योगमिति मन्यंते स्थिरामिंद्रियधारणां अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति श्रुत्यर्थो दर्शितः ३४ ॥

राम०
२०९

सप्तानभोगमाजोम्लोब्रह्मणसह २

सांख्यविद्यामुपसंहरति। इदमिति। अनुदृश्य गुरुवचनमनुशब्दतो ऽर्थतश्च ज्ञात्वा अवेक्ष्य स्वपं च पुत्रं या परीक्ष्य इमां शास्त्रप्रसिद्धां परमेष्ठिसाम्यतां चतुर्मुख समतां प्रयांति। अमृतगतिं भूतसंप्लवपर्यंतं ब्रह्मलोके ब्रह्मणा सह ते मुच्यंते मनीषिणः शुद्धचित्ताः निर्विचिकित्सं परोक्षज्ञानमेषेव एतत्फले अपरोक्ष ज्ञानिनामक्षरसाम्यतायाः प्रागुक्तत्वात् एते नैवेदांतेज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ते ब्रह्मलोकेतु परांतकाले परामृतात्परिमुच्यंति सर्वे

इदं महर्षेर्वचनं महात्मनो यथावदुक्तं मनसानुदृश्य च अवेक्ष्य चेमां परमेष्ठिसाम्यतां प्रयांति चामृतगतिं मनीषिणः ३५
शांतौ मोक्षधर्मेषु शुकानुप्रश्ने॥ ॥ शुक उवाच यदिदं वेदवचनं कुरु कर्म त्यजेति च कां दिशं विद्यया यांति कां च गच्छं
ति कर्मणा १ एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे एतच्चान्योन्यवैरूप्यं वर्त्तते प्रतिकूलतः २ भीष्म उवाच इत्यु
क्तः प्रत्युवाचेदं पराशरसुतः सुतं कर्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ ३ यां दिशं विद्यया यांति यां च गच्छं
ति कर्मणा शृणुष्वैकमना वत्स गह्वरं ह्येतदंतरं ४

इति श्लोकेतरार्थो दर्शितः परांतकाले ब्रह्मणो मोक्षकाले ते मुच्यंते ३५ पंचषष्टितमः॥ ॥ समाप्ता ब्रह्मविद्या तस्याः कर्मभिः समं समुच्चयं खंडयति यदिदमिति। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति कर्मकरणतत्त्यागविधिपरस्परविरोधादेककार्यकारित्वमलभमानौ विसदृशकार्यगत्वं प्रतिपद्येते ऽतः पृच्छति कामिति १ क्षराक्षरौ मार्गाविति शेषः ३ गह्वरं आकाशमिवानंतं एतदंतरं एतयोरंतरं ४ ॥ ॥

आस्तिकनास्तिकयोरिवपृष्ठमानंततोरतमंपप्याऽस्तिकस्यक्लेशवहंतद्वदेतन्ममेत्यर्थः ५ द्वावितिनिवृत्तौ आत्मदर्शनेचधर्मःसुभाषितः आत्यंतिको
धर्मःसउक्तः अयंतुपरमोधर्मोयद्[illegible]गेनात्मदर्शनमिति ७ षोडशात्मकःदेहःप्रेत्यमृत्वापुनर्जायतेताउत्पद्यतेविद्ययानित्यंअव्यक्तंद्वैतभिन्नंजायतेआवि

अस्तिधर्मइतिप्रोक्तंनास्तीत्यत्रैवयोवदेत् तस्यपक्षस्यसदृशमिदंममभवेदथ ५ द्वाविमावथपंथानौयत्रवेदाः
प्रतिष्ठिताः प्रवृत्तिलक्षणोधर्मोनिवृत्तौचसुभाषितः ६ कर्मणाबध्यतेजंतुर्विद्ययातुप्रमुच्यते तस्मात्कर्मनकुर्वंति
यतयःपारदर्शिनः ७ कर्मणाजायतेप्रेत्यमूर्तिमान्षोडशात्मकः विद्ययाजायतेनित्यमव्यक्तंह्यव्ययात्मकं
८ कर्मत्वेकेप्रशंसंतिस्वल्पबुद्धिरतानराः तेनतेदेहजालानिरमयंतउपासते ९ येस्मबुद्धिंपरांप्राप्ताधर्मनैपुणद
र्शिनः नतेकर्मप्रशंसंतिकूपंनद्यांपिबन्निव १० कर्मणःफलमाप्नोतिसुखदुःखेभवाभवौ विद्ययातदवा
प्नोतियत्रगत्वानशोचति ११ यत्रगत्वानम्रियतेयत्रगत्वानजायते नपुनर्जायतेयत्रयत्रगत्वानवर्त्तते १२

र्भवति ८ रमयंतःस्त्र्यादीन्रंजयंतस्तद्वासनावासिताःदेहशतानिप्राप्नुवंति ९ यत्रेति यत्रनिर्विशेषब्रह्मणिगत्वाप्रविश्यनजायतेअयमह
मस्मीतिनजानात्यात्मानंतत्रहेतुःनवर्त्ततेगंताविशेषविज्ञानाभावात्तज्जीवरूपेणनश्यति।तथाचश्रुतिःविज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थाय
तान्येवानुविनश्यतीति १२॥

नवर्त्ततइत्यत्रापिहेतुमाह। यत्रेतियत्रयस्यामवस्थायांतद्ब्रह्म अवियोगिजीवेश्वरभेदेनवियोगवत्तन्नभवतिउपाध्यभावेनब्रह्माभेदादेवनवर्त्तते
तेननतुस्वरूपनाशादित्यर्थः अविनाशीवा अरेयमात्माऽनुच्छित्तिधर्म्मामात्राऽसंसर्गस्त्वस्यभवतीतिश्रुतेः। मीयंतेविषयेऽनयासामात्रा। अंतःकरण
वृत्तिस्तया असंसर्गइतिश्रुत्यर्थः सत्त्रप्रणवप्रकृतिभ्योव्यवच्छिनत्ति परममव्यक्तमचलमिति। ध्रुवंकूटस्थंनित्यं अव्याकृतमविस्पष्टं। अनायासं अक्ले

यत्रतद्ब्रह्मपरममव्यक्तमचलंध्रुवं अव्याकृतमनायासममृतंचावियोगिच १३ द्वंद्वैर्नयत्र
बाध्यंतेमानसेनचकर्म्मणा समाःसर्वत्रमैत्राश्चसर्वभूतहितेरताः १४ विद्यामयोन्यःपुरुषस्ता
तकर्ममयोऽपरः विद्धिचंद्रमसंदर्शसूक्ष्मयाकलयास्थितं १५ ॥ ॥ ॥ ॥ ॥

शमप्राप्यंप्रत्यगात्मत्वात्। अव्यक्तं अहंकारादन्यत अमृतमितिपाठेपिसएवार्थः व्यक्तः आविर्भावतिरोभाववांश्चाहंकारएवततोन्यद्ब्रह्मेत्यर्थः १३ द्वंद्वैःसुखदुःखा
दिभिःमानसेनकर्मणासंकल्पेन १४ चंद्रमसंकर्ममयानांमध्येउत्कृष्टतमंसंवत्सराख्यंप्रजापतिं। उपचयापचयवंतंप्रतिमासंदर्शेकलामात्रशेषंतद्वदन्ये
षामपिकर्ममयानामैश्वर्यमित्यर्थः १५

मो०
२११

४११

दृष्टांतेप्रमाणमाहतदेतदिति। ऋषिणा बृहदारण्यकदर्शिना याज्ञवल्क्येन। स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पंचदशकलाः ध्रुवैवास्य षोडशी कला
स रात्रिभिरेवा च पूर्यते ऽप च क्षीयते सोमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायत इति दृष्टांतमुक्त्वा यो वै स संवत्सरः प्रजा
पतिः षोडशकलः अयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पंचदशकला आत्मैवास्य षोडशी कला स वित्तेनैवा च पूर्यते ऽप च क्षीयत इति दार्ष्टांतिकं प्रोक्तं। अ
नुमीयते चा चंद्रगतौ वृद्धिक्षासौ कर्मपूर्वकौ। अस्मदीयवृद्धिक्षासवदिति १६ एकादशेति वैराजं मनश्चंद्रः तत्र अस्मदीयं मनः मनसा ह्येव पश्यतीत्यादि

तदेतदृषिणा प्रोक्तं विस्तरेणानुमीयते नवज्ञं शशिनं दृष्ट्वा वक्रांतं तु मिवांबरे १६ एकादशविकारात्मा कलासंभारसंभृतः
मूर्त्तिमानिति तं विद्धि तानकर्मगुणात्मकं १७ देवो यः संश्रितस्तस्मिन्नबिंदुरिव पुष्करे क्षेत्रज्ञं तं विजानीयान्नित्यं योगाजि
तात्मकं १८

कृतेर्मनएकादशेंद्रियात्मकं तद्देहे राजमपि। अतस्तत्र रात्रय इवात्र वित्ताख्यं कर्मैव कलाः तासां संभारेण संभृतः मनोमयः सूत्रात्मा अस्मदादिश्च मूर्त्तिमानि
ति हेतोः तं विराजं व्यष्टिजीवं च कर्मगुणात्मकं त्रिगुणात्मक कर्मफलभूतं चंद्रवत् वृद्धिक्षासभाजं विद्धि १७ तस्मिन् जीवोपाधिभूते मनसि च देवो द्योतनवान्
चित्प्रकाशः तं क्षेत्रज्ञं परमात्मानं विजानीयात् अयमेव स योऽयमेवंविदित्युपदेशदाहृतः उक्ते रुपाधिद्वयस्यैक्य एव क्षेत्रज्ञस्य ऐक्यं योगेन जितः निरु
द्धः आत्मा चित्तं येन तं जीवं क्षेत्रज्ञं विजानीयादिति योजना १८

राम०
२११

तमइति। तम आदिकं त्रयं जीवस्य विज्ञानमयकोशस्य गुणाः कर्तृत्वादयः विज्ञानं यस्तेन तु तइत्यादिश्रुतेः तदात्मकं गुणत्रयमेव कर्त्रादिधर्मकं न त्वात्मेवेत्यर्थः जीवं विज्ञानं आत्मगुणं चिदाभासगुणश्चैतन्यं युक्तं विद्धि आत्मानं चिदाभासं परमात्मनः गुणौ ज्ञानिष्ठ्वयादिभिर्युक्तं विद्धीत्यर्थः अहंत्वयोऽहं चिदचिदात्मा जीवः चिदंशत्यागमनुब्रह्मैवेत्यर्थः १९ अध्यायार्थमुपसंहरति सचेतनमिति चेतनया सहितं स्वयमचेतनं देहं जीवगुणं जीवगुणेन चैतन्येन युक्तं वदंति। यतः सजीवः चेष्टते न तु देहः जीवयते चेतयते च देहं न तु देहस्स्वयं चेतनः ततो जीवादपि परं तं वदंति यः सप्तभुवनानि भूरादीनि प्राकल्पयत परमात्मा प्रत्यगात्मत्वात् ब्रह्म न ग्रामादिवत् क्रियाप्राप्यमिति ज्ञानकर्मणोः

तमो रजश्च सत्त्वं च विद्धि जीवगुणात्मकं जीवमात्मगुणं विद्यादात्मानं परमात्मनः १९ सचेतनं जीवगुणं वदंति
स चेष्टते जीवयते च सर्वं ततः परं क्षेत्रविदो वदंति प्राकल्पयद्यो भुवनानि सप्त २० शांतौ मोक्षधर्मेषु शुकानुप्रश्ने॥
॥शुक उवाच॥ ॥क्षरात्प्रभृति यः सर्गः सगुणानींद्रियाणि च बुद्धैश्वर्याभिसर्गोयं प्रधानश्चात्मनः श्रुतः १ ॥ ॥

ब्रह्मप्राप्तौ समसमुच्चयो न घटत इत्यर्थः २० सप्तषष्टितमः॥ ॥स्वबोधस्थापनार्थं पृष्टमनुवदति क्षरादिति। क्षरात् प्रधानात् यः सर्गश्चतुर्विंशतितत्त्वात्मकः साधारणः सच्चात्मनः ईशादिति श्रुतं तथा सगुणानि सविषयाणींद्रियाणि तु बुद्धैश्वर्यं सामर्थ्यं तत्कृतः अतिसर्गः उत्कृष्टसृष्टिः तत्रत्यपुरुषकृतोऽसाधारणः अयं च वेधकत्वेन प्रधानः श्रेष्ठः ईशजीवी चेति द्विविधा सृष्टिस्तत्र जैवी विधीमयी सृष्टिं वेधहेतुर्न तु ईशी भूतमपीति प्राकृक्तमित्यर्थः १ ॥ ॥ ॥

सद्वृत्तिंसतामाचारंकालहेतुकींयुगानुसारिणींअनुवर्त्तितुंएनःप्राप्तं २ कुरुकर्मत्यजेतिश्रुत्योःएतत्त्वयं अविरोधंचकथंविज्ञानीयांविषयविभागेनविविच्य
कथंज्ञानीयां ३ लोकवृत्तांतोलोकरीतिःतस्यतत्त्वंधर्माधर्ममूलकत्वेन [illegible] एतोधर्मत्यागेनेनावुद्धिंकृत्वासंस्कृतविमुक्तात्मात्मकदेहः ४ तत्रमात्मकर्म

२१२

रूपएवतुलोकेस्मिन्प्रवृत्तिंकालहेतुकीं यथासंतःप्रवर्त्तंतेतद्विद्वामनुवर्त्तितुं २ वेदेवचनमुक्तंतुकुरुकर्मत्यजेतिच
कथमेतद्विजानीयांतच्चाख्यातुमर्हसि ३ लोकवृत्तांततत्त्वज्ञःपूतोहंगुरुशासनात् कृत्वाबुद्धिंविमुक्तात्माद्रक्ष्या
म्यात्मानमव्ययं ४ व्यासउवाच यथावैविहितावृत्तिःपुरस्ताद्ब्रह्मणास्वयं एषापूर्वतरैःसद्भिराचीर्णापरमर्षिभिः ५
ब्रह्मचर्येणवैलोकान्जयंतिपरमर्षयः आत्मनश्चततःश्रेयांस्यन्विछन्मनसात्मनि ६ वनेमूलफलाशीचतप्यन्सु
विपुलंतपः पुण्यायतनचारीचभूतानामविहिंसकः ७ विधूमेसन्नमुसलेवानप्रस्थप्रतिश्रये कालेप्राप्तेचरन्भैक्षं
कल्पतेब्रह्मभूयसे ८ निस्तुतिर्निर्नमस्कारःपरित्यज्यशुभाशुभे अरण्येविचरैकाकीयेनकेनचिदाशितः ९ ॥

णांज्ञानेनसहसमुच्चयःक्रमसमुच्चयश्चभविष्यतीत्याशयमाह।यथेति।एषाकर्ममिवृद्धिंसंस्कृत्यतपाऽत्मदर्शनमित्येवंरूपा ५ श्रेयांसिश्रेयोहेतून्यज्ञादीन्
अन्विछन्विविदिषंतियज्ञेनेतिश्रुतेः ६

बुद्धिं हित्वाऽऽत्मानं द्रक्ष्यामीति स्वाभिप्रायं द्रढयितुं पृच्छति। यदिदमिति कुरु कर्म त्यजेति चेति वाक्यद्वयमपि प्रमाणं चेद्विरुद्धयोः वाक्ययोः शास्त्रत्वं अप्रमाणं चेत्सुतरामशास्त्रत्वं।
अतोऽनयोः शास्त्रयोः प्रामाण्यसिद्धये व्यवस्था वक्तव्येत्याशयः ११ तत्र वाक्यं हित्वा बुद्धिं विमुक्तात्मा द्रक्ष्याम्यात्मानमात्मनीति कर्मणां चित्तसंस्कारार्थत्ववचनं प्रजयनसि

शुक उवाच यदिदं वेदवचनं लोकवादे विरुध्यते प्रमाणे चाप्रमाणे च विरुद्धे शास्त्रता कुतः १० इत्येतच्छ्रोतुमिच्छामि प्रमाणंतूभयं
कथं कर्मणामविरोधेन कथं मोक्षः प्रवर्त्तते ११ भीष्म उवाच इत्युक्तः प्रत्युवाचेदं गंधवत्याः सुतः सुतं ऋषिस्तत्पूज
यन्वाक्यं पुत्रस्यामिततेजसः १२ व्यास उवाच ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः यथोक्तचारिणः सर्वे गच्छं
ति परमां गतिं १३ एको वाप्याश्रमानेतान्योऽनुतिष्ठेद्यथाविधि अकामद्वेषसंयुक्तः स परत्र विधीयते १४ चतुष्पदी
हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता एतामारुह्य निःश्रेणीं ब्रह्मलोके महीयते १५ आयुषस्तु चतुर्भागं ब्रह्मचर्यनसू
यकः गुरौ वा गुरुपुत्रे वा वसेद्धर्मार्थकोविदः १६

द्वांतेनेनमानयन चातुराश्रम्यधर्मनिर्वर्णं गंधवत्याः योजनगंधायाः सुतो व्यास उवाच १२ ब्रह्मचारीति परमां गतिं मोक्षं तेन समुच्चितानां वा आश्रमधर्माणां तत्वज्ञिसा
साहेतुत्वमुक्तं १३ परत्र ब्रह्मणि विषये विधीयते ज्ञातं योग्यः क्रियते १४ चतुष्पदी चातुराश्रम्यरूपा १५ ॥ ॥ ॥ ॥ ॥

मो०
२१२

कर्मातिशेषेणानिःशेषंकर्मकृत्वेत्यर्थः २० अभुक्तवतिगुरावितिशेषः २२ अधीष्व अध्यापय २४ यानिति समावृत्तः समापितब्रह्मचर्यव्रतः २५ २५

213

जघन्यशायी पूर्वं स्यादुत्थाय गुरुवेश्मनि यच्च शिष्येण कर्त्तव्यं कार्यं दासेन वा पुनः १७ कृतमित्येव तत्सर्वं कृत्वा तिष्ठे
त्पार्श्वतः किंकरः सर्वकारी स्यात्सर्वकर्मसु कोविदः १८ कर्मातिशेषेण गुरावध्येतव्यं बुभूषता दक्षिणोनपवादी स्या
दाहूतो गुरुमाश्रयेत् १९ शुचिर्दक्षो गुणोपेतो ब्रूयादिष्टमिवान्तरा चक्षुषा गुरुमव्यग्रो निरीक्षेत जितेन्द्रियः २० नाभुक्त
वति चाश्नीयादपीतवति नो पिबेत् नातिष्ठति तथासीत नासुप्ते प्रस्वपेत च २१ उत्तानाभ्यां च पाणिभ्यां पादावस्य मृदु स्पृ
शेत् दक्षिणं दक्षिणेनैव सव्यं सव्येन पीडयेत् २२ अभिवाद्य गुरुं ब्रूयादधीष्व भगवन्निति इदं करिष्ये भगवन्निदं चापि
कृतं मया २३ ब्रह्मंस्तदपि कर्त्तास्मि यद्भवान्वक्ष्यते पुनः इति सर्वमनुज्ञाप्य निवेद्य च यथाविधि २४ कुर्यात्कृत्वा च तत्स
र्वमाख्येयं गुरवे पुनः यांस्तु गन्धान्रसान्वापि ब्रह्मचारी न सेवते २५ सेवेत तान्समावृत्त इति धर्मेषु निश्चयः ये केचिद्वि
स्तरेणोक्ता नियमा ब्रह्मचारिणः २६ तान्सर्वानाचरेन्नित्यं भवेच्चानपगो गुरोः स एवं गुरवे प्रीतिमुपहृत्य यथाबलं २७
आश्रमादाश्रमेष्वेव शिष्यो वर्त्तेत कर्मणा वेदव्रतोपवासेन चतुर्थे चायुषो गते २८

अनपगः समीपस्थः २६ २७ २८ ॥ ॥

राम०
२१२

२९ अथषष्टितमः॥ ॥क्रमप्राप्तान्गृहस्थधर्मानाह द्वितीयमिति १ कापोतींउंछवृत्तिंवृत्तयोजीविकाः २ षट् यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाः कर्मयस्य सः कोगृहस्थः त्रिभिर्यजनाध्ययनदानैः अन्योवानप्रस्थः द्वाभ्यांदानाध्ययनाभ्यांब्रह्मसत्त्रेप्रणवोपास्तौ ४ अत्रगार्हस्थ्ये ५ प्राणीअश्वत्थादिः अप्रा

गुरवेदक्षिणांदत्वासमावर्तेद्यथाविधि धर्मलब्धैर्युतोदारैरग्नीनुत्पाद्ययत्नतः द्वितीयमायुषोभागंगृहमेधीभवेद्व्रती २९
शांतौमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥व्यासउवाच॥ ॥द्वितीयमायुषोभागंगृहमेधीगृहीवसेत् धर्मलब्धैर्युतोदारैरग्नीना
हृत्यसुव्रतः १ गृहस्थवृत्तयश्चैवचतस्रः कविभिः स्मृताः कुशूलधान्यः प्रथमः कुंभधान्यस्त्वनंतरं २ अश्वस्तनो
थकापोतीमास्थितोवृत्तिमाहरेत् तेषांपरः परोज्यायान्धर्मतोधर्मजित्तमः ३ षट्कर्मावर्तयत्येकस्त्रिभिरन्यः प्रवर्तते
द्वाभ्यामेकश्चतुर्थस्तुब्रह्मसत्रेव्यवस्थितः ४ गृहमेधिव्रतान्यत्रमहांतीहप्रचक्षते नात्मार्थेपाचयेदन्नंनवृथाघा
तयेत्पशून् ५ प्राणीवायदिवाप्राणीसंस्कारंयजुषार्हति नदिवाप्रस्वपेज्जातुनपूर्वापररात्रिषु ६ नभुंजीतांतराकाले
नानृतावाह्वयेत्स्त्रियं नास्यानश्नन्गृहेविप्रोवसेत्कश्चिदपूजितः ७ तथास्यातिथयः पूज्याहव्यकव्यवहाः सदा
वेदविद्याव्रतस्नाताश्रोत्रियावेदपारगाः ८॥

णीअश्वत्थादिः यजुषात्वेदनंमंत्रेणैवकार्यमेवसंस्कारमर्हतिनतुभक्षणमात्रार्थं ६ अंतराभोजनद्वयमध्ये॥ स्त्रियंमैथुनायेतिशेषः ७ ८॥

नखरैः नखैः दंभार्थं निरखलोमधरस्य । अपविद्धं अविधिनात्यक्तं अग्निहोत्रं येन तस्य । सर्वविधानां चंडालादीनां च भूतानां अत्र गार्हस्थ्ये संविभागोऽस्ति १०
अपचमानेभ्यः ब्रह्मचारिसंन्यासिभ्यः ११ विघसामृते व्याख्याति अमृतमिति १४ जामीभिः सगोत्रस्त्रीभिः १५ संवादान् अंशाघर्षकलहान् ।

स्वधर्मज्ञो विनीतो दांताः क्रियावंतस्तपस्विनः तेषां हव्यं च कव्यं चाप्यर्हणार्थं विधीयते ९ नखरैः संप्रपातस्य स्वधर्मज्ञाप
कस्य च अपविद्धाग्निहोत्रस्य गुरोर्वालीककारिणः १० संविभागो त्वभूतानां सर्वेषामेव शिष्यते तथैवापचमानेभ्यः प्र
देयं गृहमेधिना ११ विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः अमृतं यज्ञशेषं स्याद्भोजनं हविषा समं १२ भुक्तशेषं तु
यो भुंक्ते तमाहुर्विघसाशिनं विघसं भुक्तशेषं तु यज्ञशेषममृतं १३ स्वदारनिरतो दांतो ह्यनसूयुर्जितेंद्रियः ऋत्वि
क्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः १४ वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः मातापितृभ्यां जामीभिर्भ्रात्रा पु
त्रेण भार्यया १५ दुहित्रा दासवर्गेण विवादं न समाचरेत् एतान्विमुच्य संवादान्सर्वपापैर्विमुच्यते १६ एतैर्जितैस्तु जय
ति सर्वाँल्लोकाननसंशयः आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः १७ अतिथिस्त्विंद्रलोकस्य देवलोकस्य चार्त्विजः
जामयोऽप्सरसां लोके वैश्वदेवे तु ज्ञातयः १७ संबंधिबांधवा दिक्षु पृथिव्यां मातृमातुलौ वृद्धबालातुरकृशास्त्वाकाशे प्रभ
विष्णवः १८ ॥ श्री ॥

जितः अंशात्च्यावितः १६ आचार्यादयः सम्यगाराधिता ब्रह्मलोकादीन् प्रतिनयंतीत्याहाचार्यइति सार्द्धाभ्यां १७ १८ ॥ ॥ ॥ ॥

म्यातेनिवृत्तेस्वदेहवत्तोषणीयाइत्यर्थः २० नचेतिअर्थाशयाग्निहोत्रादीन्नकुर्यात् २१ तिस्रः वक्ष्यमाणाः कुंभधान्यांउंछशिलंकापोतीचाताःसांपरंउत्त
रमुत्तरंश्रेयः २२ चतुराश्रममध्येपिपरंश्रेयः परस्परमितिपपाठः २५ चक्रधरश्चक्रवर्तिनोमांधात्रादयस्तल्लोकानांसदृशींगतिंतत्तुल्यतां २६

ध्यानाड्येयः समः पित्राभार्यापुत्रः स्वकातनुः छायास्वादासवर्गश्चदुहिताकृपणंपरं १९ तस्मादेतैरधिक्षिप्तः सहेन्नि
त्यमसंज्वरः गृहधर्मपरोविद्वान्धर्मशीलोजितक्लमः २० नचार्थबद्धः कर्माणिधर्मवान्कश्चिदाचरेत् २१ गृहस्थ
वृत्तयस्तिस्रस्तासांनिःश्रेयसंपरं परापरंतथैवाहुश्चातुराश्रम्यमेवतत् २२ यथोक्तानियमास्तेषांसर्वकार्याविशु
भूषता कुंभधान्यैरुंछशिलैः कापोतींचास्थितास्तथा २३ यस्मिंश्चैतेवसंत्यर्हास्तद्राष्ट्रमभिवर्द्धते पूर्वापरा
न्दशपरान्पुनातिचपितामहान् गृहस्थवृत्तीश्चाप्येतावर्तयेद्योगतव्यथः २५ सचक्रधरलोकानांसदृ
शीमाप्नुयाद्गतिं जितेंद्रियाणामथवागतिरेषाविधीयते २६ स्वर्गलोकोगृहस्थानामुदारमनसांहितः स्वर्गो
विमानसंयुक्तोवेददृष्टः सुपुष्पितः स्वर्गलोकोगृहस्थानांप्रतिष्ठानियतात्मनां २८ ब्रह्मणाविहितायोनिरेषा
यस्माद्विधीयते द्वितीयंक्रमशः प्राप्यस्वर्गलोकेमहीयते २९ ॥

सुपुष्पितः रमणीयः २९ एषागार्हस्थ्यंयोनिःस्वर्गस्यकारणंयस्मात्तस्मात्द्वितीयंगार्हस्थ्यं २९ ॥ ॥ ॥ ॥ ॥

मो०
२१५

गृहपतिनं गृहस्थव्रतमार्षं गृहस्थेभ्यः श्रेष्ठं संश्लिष्टं अस्थिचर्ममात्रसंश्लेषवत्तात तत्वतच्छरीरं चतस्य कारिणां शरीरशोषकारिणामित्यर्थः ३। ऊन
सप्ततितमः॥ ॥प्रकर्षेणाउक्ता शास्त्रे १ एतां गृहस्थवृत्तिं अवधूपतिरस्कृत्य किं तत्तीयां कापोतीं वृत्तिमपि। संयोगः सहधर्मचारिणी संयोगास्तत्र

अतः परं परमोदारमाश्रमं तृतीयमाहुस्त्यजतां कलेवरं वनौकसां गृहपतीनामनुत्तमं शृणुष्व संश्लिष्टशरीरकारिणां
३० शांतौ मोक्षधर्मेषु मुक्तानुप्रश्ने॥ ॥भीष्म उवाच प्रोक्ता गृहस्थवृत्तिस्ते विहिता या मनीषिभिः तदनंतरमुक्तं यत्
तन्निबोध युधिष्ठिर १ क्रमशस्त्ववधूयैतां तृतीयां वृत्तिमुत्तमां संयोगवृत्तिखिन्नानां वानप्रस्थाश्रमौकसां २
श्रूयतां पुत्र भद्रं ते सर्वलोकाश्रमात्मनां प्रेक्षापूर्वं प्रवृत्तीनां पुण्यदेशनिवासिनां ३ व्यास उवाच गृहस्थस्तु
यदा पश्येद्वलीपलितमात्मनः अपत्यस्यैव चापत्यं वनमेव तदाश्रयेत् ४ तृतीयमायुषो भागं वानप्रस्थाश्रमे
वसेत् तानेवाग्नीन्परिचरेद्यजमानो दिवौकसः ५ नियतो नियताहारः षष्ठभक्तोऽप्रमत्तवान् तदग्निहोत्रं ता
गावो यज्ञांगानि च सर्वशः ६ अफालकृष्टं व्रीहियवं नीवारं विघसानि च हवींषि संप्रयच्छेत मखेष्वत्रापि पंचसु ७

पतन्त्रतं तेन खिन्नानां वानप्रस्थाश्रमः ओक आश्रयो येषां तेषां वृत्तिः श्रूयतामिति द्वयोः संबंधः सर्वलोकाः आश्रमाश्च आत्मा येषां संविभाग
शमादिमत्तात् सर्वाश्रमफलमत्रैवांतर्भूतमित्यर्थः ६ अत्रापि वनेऽपि पंचसु महायज्ञेषु अग्निहोत्रे दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्येते
षु वा ७॥ ॥

राम०
२१५

215

चतुर्थश्चतुर्थाश्रमे विहितश्चोपनिषदः शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीत्याद्युपनिषदि विहितः धर्मः साधारणः सर्वेषामाश्रमेषु अन्यः

वानप्रस्थाश्रमेप्येताश्चत्वारो वृत्तयः स्मृताः सद्यः प्रक्षालकाः केचित्केचिन्मासिकसंचयाः ८ वार्षिकं संचयं
केचित्केचिद्द्वादशवार्षिकं कुर्वंत्यतिथिपूजार्थं यज्ञतंत्रार्थमेव वा ९ अभ्रावकाशा वर्षासु हेमंते जलसंश्रयाः
ग्रीष्मे च पंचतपसः शश्वच्च मितभोजनाः १० भूमौ विपरिवर्तंते तिष्ठंति प्रपदेऽपि स्थानाशनैर्वर्तयंति सवनेष्वभिषिं
चंत दंतोलूखलिकाः केचिदश्मकुट्टास्तथापरे शुक्लपक्षे पिबंत्येके यवागूं क्वथितां सकृत् कृष्णपक्षे पिबंत्यन्ये भुंज
ते वा यथागमं मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः वर्तयंति यथान्यायं वैखानसगतिं श्रिताः ११ एताश्चान्याश्च वि
विधा दीक्षास्तेषां मनीषिणां चतुर्थश्चोपनिषदो धर्मः साधारणः स्मृतः १२ वानप्रस्थाद्गृहस्थाच्च ततोऽन्यः संप्रवर्त
ते अस्मिन्नेव युगे तात विप्रैः सर्वार्थदर्शिभिः १३ अगस्त्यः सप्त ऋषयो मधुच्छंदोऽघमर्षणः सांकृतिः सुदिवातंडि
र्यथावासोऽकृतश्रमः १४ अहोवीर्यस्तथा काव्यस्तांड्यो मेधातिथिर्बुधः बलवान्कर्णनिर्वाकः शून्यपालः कृतश्रमः
१५ एवं धर्मं कृतवंतस्ततः स्वर्गमुपागमन् तात प्रत्यक्षधर्माणस्तथा यायावरगणाः १६ ऋषीणामुग्रतपसां धर्मनै
पुणदर्शिनां अन्ये चापरिमेयाश्च ब्राह्मणा वनमाश्रिताः १७ ॥ ॥ ॥ ॥ ॥

असाधारणः १२ १६ प्रत्यक्षः धर्माधर्मफलं सत्यसंकल्पत्वादिकं येषां ते प्रत्यक्षधर्माणः १७ ॥ ॥ ॥ ॥ ॥

निरानंदाः कृछ्रचांद्रायणादिपरत्वात् १८ अनक्षत्राः नक्षत्रग्रहताराभ्योऽन्येऽप्यंतरतमः प्रभतयः अनाधृष्याः निर्भयाः २० सघस्काराः एकाहसाध्यांऽइष्टि
साग्नायणोत्रैधातवीवासर्वेवेदसदक्षिणो सर्वस्वदक्षिणा सर्वान्वेदान्सदक्षिणानित्यपपाठः आत्मयाजी। जीवश्राद्धादिकृत्। आत्मरतिः आत्मनिष्ठः
संधिरार्षः आत्मक्रीडश्च आत्मसंश्रयश्चनतु स्त्र्यादिक्रीडाराजाघाश्रयः २१ तीव्रतरवैराग्याभावेतुपक्षांतरमाह। साघस्कानसघएवक्रिपंतेताव

वैखानसावालखिल्याः सैकताश्वतयापरे कर्मभिस्तेनिरानंदाधर्मनित्याजितेंद्रियाः १८ गताः प्रत्यक्षधर्माणस्तेसर्वे
वनमाश्रिताः अनक्षत्राखनाधृष्यादृश्यंतेऽप्यातिषांगणाः १९ जरयाचपरिघूनोव्याधिनाचप्रपीडितः चतुर्थेचायुषः
शेषेवानप्रस्थाश्रमंत्यजेत् २० सघस्कारांनिरूप्येष्टींसर्ववेदसदक्षिणा आत्मयाजीसात्मरतिरात्मक्रीडोऽर्थसंश्र
यः आत्मन्यग्नीन्समारोप्यत्यक्त्वासर्वपरिग्रहात् साघस्कांश्चत्यजेघज्ञानिष्टीश्चैवेहसर्वदा यदैवयाजिनांयज्ञादा
त्मनीज्यापवर्तते २१

ब्रह्मयज्ञादीनइष्टीश्चदर्शपूर्णमासमित्रविंदादीनतानिस्त्यावत्यजेत्यदैवयस्मिन्नेवकालेयाजिनांयज्ञनांयज्ञानकर्मयपादात्मनीज्याआत्म
यज्ञोयोगाभ्यासः प्रवर्त्तते। नावदेवमानकुर्यादित्यर्थः यथोक्तंभगवता आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते। योगारूढस्यतस्यैवशमः कारणमुच्यतइ
ति २१ ॥

आत्मानीज्ञायाः स्वरूपमाहा ओनिति हृदयं गार्हपत्यो मनो अन्वाहार्यपचन आस्यमाहवनीय इति वैश्वानरविद्योक्तप्रकारेण आत्ममोक्षणाद्देहपातावधि आत्मनि देहस्थवाग्नीन्यजेत्प्राणाग्निहोत्रविधिना तथा च छंदोगश्रुतिः यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्प्राणाय स्वाहेत्यादि स्मृतेः यजुषः उच्चारणानंतरं पंच ग्रासान्प्राश्नीयात एवं हात्र कुत्सयन् अन्नमनिंदन् २२ वाप्यवापयित्वा २३ न चेह नामुत्र च इहलोकनिमित्तं परलोकनिमित्तं वा कर्म किमनुष्ठातुमिच्छ

त्रीनेवाग्नीन्यजेत्सम्यगात्मन्येवात्ममोक्षणात् प्राणेभ्यो यजुषः पंच षट् प्राश्नीयादकुत्सयन् केशलोमनखान्वाप्य वानप्रस्थो मुनिस्ततः आश्रमादाश्रमं पुण्यं पूतो गच्छति कर्मभिः २२ अभयं सर्वभूतेभ्यो दत्वा यः प्रव्रजेद्द्विजः लोकास्ते जोमयास्तस्य प्रेत्य चानंत्यमश्नुते २३ सुशीलवृत्तो व्यपनीतकल्मषो न चेह नामुत्र च कर्तुमीहते अरोषमोहो गतसंधिविग्रहो भवेदुदासीनवदात्मवित्तरः २४ यमेषु चैवानुगतेषु न व्यपेत्स्वशास्त्रसूत्राहुतिमंत्रविक्रमः भवेद्यथेष्टागतिरात्मवेदिनि न संशयो धर्मपरे जितेंद्रिये २५

ति २४ यमेषु अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाख्येषु [illegible] शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानाख्येषु नियमेषु स्वशास्त्रेति स्वस्य सन्यासविधेः शास्त्रं तत्रस्थं सूत्रं लोकानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेदित्येवंरूपं आहुतिमंत्रः शिखां यज्ञोपवीतमित्येतत्सर्वं भूः स्वाहेत्यप्सु प्रक्षिप्येति स्मृतिनिर्दिष्टः तत्र उभयत्रापि पराक्रमो यस्य स तथा यथेष्टा चिरजीविता वा सद्यो मुक्तिर्वा क्रममुक्तिर्वा इच्छा भवतीत्यर्थः २५ ॥ ॥ ॥

त्रीन आश्रमानऽपेक्ष्य अधिष्ठितं अधिकत्वेनस्थितं यतोधिवृत्तिं अधिकाशमाद्यात्मिकां हर्त्रिर्यस्मिन्वृत्तं परमंमोक्षहेतुत्वात् २६ सप्ततितमः ॥ ॥ पूर्वत्रसाधस्को
श्चपञ्चघस्रानितिश्लोकद्वयेन वानप्रस्थस्यापि वैश्वानरात्मोपासनमुक्तं तत्कर्मव्यग्रस्यदुःशकमितिमन्वानः पृच्छति वर्त्तमानइति यथा यथावत् आत्माकथंयोक्त
व्यः संधिरार्षः परंवेद्यंब्रह्म १ उत्तरमाह प्राप्येति एताभ्यां ब्रह्मचर्यगार्हस्थ्याभ्यां संस्कारं चित्तशुद्धिंप्राप्य आत्मायोक्तव्यइति पूर्वेणान्वयः चित्तशुद्धौ सत्यांवा

ततः परं श्रेष्ठमतीव सद्भिरौरधिष्ठितं त्रीनधिवृत्तिमुत्तमं चतुर्थमुक्तं परमाश्रमं शृणु प्रकीर्त्यमानं परमं परायणं २६ शांतौ मोक्ष
धर्मे शुकानुप्रश्ने ॥ ॥ शुक उवाच वर्त्तमानस्तथैवात्र वानप्रस्थाश्रमे यथा योक्तव्योत्मा कथं शक्त्या वेद्यं वै कांक्षता परं १
व्यास उवाच प्राप्य संस्कारमेताभ्यामाश्रमाभ्यां ततः परं यत्कार्यं परमार्थं तु तदिहैकमनाः शृणु २ कषायं पाचयित्वाशु
श्रेणिस्थानेषु च त्रिषु प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमं ३ तद्भवानेवमभ्यस्य वर्त्ततां शृणु यत्तथा एक एव चरेद्धर्मं
सिद्ध्यर्थमसहायवान् ४ एकश्चरति यः पश्यन्न जहाति न हीयते अनग्निरनिकेतश्च ग्राममन्नार्थमाश्रयेत् ५ ॥

नप्रस्थाद्याश्रमेपि योगमभ्यसेदित्यर्थः ऋजुमार्गमाह यदिति सार्द्धेन कषायं चित्तदोषं पाचयित्वा विध्वंसं कृत्वा स्थानेषु आश्रमेषु अनुत्तमं इदं मतं श्रेष्ठ
मित्यर्थः ३ एव वक्ष्यमाणरीत्या धर्मं योगं ४ पश्यन् आत्मदृक् न जहाति किंचित् सर्वदार्थं सर्वव्यापित्वात् न हीयते मोक्षसुखात् ५ ॥ ॥ ॥

भावसमाहितःचित्तसमाधानवान् ६ कपालंपानपात्रंविवर्णंकिषायवस्त्रंकुचैलमित्युच्यते उपेक्षाप्रीतिद्वेषराहित्यं ७ यस्मिन्निति आक्रुश्यमानोना
क्रोशेदित्यर्थः ८ एतदेवाहनैवेति ९ भैषज्यंभवरोगचिकित्सा १० येनसंप्रज्ञातेहमेवेहसर्वोस्मीतिपश्यता येनरूपादीनगृह्णता चाजनपूर्णमपि स्या

अश्वस्तनविधातास्यान्मुनिर्भावसमाहितः लब्धाशीनियताहारः सकृदन्ननिषेविता ६ कपालंवृक्षमूलानिकुचेल
मसहायता उपेक्षासर्वभूतानामेतावद्भिक्षुलक्षणं ७ यस्मिन्वाचःप्राविशंतिकूपेत्रस्ताद्विपाइव नवक्तारंपुनर्यांतिस
कैवल्याश्रमेवसेत् ८ नैवपश्येन्नशृणुयादवाच्यंजातुकस्यचित् ब्राह्मणानांविशेषेणनैवब्रूयात्कथंचन ९ यद्ब्राह्मण
स्यकुशलंतदेवसततंवदेत् तूष्णीमासीतनिंदायांकुर्वन्भेषजमात्मनः येनपूर्णमिवाकाशंभवत्येकेनसर्वदा शून्यंयेनज
नाकीर्णंतंदेवाब्राह्मणंविदुः ११ येनकेनचिदाछन्नोयेनकेनचिदाशितः यत्रक्वचनशायीचतंदेवाब्राह्मणंविदुः १२
अहेरिवगणाद्भीतःसौहित्यान्नरकादिव कुणपादिवचस्त्रीभ्यस्तंदेवाब्राह्मणंविदुः १३ नक्रुद्ध्येन्नप्रहृष्येच्चमानितो
मानितश्चयः सर्वभूतेष्वभयदस्तंदेवाब्राह्मणंविदुः १४ नाभिनंदेतमरणंनाभिनंदेतजीवितं कालमेवप्रतीक्षेत
निदेशंभृतकोयथा १५ ॥

नेमूल्यमिवभवंतिब्राह्मणंब्रह्मिष्ठं १२ अहेः सर्पात् गणात् जनसमूहात् सौहित्यात् मिष्टान्नजनितात् तृप्तेः १४ [illegible] निदेशंआज्ञां १५

मो० २१८

218

अभ्याहतं दोषाक्रांतं निरमित्रस्य अजातशत्रोः १६ सर्वभूतेभ्योपस्येतिशेषः १७ निर्भयत्वमुक्त्वा कृत्स्नानंदप्राप्तिमप्याह यथेति नागपदे हस्तिपदे पदगामिनां न्यस्वादीनां पदानि अपिधीयंते तत्र यथेंद्रादीनां पदजातानि स्थानानि कौंजरे कुं पृथिवीं शरीररूपां जरयतीति कुंजरः समाधिस्था योगी तस्य स्थाने कौंजरे पदे यथा कृतायविजिताय अधरेयाः संयंत्येवमेवैनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वंति यस्तद्वेदेति श्रुतेः कृताय चत्वतुरंकपाशः तत्र त्रिद्विएकांकानामिव योगे कृत्स्नकर्मफलानामंतर्भवितइति श्रुत्यर्थः १८ दार्ष्टांतिकं विवृणोति एवमिति एवं दृश्यमानप्रकारं धर्मा

अनभ्याहतचित्तः स्यादनभ्याहतवाग्भवेत् निर्मुक्तः सर्वपापेभ्यो निरमित्रस्य किं भयं १६ अभयं सर्वभूतेभ्यो भूतानामभयं यतः तस्य मोहाद्विमुक्तस्य भयं नास्ति कुतश्चन १७ यथा नागपदेन्यानि पदानि पदगामिनां सर्वाण्येवापिधीयंते पदजातानि कौंजरे १८ एवं सर्वमहिंसायां धर्मार्थमपिधीयते अमृतः स नित्यं वसति यो हिंसां न प्रपद्यते १९ अहिंसकः समः सत्यो धृतिमान्नियतेंद्रियः शरण्यः सर्वभूतानां गतिमाप्नोत्यनुत्तमां २० एवं प्रज्ञानतृप्तस्य निर्भयस्य निराशिषः न मृत्युरतिगो भावः स मृत्युमधिगच्छति २१

र्थं अहिंसायां सर्वभूताभयदानरूपे संन्यासयोगे २० प्रज्ञानं आत्मानुभवस्तेन तृप्तस्य मृत्युरयो भावः तस्य अतिगोऽतिक्रम्य गंता न भवति किंतु स एव मृत्युमतिक्रामतीत्यर्थः स यथाश्मानमाखणमृत्वा लोष्टो विध्वंसेतैवं हैव ते विध्वं चाविनेशुरिति श्रुतेः कृत्वा प्राप्यते कामादयोऽसुरा मृत्युरूपा इति श्रुत्यर्थः आखणः खननायोग्यः स्वार्थे तद्धितः रात्वमार्षं २१

राम० २१८

संगेभ्यः स्थूलसूक्ष्मकारणशरीरेष्वहमित्यभिमानेभ्यः । आकाशवत्‌निर्विषयत्वात्‌ शून्यवत् । अस्वंनिर्हृशंपं अतएवएकचरं ज्ञातृज्ञेयशून्यंज्ञानमात्रं २१ यस्यकृत
हत्यस्यजीवन्मुक्तस्यजीवितं धर्मार्थं धर्मस्तु धारणानिर्विकल्पसमाधिजपुरणोत्यस्यर्थं तपाचभक्त्याति क्षणामेकंक्रतुशतस्यचततः सघत्पापफलंतदेवाप्नोती
तिधर्ममेवस्यफलमाह। सोपिधर्मोहिर्यर्यंहरंतितेहरयः तत्समीपवर्त्तिनिस्तेषामर्थंयोगिनोहिपुराणंतन्दक्राहरंति।तस्यपुत्रादायमुपयंतिसुहृदः साधुकृत्यांदि

विमुक्तंसर्वसंगेभ्योमुनिमाकाशवत्स्थितं अस्वमेकचरंशांतंतंदेवाब्राह्मणंविदुः २२ जीवितंयस्यधर्मार्थंधर्मोहर्यर्थमेवच
अहोरात्राश्चपुण्यार्थंतंदेवाब्राह्मणंविदुः २३ निराशिषमनारंभंनिर्नमस्कारमस्तुतिं निर्मुक्तंबंधनैः सर्वैस्तंदेवाब्राह्मणं
विदुः २४ सर्वाणिभूतानिसुखेरमंतेसर्वाणिदुःखस्यभृशंत्रसंते तेषांभयोत्पादनजातखेदः कुर्यान्नकर्माणिहिश्रद्दधानः
२५ दानंहिभूताभयदक्षिणायाः सर्वाणिदानान्यधितिष्ठतीह तीक्ष्णांतनुंयःप्रथमंजहातिसोनंतमाप्नोत्यभयंप्रजाभ्यः २६
म१

यंतः पापकृत्यामितिस्मृतेः । अहिंसाप्रतिष्ठायांतत्सन्निधौवैरत्यागइत्यनिष्ठंयोगांगफलंस्मरतिचारत्यर्थमितिपाठेपरेषांसुखार्थं । अहोरात्राःसमाधयो
व्युत्थानानिचपुण्यार्थंलोकशिक्षार्थं २३ निराशिति स्तुतिनमस्कारजन्यसुखासंगिनमित्यर्थः बंधनैर्वासनाभिः २४ सर्वाणीतिकर्ममात्रंहिंसाकरमतः
स्यात्समित्यर्थः २५ अधितिष्ठतिअधिकत्वेनवर्त्तते। तीक्ष्णांतनुंहिंसामयंधर्मंसोनंतमसच्चानंत्यपतः प्रजाभ्यः प्रजानामभयं २६ ॥ छ ॥ ॥
तं१

आनंत्याबास्युपायभूतां चीर्णैश्चाग्नीन्यजेदिति एवीध्यापेक्षत्वितां वैश्वानरविद्यामनुवर्त्तयति उत्तानइत्यादिना। वानप्रस्थइव उत्तानेवा ते आस्ये मुखे प्राणाय स्वाहे त्यादिमंत्रैः पंचषट्वाआहुतीर्नजुहोति किंतर्हि प्राणानेवइंद्रियमनआदीन आत्मपार्श्वे आत्मनिजुहोति प्रविलापयतीत्युत्तरेण संबंधः। तत्प्रकारमाह लोकस्येतिलोकस्य चराचरस्य जंतोर्नाभिः जगतस्त्रैलोक्यात्मनो वैश्वानरस्य प्रतिष्ठास्थानं अधोनिस्रावितस्य तेनास्यामुपरितिष्ठति। ज्वालामालाकुलं भाति विश्वस्यायतनंमहदितिश्रुतेः निस्रा हृदयकपाटात। विश्वस्य वैश्वानरस्य। प्रकारांतरेणापतनांतरमाहातस्यांगमंगानीतितस्यलोकस्यांगमूर्द्धादिचिवुकांतं अंगानि वैश्वानराव

उत्तान आस्ये न हविर्जुहोति लोकस्य नाभिर्जगतः प्रतिष्ठा
तस्यांगमंगानि कृताकृतं च वैश्वानरः सर्वमिदं प्रपेदे २१

यवाः मूर्द्धानमुपदिशन्नुवाचैष वा अतिष्ठा वैश्वानर इत्यादिना चुबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इत्यंतेन ग्रंथेन श्रुत्यादर्शिताः नास्यादिनिस्यतेदेशे वा चुबुकादिमूर्द्धांतदेशे वा त्रैलोक्यात्मानं वैश्वानरमुपासीतेति पक्षद्वयमुपन्यस्तं एतच्च कृतं वैकल्पिकं नतु समुच्चितं। तात्पर्यमाह वैश्वानरः॥
सर्वमिदमितिप्रपेदे प्रतिपन्नव्याप्तमित्यर्थः २१

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषात्मस्वन्नमत्तीत्यस्यां [illegible] तरयमाह प्रादेशेति हृदि नाभ्यादिहृ
दयपर्यंते देशे प्रादशमभितेनिःसृतं आविर्भूतं इति श्रौतस्य प्रादेशमात्रपदस्यार्थः तस्मिन् चिन्मात्रे प्राणोपलक्षितं कृत्स्नं प्रपंचं आत्मयाजी यो गो जुहोति
प्रविलापयति यः तस्याग्निहोत्रं प्राणाग्निहोत्रं आत्मसंस्पर्शदेहस्थितं हृदयं गार्हपत्य इत्यादिना उक्तप्रकारं सर्वेषु लोकेषु हुतं भवति। तस्य सर्वात्मकत्वात्
न यद्ववदानं गृहीतं तेनावदानेन सर्वं ब्रह्मांडं तत्प्यतीत्यर्थः ततपन्दक्तं प्रयममागछेदित्यादिना ग्रंथेन ऋक्तो चैतदुपपादितं १८ एवं प्रणवमात्रास्त
प्रयममकारार्थं वैश्वानरमुपासीनाः ये तं देवं त्रिधा तं योगमानं सूक्ष्मं तेजोवत्यात्मकं सूत्रात्मानमुपकारार्थं विदुः तथा त्रिवृतं त्रिभिर्गुणैर्वृतं सुपर्णं ईश्वरं माया

प्रादेशमात्रे हृदि निःसृतं यत्तस्मिन्प्राणानात्मयाजी जुहोति तस्याग्निहोत्रं हुतमात्रसंस्थं सर्वेषु लोकेषु सदेवकेषु १८ देवं त्रिधा तं त्रिवृतं सुपर्णं ये विदुरग्र्यं परमात्मतां च ते सर्वलोकेषु महीयमाना देवाः समस्ता त्वमृतं व्रजंति
१९ वेदांश्च वेद्यं च विधिं च कृत्स्नमथो निरुक्तं परमार्थतां च सर्वं शरीरात्मनि यः प्रवेद तस्मै स्म देवाः स्पृहयंति नित्यं ३०

पाधिं मकारार्थं च अग्र्यां सूक्ष्मतमां परमो निरुपाधिरात्मा प्रत्यक्स्वरूपं तत्भावं च विदुः अत एव तेषां सुकृतं देवादयः वदंति व्रजंतीति पाठे सुकृतं ब्रह्मानंदं यद्वैतत्सुकृतं रसो वै स इति
श्रुतेः १९ विद्याफलमाह वेदानिति वेद्यं विधिपदादि विधि कर्मकांडं निरुक्तं शब्दैकगम्यं परलोकादि परमार्थतां सत्यस्वभावतां चात्मनः स्वतत्सर्वं शरी
रात्मनि मत्स्वरूप एवास्तीति यो वेद तस्मै तमेव सर्वेश्वरं देवाः सेवितुं स्पृहयंति ३०

मे०
२२०

220

अस्यासुपर्णत्वं व्याचष्टे भूमाविति। अयमेवं प्रत्यगात्मत्वात्। हिरण्मयं चिन्मयं। अंडं जंब्रह्मांडांतरा विभूतिं। अंडमध्ये पिंडस्य मध्ये हृदंबुजे भोग्यात्मनि शरीरे त्वं तरिक्षे हार्दाकाशे मायां स्वं च देहपुंडरीकमायां स्वं उपाधित्रयमाधारत्वेनाधेयाद्ब्रह्मणः पृथक्त्वं भवति। अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मि न्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यमिति श्रुतेः रश्मिभिरिव प्रसरणैश्चक्षुःश्रोत्रादिभिर्दीप्तः जीवभावं गमितः पतत्रिणां बहुपतत्रस्थानीयाभिरंगदेवताभि

र्भूमावसक्तं दिवि चाप्रमेयं हिरण्मयं योंडजमंडमध्ये पतत्रिणां पक्षिणामंतरिक्षे यो वेद भोग्या
त्मनि रश्मिदीप्तः ३१ आवर्तमानमजरं विवर्तनं षण्णाभिकं द्वादशारं सुपर्व यस्येदमास्योप
रियाति विश्वं तत्कालचक्रं निहितं गुहायां ३२ ॥

र्युक्तं यस्याग्निरास्यं स्वं बृहद्द्यौर्नाभिश्चरणौ क्षितिरित्यादिभिर्युक्तं पक्षिणामिवासंगमोदप्रमोदारव्यहृद्वृत्तिविशेषरूपपक्षद्वयं वंतं वा जीवप्रत्यग्भूतं ब्रह्म हिरण्मयः शकुनिर्ब्रह्म नामेति श्रुतेः तत्त्वतो यो वेद तं देवा ब्रजंतीति पूर्वेणान्वयः ३१ विवर्तनं आयुःक्षयरूपं षट्ऋतवो नाभयो यस्य द्वादश मासा अराः यस्मिन्नशोषनानिदर्शसंक्रमादीनि पर्वाणि यत्र आस्योपरि भक्ष्यमिव विश्वं याति। गुहायां बुद्धौ ३२

राम०
२२०

संप्रसीदत्यस्मिन्निति संप्रसादः सुषुप्तं तद्देवजगतः शरीरं मूलकारणत्वात् तापयोक्तं सुषुप्ताख्यं तमोऽज्ञानं पदहीनं स्वप्नबोधयोरिति सर्वान्लोकांश्च स्थूल
सूक्ष्मान् अधिगच्छति व्याप्नोति कारणत्वाद्देवात् तस्मिन् संप्रसादाभिन्ने स्थूलसूक्ष्मदेहद्वये स जीवः देवान्प्राणादीन्संतर्पयति तेच देवा अस्य सत्वस्य मुखं प्राप्य
संतर्पयंतीत्यर्थः तथा च श्रुतिः सयां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यति आ
दित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यंत्यां यत्किंच द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेतीति ३२ यः

यः संप्रसादं जगतः शरीरं सर्वान्स लोकानधिगच्छतीह तस्मिन्हि संतर्पयतीह देवांस्ते वै तृप्तास्तर्पयंत्यास्यमस्य ३३
तेजोमयो नित्यमयः पुराणो लोकाननंतानभयानुपैति भूतानि यस्मान्न त्रसंते कदाचित्स भूतानां न त्रसते कदाचित् ३४

पूर्वोक्तामग्र्यां परमात्मतां अप्राप्य लिंगात्मके सोपाधिके रूपे तिष्ठति तस्य गतिमाह तेजोमय इति तेषु ब्रह्मलोकेषु पराः परावतो वसंतीति श्रुता विबुद्धा हापि लोका
निति बहुत्वं कार्यब्रह्मलोकागतप्रदेशभेदापेक्षया तेन कार्यब्रह्मलोकं गच्छतीत्यर्थः अत एव कठवल्लीषु निर्गुणविद्याप्रकरणेऽपि गतिराम्नायते शतं चैका च
हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति तत्राप्ययमेव श्रुतेराशयः न तु परब्रह्मविदामर्चि
रादिगतिरस्तीति तत्र गत्यास्नानमिति व्यक्तमाकरे ३४ ॥

परमात्मतां प्राप्तस्य तस्य नइहामुत्र वा भोगोस्तितद्धेतोर्मूलाज्ञानस्य नाशादित्याह अगर्हणीयइति। विनीतमोहो नष्टाज्ञानः अतएव व्यपनीतं नष्टं कल्मषं स्थूलसू
क्ष्मदेहद्वयं यस्य अन्नमदनीयं भोग्यं लोकं अर्छति गच्छति। न तस्य प्राणा उत्क्रामंतीति तस्य गत्यभाव उक्तः ३५ अस्य जीवन्मुक्तावस्थामाह अरोषेति। नस्तः
प्रियाप्रियेयस्य सः अप्रियाप्रियः उदासीनवत् तनत्प्रीत्यप्रीतियुक्तं चरन् भुंजानो भोगान् ३६ एकसप्ततितमः विस्तरेण ससाधनां ब्रह्मविद्यामुक्त्वा सं

अगर्हणीयो न च गर्हतेन्यान्स वै विप्रः परमात्मानमीक्षेत्। विनीतमोहो व्यपनीतकल्मषो न चेह नामुत्र च सोन्नमर्छ
ति ३५ अरोषमोहः समलोष्टकांचनः प्रहीणकोषो गतसंधिविग्रहः। अपेतनिंदास्तुतिरप्रियाप्रियश्चरन्नुदासीन
वदेष भिक्षुकः॥ ३६ शांतौ मोक्षधर्मेषु शुकानुप्रश्ने॥ ॥भीष्म उवाच॥ प्रकृत्यास्तु विकाराये क्षेत्रज्ञस्तैरधिष्ठितः। न चै
नं ते प्रजानंति स तु जानाति तानपि १ तैश्चैवं कुरुते कार्यं मनःषष्ठैरिहेंद्रियैः। सुदांतैरिव संयंता दृढैः परमवाजिभिः २॥

क्षेपेणाकठवल्लीनामर्थं संगृह्णन्नुपसंहरति। प्रकृत्या इति। विकारा देहेंद्रियमनांसि तैः अधिष्ठितः अधिष्ठातृत्वं कर्तृत्वमावं प्रापितः आत्मेंद्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिण इति श्रुतेः जडत्वाच्च क्षुरादय आत्मानं न भासयंति आत्मा तु चेतनत्वात्तानवभासयति १ न चक्षुषा गृह्यते नापि वाचा तस्य भासा सर्व
मिदं विभातीति श्रुतिभ्यामित्याह तैश्चेति कार्यं विषयदेशं प्रतिगमनं २ २ २

न्या१

परत्वं सूक्ष्मत्वं कारणत्वं चाभ्यांतरत्वं च ननु इंद्रियाणि हयान्[illegible]हुर्विषयांस्तेषु गोचरानिति तत्रैव कठवल्यां इंद्रियेभ्योऽर्थानां बाह्यत्वं श्रूयते तत्कथमिंद्रियेभ्यः पराह्य
र्था इति तत्रेदमुच्यते। सत्यं व्यवहारतस्तथात्वमेव परमार्थतस्तु संकल्पमात्रकृता विषयाः संकल्पश्च मनोधर्म इंद्रियेभ्य आंतर इति न किंचिदवद्यं तथा चाक्षपाद
सूत्रे दोषनिमित्तं रूपादयो विषयाः संकल्पकृता इति अर्थेभ्यो मनस्तत्कल्पकं मनसोऽपि बुद्धिर्निश्चयात्मिका परा ततोऽपि परं महानात्मा शुद्धसत्वपदार्थः स एव
हैरण्यगर्भी बुद्धिः ३ ततः परं महत उपादानमव्यक्तकारणं अज्ञानं न तत्कापिलाभिमतं प्रधानं आनुमानिकाधिकरणे तस्याव्यक्तशब्दार्थत्वनिरासात्। ननु तत्र

इंद्रियेभ्यः परे ह्यर्था अर्थेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ३ महतः परमव्यक्तमव्यक्तात्परतो
पुरुषः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ४ एवं सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सू
क्ष्मया सूक्ष्मदर्शिभिः ५ अंतरात्मनि संलीय मनः षष्ठानि मेधया इंद्रियाणींद्रियार्थांश्च बहुचिंत्यमचिंतयन् ६

सूक्ष्मशरीरमव्यक्तशब्देनोक्तं तदेवात्मा कमज्ञानं आदित्यवर्णं तमसः परस्तादिति श्रुतेः पुरुषादव्यवहितं अमृतं चिदात्मा ४ एवमेतेन प्रकारेण भूतेषु शरीरा
कारेषु आत्माऽनेककंचुकाक्रांततया गूढः सन्नौपाधिकेन रूपेण न प्रकाशते। नहि तत्सत्वे किंमानमत आह दृश्यते त्विति अग्र्यमिव अग्र्यातीक्ष्णा तया। सू
क्ष्मयेति तस्यैव व्याख्यानं। सूक्ष्मदर्शिभिः ब्रह्मदर्शनशीलैर्योगिभिः ५ इंद्रियाणि इंद्रियार्थांश्च मेधया बुद्ध्या अंतरात्मनि महत्तत्वे संलीय विलाप्य ब
हुचिंत्यं ध्येय ध्यातृध्यानरूपं त्रयं अचिंतयन् ६ ॥

ध्यानेनतदेकतानतयाविद्याउत्पादिता अहंब्रह्मास्मीतिवाक्यजधीवृत्त्याविषयासंस्कृतंउपरमंउपरतंकृत्वा अनीश्वरः ईशभावमपिप्रविलाप्यानरगवप्रकर्षेण
शांतात्मामुक्तचित्तः अमृतंकैवल्यंअच्छेतिप्राप्नोति ७ विपक्षेदोषमाह इंद्रियाणांवश्यात्माइंद्रियैर्हृतचित्तः आत्मनः संप्रदानेनकामादिभ्यः समर्पणेन
मर्त्यो ऽपमृत्युमश्नुते ८ उपसंहरति आहत्येति आहत्यविनाश्य सत्वेसूक्ष्मायांबुद्धौचित्तंस्थूलबुद्धिं कालंजरपर्वतवद्प्रकंप्योभवेत् कालंक्षराणगुह

ध्यानेनोपरमंकृत्वाविद्यासंपादितंमनः अनीश्वरः प्रशांतात्मातनोत्यमृतंपदं ७ इंद्रियाणांतुसर्वेषां
वश्यात्माचलितस्मृतिः आत्मनः संप्रदानेनमर्त्योमृत्युमुपाश्नुते ८ आहत्यसर्वसंकल्पान्सत्वेचित्तंनि
वेशयेत् सत्वेचित्तंसमावेश्यततः कालंजरोभवेत् ९ चित्तप्रसादेनयतिर्जहातीहशुभाशुभं प्रसन्नात्मा
त्मनिस्थित्वासुखमत्यंतमश्नुते १०

त्वादिरूपंजरयतिनाशयतितया आत्मविदेवकालंनाशयतिनततंकालइत्यर्थः ९ प्रसादेनद्वैतदर्शनाभावरूपेणनैर्मल्येनशुभाशुभंपुण्यपापंपुण्य
स्यापिबंधकत्वेनमोक्षेपिपक्षपापापत्वंतयाचजापकोपाख्यानेइंद्रादिलोकानामपिनरकत्वमुक्तंप्रसन्नात्माशुद्धचित्तः आत्मनिस्वरूपेस्थित्वाद्वैतदर्शनका
लीनंवृत्तिसारूप्यंपरित्यज्यसुखंअत्यंतंअंतमतिक्रांतंविविधपरिच्छेदशून्यमश्नुते १० १०

स्वप्नेसुषुप्तौनयाहिद्वैतादर्शनंसुषुप्तिकैवल्ययोस्तुल्यवदाम्नायतेमाध्यंदिनैः यद्वैतन्नपश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्न तुतद्द्वितीयमस्तिततोन्यद्विभक्तंयत्पश्येदित्यादिना अन्यदिति चैतत्सूत्रकारेणास्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहीति स्वाप्ययःसुषुप्तंसंपत्तिःकैवल्यं अनयोरन्यतरदपेक्ष्यद्वैतादर्शनमाविष्कृतंस्फुटीकृतं क्वचित्सुषुप्त्याद्यपायादौसुषुप्तिमपेक्ष्यमैत्रेयीब्राह्मणादौकैवल्यमपेक्ष्येति सूत्रार्थः १० अतै

लक्षणंतुप्रसादस्ययथास्वप्नेसुखंस्वपेत् निवातेवायथादीपोदीप्यमानोनुकंपते ११ एवंपूर्वापरेकालेयुंजन्नात्मानमात्मनि लघ्वाहारोविशुद्धात्मापश्यन्नात्मानमात्मनि १२ रहस्यंसर्ववेदानामनैतिह्यमनागमं आत्मप्रत्ययिकंशास्त्रमिदंपुत्रानुशासनं १३ धर्माख्यानेषुसर्वेषुसत्याख्यानेषुचयद्वसु दशेदमृक्सहस्राणिनिर्मथ्यामृतमुद्धृतं १४ नवनीतंयथादध्नःकाष्ठादग्निर्यथैवच तथैवविदुषांज्ञानंपुत्रहेतोःसमुद्धृतं १५ स्नातकानामिदंशास्त्रंवाच्यंपुत्रानुशासनं तदिदंनाप्रशांतायनादांतायातपस्विने १६ नावेदविदुषेवाच्यंनचानानुगतायच नासूयकायानृजवेनचानिर्दिष्टकारिणे १७

तिह्यंनकेवलंत्वनुमानतः अनागमंआगममात्रतोवागम्यं किंतुअनुभवगम्यमित्यर्थः १३ वसुधनंसारभूतंदशकिंचिदधिकानिऋक्सहस्राणितथाचोक्तं शाकलके ऋचांदशसहस्राणिऋचांपंचशतानिच ऋचामशीतिःपादश्चैतत्पारायणमुच्यतइति सर्ववेदस्येत्याद्रष्टव्यं दपंसारउद्धृतइत्यर्थः १६ १७

२१ द्विसप्ततितमः॥ ॥आत्मापर्यपृष्टकोंतसकर्मेंद्रियाणि १ ज्ञानेंद्रियाणि २ मनआदिचतुष्टयं ३ पंचवाराः ४ पंचभूतानि ५ कामः ६ कर्म ७ अविद्या
चेति। पुनरपिशतकृत्वोपिपप्रच्छंवदितव्यमितिन्यायेनविस्तरार्थंचोच्यते यथेतिसप्रकारंवेद २ भूतानांजरायुजादीनांसागरोर्मिन्यायेनप्रतिजीवंभूम्यादयः पृ

नातर्कशास्त्रदग्धायतथैवपिशुनायच अश्लाघिनेश्लाघनीयायप्रशांतायतपस्विने १८ इदंप्रियायपुत्रायशिष्यायानु
गतायतुरहस्यधर्मंवक्तव्यंनान्यस्मैतुकथंचन १९ यद्यप्यस्यमहींदद्याद्रत्नपूर्णामिमांनरः इदमेवततःश्रेयइतिमन्ये
ततत्त्ववित् २० अतोगुह्यतरार्थंतदध्यात्ममतिमानुषं यत्तन्महर्षिभिर्दृष्टंवेदांतेषुचगीयते २१ तत्तेहंसंप्रवक्ष्यामिय
न्मांत्वंपरिपृच्छसि २२ यद्यत्तेमनसिवर्त्ततेयद्यच्चास्तितवसंशयःक्वचित् श्रूयतामयमहंतवाग्रतःपुत्रकिंहिकथ
यामितेपुनः २३ शांतौमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥शुकउवाच अध्यात्मंविस्तरेणोहपुनरेववदस्वमे यदध्यात्मंयथा
वेदभगवन्नृषिसत्तम १ व्यासउवाच अध्यात्मंयदिदंतातपुरुषस्येहपठ्यते तत्तेहंवर्तयिष्यामितस्यव्याख्यामिमांशृ
णु २ भूमिरापस्तथाज्योतिर्वायुराकाशएवच महाभूतानिभूतानांसागरस्योर्मयोयथा ३ प्रसार्येहयथांगानि
कूर्मःसंहरतेपुनः तद्वन्महांतिभूतानियवीयःसुविकुर्वते ४

पक्वल्पिताःसंतीत्यर्थः ३ एतदेवदृष्टांतांतरपूर्वकमाह प्रसार्येतिायवीयःसुअल्पेषुशरीराकारेषुमहाभूतेषुस्थित्वाविकुर्वतेसृष्टिप्रलयाख्यंविकारंजनयंति

अतः शरीरे एव सम्भवद्ब्रह्माण्डोदयप्रलयौ भवत इति फलितमाहुरनीति। तन्मयं च अल्पभूतमयं। तस्मिन् शरीरं तस्य तथा सृष्टिप्रलयादिकं निर्दिश्यते। इहैवान्तः शरीरे
सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति श्रुतेः ५ यद्यपि सर्वस्मिन् शरीरे पंचैव भूतानि तथापि शरीरेषु सुरनरतिर्यगादिरूपेण वैषम्यं आकारेण तत्र
हेतुः यस्मिन् कर्माणि निमित्ते सति यदनुपश्यति अन्तकाले। यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरं तं तमेवैतीति स्मृतेः ६ शरीरेषु शरीरावयवेषु बुद्धीन्द्रियादि

इति तन्मयमेवेदं सर्वं स्थावरजंगमं सर्गे च प्रलये चैव तस्मिन्निर्दिश्यते तथा ५ महाभूतानि पंचैव सर्वभूतेषु भूतकृत् आकारेण
तु वैषम्यं यस्मिन् यदनुपश्यति ६ शुक उवाच आकारं यच्छरीरेषु कथं तदुपलक्षयेत् इन्द्रियाणि गुणाः केचित् कथं तानुपलक्षयेत् ७
व्यास उवाच एतत्ते वर्णयिष्यामि यथावदनुपूर्वशः शृणु तत्त्वमिहैकाग्रो यथा तत्त्वं यथा च तत् ८ शब्दः श्रोत्रं तथा खानि त्रयमा
काशसंभवं प्राणश्चेष्टा तथा स्पर्श एते वायुगुणास्त्रयः ९ रूपं चक्षुर्विपाकश्च त्रिधा ज्योतिर्विधीयते रसोऽथ रसनं स्नेहो गुणास्त्वे
ते त्रयोऽम्भसः १०

षु यत् वैषम्यं कानि चिदिन्द्रियाणि केचिद्गुणाः शब्दादयः इन्येषमादि कथमिति स्वरूपतो गुणतश्च भेदं कथं शब्दद्वयेन पृच्छतीत्यर्थः ७ तदेव वक्तुं प्रतिजा
नीते। यथा तत्त्वं यथा च तदिति ८ शब्दः श्रोत्रं देहच्छिद्राणि स्वरूपतो भिन्नानि। विषयत्वेकारणत्वेन तदुभयाश्रयत्वेन चेति गुणतो भिन्नानि एवमग्रेऽपि चेष्टा स्पर्शेनि
द्रियं वायुगुणाः वायुविकाराः ९ विपाकः जाठरः १० शरीरं कठिनांशबाहुल्यात् पार्थिवम् ११

इंद्रियग्रामैः सह पांचभौतिको विकारः १२ स्पर्शादयो वाय्वादीनां गुणास्तद्विकारैः स्पर्शनादींद्रियैर्गृह्यंते १३ मनः संकल्पविकल्पात्मकं बुद्धिर्निश्चयात्मिका स्वभावाप्रू
र्वेवा मनास्वयोनिर्भूतान्येवात स्मानि सर्वाण्यपि भूतान्यान्येव अत्र हेतुमाह नेति गुणेभ्यः परं श्रोत्रादिकार्यस्वरूपं आगताः प्राप्ताः संतो गुणान्शब्दादीन्नातिवर्त्तं
ते अत्रायमाशयः यदिंद्रियं यस्यार्थस्य ग्राहकं तत्तद्ग्राह्यसजातीयगुणमयं इति नियमश्चक्षूरूपादौ दृष्ट इति मनोबुद्ध्यहंकाराणां चानामपि ग्राहका इति पंचगुणा

घ्रेयं घ्राणं शरीरं च भूमेरेते गुणास्त्रयः ११ एतावानिंद्रियग्रामो व्याख्यातः पांचभौतिकः वायोः स्पर्शो रसोऽद्भ्यश्च ज्योतिषो रूपमु
च्यते आकाशप्रभवः शब्दो गंधो भूमिगुणः स्मृतः १२ मनो बुद्धिः स्वभावश्च त्रय एते स्वयोनिजाः न गुणानतिवर्त्तंते गुणेभ्यः पर
मागताः १४ यथा कूर्म इहांगानि प्रसार्य विनियच्छति एवमेवेंद्रियग्रामं बुद्धिः सृष्ट्वा नियच्छति १५ यदूर्ध्वं पादतलयोरवाङ्मू
र्ध्नश्च पश्यति एतस्मिन्नेव कृत्ये तु वर्त्तते बुद्धिरुत्तमा १६ गुणान्नेनीयते बुद्धिर्बुद्धिरेवेंद्रियाण्यपि मनः षष्ठानि सर्वाणि बुद्ध्यभा
वे कुतो गुणाः १७

अयं त्वात्पांचभौतिकाः १४ समनस्कानींद्रियाणि बुद्धिमात्रमेवेत्याह यथेति १५ यदिति ऊर्ध्वमित्यादिना कृत्स्नं शरीरं यत्पश्यति इदं ममाहमिति यद्दर्शनमेतस्मि
न्नकृत्ये कारणे यं बुद्धिर्वर्त्तते देहे अहमित्यनुभवो विषयो बुद्धेः स्वरूपमित्यर्थः १६ गुणान्शब्दादीन् भावप्रधानो निर्देशः बुद्धिरेव शब्दाद्यात्मतां अतिशयेन नीय
ते कर्मकर्त्तरि प्रयोगः बुद्ध्यभावे विषया इंद्रियाणि च न प्रपंतेत तस्मात्दुभयं बुद्धिरेवेत्यर्थः १७

१८ चक्षुरिति इदं रूपमिति ज्ञानेन यया चक्षुः करणं एवमिदमित्थंनवेति श्रोत्रेण ज्ञानेन इदमित्थमेवेति ज्ञानेन च मनो बुद्धी करणे तेषां ज्ञानानां द्रष्टा तु साक्षी ततः पृथगित्यर्थः
१९ रजइति स्वयोनिजाः तत्तत्संस्कारसचिवाश्चित्तादाविर्भूताः अतएव चित्तेन तज्जाश्चापींद्रियादयः सर्वे त्रिगुणात्मका एवेति मतं सर्वेषु सुरनरादिषु तान्गुणा

इंद्रियाणि नरे पंच षष्ठं तु मन उच्यते सप्तमीं बुद्धिमेवाहुः क्षेत्रज्ञं पुनरष्टमं १८ चक्षुरालोचनायैव संशयं कुरुते मनः बुद्धिरध्य
वसानाय साक्षी क्षेत्रज्ञ उच्यते १९ रजस्तमश्च सत्त्वं च त्रय एते स्वयोनिजाः समाः सर्वेषु भूतेषु तान् गुणानुपलक्षयेत् २० ॥
तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् प्रशांतमिव संशुद्धं सत्त्वं तदुपधारयेत् २१ यत्तु संतापसंयुक्तं काये मनसि वाभ
वेत् प्रवृत्तं रज इत्येवं तत्र चाप्युपलक्षयेत् २२ यत्तु संमोहसंयुक्तमव्यक्तविषयं भवेत् अप्रतर्क्यमविज्ञेयं तमस्तदुप
धार्यतां २३ प्रहर्षः प्रीतिरानंदः साम्यं स्वस्थात्मचित्तता अकस्माद्यदि वा कस्माद्वर्तंते सात्त्विका गुणाः २४ अभिमा
नो मृषावादो लोभो मोहस्तथाक्षमा लिंगानि रजसस्तानि वर्तंते हेत्वहेतुतः २५ तथा मोहः प्रमादश्च निद्रा तंद्राप्रबो
धिता कथंचिदभिवर्तंते विज्ञेयास्तामसा गुणाः २६ शांतौ मोक्षधर्मेषु युक्तानुप्रश्ने ॥ ॥ ॥ ॥

नकार्यद्वारा उपलक्षयेत् २० कायेशिरेवाहतत्रेत्यादिना २४ हेतुः कारणात् अहेतुः अकस्मात् २६ त्रिसप्ततितमः ॥ ॥ ॥ ७ ॥

एवंबुद्धेः स्वाभाविकंत्रिगुणात्मत्वमुक्त्वाकर्मजंत्रैविध्यमाहामनइति। विसृजतेसंकल्पमात्रेणभावंपदार्थंविविधंउत्पादयति। बुद्धिरध्यवसायिनीतंपदार्थंबुद्धिर्नि
श्चिनोति इदमित्थमेवेतिहृदयमहंकारंप्रियंचअनुकूलंअप्रियंप्रतिकूलंचैववेद १ अतएवेंद्रियेभ्योऽर्थाःविषयाःपराःसूक्ष्माःसंकल्पजत्वात्।तेभ्योम
नःपरंतदुपादानत्वात्।ततोपिबुद्धिःपरानिश्चयात्मकत्वात् ततोप्यात्मापरः अदृश्यत्वेनप्रत्यक्त्वात् २ जंतोर्व्यावहारिकआत्माबुद्धिःसायदाभावंप

व्यासउवाच मनःप्रसृजतेभावंबुद्धिरध्यवसायिनी हृदयंप्रियाप्रियेवेदत्रिविधाकर्मचोदना १ इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यः
परंमनः मनसस्तुपराबुद्धिर्बुद्धेरात्मापरोमतः २ बुद्धिरात्मामनुष्यस्यबुद्धिरेवात्मनात्मनि - यदाविकुरुतेभावंतदाभवतिसाम
नः ३ इंद्रियाणांपृथग्भावाद्बुद्धिर्विक्रियतेह्यतः शृण्वतीभवतिश्रोत्रंस्पृशतीस्पर्शउच्यते ४ पश्यतीभवतेदृष्टीरस
तीरसनंभवेत् जिघ्रतीभवतिघ्राणंबुद्धिर्विक्रियतेपृथक् ५ इंद्रियाणितुतान्याहुस्तेषुदृश्योधितिष्ठति तिष्ठतीपुरुषेबुद्धि
स्त्रिषुभावेषुवर्त्तते ६ कदाचिल्लभतेप्रीतिंकदाचिदपिशोचते नसुखेननदुःखेनकदाचिदिहयुज्यते ७ ॥ ॥

दार्थं विविधाकारंकुरुतेतदासामनइत्युच्यते ३ पृथग्भावात्पृथग्विषयत्वात् [illegible] विक्रियतेविकारंप्राप्नोति तानेवविकारानाह शृण्वतीति ५ ता
निबुद्धेर्विकाराः। अदृश्यश्चिदात्माभावेषुसात्विकादिषु ६ तानेवाहकदाचिदिति। प्रीतिशोकोभयाभावाः क्रमेणसात्विकराजसतामसाः ७ ॥

तान्भावानत्र्प्रतिवर्त्तते बुद्धिः सरितां वेगान् सागरोर्मिरिव तिरोधत्ते निरोधकाले इत्यर्थः ८ यदेति अधिष्ठानानि इंद्रियगोलकानि बुद्ध्या प्रेवांतर्भूतानि परस्य
रंट्टपकभूतानि ९ मेध्यारूपादिज्ञानेतत्रहितानि मेध्यानि १० सर्वाणीति यदिंद्रियं यदा अनुविधीयते बुद्ध्याऽनुगतं भवति तदा पूर्वं अविभागगता अपृथग्भू
तापि बुद्धिः पश्चान्मनसि संकल्पात्मके भावे घटादौ वर्त्तते बुद्ध्याऽनुगृहीतमिंद्रियं संकल्प्य घटं गृह्णातिः एवं रूपादीन आनुपूर्व्येण न तु यौगपद्येन
११ भावाः सात्त्विकादयः त्रिषु मनोबुद्ध्यहंकारेषु अन्वयीत्यर्थं अनुस्यूताः वर्त्तंते इत्यन्वर्थः एकस्मिन्नरूपादिपिंडे भर्त्तुः प्रीतिः सपत्न्या द्वेषः तामवि

सेयं भावात्मिका भावांस्त्रीनेतान्नतिवर्त्तते सरितां सागरो भर्त्ता महावेलामिवोर्मिमान् ८ यदा प्रार्थयते किंचित्तदा भवति सा
मनः अधिष्ठानानि वै बुद्ध्या पृथगेतानि संस्मरेत् ९ इंद्रियाणि एव मेध्यानि विजेतव्यानि कृत्स्नशः सर्वाण्येवानुपूर्व्येण य
द्यदानुविधीयते अविभागगता बुद्धिर्भावे मनसि वर्त्तते ११ ये चैव भावा वर्त्तंते सर्व एष्वेव ते त्रिषु अन्वर्थाः संप्रवर्त्तंते रथनेमि
मराइव १२

दृतस्यैव तस्य मोह इति त्र्यांतर एव भावा विषयदर्शनेनाविर्भवंती त्यर्थः इतर एवानुभवैवैषम्याद्विषय एव त्रिगुणात्मेति कापिलाः प्राहुः तन्मंदं न हि स्त्रीपिंडे सदैव भर्त्तादी
नां प्रीत्यादयोऽनुवर्त्तंते येन तान् प्रति तेषां सत्त्वाद्यात्मत्वं नियम्येत न ह्येकः पदार्थः एकमेव भोक्तारं प्रति कदाचित्सत्त्वात्मा कदाचित्तमस्त्वात्मेति युक्तो न हि हिमग्रीष्मयोः
प्रीत्यप्रीतिविषयो वह्निर्द्विरूपात्मतां प्रतिवर्त्तते तस्माद् बुद्ध्यादय एव सत्त्वाद्यात्मानो न तत्त्वर्थाः रज्जुरगादिवत् अनिर्वचनीयत्वात्तेषां न ह्यव्यवहित घटादि सत्त्वे प्रत्यक्षं क्रमेणते
स्यात्तत्रासामर्थ्यात्तेषां

प्यानुमानेनवह्निधूमव्याप्येनतत्सत्वसाधकस्यनिपतत्स्यालिंगस्याभावात् नापिलोकवाक्यंतस्याप्रमाण्यादिदोषशंकाकलंकितत्वात्।नापिवेदवाक्यं।ने
हनानास्तिकिंचनेतिसर्वसत्ताग्रासिनोवेदस्यपत्किंचित्सदार्थसत्वासाधकत्वात्।नन्वविमुक्तेवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्म
सदनमत्रहिजंतोःप्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेताविमुक्तंनविमुंचेदित्या
दिष्कृतेतरविमुक्तादीनांसन्द्भावेप्रभावंतदविमोकंचप्रकाशयंत्याःकागतिः।अस्नातवल्कनःसत्वाभावेकर्मोपास्तिकांडयोरुच्छेदापत्तेरितिचेत्।
न।अविद्यावद्विषयत्वात्तयोःयथास्यात्प्रेरज्जूरगभ्रमेऽपनीतेरज्जुःसत्यासर्पोमिथ्येतिसत्यासत्यविभागअभिमानिकोऽविद्यापेक्षःपरमार्थतस्स
योर्मिथ्यात्वाविशेषेप्यनुवर्त्ततेतद्वदिहापीत्येवेहि।तस्मादविद्यावतांवज्रपंजरापितमपिजगद्विद्यामतांदृष्टिसमसमयमात्रमेवेतियुक्तमुक्तंवुद्ध्याद
यस्तवसत्त्वाद्यात्मानोनतत्वर्पाइति १२ ॥

नन्वर्पणानां स्वरूपसत्ताभावे कथमिंद्रियसन्निकर्षादि तज्ज्ञं घटादिज्ञानं वा स्यादित्याशंक्याह प्रदीपार्थमिति इंद्रियैः करणैः बुद्धिसत्तमैः हेतुभिः इयमत्र [illegible] प्रक्रि-
या त्रिविधं सत्वं शुक्तिरजतादीनां प्रातिभासिकं घटादीनां व्यावहारिकं ब्रह्मणः पारमार्थिकं चेति क्रमेण तानि सत्सत्तरसत्तमानि तत्र सत्तमब्रह्माभिन्नत्वाद्विषया अपि स-
त्तमा इत्युच्यंते बुद्धिसत्तमैरिति बुद्धेस्य विषयसिद्ध्यर्थं अध्ययनेन वसतीति वत्तजीया इंद्रियैः रश्मिभूतैः मनः प्रदीपार्थं सत्तमावरकाज्ञाननाशं कुर्यात् ततः स्वतः प्रका-
शमाने सत्तमे विषया अध्यस्यंते यथा इंद्रियैः शुक्तीदमंशावरकाज्ञानेन नाशिते शुक्तिः बुद्धिस्य रजतभावेन शुक्त्यनतिरिक्तेन भाति इंद्रियान्वयव्यतिरेकयोराधिष्ठानग्रहणेवोप-

प्रदीपार्थं मनः कुर्यादिंद्रियैर्बुद्धिसत्तमैः निश्चरन्दीर्घयोगमुदासीने यदृच्छया १३

क्षयः एवं घटाद्यध्यासेपि इंद्रियद्वारा मनसा सत्तमावरकाज्ञाने नाशिते स्वतः प्रकाशमानं सत्तमं बुद्धिस्थ विषयादिभावेन सत्तमानन्येन भाति अत इंद्रियं सत्तमस्यैव ग्रहा-
र्थी विषयादिकं तु रज्ज्वामुरगवद्विद्यमात्रं भातं साक्षिमात्रभातं वा तथा च स्फुरति तमेव भांतमनुभाति सर्वमिति अधिष्ठानभानमनु अध्यस्तस्य घटादेर्भानमाह लोके
पि घटानुभवः पटानुभव इत्यादौ अनुभवशब्दः आस्पर्शस्य भवतेर्ज्ञानार्थत्वेन पाश्चात्यप्रकाशवाचको नुशब्दसामर्थ्यात् पूर्ववर्तिनमधिष्ठानप्रकाशमाक्षिपति इय-
मेव तार्किकाणां निर्विकल्पकं ज्ञानमित्याचक्षते भाषांतरेण तथा च विषयाणां स्वरूपसत्ताभावेपि रज्जूरगवद्विद्यमाप्रकाश उपपद्यते इति सर्वमवदातं १३ ॥

मो॰
२२७

227

एतस्मानफलमाह। एवमितिा इदं जगत्एवं स्वभावं बुद्धिमात्रकल्पितमिति जानन्न मुह्यति न हि स्वाप्नधननाशादिना प्रबुद्धः शोकादिकं प्राप्नोतीत्यर्थः
१४ नन्वेवं घटमात्रविद ॥ प्यधिष्ठानं ब्रह्म ज्ञातमेवेति किं श्रवणादिनेत्याशंक्याह नचेति। कामगोचरैः काम्यमानविषयगोचरैः अवधैर्निर्दोषैरपी
द्रियैः आत्मा स्वरूपेण ज्ञातस्व पुरुषार्थोन परुरूपेण न हि रज्जतात्मना ज्ञाता शुक्तिः शुक्तिकार्याय प्रभवतितद्वत्। दुष्कैर्दुष्कृतिभिरकृतात्मभिरशो

एवंस्वभावमेवेदमितिविद्वान्नमुह्यति अशोचन्नप्रहृष्यन्हि नित्यंविगतमत्सरः १४ नचात्माशक्यतेद्रष्टुमिंद्रियैः
कामगोचरैः प्रवर्त्तमानैरनघैर्दुर्द्धरैरकृतात्मभिः १५ तेषांतुमनसारश्मीन्यदासम्यङ्नियच्छति तदाप्रकाशतेस्या
त्मादीपदीप्तायथाकृतिः १६ सर्वेषामेवभूतानांतमस्यपगतेयथा प्रकाशंभवतेसर्वंतथेदमुपधार्यतां १७ यथावा
रिचरःपक्षीनलिप्यतिजलेचरन्विमुक्तात्मातथायोगीगुणदोषैर्नलिप्यते १८ एवमेवकृतप्रज्ञोनदोषैर्विषयांश्च
रन् असज्जमानःसर्वेषुकथंचननलिप्यते १९

धितचित्तैःपुरुषैः १५ कथंतर्ह्यात्मासेयइत्यतआहतेषामिति। आकृतिर्घटादिरूपं १६ भवतेप्राप्नोति कंठगतविस्मृतचामीकरवदज्ञानापगममात्रल
भ्य आत्मेत्यर्थः १७ विद्याफलमाह यथेति गुणदोषैः पुण्यपापैः प्राक्कृतैः १८ क्रियमाणैरपिकर्मभिर्नलिप्यत इत्यर्थः १९ १९ ॥ ॥

नलिप्यते इत्याह एवमिति विषयांश्चरन्नपिनलिप्यतेतत्र हेतुरसज्जमान इति सर्वेषु पुत्रादिष्वप्यसज्जमानस्तन्नाशजैः शोकादिभि
र्नलिप्यत एव देहासंगी देहकृतैरपि ।

सन्यासपूर्वकं आत्मध्यानशीलस्य सार्वात्म्यं प्राप्तस्य भोगपानासक्तस्य बुद्धीन्द्रियाणामात्माकारेण परिणामवंतीति तथापि चिद्‌चितोर्विभागस्य ज्ञानेनैव कथं भवतीत्या
हद्वाभ्यांतत्केति २१ शेषं प्राग्व्याख्याते २५ चतुस्स्त्रतितमः गुणानुविषयान् गुणान् सत्वादीन् विक्रियतः विकारं भजमानान् अनुलक्ष्य उदासीनस्या

त्यक्ता सर्वकृतं कर्म रतिर्यस्य सदात्मनि सर्वभूतात्मभूतस्य गुणावर्गेष्वसज्जतः २० सत्वमात्मा प्रसरति गुणान्वा
पि कदाचन नगुणा विदुरात्मानं गुणान्वेद स सर्वदा २१ परिद्रष्टा गुणानां च परिस्त्रष्टा यथातथं सत्वक्षेत्रज्ञयो
रेतदंतरं विद्धि सूक्ष्मयोः २२ सृजते त्रिगुणानेक एको न सृजते गुणान् पृथग्भूतौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा
२३ यथा मत्स्योद्भिरन्यः स्यात्संप्रयुक्तौ तथैव तौ मशकोदुंबरौ वापि संप्रयुक्तौ यथा सह २४ इषीका वा यथा मुं
जे पृथक्‌ सह चैव च तथैव सहितावेतावन्योन्यस्मिन्प्रतिष्ठितौ २५ शांतौ मोक्षधर्मेषु शुकानुप्रश्ने॥ ॥ व्यास उवा
च सृजते तु गुणान्सत्वं क्षेत्रज्ञस्त्वधितिष्ठति गुणान्विक्रियतः सर्वानुदासीनवदीश्वरः १ स्वभावयुक्तं तत्सर्वं यदिमा
न्सृजते गुणान् ऊर्णनाभिर्यथा सूत्रं सृजते तद्गुणांस्तथा २ ॥ ॥

प्यविष्ठातृत्वं अपस्कांतमणिवन्नरूपं १ एतदेवाह स्वभावेति अभिन्ननिमित्तोपादानत्वसूचनाय ऊर्णनाभिदृष्टांतः २ २ २ ॥ ॥

मो० २२८

एते गुणाः प्रध्वस्तास्तत्वज्ञानेन अदर्शनं गताः संतो न निवर्त्तंते घटादिवन्न नश्यंतीति किंतु रज्जूरगादिवद्बाधएवात्र प्रध्वंसपदार्थइत्यर्थः तत्र हेतुः प्रवृत्ति नैपलभ्यत इति। निवृत्तस्य हि घटादेः कपालादिरूपेण प्रवृत्तिर्लभ्यते ऽघटोध्वस्त इति इहतु तादृक्प्रवृत्त्यदर्शनात्त्रिरन्वयनाशएव गुणानामित्यर्थः एको मुख्याः अपरे तार्किकाः निवृत्तिः आत्यंतिकी दुःखानां आत्मगुणानां निवृत्तिर्भवतीत्याहुः एवं सांख्यादयोपि संसारहेतोर्दृग्दृश्यसंयोगस्यानादिभावस्यापि नाशमिच्छंति ३ एवं निवृत्ति बाधपक्षौ संप्रधार्य युक्त्यालोच्य यथा मतिनिश्चित्य पात्रसिद्धांतं कुर्यात् ४ एतदनुरोधेनैव गर्भशयो जन्मादिला

मध्वस्तान निवर्त्तंति प्रवृत्तिर्नोपलभ्यते एवमेके व्यवस्यंति निवृत्तिरिति चापरे ३ उभयं संप्रधार्यैतदध्यवस्ये घथामति अनेनैव विधानेन भवेदात्मा श्रयो महान् ४ अनादिनिधनो ह्यात्मा तं बुध्वा विचरेन्नरः अक्रु ध्यन्नप्रहृष्यंश्च नित्यं विगतमत्सरः ५ इत्येवं हृदयं सर्वं बुद्धिचिंतामयं दृढं अतीतः सुखमासीत अशोचंच्छि न्नसंशयः ६ ॥

भोपि बाधपक्षे आध्यात्मिकः निवृत्तिपक्षे तात्विक इति। अनादी निधि शब्दो नित्यानित्ययोर्ध्वंसभावासंभवप्रसिद्धिघोतकः उपपन्नप्रपश्चमोविकारो निहि धर्मिणा मिति न्यायेन दुःखादिधर्मिणां विकारिणां नित्यत्वासंभवात घटे यावद्रूपनाशादर्शनेन आत्मनि पावद्दुःखनाशलक्षणस्य मोक्षस्याप्यसंभवात् साधीयान यं पक्ष इत्याशयः ५ बुद्धिधर्माश्चिंतादयः तत्प्रधानं बुद्धिचिंतामयं ध्यायतीव लेलायतीवेत्यादिश्रुतेः दृढं कर्मामयं अनित्यं विनाश्यं छित्वेति शेषः ६॥

राम० २२८

पृथ्व्याः सकाशात् तन्नंदीप्रतिच्युताः अविद्वांसः नरा गाविद्याहीनाः उन्मज्जननिमज्जनैस्तम्बेषु क्लिश्येषु ७ सार्द्धश्लोकेन दृष्टांतमुक्त्वा दार्ष्टांतिकमा
हार्द्धेन एवमिति। आत्मनः स्वस्य आत्मानं प्रत्यंचं तस्य स्वरूपलक्षणं केवलं ज्ञानमिति शुद्धचिन्मात्रमित्यर्थः ८ शर्मं सुखं ९ जन्मसामर्थ्यं लब्ध
जन्मनो यथोक्ताचारवतो ऽवश्यंभावीत्यर्थः पर्याप्तं परां परायणं मोक्षप्रापकं १० शुद्धः पुण्यपापहीनः ११ अथ पंचभिः पातञ्जे पाविदुषो गतिः स्ततो

तांस्तेषु प्रच्युताः पृथ्व्या यथा पूर्णां नदीं नराः अवगाढा ह्यविद्वांसो विद्धि लोकमिमं तथा ७ न तु ताम्यति वै विद्वान् स्थले चर
न् तत्त्ववित् एवं यो विंदते ऽत्मानं केवलं ज्ञानमात्मनः ८ एवं बुध्वा नरः सर्वं भूतानामागतिं गतिं समवेक्ष्य चवै षम्यं लभते श
र्म चोत्तमं ९ एतद्धि जन्मसामर्थ्यं ब्राह्मणस्य विशेषतः आत्मज्ञानं समः शैव पर्याप्तं तत्परायणं १० एतद्बुध्वा भवेद्बुद्धः किमन्य
द्बुद्धलक्षणं विज्ञायेतद्विमुच्यंते कृतकृत्या मनीषिणः ११ न भवति विदुषां महद्भयं यदविदुषां सुमहद्भयं परत्र नहि गति
रधिकास्ति कस्यचिद्भवति हि या विदुषः सनातनी १२ लोकमातुरमसूयते जनस्तत्तदेव च निरीक्ष्य शोचते तत्र पश्य कु
शलान्न शोचते ये विदुस्तदुभयं कृताकृतं १३

धिका कस्यचिद्गतिर्नास्ति १२ लोकान् इति लोको भोगं स्त्र्यादिः तं आतुरं दोषाक्रांतं जनः असूयते दोषेण पश्यति भोगवैकल्यात् तथा तत्तदेव लो
कस्यातुरत्वं निरीक्ष्य शोचते चातत्रेति बुद्ध्या बुद्धयोर्महद्वैलक्षण्यमित्यर्थः ये पुरुषास्तदुभयं शोकाशोकरूपं कृताकृतं क्रमेण आरोपितानारो
पितमिति विदुस्ते कुशला इत्यर्थः १३

किमनेनकौशलेनेत्यतआहयदिति इहलोकेकुर्वतःयन्निष्कामंकर्मतत्प्राचीनकर्मणांनाशकंनहिकर्मणासर्वकर्मच्छेदोस्तीत्यर्थः किंतुतदुभयंइहजन्मनिएवर्जितं
निचकृतंकर्मतस्यविदुषःप्रियमप्रियंवानजनयतीत्येतोविद्यासंपादनीयेतिभावः नैनंकृताकृतेतत्पतः नलिप्यतेकर्मणापापकेनेत्यादिश्रुतिभ्यः १४ पंचसप्त

यत्करोत्यनभिसंधिपूर्वकंजच्चनिराशादितियत्पुराकृतं नप्रियंतदुभयंनचाप्रियंतस्यतज्जनयतीहकुर्वतः १४ शांतौमोक्ष
धर्मेषुशुकानुप्रश्ने॥ ॥ शुकउवाच यस्माद्धर्मात्परोधर्मोविद्यतेनेहकश्चन योविशिष्टश्चधर्मेभ्यस्तंभवान्प्रब्रवीतुमे १
व्यासउवाच धर्मंतेसंप्रवक्ष्यामिपुराणमृषिभिःकृतं विशिष्टंसर्वधर्मेभ्यस्तमिहैकमनाःशृणु २ इंद्रियाणिप्रमाथीनि
बुद्ध्यासंयम्ययत्नतः सर्वतोनिष्पतिष्णूनि पितावालानिवात्मजान् ३ मनसश्चेंद्रियाणांचाप्यैकाग्र्यंपरमंतपः तज्ज्या
यः सर्वधर्मेभ्यःसधर्मःपरउच्यते ४ तानिसर्वाणिसंधायमनःषष्ठानिमेधया आत्मतृप्तइवासीतवहुचिंत्यमचिंतयन्
५ गोचरेभ्योनिवृत्तानियदास्थास्यंतिवेश्मनि तदात्वमात्मनात्मानंपरंद्रक्ष्यसिशाश्वतं ६ ॥ ॥ ॥ ॥

तितमः॥ ॥ विद्याप्रापकंधर्मंपृच्छतियस्मादिति १ अश्वमेधादिधर्मेभ्यइतिनिवृत्तिधर्मलक्षणमाहविशिष्टइति २ निष्पतिष्णूनिनिष्पतनशीलानिआसं
नियम्यैकाग्र्यंकुर्यादितिसंबंधः ४ बहुचिंत्यंत्रिपुटी ५ गोचरेभ्योबाह्याभ्यंतरविषयेभ्यः वेश्मनिपरस्मिन्ब्रह्मणिसर्वाधिष्ठाने ६ ॥ ॥ ॥

विधूममिव निरुपाधिं ब्राह्मणाः ब्रह्मविदः ७ आत्मबुद्धिरचेतनत्वाद्वृक्षवत् सर्वं बुद्ध्यादिकं ८ ज्ञानदीपेन ब्रह्माकारांतःकरणवृत्त्या आत्मानं ब्रह्म आत्म
निदेहे आत्मनेति पाठ आत्मना ज्ञानदीपेनेति सामानाधिकरण्यं निरात्मा निरुपाधिः १० विपाप्मेति देहांतरसंबंधनिरासः विगतज्वर इति जीवन्मु

सर्वात्मानं महात्मानं विधूममिव पावकं तं पश्यंति महात्मानो ब्राह्मणा ये मनीषिणः ७ यथा पुष्पफलोपेतो बहुशाखो म
हाद्रुमः आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलं ८ एवमात्मा न जानीते क्व गमिष्ये कुतस्त्वहं अन्यो ह्यत्रांतरात्मा
स्ति यः सर्वमनुपश्यति ९ ज्ञानदीपेन दीप्तेन पश्यत्यात्मानमात्मना दृष्ट्वा त्वमात्मनात्मानं निरात्मा भव सर्ववित् १०
विमुक्तः सर्वपापेभ्यो मुक्तत्वच इवोरगः परां बुद्धिमवाप्येह विपाप्मा विगतज्वरः ११ सर्वतः स्रोतसं घोरां नदीं लोकप्रवा
हिनीं पंचेंद्रियग्राहवतीं मनःसंकल्परोधसं १२ लोभमोहतृणच्छन्नां कामक्रोधसरीसृपां सत्यतीर्थानृतक्षोभां
क्रोधपंकां सरिद्वरां १५ अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलां १६ संसा
रसागरगमां योनिपातालदुस्तरां आत्मजन्मोद्भवां तात जिह्वावर्त्तां दुरासदां १७ यां तरंति कृतप्रज्ञा धृतिमंतो मनीषि
णः तां तीर्णः सर्वतो मुक्तो विधूतात्मात्मविच्छुचिः १८

किंसुखवान् ११ स्रोतसं अनेकधा प्रवहंतीं नदीं संसारनदीं लोकान्वाहयंतीं रोधः तीरः १३ बुद्ध्या ज्ञानेन १६ योनिवासिना १८ ॥ ॥ ॥

नी२

मो० ब्रह्मभूयानब्रह्मैव १९ भूतानि अज्ञानिनिशामय पश्य पर्वतस्थो ज्ञानपर्वतारूढः यथोक्तं प्रज्ञाप्रासादमारुह्य शोच्यः शोचतो जनान् भूमिष्ठानिव शै
२३० लस्थः सर्वान्प्राज्ञोनुपश्यतीति २१ सर्वे योगेन अज्ञानेदीनतरणारूपं २५ नैवेति पुमानस्त्रनद्ब्रह्मस्त्र्यादिरूपेणानवेदनामरूपप्रपंचत्वात् भूतभव्ययोर्तव

उत्तमांबुद्धिमास्थायब्रह्मभूयान्भविष्यसि संतीर्णःसर्वसंसारात्प्रसन्नात्माविकल्मषः १९ भूमिष्ठानीवभूता
निपर्वतस्थोनिशामय अक्रुध्यन्नप्रहृष्यंश्चनन्नृशंसमतिस्तथा २० ततोद्रक्ष्यसिसर्वेषांभूतानांप्रभवाप्ययौ
एवंवैसर्वभूतेभ्योविशिष्टंमेनिरेबुधाः धर्मंधर्मभृतांश्रेष्ठामुनयस्तत्त्वदर्शिनः २३ आत्मनोव्यापिनोज्ञानमिदं
पुत्रानुशासनं प्रयतायप्रवक्तव्यंहितायानुगतायच २४ आत्मज्ञानमिदंगुह्यंसर्वगुह्यतमंमहत् अब्रुवंयद
हंतातआत्मसाक्षिकमंजसा २५ नैवस्त्रीनपुमानेतन्नैवचेदंनपुंसकं अदुःखमसुखंब्रह्मभूतभव्यभवात्म
कं २६ नैतज्ज्ञात्वापुमान्स्त्रीवापुनर्भवमवाप्नुते अभवप्रतिपत्त्यर्थमेतद्धर्मंविधीयते २७ ॥ ॥ ॥

उत्पत्तिःकारणंतदात्मकं २६ अभवोनुत्पत्तिरात्मातस्यप्रतिपत्त्यर्थमयंतद्धर्मस्ययोगधर्मः २७ ॥——॥ ॥ ॥ राम०
२३०

यद्यपि तंत्रभेदेन जगदुत्पत्तिप्रकाराभिधेनेन तत्पापिशमादिसंपन्नस्य सर्वधर्मास्पर्शिसुखावस्थासदृशं सुखदुःखसंपर्कशून्यतया ऽवस्थानं मुक्तिरि
तिसर्वज्ञादिसंमतो वादिनः देहनाशो वा शून्यभावो वा दुःखनाशो वा लिंगभंगो वा ऽविद्यानिवृत्तिर्वा स्वरूपप्रतिष्ठा चितिशक्तिर्वा [illegible]
[illegible] परमानंदावाप्तिर्वेति शब्दतरंगविकल्पयंतितदेतदभिसंधायाह यथेति यथा सर्वाणि मतानि येन प्रकारेण मुक्तौ पर्यवस्यंतीति तेनैव प्रकारेणान
दीयान्येतानि वचांसि मुक्तौ पर्यवस्यंतीति मपाय यात यथेति भाव प्रधानो निर्देशः यथात्वेनैव कथितानि त्वया हे पुत्र तानि मतानि भवंति फलतोऽपि

यथा मतानि सर्वाणि तथैतानि यथा तथा कथितानि मया पुत्र भवंति न भवंति च २८ तत्प्रीतियुक्तेन गुणान्वितेन पु
त्रेण सत्पुत्रदमान्वितेन पृष्टो हि संप्रीतिमता यथार्थं ब्रूयात्सुतस्येह यदुक्तमेतत् २९ शांतो मोक्षधर्मेषु मुक्तानुप्रश्ने
व्यास उवाच गंधान्रसान्नानुरुध्यात्सुखं वा नालंकारांश्चाप्नुयात्तस्य तस्य मानं च कीर्तिं च यशश्च नेच्छेत्स वै प्र
चारः पश्यतो ब्राह्मणस्य १

रोधाभावात् न भवंति च निर्वक्तुमशक्यत्वात् तस्मात्सैवैरपि तांत्रिकैरिदं शास्त्रमुपादेयमिति सिद्धं २८ तदिति तस्माद्युक्तविशेषणावता
ऽधिकारिणा पृष्टो गुरुः प्रीतिपूर्वकमिदं वदेदित्यर्थः २९ चतुःसप्ततितमः ॥ ॥ गंधान्रसानित्यादित्र्यध्यायः साधनविधानार्थं जीव
न्मुक्तलक्षणाख्यापनार्थं च नानुरुंध्यात् नानुसरेन्नापि तस्य तस्य गंधादेः अलंकारान् वर्जनानि च प्राप्नुयात् गंधादिरागद्वेषेण कार्यो किं
तु उदासीनैर्वेत्यर्थः प्रचारः व्यवहारः पश्यतो विदुषः १ १

द्विजः मुख्यो ब्राह्मणः १ कस्तर्हि द्विज इत्यत आह ज्ञातिवदिति योऽध्यापाल्लुब्रह्मविन्मर एव वेदवित्तापरश्च अकामश्च आत्मज्ञानेन तृप्तः जातु कदाचिन्ना[illegible]ध्येत
त पापं च क्षतिः योऽकामो निष्काम आप्तकामः स्यात्तस्य प्राणा उत्क्रामंत्यत्रैव समवनीयंते ब्रह्मैव सन् ब्रह्माप्येतीति तेन कामत्वेन द्विजो नेति न च किंतु द्विज

सर्वान्वेदानधीयीत शुश्रूषुर्ब्रह्मचर्यवान् ऋचो यजूंषि सामानि यो वेद न स वै द्विजः १ ज्ञातिवत्सर्वभूतानां सर्ववित्स्व
र्ववेदवित् नाकामो म्रियते जातु न तेन न च वै द्विजः ३ इष्टीश्च विविधाः प्राप्य क्रतूंश्चैवाप्तदक्षिणान् प्राप्नोति नैव
ब्राह्मण्यमविधानात्कथंचन ४ यदा चायं न बिभेति यदा चास्मान्न बिभ्यति यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ५
यदा न कुरुते भावं सर्वभूतेषु पापकं कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ६ कामबंधनमेवैकं नान्यदस्तीह बंधनं
कामबंधनमुक्तो हि ब्रह्मभूयाय कल्पते ७ कामतो मुच्यमानस्तु धूम्राभ्रादिव चंद्रमाः विरजाः कालमाकांक्ष
न् धीरो धैर्येण वर्त्तते ८ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांति
माप्नोति न कामकामः ९

एव योनिर्द्वंद्वः सकामश्च नासौ वेदविन्न ब्राह्मणश्चेति भावः २ अविधानात्तद्यानैष्काम्ययोरननुसरणात् ४ एतदेव विवृणोति यदेत्यादिना ८ समु
द्रेऽन्या आप इव यत्र पुंसि कामा लीयंते स मोक्षभाक् न तु कामकामो विषयाभिलाषी ९

तेषांसर्वेषुलोकेषु कामचारोभवतीति श्रुतेर्ब्रह्मविदेवपराकामः नतत्वन्य इत्याहादीनसइतिसः विद्वान्कामैः संकल्पमात्रोपनतैः कांतोमनोहरः नतुकामकामः स्व
र्गाधर्षीकृतः सवाइति। ~~स्वर्गधर्षीकृतःसकामी~~। स्वर्गप्राप्यसंयोगावियोगातोइतिनियमेनततोन्यस्य तइतिभावः १० उपनिषद्रहस्यं। सत्यंहितकरंवाक्यं।
उत्तरोत्तरंभावेपूर्वपूर्वस्यपमितत्वर्थः ११ स्वर्गः गुणाब्रह्मभावः शमोनिर्गुणाब्रह्मभावः १२ क्लेदनमितिसंतोषात्। हेतोस्सत्वंवुद्धिप्रसादेइष्टसिद्ध्येत। पंच
मलकारोपांरागद्वेषसत्वंशांतिलक्षणंमोक्षस्यसूचकं। कीदृशंसत्वं स्यपासहशोकमनसोः संशयोवात्रमनः शब्दार्थः संतापंसंताप्यक्लेदनंविक्लित्ति

सकामकांतोनतुकामकामः सवैकामात्स्वर्गमुपैतिदेही १० वेदस्योपनिषत्सत्यंसत्यस्योपनिषद्दमः दमस्यो
पनिषद्दानंदानस्योपनिषत्तपः ११ तपसोपनिषत्त्यागस्त्यागस्योपनिषत्सुखं सुखस्योपनिषत्स्वर्गः स्वर्गस्योप
निषच्छमः १२ क्लेदनंशोकतमसोः संतापंतस्यपासह सत्वमिच्छसिसंतोषाच्छांतिलक्षणमुत्तमं १३ विशो
कोनिर्ममःशांतः प्रसन्नात्माविमत्सरः षड्भिर्लक्षणवानेतैः समग्रः पुनरेष्यते १४ षड्भिः सत्वगुणोपेतैः प्राज्ञै
रधिगतंत्रिभिः येविदुः प्रेत्यचात्मानमिहस्थंतंगुणंविदुः १५

कारणंतंडुलस्येवपाचकमित्यर्थः संतापमितिरागमूलंतं १३ षड्भिः संतोषसहितैः विशोकत्वादिभिः समग्रोज्ञानतत्सः १४ एवंमुक्तलक्षणामुक्तामु
क्तिसाधनमाह षड्भिरितिफलभूतत्वात्सुखस्वर्गवर्जपूर्वोक्तैः सत्यदमदानतपस्त्यागशमाख्यैरुपनिषत्संज्ञैः सत्यादिषुराजसतामसत्वेप्यपिसंभा
वितेत्र्यतलघ्वाद्ययेसत्वगुणोपेतैरितित्रिभिश्रवणमननिदिध्यासनैरागमानुमानानुभवैर्वाधिगतंआत्मानंइहस्थंशरीरांतस्थंप्रेत्यजीवत्वेवदे
हेदेहाभिमानाघ्युत्थापयेविदुः ज्ञानीयुस्तेतंगुणंपूर्वोक्तमुक्तलक्षणंविदुः प्राप्नुयुः १५

अकृत्रिमं अजन्यं अतएव असंहार्यं प्राकृतं स्वभावसिद्धं निरुपस्कृतं गुणाधानमलापकर्षणात्मकसंस्कारहीनं अध्यात्मं आत्मनि देहे सुकृतं ब्रह्म तस्माज्जन्मसुकृतमुच्यत इति श्रुतिप्रसिद्धं प्राज्ञः सुखमव्ययमश्नुते । यद्वा अध्यात्मं ग्रंथं यः प्राज्ञः सोपि ध्यानादिक्रमेणाव्ययं सुखमश्नुते ग्रंथोपि उपनिषद्रूपेति सत्वादकृत्रिमत्वमसंहार्यत्वं चाप्राकृतं वाक्यार्पमयीदास्वरसतोर्थमन्यापकं निरुपस्कृतं द्वैतिनानिवहठनाकृष्टार्थं परिणतेन परोक्ष

अकृत्रिममसंहार्यं प्राकृतं निरुपस्कृतं अध्यात्मं सुकृतं प्राज्ञः सुखमव्ययमश्नुते १६ निःप्रचारं मनः कृत्वा प्रतिष्ठाप्य च सर्वशः यामयं लभते तुष्टिं सा न शक्यात्मनोन्यथा १७ येन तृप्यत्यभुंजानो येन तृप्यत्यवित्तवान् येनास्नेहो बलं धत्ते यस्तं वेद स वेदवित् १८ संगुह्यात्मनो द्वाराण्यपिधाय विचिंतयन् यो ह्यास्ते ब्राह्मणः शिष्टः स आत्मरतिरुच्यते १९ समाहितं परे तत्वे क्षीणकाममवस्थितं सर्वतः सुखमन्वेति वपुश्चांद्रमसं यथा २० ॥ ॥ ॥

ज्ञानस्यापि पुराणपद्ध्विहितं तत्पाकमम्यन्यर्पत्वमुक्तं तथा च स्मृतिः दिने दिने तु वेदांतश्रवणाद्भक्तिसंयुतात् । गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेदिति १६ न केवलं शास्त्रीयज्ञानमात्रान्मुक्तिः किंतु साधनांतरापेक्षाप्यस्तीत्याह निष्प्रचारमिति अन्यथा मनोनिरोधाभावेन शक्या प्राप्तुमिति शेषः १७ येन ब्रह्मणा १८ संगुह्यानि प्रमादात्सम्यक्रक्षितानि द्वाराणि इंद्रियाणि अपिधाय निरुध्य विचिंतयन् १९ अन्वेति वर्द्धते २० ॥

अविशेषाणीति। विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणीति योगोक्तेषु गुणावयवेषु विशेषाः स्थूल पृथिव्यादयः एकादशेंद्रियाणि च। अवि
शेषाः पंचतन्मात्राणि बुद्धिश्च। लिंगमात्रं महत्तत्वं। अलिंगं प्रधानं। तत्र पूर्वं त्यागेन उत्तरमुत्तरं प्रति प्रघमानो योगी गुणानपि त्यजति। तत्राविशेषाणि
भूतानीति पंचतन्मात्राणि इति महद्व्यक्तेश्चाहंतामुनेः त्यजतामुनिना दुःखं संसाराख्यं अपोह्यते। सविशेषाणीति पाठे भूतशब्देन पंचतन्मात्राणि पंचस्व

अविशेषाणि भूतानि गुणांश्च जहतो मुनेः सुखेनापोह्यते दुःखं भास्करेणा तमो यथा २१ तमतिक्रांतकर्माणमति
क्रांतगुणक्षयं ब्राह्मणं विषयाश्लिष्टं जरामृत्यू न विंदतः २२ सपदा सर्वतो मुक्तः समः पर्यवतिष्ठते इंद्रियाणींद्रि
यार्थांश्च शरीरस्थोऽतिवर्त्तते २३ कारणं परमं प्राप्य अतिक्रांतस्य कार्यतां पुनरावर्त्तनं नास्ति संप्राप्तस्य परं पदं २४
शांतौ मोक्षधर्मेषु शुकानुप्रश्ने॥ ॥ व्यास उवाच द्वंद्वानि मोक्षजिज्ञासुरर्थधर्मावनुष्ठितः वक्त्रा गुणवता शिष्यः
श्राव्यः पूर्वमिदं महत् १ ॥

कार्यस्थूलभूतसहितानीत्यर्थः २१ अतिक्रांतं बाधितं गुणक्षयं गुणैः खं यं येन तं। विषयैरश्लिष्टं २२ मुक्तः विरक्तः समः रागद्वेषशून्यः पर्यवतिष्ठते
स्थिरो भवति शरीरस्थो जीवन्नेव सर्वोपाधीन् अतिक्रम्य वर्त्तते २३ कारणं निर्गुणं ब्रह्म। कार्यतां अव्यक्ततां २४ पंचसप्ततितमः॥ ॥ विस्तरेणो
क्तमध्यात्मं सुखसंग्रहार्थं संक्षिपति द्वंद्वानीत्यादिना ऽध्यायेन द्वंद्वानि मानापमानादीनि अर्थधर्मौ चाधिष्ठितोऽपि पुरुषो यदि मोक्षार्थी स्यात्त
र्हि स इदं महदध्यात्मं श्राव्यः १

म्रुतेषु उत्तरापुत्राद्दिषु पंचसु पंचात्मकेषु सत्सु तेन भावाभावकालानामपि भौतिकत्वमुक्तं ननु पंचभ्यो भूतेभ्यो ऽधिकानि काल दिगात्ममनांसि चत्वारि द्व्यासि गुणाश्च चतुर्विंशतिः कर्मसामान्यविशेषसमवायाश्च भावपदार्थाः सप्तमो भावपदार्थ इति कारणादामनंतेतत्कथं सर्वस्य पंचात्मकत्वं प्रति सापत इति चेत् अत्रोच्यते नतावत्कालो नाम पदार्थांतरमतीतानागतत्वादिव्यवहारहेतुः किंचिदस्तिन् तननवपुराणत्वादिवतद्व्यगताभिरेवातीत त्वाद्यवस्थाभिस्तादृग्व्यवहारोपपत्तेः नापि दिक् आकाशस्य वसूर्यपार्थिवकी प्राच्यादिकल्पनेनतुपगमात् नापि मनः तस्य इंद्रियत्वेन श्रोत्रादिवद्भ्या घसजातीगुणाश्रयत्वस्यावश्यवक्तव्यत्वेन पांचभौतिकत्वात् परामिमतमनसस्तु श्राघसजातीयगुणानाश्रयत्वेन दिक्कालवत् नइंद्रियत्वं युज्य ते गुणास्त्रपि आश्रयान्यातिरिच्यंत इति न पृथक्पदार्थः तथा द्रव्यस्यैवस्वास्यम च्युतिः परिस्पंदात्माऽवस्थाविशेषः कर्मेति न तदपि पृथक्प

आकाशं मारुतो ज्योतिरापः पृथ्वी च पंचमी भावाभावौ च कालश्च सर्वं भूतेषु पंचसु २२

८२

दार्थः तथा सत्तादिति व्यवहारविषयत्वस्य सकलस्य सामान्यादिषु सन्द्भावेप्यनवस्थादोषभयात्तेभ्यो व्यावृत्तं द्रव्यगुणकर्मस्वेवानुगतं सामा न्यमित्यप्यसत् अधिष्ठानसत्त्वेनैव सत्सदिति व्यवहारस्योपपत्तौ सत्तायां अननुगतस्यातस्यकल्पनापात्र नौचित्यात् नित्यद्रव्यवृत्तयोत्या वि शेषा इत्युपगमस्तत्स्वकात्म्येनित्यद्रव्याणामेवाभावान्निरालंबनः मानांतरासिद्धश्च समवायवत् रूपादिकमपि समवायं विनैव द्रव्यस्यास्पतीति स ति प्रागभावप्रध्वंसाभावयोस्तु सत्प्रतियोगिकत्वादेवासिद्धिः सद्भावमभावो निरूप्यत इति न्यायेन तन्निरूपकाभावात् तरमभावो हि कयाचित्तु व्यपेक्षये

एव नास्तीति युक्तमुक्तं भावाभावकालानामपि पंचात्मकत्वं २

अंतरात्मकं अवकाशात्मकं मूर्त्तिः शरीरं तस्य शास्त्रं स्वरूपप्रकाशकं विधानं वेदवाक्यं तद्वित् मूर्त्तिशास्त्रविधानवित् ३ चरणं गमनं मारुतात्मकं वायुधर्मत्वा
त्तदात्मकं ४ पाको व्राद्रेः प्रकाशो दीपादेः ज्योतिः ऊष्मा ५ क्षुद्रता अंतः प्रविश्य पार्थिवावयवसंयोगम्लापीकरणेन सूक्ष्मता ६ उत्तरेषु भूतेषु पूर्वभूतगुणाः संतिते
न शब्द एवाकाशे शब्दस्पर्शौ वायौ [illegible] शब्दस्पर्शरूपाणि तेजसि शब्दस्पर्शरूपरसाः सलिले तथैव सगंधाः पृथिव्यामिति तान्यासर्वसत्वेषु सर्वप्रा

अंतरात्मकमाकाशं तन्मयं श्रोत्रमिंद्रियं तस्य शब्दं गुणं विद्यान्मूर्त्तिशास्त्रविधानवित् ३ चरणं मारुतात्मेति प्राणापानौ च तन्मयौ
स्पर्शनं चेंद्रियं विद्यात्तथा स्पर्शं च तन्मयं ४ तापः पाकः प्रकाशश्च ज्योतिश्चक्षुश्च पंचमं तस्य रूपं गुणं विद्यात्ताम्रगौरासिता
त्मकं ५ प्रक्लेदः क्षुद्रता स्नेह इत्यपामुपदिश्यते असृङ्मज्जा च पश्चान्मात्स्निग्धं विद्यात्तदात्मकं ६ रसनं चेंद्रियं जिह्वा रस
श्चापां गुणो मतः संघातः पार्थिवो धातुरस्थिदंतनखानि च ७ श्मश्रुरोम च केशाश्च शिरास्नायु च चर्म च इंद्रियं घ्राणसंज्ञातं ना
सिके तदभिसंज्ञिता ८ गंधश्चैवेंद्रियार्थोपि पार्थिवः पृथिवीमयः उत्तरेषु गुणाः संति सर्वसत्वेषु चोत्तराः ९ पंचानां भूतसं
घानां संततिं मुनयो विदुः मनो नवममेषां तु बुद्धिस्त्कदशमी स्मृता १०

णिषु उत्तरगुणाः अविद्याकामकर्माख्यास्तथा चोक्तं तमः प्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां परः कारणतामेति भावनाज्ञानकर्मभिरिति ९ र
तैर्भावनाज्ञानकर्मभिः वाक्यशेषे दृष्टैः सह नवमं मनः १० १० १० ७ ॥ ७ ॥ ७ ॥ ७

व्यवसायात्मिकानिश्चयात्मिकाव्याकरणांसंशयः सः अनंतात्माकर्मानुमानात्सुखदुःखलिंगेनकर्मणामाश्रयत्वेनानुमेयोजीवः ११ एभिःकालंकृतत्रेताद्वापरकलिरूपोजीवःतदात्मकैःपुण्यापुण्यादिसंस्कारात्मभिःएभिःभावैर्भावनाभिःसर्वप्राणिजातंसमन्वितंयःपश्यतिस्वरूपतस्त्वकलुषमितिजानातिसःसमोहंसकामंकर्मनानुवर्त्तते। सात्वात्मतत्त्वतयानिष्कामोभवतीत्यर्थः १२ षड्सप्ततितमः एवंपंचभूतानिअविद्याकामकर्माणिमनोबुद्धीचेतिदशकंक्षेत्रंततोन्यएकादशोऽनंतात्मासचलिंगात्मैवेतिभ्रमोमाभूदितितस्यापिदशकांतर्गतत्वंसाधयतिशरीरादित्यादिनास्थूलशरीराद्विप्रमुक्तमपिशरीरिणांसूक्ष्मशरीरवं

एकादशस्त्वनंतात्मासमर्वःपरउच्यते व्यवसायात्मिकाबुद्धिर्मनोव्याकरणात्मकं कर्मानुमानाद्विज्ञेयःसजीवःक्षेत्रसंज्ञकः
११ एभिःकालात्मकैर्भावैर्यःसर्वैःसर्वमन्वितं पश्यत्यकलुषंकर्मसमोहंनानुवर्त्तते १२ शांतौमोक्षधर्मेषुशुकानुप्रश्ने॥ ॥
व्यासउवाच शरीराद्विप्रयुक्तंहिसूक्ष्मभूतंशरीरिणां कर्मभिःपरिपश्यंतिशास्त्रोक्तैःशास्त्रवेदिनः १ यथामरीच्यःसहिताश्चरंतिसर्वत्रतिष्ठंतिचदृश्यमानाः देहैर्विमुक्ताविचरंतिलोकांस्तथैवसत्वान्यतिमानुषाणि २ २ ॥ ॥ ॥

तंअंतरएवसूक्ष्मभूतंदुर्लक्ष्यंशास्त्रोक्तैःकर्मभिःयोगानुष्ठानैःपश्यंतिशास्त्रज्ञायोगिनःलिंगात्मानंसमाधौसाक्षात्कुर्वंतीत्यर्थः १ लिंगदेहसत्वेविद्वदनुभवंप्रमाणमुक्त्वायुक्तिमप्याहयथेतियथागगनोदरेसूर्यमरीचिकानिविडाःसंत्योपिस्थूलदृष्ट्यानगृह्यंतेगुरूक्तयुक्त्यातुदृश्यमानाःतारएवातिविस्पष्टंगृह्यंतेतथादेहैःस्थूलैःरहितानिसत्वानिस्थूलदृष्ट्यानदृश्यंतइत्यर्थः लोकान्चरंतीतिशत्रंतं २ २ ॥

प्रतिरूपंप्रत्युपाधिःसूर्यस्यतापो रश्मिमंडलंचसुलक्ष्यते। एवंसत्ववत्सूक्ष्मजीवदेहेषुसत्वंसत्वप्रधानंलिंगंप्रतिरूपंप्रतिव्यक्तिसः योगीपश्यति ३ एतदेवा
हतानीति ४ सर्वेषांयोगयोगिनांयोगंयुंजतांसत्वात्मालिंगदेहः वशेतिष्ठति यथेष्टंपरशरीरप्रवेशादावपियोग्योभवति आत्मतिचिंतितंकल्पितं
कर्मजंरजःकामादिव्यसनंजहतां।प्रधानस्यजगत्कारणस्यअद्वेषंअष्टयग्भावस्तादात्म्यंयोगेष्वयंतितोपिमुक्तानांसर्वास्ववस्थासुसर्वकाले

प्रतिरूपंयथैवाप्सुतापः सूर्यस्यलक्ष्यते सत्ववत्सुतथासत्वंप्रतिरूपंसपश्यति ३ तानिसूक्ष्माणिसत्वानिविमुक्तानिशरीर
जः स्वेनसत्वेनसत्वज्ञाः पश्यंतिनियतेंद्रियाः ४ स्वपतांजाग्रतांचैवसर्वेषामात्मचिंतितं प्रधानाद्वेषमुक्तानांजहतांकर्म
जंरजः ५ यथाहनितथारात्रौयथारात्रौतथाहनि वशेतिष्ठतिसत्वात्मासततंयोगयोगिनां ६ तेषांनित्यंसदानित्योभूतात्मा
सततंगुणैः सप्तभिरन्वितः सूक्ष्मैश्चरिष्णुरजरामरः ७ मनोबुद्धिपराभूतःस्वदेहपरदेहवित् स्वप्नेष्वपिभवत्येषविज्ञा
तासुखदुःखयोः ८

षुचयोगिनांलिंगदेहोवशेस्तीतिद्वयोःसंबंधः ६ तेषामितितेषांयोगिनांभूतात्माजीवः सततंसर्वदासूक्ष्मैःसप्तभिर्गुणैर्गुणाकार्यैर्महदहंकारपं
चतन्मात्राख्यैर्युतःनित्यंचरिष्णुरिंद्रादिलोकेषुसंचरणशीलः सदाऽनित्यःकालत्रयेपिमिथ्यात्वादनित्योवाधितोव्यवहारतोऽजरामरश्चभवति ७ स
वैयोगिनांसूक्ष्मदेहापरोक्ष्यमुक्त्वाज्ञानमपितदस्तीत्याह। मनइति मनोबुद्धिभ्यांपराभूतोजितः स्वप्नेपिस्वदेहंचस्थूलादन्यंवेत्तीतितथा ८ ॥

१० एवं स्वप्नेइव गर्भे शयनं प्रापितश्चान्ये जठराग्न्यादिभिर्दुःखं नाप्नोति तदस्मात्तत्राग्न्यादेरभावादित्याह अहोति प्रसिद्धपमिव्यपंऊष्माजाठरोयस्तद
न्तर्गतः ११ अस्यैव दुःखे पन्नमाह तमिति तमेतं आत्मानं अतितेजाः परमेश्वरस्तस्य अंशमिवांशं ब्रह्मर्त्तिषु देहेषु १२ कथं तर्ह्यात्मप्राप्तिरत आह योगेति अनु

तत्रापि लभते दुःखं न चापि लभते सुखं क्रोधलोभौ तु तत्रापि हत्वा व्यसनमर्छति ९ प्रीणितश्चापि भवति
महतोऽपीन वाप्यहि करोति पुरायं तत्रापि जीवन्निव च पश्यति १० अहोऽष्मान्तर्गतश्चापि गर्भत्वं समुपयिवान् दशमा
सान्वसन्कुक्षौ नैषोच्चामिव जीर्यते ११ तमेतमिति तेजोंऽशंभूतात्मानं हृदि स्थितं तमोरजोभ्यामाविष्टा नानुपश्यंति
ब्रह्मर्त्तिषु १२ योगशास्त्रपराभूत्वा तमात्मानं परीप्सवः अनुछ्वासान्यमूर्त्तानि यानि वज्रोपमान्यपि १३ ॥

छ्वासानि अचेतनानि स्थूलशरीराणि अमूर्त्तानि सूक्ष्मशरीराणि वज्रोपमानि ब्राह्मप्रलयेप्यविनाशीनि कारणशरीराणि अतिक्रामंतीति शेषः
केतं आत्मानं ये परीप्सवः प्राप्तुमिच्छवो भवंति योगेन देहत्रयमुल्लंघयतत्मात्मप्राप्तिरित्यर्थः १३ ॥ ॥

आश्रमकर्मसु कर्मछिद्रेषु एतत्समदुक्तं वाक्यं योगं योगप्रधानं शांडिल्यो मुनिरब्रवीत् कीदृशं योगं समाधौ शमं समाधिकालीनं कारणाभावात्परभूतं शमं सर्वहेतूपशमात्मकं तत्र सन्यासिनो ध्यानापरिरव सन्यासः इतरेषामाश्रमिणामपि कर्मछिद्रेषु ध्यानं विहितमेवेत्यर्थः सोयं शमः छांदोग्ये शांडिल्यब्राह्मणे सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेत्यादिना विहितः तत्र ब्रह्मणः सर्वं जायते तत्रैव लीयते तेनैव चानिति चेष्टते चेति तज्जलानिति हेतोः यतः सर्वं ब्रह्म ततः उत्पन्नमतो ब्रह्मैव चात्र तस्मै कस्मैचिद् शिल्वि नराग द्वेषादिशून्यतया शांतो भूत्वा उपासीतेत्यर्थः १७ उपसं

पृथग्भूतेषु सृष्टेषु चतुर्ष्वाश्रमकर्मसु समाधौ योगमेवैतत् शांडिल्यः शममब्रवीत् १७ विदित्वा सप्त सूक्ष्माणि षडंगं च महेश्वरं प्रधानविनियोगस्थः परं ब्रह्मानुपश्यति १८ शांतो मोक्षधर्मेषु मुकानुप्रेक्षा॥

हरति विदित्वेति सप्त सूक्ष्माणि इंद्रियार्थमनोबुद्धिमहत्तत्त्वाव्यक्तपुरुषान् शास्त्रतो विदित्वा षडंगं महेश्वरं जगत्कारणं योगबलेन विदित्वा षडंगानि तु सर्वज्ञतातृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तदृष्टिः अनंतशक्तिश्च विभोर्विमुक्ताः षडाहुरंगानि महेश्वरस्येति वायुपुराणोक्तानि प्रधानं त्रिगुणात्मकमज्ञानं तस्य विनियोगो विपरिणाम इदं जगदिति जानन् परं ब्रह्म शास्त्राग्न्यस्थानीयादीश्वरादांतरं चद्रस्थानीयं चानुगुरुवेदवाक्यमनुध्यानेन पश्यति साक्षात्करोति १८ सप्तसप्ततितमः॥

एवमध्यायद्वयेनस्थूलसूक्ष्मशरीराभ्यामात्मानंविविच्यमूलाज्ञानादपितंविवेक्तुमारभतेहृदीतिहृदयक्षेत्रेमोहोवैचित्यंतदेवसंचयोबीजमस्यविधित्साक
र्तुमिच्छापरिषिच्यतेऽस्मिन्निति परिषेचनंआलवालं १ आधारःमूलंपरिषिच्यतेनेनेतिपरिषेचनंजलं २ तत्फलंरम्यादितदिच्छवः आयसैःलोहमयव
द्धैःपाशैःबंधकैःशरीरैःवासनाभिर्वा ४ वासनाजित्वाकामंअपकर्षतिनिकृंततिदुःखयाःसदुःखयाःवैषयिकसुखमपिदुःखमेवेतिमत्वादुःखयारिसु

व्यासउवाच हृदिकामद्रुमश्चित्रोमोहसंचयसंभवः क्रोधमानमहास्कंधोविधित्सापरिषेचनः १ तस्यचाज्ञा
नमाधारःप्रमादःपरिषेचनं सोभ्यसूयापलाशोहिपुरादुष्कृतसारवान् २ संमोहचिंताविटपःशोकशाखोभ
यांकुरः मोहनीभिःपिपासाभिर्लताभिरनुवेष्टितः ३ उपासतेमहावृक्षंसुलुब्धास्तत्फलेप्सवः आयसैःसंयु
ताःपाशैःफलदंपरिवेष्टितं ४ यस्तान्पाशान्वशेकृत्वातंवृक्षमपकर्षति गतःसदुःखयोरंतंयतमानस्तयो
र्द्वयोः ५ संरोहत्यकृतप्रज्ञःसदायेनहिपादपं सतमेवततोहंतिविषग्रंथिरिवातुरं ६ तस्यानुगतमूलस्यमूल
मुद्ध्रियतेबलात् योगप्रसादात्कृतिनासाम्येनपरमासिना ७

कोत्यजमानःत्यजनत्यक्तुमिच्छन्देहेनोशानन् ५ येनस्त्र्यादिनाहेतुनातंकामपादपंसंरोहतिवर्द्धयतिसस्त्र्यादिस्तंवर्द्धकंहंति ६ मूलंअज्ञानंसा
म्येननिर्विकल्पसमाधिनाएतेनतार्किकाणामात्मन्येनाभिमतादानंदमयाख्यादज्ञानादप्यन्यआत्मेतिकारणादपिविवेकोदर्शितः ७ ॥ ॥

वं वं वं धकलं व धमिति पोरन्माग ८ अग्निमाध्यापे विधा॑[illegible]नज्ञि वर्नसिमारं एवी का स्नानकृतं कुराजरूपके राग अहशरीरं पुरमित्यादि नुभोगायतनत्वा
त्शरीरं पुरं भोगजसुखाद्यभिमानित्वात्बुद्धिः स्वामिनी॥ तत्वबुद्धेर्निश्चयात्मिकाया बुद्धेः स्वामिन्याः अर्थचिंतकं अमात्यस्थानीयं मनः विचारयत्वात्बुद्धेर्भोगा
र्थे विषयधनमर्पयंतो इंद्रियाणि पौराः ते च मनसा ऽमात्येन प्रवर्त्या इति मनः पौरा इत्युच्यंते॥ तदर्पयंति पाणिंद्रियपौराणां पालनार्थं मनसः पराकृतिः मूह
तो क्रियाप्रवृत्तिः परस्त्रानक्षेत्रारामादिर्दृष्टादृष्टार्थसाधिका॥ तत्र कृतौ द्वौ दोषौ रजस्तमसी रजस तामसाहंकारो दारुणो क्रियाफलमन्यथयंतो
चित्तामात्यस्य कालुष्यं कुर्वतो॥ तमेवार्थं क्रियाफलं सुखदुःखं मनसा ऽमात्येन सदोषेणाभिनिमित्तं पौरा उपजीवंति अर्पयंति पुरस्वैरैः मनो बुद्ध्यहंका

एवं यो वेद कामस्य केवलस्यातिवर्त्तनं वं वं वै कामशास्त्रस्य सदुःखान्यतिवर्त्तते शरीरं पुरमित्याहुः स्वामिनी बुद्धिरिष्यते
तत्व बुद्धेः शरीरस्थं मनोनामार्थचिंतकं ८ इंद्रियार्थं मनःपौरास्तदर्थं तु पराकृतिः तत्र द्वौ दारुणौ दोषौ तमो नाम रजस्तथा
९ तदर्थमुपजीवंति पौराः सह पुरस्वैरैः अद्वारेणा तमेवार्थं द्वौ दोषा वुपजीवतः तत्र बुद्धिर्हि दुर्धर्षा मनः सामान्यमुच्यते ॥

रैः सह १० एवं सति अद्वारेणा अविहितेन निषिद्धेन च मार्गेणा पारदार्यादिना राजसतामसाहंकारौ कर्त्तारौ तं सुखादिरूपमर्थमुपजीवतः॥ तत्र एवं
सति दुर्द्धर्षापि बुद्धिः सुहृत्सत्वसमयत्वेन रजस्तमसोर्वशत्वात्सापि दोषकलुषिते न मनसा सह समानत्वं भजते मनसः प्रधानत्वात् एवं बुद्धिरपि सदोष
त्वेन यथा धर्ममधर्मं च कार्यं चाकार्यं भेवचा अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ अधर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्विपरीतांश्च बुद्धिः सा
पार्थ तामसीति भगवदुक्त रूपवती भवति ॥

स्ता३

तत्तोपि किं स्यादित्यत आह पौरा इति दुष्टे मनसि इंद्रियाण्यपि दुष्टानि भूत्वा न क्वचित्स्थैर्यं लभंते। एवं बुद्धिरपि दुष्टा सती यदर्थं यमर्थं धनपुत्रादिकं हि
तमिति अध्यवस्यति स एवानर्थो दुःखदायी भूत्वा परिसीदति नश्यति १२ नष्टोप्यर्थो दुःखदः स्यादित्याह यदिति। यत्र बुद्धिसहितं मनः अर्थनाशाद्दूष्यं च अध्यास्ते स्म
रति तत्र मनोपि परिसीदति। मनसो[..]पेण बुद्धिरपि तप्यत इत्यर्थः १३ बुद्धिमनसोरनात्मनो स्तापे आत्मनः किं न स्यादत आह। द्वैनतत्रेति। एनमात्मानं तत्र बु
द्धौ विधृतं प्रतिविंबरूपेण आस्थापितं रजः बुद्धिगतो रजोगुणः दुःखैकफलदः पर्यवतिष्ठते व्याप्नोति तथा च बुद्धिधर्माः परिच्छेदपरितापा[..]दयस्तद्रूपहिते

पौराश्चापि मनस्तस्मात्तेषामपि चलास्थितिः यदर्थं बुद्धिरध्यास्ते सोनर्थः परिसीदति १२ यदर्थं पृथगध्यास्ते
मनस्तत्परिसीदति पृथग्भूतं मनो बुध्या मनो भवति केवलं १३ तत्रैनं विधृतं भूत्वा रजः पर्यवतिष्ठते तन्मनः कुरुते
सत्वं रजसा सह संगतं तं चादाय जनं पौरं रजसे संप्रयच्छति १४ शांतौ मोक्षधर्मेषु शुकानुप्रश्ने॥ ॥ ॥

तं२

आत्मनि भांतीत्यर्थः बुद्धेर्गुणेनात्मगुणेनैव ह्यारान्नमात्रो ह्यवरोपि दृष्टः सुधीः स्वप्नो भूत्वा ध्यायतीव [..] लेलायतीवेत्यादिश्रुतिभ्यः तैर्बुद्धिगुणै
रात्मापि तप्यत एवेति फलितमाह तदिति। तत्तस्माद्धेतोः मनः रजसा सह सत्वं कुरुते प्रवृत्तमुन्मुखं भवतीत्यर्थः ततः किमत आह संगतं मन उपाधिकं तं आत्मानं पौ
रजनं इंद्रियाणि चादाय स्ववशे कृत्वा मनः कर्तृ रजसे रजःफलाय दुःखाय प्रयच्छति यथा दुष्टामात्यो राजानं पौरंजनं च स्वाधीनं कृत्वा शत्रवेऽर्पयति तद्वद्रजसे
न मनसा आत्मा बुद्धिरिंद्रियाणि च बद्धानीत्यर्थः १४ अष्टसप्ततितमः॥ ॥

एवंप्रसृतस्यबंधस्यमोक्षार्थंव्यासेनोक्तमुपायंवक्तुंप्रतिजानीतेभीष्मः भूतानामिति चिदात्मोपाधिभूतानांखवादीनांपरिसंख्यानंनिर्द्धारणंभूयइतिप्रागुक्तमेवाध्या त्मंपुनः श्लाघयाधन्योहमीदृशमध्यात्मंज्ञातवानितिबुद्ध्यानिशामयशृणु १ दीप्तेतितत्रअंशेनेनअनावृतोवह्निनिभः आवृतोधूमतुल्यः निदर्शनंनिश्चितं शास्त्रंअज्ञानापनोदकं २ एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुत्याब्रह्मणिनिषिद्धानांचतुर्विधपरिमाणादिगु णानांमाश्रयोभूतान्येवेत्यात्मनोनिर्गुणत्वसिद्ध्यर्थंभूम्यादिगुणान्विभजतेभूमेरितिस्थैर्यमचांचल्यंगुरुत्वंपतनप्रतियोगिगुणः प्रसवोध्यानाद्युत्पत्तिस्तद

५ धान्याद्युपत्तिः

भीष्मउवाच भूतानांपरिसंख्यानंभूयः पुत्रनिशामय द्वैपायनमुखाद्भ्रष्टंश्लाघयापरयानघ १ दीप्तानलनिभः
प्राहभगवान्धूमवर्चसे ततोहमपिवक्ष्यामिभूयः पुत्रनिदर्शनं २ भूमेः स्थैर्यंगुरुत्वंचकाठिन्यंप्रसवार्थता गंधो
गुरुत्वंशक्तिश्चसंघातस्थापनाधृतिः ३ अपांशैत्यंतथाक्लेदोद्रवत्वंस्नेहसौम्यता जिह्वानिस्यंदनंचापिभौमा
नांश्रपणंतथा ४ ॥

र्थता गुरुत्वंप्रपमानतापिंडस्थितिः शक्तिर्गंधग्रहणसामर्थ्यंसंघातः श्लिष्टावयवत्वंस्थापनामनुष्याद्याश्रयत्वंधृतिः पांचभौतिकेमनसियोधृत्यंशः सपार्थिवः [illegible] स्थैर्यशब्देनैवोपात्तइतिधृतिशब्देनात्रभूतांतरप्रवेशस्थापनत्वमुच्यते ३ जिह्वारसनेंद्रियंविस्यंदनंप्रस्रवणंचान्नहिमक रकादिरूपेणसंघातश्चभौमानांतंदुलादीनांश्रपणंपाचनं ४ ॥ ॥ ॥

ज्योतिर्ज्वलनकर्मा लघुशीघ्रगामित्वं ५ अनियमस्पर्शो अनुष्णाशीतस्पर्शः वा दर्स्पानं वागिंद्रिय पगोलकानि। स्वतंत्रनामनादौ मोक्षोमूत्रादेः कर्म उत्क्षेपणादि। चेष्टाश्वासप्रश्वासादिः आत्मता प्राणरूपेण चिदुपाधित्वं आमेवाजन्मरेणा ६ अनाश्रयं आश्रयत्वाभावः अनालंबनं आश्रयांतरशून्यत्वं। अव्यक्तं रूपस्पर्शशून्यत्वात्। अविकारिता द्रव्यांतरानारंभकत्वं भूतत्वं श्रोत्रेंद्रियोपादानत्वात्। विकृतानि देहांतर्गतछिद्राणि। अत्र भूतत्वा विक

238

अग्नेर्दुर्द्धर्षता ज्योतिस्तापः पाकः प्रकाशत्वं शोको रागो लघुत्वं तैक्ष्ण्यं सततं चोर्ध्वभासिता ५ वायोरनियमस्पर्शो वादस्थानं स्वातंत्र्यता बलं शैघ्र्यं च मोक्षं च कर्म चेष्टात्मता भवः ६ आकाशस्य गुणाः शब्दो व्यापित्वं छिद्रता पि च अनाश्रयमनालंबमव्यक्तमविकारिता ७ अप्रतीघातिता चैव भूतत्वं विकृतानि च गुणाः पंचाशतं प्रोक्ताः पंचभूतात्मभाविताः ८ धैर्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा सदसच्चाशुता चैव मनसो नव वै गुणाः ९ ॥ ॥ ॥

तत्वाद्पो भूतांतरेपि संभवंतीति अधिकगुणत्वं तत्रास्तितथापि गुणाः पंचाशदेव पंचाशतमित्यार्षं पंचभूतात्मभाविताः पंचानां भूतानामात्मा प्राप्तिस्तु कं स्वरूपं तत्र लक्षिताः ७ धैर्यं उपपत्तिरूहापोहकौशलं व्यक्तिः स्मरणं विसर्गः विपरीतसर्गो भ्रांतिः कल्पना मनोरथवृत्तिः क्षमा प्रसिद्धा सतवैरा ग्यादि असत रागद्वेषादि आशुता अस्थिरत्वं ८

इष्टानिष्टानांवृत्तिविशेषाणांविपत्तिर्नाशः निद्रारूपावृत्तिरित्यर्थः व्यवसायः उत्साहः समाधिताचित्तस्थैर्यंनिरोधइत्यर्थः संशयः कोटिद्वय
स्थज्ञानेप्रतिपत्तिःप्रत्यक्षादिप्रमाणावृत्तिः ९ अत्रबुद्धिमनसोरेकीकृत्यशंकतेकथमितिननुमहदादीनांस्थैर्यादयोजडस्यगुणाइति

इष्टानिष्टविपत्तिश्चव्यवसायः समाधिता संशयः प्रतिपत्तिश्चबुद्धेःपंचगुणान्वि
दुः ९ युधिष्ठिरउवाच कथंपंचगुणाबुद्धिः कथंपंचेंद्रियागुणाः एतन्मेसर्वमाच
क्ष्वसूक्ष्मज्ञानेपितामह १०

युक्तं इंद्रियमनसांतुपश्यामःअहंदुःखीअहंजानामिअहमित्यात्माभेदेनप्रतीयमानानांकथमनात्मत्वं अनात्मत्वेवाकथंतद्गुणानांस्थैर्यप्रयत्नादी
नांप्रतिपत्त्यंतानांज्ञानाज्ञानरूपत्वंनहिजडानामज्ञत्वगुणाःसंभवंतीति इंद्रियागुणाःरूपादिप्रकाशाइतिबुद्धिगुणानामेवावयुत्यनुवादः १०

मो०
२३९

235

अत्रोत्तरं पदेन हृदयं मनश्चेत्यादिप्रश्नानां ब्रह्मणि तं तां श्रुतिमनुसरन्नाह आहुरिति । ननु पंचाशद्भूतगुणाः पंच बुद्धिगुणा इति पंचपंचाशद्भवंतु दशा
नुपदोक्ता बुद्धिगुणा इति पक्षे चतुःषष्टिर्वा बुद्धिगुणाः स्युरित्याशंक्याह भूतविशिष्टाः पंच भूतान्यपि बुद्धेरेव गुणाः एवं च पंचपंचाशदिति षष्टिं बुद्धिगुणा
नाहुः ते च नित्याः न चैतेभ्यो न विषक्ताः मिश्रिताः उक्तानामपि हृतो नो चिदनुवेधेनैव ज्ञानरूपत्वव्यवहार इति न कश्चिद्दोष इति भावः वृत्तिमिश्रैवेतन्मस्य
संबंधो ज्ञातव्यो श्रवन्नाम्भूदित्याशयेनाह भूतेति भूतानि पंच ज्ञानद्विभूतयश्च मनो बुद्धिश्चांसह उक्ताः षट्षष्टिरिमेकसप्तानि पदार्था नक्षरेणात्र

भीष्म उवाच आहुः षष्टिं बुद्धिगुणान्वै भूतविशिष्टान्नित्यविषक्ताः ।
भूतविभूतीश्चाक्षरसृष्टाः पुत्र न नित्यं तदिह वदंति ॥ ११ ॥

त्मगुणाः प्रशासितारस्थाने वदंति वेदाः सर्वं खल्विदं ब्रह्म तज्जलानिति स्यात्परः नन्वक्षरस्य सर्वस्रष्टृत्वे परिणामित्वं स्यादित्याशंक्याह पुत्र न नित्यं तदि
ह वदंतीति तत्र स्रष्टृत्वे अक्षरस्याक्षरत्वादपरिणामित्वादेव नित्यत्वं न यथा क्षीरस्यानित्यं दधिस्रष्टृत्वं तद्वत्त्वं किं तर्हि शुक्तिकायां रजतं प्रतीतिका
दाचित्कं दृष्टिसमसमयं चितो विश्वस्रष्टृत्वमित्यर्थः एवं च चितोऽपरिणामित्वात्तज्जं जगद्रज्जुरगवन्मृषैवेति ब्रह्माद्वैतं सिद्ध्यतीति भावः तथा
च श्रुतिः अजायमानो बहुधा विजायत इति जन्मादिभावविकारमलभमान एव बहुरूपो भवतीति श्रुत्यर्थः ॥ ११ ॥ ॥ ॥

राम०
२३९

इदमेवमहुक्तं वेदसंमतमित्याह तदिति। तत्र तस्मिन् पूर्वश्लोकोक्ते जगदुत्पत्त्यादिविषये यत्तत्त्वं तत्तु संस्थं अनागतं अनागमं वेदविरुद्धं उक्तं अन्यैर्वादिभिः
तत् चिंताकलिलं विचारतो दुःखेन यौक्तिकैरुक्तमपि युक्तिविरुद्धमेव श्रौतमेवमतं युक्तिमत्तरमित्यर्थः त्वं तु संप्रति इह लोके तत्र मदुक्तं भूतार्थस्मिति त्वासिद्ध
स ब्रह्मणस्तत्त्वं याथात्म्यं सर्वं कृत्स्नमवाप्य भूतप्रभावात् अग्रालेख्यपतितल्पल्लोपेपंचमो। तत्राप्यशांता निवृत्तिका बुद्धिर्यस्य तत्पाभव १२ इति नैल

तत्पुत्र चिंताकलिलं तदुक्तमनागतं वै तत्त्वं संप्रतीह भूतार्थतत्त्वं तदवाप्य सर्वं भूतप्रभावाद्भव शांतबुद्धिः १२ शांतौ मो
क्षधर्मेषु भुक्तानुप्रश्नाः समाप्ताः॥ ॥युधिष्ठिर उवाच य इमे पृथिवीपालाः शेरते पृथिवीतले एतन्नामध्य एते हि गतसंज्ञा म
हाबलाः १ एकैकशो भीमबला नागायुतबलास्तथा ते हि निश्चिताः संख्ये तुल्यतेजोबलैर्नरैः २ नैषां पश्यामि हंतारं
प्राणिनां संयुगे परं विक्रमेणोपसंपन्नास्तेजोबलसमन्विताः ३ अथ चेमे महाप्राज्ञाः शेरते हि गतासवः मृता इति च शब्दो
यं वर्त्तत्येषु गतासुषु ४

कंठीये भारतभावदीपे शांतौ मोक्षधर्मेषु त्रयस्त्रिंशत्तमोध्यायः॥ ॥ ननु शांतबुद्धिनैव श्रेयश्चेतत्पुरस्तात्तद्विस्मृतिरितिस्मृतेः सामरणास्वयमेव भवति किं
साधनायासेनेत्याशंक्य ग्रामात् ग्रामांतरप्राप्तिवन्मृत्युजन्मनी न तु स्वरूपनाशो द्वयोः कृतहानाकृताभ्यागमादिदोषप्रसक्तेः स्मृतिस्तु स्थूलदेहमात्र
विस्मरणपरेति तिर्यापार्यमृत्युप्रजापतिसंवादमारभते य इमे पृथिवीपाला इत्यादिना ३ वर्त्ततिवर्त्तते ४

240

कस्येति स्थूलसूक्ष्मस्य वा देहस्य आत्मन एव वेति कुतः पुरुषात् केन निमित्तेन ६ आख्यायिकामुखेन कुत इत्यस्योत्तरं तावद्दाहपुरेत्यादिना १५

इमे मत्ता नृपतयः प्राप्य शोभीमविक्रमाः तत्रैव संशयो जातः कुतः संज्ञा मृता इति ५ कस्य मृत्युः कुतो मृत्युः केन मृत्यु रिह प्रजाः हरत्यमरसंकाश तन्मे ब्रूहि पितामह ६ भीष्म उवाच पुरा कृतयुगे तात राजासीदनुकंपकः सशत्रुवशमापन्नः संग्रामे क्षीणवाहनः ७ तस्य पुत्रो हरिर्नाम नारायणसमो बले सशत्रुभिर्हतः संख्ये सबलः सपदानुगः ८ सराजा शत्रुवशगः पुत्रशोकसमन्वितः यदृच्छया शांतिपरो ददर्श भुवि नारदं ९ तस्मै स सर्वमाचष्ट यथावृत्तं जनेश्वरः शत्रुभिर्ग्रहणं संख्ये पुत्रस्य मरणं तथा १० तस्य तद्वचनं श्रुत्वा नारदोथ तपोधनः आख्यानमिदमाचष्ट पुत्रशोकापहं तदा ११ नारद उवाच राजन्शृणु समाख्यानमद्येदं बहुविस्तरं यथावृत्तं श्रुतं चैव मयेदं वसुधाधिप १२ प्रजाः सृष्ट्वा महातेजाः प्रजासर्गे पितामहः अतीव वृद्धा बहुला नामृष्यत पुनः प्रजाः १३ न ह्यंतरमभूत्किंचित्क्वचिज्जंतुभिरच्युत निरुच्छ्वासमिवोन्नद्धं त्रैलोक्यमभवन्नृप १४ तस्य चिंता समुत्पन्ना संहारं प्रति भूपते चिंतयन्नाध्यगच्छच्च संहारे तु कारणं १५ तस्य रोषान्महाराज खेभ्योग्निरुदतिष्ठत तेन सर्वा दिशो राजन्ददाह स पितामहः १६ ॥ ५१ ॥

खेभ्यः इंद्रियच्छिद्रेभ्यः १६ १६ १६ ॥ ॥ ॥ ॥ ७ ॥ ॥

खं खस्थं ग्रहनक्षत्रादि १७ ध्रुवाणि ध्रुवा द्यौर्ध्रुवा पृथिवी इत्यादि श्रुतेर्भूपृथिव्यादीनि १८ अध्वरः सूर्हिंसा यो अहिंसैव जटाइव शिरसि धार्यत्वेन मा

ततो दिवं भुवं खं च जगच्च सचराचरं ददाह पावको राजन् भगवत्कोपसंभवः १८ तत्राद[ह्यं]त भूतानि जंगमानि ध्रु
वाणि च महता क्रोधवेगेन कुपिते प्रपितामहे ततो हरिर्जटः स्थाणुर्वेदाध्वरपतिः शिवः जगाम शरणं देवं ब्रह्मा
णं परवीरहा १९ तस्मिन्नभिगते स्थाणौ प्रजानां हितकाम्यया अब्रवीत्परमो देवो ज्वलन्निव तदा शिवं २० कर
वाण्यद्य कं कामं वरार्होसि मतो मम कर्त्ता ह्यस्मि प्रियं शंभो तव यद्धृदि वर्त्तते २१ शांतौ मोक्षधर्मेषु मृत्युप्रजापतिसं
वादे॥ ॥ स्थाणुरुवाच प्रजासर्गनिमित्तं मे कार्यवत्तामिमां प्रभो विद्धि सृष्टास्त्वया हीमा मा कुप्यासां पितामह १ त
व तेजोग्निना देव प्रजा दह्यंति सर्वशः ता दृष्ट्वा मम कारुण्यं मा कुप्यासां जगत्प्रभो २ प्रजापतिरुवाच न कुप्ये न च मे
कामो न भवेयुः प्रजा इति लाघवार्थं धरण्यास्तु ततः संहार इष्यते ३ इयं हि मां सदा देवी भारार्त्ता समचोदयत् संहारा
र्थं महादेव भारेणाप्सु निमज्जती ४ यदाहं नाधिगच्छामि बुद्ध्या बहु विचारयन् संहारमासां वृद्धानां ततो मां क्रोध आवि
शत् ५ स्थाणुरुवाच संहारार्थं प्रसीदस्व मा क्रुधो विबुधेश्वर मा प्रजाः स्थावरं चैव जंगमं च व्यनीनशः ६ ॥ ॥

न्यायसस्तोध्वरजटो दयालुर्हरिजट इति पाठेऽपि हरिशब्देन तदङ्कुराः पालकत्वमालक्ष्य पूर्ववद्देवार्थः २१ अशीतितमः कार्यवत्तां अर्थित्वं मा कुप्यको
पं कुरु आसां आसु २ न भवेयुः पुनरेयुः ६ ॥

मो॰ २४१

241

उत्पन्नपात्रपित्तरणाविशेषः ९ अधिदैवे अहंकाराधिष्ठातृत्वे ११ आवृत्तिजाः प्रजायावामियाचो आवृत्त्याजाताः मृत्वामृत्वापुनर्जायन्तामित्यर्थः १२

पल्वलानि च सर्वाणि सर्वं चैव तृणोलपं स्थावरं जंगमं चैव भूतग्रामं चतुर्विधं ७ तदेतद्भस्मसाद्भूतं जगत्सर्वमुपप्लुतं प्रसीद भगवन्साधो वर एष वृतो मया ८ नष्टा न पुनरेष्यन्ति प्रजा ह्येताः कथंचन तस्मान्निवर्त्यतामेतत्तेजस्वेनैव तेजसा ९ उपायमन्यं संपश्य भूतानां हितकाम्यया यथामी जंतवः सर्वे न दह्येरन्पितामह १० अभावं हि न गच्छेयुरुच्छिन्नप्रजनाः प्रजाः अधिदैवे नियुक्तोस्मि त्वया लोकेश्वरेश्वर ११ त्वद्भवं हि जगन्नाथ जगत्स्थावरजंगमं प्रसाद्य त्वां महादेव याचाम्यावृत्तिजाः प्रजाः १२ नारद उवाच श्रुत्वा तु वचनं देवः स्थाणोर्नियतवाङ्मनाः तेजस्तत्स्वनिजग्राह पुनरेवांतरात्मनि १३ ततोग्निमुपसंगृह्य भगवाँल्लोकपूजितः प्रवृत्तिं च निवृत्तिं च कल्पयामास वै प्रभुः १४ उपसंहरतस्तस्य तमग्निं रोषजं तदा प्रादुर्बभूव विश्वेभ्यः खेभ्यो नारी महात्मनः १५ कृष्णरक्तांबरधरा कृष्णनेत्रतलांतरा दिव्यकुंडलसंपन्ना दिव्याभरणभूषिता १६ सा विनिःसृत्य वै खेभ्यो दक्षिणामाश्रिता दिशं ददृशाते च तां कन्यां देवौ विश्वेश्वरावुभौ १७ तामाहूय तदा देवो लोकानामादिरीश्वरः मृत्यो इति महीपाल जहि चेमाः प्रजा इति १८

तन्निजग्राह संहृतवान् १३ प्रवृत्तिं जन्म निवृत्तिं मरणं अनेन नात्यंतं प्रजानामुच्छेदो नात्यंतं भूमेर्भार इति दर्शितं १४ विश्वेभ्यः सर्वेभ्यः १५ उभौ ब्रह्मरुद्रौ १७

१८

राम॰ २४१

२० पाणिभ्यां अश्रूणि जग्राहाथ तोयस्य पाते युगपत्सर्वभूतक्षयो मा भूदिति भावः २१ एकाशीतितमः विनीय प्रमार्ज्य आवर्जिता ऋजुभूता ४ प्र

त्वं हि संहारबुध्या मे चिंतिता रुषितेन च तस्मात्संहर सर्वास्त्वं प्रजाः सजडपंडिताः १९ अविशेषेण चैव त्वं प्रजाः संहार
कामिनि मम त्वं हि नियोगेन श्रेयः परमवाप्स्यसि २० एवमुक्ता तु सा देवी मृत्युः कमलमालिनी प्रदध्यौ दुःखिता बाला
साश्रुपातमतीव च २१ पाणिभ्यां चैव जग्राह तान्यश्रूणि जनेश्वरः मानवानां हितार्थाय ययाचे पुनरेव ह २२ शांतौ
मोक्षधर्मेषु मृत्युप्रजापतिसंवादे नारद उवाच विनीय दुःखमबला सात्मन्येवायतेक्षणा उवाच प्रांजलिर्भूत्वा लतेव
आवर्जिता तदा १ त्वया सृष्टा कथं नारी मादृशी वद तां वर रौद्रं कर्माभिजायेत सर्वप्राणिभयंकरी २ बिभेम्यहमधर्म
स्य धर्म्यमादिश कर्म मे त्वं मां भीतामवेक्षस्व शिवेनेश्वरचक्षुषा ३ बालान्वृद्धान्वयस्थांश्च न हरेयमनागसः प्राणि
नः प्राणिनामीश नमस्तेस्तु प्रसीद मे ४ प्रियान्पुत्रान्वयस्यांश्च भ्रातॄन्मातॄः पितॄनपि अपध्यास्यंति ये देवं मृता
स्तेषां बिभेम्यहं ५ कृपणाश्रुपरिक्लेदो दहेन्मां शाश्वतीः समाः तेभ्योहं बलवद्भीता शरणं त्वामुपागता ६ यमस्य भ
वने देव यातयंते पापकर्मिणः प्रसादये त्वां वरद प्रसादं कुरु मे प्रभो ७

यान् पुत्रान् इति अस्य न हरेयमिति पूर्वेणान्वयः तत्र हेतुः ये पांसंबंधिनो मृतास्ते पदि अपध्यास्यंति शप्स्यंते तेन हि तेषां तेभ्यो बिभेम्यहं ५ बलवत् अत्यंतं ६ ७ ॥

अप्रतिश्रुत्य अनंगीकृत्य धेनुकं गोतीर्थं यांतरर्वेति १६ १७ १९ २० ॥॥

एतदिछाम्यहंकामंत्वत्तोलोकपितामह इछेयंत्वत्प्रसादार्थंतपस्तप्तुंमहेश्वर ८ पितामहउवाच मृत्योसंकल्पितामेत्वं
प्रजासंहारहेतुना गछसंहरसर्वास्त्वंप्रजामाचविचारय ९ एतदेवमवश्यंहिभवितानैतदन्यथा क्रियतामनवद्यांगिय
थोक्तंमद्वचोनघ एवमुक्तामहाबाहोमृत्युःपरपुरंजय नव्याजहारतस्थौचप्रव्हाभवदवाङ्मुखी ११ पुनःपुनरथोक्ता
सागतसत्वेवभामिनी तूष्णीमासीत्ततोदेवोदेवानामीश्वरेश्वरः १२ प्रससादकिलब्रह्मास्वयमेवात्मनात्मनि स्मयमा
नश्चलोकेशोलोकान्सर्वान्निवैक्षत १३ निवृत्तरोषेतस्मिंस्तुभगवत्यपराजिते साकन्यापजगामास्यसमीपादितिनः
श्रुतं १४ अपसृत्याप्रतिश्रुत्यप्रजासंहरणंतदा त्वरमाणाथराजेंद्रमृत्युर्धेनुकमभ्यगात् १५ सातत्रपरमंदेवीतपोचरत
दुश्चरं समाह्येकपदेतस्थौदशपद्मानिपंचच १६ तांतथाकुर्वतींतत्रतपःपरमदुश्चरं पुनरेवमहातेजाब्रह्मावचनमब्रवी
त् १७ कुरुष्वमेवचोमृत्योतदनादृत्यसत्वरा तथैवैकपदेतातपुनरन्यानिसप्तसा १८ तस्थौपद्मानिषड्द्वेचपंचचद्वेचैवमान
द भूयःपद्मायुतंतातमृगैःसहचचारसा १९ द्वेचायुतेनरश्रेष्ठवाय्वाहारामहामते पुनरेवततोराजन्मौनेमातिष्ठदुत्तमे २०

कौशिकीगंडकीनदी २२ दार्विवस्याग्निरिव २९ निगृह्यहठंकृत्वा ३१ अपध्यास्यंतीत्युक्तंतत्राहनत्वामितित्वयिदोषंनवदिष्यंतीत्यर्थः ३३ पुंरूपेति रूपं

अस्तुवर्षसहस्राणिसप्तचैकंचपार्थिव ततोजगामसाकन्याकौशिकींनृपसत्तम २१ तत्रवायुजलाहाराचचारनिय
मंपुनः ततोययौमहाभागागंगांमेरुंचकेवलं २२ तस्थौदार्विवनिश्चेष्टाप्रजानांहितकाम्यया ततोहिमवतोमूर्ध्नियत्रदे
वाःसमीजिरे २३ तत्रांगुष्ठेनराजेंद्रनिखर्वंपरंततः तस्थौपितामहंचैवतोषयामासपत्नतः २४ ततस्तामब्रवीत्तत्र
लोकानांप्रभवाव्ययः किमिदंवर्त्ततेपुत्रिक्रियतांममतद्वचः २५ ततोब्रवीत्सुनर्मात्सुभगवंतंपितामहं नहरेयंप्र
जादेवपुनश्चाहंप्रसादये २६ तामथधर्मभयान्दीतांपुनरेवप्रयाचतीं तदाब्रवीद्देवदेवोनिगृह्यैवंवचस्ततः २७
अधर्मोनास्तितेमत्तोसंपश्येमाःप्रजाःशुभे मयाह्युक्तंमत्पापाभद्रेभवितानेहकिंचन ३० धर्मःसनातनश्चत्वामिहै
वानुप्रवेक्ष्यति अहंचविबुधाश्चैवत्वद्धितेनिरताःसदा ३१ इममन्यंचतेकामंददानिमनसेप्सितं ३२ नत्वांदोषे
णपाःसंतिव्याधिसंपीडिताःप्रजाः पुरुषेषुस्वरूपेणपुरुषस्त्वंभविष्यसि स्त्रीषुस्त्रीरूपिणीचैववत्तीपेषुनपुंसके ३४

रूपंप्रतिरूपोवभूवेतिश्रुतेःसर्वेषांप्रतिरूपंब्रह्मतत्त्वंचतत्प्रभावमप्राप्तस्यनभवतीतिब्रह्मभावंप्राप्स्यसीत्यर्थः तेनचनहवाएवंविदिपापंकर्मक्रिय
तइतिश्रुतेःब्रह्मस्नायास्तेपापलेपोपिनभविष्यतीतिभावः ३४

यावद्देहपातं क्रोधवेगं धारयितुमशक्नतया हिंस्रस्य ब्रह्मनिष्ठापि नरः पतितस्तथा पापले पापि प्रसक्त इत्यभिप्रेत्याह सैवमिति ३६ कालयिष्यति मार
यिष्यति ३७ तवापि मारकत्वमस्त्वति तन्नेयाः कामक्रोधयोः प्रेरकत्वेनेत्याह सर्वेषामिति नन्वेवमपि प्रयोजकेऽपि पापसंबंधः प्रसक्त इत्याश
ङ्क्याह एवमिति एवं कुर्वन्तं त्वां प्रतिधर्मोऽपि निमित्तं तत्पाउपेष्यति प्राणिकर्मानुरोधेन कामक्रोधोत्पादनहारात्मतानिमारयतस्तवनदोषोऽस्ति यतस्त्वं तुल्य

सैवमुक्ता महाराज कृतांजलिरुवाच ह पुनरेव महात्मानं नेति देवेशमव्ययं ३५ तामब्रवीत्तदा देवो मृत्यो संहर मानवान्
अधर्मस्ते न भविता तथा ध्यास्याम्यहं शुभे ३६ यानश्रुविंदून्पतितानपश्यं ये पाणिभ्यां धारितास्ते पुरस्तात् ते व्याधयो
मानवान् घोररूपाः प्राप्ते काले कालयिष्यंति मृत्यो ३७ सर्वेषां त्वं प्राणिनामंतकाले कामक्रोधौ सहितौ योजयेथाः
एवं धर्मस्त्वामुपैष्यत्यमेयो न चाधर्मं लप्स्यसे तुल्यवृत्तिः ३८ एवं धर्मं पालयिष्यस्यथो त्वं न चात्मानं मज्जयिष्यसि धर्मे
तस्मात्कामं रोचयाभ्यागतं त्वं संयोज्याथो संहरस्वेह जंतून् ३९ सा वै तदा मृत्युसंज्ञापदेशाद्भीता शापाद्वाढमित्यब्रवीत्
तं अथो प्राणान्प्राणिनामंतकाले कामक्रोधौ प्राप्य निर्मोह्य हंति ४०

वृत्तिः रागद्वेषमूलत्वोऽसि तथा च सूचितं वैषम्यनैर्घृण्ये न सापेक्षत्वादिति परमेश्वरस्य विषमां सृष्टिं कुर्वतो वैषम्यादिदोषो नास्ति कुतः तत्तत्प्राणिकर्मसा
पेक्षत्वाद्वैषम्यस्येति सूत्रार्थः ३८ अभ्यागतं अधिकारं रोचय कामं संयोज्य जंतून् संहरस्वेति योजना ३९ प्राप्य प्रापय्य ४० ॥ ॥

प्राणानांतेवुध्यज्ञानीरि ४१ सर्वइतिदिवाइंद्रियाणिप्राणनांतेस्वप्नवस्थांतेजाग्रदवसानेसतत्वस्कगत्वासतासोम्पतदासंपन्नोभवतीतिश्रुतेः सुषुप्तो ब्र
ह्माभेदंप्राप्यजागरेपुनराह्वन्नाःतथैवपुनर्निहन्नाइतिपथाऽवस्थाभेदेहृष्टएवंदेहपिप्राणानांतेजीवनांतेपरलोकंगत्वाश्राद्वताःदेववत्पुनर्निहन्नाश्चभवतिसुप्रिप्रबो

मृत्युर्येपितिव्याधयश्चाश्रुपातामनुष्याणांहृज्यतेयेःशरीरं सर्वेषांवैप्राणिनांप्राणनांतेतस्माच्छोकंमाह्वथावुध्या ४१ सर्वेदेवाःप्राणिनां
प्राणानांतेगत्वाहृन्नाःसन्निवत्नास्तथैव एवंसर्वेमानवाःप्राणानांतेगत्वावन्नादेववद्गजसिंह ४२ वायुभीमनादोमहौजाःससर्वेषांप्रा
णिनांप्राणभृतः नानावृत्तिर्देहिनांदेहभेदेतस्माद्वायुर्देवदेवोविशिष्टः ४३ सर्वेदेवामर्त्यसंज्ञाविशिष्टाःसर्वेमर्त्यादेवसंज्ञाविशिष्टाः
तस्मात्पुत्रेमाशुचाराजसिंहपुत्रःस्वर्गंप्राप्यनेमोदतेह ४४ एवंमत्युर्देवसृष्टाप्रजानांप्राप्तेकालेसंहरंतीपथावत तस्याश्चैवव्याधय
स्तेश्रुपाताःप्राप्तेकालेसंहरंतीहजंतन ४५ शांतौमोक्षधर्मेमृत्युप्रजापतिसंवादः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

धवत्कर्मपरमोद्भवहृतेजन्ममरणेइत्यर्थःएतेनकेनमृत्युरित्यस्योत्तरमुक्तं ४२ कस्यमृत्युरित्यस्योत्तरमाहवायुरितिवायुःपंचवृत्तिःप्राणाःदेहेभेदेहनाशेदेवाना
मिंद्रियाणांदेवःराजा।नानावृत्तिर्नानादेहगतः एतेनदेहस्यैवमृत्युर्नप्राणानामात्मनोवा ४३ सर्वइतिदेवाःक्षीणपुण्याःमर्त्यत्वंमर्त्याश्चवृक्षनपुण्याःदेवत्वं
प्राप्नुवंतीत्यर्थः ४५ ह्यशीतितमः ४५

एवंप्राणिनांकर्माधीनोमहदुर्व्याधिसंबंधः ध्रुवंतत इतिज्ञात्वातान्निहन्निधर्ममूलांमन्वानोधर्मतत्त्वेप्यार्थजिनस्येच्छागमानांनानापथत्वेनसंदिहानोधर्मस्वरूपं
लक्षणप्रमाणाभ्यांजिज्ञासमानःपृच्छतिइमेवैइति २ तत्रचोदनालक्षणोर्थोधर्मइतिस्मृतेर्मुख्यंधर्मस्यलक्षणंवेदएव उत्तरदपितन्मूलतयाधर्मल
क्षणंनस्वतइतिसिद्धंपूर्वोक्तेत्रेकवयोविद्वांसः अर्थप्रयोजनमेवधर्मलक्षणमाहुः यथोक्तंपरिनिर्मथ्यवाग्जालमिदमेवसुनिश्चितंनोपकारात्परंपुण्यंना

युधिष्ठिरउवाच इमेवैमानवाः सर्वे धर्मं प्रतिविशंकिताः कोयंधर्मः कुतोधर्मस्तन्मेब्रूहिपितामह १ धर्मस्त्वयमिहा
र्थः किममुत्रार्थोपिवाभवेत् उभयार्थोपिवाधर्मस्तन्मेब्रूहिपितामह २ भीष्मउवाच सदाचारःस्मृतिर्वेदास्त्रिविधंधर्म
लक्षणं चतुर्थमर्थमित्याहुः कवयोधर्मलक्षणं ३ अपिह्युक्तानिधर्माणिव्यवस्यामुत्तरावरे लोकयात्रार्थमेवेहध
र्मस्यनियमः कृतः ४

पकारादघंपरमिति। अथधर्मलक्षणमयकारइत्यपिप्रश्नशेषेणाध्येयं ३ एतदेवविवृणोतिधर्म्माणिधर्मायहितानिकर्माणिउत्तरावरेव्यवस्यति स्मृ
नाधिकभावेनविपरीतंचनिश्चिन्वंति तथाहिगार्हस्थ्योपिमोक्षोस्ति अतएवसन्यासमिच्छंति। त्यागेनैवमोक्षः विषयलंपटः गार्हस्थ्यमिच्छंतीतिक
स्तर्हितत्रनिर्णयइत्याशंक्याहलोकेति। लोकव्यवहारमनुरुध्यायंनियमःकृतः यथाअविहितिप्रवृत्तस्यपुरुषधौरेयस्यगार्हस्थ्यापिजनकवसिष्ठादिवन्मो
क्षोस्ति अन्यस्यतेदांतश्रवणादिद्यविद्रूपनिष्ठत्यर्थःसन्यासइति ४

इह वा परत्रोभयत्र वा धर्मः फलतीति प्रश्नोत्तरमाह उभयत्रेति ५ नैपुण्यमेवाह न चेति केचिदित्याद्युक्तिशेषः अपापदित्यस्य यथापापवाधपि न्न अपापवादी भव
ति अधर्मकृदपि धर्मकृद्भवतीति तथैवोक्तमापद्धर्मेषु कर्णपर्वणि वा युधिष्ठिरं जिघांसोरर्जुनस्य बोधाय भगवता सत्यवादिनो हिंस्रस्य चाख्यानमुक्तं तदि

उभयत्र सुखोदर्कं इह चैव परत्र च अलब्ध्वा निपुणं धर्मं पापः पापेन युज्यते ५ न च पापकृतः पापान्मुच्यंते केचिदापदि अपापवा
दी भवति यथा भवति धर्मवित धर्मस्य निष्ठा त्वाचारस्तमेवाश्रित्य भोत्स्यसे ६ यथा धर्मसमाविष्टो धनं गृह्णाति तस्करः रमते निर्हरं
स्तेनः परवित्तमराजके ७ यदास्य तद्धरंत्यन्ये तदा राजानमिच्छति तदा तेषां स्पृहयते ये वै तुष्टाः स्वकैर्धनैः ८ अभीतः शुचिरभ्ये
ति राजद्वारमशंकितः नहि दुश्चरितं किंचिदंतरात्मनि पश्यति ९ सत्यस्य वचनं साधु न सत्याद्विद्यते परं सत्येन विधृतं सर्वं सर्वं सत्ये
प्रतिष्ठितं १० अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक् पृथक् अद्रोहमविसंवादं प्रवर्त्तंते परं सत्येनचिर तदाश्रयाः ११ ते चेन्मिथो
धृतिं कुर्युर्विनश्येयुरसंशयं न हर्त्तव्यं परधनमिति धर्मः सनातनः १२ मन्यंते बलवंतस्तं दुर्वलैः संप्रवर्त्तितं यदा नियतिदौर्वल्य
मथैषामेव रोचते १३

हानुसंधयं भोत्स्यसे ज्ञास्यसि ६ पुरुषं परं पापमेव पश्यति प्रकाशयति च न स्वीयमिति सदृष्टांतमाह यथेति त्रिभिः ९ यद्यप्येवं तथापि सत्यमेव श्रेय इत्या
ह सत्यस्येति १० पापिनामपि सत्यमित्याह सार्द्धेन अपीति सत्यं शपथं ११ अधृतिं समयत्यागं १२ तं पूर्वोक्तं धर्मं नियतिदौर्वल्यं दैवप्राप्तिह्रासं
तदा तेषामेव स धर्मो रोचते १३

245

रुचौहेन्वंतरमाहनदीतिाउपसंहरतितस्मादितिा अनार्जवि कौटिल्ये १५ मृगइव आचरितंस्वेनशठः परमपिशठंमन्यतेइत्यर्थः १६ उक्तंन्या
यमन्यत्रापपतिदिशतिा दातव्यमितिा कृपणोनिर्धनैः १९ सामान्यतोधर्मलक्षणमाहयदन्यैरिति २० यइति अन्यस्यभार्यायामितिशेषः।उप

नह्यन्यंतेवलवंतोभवंतिसुखिनोपिवा तस्मादनार्जवबुद्धिर्न्नकार्यातिकदाचन १४ असाधुभ्योस्यनभयंनचौरेभ्योन
राजतः अकिंचित्कस्यचित्कुर्वन्निर्भयःशुचिरावसेत् १५ सर्वतःशंकतेस्तेनोमृगोग्राममिवेयिवान् वहुधाचरितं
पापमन्यत्रैवानुपश्यति १६ मुदितःशुचिरभ्येतिसर्वतोनिर्भयःसदा नहिदुश्चरितंकिंचिदात्मनोन्येषुपश्यति १७
दातव्यमित्ययंधर्मउक्तोभूतहितेरतैः तंमन्यंतेधनयुताःकृपणैःसंप्रवर्त्तितं १८ यदानियतिकार्पण्यमथैषामेवरोच
ते नह्यन्यंतेधनवंतोभवंतिसुखिनोपिवा १९ यदन्यैर्विहितंनेच्छेदात्मनःकर्मपूरुषः नतत्परेषुकुर्वीतजानन्नप्रिय
मात्मनः २० योन्यस्यस्यादुपपतिःसकंकिंवक्तुमर्हति यदन्यस्यततःकुर्यान्नमृष्येदितिमेमतिः २१ जीवितुंयःस्व
यंचेच्छेत्कथंसोन्यंप्रघातयेत् यद्यदात्मनिचेच्छेततत्परस्यापिचिंतयेत् २२

पतिर्जारःकंकिंवक्तुमर्हतिस्वस्यैवदुष्टत्वात्।यतयदि अन्यस्य अन्यंततःतस्मिन्नेवस्त्रीोपपत्येविषयेकुर्यात्तर्हिगोचरीकुर्यात्तदानमृष्येदितियोजना
अन्यस्येतिद्वितीयार्थेषष्ठी २१ २२

अतिरिक्तैः आवश्यकाधिकैः भोगैः भोगसाधनैर्धनादिभिः कुसीदं वृद्ध्यर्थं धनप्रयोगः सदीनपोषणार्थमिव कार्यो न धनमात्रवृद्ध्यर्थं २३ सम
ये सन्मार्गे संतिष्ठेरन् संमुखा भवेयुः तथा तन्मार्गाचरणशीलः दमदानदयापरो भवेदित्यर्थः । अत्र दाने विशेषमाह अथवेति धर्मे यस्य दानादेः २४
प्रियेण साम्ना न तु हिंसया अभ्युपगतं प्राहुः प्रियाभ्युपगतं पश्य आलोचय लक्षणोद्देशं लक्षणकीर्तनं एतं यदात्मनः प्रियं तदन्येषु कर्त्तव्यं यन्न

अतिरिक्तैः संविभजेत्तान्भोगैरन्यानकिंचनान् एतस्मात्कारणाद्धात्रा कुसीदं संप्रवर्त्तितं २३ यस्मिंस्तु देवाः
समये संतिष्ठेरंस्तथाभवेत् अथवा लाभसमये स्थितिर्धर्मेपि शोभना २४ सर्वं प्रियाभ्युपगतं धर्ममाहुर्मनीषि
णः पश्यैतं लक्षणोद्देशं धर्माधर्मे युधिष्ठिर २५ लोकसंग्रहसंयुक्तं विधात्रा विहितं पुरा सूक्ष्मधर्मार्थनियतं स
तां चरितमुत्तमं २६ धर्मलक्षणमाख्यातमेतत्ते कुरुसत्तम तस्माद् नार्जवे बुद्धिर्न ते कार्या कथंचन २७ शांतौ
मोक्षधर्मेषु धर्मलक्षणं युधिष्ठिर उवाच सूक्ष्मं साधु समुद्दिष्टं नियतं ब्रह्मलक्षणं प्रतिभा त्वस्ति मे काचित्तां ब्रू
यामनुमानतः १ भूयांसो हृदये ये मे प्रश्नास्ते व्याहृतास्त्वया ।। ना ८ ।। न्ये वनि षं निरवलुते हृदये मम २

तन्त्वेति एवंविधां २५ लोके तिदयाप्रधानमित्यर्थः । सूक्ष्मधर्मार्थं सूक्ष्मधर्मलाभाय नियतं नियमितं २६ अनार्जवे कौटिल्ये २७ शांतौ मोक्ष धर्म
लक्षणं त्र्यशीतितमः ।। ।। अत्र प्रत्यवतिष्ठते सूक्ष्ममिति । ब्रह्मलक्षणं चोदनालक्षणं वैदिकं वा ध्यं धर्मं ज्ञातं । प्रतिभा स्फूर्त्तिः सा चानुमानलक्षणात्व
दुक्तयुक्तिविरुद्धमित्यर्थः १ निग्रहो तस्तु तर्काग्रहेण । २ ।।

इमानिभूतानिशरीरवंतिहिप्रसिद्धं स्वेनस्वयमेवआत्मानंप्राणयंतिजीवयंतिसृजंतिउन्नाययंतिदेहाकारान्व्यापयंतितथाचश्रुतिः अन्नाद्धे
वखल्विमानिभूतानिजायंतेअन्नेनजातानिजीवंतिअन्नंप्रयंत्यभिसंविशंतीति तथाहिपरस्यसुखदुःखोत्पादनेनजातौधर्माधर्मौस्वस्या
पिकालांतरेसुखदुःखप्रदौभवतइत्युक्तंतत्केवलंपरिपाठेनआम्नायमात्रेणाननिश्चेतुंशक्यं अन्यस्यैवजन्मसुखादिहेतुत्वदर्शनात्

इमानिहिप्राणयंतिसृजंत्युन्नाययंतिच नधर्मःपरिपाठेनशक्योभारतवेदितुं ३ अन्योधर्मःसमस्थस्य
विषमस्थस्यचापरः आपदस्तुकथंशक्याःपरिपाठेनवेदितुं ४ सदाचारोमतोधर्मःसंतस्त्वाचारलक्ष
णाः साध्यासाध्यंकथंशक्यंसदाचारोह्यलक्षणः ५

दृष्टेनैवकारणेनस्वाभाविकेनधर्मेणाजगद्धृतंचअसिद्धोवैदिकधर्मस्यादृष्टस्यकल्पनायाअनुदयाच्चेत्याशयः ३ अव्यवस्थितस्वभावादपिवैदि
कधर्मोदुर्ज्ञेयइत्याहान्यइति आपदामानन्त्यात्तद्धर्माअप्यनंताइतिदुर्ज्ञेयएवधर्मइत्याह आपदस्त्विति तस्मादव्यवस्थितरूपस्यवैदिक
धर्मस्यनधर्मत्वमित्याशयः ४ सतामाचारोधर्मोधर्माचरणाच्चसत्त्वमित्यन्योन्याश्रयेणालक्ष्यलक्षणयोःसाध्यासाध्ययोरविवेकादपिनस
दाचारोपिधर्मेमानमित्याहसदाचारइति ५

दृश्यतेहीति अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमित्यादिनिषेधश्च प्रमाणेपि प्राकृताः शूद्राः मुमुक्षवो वेदांतान् धर्मवुध्या शृणवंति अ
गस्त्यादिरप्राकृतोपि वहुहिंसाकरं दंडकारण्यशापारव्यमधर्मं चकार अतः अशिष्टेषु शिष्टलक्षणादर्शनात् शिष्टेषु च अशिष्टलक्षणादर्शनात्सदाचा
रोपि दुर्निर्णय इत्यर्थः ८ कालभेदेन धर्ममन्यथयंतो वेदा अप्यश्रद्धेया अनवस्थितत्वादित्याह वेदेति ७ लोकसंग्रहो लोकरंजनमात्रा।
वेदयंत्याम्नायाः धर्ममिति वेदाः स्मृतयः १८ ते आम्नायाः अत्र स्मृतिषु प्रमाणं प्रमाणत्वे ९ प्रमाणं श्रुतिर्निरपेक्षत्वात् अप्रमाणं स्मृतिः

दृश्यते धर्मरूपेण अधर्मं प्राकृतश्चरन् धर्मं चाधर्मरूपेण कश्चिदप्राकृतश्चरन् ६ पुनरस्य प्रमाणं हि निर्दि
ष्टं शास्त्रकोविदैः वेदवादाश्चानुयुगं ह्रसंतीति ह नः श्रुतं ७ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे अ
न्ये कलियुगे धर्मा यथाशक्तिकृता इव ८ आम्नायवचनं सत्यमित्ययं लोकसंग्रहः आम्नायेभ्यः पुनर्वेदाः
प्रसृताः सर्वतोमुखाः ९ ते चेत्सर्वे प्रमाणं वै प्रमाणं ह्यत्र विद्यते प्रमाणे चाप्रमाणे न विरुद्धे शास्त्रता कुतः
१० धर्मस्य क्रियमाणस्य वलवद्भिर्दुरात्मभिः या या विक्रियते संस्था ततः सापि प्रणश्यति ११ ॥ ॥ ॥

मूलश्रुतिसापेक्षत्वात्तयोः परस्परविरोधे औदुंबरीं स्पृष्ट्वोद्गायेदिति तं च वेष्टनस्मृतिः सापेक्षत्वादप्रमाणं चेत्तत्सामान्यात्सर्वापि स्मृ
तिरप्रमाणं ततश्च तन्मूलभूताया श्रुतेरप्यप्रमाणत्वेन विनिगमनाविरहात्प्रत्यक्षाप्रत्यक्षयोरपि श्रुत्योरप्रमाणमित्याह प्रमाणेपी
ति १० धर्मस्येति संस्था स्वरूपं जनमेजयाश्वमेधे इंद्रापराधादश्वमेध संस्थालोपो दृष्टः ११

स्वयं विघ्नं न वा उक्तं वा वेदितुं शक्यं न वा दुर्ज्ञेयं धर्मतत्त्वमित्यर्थः १२ प्रथमं कर्मकाण्डे अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूमेत्यादिश्रुतेर्गन्धर्वनगरवदन्तुतं इव दृश्यते कविभिरन्वीक्ष्यमाणः यत्कृतकं तदनित्यं कार्यत्वाद्घटवत् तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इत्युपपत्तिपूर्वकैरुपनिषद्भिरीक्ष्यमाणः अदर्शनं याति तुच्छ इव भवति १३ निपीयते पशुभिर्जलमस्मिन्निति निपानं वाप्यादि समीपस्थः क्षुद्रजलाधारः कुल्या चाकेदारान्प्रतिनीयमाना यथा सद्यः शुष्यति एवं शाश्वतो वेदि

विप्रश्चैवं न चाविप्रः शक्यं वा वेदितुं न वा अणीयान्क्षुरधाराया गरीयानपि पर्वतात् १२ गंधर्वनगराकारः प्रथमं संप्रदृश्यते अन्वीक्ष्यमाणः कविभिः पुनर्गच्छत्यदर्शनं १३ निपानानीव गोभ्याशे क्षेत्रे कुल्येव भारत स्मृतिर्हि शाश्वतो धर्मो विप्रहीणो न दृश्यते १४ कामादन्ये क्षयाच्चान्ये कारणैरपरैस्तथा असंतो हि वृथाचारं भजंते बहवोऽपरे १५ धर्मो भवति स क्षिप्रं प्रलापस्त्वेव साधुषु
अन्ये तानाहुरुन्मत्तानपि चावहसंत्युत १६

कोऽधर्मः विप्रहीणः सन्नकलेवरं तेन न दृश्यते इति स्मृतिरस्तिमविष्यविषया १४ विप्रहीणत्वमेवोपपादयति कामादिति कामात्काम्योऽग्निहोत्रादिः अन्ये क्षयाभृतकाध्यापनादिः [illegible] अपरैः कारणैः यज्ञाद्युद्देशेन धनलाभार्थव्रतादिभिः असंतो दांभिकाः वृथा श्रद्धारहितत्वात् १५ सः कामादिः सद्भिः कृतो धर्मो भवति मूढै[illegible] साधुषु च धर्मः प्रलापमात्रं धर्मो नास्तीति वदे ति मूढाः प्रलापमेवाहायेति १६ ध्या०१

महाजनाः द्रोणाचार्यादयः गन्ध(?)लकर्मदीर्घसत्रकार्यं न स्यात् आदेशे शिष्टाचारवाक्योपइति भावः १७ तेनैव आचारेणैव अन्यो विश्वामित्रादिः
अपरं जमदग्न्यादिकं सः आचारवान् तुल्यरूपो वशिष्ठादिः १८ उक्तानुवादपूर्वकमाचाराणामनेकाग्र्यं व्यभिचारित्वमाह येनैवेति १९
एवं श्रुतिस्मृतिसदाचाराणामप्रामाण्यमुक्त्वा स्वमतमाह चिराभिपन्न इति। अनाद्यविगानप्रवृत्तेन स्वभावेनैव सुखदुःखकार्यको

महाजना ह्युपावृत्ता राजधर्मसमाश्रिताः नहि सर्वहितः कश्चिदाचारः संप्रवर्त्तते १७ तेनैवान्यः प्रभवति
सोपरं बाधते पुनः दृश्यते चैव स पुनस्तुल्यरूपो यदृच्छया १८ येनैवान्यः प्रभवति सोपरानपि बाधते आचा
राणामनैकाग्र्यं सर्वेषामुपलक्षयेत् १९ चिराभिपन्नः कविभिः पूर्वं धर्म उदाहृतः तेनाचारेण पूर्वेण सं
स्था भवति शाश्वती २० शांतौ मोक्षधर्मेषु ॥ ॥ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं तुला
धारस्य वाक्यानि धर्मे जाजलिना सह १ वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः सागरोद्देशमागम्य तपस्ते
पे महातपाः २ नियतो नियताहारश्चीराजिनजटाधरः मलपंकधरो धीमान्बहून्वर्षगणान्मुनिः ३ स
कदाचिन्महातेजा जलवासी महीपते चचार लोकान्विप्रर्षिः प्रेक्षमाणो मनोजवः ४ ॥ ॥ ॥

र्थव्यवस्था न श्रुत्यादिप्रमाणकेन धर्मेणेत्यर्थः संस्था मर्यादा २० चतुरशीतितमः ॥ ॥ अत्र सुखादिव्यवस्थायां स्वभाव एव निया
मक उत धर्म इति विमर्शे तुलाधारवाक्यानि धर्मप्रमाणत्वेनोदाहरंतीत्यर्थः १ ॥

मो०
२४८

248

जलवासेमहींविप्रेक्ष्यतपोबलाद्दूरदर्शनादिसिद्धिंप्राप्येत्यर्थः ५ वैहायसंआकाशगतंग्रहनक्षत्रादिगच्छेत अवगच्छेतामयासहगच्छेद्यः

सचिंतयामासमुनिर्जलवासेकदाचन विप्रेक्ष्यसागरांतांवैमहींसवनकाननां ५ नमयासदृशोस्तीहलोकेस्थाव
रजंगमे अप्सुवैहायसंगच्छेन्मयायोन्यःसहेतिवै ६ सदृश्यमानोरक्षोभिर्जलमध्येवदत्तदा अब्रुवंश्चपिशाचास्तं
नैवंत्वंवक्तुमर्हसि ७ तुलाधारोवणिग्धर्मावाराणस्यांमहायशाः सोप्येवंनार्हतेवक्तुंयथात्वंद्विजसत्तम ८ इत्यु
क्तोजाजलिर्भूतैःप्रत्युवाचमहातपाः पश्येयंतमहंप्राज्ञंतुलाधारंयशस्विनं ९ इतिब्रुवाणंतमृषिंरक्षांस्युद्धृत्यसागरात्
अब्रुवन्गच्छपंथानमास्थायेमंद्विजोत्तम १० इत्युक्तोजाजलिर्भूतैर्जगामविमनास्तदा वाराणस्यांतुलाधारंसमासा
द्यब्रवीदिदं ११ युधिष्ठिरउवाच किंकृतंदुःकरंतातकर्मजाजलिनापुरा येनसिद्धिंपरांप्राप्तस्तन्नोव्याख्यातुमर्हसि १२
भीष्मउवाच अतीवतपसायुक्तोघोरेणसबभूवह तपोपस्पर्शनरतःसायंप्रातर्महातपाः १३ अग्नीन्परिचरन्सम्य
क्स्वाध्यायपरमोद्विजः वानप्रस्थविधानज्ञोजाजलिर्ज्वलितःश्रिया १४ वनेतपस्यतिष्ठन्सनचधर्ममवेक्षत वर्षा
स्वाकाशशायीचहेमंतेजलसंश्रयः १५ वातातपसहोग्रीष्मेनचधर्ममविंदत॥ दुःखशय्याश्चविविधाभूमौचपरिव
र्तते १६॥

सोन्यःकोस्तीतियोज्यं १२ उपस्पर्शनरतःस्नानाचमनरतः १३ श्रियावेदविद्यया १४ नचधर्ममवेक्षतधर्मवानस्मीतिमानंनच
प्राप्येत्यर्थः १५ १६

राम०
२४८

अमलसंयुतः निष्पापः २० उपप्रेक्ष्य तउपेक्षांचक्रे न वारितवानित्यर्थः २३ प्राजापत्येन गर्भाधानविधिना २४ ॥ ॥

ततः कदाचित्स मुनिर्वर्षास्वाकाशमास्थितः अंतरिक्षाज्जलं मूर्द्ध्ना प्रत्यगृह्णान्मुहुर्मुहुः १७ अथ तस्य जटाः क्लिन्ना बभूवुर्ग्रथिताः प्रभो अरण्यगमनान्नित्यं मलिनो मलसंयुतः १८ स कदाचिन्निराहारो वायुभक्षो महातपाः तस्थौ काष्ठवदव्यग्रो न चचाल च कर्हिचित् १९ तस्य स्म स्थाणुभूतस्य निर्विचेष्टस्य भारत कुलिंगशकुनौ राजन्नीडं शिरसि चक्रतुः २० स तौ दयावान्ब्रह्मर्षिरुपप्रैक्षत दंपती कुर्वाणौ नीडकं तत्र जटासु तृणतंतुभिः २१ यदा न स चलत्येव स्थाणुभूतो महातपाः ततस्तौ सुखविस्रब्धौ सुखं तत्रोषतुस्तदा २२ अतीतास्वथ वर्षासु शरत्काल उपस्थिते प्राजापत्येन विधिना विश्वासात्काममोहितौ तत्रापातयतां राजञ्शिरस्यंडानि खेचरौ २४ तान्यबुध्यत तेजस्वी स विप्रः संशितव्रतः बुध्वा च स महातेजा न चचाल च जाजलिः २५ धर्मे कृतमना नित्यं नाधर्मं स त्वरोचयत् अहन्यहनि चागम्य ततस्तौ तस्य मूर्द्धनि २६ आश्वासितौ निवसतः संप्रहृष्टौ तदा विभो अंडेभ्यस्त्वथ पुष्टेभ्यः प्राजायंत शकुंतकाः २७ व्यवर्द्धंत च तत्रैव न चाकंपत जाजलिः स रक्षमाणस्त्वंडानि कुलिंगानां धृतव्रतः २८ २८

मो॰
२४९
249

कालसमयेघाकालमर्यादीयांसमयांतेशकुंतकायक्षिणः पक्षवंतोवभूवुः २९ पक्षीन्ब्राह्मणेभ्योपिपद्मः ३१ द्विजान्शकुंतान् ३७

तपेवतस्योधर्मात्मानिर्विचेष्टःसमाहितः ततस्तत्कालसमयेवभूवुस्तेपपक्षिणः वुवुधेतांस्तसमुनिर्जातपक्षान्कु
लिंगकान् २९ ततःकदाचित्तांस्तत्रपश्यन्पक्षीन्यतव्रतः वभूवपरमप्रीतस्तदामतिमतांवरः ३० तथातानपि
संवृद्धान्दृष्ट्वाचाप्युवतांमुदं शकुंतोनिर्भयौतत्रऊषतुश्चात्मजैःसह ३१ जातपक्षांश्चसोपश्यद्दुड्डीनान्पुनरागता
न् सायंसायंद्विजान्विप्रोनचाकंपतजाजलिः ३२ कदाचित्पुनरभ्येत्यपुनर्गच्छंतिसंततं त्यक्त्वामातापितृभ्यांते
नचाकंपतजाजलिः ३३ तथातेदिवसंचापिगत्वासायंपुनर्नृप उपावर्त्तततत्रैववनिवासार्थंशकुंतकाः ३४
कदाचिद्दिवसान्पंचसमुत्पत्यविहंगमाः षष्ठेहनिसमाजग्मुर्नैवाकंपतजाजलिः ३५ क्रमेणाचपुनःसर्वेदि
वसान्सुबहूनपि नोपावर्त्तंतशकुनाजातप्राणाःस्मतैयदा ३६ कदाचिन्मासमात्रेणसमुत्पत्यविहंगमाः नै
वागच्छंस्ततोराजन्प्रातिष्ठतसजाजलिः ३७ ततस्तेषुप्रडीनेषुजाजलिर्जातविस्मयः सिद्धोस्मीतिमतिंचक्रेततः
स्तंमानस्माविशत् ३८ सतथानिर्गतान्दृष्ट्वाशकुंतान्नियतव्रतः संभावितात्मासंभाव्यभृशंप्रीतमनाभवत् ३९
सनघांसमुपस्पृश्यतर्पयित्वाहुताशनं उदयंतमथादित्यमुपातिष्ठन्महातपाः ४० ॥ ॥ ॥ ॥

राम॰
२४९
२४८

संभाव्यवर्द्धयित्वाआस्फोटयत्बाहुशब्दमकरोत् ४५ भांडंमूल्यधनंतेनजीवनंयस्यासस्याभांडजीवनः ५६ भरणामत्रेमूल्यवणिग्धनेइतिविश्वः ४६ आयानआग
छन् ४७ सागरानूपंसागरसमीपस्थंसजलंप्रदेशंसंज्ञांधर्मवानहमितिज्ञानं ४१ ४२ ४२ ४४ ४५ ४६ ४६ ४६ ४७ ४९ चा

संभाव्यचटकान्दृष्ट्वाजाजलिर्जपतांवरः आस्फोटयत्सआकाशेधर्मःप्राप्तोमयेतिवै ४१ अथांतरिक्षेवागासीत्तांचसशुश्राव
जाजलिः धर्मेणनसमस्त्वंवैतुलाधारस्यजाजले ४२ वाराणस्यांमहाप्राज्ञस्तुलाधारःप्रतिष्ठितः सोप्येवंनार्हतेवक्तुंयथा
त्वंभाससेद्विज ४३ सोमर्षवशमापन्नस्तुलाधारदिदृक्षया पृथिवीमचरद्राजन्यत्रसायंगृहोमुनिः ४४ कालेनमहताग
छत्सतुवाराणसींपुरीं विक्रीणंतंचपण्यानितुलाधारंददर्शसः ४५ सोपिदृष्ट्वैवतंविप्रमायांतंभांडजीवनः समुत्थायसुसंहृ
ष्टःस्वागतेनाभ्यपूजयत् ४६ तुलाधारउवाच आयानेवासिविदितोममब्रह्मन्नसंशयः ब्रवीमियत्तुवचनंतच्छृणुष्वद्विजोत्तम
४७ सागरानूपमाश्रित्यतपस्तप्तंत्वयामहत् नचधर्मस्यसंज्ञांत्वंपुरावेत्थकथंचन ४८ ततःसिद्धस्यतपसातवविप्रशकुंतकाः
क्षिप्रंशिरस्यजायंततेचसंभाविताःत्वया ४९ जातपक्षायदातेचगताश्चारीमितस्ततः मन्यमानस्ततोधर्मंचटकप्रभवंद्विज ५०
खेवाचंत्वमथाश्रौषीर्मांप्रतिद्विजसत्तम अमर्षवशमापन्नस्ततःप्राप्तोभवानिह करवाणिप्रियंकिंतेतद्ब्रूहिद्विजसत्तम ५१ शां
तौमोक्षधर्मेषुतुलाधारजाजलिसंवादे ॥ ॥ ॥ ॥ ॥ ॥

रीमाहात्म्यसंचरणं ५१ शांतौमोक्षधर्मेषुपंचाशीतितमः ॥ ॥ ॥ ॥

इतीति १ वाणिजवणिक्पुत्रेति साधिक्षेपमाह अपरपणविक्रेतृत्वाद्दोषवानपीत्यर्थः २ अध्यगाः अधिगतवानसि ४ धर्मरहस्यमेवाह सर्वभूतहितमिति ५

भीष्म उवाच इत्युक्तः स तदा तेन तुलाधारेण धीमता प्रोवाच वचनं धीमान्जाजलिर्जपतां वरः १ जाजलिरुवाच विक्रीणानः सर्वरसान्सर्वगंधांश्च वाणिज वनस्पतीनोषधीश्च तेषां मूलफलानि च २ अध्यगा नैष्ठिकीं बुद्धिं कुतस्त्वामिदमागतं एतदाचक्ष्व मे सर्वं निखिलेन महामते ३ भीष्म उवाच एवमुक्तस्तुलाधारो ब्राह्मणेन यशस्विना उवाच धर्मसूक्ष्माणि वैश्यो धर्मार्थतत्त्ववित् जाजलिं कष्टतपसं ज्ञानतृप्तं तदा नृप ४ तुलाधार उवाच वेदाहं जाजले धर्मं सरहस्यं सनातनं सर्वभूतहितं मैत्रं पुराणं यं जना विदुः ५ अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः या वृत्तिः स परो धर्मस्तेन जीवामि जाजले ६ परच्छिन्नैः काष्ठतृणैर्मयेदं शरणं कृतं अलक्तं पद्मकं तुंगं गंधांश्चोच्चावचांस्तथा ७ रसांश्च तांस्तान्विप्रर्षे मद्यवर्जान्बहूनहं क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ८ ॥

अल्पद्रोहेण आपदि वा नानुपहत्य भूतानि भोगः संभवतीति न्यायेनाद्रोहेण वृत्त्यसंभवाद्वा ६ अलक्तं लाक्षारससारं पद्मकं तुंगं च काष्ठविशेषौ। कस्तूर्यादीन्गंधान् ७ रसान्लवणादीन्क्रीत्वैव न तु स्वयमुत्पाद्य ८ ॥ ॥

ननुलाक्षालवणानां सातिपतनीयानि विक्रये इति लाक्षादिविक्रये दोषस्मृतेस्तद्वतः कथं धार्मिकत्वमित्याशंक्याह सर्वेषामिति। अयमर्थः लोके हि उपकारिणां प्रत्युपकुर्वंति अद्रोहिणां न द्रुह्यंति चेत्युत्सर्गः तत्साम्यात् दैहिकौ उपकारापकारौ जन्मांतरेऽपि सुखदुःखप्रदानाय प्रभवतः न त्वाकस्मिकं कस्यचि

सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः कर्मणा मनसा वाचा स धर्मं वेद जाजले ९ नानुरुध्ये विरुध्ये वा न द्वेष्मि न च कामये
समोऽहं सर्वभूतेषु पश्य मे जाजले व्रतं १० तुला मे सर्वभूतेषु समा तिष्ठति जाजले नाहं परेषां कृत्यानि प्रशंसामि न गर्हये आ
काशस्येव विप्रेंद्र पश्यँल्लोकस्य चित्रतां ११ इति मां त्वं विजानीहि सर्वलोकस्य जाजले समं मतिमतां श्रेष्ठ समलोष्टाश्मकां
चनं १३ यथांधबधिरोन्मत्ता उच्छ्वासपरमाः सदा देवैरपिहितद्वाराः सोपमा पश्यतो मम १४ यथा वृद्धातुरकृशा निःस्पृ
हा विषयान्प्रति तथार्थकामभोगेषु ममापि विगतास्पृहा १५ यदा चायं न बिभेति यदा चास्मान्न बिभ्यति यदा नेच्छति न
द्वेष्टि ब्रह्म संपद्यते तदा १६ यदा न कुरुते भावं सर्वभूतेषु पापकं कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा १७ न भूतो न
भविष्योऽस्ति न च धर्मोऽस्ति कश्चन यो ऽभयः सर्वभूतानां स प्राप्नोत्यभयं पदं १८ ॥ ॥ ॥ ॥

मु५
त्सुखं दुःखं वास्ति जन्मांतरे यं कारणं विनेत्यनुमीयते ऽतस्स्वभाववादस्तावदयुक्त एव आत्मादीनां धर्मप्रामाण्येऽपि वक्ष्यमाणरीत्या युज्यत एवेति ११
आकाशस्य अभ्रपटलस्येव चित्रतां विविधाकारत्वं १२ अपिहितद्वारा आच्छादितेंद्रियगोलकाः १४

विपक्षेदोषमाहायस्मादिति १९ मातःपयःपुत्र्यात्मानवादविदूरंनैष्टपरावतइतिमंत्रलिंगात्कुलाचारस्यप्रामाण्यंगम्यतेतनदप्यस्मास्वस्तीत्याहय
पावदिति। अहिंस्राणामितिहिंसात्मयःकुलाचाराप्रमाणमितुक्तामंत्रार्थस्तुपित्र्यात्पित्रादिसंसेवितात्मानवात्मनुर्मंत्रःतत्प्रकाशितात्वेदावि
रुद्धादित्यर्थःपथोमार्गात्ननःअस्मानदूरंमानैष्टनयतःपरावतःबद्धायुष्यवतोस्मानइति २० शिष्टाचारंप्रमाणयतिप्रनष्टइतिद्वाभ्यांशाश्वतःशश्व
द्भवःपरंपरयावेदमूलकत्वात् अनादिर्धर्मःशिष्टाचारात्सप्रनष्टःयतःसदाचारेणक्वचिद्देशेविरुद्धेनमोहितःमोहंप्रापितःयथाअवर्त्याभ्युनअं
त्राणियेच यःसूनपितृंपितृदेवमनुष्यानेचअंत्राणिशुनइतिश्रुतिस्मृतिभ्यांवामदेवसाम्रेष्ठतमस्यापिवीभत्सआचारआपदिश्वमांस

यस्माद्दृढिजतेलोकःसर्वोमित्युमुखादिव वाकूक्रूरादंडपरुषात्सप्राप्नोतिमहद्भयं १९ ययावद्वर्तमानोनां
वृद्धानांपुत्रपौत्रिणां अनुवर्त्तामहेवृत्तमहिंस्राणांमहात्मनां २० प्रनष्टःशाश्वतोधर्मःसदाचारेणमोहितः ते
नवैद्यस्तपस्वीवाबलवान्वाविमुह्यते २१

भक्षणरूपःप्रदर्शितःपुराणेवाऋषभादीनांमहायोगिनामाचारंदृष्ट्वाआर्हतादयोमोहिताःपाखंडमार्गमनुगताइत्युक्तंतेनमोहरू
पेणकारणेनवैद्योविद्वान्वातपस्वीजितेंद्रियःबलवान्जितकामक्रोधःसोपिविमुह्यतेविमुच्यतइतिपाठेतेनसदाचारेणतत्पर्यः। अयं
भावः।सर्वनाशेसमुत्पन्नेह्यर्द्धंत्यजतिपंडितःअर्द्धनाशेसमुत्पन्नेसर्वंत्यजतिदुर्मतिरितिन्यायेनमूढःशिष्टाचारमंशेविगीतंदृष्ट्वा
कृत्स्नमपित्यजंतिस्वभाववादेचानुरुद्धोतोवृद्धास्मृत्यंतरविरुद्धांशमात्रंत्यक्त्वातेनैवसदाचारेणानुच्यंतइति २१ ॥ ॥

एतदेवाह आचारादीति धर्मनोक्षो योगिनमधिकारं उपसंहरति एवमिति साधुभिश्चीर्णं धर्मं यश्चरेत् स धर्ममाप्नुयादित्यन्वयः २२ नद्यामिति नदी
प्रवाहेण काष्ठानामिव कर्मप्रवाहेणापि पितृपुत्रादीनां संयोगवियोगावित्याशयः २४ लोकस्य कर्माधीनत्वात् सुखार्थी न कंचिद् द्विष्यादित्याह यस्मा
दिति एतत्फलमाहाभयमिति २५ विपक्षे दोषमाह यस्मादिति वृकः हिंस्रपशुः दृष्टान्ते वाङ्वाग्निः २६ अयं त्वभयदानलक्षणः यतस्ततः सर्वो

आचारात् तु जाजले प्राज्ञः क्षिप्रं धर्ममवाप्नुयात् एवं यः साधुभिर्दान्तश्चरेदद्रोहचेतसा २२ नद्यां चेह
यथा काष्ठमुह्यमानं यदृच्छया यदृच्छयैव काष्ठेन संधिं गच्छति केनचित् २३ तत्रापराणि दारूणि
संसृज्यन्ते परस्परं तृणकाष्ठकरीषाणि कदाचिन्न समीक्षया २४ यस्मान्नोद्विजते भूतं जातु किंचि
त्कथंचन अभयं सर्वभूतेभ्यः स प्राप्नोति सदा मुने २५ यस्मादुद्विजते विद्वन्सर्वलोको वृकादिव क्रो
शतस्तीरमासाद्य यथा सर्वे जलेचराः २६ एवमेवायमाचारः प्रादुर्भूतो यतस्ततः सहायवान्द्रव्यवान्
यः सुभगोऽन्यपरस्तथा २७ ततस्तानेव कवयः शास्त्रेषु प्रवदन्त्युत कीर्त्यर्थमल्पहृल्लेखाः पटवः कृत्स्न
निर्णयाः २८ ॥ ॥

पायसाध्यः सहायादिसाध्यः बंदीमोचनादिरूपः सुभगः ऐश्वर्यहेतुः परः परलोकहेतुश्च २७ ततोऽभयदाना
त्तान् सहायादियुक्तानप्रवदन्ति प्रकृष्टान्वदन्तीति च यदि अल्पहृल्लेखाः अल्पं बाह्यसुखं हृल्लेखं वप्रतिष्ठितं येषां ते बहिर्मुखाः की
र्त्यर्थिनमभयदानं कुर्युः ये पटवः कुशलाः कृत्स्नं ब्रह्म तन्मूलकमेव तदर्पणमेवाभयदानमिति निर्णयो येषां। अभयदानं सर्वेषां संमतमित्य
र्थः ॥ २८

मो°
२५२

252

तपआदिभिर्यद्यत्फलमश्नुते तत्तदभयदानस्य अभयदानेन प्राप्नोति २९ एतदेव प्रशंसति लोके इत्यादिना ३२ अभयदानस्य पारत्रिकं फल
माह सर्वेति सर्वेषां भूतानां आत्मभूतस्य प्रत्यगात्मनः आत्मा ह्येषां स भवति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिप्रसिद्धा निर्विकल्पका
वस्था उक्ता। सर्वभूतानि पश्यत इति आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुतिप्रसिद्धा सर्वस्य फलास्य विकल्पावस्था

तपोभिर्यज्ञदानैश्च वाक्यैः प्रज्ञाश्रितैस्तथा प्राप्नोत्यभयदानस्य यद्यत्फलमिहाश्नुते २९ लोके यः सर्वभूते
भ्यो ददात्यभयदक्षिणां स सर्वयज्ञैरीजानः प्राप्नोत्यभयदक्षिणां ३० न भूतानामहिंसाया ज्यायान्धर्मोस्ति
कश्चन यस्मान्नोद्विजते भूतं जातु किंचित्कथंचन सोभयं सर्वभूतेभ्यः संप्राप्नोति महामुने ३१ यस्मादुद्विज
ते लोकः सर्पाद्वेश्मगतादिव न स धर्ममवाप्नोति इह लोके परत्र च ३२ सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः दे
वा अपि मार्गे मुह्यंति अपदस्य पदैषिणः ३३ दानं भूताभयस्याहुः सर्वदानेभ्य उत्तमं ब्रवीमि ते सत्यमिदं श्रद्धत्स्व च
जाजले ३४ स एव सुभगो भूत्वा पुनर्भवति दुर्भगः व्यापत्तिं कर्मणां दृष्ट्वा जुगुप्संति जनाः सदा ३५। ॥ ॥

उक्ता। अतएवास्य विभुत्वेन गगनस्येवागत्यभावाद्देवा अपि संधिरार्षः मार्गे मुह्यंति अपदं ब्रह्मलोकादिनं तद्धितस्य पदैषिणो देवाः ३३ अभयदा
नमेवेत्येवमुपसंहरति दानमिति ३४ अस्यैव स्तोत्रं पर्यं कास्य कर्मक्षपित्स्मुत्वेन निंदति स एवेति सुभगः स्वर्गी व्यापत्तिं नाशं कर्मणां कर्मफ
लानां स्वर्गादीनां ३५ ॥ ॥

राम°
२५२

अकारणः कारणं अनुष्ठानं प्रयोजकं फलं तद्धीनः सूक्ष्मः अभयदानात्मकः भूतं ब्रह्म भव्यं स्वर्गादि तदुभयप्राप्त्यर्थमेव धर्माणां शमादीनां यज्ञादीनां च प्रवचनमध्ययनं वेदे कृतं अतः स्थूलधर्मो यज्ञादिरन्यः सूक्ष्मधर्मोऽस्तीति भावः २६ कुतः सूक्ष्मधर्मो दुर्ज्ञेयः यतः बहुनिह्नवः सप्तदश प्राजाप त्यानामृतानालभेत सप्तदशो वै प्रजापतिः प्रजापतेराप्त्या इत्यादि विविधयः श्रेयःसाधनत्वेन हिंसामुपदिशंतः अहिंसाशास्त्रमुपमर्दंतीत्यर्थः त हि तत्प्रमाणमेव नाशंक्यं महा उक्षाणं वा वेहतं वा क्षदते महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति श्रुतिस्मृतिविहितो मधुपर्के गवालंभ

अकारणो हि नैवास्ति धर्मः सूक्ष्मो हि जाजले भूतभव्यार्थमेवेह धर्मप्रवचनं कृतं २६ सूक्ष्मत्वान्न स विज्ञा तुं शक्यते बहुनिह्नवः उपलभ्यांतरा चान्यानाचारानवबुध्यते २७ ये च छिंदंति वृषणान्ये च विंदंति नस्त कान् वहंति महतो भारान्बध्नंति दमयंति च २८ हत्वा सत्वानि खादंति तान्कथं न विगर्हसे मानुषा मानुषा नेव दासभावेन भुंजते २९ वधबंधनिरोधेन कारयंति दिवानिशं आत्मनश्चाभिजानाति यद्दुःखं वधबंधने ४०

एकः आचारः मा गामनागामदितिं वधिष्टेति मंत्रलिंगादवगतो गवोत्सर्गविधिस्तद्विरुद्धोऽन्य आचारः तत्रामा गामिति विशेषणात् कल्पचिद्धिंसा विधेरहिंसाविधिर्दुर्बलानिति गम्यते अनागस्त्वस्य प्राजापत्यपशुष्वपि तुल्यत्वादित्याशयेनाह २७ यदुक्तं अलक्तपद्मकादीन्य रपानि विक्रीणासीति तत्राह ये चेति नस्तकान् नासागर्भान् वहंते वाहयंति २८ ॥ ॥

मो०
२५३

२५३

४३ अविधिनाकृत्वापिपिहिंसादोषावर्हेति किमुताकृत्वेत्यर्थः ४४ एतेदेवाहननमनोइति ४५ भूमिशय्यान्सपदिदीनश्रेयोमुखंकाष्ठंलांगलं
४६ आप्यायध्वमघ्न्यादेवभागमितिश्रुतिसिद्धंगवांनामप्रवृत्तिहेतुशक्यात्रअघ्न्याइतियोगात्गवामवध्यत्वंश्रोतमित्यर्थः चकारकृतवान् आल

पंचेंद्रियेषुभूतेषुसर्वंवसतिदैवतं आदित्यश्चंद्रमावायुर्ब्रह्माप्राणाः क्रतुर्यमः ४१ तानिजीवानिविक्रीयका
मृतेषुविचारणा अजोग्निर्वरुणोमेषः सूर्योश्वः पृथिवीविराट् ४२ धेनुर्वत्सश्चसोमोवैविक्रीयैतन्नसिध्यति
कौतैलेकाघृतेब्रह्मन्मधुन्यौषधेषुवा अदेशमशकेदेशेसुखसंवर्धितान्प्रभून् तांश्चमातुःप्रियाञ्जानन्
आक्रम्यबहुधानराः ४३ बहुदंशाकुलान्देशान्नयंतिबहुकर्दमान् निवासंपीडिताधुर्याः सीदंत्यविधिनापरे ४४
नमन्येभ्रूणहत्यापिविशिष्टातेनकर्मणा कृषिंसाध्वितिमन्यंतेसाचवृत्तिः सुदारुणा भूमिंभूमिशयांश्चैवहं
तिकाष्ठमयोमुखं तथैवानडुहोयुक्तान्समवेक्षस्वजाजले ४६ अघ्न्याइतिगवांनामकएनाहंतुमर्हति म
हच्चकाराकुशलंवृषंगांवालभेत्तुयः ४७ ऋषयोयतयोह्येतन्नहुषंप्रत्यवेदयन् गांमातरंचाप्यवधीर्वृषभं
चप्रजापतिं अकार्यंनहुषाकार्षील्लप्स्यामस्त्वत्कृतेव्यथां ५० ॥

भेतहिंस्यात् ४८ ऋषयोगांलभन्निवेतिपाठः गांगोजातीयां ऋषभोवाराः लभन्स्पृशन्निवव्याघ्रान्नोत्पानिसृष्टोवारोगविपतितः न
तुगविनिश्चइत्यर्थः ४९ ५०

शतमिति यया इंद्रस्य ब्रह्महत्या नार्यादिषु रजआदिरूपेण क्षिप्ता एवं नहुषहृता गोवृषहत्या सर्वभूतेष्वेकाधिकशतरोगरूपेण क्षिप्तेत्यर्थः ५१ भ्रूणाह
क्षितिर्ब्राह्मणाश्च गावश्च कुलमेकं द्विधा कृतं एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठतीति स्मृतेः गवां ब्राह्मणानां सह समानत्वं शत्वात् गोघ्नोपि भ्रूणहेति
त्यर्थः एवमुक्त्वापि तपसाध्यानेन तत्वं प्रत्यवेदयन् प्रतीपं त्र्यवेदयन् हंतारमपि धीपूर्वं ब्रह्महंतारं नहुषं ध्यानेवलेन ज्ञात्वा तथैव लोकेपि प्रमादात्कृतो

शतं चैकं च रोगाणां सर्वभूतेष्वपातयन् ऋषयस्ते महाभागाः प्रजास्वेव हि जाजले ५१ भ्रूणहं तं
हुषं प्राहुर्न ते होष्यामहे हविः इत्युक्त्वा ते महात्मानः सर्वे तत्त्वार्थदर्शिनः ५२ ऋषयो पतपः शांतास्त
पसा प्रत्यवेदयन् ईदृशानशिवान् घोरानाचारानिह जाजले ५३ केवलाचरितत्वात्तु निपुणान्नावबु
ध्यसे कारणाद्धर्ममन्विच्छन्न लोकचरितं चरेत् ५४ यो हन्याद्यश्च मां स्तौति तत्रापि शृणु जाजले स
मौ तावपि मे स्यातां न हि मेस्ति प्रियाप्रियं ५५

पिगोवधो व्याधिरूपेण सर्वलोकापकाराया भूत् किमुत बुद्धिपूर्वकृत इति ज्ञापितवंत इत्यर्थः ५३ केवलेति मधुपर्कादौ गवालं
भः पूर्वकृत इत्यं धर्मपरंपरामात्रात्कृतोपि न तु तत्वबुद्ध्या कारणात् हेतुतः यत्नभूतानामभयं स धर्म इति जानीयान्न गतानुगतिकः स्यादि
त्यर्थः ५४ प्रियाप्रिये हर्षविषादौ तौ हि हिंसायां प्रवर्त्तयतः तथा चापस्तंबः हृष्टो दृप्यति दृप्तो धर्ममतिक्रामति धर्मातिक्रमान्नश्यतीति
क्रुद्धो हन्यात् पिंत्यं न पीतिता तस्मात्सर्वभूताभयप्रदानमेव महान्धर्म इत्याशयः ५५

एतदितिसेव्यतेधर्मः निपुणैः नचक्षुषाउपलक्षितः ५६ षडशीतितमः पंचाष्टिंदंतिवृषणानितत्पादिनाकृषिंदूषयतात्वयालोकद्वयंनाशि
तमित्याहत्र्यपमिति २ नास्तिकाहिंसात्मकत्वनयज्ञनिंदा ३ वृत्तिंत्रहिंस्रांजीविकांवक्ष्यामिवच्मिश्रस्मद्वृत्त्यावानप्रस्थवृत्त्या

एतदीदृशकंधर्मंप्रशंसंतिमनीषिणः उपपन्नाहिंसंपन्नायतिभिश्चैवसेव्यते सततंधर्मशीलैश्चनिपुणैर्नोपल
क्षितः ५६ शांतौमोक्षधर्मेषुतुलाधारजाजलिसंवादे जाजलिरुवाच अयंप्रवर्तितोधर्मस्तुलाधारत्वयासु
गद्वारंचवृत्तिंचभूतानामवरोत्स्यते १ कृष्याह्यन्नंप्रभवतिततस्त्वमपिजीवसि पशुभिश्चौषधीभिश्चमर्त्याजी
वंतिवाणिज २ ततोयज्ञःप्रभवतिनास्तिक्यमपिजल्पसि नहिवर्तेदयंलोकोवार्त्तामुत्सृज्यकेवलां ३ तुलाधारउ
वाच वक्ष्यामिजाजलेवृत्तिंनास्मिब्राह्मणनास्तिकः नयज्ञंचविनिंदामियज्ञवित्तुसुदुर्लभः ४ नमोब्राह्मणाय
ज्ञायेयेचयज्ञविदोजनाः स्वयज्ञंब्राह्मणाहित्वाक्षत्रयज्ञमिहास्थिताः ५ ॥ ॥ ॥ ॥ ॥

वनेनवाजीविकायाःसंभवात्किंहिंसात्मकयाकृष्येतिभावः नचकृषिद्रोहमात्रास्तिक्यंयज्ञनिंदावाकृतामवतीत्याहनास्मीतितत्रापि
यज्ञवित्श्रेयोवैविष्णुरितिश्रुतेर्यपियज्ञभोक्तारंपरमात्मानंवेदसदुर्लभः ४ ब्राह्मणानांब्रह्मविदांयज्ञःब्रह्माग्नौजीवहविषःस्थागस्मा
सैयोगायेत्यर्थः॥ स्वयज्ञंयोगंक्षत्रयज्ञंहिंसामयंज्योतिष्टोमादि ५

क्षत्रयज्ञंविशिनष्टिलुब्धैरितिहेब्रह्मन्आस्तिकैर्वेदप्रामाण्यवादिभिः वेदवादान्अर्थवादान्तेषांस्तुतिमात्रेतात्पर्यमित्यविज्ञायसत्यवद्
भासमानंस्वरूपतःआनन्तंआविधकब्राह्मणाद्यधासमूलत्वात् लुब्धैःप्रवर्त्तितं तथाचश्रुतिः नीहारेणप्रावृताजल्प्याचासुतृपउक्थशास
श्चरंतीतिअस्यानेनावृताःजल्प्याःअर्थवादगिराःअसुतृपःप्राणपोषकाःउक्थशासःकर्मानुशासनपराः ६ इदमितिपञ्चत्याःयुष्मानसदक्षि

लुब्धैर्हन्तपरैर्ब्रह्मन्नास्तिकैः संप्रवर्त्तितं वेदवादानविज्ञायसत्याभासमिवानृतं ६ ॥
इदंदेयमिदंदेयमितिचायंप्रशस्यते अतःस्तेनंप्रभवतिविकर्माणिचजाजले ७ ॥

णाभिरायुष्मान्प्राचीदिग्घोतुर्दक्षिणाध्वर्योरित्यादिश्रुतिस्मृतिविहितादक्षिणादेया षट्देयाद्वादशदेयाइतितादृशश्चदक्षिणावानयंयज्ञः
प्रशस्यतेअनयाअतोयज्ञादेवस्तेनंलुब्धस्ययजमानस्यसामर्थ्येसतियथोक्तदक्षिणामददतःप्रकर्षेणभवति विकर्माणितस्यकर्माणि
विपरीतान्यपस्कराणिचभवंति यथोक्तंप्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्त्ततेसनाप्नोतिफलंतस्यपरत्रेतिश्रुतिःस्मृतिरितिनास्तियज्ञसमो
रिपुरितिच ७ ॥

एवंक्षत्रपरत्वंनिंदित्वाब्राह्मणापरत्वस्वरूपमाहायंदेवानामुरुकृतंसुकृताजितंहव्यांतदेवत्रिविधमाहनमइतिानमस्कारात्मकेनहविषेतिसामानाधिकरण्यं।
योनमसास्वध्वरइतियज्ञोवैनमइतिहिब्राह्मणंभवतीतिश्रुतिस्मृतिभ्यांनमस्कारस्यैवयज्ञत्वावगतेः तथास्वाध्यायैर्हविषेतिसंबंधः वयमग्नेअर्वता
वासुवीर्यंब्रह्मणावाचितयेमाजनांअतीतिवदस्यापियज्ञत्वश्रुतेः अर्वताअश्वेनब्रह्मणावेदनवाग्नेत्वांचितयेमजानीमातथाचाश्वमेधतुल्य
त्वंब्रह्मयज्ञस्योक्तं आश्वलायनगृह्येपिअतिअग्नअचाहविर्हदात्तंरुंभरामसितेतभवंतक्ष्मराआषभासोवसाउतेत्पतारएवमउक्षाराणाश्वआषभा

यंदेवसुकृतंहव्यंतेनतुष्यंतिदेवताः नमस्कारेणाहविषास्वाध्यायैरोषधैस्तथा ८

श्ववशाश्वभवंतियइमंस्वाध्यायमधीयतइति तथाओषधैर्व्रीहियवादिभिः यस्मुन्यौवैमेधाउदक्रामंसौव्रीहिश्चैवयवश्चभूतावजायेतांतस्मा
दाहुःपुरोडाशसत्त्रंलोक्यमितिचतयोर्हविष्ट्वावगमात्पुरुषाश्वगोऽजादीनांपशूनाममेध्यत्वश्रुतेश्चतरएतउत्क्रांतमेधाअमेध्याःपशवइतितथा
चैतैस्त्रिभिर्हविर्भिर्देवतापूजायज्ञाख्याकर्तव्येतिशास्त्रेवेदेनिदर्शनंप्रत्यायकवचनमस्तितदप्युदाहृतमेव ८

ननुदृष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविता इति भगवता यज्ञानां धनपुत्रादिप्राप्तिफलत्वोक्तेः किं तैर्मोक्षानुपयोगिभिरित्याशंक्याह इष्टेति इष्टं इष्टिपशुसो
मादि आपूर्त्तं तटाकारामादि असाधूनां कामनावतां यज्ञानां हि गवलुब्धमपत्यं भवति समेभ्यो रागद्वेषभ्रष्टेभ्य इष्टादिकर्तृभ्यो नीरपिता पिता दर्शीप्र
जा जायत इत्यर्थः ९ अंतमर्द्धं व्याचष्टे यजमाना इति ऋत्विजो यजमानास्तु यथा आत्मानं सकाममकामं यथा पश्यंति तथा अन्येषामपि प्रजा भवति तत्स्या
हि ऋत्विगोपासनस्य ऋत्विक्कर्तृकस्यापि फलं उभयगामि दृष्टं आत्मनेवा यजमानाय वा यं कामयते तमागायानीतीति १० यज्ञस्य प्रजाहेतुत्वमनुवा

प्रजास्याद्देवतानां हि यथाशास्त्रनिदर्शनं इष्टापूर्त्तादिसाधूनां विगुणा जायते प्रजा ९ लुब्धेभ्यो जायते लु
ब्धः समेभ्यो जायते समः यजमानास्तथात्मानमृत्विजश्च तथा प्रजाः यज्ञात्प्रजा प्रभवति नभसोम्भइवाम
लं १० अग्नौ प्रास्ताहुतिर्ब्रह्मन्नादित्यमुपगच्छति आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ११ तस्मा
त्सुनिष्ठिताः पूर्वे सर्वान्कामांश्च लेभिरे अकृष्टपच्या पृथिवी आशीर्भिर्वीरुधोभवन् १२ ॥ ॥

कं प्रमाणयति अग्नाविति ११ तस्मात्यज्ञात्सुनिष्ठिताः यस्मात्तन्निष्ठाः न तु कामपराः पूर्वे विनापि फलाभिसंधिं सर्वान्कामानन्तान्तरीकृतया
लेभिरे यथोक्तमापस्तंबेन तद्यथाम्रे फलार्थे निमिते छायागंधइत्यनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यंत इति एतदेवाह अकृष्टेति
तथा च कर्षणाभाववन्न गवां भुवो भूमिशयानां वा हिंसा भवति अभवन्फलपुष्पवत्य इति शेषः आशीर्भिः जगतः शुभानुध्यानेन १२ ॥

भा१

नेतेइतिपज्ञानांस्वाविकत्वादात्मनश्वानाधेयातिशयत्वात्नकर्मणः फलंकर्त्तारिपश्यंतिशंकमानाइतिापेत्तेफलमस्तिनवेतिसंदिहानाः अ
साधवः धूर्त्ताः दांभिकाः १३ सस्मेति अप्रमाणेनकृतेकेणप्रमाणंवेदं अशुभंकुर्यात्स पापकृतांलोकान्गछेत्तस्मेतन्वयः सचस
देवात्कृतप्रज्ञोभवतिनकदाचिदपिमुच्यतइत्यर्थः १५ एवंम्लोकत्रयेणफलाभिसंधिमूलंकर्मप्रशस्यदांभिककृतांकिंकौव

नेतेपश्येधात्मसुवाफलंपश्यंतिकिंचन शंकमानाः फलंपश्येयमजेरन्कथंचन १२ जायंतेसाधवोध
र्त्तालुब्धाविन्नप्रयोजनाः सस्मपापकृतांल्लोकान्गछेदशुभकर्मणा १४ प्रमाणानप्रमाणंचयः
कुर्यादशुभंनरः पापात्मासोकृतप्रज्ञः सदेवेहद्विजोत्तम १५ कर्त्तव्यमितिकर्त्तव्यंवेत्तिवैब्राह्मणो
भयं ब्रह्मैववर्त्ततेलोकेनैवकर्त्तव्यतांपुनः १६ ॥ ॥

निंदितोइदानींविद्वदभिसंधिमाहकर्त्तव्यमिति कर्मेत्युत्तरम्लोकादपकृष्यते कर्मनित्यमित्येवकर्त्तव्यंकुतोनित्यंयतः वेइतिनिश्चितं
ब्रह्मणोवेदनिषः भयंवेत्तिकर्माः करणेइतिशेषः ब्राह्मणशब्दार्थमाहब्रह्मेतिलोकेआत्निकृहविर्मत्राग्न्यादिरूपेणब्रह्मैववर्त्ततेइति
योवेत्तिकर्त्तव्यतांकर्त्तुमर्हतांआत्मनिवयोवर्णाध्यासपूर्वकंकर्तृत्वंचपुनर्नैववेत्तिसब्राह्मणइत्यर्थः कर्त्तत्वाभिमानंफलाभिला
षंचत्यक्त्वाकर्मांगेषुब्रह्मदृष्टिंकुर्वाणाअशनपानादाविवस्वरसेनैवकर्माणिकुर्वंतीत्यर्थः १६

पदुक्तं अतःसैन्यंप्रभवतीतिविगुणात्कर्मणोदोषोस्तीतितत्राह।विगुणमिति।एवंविदोब्राह्मणस्यविगुणमपिकर्मज्यायः।तस्याचानुसुष्ठम
वेदेयद्दैवास्मिन्नशंवंकुर्वंतिपदिवनार्चिषेमवामिसंभवतीति अतोस्याभावेपिविदुषोर्चिरादिगतिरस्त्येवकिमुततत्रांगवैगुण्यइति
कृत्यर्थः।किंचैवंविदः।कर्मणिसर्वभूतैःश्वसूकरादिभिरमेध्यपशुभिरुपघातोपिज्यायान् आत्मानुसंधानेहेतुत्वात्तानतुमूढस्य
सांगमपिकर्मज्यायइतिभावः।तस्याफलभावेउपपातफलस्यइदंमेकर्मानेनोपघातेननष्टमितिबुद्धिःतत्पतत्वसंयमःप्रायश्चित्तमुक्तंनान्य
स्याचकारोहेत्वर्थः।तस्याचाम्नातमेतेरयकेोतदाहुर्यस्यगार्हपत्याहवनीयावंतरेणानोवारथोवाश्वावाप्रतिपद्यतेकातत्रप्रायश्चित्तिं

विगुणंचपुनःकर्मज्यायःस्वनुष्ठितम् सर्वभूतोपघातश्चफलभावेचसंयमः १७ सत्य
यज्ञादमयज्ञाश्चापर्यल्लुब्धार्थतस्तपः उत्पन्नत्यागिनःसर्वेजनाआसन्नमत्सराः १८

रितिनैतन्मनसिकुर्यादित्याहुरात्मन्यस्याहिताभवंतीतितच्चेन्मनसिकुर्वीतगार्हपत्यादविछिन्नामुदकधारांहरेत्तंतुतन्वन्नरजसोभा
नुमन्विहीत्याहवनीया[illegible]त्साततत्रप्रायश्चित्तिरिति।अनः।शकटं।रथःत।रणततं।अस्ययजमानस्य।आत्मनिस्वरूपेहियस्मात्तुतोता
नि।अनआदीनिसुपांसुलुगितिसुपोडादेशः १७ एवंविदुषःकर्मयज्ञंप्रशस्ययज्ञांतरमप्याहशिष्टाचारप्रदर्शनमुखेनसत्येति
।अर्थलुब्धाःपरमपुरुषार्थलोभवंतः अर्थेषुधनेषुविषयेषुतृष्णायेषांतेवैराग्यवत्तस्ताइत्यर्थःपरमपुरुषार्थेनैवतृप्ताइतिवा।उ
त्पन्नत्यागिनःस्वस्तनसंग्रहमकुर्वंतःअमत्सराइतिच्छेदः १८

स्वपज्ञोद्योगः। ब्राह्मंवेदंप्रणवं १९ कथंतोषयंतीत्यत आह। अखिलमिति। सर्वब्रह्मप्रणवः कार्यकारणोभयरूपत्वात्। एतद्वैसत्य कामपरंचापरंचब्रह्मयदोंकार इतिश्रुतेः ततअखिलंदैवतं। सर्वदेवतात्मकं। वाच्यवाचकयोरभेदात् ओंकारः सर्वदेवत्य इत्यनुक्र मणिकायांकात्यायनवचनाच्च। अतएवब्रह्मणिब्रह्मविदिस्थितं। अतस्तत्प्यतोस्मिन्तुता ब्रह्मविदस्तस्यचससम्यर्थेषष्ठी ब्रह्मविदित्व समतिदेवाविराडवयवभूता आदित्यादयस्तृप्यंतितथाचोक्तंछांदोग्ये प्राणेतृप्यतिचक्षुस्तृप्यति चक्षुषितृप्यत्यादि

257

क्षेत्रक्षेत्रज्ञतत्वज्ञाः स्वयज्ञपरिनिष्ठिताः ब्राह्मंवेदमधीयंतस्तोषयंत्यपरानपि १९ अखिलंदैवतंसर्वब्रह्म ब्रह्मणिसंश्रितं तुष्यंतितृप्यतोदेवास्तृप्ताः तृप्तस्यज्ञानिनः २० यथासर्वरसैस्तृप्तोनाभिनंदतिकिंचन तथा प्रज्ञानतृप्तस्यनित्यतृप्तिः सुखोदया २१ धर्माधाराधर्मसुखाः कृत्स्नव्यवसितास्तथा अस्तिनस्तत्त्वतोभूय इतिप्राज्ञस्त्ववेक्षते २२

यतस्तृप्यतीत्यादिभुंजानोपिविद्वान्विश्वंतर्पयतिकिमुतयजमानइत्याशयः २० किंचनरसांतरंनाभिनंदतिदृष्टवानतुष्यंति २१ हृत्प्राज्ञाला भेहेतुमाह धर्मेतिधर्माधाराः धर्मकामाश्रयाः धर्मसुखाः धर्मेणैवसुखंयेषां। कृत्स्नंकार्याकार्यव्यवसितंनिश्चितंयैः ईदृशावयंस्मः स्वरूपात्तु द्वोचिदाभासात्मकात्स्थूलात्मकप्राणसंज्ञात्भूयः वहुतरंविश्वव्यापकत्वात्प्राणएवसर्वापेक्षयाभूयानततोपिबहुतरः प्राणाद्युत्तिस्था नंभूतात्मास्तीतिप्राज्ञः कर्मभिः शुद्धांतःकरणईक्षते आलोचयति २२

तितीर्षवः यत्रगत्वानशोचंतितत्ब्रह्मणःस्थानंसात्विकाःप्राप्नुवंतीतिद्वयोःसंबंधःज्ञानंशास्त्रजंविज्ञानंअनुभवःतद्वंतः २४ नैवेतितेतती
र्षवः तस्यनाममहद्यशइतिश्रुतेर्यशोब्रह्मधनैःधनसाध्यैःकर्मभिः सतांवर्त्मयोगंअनुवर्तंतेयजंतेचाविहिंसया २५ विदुः हविष्ट्वेन एतानृत्वि
र्धनानृक्त्विजोनयाजयंतियतःफलार्थिनःधनार्थिनः २६ कथंतर्हितेयज्ञंसंपादयंतीत्यत आहस्वमेवेतिस्वंआत्मनैवअर्थंयज्ञोपकर
णसामग्रीसंकल्पसमकालोत्पन्नांकुर्वाणाःमानसिकंयज्ञंचक्रुः तथाचापरं भि तंत्रितारख्यायिकायांप्रयोगएवंमंत्रलिंगंचत्रितःकूपेवहितोदेवानह

ज्ञानविज्ञानिनः केचित्परंपारंतितीर्षवः अतीवपुण्यदंपुण्यंपुण्याभिजनसंहितं २३ यत्रगत्वानशोचंतिनच्य
वंतिव्यथंतिवा तेतुतद्ब्रह्मणःस्थानंप्राप्नुवंतीहसात्विकाः २४ नैवतेस्वर्गमिच्छंतिनयजंतियशोधनैः सतांवर्त्मा
नुवर्तंतेयजंतेत्वविहिंसया २५ वनस्पतीनोषधीश्चफलंमूलंचतेविदुः नचैतानृत्विजोलुब्धायाजयंतिफला
र्थिनः २६ स्वमेववार्थंकुर्वाणायज्ञंचक्रुःपुनर्द्विजाः परिनिष्ठितकर्माणःप्रजानुग्रहकाम्यया २७ तस्मात्तानृत्विजो
लुब्धायाजयंत्यशुभान्नरान् प्रापयेयुःप्रजाःस्वर्गंस्वधर्माचरणेनवै २८ ॥ ॥ ॥ ॥

यंतऋतवइति ऋतवेयज्ञसंतानविच्छेदाय परिनिष्ठितंसमापितंकर्मयैस्तेतथाभूताअपिलोकानुग्रहार्थंमानसैर्यज्ञैर्यजंतेइत्यर्थः २७ यस्मादे
वंविधानलुब्धाऋत्विजोनयाजयंतितेचतान्नेच्छंतितस्मात्तानेवअशुभान्मोक्षेच्छारहितान्लुब्धाऋत्विजोयाजयंतीत्याहतस्मादिति इतरेतुसात्विकाः
स्वधर्माचरणेनपरानुपकुर्वंतिनतुधर्मफलंकामयंतेसमबुद्धित्वादित्याहप्रापयेयुरिति २८ ॥

इतीतिइतिहेतोः सदसद्वृत्तेर्विभिन्नत्वादहं सद्वृत्तमेवानुसरामीत्यर्थः २६ यानीति यानिमार्गदेवतानि धूमरात्र्यादीनि पुनरावृत्तिप्रदमार्गप्रदर्शका
नि अर्चिरहरादीनि अपुनरावृत्तिप्रदमार्गप्रदर्शकानि वा प्राज्ञाः कर्मिण उपासकाश्च वाइज्यंति यजंते तेन यज्ञेन नतं यथा यथोपासते तथैव तः प्र
त्याभवतीति श्रुतेस्ते यज्ञमानाः यथाभावनं तेन तेन देवयानेन यथामार्गेण अत्र पितृयाणोपि देवयानपदेनोच्यते ते पितृलोकं देवलोकं वा यांति

इतिमेवर्त्ततेबुद्धिः समासर्वत्रजाजले २९ यानियज्ञेष्विहेज्यंति सदाप्राज्ञाद्विजर्षभाः तेनतेनैव देवयानेन
यथायांतिमहामुने ३० आवृत्तिस्तत्रचैकस्य नास्त्यावृत्तिर्मनीषिणः उभौतौ देवयानेन गच्छतो
जाजले यथा ३१

कर्मिणः पितृलोको विद्यया देवलोक इति श्रुतेः ३० तस्य देवयानेन गतस्यापि एकस्य कर्मठस्यावृत्तिरस्ति अयैतमेवाध्वानं पुनर्निवर्त्तंत इ
ति धूमादिमार्गेणागतानामावृत्तिश्रुतेः मनीषिणः मनोराधनशीलस्योपासकस्य नास्त्यावृत्तिः नच पुनरावर्त्तंत इत्यर्चिरादिमार्गगतानाम
नावृत्तिश्रुतेः उभौ कर्मठोपासकौ देवैः धूमाग्न्यादिभिरातिवाहिकैः सहयांत्यस्मिन्निति देवयानस्तेन दिव्येनमार्गेण यद्यप्युभावपि गच्छतस्त
थापि संकल्पभेदात्तयोरावृत्त्यानावृत्तीभवत इति महद्वैलक्षण्यमित्याशयः ३१

विदुषामस्य संकल्पानामैश्वर्यमाह स्वयमिति अनडुह इत्युपलक्षणं सर्वेषां सौभपदीनामिव संकल्पेनैव सिद्ध्यतीत्यर्थः उस्राः धेनवः तेषां क्रतवोपि मानसिका
एवेत्याहर्द्धिन स्वयमिति। सिद्धसंकल्पत्वाद्यूपदक्षिणादीन्मनसैव सृजंतीत्यर्थः ३२ ततश्च किमित्यत आह यइति भावितात्मा योगाभ्यासेन शोधितचित्तः
समधुपर्कं गां आलब्धुं हिंसितुमर्हति न कर्मणा लिप्यते पापकेनेति विदुषि दोषालेपश्रुतेः इतरस्तु पशुवीजादिवधात्प्रत्यवै[illegible]त्येवेत्याह न तादृशा

स्वयं चैषामनडुहो युञ्जंति च वहंति च स्वयमुस्राश्च दुह्यंते मनःसंकल्पसिद्धिभिः ३२ स्वयं यूपानुपादाय यजंते स्वा
प्तदक्षिणैः यस्तथा भावितात्मा स्यात्स गामालब्धुमर्हति ३३ ओषधीभिस्तथा ब्रह्मन्यजेरंस्ते न तादृशाः
इति त्यागं पुरस्कृत्य तादृशं प्रब्रवीमि ते ३४ निराशिषमनारंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं दे
वा ब्राह्मणं विदुः ३५ नाश्रावयन्न च यजन्न ददद्ब्राह्मणेषु च काम्यां वृत्तिं लिप्समानः कां गतिं यासि जाजले
इदं तु दैवतं कृत्वा यथा यज्ञमवाप्नुयात् ३७

इति मूढाः न गवौषधादिभिर्यष्टुमर्हा इत्यर्थः इतीति यस्मात्त्यागिनामीदृक्माहात्म्यं तस्मात्तेऽतिरित्यर्थः ३४ संक्षेपेण त्यागिनो लक्षणमाह निरा
शिषमिति ३५ कां गतिं यासि तस्मादाहरयजमानमददानमाहुरासुरं चेति श्रुतेः स च आसुरः कामपि गतिं देवमार्गं पितृमार्गं वा न यातीत्यर्थः ३६
कथं तर्हि गतिं यातीत्यत आहार्द्धेन इदमिति। इदं निराशिषमिति श्लोकोक्तं लक्षणं दैवतं दैवतमिव सेवनीयं कृत्वा यथा पापवत् यज्ञं परमात्मानं य
सो वै विष्णुरिति श्रुतेः अवाप्नुयात् ३७ ॥ ॥

मो० २५९

मुनीनांस्वयंप्रपन्नानुपादायपयज्ञेनस्वाप्नुदक्षिणांरित्युक्तरूपाणामात्मयाजिनांसतत्त्वंरहस्यंनसम्यक्शृणुमेनकृतवंतोवयोपतःकष्टंगहनंयतस्वांपृष्ठा
ति। अस्ययोगधर्मस्यनावेक्ष्यमाणाः नचआलोचनंकृतवंतः अवेक्ष्यमाणाअपिअतःपरमपितंधर्मंनस्थापयंतिलोकेनप्रवर्त्तयंतिरहस्यत्वादेव ३८
यस्मिन्निति। विभक्ति प्रतिरूपकमव्ययंयथाघर्मेयथेवंतद्वत्प्रकारेणआत्मतीर्थेआत्मैवतीर्थंयज्ञभूमिस्तत्रपशवःपशुप्रायाःमंदमतयो
मखंमानसिकंक्रतुंनप्राप्नुयुःतस्मात्तेवह्नपुराणसाध्यत्वात् ३९ अयंतर्हिप्राप्नुयात्प्राप्नुयुःवचनव्यत्ययआर्षः ततकर्मणैतवाक्यमिति
शेषः। उतेतिएकउतशब्दोऽधिकविवक्षायां। अन्योऽपर्ये किंचयेषांदांतिकानांयज्ञाअपिअश्रद्धादिराहित्यात्अयज्ञाभवंतितेकेचित्अ

२५९

जाजलिरुवाच नैवंमुनीनांशृणुमःस्मृतंत्वंपृच्छामितेवाणिजकधर्ममेतत् पूर्वंपूर्वंचास्यनावेक्ष्यमाणानातः
परंतमृषयःस्थापयंतियस्मिन्नेवात्मतीर्थेनपशवःप्राप्नुयुर्मखं ३९ अथस्वकर्मणाकेनवाणिजप्राप्नुयात्सु
खं शंसमेतन्महाप्राज्ञभृशंवैश्रद्दधामिते ३९ तुलाधारउवाच उतयज्ञाउतायज्ञामखंनार्हंतिकेचित् ४० आ
ज्येनपयसादध्नापूर्णाहुत्याविशेषतः वालैःशृंगेणपादेनसंभवत्येवगौर्मखं ४१ ॥ ॥ ॥

तद्वहिर्वामखंनार्हंति ४० अश्रद्दधानानांतुएकयागवैवबाह्यक्रतुसिद्धिरित्याहआज्येनेति दर्शपूर्णमासयोःअपंतेसर्वस्मिन्वास्तवत्स्याग्न्यस्येतय
द्भ्वापामाज्यंसंप्रदंपयोऽमावास्यायांसंदंदध्यमावास्यायां। आधानप्रकरणेचद्वादशगृहीतेनस्रुचंपूरयित्वासहवत्यापूर्णाहुतिंजुहोतीति। आ
ज्येनेतिशेषःसुग्रहेअग्नेसमिधस्पृचा विशेषतइतिश्रोतमखोदर्शितःतत्राशक्तानांतुवालैःगोपुच्छपिच्छतर्पणादिनाशृंगेणगोशृंगेणाभिषे
कादिनापादेनेतिपादरजसेत्यर्थःएतेषांगोस्पर्शनादीनांचसर्वपापनाशकत्वंपरलोकप्रदत्वंचस्मृतिषुदर्शितं ४१ ॥

राम० २५९

ननुपशुभावेविशेषवान्श्रौतमखः कथंस्यादित्यतआहपत्नीमिति। अनेनपशुहिंसारहितेनाआज्यादिसाध्यक्रतुविधिनाआज्यादिद्रव्यंदेवताभ्योपिवि
नियोजयन्नेहेलोशात्संतापः विनियोगहेतोः पत्नींचमानसीमेवकरोति। श्रद्धामितिशेषः तस्मादपत्नीकोग्निहोत्रमाहरेत तस्मादपत्नीकस्या
धानंकुर्वीतेत्युक्ताश्रद्धापत्नीसत्यंयजमानइतिवह्वृचब्राह्मणे। अपत्नीकस्याग्निहोत्राधानादौश्रद्धायाः पत्नीत्वदर्शनात्। दृष्टंभावेनः
यागमेवदेवतवदत्यंतसवनीयंकृत्वायपापयावत्यज्ञंविसृज्यप्राप्नुयात् ४२ तत्रयागविशेषेनियमं यतिपुरोडाशेहीतिहिशब्देनतरगत

पत्नींचानेनविधिनाप्रकरोतीतिनियोजयन् इष्टंतुदेवतंकृत्वायपापयज्ञमवाप्नुयात् ४२ पुरोडाशेहिसर्वे
षांपशूनांमेधउच्यते सर्वानद्यः सरस्वत्यः सर्वेपुण्याः शिलोच्चयाः ४३ जाजलेतीर्थमात्मैवमास्मदेशा
तिथिर्भव एतानीदृशकान्धर्मान्नाचरन्निहजाजले ४४

उत्क्रांतमेधाअमेध्याः पशवइतिपशूनाममेध्यत्वंतस्मादाहः पुरोडाशमत्रंलोक्यमितिपुरोडाशास्यत्रप्राशस्त्यंचश्रुतिप्रसिद्धंद्योत्यतेमेधो
यज्ञस्तदर्हः मेध्यः सर्वेषांवाएषपशूनांमेधेनयजतेयः पुरोडाशेनयजतइतिश्रुतेः। मूलपशूनामितिननिर्द्धारणेषष्ठीपशूनाममेध्यत्वा
त्पुरोडाशस्यचापशुत्वात्। तेनपशुसंबंधोयोमेधस्तदर्हः पुरोडाशइतिश्रुत्यनुसारेणास्यतर्पणोवर्णनीयः ४२ एवंश्रद्धावतामविदुषां
यज्ञमुक्त्वाविदुषांयज्ञमाहसर्वाइतिातीर्थयज्ञभूमिः यत्रैवात्मसमाधानंतत्रैवसर्वाणितीर्थानिसंतीत्यर्थः। तीर्थमितियज्ञाद्युपलक्षणं
४३ ईदृशकान् अहिंस्रान् कारणैः अर्पितसमर्पत्वविद्वत्वतारतम्यैः ४४

उपपत्त्यायुक्त्या ४५ सप्ताशीतितमः॥ ॥एवंक्रूरत्वविरोधेनाहिंसात्मकोधर्मप्रतिपादितः।तत्रदृष्टप्रत्ययोत्पादनपूर्वकंद्रढयितुमारभतेसन्दि
रिति।क्रियतांकुरु।पंथानंआतिष्ठ अस्यफलंचत्वयाप्रत्यक्षंक्रियतामित्यध्याहृत्यवाक्ययोजना आहूयततफलेयपातयाज्ञास्यसीतिचतुर्थेसंबंधः २
२।१

कारैरोर्धर्ममन्विच्छन्मलोकानाप्नुतेशुभान् भीष्मउवाच एतानीदृशकान्धर्मान्तुलाधारःप्रशंसति उपपत्त्याभिसं
पन्नान्नित्यंसद्भिर्निषेवितान् ४५ शांतौमोक्षधर्मेषुतुलाधारजाजलिसंवादे तुलाधारउवाच सद्भिर्वायदिवाऽ
सद्भिःपंथानमिममास्थितं प्रत्यक्षंक्रियतांसाधुततोज्ञास्यसितद्यथा १ एतेशकुंताबहवःसमंताद्विचरंति
ह तवोत्तमांगेसंभूताःश्येनाश्चान्याश्चजातयः २ आहूयैनान्महाब्रह्मन्विशमानांस्ततस्ततः पश्यैमान्हस्तपा
दैश्चश्लिष्टान्देहेषुसर्वशः ३ संभावयंतिपितरंत्वयासंभाविताःखगाः असंशयंपितावैत्वंपुत्रानाहूयजाजले
४ भीष्मउवाच ततोजाजलिनातेनसमाहूताःपतत्रिणः वाचमुच्चारयंतिस्मधर्मस्यवचनात्किल ५ ॥

ततस्ततःतेषुतेषुनीडेषुप्रवेशायश्लिष्टान्संकुचितहस्तपादान् ४ वाचमुच्चारयंतितिनिःशंकुंप्रत्युत्तरंप्रयच्छंतीत्यर्थः।तत्रहेतुः धर्मस्यअहिंसा
त्मकस्यसंबंधिनोवचनात्प्रियवचनादित्यर्थः ५ ५

260

सर्वं अहिंसाधर्मं प्रत्यक्षमनुमाय फलितमाह। अहींसादीति हिंसा आदिपदार्थः इह परत्र च प्रत्यक्षफलमिति शेषः तत्र हि फलमनुमेवेन द
र्शयित्वा हिंसाफलमाह अश्रद्धामिति। हिंसा अश्रद्धां विम्ब्वा संनिहंतीत ध्याहत्यपोऽयं तं विम्ब्वा सघातिनं ६ समानो लाभालाभयोस्तुल्या
नां संयतानां दांतानां सुचेतसां शांतानां यज्ञः कर्म ब्रह्म इत्येवाभिसंधाय कुर्वतां यज्ञमनुतिष्ठतां न तु कर्तृत्वाभिमाने फलं चाभिसंधा
यति एवार्थः तेषां यज्ञो जातु कदाचिन्न त्यज्यत इति न किंतु विष्ठत एव ७ अश्रद्धां सैति अश्रद्धे इत्यादिना विवस्वान प्रकाशरूपश्चिदात्मा

अहिंसादिकृतं कर्म इह चैव परत्र च अश्रद्धा निहंति वै ब्रह्मन्सा हता हंति तं नरं ६ समानो अश्रद्दधानानां संयतानां
सुचेतसां कुर्वतां यज्ञ इत्येवं न यज्ञो जातु नेष्यते ७ श्रद्धा वैवस्वती सेयं सूर्यस्य दुहिता द्विज सावित्री प्रस
वित्री च बहिर्वाङ्मनसी ततः ८ वाग्वृद्धं त्रायते श्रद्धा मनोवृद्धं च भारत श्रद्धावृद्धं वाङ्मनसी न यज्ञस्त्रातु
मर्हति ९ ॥

तत्संबंधिनी वैवस्वती ब्रह्मविषयिणीति यावत् सेयं सूर्यस्य सूर्यवत्प्रकाशधर्मिणः आत्मनः दुहितेव दुहिता सात्त्विकीत्यर्थः सैव च श्रद्धा सावित्री
पालयित्री प्रसवित्री वि शुद्धजन्मप्रदा तथा वाङ्मनसयोरपि सांतरंगनिश्चयात्मिका हि श्रद्धा संकल्पात्मकं संशयात्मकं मनस्ततो बहिरं
गं ततोऽपि वा बाह्यतरा वाक् जपध्यानजधर्मापेक्षया श्रद्धे द्वे श्रेष्ठ इत्यर्थः ८ एतदेवाह वाग्वृद्धामिति। वाचा स्वरवर्णविपर्यासेन पाठि
तं नष्टं मंत्राद्युच्चारणात् तत् श्रद्धा समाधत्ते मनसा व्यग्रेणापूत नष्टं देवताध्यानादि तत् श्रद्धा समाधत्ते श्रद्धाहीनं तु व्यर्थमेव कर्म त्रातो
न त्रातुमर्हति किंचित् ९ ॥

मो०
२६१

श्रद्धाशुचित्वयोः श्रद्धाधिकत्वमत्राख्यायिकामाहात्रेति १० कदर्यस्य कृपणस्य वार्द्धुषिः धान्यविक्रयिणः मीमांसित्वा विचार्य १२ हविर्दातु

अत्र गाथा ब्रह्मगीताः कीर्त्तयंति पुराविदः शुचेरश्रद्दधानस्य श्रद्दधानस्य चाशुचेः १० देवा वित्तममन्यंत सदृशं यज्ञकर्मणि श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्द्धुषेः ११ मीमांसित्वोभयं देवाः सममन्नमकल्पयन् प्रजापतिस्तानुवाच विषमं कृतमित्युत १२ श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् भोज्यमन्नं वदान्यस्य कदर्यस्य न वार्द्धुषेः १३ अश्रद्दधान एवैको देवानां नार्हते हविः तस्यैवान्नं न भोक्तव्यमिति धर्मविदो विदुः १४ अश्रद्धा परमं पापं श्रद्धा पापप्रमोचनी जहाति पापं श्रद्धावान् सर्पो जीर्णामिव त्वचं १५ ज्यायसी या पवित्राणां निवृत्तिः श्रद्धया सह निवृत्तशीलदोषो यः श्रद्धावान् पूत एव सः १६ किं तस्य तपसा कार्यं किं वृत्तेन किमात्मना श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः १७ इति धर्मः समाख्यातः सद्भिर्धर्मार्थदर्शिभिः वयं जिज्ञासमानास्तु संप्राप्ता धर्मदर्शनात् १८ ॥ ॥

मिति शेषः १५ निवृत्तः शीलदोष आचारलांछनं रागादिर्यस्य स निर्दोषशीलवान् १६ यत्तपा सात्विकी राजसी तामसी वा श्रद्धा यस्य स यच्छ्रद्धः स एव सः सात्विको राजसस्तामसो वा १७ धर्मदर्शनाख्यात्मुनेः धर्मं वयं प्राप्तवंतः १८

शां०
२६१

261

श्रद्धावान्वेदवाक्ये। श्रद्दधानस्तदर्थमनुष्ठातं ममेदं श्रेय इति निश्चयवान् धर्मो धर्मात्मा गरीयान्श्रेष्ठतरः १८ अचिरेणाल्पेन। दिवं हार्दाकाशाख्यं ब्रह्म विहरेतां
सत्यकामः सत्यसंकल्प इति श्रुतेः योगैश्वर्येण क्रीडाम कुरुतां। स्वस्वस्थानं वासदेशं स्वकर्मभिः परिवर्जितं २१ पक्षोपम्योपदेशेन यथावद्दृष्टांतकीर्ति

श्रद्धां कुरु महाप्राज्ञ ततः प्राप्स्यसि यत्परं श्रद्धावानश्रद्दधानस्वधर्मश्चैव हि जाजले स्ववर्त्मनि स्थितश्चैव गरीयानेव जाजले १८
भीष्म उवाच ततोऽचिरेण कालेन तुलाधारः स एव च दिवं गत्वा महाप्राज्ञौ विहरेतां यथासुखं १९ स्वस्वस्थानमुपागम्य स्वक
र्मपरिवर्जितं एवं बहुविधार्थं च तुलाधारेण भाषितं २० सम्यक्चैवमुपालब्धो धर्मश्चोक्तः सनातनः तस्य विख्यातवीर्यस्य
श्रुत्वा वाक्यानि स द्विजः २१ तुलाधारस्य कौंतेय शांतिमेवान्वपद्यत एवं बहुमतार्थं च तुलाधारेण भाषितं प[illegible]थोप
म्योपदेशेन किं भूयः श्रोतुमिच्छसि २२ शांतौ मोक्षधर्मेषु तुलाधारजाजलिसंवादः॥ ॥भीष्म उवाच अत्राप्युदाहरंतीम
मितिहासं पुरातनं प्रजानामनुकंपार्थं गीतं राज्ञा विचख्नुना १

निश्चागम इति तर्कशास्त्राणि वेदार्थनिर्णायकानि पूर्वोत्तरमीमांसे सांख्ययोगे न लेव यत्र वेदस्य स्वतः प्रामाण्यमास्थीयते नानुमानांतरसंवादसापेक्षं ४३

ति१

नाम्नेतानि यथाश्रमं स्वाश्रमधर्ममनतिक्रम्य उपासीनत तत्रापि चागमः मीमांसाहृपोपगृहीतः सिद्धान्तो सांख्य पातंजलेत्वंशतो वेदविरोधान्न सिद्धान्तः तथाहि
सांख्यो रहिंसैव उपशमस्ते पातंजले स्वचित्तनिरोध एव तत् उभौ प्रागाद्यनुष्ठानप्रतिबंधकौ अतो न सिद्धान्तः तु तुष्ट्याख्यायते जोऽनिलं तेन समुच्छ्रिते पंचात्मके
योगगुणोदृष्टे न तत्र रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति पंचभूतजयाद्योगिनामपि अजरत्वामरत्वादि सिद्धिः प्रत्यक्षागममूलाद्दृश्यते सत्य
प्रतिक्षणपरिणामिनः जन्मवतः शरीरस्याजरत्वामरत्वे प्रत्यक्षानुमानविरुद्धे अतः प्रापत्यक्षमत्वरूपमिव रूपं प्रसार्य सत्क्षाविरुद्धत्वात् अनुमानाविरुद्धा
च आगमनिष्ठा प्रादृश्यति दृश्यते गत्यागतिं दिव्यभोगप्राप्त्यादिरूपा सैव सिद्धिरिति ४५ एवमुपपन्नत्वं स्वमतं परमतजिज्ञासया । निंदति नो नर्वी ति । य

टी२ ति२

यथाश्रममुपासीत स्वागमस्तत्र सिद्ध्यति सिद्धिः प्रत्यक्षरूपाच दृश्यत्यागमनिश्चयात् ४५ नौर्नावीव निबद्धा हि स्रोतसाम
निबंधना । ह्रियमाणा कथं विप्रकुबुद्धीस्तारयिष्यति एतद्ब्रवीतु भगवानुपपन्नोऽस्म्यधीहि भो ४५ नैव त्यागी न संतप्तो ना
शोको न निरामयः नानिर्विधित्सो नारब्धो नोपपन्नोऽस्ति कश्चन ४५ ४६

थाना विनिबद्धा नौः स्रोतसा ह्रियमाणा न तारयत्येवमंध परंपरया कर्मनौकां स निबंधनां पूर्वपूर्वकर्मवासनाबंध वत्नीमाश्रिता वयं जन्मजरामृत्युप्रवाहे
न नानेकृमाइत्यर्थः फलितमाह एतदिति एतन्नः प्रकृतम् उपपन्नं उपसन्नः शिष्योऽस्मि अधिकार्यस्मीति वा अधीहि अध्यापय ४५ ननु तर्हि तिशोकमा
त्मविदिति त्वयाप्यधीतमस्येव निर्दिष्टानि नेमस्कारो इत्यादिना मयाप्युक्तं च किमतः परमध्यापयितव्यमित्याशंक्याह तत्र उपसंहृतविरोधमुपपन्नस्यत्ति नैवे
ति नापुरुषः निर्विधित्सः चिकीर्षाशून्यः आरब्धः संगविमुक्तः अपहृतः निष्कर्मा ४५ ४५ ४५ ४५ ॥

प३

ह३ ह२ ति२ धी१

एकं सर्वेषामेक्षितं सत्वार्थिनां वर्णादीनां निर्णये सिद्धांते किं सर्वं निरामयं अप्रपञ्चपहीनं तत्रहीनिष्ठैवेत्यसंबंधः ४७ अत्रोत्तरमाह यथदिति।
वैदिकमवैदिकं यथं शास्त्रं यस्य यस्मो कृ शास्त्रमार्थं आचरते सम्यगनुष्ठति भावकर्मणोरिति [illegible] कर्मणि तत्र तन्नत्र अर्थी अर्थान्तश्रयोजनमारनपे
तं सफलं एतत् सिद्धमेवेत्याहयस्येति अयं भावः सर्वत्तानं धर्मिणप्राप्तं तत्प्रकारेणं विय र्यपरत्तिमायेन सर्वेषां धेरत्वरत्वे साक्षात्का[illegible]साधनेव कृतमीलनादौ च
नविगानं। एवं आत्मनिवादिप्रतिपत्याः नेकेषु विकल्पेषु मूलं कृणोकविज्ञानं कर्तीभोक्तेत्यादिशुतत्वपि मोक्षेतत्वरूपं निरस्ताशविषयदर्शनं तत्साधनं च

भवंतोपि [illegible] वत्तृष्यंति शोचंति च पथावयं इंद्रियार्थारव्यभवतां मममानाः सर्वजंतुषु ४६ एवं च वर्णाविर्णानामाश्रमा
णां प्रवृत्तिषु एकमालंबमानानां निर्णये किं निरामयं ४७ कपिल उवाच यथदाचरतेशास्त्रमर्थ्यं सर्वप्रवृत्तिषु
यस्संत्रत्तमनुष्ठानं तत्तत्तन्निरामयं ४८

श्रमदमोपरमीतितिक्षाश्रद्धासमाधानात्मकमविगीतं एवंव्यावहारिकप्रक्रियापां विगानेपि फलसाधनयोरविगानात् यत्रप्रज्ञमते स्थित्वाः स्वशमाद्यनुष्ठानं सं
पद्यते तत्त्रन्निरामयं सर्वदोषमूलं संसाररूपं लभ्यते एतेनात्मतत्त्वं तर्कशास्त्रेभ्यइतिष्टवेवाद्युक्तं शास्त्रांतरविग[illegible]पादेयाशास्त्रविज्ञानादेवेस्युक्तं। उक्तं च व्यावहा
रिकप्रक्रियाणां सर्वासाम विगीतत्वमनवस्थितत्वं च। यथायथाभवत्तं संस्तुत्तिः प्रगात्मनि। सातैव प्रक्रियाहेयासाध्वीसा चानवस्थितेति ४८

स१ नमुर

ज्ञानमितिपयोक्तसाधनानुष्ठानादुत्पन्नंज्ञानंसर्वंसंसारंनाशयति। कस्ययोज्ञानंत्वनुवर्ततेतस्यज्ञानंविनायावैदिक्यपिवृत्तिः सानाशयतिजन्ममरणप्रवाहपातनेन पुनः क्लेशयति ४९ एकएवाद्वैतदर्शनहीनः आत्मायत्रभवतितत् एकात्म्यंनामज्ञानंभवतांज्ञानिनांमध्येकश्चिदुपपद्यतेउपसन्नोभूत्वाप्राप्नोतिनै

टर

ज्ञानंत्रावयतेसर्वंयोज्ञानंत्वनुवर्तते ज्ञानादपेतयावृत्तिः साविनाशयतिप्रजाः ४९ भवंतोज्ञानिनोव्यक्तंसर्वतश्चनिरामयाः ऐकात्म्यंनामकश्चिद्धिकदाचिदुपपद्यते ५० शास्त्रंत्ववुध्यमानत्वेनकेचिद्वादबलाज्जनाः कामद्वेषाभिभूतत्वादहंकारवशंगताः ५१ यथातथ्यमविज्ञायशास्त्राणांशास्त्रदस्यवः ब्रह्मस्तेनानिरारंभादंभमोहवशानुगाः ५२ नैर्गुण्यमेवपश्यंतिनगुणाननुयुंजते तेषांतमः शरीराणांतमएवपरायणं ५३ योयथाप्रकृतिर्जंतुः प्रकृतेः स्याद्वशानुगः तस्यद्वेषश्चकामश्चक्रोधोदंभोनृतंमदः ५४ नित्यमेवाभिवर्तंतेगुणाः प्रकृतिसंभवाः एवंध्यात्वानुपश्यंतः संत्यजेयुः शुभाशुभं परांगतिमभीप्संतोयतयः समयेरताः ५५ ॥ प३ ॥ ॥ ति१ ॥ ॥ ॥ ॥

वेत्यर्थः शमाद्यभावात् ५० अतः सर्वंस्वयंप्राप्ताइतिमाहशास्त्रंहीत्यादिना ५१ ब्रह्मत्रिविषयश्चिद्वेदश्चतंस्ववक्तृतस्तेनाः अयलापकत्रीः निरारंभाः शमाद्यारंभशून्याः ५२ नैर्गुण्यफलाभावं गुणानज्ञानैश्वर्यादीनन अनुयुंजतेआत्मसंवेद्यतामापादयरेखुनयोजयंति यायाणावत्त्वयंमजन्नात्मनुदुर्षुंशक्नोतीत्यर्थः ५४ संयमेधारणाध्यानसमाध्यात्मकेसमयेरताइतिपाठेसिद्धांते ५५

एतत्कर्मणां शाश्वतं सनातनं शाश्वतं च प्रवृत्तयः वाचोविलासाः ५८ अनंतं ब्रह्मणस्य इति हिंस्रेदेवमन्येत इति हस्तमाच पदः अत एव शास्त्रादपेतं इहलोकमेव
पश्यंति। शास्त्रदोषान् शास्त्रोक्तान् कृतहानाकृताभ्यागमादिदोषान् अन्याय्यमवैदिकं च मन्यमानाश्च न यथा लोकायताः शोचंति तथा वयमपि शोचाम
इत्यर्थः अत्र हेतुमाह इंद्रियार्थाइति शब्दादीनां [illegible] र्थः सर्वेषामस्वादिराः पशुयाममवंति तानां तत्समरूपइत्यर्थः ५९ एवमिति द्वयोः संबं

स्मरग्निमिवाच सर्वमेतन्मयावहन् शाश्वतः परिकीर्तितं नस्वविज्ञायशास्त्रार्थं प्रवर्तंते प्रवृत्तयः ५६ यः कश्चिन्न्या
य्य आचारः सर्वं शास्त्रमिति श्रुतिः यन्न्याय्यमशास्त्रं तत्क्लिश्यन्त्यप्युपतेक्षति ५७ न प्रवृत्तिर्ऋते शास्त्रात्काचिदस्तीति नि
श्चयः यदन्यद्वेदवादेभ्यस्तदशास्त्रमिति श्रुतिः ५८ शास्त्रादपेतं पश्यंति बहवो व्यक्तमानिनः अविज्ञाय महतप्रज्ञा हीनवद्वा
स्तमोवृताः शास्त्रदोषान्न पश्यंति शोचंति च यथावयं इंद्रियार्थाश्च भवतां समानाः सर्वजंतुषु एवं व्यक्तीर्वर्णानामाश्रमाणां
प्रवृत्तिषु एकमालंब्यमानानां निर्णये सर्वतो दिशं ५९ ज्ञानं त्वं वर्धमानेन शक्येनावर्जितात्मना ॥ ॥

धः एकमस्वाश्रयं नानावर्णाश्रमादीनां मध्ये द्वयं त्वया आत्मना विज्ञानं न आवर्जितः शांतिं नीताः संधिरायः कीदृशेन त्वया निर्णये सिद्धांते सर्वतो दिशं सर्वतः प्रकारं सर्वशा
स्त्रसिद्धांततत्त्वेन ज्ञानं त्वं वर्धमानेन यथा शास्त्रं चरते शास्त्रमित्यत्र आम्नायामा तरीमाप्त्र काशयता। भावनोपसंभावेति वेदे भासनार्थेन शक्येन ऊहापोहकुश
लेन कीदृशा वयं अविज्ञानेन आत्मानमनुभवेन हताप्रज्ञास्तद्रूपनिष्ठायेषां अत एव हीने विषये एव प्रसक्ता येषां। एतयोरेव गता विक्षेपयाः कारण

यद्यपि त्वया इदं निष्ठा उक्ता तथापि दुष्करेत्याह । शक्यं त्विति सार्द्धेन येन सर्वतो दिशं चरितं तं शक्यं तेन न मोक्षोऽस्तीति प्रभाषितं प्रक्रमित्त्वध्यात्त्यव्यवहितेन योज्यं ।
सन्मार्गं विना मोक्षो दुःप्राप इत्यर्थः ६२ अत्रानुपपत्तिमाह सार्द्धेनेदं त्विति कर्मकाण्डस्यैव यथावद्वृत्तिप्रदत्वात् नास्तिक्यं चास्मिन्मते स्यादित्यर्थः ६६
तस्य कर्मकाण्डस्य आनन्त्यं आनन्त्यहेतुत्वं । अयं भावः कर्मज्ञानकाण्डयोः पार्थगर्थ्ये वेदस्यैकस्मिन्नर्थे प्रमाणाभावाद्वाक्यभेदः स्यात्तस्य चासंभवत्वे एकवाक्य

५२

शक्यं त्वेकेन युक्तेन कृतकृत्येन सर्वशः । पिंडमात्रं व्यपाश्रित्य चरितं विजितात्मना ६१ वेदवादं व्यपाश्रित्य मोक्षोऽस्तीति प्र
भाषितं ६२ अपेतन्यायशास्त्रेण सर्वलोकविगर्हिणा । इदं तु दुष्करं कर्म कुवमभिसंश्रितं दानमध्ययनं यज्ञः प्रजासंतानमा
र्जवं ६४ यद्येतदेवं कृत्वापि न विमोक्षोऽस्ति कस्यचित् । धिक्कर्तारं च कार्यं च श्रमश्चायं निरर्थकः ६५ नास्तिक्यमन्यथा
च स्याद्वेदानां पृष्ठतः क्रिया ६६ एतस्यानंत्यमिच्छामि भगवन्श्रोतुमंजसा तत्त्वं वदस्व मे ब्रह्मन्नुपसन्नोऽस्म्यधीहि भो यथा
ते विदितो मोक्षस्तथेच्छाम्युपशिक्षितं ६७ शांतौ मोक्षधर्मेषु गोकापिलीये कपिल उवाच वेदाः प्रमाणं लोकानां न वेदाः पृ

त्वे वाक्यभेदो हि नैष्यत इति न्यायेनाप्युक्तः अतः कर्मकाण्डस्यैव ज्ञान ष्ठतः कृताः द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ ॥ ॥
काण्डशेषत्वं वाच्यं वैपरीत्यस्य प्रागेव निरस्तत्वादिति ६७ चतुर्नवतितमः कर्मणां ज्ञानांगत्वं वक्तुं तद्धेयत्वशंकां तावत्परिहरत्यर्द्धेन वेदा इति १ ॥

शब्दब्रह्मकर्मोपासितिकांडः परब्रह्मप्रतिपादका २ तत्रगर्भाधानमारभ्यकर्मकांडेज्ञानशेषत्वंभजतइत्याह शरीरमितिवेदेउपनिषत्कांडेपततनुंशरीरंकुरुतेगर्भा
धानविधिनाउत्पादयतिविष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतुआसिंचतुप्रजापतिर्धातागर्भंदधातुइत्यादिमंत्रैः ततशरीरमेवकुरुते। विष्णोः देवता
स्मरणपूर्वकमाहितेगर्भेविष्णोःदिवतत्त्वानेस्वर्गसंपन्नएवजीवआविर्भवतिशरीरसंस्कारेणशरीराभिमानिनः स्वास्थ्यदर्शनात् अत्रैववैदिकप्रसिद्धिमाह
कृतेनेतिकृतंश्रौतस्मार्तैःसंस्कारैः पित्रासंस्कृतंशुद्धंवाध्ययनादिनाशरीरंयस्यसब्राह्मणः पात्रंब्रह्मविद्यायोग्यंभवतितत्रश्रौतः संस्कारेजातेस्मार्तैः यस्मिन

शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति शरीरमेतत्कुरुतेयद्देहेकुरुतेतनुं कृतंशुद्धशरीरेहिपात्रंभवतिब्राह्मणः
३ आनंत्यमत्रचवृद्धेदंकर्मणांतदृष्टामिति निरागममनैतिस्वर्गप्रसक्तंलोकसात्विकं ४ ॥ ॥

ज्ञानएतामिष्टिंनिर्वपतिपूतएवसतेजस्व्यन्नादइंद्रियावीपशुमान्भवतीत्युक्तफलकः स्वत्वंतरेयसैनेअष्टाचत्वारिंशत्संस्काराः सर्वसंस्काराःसा
युज्यंसरूपतांसलोकतांजयतीति महापद्मेश्वरपदेईश्वरवाप्नोतीयंक्रियतेननुरिव। एतेनज्ञानेशेषत्वंकर्मकांडस्योक्तंभवति ३ कर्मणांफलंत्वानंत्यंमो
क्षेयोगेचित्तशुद्धिरूपंअत्रचअस्मिन्नेवमोक्षेप्रत्यक्षंउद्यमनाहीं नहिचित्तशुद्धिः स्वसाक्षिकीस्वर्गोवहेदेकगम्यायहैहैकगम्यापर्वतेहिवनअनुमेयावेति
वक्तुंशक्यंनदेहेनदाहइअनागममनैतिस्वर्गमिति ४ ॥

मो० २८५

285

येनकर्मणाकर्मणामानंसहेतत्वंस्मात्तमाह॥धर्मइति॥निराशिषः निष्कामाः उत्पन्नत्यागिनः धनसंग्रहशून्याः कृपामृणाभ्यांरागद्वेषौलक्ष्यौनहृज्जिताः तीर्थेषुसत्पात्रेषु ५ नद्यक्तृणांअनाश्रिताइति॥अग्निहोत्रादिमतः सर्वदायायकर्मानाश्रिताःस्तेतीर्थभूताइत्यर्थः ६ एवंधर्ममनुतिष्ठंतः उद्दृशाभवंती

धर्मइत्येवयेयज्ञान्वितन्वंतिनिराशिषः उत्पन्नत्यागिनोलुब्धाः कृपासूयाविवर्जिताः धनानामेषवैपंथास्तीर्थेषुप्रतिपादनं ५ अनाश्रिताः पापकर्मकदाचित्कर्मयोगिनः मनः संकल्पसंसिद्धाविशुद्धज्ञानदर्शिनः ६ अक्रोधनाह्यनसूयंतोनिरहंकारमत्सराः ज्ञाननिष्ठात्रिशुक्लाश्चसर्वभूतहितेरताः ७ आसन्गृहस्थाभूयिष्ठाअनुक्रांताः स्वकर्मसु राजानश्चतथायुक्ताब्राह्मणाश्चयथाविधि ८ समार्जवंतश्वसंपन्नाः संतुष्टाज्ञाननिश्चयाः प्रत्यक्षधर्माः शुचयः श्रद्दधानाः परावरे ९ पुरस्ताद्भावितात्मानोयथावच्चरितव्रताः चरंतिधर्मंकृच्छ्रेपिदुर्गेचैवापिसंहिताः १० संहत्यधर्मंचरतांपुरासीत्सुखमेवतत् तेषांनासीद्विधातव्यंप्रायश्चित्तंकथंचन सत्यंहिधर्ममास्थायदुराधर्षतमामताः ११ ॥

त्याहमनइतिद्वाभ्यां॥विशुद्धंनिर्विषयंज्ञानंब्रह्मतत्त्वनिश्चयोयेषां ७ ज्ञानेज्ञानोपायेश्रवणमननिदिध्यासनाख्येनिष्ठायेषांते॥अनुक्रांताः आरब्धवंतः ८ राजानोजनकादयः ब्राह्मणाः याज्ञवल्क्यादयः ९ प्रत्यक्षः धर्माधर्मफलंमनसंकल्पत्वादिकंयेषांते परं सोपाधिकंब्रह्मअव-

[illegible]

शां० २८५

त्रिशुक्लाः जन्मकर्मविद्याचेतित्रीणिशुक्लानियेषांते २

1.1

प१ धं१

मात्रांमीयंते विषया स्वनैतिमात्रावुद्धिं त्तानानुसै तेस्वपित शास्त्रमेवानुत्थ्यंते धर्मेच्छलंवंच नां छला भावमेवाह यएवेति १३ तुर्वलात्मनः स्व

नमात्रामनुत्थ्यंते नधर्मच्छलमंततः पररवत्रथमः कल्परत्तमेवाभ्यां वरन्सह तेषांनासीद्द्विधाजैवेप्रायश्चित्तंकदाचन १३ तस्मिन्विधौ स्थितानां हिप्रायश्चित्तंनविद्यते दुर्वलात्मन उत्पन्नं प्रायश्चित्तमितिश्रुतिः १४ एवं बहुविधा विप्रा उपाणापत्तवाहनाः चैविद्यवृद्धाः शुचयोवृत्तवंतोयशस्विनः १५ यजंतोहरहर्यज्ञैर्निराशीर्वधनावुधाः तेषांयज्ञाश्ववेदाश्वकर्माणिचयथागमं १६ आगमाश्वयथाकालंसंकल्पाश्वयथाक्रमं अपेतकामक्रोधानांउश्वराचारकर्मणां १७ स्वकर्मभिः शंसितानां प्रकृत्याशंसितात्मनां ऋजूनांशमनित्यानां स्वेषुकर्मस्ववर्तिनां १८ सर्वमानंत्यमेवासीदितिनः शाश्वतीश्रुतिः तेषामदीनसत्वानांदुश्वराचारकर्मणां स्वकर्मभिः संभृतानांतपोघोरत्वमागतं २० ॥

ति१

शक्रस्य १६ तेषांयज्ञादिकं सर्वंस्वानंत्यमासीदितिनोवेनाश्रयः १७ शंसितानांप्रख्यातानां १८ आनंत्यंब्रह्मशाश्वतीश्रुतिर्गीतावाक्यापर्णांब्रह्मह विरित्या दिः १९ संभृतानांपूर्णानांघोरत्वंस्वविद्यानिवर्तनक्षमत्वं २०

तमितिसार्द्धश्लोकद्वयमेकंवाक्यंपाठक्रममनुरुध्यअर्थक्रमेणव्याख्येयं यः सदाचारः सतांआपद्धर्मोवाणक्ष्मआचारः सदाचारइतिसदाचारलक्षणंस
चअप्रमादः सावधानताअपराभवः कामक्रोधादिभिरनभिभूतः पञ्चवपराव्यतिक्रमः अस्पृश्यस्पर्शनंस्पृश्यानामस्पर्शनंचेत्यादिर्नासीत तंसदाचारं
एकंआश्रमंसंतंचतुर्द्धाव्यस्तंब्राह्मणाआहुः कैश्चित्तंधर्मेषुसूत्रितांनादृत्यधर्मेआचरितुमशक्नुवद्भिस्तथाहिमानसिकंव्यभिचारंवाप्येतन्मदृमेवेवहल

तंसदाचारमाश्चर्यंपुराणंशाश्वतंध्रुवं अशक्नुवद्भिश्चरितंकिंचिद्धर्मेषुसूत्रितं २१ निराशिद्धर्मआचाराअप्रमादो
पराभवः सर्ववर्णेषुजातेषुनासीत्कश्चिद्व्यतिक्रमः २२ अस्तमेकंचतुर्द्धाहिब्राह्मणाआश्रमंविदुः तंसंतोविधिवत्प्रा
प्यगच्छंतिपरमांगतिं २३ गृहेभ्यएवनिष्क्रम्यवनमन्येसमाश्रिताः गृहमेवाभिसंश्रित्यततोन्येब्रह्मचारिणः २४ तप
तेदिविहरंतेज्योतिर्भूताद्विजातयः नक्षत्राणीवधिष्ण्येषुबहवस्तारकागणाः २५

नं२

चारिभिर्गार्हस्थ्यमाश्रितंतत्रकृतैर्यज्ञादिभिः कषायेषुईषत्पक्वेषुवैराग्यवत्त्वंवानप्रस्थमाश्रितं तेष्वेवसम्यक्पक्वेषुपारिव्राज्यमित्यारोहक्रमेण
चातुराश्रम्यंस्थितमित्यर्थः शेषंव्याख्यातं २३ तमितिसार्द्धश्लोकः तंसदाचारंसंतोगृहेभ्योनिष्क्रम्येवतस्मात्संक्रम्यत्वेवविधिवच्चाप्यपरमांगतिंगच्छं
ति विधिवदित्यादिसर्वत्रयोज्यंचतुर्ष्वप्याश्रमेषुउक्तरूपसदाचारवतांमोक्षोस्तीत्यर्थः २५ ॥ ॥

श्री

कुंभे रेतो ऽपतत्ततो ऽगस्त्यवसिष्ठावजायेतामिति वसती वर्यः सोमाभिषवार्था आपः तत्संबंधिनि वासतीवरे ३

संतोषाद्वैराग्यात् ज्ञानं ब्रह्मभावं प्राप्ताः आगस्त्यवसिष्ठादयः आधिकारिका यथा गच्छंति संसारं तथापि पापैः योनिप्रवेशजैर्दुःखैर्न लिप्यंते गृहान्देहांतरप्रवेश
वैदेहिकलेषां देहांतरप्रवेशः यथाम्नातमनुक्रमणिकायां मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुंभे रेतो ऽपतत्ततो ऽगस्त्यवसिष्ठावजायेतामिति वसती
वर्यः सोमाभिषवार्था आपः तत्संबंधिनि वासतीवरे तेषां च पुनर्ब्रह्मविदामपि हिरण्यगर्भस्येव यावदधिकारसमाप्तिर्न विदेहकैवल्यमस्ति । यावदधिकारमवस्थितिराधिका
रिकाणामिति न्यायात् ननु कार्त्स्न्यं कां कर्माङ्गतिकायोगेयः कुर्यात्स्वामिदर्शनं सप्तजन्मभवे द्विपो धनाढ्यो वेदपारगश्चेति एकं कर्मानेकजन्मारंभकं दृष्टं तत्र प्रथमस्मिन्नेव ज्ञा

ज्ञानं समुपसंप्राप्ताः संतोषादिति वैरिकं यथा गच्छंति संसारं जनयोनिषु ताद्दृशा न लिप्यंते पापक
नैः कदाचित्कर्मयोनितः २६

नानित त्वज्ञानोदये पि प्रारब्धकर्मणां भोगादेव क्षय इति न्यायेन प्रारब्धकर्मबलात् द्वन्यानि षड्जन्मान्यनिवार्याण्येवेत्याशंक्याह कर्मयोनितः इति । अत्रेदं विचार्यते किं सप्तजन्मा
नि नेषु च गर्भवासादिनिरुःखानि आशनयानादिजन्यानि सुखानि च किमेकमेव स्वामिदर्शनाख्यं कर्म प्रापयति उत कर्मांतरसमवेतं आद्ये इष्टसाधनत्वाभ्यानिष्टि
तसगर्भवासाद्यनिष्टप्रापकत्वेशास्त्रस्यानर्थकत्वं स्यात् द्वितीये तत्त्वेहाने न कर्मांतरनाशे सप्तजन्मायोगाद्दर्शनशास्त्रानर्थकं स्यात् तस्माद्युक्तमुक्तं प्रारब्धकर्मणो यस्यापि
तयोनिप्रवेश निमित्ततः पापकृत्यैः पापफलैर्दुःखैर्लेनेन लिप्यंत इति २६

३१२ तस्मात् ज्ञातस्यादृष्टाबोभस्तु ध्रुवं जन्मभृतस्य चेति शास्त्रादविछिन्नेन जन्मभरणप्रवाहेस
प्तसु जन्मसु विप्रत्वादिपगोदर्शनफलं न तु सप्तजन्मन्येव १

ब्राह्मणो ब्रह्मवित्त्वेन यथार्थनामा। अन्यो ब्राह्मणको ब्राह्मणब्रुविरुक्तिः दारुगजवन्नाममात्र धारीत्यर्थः २७ एवं ब्राह्मण इति ब्राह्मणक इति च कर्ममर्दं रूपं पुरुषस्य नाम च आह २८
एवं निष्कामकर्मसु अभ्यासात् आनन्त्येन त्वंपदार्थसाक्षात्कारेण तत्त्वमसि वाक्यार्थज्ञानेन सर्वं खल्विदं ब्रह्म आनन्दं प्राकृष्कृतान् ईश्वरो मदन्यः कश्चिदस्तीति निःशंकपाप्समाधौ परिदृश्यमानमेव्या
नंत्यमसर्वमप्रतक्रन्तानन्तरं तत्सर्वमित्यर्थः आसीदित्यनेन सर्वानन्त्यसाक्षात्वेन मत्वमुक्तं। शाश्वती श्रुतिः केवलं चापि … मां विद्धीति। तत्त्वमसीति च जीवस्य सि … स्व ब्रह्मभाव
कीर्त्तनात् २९ निर्णिक्तानां विशुद्धानां शुभात्मनां मोक्षबुद्धीनां वचनार्थः जायन्ते … सुसाभिमानि विश्वतैजसप्रा … ज्ञानत्रयेषु उपचनार्थः निर्विशेषः परं … त्मा तद्विषयि

एवमेव ब्रह्मचारी शुश्रूषुर्घोरनिश्चयः एवं युक्तो ब्राह्मणः स्यादन्यो ब्राह्मणको भवेत् २७ कर्मैवं पुरुषस्याहुः शुभं वाय
दि वाशुभं २८ एवं पक्वकषायाणामानन्त्येन श्रुतेन च सर्वमानन्त्यमासीद्धि एवं नः शाश्वती श्रुतिः २९ तेषामयेतत्
ज्ञानं निर्णिक्तानां शुभात्मनां चतुर्थोपनिषद्धर्मः साधारण इति स्मृतिः ३० संसिद्धैः साध्यते नित्यं ब्राह्मणैर्नियता
त्मभिः संतोषमूलस्त्यागात्मा ज्ञानाधिष्ठानमुच्यते अपवर्गमतिर्नित्यो यतिधर्मः सनातनः ३१ ॥ ॥ ॥

णोपाउपनिषत्तविद्यातत्त्वार्थोधर्मः शमदमोपरमतितिक्षाश्रद्धासमाधात्मकः साधारणो वर्णाश्रमाणामिति शेषः ३० संसिद्धैः शुद्धचित्तैः नियतात्मभिर्निस्पृहचित्तैः निरन्तरं यं ब्रह्म
साध्यते प्राप्यते ज्ञानं शास्त्रीयं श्रवणमपि निर्विकल्पं समाधौ एव भवतीत्यर्थः अपवर्गप्रदा मतिर्विद्या ब्रह्मसाक्षात्काररूपा यस्मिन्निति नित्यः आवश्यकः एव नित्यो महिमा
ब्राह्मणस्येति श्रुतेः सनातनः सदा प्राप्तः ३१

साधारणाः आश्रमांतर[illegible]धर्मसंश्रिः यथाबलं यथावैराग्यं [illegible]गच्छतां गच्छतामिति प्रस्थमात्रस्य वर्णिग्रीधादेरपि क्षेमं क्षेमहेतुः दुर्बलो रागी ३२ ज्ञानफलमुपसंहरति ब्राह्मण इत्यर्धेन ३३ मात्राभिः धनैः त्यागं सम्यासं गार्हस्थ्ये समासेवा यथोक्ताचारवंतो यद्यपि निवृत्तिधर्मलक्षणास्तथापि प्रेत्यभावे मरणोत्तरं स्वर्गजित्तमः ३४ परीति द्वयोर्मोक्षसमाने पि त्यागी दृष्टसुखं वहुप्राप्नोतीत्यर्थः ३६ ऐकं मोक्षैकफलत्वं ३७ [illegible] एकत्वेन ज्ञानकर्मणोः समप्राधान्येन पृथक्त्वेन प्र

साधारणाः केवला वा यथाबलमुपासते गच्छतां गच्छतां क्षेमं दुर्बलोत्रावसीदति ३२ ब्रह्मणः पदमन्विच्छन् संसारान्मुच्यते शुचिः ३३ स्यूमरश्मिरुवाच ये भुंजते ये ददते यजंते धीयते च ये मात्राभिरुपलब्धाभिर्ये वा त्यागं समाश्रिताः ३४ एतेषां प्रेत्यभावे तु कतमः स्वर्गजित्तमः एतदाचक्ष्व मे ब्रह्मन्यथातत्वेन पृच्छतः ३५ कपिल उवाच परिग्रहाः शुभाः सर्वे गुणतामभ्युपागताः न तु त्यागसुखं प्राप्ता एतत्त्वमपि पश्यति ३६ स्यूमरश्मिरुवाच भवंतो ज्ञाननिष्ठा वै गृहस्थाः कर्मनिश्चयाः आश्रमाणां च सर्वेषां निष्ठायामैक्यमुच्यते ३७ एकत्वेन पृथक्त्वेन विशेषो नात्र दृश्यते। तद्यथावद्यथान्यायं भगवान्प्रब्रवीतु मे ३८ कपिल उवाच शरीरपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्वे रसज्ञाने च तिष्ठति ३९

धानगुणभावेन ३८ शरीरपक्तिः स्थूलसूक्ष्मशरीरशुद्धिः कर्माणि कर्मप्रयोज्यासाध्यसाधनयोरभेदोपचारः ज्ञानं तु शब्दः पूर्ववैलक्षण्यप्रसूचनार्थः मोक्षसाधनमित्यर्थः तत्र क्रममाह कषाये इति चित्तदोषे कर्मभिः पाचिते सति रसः प्रीतिर्ब्रह्मानंदस्तत्प्रज्ञाने शास्त्रजे तिष्ठतीति ३९

आनृशंस्यादयः प्रवर्त्तंते तैश्च परं ब्रह्म प्राप्नोति। आनृशंस्यं भूतदयाक्रमा अभिभवेप्यविक्रियचित्तता। शांतिः मनोजयः सत्यं यथार्थभाषणं आर्जवं अवक्रत्वं श
मः कर्मभ्य उपरतिः ५० कर्मनिश्चयं कर्मफलनिश्चयं कषाय यंक्तिं। अनुवैरणपांशुमन्निमनुसंज्ञानां बुद्ध्येत ५१ या मितिपरमगतेर्लक्षणं प्रवृत्ते वेदाः वेदितव्यं
कर्मब्रह्मस्वरूपं। यथास्थितिं कर्मणामनुष्ठानं ब्रह्मणश्च ज्ञानं प्राप्य अनहंकारेणावस्थानं च दृश्यते स एव वेदवित् अन्यत्तु वातरेचकः भस्त्रा पर नामा चर्मको

आनृशंस्यं क्षमा शांतिरहिंसा सत्यमार्जवं अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा शमस्तथा ५० पंथानो ब्रह्मणस्त्वे
ते एतैः प्राप्नोति यत्परं तद्विद्वाननुबुद्ध्येत मनसा कर्मनिश्चयं ५१ यां विप्राः सर्वतः शांता विशुद्धा ज्ञाननिश्चयाः
गतिं गच्छंति संतुष्टास्तामाहुः परमां गतिं ५२ वेदांश्च वेदितव्यं च विदित्वा च यथास्थिति एवं वेदविदित्याहुरतो
ऽन्यो वातरेचकः ५३ सर्वं विदुर्वेदविदो वेदे सर्वं प्रतिष्ठितं वेदे हि निष्ठा सर्वस्य यद्यदस्ति च नास्ति च ५४ ॥ ॥

शः वातरेचक इति गौडाः पठंति व्याच क्षते च वातवशात् रेचकः भाषकः वेद परिभाषणीय इति चार्थः ५२ मानं मेयं मातृ। स्थितिं च वेदादिपदोपात्तां क्रमेणाभ्युत्पाद
यति सर्वमित्यादिना। व्यापकेषेवेदा। अस्ति वर्त्तमानं नास्ति अतीतानागतं तस्य सर्वस्य निष्ठा स्वरूपं ५३ ५४ ॥ ॥ ॥

मानमुक्त्वामेयमाह।एषैवेति।सर्वत्रसर्वेषुशास्त्रेषुएषाएकैवनिष्ठा।कोसौएतज्जगत्अस्तीवभवतीतिकाले नास्तिचबाधकाले ननुघटादिरपिस्थिति
कालेस्तिघा। क्वचध्वंसाभावकालेनास्तीत्याशंकानिरासायचकारद्वयेनसमानकालिकमस्तित्वनास्तित्वधर्मद्वयंसमुच्चिनोतीति तेनवृद्ध्वातं ज्ञतीयमामपि
मायापुरवन्नास्त्येव।अबुद्ध्वानंचतत्त्वतः अस्यंतामसदपिवज्रपंजरवद्दृढतरमस्त्येव।एतदेवविवृणोतिएतदितिविजानतः तत्त्वज्ञस्यएतत्परिदृश्यमानं
वियदादिअंतंचमध्यंचअनुवाधापेक्षलीवत्वं अंतस्त्वमध्य श्व अंतोनिर्विशेषं स्थानंमध्यःसविशेषंलयस्थानं सत्त्वात्खंवस्तुतएवसदिति २१
।एतद्वैराजंरूपंसुद्युतब्रह्मणोऽनन्यदेवरजतमिवशुक्तेः।एतत्मायाशबलाद्व्यनन्यत्कुंडलमिवकनकात् एततसूत्रादव्यनन्य[illegible]त्तउपनेत्रदृशः स्थूलाद्
सृष्टि

एषैवनिष्ठासर्वत्रयत्तद[illegible]स्तिचनास्तिच एतदंतंचमध्यंचसत्त्वाद्विजानतः ४५

रमिवसूक्ष्मात्।तेनैतदसत्अज्ञानमात्रमनिर्वचनीयमितितन्त्वेकएवमायावीसर्वलयस्थानमस्तु किमितितत्तोन्यत्निर्मायंकल्प्यतेइतिचेत्तत्राभिप्रायमारोपा
दितिक्रमः तथाहिश्रुतिः सयथासर्वेसामपांसमुद्रएकायनमेवंसर्वेषांरूपाणांचक्षुरेकायनमितिअत्रसमुद्रदृष्टांतेनकार्यलयाधिष्ठानंमायाविन
मुक्त्वासमयथासैंधवखिल्यउदकमेवानुविलीयतइतिलवणोदकदृष्टांतेनकार्यकारणोभयलयाधिष्ठानंचिन्मात्रं[illegible]दर्शयति।यथाह्युदकेप्रा
सः सैंधवखिल्यस्तत्रस्वोपादानभूतमुदकंविलीनमनुलीयतेनतत्कारकावत्त्वरूपमात्रेणापरिमाणानतिरेकादेवकार्यकारणस्येवब्रह्मणिलीयतइति
श्लोकार्थः ४५

एवंविदः समाधिव्युत्थानयोः स्थितिमाह। समासमिति त्याग इत्येव ह्येतावानमरहस्यमुपात्तौ। अत्र शरीरेंद्रियप्राणमनोबुद्ध्यहंकारांतानां त्यागे निर्विकल्पसमाधौ सत्ये
वसम्यग्गाक्षं भवति एतदेव सर्ववेदार्थः यथोक्तं वासिष्ठे। निर्विकल्पसमाधिर्हि सिद्धांतः सर्ववाक्यपद्धति अपि संसाधने प्रत्यक्षानुमानाभ्यामिति सर्वं वा संप
धने समाधौ परसक्षर्भूतिः प्रामाण्यं प्रत्यनपेक्षत्वात् अनुमानं स्मृतिः मूलसापेक्षत्वात् दृश्यते त्वग्र्यया बुद्ध्या योगिनस्तत्त्वदर्शिभिरिति श्रुतिस्मृतिभ्यां समाधौ
आत्मनः सम्यक् दर्शनं भवतीति निस्सृतार्थः व्युत्थाने व्यवस्थामाह संतोष इति। अतो हि ते ये शतं मानुषा आनंदाः स एको मनुष्यगंधर्वाणामानंदः श्रोत्रियस्य चा
कामहतस्येत्यादिना उत्तरोत्तरशतगुणेषु मानुषानंदादिब्रह्मानंदांतेषु आनंदेषु श्रोत्रियस्याकामहतत्वयोरनुगमो दृष्टः तत्र श्रोत्रियत्वं सर्वत्र समानं आकाम

५२

समासं त्याग इत्येव सर्ववेदेषु निश्चितं संतोष इत्यनुगतमपवर्गे प्रतिष्ठितं ४५ ऋतं सत्यं विदितं वेदितव्यं सर्व
सात्मा स्थावरं जंगमं च सर्वं सुखं यच्छिवमुत्तरं च ब्रह्माव्यक्तं प्रभवं चाव्ययं च ४६ ॥ ॥ ॥छ

नाश१
हतत्वोत्कर्षवशं तं तदोत्कर्षः तस्यैव संतोषशब्दितस्य सर्वानंदेष्वनुगतस्य पराकाष्ठामुक्तिस्थिते ब्रह्मविदि ज्ञेयेत्यर्थः ४५ अपवर्गस्वरूपमाह ऋतमिति ऋतम
बाधितं सत्यं सच्चाप्रत्येति सत्यं मूर्तामूर्तप्रपंचात्मकं तदधिष्ठानत्वात् यतः सर्वस्यात्माऽतो विदितं। यतः स्थावरं जंगमं च तत्तद्देहतादात्म्यापन्नमतो वेदित
व्यं सर्वमविकलं सर्वदुःखासंभिन्नसुखमित्यर्थः उत्तरं सर्वोत्कृष्टं शिवं शांतमद्वैतं तुरीयमित्यर्थः शिवमद्वैतं चतुर्थं मन्यंत इति श्रुतेः ब्रह्म त्रिविधपरिच्छेदर
हितं। अव्यक्तस्य प्रभवः आविर्भावो यस्मात्तत् ईशस्याप्यधिष्ठानं अव्ययं अपरिणामि बाधितं प्रपंचात्संगं ४६ ६ ॥ वि॥ ॥

प्रकरणार्थमुपसंहरन्निति तेज इति तेजः इंद्रियजयेसामर्थ्यं क्षमान्यकारिष्वपिक्रोधानुत्पत्तिः शांतिः निष्कामत्वेनसर्वस्मात्कर्मण्युपरमः एतच्चपंचनामयंशुभं। निर्दुः
खमसुखमसुखसंपातोहेतुः तथेतिग्राह्यग्राहकस्वरूपविभागार्थः तथाविधोविधानंकर्मणस्तापत्रयनाशकंत्रिविधंचाकृत्रिमं। व्योमजगत्कारणंव्योमवदसंगंवा सनातनंनित्यंकूटस्थं। अक्ष
यमविनाशि। एतैः तेजआदिभिस्त्रिभिः कारणैर्यत्तद्गम्यतेअधिगम्यते ज्ञानायतनोदेसति कैःबुद्धिनेत्रैः उक्तैषःतस्मैब्रह्मणेनमइति विद्यायावीर्यविज्ञायब्रह्मचपगमनाय

तेजः क्षमाशांतिरनामयंशुभंतथाविधंव्योमसनातनंध्रुवं एतैः सर्वैर्गम्यतेबुद्धिनेत्रैस्तस्मैनमोब्रह्मणेब्राह्मणाय ४७ शांतौ
मोक्षधर्मेषुगोकापिलीयंसमाप्तं युधिष्ठिरउवाच धर्ममर्थंचकामंचवेदाःशंसंतिभारत कस्यलाभोविशिष्टोत्रतन्मेब्रू
हिपितामह १ भीष्मउवाच अत्रतेवर्णयिष्यामिइतिहासंपुरातनं कुंडधारेणयत्प्रीत्याभक्तायोपकृतंपुरा २ ॥ ❀ ॥

चनमस्करोतिभगवान्कपिलःब्राह्मणायब्रह्मविदेभिन्नाय ४७ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेशां
तौमोक्षधर्मेषुगोकापिलीयार्थप्रकाशः ॥ ॥मोक्षधर्मानंतरंष्ठानमशक्तः त्रिवर्गेकःश्रेष्ठतमइतिपृच्छतिधर्ममिति १ तत्राख्यायिकापूर्वकंधर्मस्यप्राधान्यमाहअत्रेत्यादिना २
कामादर्ममत्वेकृतफलकामनयाधर्मंकरिष्यामीतिचिंतितवान् धर्मश्चार्थसाध्यइत्यर्थार्थीघोरंतपोऽतप्यत ३ ॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀

जलधरंमेघंकुंडधारंनामतः ५ या सतिविधास्यति ८ उपकारेनियमेनप्रवर्त्तेयंतीउपकारनिपतं ११ नेजमात्रभावेन १२ निहतपस्कृतः भागवर्जितः निदर्शनंकुंडधारम केः

अधनोब्राह्मणः कश्चितकामाद्धर्ममवेक्षत यज्ञार्थंसततोर्थार्थीत योतप्यतदारुणं ३ सनिश्चयमथोकृत्वापूजयामासदेवताः भक्त्या नचैवाध्यगछद्धनंसंप्रपन्नदेवताः ४ ततश्चिंतामनुप्रापः कतमद्दैवतंततत यन्मेद्रुतंप्रसीदेतमानुषैरजडीकृतं ५ सोथसौम्येनमनसादेवानुचरमंतिके प्रत्यपश्यज्जलधरंकुंडधारमवस्थितं ६ दृष्ट्वैवतंमहाबाहुंतस्यभक्तिरजायत अयंमेधास्यतिश्रेयोवपुरेतद्धिताहृशं ७ संनिकृष्टस्वदेवस्यनचान्यैर्मानुषैर्वृतः एषमेदास्यतिधनंप्रभूतंशीघ्रमेवच ८ ततोधूपैश्चगंधैश्चमाल्यैरुच्चावचैरपि वलिभिर्विविधाभिश्चपूजयामासतंद्विजः ९ ततस्त्वल्पेनकालेनतुष्टोजलधरस्तदा तस्योपकारनियतांमिमांवाचंवह १० ब्रह्मघ्नेचसुरापेच चौरेभग्नव्रतेतथा निष्कृतिर्विहितासद्भिः कृतघ्नेनास्तिनिष्कृतिः ११ आशापालनयोधर्मः क्रोधोऽसूयासुतः स्मृतः लोभःपुत्रो निकृत्यायाकृतघ्नोनार्हतिप्रजा १२ ततः सब्राह्मणः स्वप्नेकुंडधारस्यतेजसा अपश्यत्सर्वभूतानिकुशेषुशयितनस्तदा १२ शमेन तपसाचैवभक्त्याचनिहतपस्कृतः शुद्धात्मावाह्मणोराज्ञोनिदर्शनमपश्यत १३

सुप०३

प्रसयं १३ १३ १३ १३ १३ १३ १३ १३ १३ १३ १३ ॥

यादृशं तंदेवेभ्यःफलयाचकान्निवेदयंतंदेवाशयायाचकेभ्यःफलानिसमर्पयंतं १५ अशुभेषुकर्मसुप्रस्थितेषुप्रागदत्तमपिराज्यादिकंछिंदंतिहरंति १६ भूमौपतितः

मणिभद्रंसतत्रस्थंदेवतानांमहाद्युतिं अपश्यतमहात्मानंव्यादिशंतंयुधिष्ठिर १४ तत्रदेवाःप्रयच्छंतिराज्यानिचधनानिच शुभैःकर्म
भिरारब्धाःप्रच्छिंदंत्यशुभेषुच १५ पश्यतामथयक्षाणांकुंडधारोमहाद्युतिः निपत्यपतितोभूमौदेवानांभरतर्षभ १६ ततस्तुदेवव
चनान्मणिभद्रोमहामनाः उवाचपतितंभूमौकुंडधारकिमिष्यते १७ कुंडधारउवाच यदिप्रसन्नादेवामेभक्तोयंब्राह्मणोमम अ
स्यानुग्रहमिच्छामिकृतंकिंचित्सुखोदयं १८ ततस्तंमणिभद्रस्तुपुनर्वचनमब्रवीत देवानामेववचनात्कुंडधारंमहाद्युतिं १९
मणिभद्रउवाच उत्तिष्ठोत्तिष्ठभद्रंतेकृतकृत्यःसुखीभव धनार्थीयदिविप्रोयंधनमस्मैप्रदीयतां २० यावद्धनंप्रार्थयतेब्राह्मणोयंसखा
तव देवानांशासनात्तावदसंख्येयंददाम्यहं २१ विचार्यकुंडधारस्तुमानुष्यंचलमध्रुवं तपसेमतिमाधत्तब्राह्मणस्ययुधिष्ठिर २२
कुंडधारउवाच नाहंधनानियाचामिब्राह्मणायधनप्रद अन्यमेवाहमिच्छामिभक्तायानुग्रहंकृतं २३ पृथिवींरत्नपूर्णांवामहद्वा
रत्नसंचयं भक्तायनाहमिच्छामिभवेदेषतुधार्मिकः २४ धर्मेस्यरमतांबुद्धिर्धर्मंचैवोपजीवतु धर्मप्रधानोभवतुममैषोनुग्रहोमतः २५

ब्राह्मणहितार्थी १७ १७ ॥ पूर्णमि २ ० ॥

धर्मेधर्मनिमित्तं ऽभ्यासंपुनः पुनर्धर्ममेवचिंतार्थमिपावनतेनकामस्तदर्थोधर्मः अर्थश्चेतित्रयमपितच्छनिष्कामधर्मएवश्रेयानित्याख्यापिकातात्पर्यमुक्तंभवति ३०

तो २

माणिभद्रउवाच सदाधर्मफलंराज्यंसुखानिविविधानिच फलान्येवायमश्नातुकायक्लेशविवर्जितः २६ भीष्मउवाच ततस्तदेवबहुशः कुंडधारोमहायशाः अभ्यासमकरोद्धर्मेततस्तुष्टास्यदेवताः २७ माणिभद्रउवाच प्रीतास्ते देवताः सर्वाद्विजस्यास्यतथैवच भविष्यत्येषधर्मात्माधर्मेवाधास्यतेमतिः २८ ततः प्रीतोजलधरः कृतकार्योयुधिष्ठिर ईप्सितंमनसोलब्ध्वावरमन्यैः सुदुर्लभं २९ ततो पश्यतचीराणिसूक्ष्माणिद्विजसत्तमः पार्श्वतोभ्यासतोन्यस्तान्यथनिर्वेदमागतः ३० ब्राह्मणउवाच अयंनसुकृतंवेत्तिकोन्योवेत्स्य ति४ तेकृतं गच्छामिवनमेवाहंवरंधर्मेणजीवितुं ३१ भीष्मउवाच निर्वेदाद्देवतानांचप्रसादाच्चद्विजोत्तमः वनंप्रविश्यसुमहत्तपआरब्ध वांस्तदा ३२ देवतातिथिशेषेणफलमूलाशनोद्विजः धर्मेचास्यमहाराजदृढाबुद्धिरजायत ३३ त्यक्त्वामूल फलंसर्वंपर्णाहारो भवद्द्विजः पर्णंत्यक्त्वाजलाहारःपुनरासीद्द्विजस्तदा ३४ वायुभक्षस्ततः पश्चाद्बहून्वर्षगणानभूत नचास्यक्षीयतेप्राणास्तदद्भुत मिवाभवत् ३५ धर्मेचश्रद्दधानस्यतपस्युग्रेचवर्ततः कालेनमहतातस्यदिव्यादृष्टिरजायत ३६

चीराणिअयशपतउपादेयत्वेनेकृतविरक्तोभूदित्यर्थः ३१ ३२ ३५

तस्यबुद्धिः पाण्डुरासीद्घृदिद्यामहंधनं तुष्टःकस्यचिदेवेहमिथ्यावाङ्नभवेन्मम ३७ ततःप्रहृष्टवदनोभूयस्त्वारब्धवांस्तपः
कृशश्चाचिंतयत्सिद्धोयत्परंसोभिमन्यते ३८ यदिदद्यामहंराज्यंतुष्टोवैयस्यकस्यचित सभवेदचिराद्राजानमिथ्यावाग्भवेन्मम ३९
तस्यसाक्षात्कुंडधारोदर्शयामाससभारत ब्राह्मणस्यतपोयोगात्सौहृदेनाभिचोदितः ४० समागम्यसतेनाथपूजांचक्रेयथाविधि
ब्राह्मणःकुंडधारस्यविस्मितश्चाभवन्नृप ४१ ततोब्रवीत्कुंडधारोदिव्यंतेचक्षुरुत्तमं पश्यराज्ञांगतिंविप्रलोकांश्चैवतुचक्षुषा ४२
ततोराजसहस्राणिमग्नानिनिरयेतदा दूरादपश्यद्विप्रःसदिव्ययुक्तेनचक्षुषा ४३ कुंडधारउवाच मांपूजयित्वाभावेनयदित्वंदुः
खमाप्नुयाः कृतंमयाभवेत्किंतेकश्चतेनुग्रहोभवेत ४४ पश्यपश्यचभूयस्त्वंकामानिच्छेत्कथंनरः स्वर्गद्वारंहिसंरुद्धंमानु
षेषुविशेषतः ४५ भीष्मउवाच ततोपश्यत्सकामंचक्रोधंलोभंभयंमदं निद्रांतंद्रींतथालस्यमावृत्यपुरुषान्स्थितान ४६
कुंडधारउवाच एतैर्लोकाःसुसंरुद्धादेवानांमानुषाद्भयं तथैवदेववचनाद्विघ्नंकुर्वंतिसर्वशः ४७ नदेवैरननुज्ञातःकश्चिद्भ
वतिधार्मिकः एषशक्तोसितपसादातुंराज्यंधनानिच ४८

मो०
२८२

५४ स्पष्टार्थं शेषं ५५ प्रसन्नवृत्तिर्मनः निष्कामधर्मस्य श्रैष्ठ्यमुक्तं नहिंसाभूयिष्ठसेवनस्येति वक्तुं हिंसायज्ञनिंदार्थोयमध्याय आरभ्यते बहूनामिति एकंवित्तमुद्दिश्यस्वर्ग

भीष्मउवाच ततःप्रपातशिरसाब्राह्मणस्तोयधारिणे उवाचचैवंधर्मात्मामहान्मेनुग्रहःकृतः ४९ कामलोभानुबंधेनपुराते यदहंप्रेषितं मयाक्षंतव्यमविज्ञायतत्त्वमर्हसि ५० क्षांतमेवमयेत्युक्त्वाकुंडधारोद्विजर्षभं संपरिष्वज्यबाहुभ्यांतत्रैवांत रधीयत ५१ ततःसर्वांस्तदालोकानब्राह्मणोनुचचारह कुंडधारप्रसादेनतपसासिद्धिमागतः ५२ विहायसाचगमनंतथासं कल्पितार्थता धर्माच्छक्त्यातथायोगाद्याचैवपरमागतिः ५३ देवताब्राह्मणाःसंतोयक्षामानुषचारणाः धार्मिकान्पूजयं तीहनधनाढ्यान्नकामिनः ५४ सुप्रसन्नाहितेदेवायत्तेधर्मेरतामतिः धनेसुखकलाकाचिद्धर्मेतुपरमंसुखं ५५ शांतौ मोक्षधर्मेषुकुंडधारोपाख्यानं॥ ॥युधिष्ठिरउवाच बहूनांयज्ञतपसामेकार्थानांपितामह धर्मार्थंनसुखार्थार्थंकथं यज्ञःसमाहितः १ भीष्मउवाच अत्रतेवर्तयिष्यामिनारदेनानुकीर्तितं उंछवृत्तेःपुरावृत्तंयज्ञार्थेब्राह्मणस्यच २ ॥ ॥

भीतिर्वानदर्थानांमध्येधर्मार्थेयोयज्ञःसमाहितःविनियुक्तोयःसकथंकीदृक्कस्तस्यात्सफलार्थार्थेधनार्थेवयोनभवतिदृश्याहिहिंसानानुरुध्यतेःनोधर्मा
र्थस्ययत्नस्यस्वरूपंब्रूहीत्यर्थः १ उंछवृत्तेर्ब्राह्मणस्येतिसंबंधः २ ॥ ॥ ॥ ॥ ॥

गम०
२८२

वि १

यज्ञं विष्णुपत्नी वैखानसमुनिरित्युक्तेः समारंभे समाहितो वहितोभूत ३ श्यामाकमशनं अस्तीयं। सूर्यपर्णी सुवर्चलेति शाकविशेषौ उपयमेतत उपगम्य प्राप्य वने वानप्रस्थाश्रमे यदन्नः पुरुषो भवति तदन्नास्तस्य देवता इत्युक्तेरर्थमाहापीति ५ पुष्करधारिणीनामतः सत्येसत्यसंगे ज्ञे भर्त्तरि विकृष्यमाणरीत्या हिंसाप्रधानेन यज्ञेन यष्टुमिच्छतिनानुविधीयते हिंसायज्ञमश्रेयस्त्वेन मन्यमाना अनुविधानं अनुकूल्यं न करोति ६ तथापि शापाद्भीता सती भर्त्तुः स्वभावमनुवर्त्यालिस्त्वर्थः मायूरेति मयूरपिच्छैः

अ: १

नारद उवाच राष्ट्रे धर्मोत्तरे श्रेष्ठे विदर्भेषु भवद्द्विज उञ्छवृत्तिर्ऋषिः कश्चिद्यज्ञं यष्टुं समारभे ३ श्यामाकमशनं तत्र
सूर्यपर्णी सुवर्चला तिक्तं च विरसं शाकं तपसा स्वादुतां गतं ४ उपगम्य वने सिद्धिं सर्वभूताविहिंसया अ
पि मूलफलैरिष्टो यज्ञः स्वर्ग्यः परंतप ५ तस्य भार्या व्रतकृशा शुचिः पुष्करधारिणी यज्ञपत्नी समानीता
सत्येनानुविधीयते ६ सा तु शापपरित्रस्ता तत्स्वभावानुवर्तिनी मायूरजीर्णपर्णानां वस्त्रं तसाश्ववर्णितं ७

सन्निवेशविशेषेण गुंफितेन्त्तस्याः ववस्त्रं वर्णितं अकामया कृतस्तत्र [illegible] पश्चो होत्रनुशासनात् ८

तं विस्तारितं जीर्णानि स्वयं गलितानि पर्णानां पिच्छानां च ७ अकामया यज्ञं यज्ञफलं वा निछंत्या पुष्करमालिन्या होता भर्त्तुः अनुशासनात् यज्ञः कृतः एतेन भार्यापि
अपि कर्तृत्वमुक्तं न त्वंगत्वमात्रं ॥ ८

[प३ ५२ त्रि२ पं२]

मुक्तमेति। आत्माभिरुभयकृत्कृतया आज्ञातितिक्षिपारेवंशब्दः सहवासिकः यजमानस्य प्रतिवेशी सः मृगो अभवत् मृगो भूत्वा वसन्तं मुनिं अब्रवीत् दुष्कृतमि
ति। यथा यवमयेषु पुरोडाशेषु व्रीहीणां मे सुमनस्समान इति मंत्रस्य लिंगभावाल्लोपः यथा वाजपेये मैत्रानुध्यायां गोपशोः स्थाने पशुभावेयस्यसेत्याश्वला
यनाद्युपदिष्टायां पंस्यायान्तु हृदयाद्यवदानलोपो मंत्रलोपश्च एवं सति सापर्द्ध मंत्रांगहीनं यज्ञं कुर्वतां दुष्कृतं भवतीत्यर्थः ननु दरिद्रेण मयायम्भुःकेन यशक्या
नेऽतोनुकल्पेनैव श्यामाकचरुणा यष्टुं कार्यं किं यत्तत्स्यात् सं का हयरीति होत्रेक्ष्यते स्मिन्निति युत्याश्च मौमां परार्द्धं [illegible] मृगभूतं १० सावित्रीस

[वै२]

मुक्तस्य चाप्यधानान्न पुनरायाति धर्मवित् तस्मिंश्चैनसमीपस्थो मृगो भूत्वा सहवासिकः व चोभिरब्रवीत्तस्मात्त्वयै
दं दुष्कृतं कृतं ९ यस्मिन् मंत्रांगहीनोयं यज्ञो भवति हूतः मां भोः शक्रियहोत्रे त्वं गच्छ स्वर्गमनिंदितः १० ततस्त
यत्सा सावित्री साक्रान्तं संस्थं मंत्रयत निमंत्र्यं तीव्रयत्नाज्ञानहत्वां सहवासिनं ११ एवमुनिर्ब्रह्मा साप्रविशत्पय
पावकं किंतु रुरवरीतं यज्ञे हि दृष्टः सा रसातलं सत्नव हूं जल्लि मत्स्यमपावकहुताशः पुनः १२ ॥ ॥

वित्तमंडलाधिष्ठात्री देवता प्रत्यक्रमेत्यसत्यमंत्रयत मदर्थेयं यज्ञस्यो होत्यस्य रुत्पकृचती। प्रमुक्तापनन्यख्यातानत्रहेतुः न हत्वामि ११ रसातलं दिदृक्षुः
सा यत्र पावकं प्रविशेति संबंधः यज्ञे तु रवरित्तं दुष्टमावीत्तं किं तद्गति सर्मा। पर्वत्निमूर्धनतोल्येका निर्देशः १२ सत्यं सत्यसंज्ञं त्र्यागातत्मा अमग्नौ प्रक्षिपेत्तिपाधित
वान १२ ॥ ॥ ॥ ॥

राम०

ततः हिंसायां दोषं पश्यता यद्यग्निक्रतानारम्भपानुमतं तं नीतिशास्त्रं दृष्ट्वा सत्येन सम्मृगः परिष्वज्य स्पृष्ट्वा एतेन त्वालंभादिर्यथाग्निकरणमालक्ष्य तेनाचन्कृत्वा संदिष्ट्वा
तसः सहर्षिणः आत्मनो वधः धर्मो देवगणस्य स्वर्गं नियच्छपत २४ पश्येति पशूनां यजमानानां च सह देवस्वर्गतिं स्पृहालग्नेन दृष्टं संलंभमपादितिस्पृहयालग्नेन च
क्षुषा दृष्ट्वा मृगं च स्वर्गार्थिना मालोक्य हिंसायां कृतायामेव स्वर्गवासं प्राप्नोतीति समर्थयत समर्थितवानिति द्वयोः संबंधः २६ सत्विति केन चित्रिमित्रेन मृग

सतेनसंपरिष्वज्य संदिष्टो गम्यतामिति ततः महर्षिणा गत्वा परमेष्ठेन्यवर्त्तत साधु हिंसय मां सत्य हत्तो यास्यामि
सद्गतिं २४ पश्य त्वं स्वरमो दिव्यामया दत्तेन चक्षुषा विमानानि विचित्राणि गंधर्वाणां महात्मनो २५ ततः
समस्ताचिरं दृष्ट्वा स्पृहालग्नेन चक्षुषा मृगमालोक्य हिंसायाः स्वर्गवासं समर्थयत २६ सत्यधर्मो मृगो भूत्वा
बहुवर्षोषितो वने तस्य निष्कृतिमाधत्त न त्वेषोपज्ञसंविधिः २७ तस्य तेनानुभावेन मृगहिंसात्मनस्तदा तपो
महत्समुच्छिन्नं तस्माद्धिंसा न यज्ञिया २८ ततस्तं भगवान्धर्मो यज्ञं याजयत स्वयं समाधानं च भार्यापालेभे स तप
सापरं २९ ॥ ॥

तं धायः धर्मः तस्य निमित्तस्य निष्कृतिं प्रतिक्रियां स्वात्मानं मोचितवान् न त्वेषोपज्ञस्य समीचीनो विधिः हिंसामयत्वात् २७ अनुभावेन पशुं हत्वा स्वर्गं यास्यामी
ति अनुमिध्यायेणाय यज्ञियायज्ञायहिता २८ ननु धर्मस्यापीदृक्कष्टलकरणमयुक्तमित्याशंक्याह ततस्तमिति याजयत् अनुग्रहभावं आर्षेः पाजितवान् भार्यापापाः
करधारिणीः हिंसामयपयज्ञमनिच्छंस्ताः २९ ॥

मो०
२५४

२१५

तथातेनसर्वप्रत्वेनरूपेणाहितः सत्यवादिनांब्रह्मवादिनांउत्तमोनेनधर्मः योधर्मइतियावत्तेनतत्सत्यंवक्ष्यामिकिंतनसत्यंप्रःसत्यवादिनांधर्मः यइतिविधेयापेक्षयस्त्रंच
त्वारत्वाधिकातासर्वपशुकार्येश्यामाकादिविकारानचरुपुरोडाशादीन्कुर्यादितिगम्यतेतथाचश्रुतिःश्रद्धयास्वाभिरेकाःपक्वास्थालीपाकेनवेतियश्चस्थानेस्थाली
पाकोपिदीयतेएवमन्नत्रपुरोडाशामिक्षादीनामपिपशुस्थानेविधानमवगंतव्यंतस्मान्न हिंसायज्ञःश्रेयानितियज्ञनिंदेत्यध्यापनामतत्रहिंसापज्ञनिंदेत्यवगंतव्यं २०

अहिंसासकलोधर्मोहिंसाधर्मस्तथाहितः सत्यंतेहंप्रवक्ष्यामियोधर्मःसत्यवादिनां २० शांतौमोक्षधर्मेषुपतनिरानाम॥
॥युधिष्ठिरउवाच कथंभवतिपापात्माकथंधर्मंकरोतिवा केननिर्वेदमाप्नोतिमोक्षंवाकेनगच्छति १ भीष्मउवाच वि
दिताःसर्वधर्मास्तेस्थित्यर्थंतंतपृच्छसि शृणुमोक्षंसनिर्वेदंपापंधर्मंचमूलतः २ विज्ञानार्थंहिपंचानामिच्छापूर्वंप्रव
र्तते प्राप्यतान्जायतेकामोद्वेषोवाभरतर्षभ ३ ततस्तदर्थंयततेकर्मचारभतेमहत् [illegible] इष्टानांरूपगंधानाम
भ्यासंचचिकीर्षति ४

समनवृत्तितमः अहिंसाधर्मएववैराग्योत्पादनद्वारामोक्षहेतुरितिनिश्चित्यधर्मविरोधिनःपापस्योत्पत्तियतिहारापरंताचोपादानापत्तितासनेकथमिति २
पंचानांशब्दादीनां।एकंप्राप्यतत्रराग्द्वेषौजायेतेइत्यर्थः ३ तदर्थंकाम्यसाधनसंपेक्ष्यसहानाप्य अभ्यासंपुनःपुनःसेवनं ४ ४

राम०
२५५

व्याजेनकपटेनाअर्थेअर्थजातं ७ पापंचित्राद्विद्रोहं ८ न्यायसंबद्धंआहारेस्यव्यवहारेवस्त्वन्तलउः सर्वोमवेदित्यादि स्यादि त्रिविधः कायिकोवाचिकोमानसश्च ९ पापंच

ततोरागः प्रभवतिद्वेषश्चतदनंतरं ततोलोभः प्रभवतिमोहश्चतदनंतरं ५ लोभमोहाभिभूतस्यरागद्वेषान्वितस्यच नधर्मेजायतेबुद्धि
र्व्याजाद्धर्मंकरोतिच ६ व्याजेनचरतोधर्ममर्थोव्याजेनरोचते व्याजेनसिध्यमानेषुधनेषुकुरुनंदन ७ तत्रैवकुरुतेबुद्धिंततः
पापंचिकीर्षति सुहृद्भिर्वार्यमाणोपिपंडितैश्चापिभारत उत्तरंन्यायसंबद्धंब्रवीतिविधिचोदितं ८ अधर्मस्त्रिविधस्तस्यव
र्द्धतेरागमोहजः पापंचिंतयतेचैवप्रब्रवीतिकरोतिच ९ तस्याधर्मप्रवृत्तस्यदोषान्पश्यंतिसाधवः एकशीलाश्चमित्रत्वंभजं
तेपापकर्मिणः १० सनेहसुखमाप्नोतिकुतएवपरत्रवै एवंभवतिपापात्माधर्मात्मानंतुमेशृणु यथाकुशलधर्मासकु
शलंप्रतिपद्यते कुशलेनैवधर्मेणगतिमिष्टांप्रपद्यते ११ यएतान्प्रज्ञयादोषान्पूर्वमेवानुपश्यति कुशलः सुखदुःखान्नो
साधूंश्चाप्युपसेवते १३ तस्यसाधुसमाचारादभ्यासाच्चैववर्द्धते प्रज्ञाधर्मेचरमतेधर्मंचैवोपजीवति १४ सोथधर्माद्वाप्तेषुध
नेषुकुरुतेमनः तस्यैवसिंचतेमूलंगुणान्पश्यतियत्रवै १५ धर्मात्माभवतिह्येवंमित्रंचलभतेशुभं समित्रधनलाभात्तुप्रेत्य
चेहचनंदति १६ ॥

रतिनिष्ठं ११ कुशलंकल्याणंपरहितमित्यर्थः १२ सुखदुःखानांविवेचनेकुशलश्चतुरः १४ मूलंसिंचतेयत्रगुणान्पश्यतितत्रैववर्द्धयति १६ तमूलंसंकल्पसिद्धं १७

मो०
२५९

215

निर्वेदंवैराग्यं १८ भावयतेचिंतावशंकरोति १९ धर्मत्यागेधर्मफलस्यस्वर्गादेस्त्यागे २० नानुपायात्उपायाननुष्ठानात्किंतुउपायतएव २४ अत्रनवतिमःउ

त१

छि१

शद्वेस्पर्शेरसेरूपेतथागंधेचभारत प्रमुक्तंलभतेजंतुर्ह्मिसेनतत्फलंविदुः १७ सत्तधर्मफलंलब्धानहृष्यतियुधिष्ठिर अतृप्यमा
नोनिर्वेदमादत्तेज्ञानचक्षुषा १८ प्रज्ञाचक्षुर्यदाकामेरसेगंधेनरज्यते शद्वेस्पर्शेतथारूपेनचभावयतेमनः १९ विमुच्यते
तदाकामान्नचधर्मंविमुंचति धर्मत्यागेचयततेदृष्ट्वालोकंक्षयात्मकं २० ततोमोक्षाययततेनानुपायादुपायतः शनैर्निर्वे
दमादत्तेपापंकर्मजहातिच २१ धर्मात्माचैवभवतिमोक्षंचलभतेपरं एतत्तेकथितंतातयन्मांत्वंपरिपृच्छसि पापंधर्मस्त
थामोक्षोनिर्वेदश्चैवभारत २२ तस्माद्धर्मेप्रवर्तेथाः सर्वावस्थंयुधिष्ठिर धर्मेस्थितानांकौंतेयसिद्धिर्भवतिशाश्वती २४ शांतौ
मोक्षधर्मेषुचतःषाष्टिकोनाम॥ ॥युधिष्ठिरउवाच मोक्षःपितामहेनोक्तउपायान्नानुपायतः तमुपायंयथान्यायंश्रोतुमिच्छा
पायमस्तपंप्रश्नटर्वकंवक्तुमारभतेमोमिभारत १ भीष्मउवाच त्वय्येवैतन्महाप्राज्ञयुक्तंनिपुणदर्शनं येनोपायेनसर्वार्थोनित्यंमृगयसेनघ २
इति १ सर्वार्थसर्वमिर्थधर्मादिमोक्षमेवचा घासत्रार्थग्रहणसमर्थनिपुणांश्चतार्थपरीक्षायांक्षमंनिदर्शनंप्रत्ययः मोक्षेसत्बुद्धिसाक्षिकउपायस्सर्थः २ एम०

२५९

तत्र। उपायो हि द्विविधः प्रवृत्तिरूपो निवृत्तिरूपश्च। तयोर्दृष्टांतमुखेनैव लक्षणं प्रयोपयथादत एवैकं मोक्षे हेतुमद्भावमाह। करण इति साध्यधर्मे चिकीर्षाबुद्धिरुत्पद्यते ति
हेतुवह्निशिखा आवरणापगमेन ज्ञानमात्रमिति घटदृष्टांतेनैव ज्ञेयमित्यर्थः एवं धर्मेषु मोक्षेषु शमदमादिषु निवृत्तिरूपेषु आलोकवद्दृष्टांतत्वाभिव्यंजकेषु अमत
प्रवृत्तिरूपो धर्मः कारणं न। तस्योपयोगं विशेषणेनैवाह धर्मोऽप्युपायेषु धर्मो यागादिः सम्यगुपायो येषां तेषु निष्कामस्य यागादिषु चित्तशुद्धिद्वारा निवृत्तिहेतु
र्भवतीत्यर्थः ३ एवं प्रवृत्तिनिवृत्तिधर्मयोर्हेतुहेतुमद्भावे विच्छिन्नत्वं तं वैलक्षण्यं पदृष्टांतेनैवाह पूर्वैरिति ४ निवृत्तिधर्मस्य यथा काष्ठा सर्ववृत्तिनिरोधरूपो योगः तं

करणो घटस्य या बुद्धिर्घटोत्पत्तौ न सा मता एवं धर्मोऽप्युपायेषु नान्यद्धर्मेषु कारणं ३ पूर्वैः समुद्देयः पंथा न समागच्छति यश्चि
मं एकः यथा हि मोक्षसंतन्मे विलतः स्मृतः ४ क्रमया क्रोधमुच्छिद्यात्कामं संकल्पवर्जनात् सत्वसंसेवनाद्धीरो नि
द्रां च छेत्तुमर्हति ५ अप्रमादाद्भयं रक्षेत्तत्त्वज्ञशीलनात् इच्छाद्वेषं च कामं च धैर्येण विनिवर्त्तयेत् ६ ६ ६ ६॥

विवक्षननतादृशानिक्रमादीनि त्रयोविंशति साधनानि पृथक्प्रयोजनवंति निर्दिशति क्रमयेत्यादिना सत्वसंसेवनात् आलस्यादित्यागपूर्वकं सात्विकभगवद्ध्यानादिधर्मसेव
नात् ५ अप्रमादात्सावधानतया मयं लोकायवादजं लज्जामित्यर्थः आसंप्राणावेष्टां हेत्वतत्त्वं स्वयरार्थः तस्याशीलनाद्धेतोः तत्रमनसोधारणायेत्यर्थः एकेतनिरुध्यादि
ति पूर्वैर्गान्वयः प्राणान्वयध्येह मंपुक्तेचेष्टः ह्रीणोप्राणे[illegible]नासिकयोच्छसीत तुष्टा स्वयत्नमिव वादमेनं विद्वान्मनो धारयते भ्रमत्तनइत्तेवाउनयमनोधारणार्थेत्व
क्रतेः कामं स्वाभिलाषं ६ ॥

श्री

भ्रमं विपरीतज्ञानं। संमोहं अज्ञानं। आवर्त्तं आसमंताद्वर्त्तनं ज्वरं निर्घृत्याऽनेककोटिस्पर्शिनं [illegible] संशयं अभ्यासात् तत्वाभ्यासात् निद्रां अननुसंधानं प्रतिभां स्वमानुसंधानं च ज्ञानाभ्यासेन तत्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं। एतदेकपरत्वं च ज्ञानाभ्यासं विरुद्धधाइत्युपलक्षणेन ७ उपद्रवान्श्लेष्माजीर्णादीन् रोगा

भ्रमं संमोहं आवर्त्तमभ्यासाद्विनिवर्त्तयेत् निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्ववित् ७ उपद्रवांस्तथारोगान् हितजीर्णमिताश नात् लोभं मोहं च संतोषाद्विषयाणां तत्वदर्शनात् ८ अनुक्रोशादधर्मं च जयेद्धर्ममवेक्षया आयत्या च जयेदाशामर्थं संगविवर्ज नात् ९ अनित्यत्वेन च स्नेहं क्षुधां योगेन पंडितः कारुण्येनात्मनो मानं तृष्णां च परितोषतः १० उत्थानेन जयेत्तंद्रीं वितर्कं निश्चयाज्जयेत् मौनेन बहुभाष्यं च शौर्येण च भयं त्यजेत ११ ॥ ॥

तत्व रतीसारादीन हितं दाहाद्यनुत्पादिकं जीर्णे मित अंतां प्राप्तं तत्वं विषयाणां रूपं अनर्थकरत्वं तद्दर्शनात् ८ अनुक्रोशात् कृपातः अवेक्षया परिपालनेन। आयत्या उत्तरकालेन। संगो भिलाषः ९ योगेन वायुनिग्रहेणामानं चित्तसमुन्नतिं १० उत्थानेन उद्योगेन तंद्रीं आलस्यं। वितर्कं विपरीततर्कं निश्चयात् क्र तिविश्वासात् शौर्येण अवश्यं जयसामर्थ्येन भयं संसारं ११ ॥ ॥ ॥ ॥

मो० २९६

२९६

राम० २९६

अंगानुक्त्वा ध्यानं योगमाह यच्छेदिति निद्रायामिव युगपन्सर्वलयो माभूदिति अनुष्टुप्लयक्रमं अनुक्रम्य वागादिबाह्येंद्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत
मनोपि विषयविकल्पाभिमुखं अध्यवसायस्वरूपायां बुद्धौ धारयेत् तदिदमुक्तं यच्छेद्वाङ्मनसी बुद्ध्येति तां बुद्धिं ज्ञानचक्षुषा शुद्धत्वंपदार्थबोधेन समष्टिबुद्धौ वा ज्ञानं
शुद्धत्वंपदार्थमपि आत्मावबोधेन अपमात्मावच्छिन्नत्वबोधेन वाक्यजन्यध्यायच्छेत् आत्मानं धीवृत्तिमपि आत्मना परमेवेन स्वप्रकाशेन नियच्छेत्। इंद्रियाणि मनो

यच्छेद्वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा। ज्ञानमात्मावबोधेन यच्छेदात्मानमात्मना १२ तदेतदुपशांतेन बाह्यं शुचि
कर्मणा। योगेनाप्नोति संसिद्धिं पंचयाम्कवयो विदुः १३ कामं क्रोधं च लोभं च भयं स्वप्नं च पंचमं परित्यज्य निषेवेत य
तवाग्योगसाधनात् १४ ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा। शौचमाहारतः शुद्धिरिंद्रियाणां च संयमः १५ एतैर्वि
वर्द्धते तेजः पाप्मानमुपहंति च सिद्ध्यंति चास्य संकल्पा विज्ञानं च प्रवर्त्तते १६ धूतपापः स तेजस्वी लघ्वाहारो जितेंद्रियः
कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं १७

बुद्धौ बुद्धित्वंपदार्थं तं ब्रह्माकारवृत्तौ तां शुद्धात्मनि चेति क्रमेण प्रविलाप्य स्वस्वरूपात्मनावतिष्ठेतेत्यर्थः १२ १६ निनीषेत् नेतुमिच्छेदात्मानं कुत्र ब्रह्मणः पदं पदनीयं यत्
तत्र ब्रह्मा च तन्मुखोपि विलीयते तत्स्थानं गणेशः। शिरस्तिर्वृभूदेभेदोयचारात षष्ठी १७ १७ १७ १७ १७ १७ १७॥

मो०
१८७
297

अमूढत्वंवेदांतश्रवणाद्यभ्यासात्।असंगित्वंवैराग्यात्।कामक्रोधविवर्जनंसंतोषक्षमादभ्यासात्अदैन्यंपरिपूर्णकामाता।अनुदीर्णत्वंदर्पाहंकाररहित्यं।अनुद्वेगोनिर्भयत्वं।अव्यवस्थितिः अनिकेतत्वं १८ कामतोव्यथाकामवैवर्यरीत्येननियमोयोगोनिष्कामः कर्तव्यः योगज[सिद्ध]सिद्धीर्नेच्छेदित्यर्थः १९ योगाचारानुवर्णनेचतुष्पष्ट्यधिकोनामैकोनशततमः॥ ॥अत्रैवनिर्नीषेद्ब्रह्मणः परमित्यत्रो[illegible]कंब्रह्मणः परेविषयएव २ कुतइत्यस्यांवानातकारणप्रश्नः कम

अमूढत्वमसंगित्वंकामक्रोधविवर्जनं अदैन्यमनुदीर्णत्वमनुद्वेगोव्यवस्थितिः १८ एषमार्गोहिमोक्षस्यप्रसन्नोविमलःशुचिः तथावाक्कायमनसांनियमः कामतोव्यथा १९ शांतौमोक्षधर्मेषुयोगाचारानुवर्णनं भीष्मउवाच अत्रैवोदाहरंतीममितिहासंपुरातनं नारदस्यचसंवादंदेवलस्यासितस्यच १ आसीनंदेवलंवृद्धंबुद्ध्वाबुद्धिमतांवरं नारदःपरिपप्रच्छभूतानांप्रभवाप्ययं २ कुतःसृष्टमिदंविश्वंब्रह्मन्स्थावरजंगमं प्रलयेचकमभ्येतितन्नोब्रूहित्वमर्हसि ३ असितउवाच येभ्यः सृजतिभूतानिकालोभावप्रचोदितः महाभूतानिपंचेतितान्याहुर्भूतचिंतकाः ४ ॥ ॥ ॥

भ्येतीतियान्तीतिकोपादानकारणप्रश्नः ३ आद्यस्योत्तरमाह येभ्यइतिभूतानिहिरण्यगर्भादीनिकालःकर्मोद्भवसमयेभावोभावनानिविलाप्राणिधीवासनाभिःप्रचोदितः प्रेरितः परमात्मामहाभूतोऽवादीनि ४

एम०
१८७

नि १

कः सृजति कश्चात्मप्रवर्त्तको भावस्तत्राह तेभ्य इति कालस्तत्र युगात्मा अधर्मेण तत्र अधर्मेति त्यकृतः धर्माधर्मयोः धर्मेण तरति चतुर्विधः कलिद्वापरत्रेताकृतयुगसंज्ञो जीवः आत्मबुद्धिस्तया प्रचोदितः एतेभ्यः कालबुद्धिमहाभूतेभ्यः परं चेतनमोक्षं प्रधानं वान्यदस्तीति यः ब्रूयात् तस्य अमतं अलीकं ब्रूयात् नान्योऽतोऽस्ति इदं देति इदं तर तत्र निषेधः कृतेः तच्छेदेनाप्यपि हितं यदासीत् तत्र मम स्वमहिमा जायते किमिति तच्छा ज्ञानमाहात्म्यात् ब्रह्मादिरूपे रावस्तैवाजायतेति कृतेः दृश्यमानं कार्यमेवास्तीति न तु परोक्षाया तिरोधीयमानं कारणमस्ति रज्जुरगोपादाना तानव दतोऽन्येषां नित्यानुमेयत्वेनाभिमतं प्रधानं न दृश्येश्वरत्वं तु मयं दृश्यात् दृष्टुश्चान्यदेवेत नैवानानात्तीति स्पष्टं

तेभ्यः सृजति भूतानि कालश्चात्मप्रचोदितः एतेभ्योऽपः परं रूपात् सद्रूपारं मंशयं ५ विद्धि नारद पंचैतान् शाश्व-
तानचलान् ध्रुवान् महतस्तेजसो राशीन् कालषष्ठान् स्वभावतः ६

५ एतानस्वादीन् अचलान् परिणामशून्यान् ध्रुवान् आद्यंतशून्यान् स्वप्रागभेदं वा ज्ञानत्वात् देवत्वनाद्यं तत्त्वदर्शी भूतेषु कृतिरेवेत र्थ ज्ञात एव न जायते मायामात्रमि दं दृष्टं तमिति श्रुत्या च यो लोकदृष्ट्या ज्ञातो घटादिः स एव परमार्थेन न जायते स्वाप्नघटवत् इत्यादि कृते रर्थाः द्वितीयायाम् स्वरूप एवार्थः महतो महत्त्वात् व्याप्तस्य बुद्धिस्त्वस्य तेजसः सत्त्वप्रधानस्य प्रकाशमयस्य राशीनिव राशीन् कार्यराशिविद्धि कालकृत रूपो जीवः स एव षष्ठो येषां तान् स्वभावतः इति पूर्वकस्यादि प्राधान्येन ६ ॥ ॥

मो०
२९८

298

तानेवाह आप इति। महत्तत्त्वादिभौतिकं तामकेभ्यो भूतेभ्यः परमं उत्कृष्टं किमपि तत्त्वं नासीत् उपपत्याश्रोतयुक्त्यायुक्त्या लौकिकानुमानेन वा कश्चिन्न दत्तीति यदि
ब्रूयात्तर्हि अंतेऽमतत्त्वज्ञानमेव ब्रूयात् तथा हि दुःखसमूहलेशरीरं तस्यापि कारणं कर्म कर्मणोपि प्रवर्त्तको रागादिर्दोषः स चाज्ञानादेव भवतीति श्रोतोपपत्तिज्ञामस्त
त्वयद्भगवानक्षपादः दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरा भावादपवर्ग इति तस्मान्मूलकारणमज्ञानमेव न तु संसाराकारणमज्ञानमत्र
तस्मिन्विषये दृष्टिच यच्च कारणाले किंमानमितिवेत्तत्राह छाम: किंतु दृष्टानं यत्संसारकारणमुच्यते ननु तावत् तहाना भाव मात्रं तत्स्वप्न सुखसाव्यपि मलेन दोषायप्रजनन

आपश्चैवांतरिक्षं च पृथिवी वायुपावकौ नासीद्धि परमं तेभ्यो भूतेभ्यो मुक्तसंशयं ७

कत्वात्। अभावाद्भावोत्पत्त्यसंभवात्स्वनापि संशयज्ञानेनानवधारणात्मकत्वेन स्वप्रवृत्त्याद्यनुपयोगित्वात् तस्मात्तस्मिंस्तु दृष्टिरूपं विपरीतज्ञानं तत्त्वाऽ नात्मनि देहादावात्मबु
द्धिरूपं संसारकारणमिति वाच्यं। न च सिंहो माणवक इत्यादौ माणवके सिंहत्वबुद्धिरस्ति। प्रयोक्तृप्रतिपत्तृभ्यां सिंहमाणवकयोर्भेदस्य प्रतिपन्नत्वात् अस्मिंस्तु दृष्टियोग
मात्रं तत्र माणवके सिंहगतक्रौर्यादिसंबंधप्रत्यायकं गौणमिति प्रसिद्धं देहादित्वमुक्तिरजतेदात्मनि तादात्म्येनाध्यस्त इति कृशोहं गौरोहमिति तत्र देहधर्मस्य गौरत्वा
दे: प्रत्ययो न गौणः सिंहमाणवक

रामः
२९८

पोगिवदेहात्मनोर्भेदस्यलोकाप्रसिद्धत्वात् ननुमास्तुतयोर्भेदप्रसिद्धिः तथा पिस्फटिकलौहित्यन्यायेनधर्ममात्राध्यासेनैवकृशोहमित्यादिव्यवहारोपपत्तौ
आत्मनिकिंदेहाध्यासकल्पनयेतिचेत् किंत्वहमर्थमेवात्मानंस्वेषेउततोत्यन्ताषेद्यापत्तेः नहिजडयोर्देहाहमोरन्यधर्मसाम्यत्राध्यासेकिंचिदस्माकंहीयते अ
हमर्थस्यचेतनाश्रयत्वेनाजडत्वेनाकारणवदृश्यत्वादिनादेहतनाऽ नात्मत्वादेवनिरंशत्वेनिःसंगस्यासंगेनकूटस्थस्याविकारिणःआत्मनोऽ आत्मनायोगोवा सं
वोयोनोपपद्यतइतिहेतुवचनात्शुक्तिरजतवदनिर्वचनीयएवतयोस्तादात्म्यतः संबंधउत्पन्नानमेवांतेशरणीकरणीयः तथाचत्वत्पक्षवदज्ञानेनैवसर्वव्यवहारोपपत्तौवि
पदादीनांस्थक्षत्वकल्पनंगौरवपरास्तमित्यपेक्षणीयं तस्माद्युक्तमुक्तंअसद्रूपादसंशयमिति। आसिद्धेः परमितिपाठेतुपावन्मोक्षंतेभ्यः परमंआधिकंनउपप
त्यानवायुक्त्याकश्चित्स्यात् यदिस्यात्तर्हिअस्थत्वज्ञानमेवस्यात्नमोक्षेतनवाभूतानिनाप्यज्ञानमितिभावः आसिद्धेःपरमते ॰ भ्यइतिपाठेपि येभ्यःपर
मलीतियतत्त्वासिद्धिःप्रमाणाभावः यतः नोपपत्त्यानवायुक्त्यातद्रूपात्किंत्वसदेवरूपादितियोज्यं ॥ ॥ ॥ ॥

मो०
२९८

एतानपद्भ्यभिनिर्दिष्टानान्सर्वत्रकार्येऽनुगतान्वेष्यन्नानीषेयसवर्णनेराशयः कर्पाणितदशमडष्ठ्वायं अज्ञानंचवेत्य अहमज्ञत्वमनुभवः नीहारेणावृतानांजल्पावेतिश्च स्वाज्ञानसद्भावेप्रमाणमस्तीतिभावः भावोभावनस्यर्वसंस्कारः अभावोऽज्ञानंभावांतरमभावोहिकयाचिन्नमपह्नुयेतिन्यायेन तदपिभावरूपमेवतमसमपदार्थ रूपमित्यक्तंप्रागेव। कालीजीवः पंचभूतानिचेत्यष्टौभूतानिअनादीनिशाश्वतानिअखंडरंडायमानानिभूतानांस्थावरजंगमानांभवाःसर्पोत्पत्तिलयस्थानानि

२९८

नोपपन्नानयायुक्त्यात्वसद्रूपाद्संशयं वेत्स्यतानभिनिर्दिष्टानास्वदेतेयस्य राशयः ८ पंचैवतानि कालश्च भावाभावौ च केवलौ अष्टौभूतानिभूतानांशाश्वतानिभवाप्ययौ ९ अभावंयांतितेष्वेवतेभ्यश्चप्रभवंत्यपि विनष्टोपिचता मेवजंतुर्भवतिपंचधा १० तस्यभूमिमयोदेहः श्रोत्रमाकाशसंभवं सूर्यश्चक्षुरसुर्वायोरद्भ्यस्तुखलुशोणितं ॥

९ एतदेवव्याचष्टे अभावमिति ननुस्थावरजंगमदेहावयवानांभूम्यादीनांस्वस्वकारणेलयोयुज्यतेजीवस्यतुलयस्थानंनास्तिनान्योऽतोस्तिद्रष्टेतीदृशंतरानिषेधात् अतआह विनष्टइति तान्येवभूतानिनष्टानिअनुलक्ष्यहात्पनंतत्अपिपंचधाभूत्वानष्टोपिभवतिविज्ञानघनएवैतेभ्योभूतेभ्यः समुत्थायतान्येवानुविनश्यतीतिजल चंद्रन्यायेनोपाधिभूतनाशेनतन्नाशस्यापिश्रवणात् १० पंचधात्वमेवविवृणोतितस्येत्यादिना ॥ ॥ ॥ ॥ ॥ रम०

२९८

इंद्रियार्थानांशब्दादीनांज्ञानानिज्ञानकरणानि १२ पंचइंद्रियाणिपंचस्वरूपादिषुपंचधादर्शनादिक्रियारूपेणवर्त्तमानानेनानागुणानेवउपपत्त्यायुक्त्याविद्धि। अथ
मर्थः चक्षुश्चक्षुषोर्गंधघ्राणयोःपार्थिवत्वमेवएकजातीयत्वावगमादिंद्रियपंचकएकाशमनःपंचभूतात्मकंतत्सर्वत्रेको विज्ञानमयोपिनादृशएवतत्सेव
एवोपरिभावोदर्शनादिक्रियात्मतः स्पृष्टदर्शनदृश्यानांत्रयाणामपिगुणात्मत्वमुपपन्नमिति १३ रूपमितितद्गुणाः अपलब्धुर्विज्ञानमयस्यगुणाः पंचधाभूते

चक्षुषीनासिकाकर्णौत्वक्जिह्वेतिपंचमं। इंद्रियाणींद्रियार्थानांज्ञानानिकवयोविदुः १२ दर्शनंश्रवणंघ्राणंस्पर्श
नंरसनंतथा। उपपत्यागुणाविद्धिपंचपंचसुपंचसु। १२ रूपंगंधोरसःस्पर्शःशब्दश्चैवाथतद्गुणाः इंद्रियैरुपलभ्यंते
पंचधापंचपंचभिः १२ रूपंगंधंरसंस्पर्शंशब्दंचैवाथतद्गुणान् इंद्रियाणिनबुध्यंतेक्षेत्रज्ञस्तैस्तुबुध्यते १५ चित्तमिं
द्रियसंघातात्परंतस्मात्परंमनः मनसस्तुपराबुद्धिःक्षेत्रज्ञोबुद्धितःपरः १६ ॥ ॥७

नतेनैवोपलब्धाउपलभ्यंतेइंद्रियैःकरणैः १४ उपलब्धुःस्वरूपमाहरूपमितिसार्द्धद्वयेनमनःसहितानींद्रियाणिनिज्ञेयं। क्षेत्रज्ञोविज्ञानात्माक्षेत्रंबद्धस्व
तयोःसमाहारः अथवाक्षेत्रयुक्तोज्ञः क्षेत्रज्ञः बुद्धिविशिष्टश्चेतनइत्यर्थः १५ क्षेत्रात्क्षेत्रज्ञंविविनक्ति। चित्तमिति १६ १६ ॥ ॥

चित्ताद्दीनंतःकरणवृत्तिभेदान्याचष्टेएवमिति। चेतयतेज्ञानाति। सामान्यतइदमितिज्ञानंअनंतरमवरतविशेषंचित्तमिति। पृथगितिकोरिदृशमुपन्यस्यपद्विचारात्मकंज्ञानंदं
दंवेतितन्मनः व्यवस्यतिनिश्चिनोतिपयावृत्तिर्वुद्धिः पदंइंद्रियैरर्थानव्यवस्यतिसउपलब्धावुद्धिमानवुद्ध्युपहितः १७ इंद्रियसंघातंश्रोत्रादियंचकं [illegible]

एवंचेतयतेजंतुरिंद्रियैर्विषयान्पृथक विचार्यमनसापश्चादथवुद्ध्याव्यवसति १७ इंद्रियैरुपलब्धार्थानहंवुद्धिर्मोक्तव्य वस्यति
चित्तमिंद्रियसंघातंमनोवुद्धिस्तथाष्टमी। १८ अष्टौज्ञानेंद्रियाण्याहुरेतान्यध्यात्मचिंतकाः पाणिपादंचपायुश्चमेहनं
पंचमंमुखं १९ इतिसंशब्दमानानिस्मरणकर्मेंद्रियाण्यपि जल्पनाभ्यवहारार्थंमुखमिंद्रियमुच्यते २० गमनेंद्रि
यंतथापादौकर्मणः करणेकरौ पायूपस्थेविसर्गार्थमिंद्रियेतुल्यकर्मणी। २१ विसर्गेचपुरीषस्यविसर्गेचाभि
कामिके बलंषष्ठं षडेतानिवाचासम्यग्यथागमं २२

[illegible] एतेनवुद्धेरिंद्रियत्वाद्उपलब्धातततोनिकृष्टोऽनुपाधिचिन्मात्रस्वरूपः क्षेत्रज्ञोदर्शितोभवति १८ मेहनंशिश्नं मुखंवागिंद्रियंअदनसा
धनंच १९ एतेषांविषयानाहजल्पनेति २१ पायूपस्थमितिपूर्वार्द्धस्योत्तरार्द्धव्याख्यातंवलमितिपंचवृत्तिःप्राणःयथामनस्तथासर्वेयांएतानिषडद्
तिमयावाचाउक्तानिइतिशेषः २२ ॥ ॥ ॥ ॥ ॥ ॥

चेष्टाकर्मेयथागमंमयासंशब्दिताइतिपाठेस्पष्टार्थः तेनसामान्याकरणा वृत्तिः प्राणाद्यावायवः पंचेतिसांख्यानांसमतः प्राणस्यइंद्रियानतिरेकपक्षः पराणस्तः निर्विशेषेणसा
मान्यमितिन्यायेनसुषुप्तौसर्वेंद्रियोपरमेप्राणानुपलंभापत्तेः तुल्यन्यायेनतथामनसोप्यनिंद्रियत्वापत्तेः २३ एवंजाग्रदवस्थापरीक्षिता सुषुप्तिस्वप्नयोः स्वरूपमाह
इंद्रियाणामिति इंद्रियाणपष्ठानिज्ञमनोवुद्धिसहितानिप्राणाव्यतिरिक्तानिपंचकर्मेंद्रियाणिचतेषांत्यागात्तत्संज्ञकोपरमेस्तद्वेवस्वरूपमात्रेणनदाकेवल्यास्तिइत्यर्थः
नरइतिमूले ता मनसोशाभावाज्जीव तंदर्शितं २४ व्युपरतमितिच्छेदः २५ ननुस्वप्नेविषयाणामभावात्कथंतज्ज्ञानमतआह सात्त्विकाइति योभावाः भाव्यंतेचिंतनतइ

तानचेष्टेंद्रियगुणाः सर्वेसंशब्दितामया २३ इंद्रियाणांस्वकर्मभ्यः श्रमादुपरमोयदा भवतींद्रियसंन्यासादथस्वपि
तिवैनरः २४ इंद्रियाणांव्युपरमेमनोनुपरतंयदि सेवतेविषयानेवतंविद्यात्स्वप्नदर्शनं २५ सात्त्विकाश्चैवयेभावास्त
थाराजसतामसाः कर्मयुक्तान्प्रशंसंतिसात्त्विकानितरांस्तथा २६ आनंदः कर्मणांसिद्धिः प्रतिपत्तिःपरागतिः

तिभावाः वासनामयाः विषयाः येजाग्रत्त्वसिद्धाः तानेवसात्त्विकादीन कर्मयुक्तानभोग सात्त्विकस्यनिमित्तानिभावान्संश्रयतेस्मृतिः २७
गप्रदकर्मयुक्तानप्रशंसंतिस्वप्नेपीतिशेषः जाग्रद्वासनाएवकर्मोद्वेधात्स्वप्नेपिभांतीत्यर्थः २६ एतदेवाह आनंदइतिआनंदः एवंकर्मणांसि द्धिरप्रवृत्ति
यापत्तिर्ज्ञानंपरागतिः परवैराग्यं धर्मोवाधर्मोज्ञानंविरागश्च स्वप्नेसात्त्विकमेतद्रूपमितिसमस्तंज्ञेः सात्त्विकस्यपुरुषस्यस्मृतिः निमित्तानिहेतुभूतानआनं
दादीनभावान्वासनाः संश्रयतेसात्त्विकः प्रमानजाग्रद्वासनाहेतुकानानंदादीन्स्वप्नेस्मरतीतिभावः २७ ॥ ॥ ॥ ॥

मो०
३०१

301

सात्विकस्येत्युपलक्षणं तेन व्याचष्टे जंतवृष्विति सात्विकेषु राजसेषु तामसेषु वा जंतुषु एकैकेषु पृथक्पृथकेषु विविक्तेष्विमे भावाः याः वासनाः विधिं कर्मगतिं संस्थाय स्थिताः तानेव भावा-
न्स्मृतिः संश्रयतरति श्रेष्ठो संबंधः सात्विकादि संस्कारेष्वन्यतमः प्राक्कर्मणो योद्बलितः स्वप्ने तादृशान्भावान्स्मारयतीत्यर्थः स्मृतिरूपमपि तज्ज्ञानं भोगप्रदकर्म-
वशादेव प्रत्यक्षवदवभातीति भावः जाग्रत्स्वप्नयोस्तुल्यतामाह फलं दर्शयति भावयोरिति ईप्सितं प्रत्यक्षगमनं जाग्रद्भावजातीयस्य वर्गमने प्रत्ययस्य राशौ जागरीय भावस्य स्वप्ने स्वप्नस्य च

जंतवृषेकतमेष्वेवं भावा ये विधिमास्थिताः भावयोरीप्सितं नित्यं प्रत्यक्षगमनं तयोः २८ इंद्रियाणि च भावाश्च गुणाः सप्त-
दश स्मृताः तेषामष्टादशो देही यः शरीरे स शाश्वतः २९

जागरे च हृद्यस्यापि स्वप्नसोऽप्रत्यक्षं दृष्टं तदेव नित्यं प्रत्यपुनरावृत्तिलभावं ईप्सितं नित्यासुषुप्तिरेव मुक्तिः सैवात्यंतिकप्रत्याउच्छेदशीलयोर्भावयोरात्यंतिकोच्छेदः स एव संभवा-
दित्यर्थः २८ वद्धोऽहमेवमात्मनि तयोरुच्छेदः मा शंक्याह इंद्रियाणीति पूर्वोक्तानि च दश इंद्रियाणि त्रयः सात्विकादयो भावा एते सप्तदश गुणाः भोक्तुरष्टादशस्यात्म-
नो भोग्याः अतो भोक्तृभोग्ययोः स्वस्वामिभाव संबंधो वद्धोऽहमेवं तादात्म्याभावादुच्छेद्यो भवतीत्यर्थः शरीरे सप्तदशात्मिकायामविद्यायां प्रविष्टो योऽष्टादशः स शाश्वतो भोक्ते-
त्यर्थः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ गम०

३०१

न्या १

ननु भोक्तुर्विक्रियावतः कथं शाश्वतत्वमित्याशंक्याहाथवेति। अविषयाः सहिताः ते अष्टादश गुणाः भोग्याः एवं भोक्तुरपि अविषयाः संहतत्वादर्थमस्ति अतः सोऽपि भोग्यवर्गे
तद्भूतः इत्यर्थः शरीरिणां चिदात्मनां। यस्यानुभवस्यार्थं भोक्ता भोग्यमिच्छति स सर्वैरौषधीयामप्रमाणस्य इतस्यैवैते ष्टादश भोग्याः वक्तृत्वं भोक्तृभेदकृतानुभवभेदाभि
प्रायं। शरीरिणामिति कर्मणि षष्ठी। भोक्तृरूपोऽनुभवाश्रितान्यस्यानुभवस्य सत्वे प्रमाणमाहतद्धि योगेहीति यतोऽनुभवाभावे साविद्यास्तिन संतीति। प्रमाणादि
भावाभावसाधकस्यानुभवस्याभावे प्रमाणाद्यप्रवृत्तेः सिद्धोऽयमतः सत्वसिद्धत इत्यर्थः यथोक्तं वार्त्तिके। प्रमाणामप्रमाभावस्तथैव च यदाश्रिताः प्रवर्त्ते

प्रमाणेषु ४

अथवा सशरीरास्ते गुणाः सर्वे शरीरिणां संश्रितास्तद्वियोगे हि स शरीरान संतिते ३० अथवा संनिपातो यः शरी
रस्यां च भौतिकं एकश्च दशचाष्टौ च गुणाः सह शरीरिणा ऊष्मणा सह विंशो वा संघातः पांचभौतिकः ३१

तेन स्वसंभावना कुत इति। अप्रमाणां मातृमेयात्मकं ३० न चत्वनुभवोऽपि नष्टे मा स्यदुःखात्नुभवस्यापि प्रार्थ्यत्वायत्तेरित्यत आहाथवेति सन्निपातः एकीभावः शरी
रं स्थूलसूक्ष्मभेदेन द्विविधं एकोऽनुभवः शरीरिणा भोक्त्रा सह दश चाष्टौ चेत्यष्टादशपूर्वोक्ता गुणाः ऊष्मणा जठराग्निना सह विंशो विंशतेर्गणः अयं कृतस्नोऽपि
पांचभौतिकः संघातः अत्रानुभवस्य धीवृत्तिरूपत्वं वृत्तिवृत्तिमतोर्भेदं विवक्षित्वा संघातमध्ये पाठः तेन वृत्तिरूपोऽनुभवः क्षेत्रज्ञ इति शंकोपरास्य योमातृमा
नमेयप्रमाणानां नदाभासानां तदभावानां च प्रकाशको योऽखंडसंविद्रूपोऽनुभवः स क्षेत्रज्ञ इति स्थितं ३१ ॥ ॥ ॥ ॥ ॥

अथैषवदेहेष्वैशारदिकमाह। महानित्यादिना महान एकविंशतितमः उक्तविधोऽनमुवः वायुना प्राणेन उपकारेण सह शरीरं विंशात्मकं हेतुं धारयति ननु तत्प्राणेनैव यन्त्र
उदतिष्ठदिति प्राणस्यैव मुख्यं शरीरधारकत्वमुक्तं तत्कथमित्याशंक्याह तस्येति तस्य महतः निमित्तं उपकरणं देहभेदने देहनाशे यथा घटनाशे मुद्गरो निमित्तमात्रं भे
त्ता तु पुरुष एवं महानेव धारयिता देहस्य। वायुस्तु निमित्तमात्रं निमित्तमात्रपरतया वेश्रुतिरप्युपपन्नैवेति न कश्चिद्दोषः तथा च श्रुत्यंतरं न प्राणेन नापानेन म
र्त्यो जीवति कश्चन। इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति भावयुक्तस्य तेन अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वे

३१
महांसं धारयत्येतच्छरीरं वायुना सह तस्य भावयुक्तस्य निमित्तं देहभेदने ३२ यथैवोत्पद्यते किंचित्पंचत्वं गच्छते तथा पु
ण्यपापविनाशांते पुण्यपापसमीरितः देहं विशति कालेन ततोयं कर्मसंभवं ३३ हित्वा हित्वा ह्ययं प्रैति देहाद्देहं कृताश्रय
: कालसंचोदितः क्षेत्री विशीर्णाद्वा गृहाद्गृहं ३४ ॥ ॥ ॥

द्य न तत्स्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महांतं। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिश्रुत्यर्थः दर्शितः ३२ एवंभूतस्य देहनाशोत्पत्ती स्व
तु नाशोत्पत्ती अपि स्त इत्याह। यथैवेति सार्धेन यथैव किंचिन्नवं दारुहिकमुत्पद्यते नश्यति च तथैवायं प्राणः पुण्यपापविनाशांते पंचत्वं गच्छति संचितपुण्यपापाभ्यां
समीरितः कालेन देहं देहांतरं विशति ३३ कृताश्रयः अविद्याकामकर्मभिः निष्पादितदेहांतरः वा शब्द इवार्थे ३४ ॥ ॥ ॥ ॥

नहीति देहादिसं वंधनिषेधति २

तत्र देहसंवंधकृतेन मरणादौ सत्त्वीः संवंधदर्शिनः आत्मनोऽनात्मना देहपुत्रादिसंवंधं वरूक तत्र विद्यमानमपि भ्रांत्या पश्यंतः ३५ पुत्रादिसंवंधं ता
वन्निषेधति नैवेति कदाचित विद्यया कर्मदाहे सति परमां गतिं मोक्षं याति ३७ तथापि प्रारब्धकर्मणामवश्यभोक्तव्यत्वमाह पुरणेति ३८ संचितकर्म

तत्रैनैवानुतप्यंते प्राज्ञा निश्चितनिश्चयाः कृपणास्त्वनुतप्यंते जना: संवंधदर्शिनः ३५ नत्वयं कस्यचित्कश्चिन्नास्य क
श्चन विद्यते भवत्येकोह्ययं नित्यं शरीरे सुखदुःखभुक् ३६ नैव संजायते जंतुर्न्न च जातो विपद्यते याति देहमयं मुक्त्वा
कदाचित्परमां गतिं ३७ पुण्यपापमयं देहं क्षपयन्कर्मसंश्रयात् क्षीणे देहः पुनर्देही ब्रह्मत्वमुपगच्छति ३८ पु
ण्यपापक्षयार्थं हि सांख्यज्ञानं विधीयते तत्क्षये ह्यस्य पश्यंति ब्रह्मभावे परां गतिं ३९ शांतो मोक्षधर्मे सुनारदासि
तसंवादे युधिष्ठिर उवाच भ्रातरः पितरः पौत्रा ज्ञातयः सुहृदः सुताः अर्थहेतोर्हता: क्रूरैरस्माभिः पापकर्मभिः १
येयमर्थोद्भवा तृष्णा कथमेतां पितामह निवर्त्तयेयं पापानि तृष्णया कारिता वयं २

सांख्यज्ञानेनैव दाहइत्याह पुण्येति। तत्क्षये पुण्यपापक्षये सति अस्य जीवस्य ब्रह्मभावे ब्रह्मविदूह्ये व भवतीति तोक्षं नि सिद्धे व ब्रह्मविद्यया व्यक्तीभूते सति परां गतिं कैवल्यं प
श्यंति पंडिताः शास्त्रदृष्ट्या न तत्र त्वस्य कैवल्यमन्येन द्रष्टुं शक्यते इति ३९ शांतो० स नन्वतः उक्तविधज्ञानप्रतिवंधिका सर्वानर्थहेतुस्तृष्णा ममतारूपा मे

अर्थाः ब्रह्मलोकांताः विषयाः समृद्धाः संपन्नाः हि प्रसिद्धं विजानतां विवेकिनां दुःखमेव यदाह भगवान्पतंजलिः परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधा
च्च दुःखमेव सर्वं विवेकिन इति परिणामे दुःखं विनश्यद्वस्तु पुत्रादि दुःखं ददाति। विद्यमानोऽपि चेत्पुत्रवत्त्वाद्यं गुणवान्निति तेनाप्ययं दुःखं ददाति गुण
वान्विनष्टोऽपि हा पुत्रेति स्मृतः स्मृत्वा दुःखं संस्कारोद्बोधनेन दुःखं ददाति सर्वथा मणीयेऽपि तस्मिन्बलं गुणवृत्तमिति निन्यायेन प्रतिक्षणपरिणामि

भीष्म उवाच अत्राप्युदाहरंतीममितिहासंपुरातनं गीतं विदेहराजेन मांडव्यायानुपृच्छते ३ सुसुखं बत जीवामि यस्य मे नास्ति किंचन ४ अर्थाः खलु समृद्धा हि वाढं दुःखं विजानतां असमृद्धास्त्वपि सदा मोहयंत्यविचक्षणा
न् ५ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां ६ यथैव शृंगं गोः कालेव
र्धमानस्य वर्धते तथैव तृष्णा वित्तेन वर्धमानेन वर्धते ७ किंचिदेव ममत्वेन यदा भवति कल्पितं तदेव परितापाय ना
शे संपद्यते पुनः ८

तया विजनसमृद्धा राजसं तामसं दुःखमोहहेतुपरिणामं योगिन एव जानंति न तु मंदाः ततः संज्ञाः स्थावरवज्ज्ञा सहामन्त्रास्तदुः
खमिति विद्वद्भ्ये अन्ये क्रियातकस्तो हि विद्वान् अर्थं तु दुःखलेशेनाप्युद्विजते ऽतः विवेकिनः सर्वं ब्रह्मलोकांतं दुःखमेवेति सूत्रार्थसंक्षेपः ६ ८

प्राप्येति धर्मार्थमपि वित्तं न लिप्सेत यथोक्तं धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति धर्ममपि अर्थप्राप्त्येव उपयुंजीत कामोत्कर्षप्राप्त्या
पि विसर्जयेदेव ९ आत्मना सोपमः आत्मौपम्येन सर्वेषां सुखमिच्छन् दुःखं च नेच्छेदित्यर्थः सर्वं त्यजत्यपि संचयं १० ततो किमत आह उभे इति सत्यानृते जाग्रत्स्वप्ने शो
कानंदौ इष्टवियोगसंयोगजौ त्यक्त्वा कुतः यस्मात् प्रियाप्रिये इष्टानिष्टे एव तन्मूलभूते त्यजति तेन च भयं संसारस्य अभयं मोक्षस्य ऐश्वर्यं च प्रशांतो निर्विकल्पः निरामयो निर्द्वंद्वः

नकामाननुरुध्येत दुःखं कामेषु वै रतिः प्राप्यार्थमुपयुंजीत धर्मं कामाद्विवर्जयेत् ९ विद्वान्सर्वेषु वेदेषु आत्मनासोपमो
भवेत् कृतकृत्यो विशुद्धात्मा सर्वं त्यजति चैव ह १० उभे सत्यानृते त्यक्त्वा शोकानंदौ प्रियाप्रिये भयाभयं च संत्यज्य संप्रशां
तो निरामयः ११ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः योसौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं १२ चारित्र
मात्मनः पश्यंश्चंद्रशुद्धमनामयं धर्मात्मा लभते कीर्तिं प्रेत्य चेह यथासुखं १३ राज्ञस्तद्वचनं श्रुत्वा प्रीतिमानभवद्द्विजः पू
जयित्वा च तद्वाक्यं मोक्षधर्मौ समाश्रितः १४ शांतौ मोक्षधर्मेषु मांडव्यजनकसंवादः युधिष्ठिर उवाच किंशीलः किंसमाचारः
किंविद्यः किंपरायणः प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवं १

१२ चारित्रं सदाचारं १४ एकाधिकशततमः तस्मिन् अन्त्ये श्लोके शीघ्रं मोक्षमिच्छेदिति श्रुत्वा मोक्षसाधनानि पृच्छति किंशील इति शीलं सुस्वभावः आवरणाभाव
रः विद्या ज्ञानं परायणमास्पदं तत्प्राप्यं कार्यं ब्रह्मलोकप्राप्तिः परं यत्परमिति ॥ ॥ ॥ ॥ ॥

क्षमा २

क्रमेणोत्तरं मोक्षधर्मेनिरतः आध्यात्मविद्यापरिशीलनशीलः लब्धाहारः हितं मितं मेध्यं चान्नादिकं स्वीकुर्वन्नहूयोरेक मुन्नेरंजितेंद्रिय इति। इंद्रियजय एव महती विद्या मुमुक्षूणां शरणं च। प्रकृतेः परं निर्विशेषं अजं एव अक्षयं अविचलं २ सको रागद्वेषहीनः समुपोढेषु उपस्थितेष्वपि। परिव्रजेत् गृहं त्यक्त्वा मोक्षाश्रमं कुर्यात् ३ परिव्राड्धर्मानाह। न च क्षुषेत्यादिना ४ मैत्रायणगतः मित्रः सूर्यः तत्संबंधि मैत्रं तद्यनं गमैत्रायणं तत्र गतः सर्ववस्वत्यहं विभिन्नमार्गः अनिकेतग्राममेकरात्रं विधिना चरेदि

नं तद्धमे १

भीष्म उवाच मोक्षधर्मेषु निरतो लघ्वाहारो जितेंद्रियः प्राप्नोति परमं स्थानं यत्परं प्रकृतेर्ध्रुवं २ स्वगृहादभिनिःसृत्य लाभालाभे समो मुनिः समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ३ न चक्षुषा न मनसा न वाचा दूषयेदपि न प्रत्यक्षं परोक्षं वा दूषणं व्याहरेत्क्वचित् ४ न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत् नेदं जीवितमासाद्य वैरं कुर्वीत केनचित् ५ अतिवादांस्तितिक्षेत नाभिमन्येत कंचन क्रोध्यमानः प्रियं ब्रूयादाक्रुष्टः कुशलं वदेत् ६ प्रदक्षिणं च सव्यं च ग्राममध्ये च नाचरेत् भैक्षचर्यामनापन्नो न गच्छेत्पूर्वकेतितः ७

त्यर्थः ५। अकिंचन उद्दिश्य नाभिमन्येत अभिमानमहंकारं दर्पं न कुर्यादिति ६ ग्राममध्ये जनसमाजे प्रदक्षिणं अनुकूलं सव्यं प्रतिकूलं वा नाचरेत् न भिक्षार्थं चर्यां अनेकगृहार्थं अनापन्नः अकुर्वन्नित्यर्थः पूर्वकेतितः प्राङ्निमंत्रितो न गच्छेद्भोजनार्थमिति शेषः ७ ॥

अवकीर्णः मूढैः पांसुभिश्छन्नः धिक्कृत इत्यर्थः तथापि सुगुप्तः अचपलः स्वधर्मे निष्ठावान् । यथोक्तं तथाचरेत्तद्वै योगी सतां धर्ममदूषयन् । जना यथावमन्येरन् गच्छेयुर्नैव
सगतमिति मृदुः स्या वान् अप्रतिक्रूरः क्रूरं जिघांसन्तं अत्यपि क्रूरेण न स्यात् विश्रब्धः निर्भयः अविकत्थनः धन्योऽहमिति श्लाघामकुर्वन् ८ घटापात्राणां परिवेष

अवकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं वदेत् मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्यादकत्थनः ८ विधूमे न्यस्तमुसले व्यंगा
रे भुक्तवज्जने अतीतपात्रसंचारे भिक्षां लिप्सेत वै मुनिः ९ आनुयात्रिकमात्रः स्यान्मात्रालाभेष्वनादृतः अ
लाभे न विहन्येत लाभश्चैनं न हर्षयेत् १० लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः अभिपूजितलाभं हि जुगुप्से
तैव तादृशः ११ न चान्नदोषान्निन्देत न गुणानभिपूजयेत् शय्यासने विविक्ते च नित्यमेवाभिपूजयेत् शून्यागारं वृ
क्षमूलमरण्यमथवा गुहां अज्ञातचर्यां गत्वान्यां ततोऽन्यत्रैव संविशेत् १३

णपात्रहस्तानां संचारे गतेऽतिसतीति हेने शरावसंपाते इत्यनेनैतद्देवोक्तं ९ मात्रा आहारपूर्तिः तत्राप्यनादृतः किमुत वस्त्रादौ अलाभे सति न विहन्येत हिंसितो न
स्यात् १० साधारणं सर्वयोग्यं स्रक्चंदनादिलाभं ११ अन्नदोषान् पर्युषितत्वादीन् १२ शय्येति एकान्ते शय्यां आसनं उपवेशनं च काङ्क्षेतेत्यर्थः विविक्तमेवा
हयून्येति अन्यार्थैः शौची अन्यत्रात्मनि १३ ॥ ॥

अनुरोधो योगस्य विरोधः संगस्य ताभ्यां समः अद्याप्रपात्तनिर्दोषं हि समं ब्रह्मेति गीता। अचलः अकार्णिगत्यागतिशून्यः ध्रुवः कूटस्थः नानुरुध्येत नकांक्षेत कर्मणा द
पाहेयादिना १५ अभ्यस्तं पुनः पुनर्यथा स्यात्तथा भौतिकं तत्त्वजातं आत्मनो देहे इंद्रियादि पश्यन् अनात्मत्वेन आलोचयन् भू
तानां वामेषां पक्वेन भक्तादिना अपक्वेन मूलादिना वर्त्तयन् जीविकां कुर्वन्। यद्वा पक्वे रोति

अनुरोधविरोधाभ्यां समः स्यादचलो ध्रुवः सुकृतं दुष्कृतं चोभे नानुरुध्येत कर्मणा १४ नित्यतृप्तः ससंतुष्टः प्रसन्नवदनेंद्रिय
विभीर्जप्यपरो मौनी वैराग्यं समुपाश्रितः १५ अभ्यस्तं भौतिकं पश्यन् भूतानामागतिं गतिं निस्पृहः समदर्शी च पक्वापक्वे
न वर्त्तयन् १६ आत्मना यः प्रशांतात्मा लघ्वाहारो जितेंद्रियः वाचो वेगं मनसः क्रोधवेगं हिंसावेगमुदरोपस्थवेगं ए
तान्वेगान्विसहेद्वै तपस्वी निंदा चास्य हृदयं नोपहन्यात् १७ मध्यस्थ एव तिष्ठेत प्रशंसानिंदयोः समः एतत्पवित्र
परमं परिव्राजक आश्रमे १८ महात्मा सर्वतो दांतः सर्वत्रैवानपाश्रितः अपूर्वचारकः सौम्यो अनिकेतः समाहितः

पाठे मित्रामित्रसमूहेन वर्त्तयन् मित्रवत्सर्वमपि पश्येदित्यर्थः आत्मना देहेन आत्मलाभार्थी मित्यर्थः अध्ययनेन वसनीतिवत् १६ अनपाश्रितः संगमकु
र्वन् अपूर्वचरकः पूर्वाश्रमीयेषु देशासादिषु चरतीति तद्दन्यः १९ न संसज्येत तयोर्गृहे न वसेत २० ॥ ॥ ॥

मि७२

सि१ असं१

अहानंतपूर्वमिद्कृत्संश्वाहारादिलिलैवेति अज्ञानांतलि मेतलघुमिक्षेत्ताकषादित्वादनुप्रयोगः समूलकार्षकषनीनिवत्सामोक्षसाधनंएव संन्यासधर्मः २१ मोक्षयानंमोक्षप्रापकं। लोकाः विषयाः तेजोमयाः तैजसांतःकरणमयाः सत्यकामः सत्यसंकल्पइतिश्रुतिःतथाविदेहकैवल्यकालेआनंत्यायावाप्नन सातीनश्रन्यगाम्मश्रासयेकल्मतेप्रवज्मेतिशेषः २२ इतिअधिकशततमः उक्तः उक्तसन्यासोदेवतांशभूतैः सार्वभौमैर्भगवद्भक्तैरपिप्रार्थ्यतइत्येतद्दर्शयि

विज्ञानातां मोक्ष एष श्रमः स्याद्विजानतां मोक्षयानमिदं कृत्स्नं विदुषां हारितोब्रवीत् २१ अभयं सर्वभूतेभ्यो दत्वायः प्रव्रजेद्गृहात् लोकास्तेजोमयास्तस्य तथानंत्याय कल्पते २२ शांतौमोक्षधर्मेषु हारितगीता युधिष्ठिर उवाच॥ ॥धन्या धन्याइति जनाः सर्वेस्मान्प्रवदंत्युत न दुःखिततरः कश्चित्पुमानस्माभिरस्तिह १ लोकसंभावितैस्तैर्दुःखं प्राप्यास्मं कुरुसत्तम प्राप्यजातिं मनुष्येषु देवैरपि पितामह २ कदावयं करिष्यामः संन्यासं दुःखसंज्ञकं दुःखमेतच्छरीराणां धारणं कुरुसत्तम ३ ॥ ॥ ॥

तं युधिष्ठिरप्रश्नमाह धन्याइति १ देवैः धर्मादिभिः बीजप्रदैः जातिं जन्म प्राप्यपि यत अस्माभिरपि दुःखं प्राप्तं अतः शरीराणां धारणं दुःखमित्यन्तरेणान्वयः २ यतएतत दुःखं अतः दुःखसंज्ञकं दुःखनाशकं सन्यासं कदा करिष्यामः मारणतोषणानिशामनेषु शब्देति स्वेज्ञानानेमीरणार्थत्वानुवादात्तपश्चुसंतप यतीतिवा ख्याणाद शनाश्च। संज्ञ प्रयेते रखुं तिरोरणोदीत्ति गोलोयेनि मित्रापायेनैमित्तिकस्यप्यायाय इतिन्यपेन १ द्विहृत्तिः ३

एम०श्री एम०

२१ धर्म १

सप्तदशभिः पंचप्राणाः देहमनोबुद्धीदशज्ञानकर्मेंद्रियाणिहेतुभूतैः मुक्तिविरोधित्वपासंसारवर्द्धकैः कामंक्रोधंचलोभंभयंस्वप्नंचपंचममितिप्रागुक्तैर्योगदोषैः इंद्रियार्थैः शब्दादिभिः गुणैः
सत्वादिभिः अष्टभिः पंचस्थूलभूतानि त्रिविधाहंकारकर्मभिश्चेति अष्टत्रिंशतागुणेन विमुक्ताः ४ पुनर्भावं जन्म गमिष्यामः पारिव्राज्यंकरिष्यामः ५ सर्वं दुःखांतरं
ज्ञानंदुःखसांतवर्त्तींबोधयन्नाश्वासयतिनास्तीति अनंतंनास्तिदुःखमितिशेषः अस्त्येवदुःखांताख्योमोक्षइत्यर्थः यतः सर्वसंख्यानं यत्परिच्छेदस्तस्याविषयः ननुप्रलयेपिसर्वेषां
नोस्तिनतु संसारनिवृत्तिरस्त्यतआह पुनर्भावोभावोभववंपुनर्जन्मसोपिविख्यातः अंतवत्वेननसपुनरावर्त्ततइतिश्रुत्यासर्ववादिसंप्रतिप[illegible]त्याचप्रसिद्धः अंतः ननतथा

विमुक्तः सप्तदशभिर्हेतुभूतैश्चपंचभिः इंद्रियार्थैर्गुणैश्चैवअष्टाभिश्चपितामह ४ नगच्छंतिपुनर्भावंमुनयः संशितव्रताः
कस्वयंगमिष्यामोराजन्हित्वापरंतप ५ भीष्मउवाच नास्त्यनंतंमहाराजसर्वसंख्यानगोचरं पुनर्भावोपिविख्यातो
नास्तिकिंचिदिहाचलं ६ नचापिमन्यसेराजन्नेषदोषः प्रसंगतः उद्योगादेवधर्मज्ञाःकालेनैवगमिष्यथ ७

पिऐश्वर्यलब्धैरस्माभिः सकथंपौंशक्यइत्यतआह नास्तिकिंचिदिहाचलमिति। अतोन्यदार्त्तमितिश्रुतेरैश्वर्यस्याप्यंतोभवीष्यतीत्यर्थः ६ एषः ऐश्वर्यदोषइतिमन्यसेनरद्यपिने
तिवनच। तत्रहेतुः प्रसंगतः ऐश्वर्यस्यापिसंगहेतुत्वेनमोक्षप्रतिबंधकत्वात्तथापिधर्मज्ञाः पूर्वंउद्योगात्तशमाद्यभ्यासादेवकालेनचिरेणापिगमिष्यथप्राप्स्यथमोक्षमिति
शेषः बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यतइतिगीतावचनात् ७ ॥ ॥ ॥

गी॰ ६

किंचा। अयंजीवः पुण्यपापयोः सुखदुःखयोर्नेशो न ईष्टे। तत एव सुखदुःखे सोऽस्थैर्येण वर्तमसा रागद्वेषात्मकेनाज्ञानेन रुध्यते दैवपापिताभ्यां सुखदुःखाभ्यामनुद्विग्नः मोक्षार्थमुद्योगं कुर्यादित्यर्थः सुखदुःखयोरुच्छेद्यत्वं दर्शयितुं आत्मधर्मत्वं दृष्टान्तपूर्वकं स्फुटमस्तीति यथेति द्वाभ्यां। अंजनमपः कज्जलप्रचुरः मन्तः शिलायाश्चमानशिलांतरकृपीतरंजः यथा स्वयमरूपोऽपि वायुरंजनादिसंबंधाद्वर्णवानिव भूत्वा स्वयोनिं दिक्शब्दितमाकाशं चतद्वर्णवंतमिव करोति। एवं तमसावृतः अविद्योपाधिः समष्टिजीवः स्वयंविवर्णो रागादिरहितत्वात्तदोषास्पृगपि देहद्वयसंबंधात्तद्धर्मैर्गौरत्वकारणत्वसुखित्वादिभिस्तद्वान्निवभूत्वा स्वयोनिमंतर्यामिणमवर्णो त्रिगुणातीत

नेशं सततं देहीन्न्यपतेपुण्यपापयोः ततएवसमुत्थेन तमसा रुध्यतेपिच ८ यथांजनमपोवायुः पुनर्माति शिलांतरं अनुप्रविश्यतद्वर्णोहश्यतेरंजयन्दिशः ९ तथाकर्मफलैर्देहीरंजितस्तमसावृतः विवर्णोवर्णमाश्रित्य देहेषुपरिवर्तते १० ज्ञानेन हि सदाजंतुरज्ञानप्रभवंतमः अपोहति ततो ब्रह्म प्रकाशति सनातनं ११ ॥

नं १

तमपिआश्रित्यव्याप्यतद्वंतमीवकृत्वा देहेषु भ्रमति विंवप्रतिविंवयोरन्यत्वात्प्रतिविंवगतं कंपादिकं वस्तुतो विंव एवावभासते एवं जीवगतोऽपि संसारो ब्रह्मण्येवास्तितपोरभेदात्तत्पुनोदुःखादेरात्मधर्मत्वाभावात्सुखेन उच्छेद्यत्वं स्यादित्यर्थः १० ननु देहात्मयोगोऽनादित्वादुरुच्छेद इत्याशंक्याह ज्ञानेनेति तमः अनात्मन्यात्मबुद्धिरूपो विपर्ययः सच आत्मनः संगेऽपि दुःखित्वादिभ्रमः अज्ञानतः ज्ञानेन नश्यति यदा तदा प्रकाशते ब्रह्म सनातनं सदैकरूपं अनादिरपि देहात्मयोगो भ्रांत्यात्मकत्वात्तज्ज्ञानेन उच्छेद्यं
इत्यर्थः ११

तत्त्वसनातनंब्रह्मअपत्नसाध्यंकर्मणाप्राप्यंनअनित्यत्वापत्तेः कर्मजंहिउत्पाद्यंआप्यंसंस्कार्यंविकार्यंवास्यात् नहिसं[illegible]यवनेनपिंडस्वोत्पाद्यःस्यात् ब्रह्मोत्पाद्यं अनित्यत्वापत्तेःना
पियाप्यमवकृन्मनेनप्राप्यंआत्मत्वात् अस्यत्वेघटवज्जडत्वापत्तेः नापिव्रीहिवत्स्ववघातेनउपासादोषापनयेनसंस्कार्यंअसंगत्वात् संगित्वेवह्नौ स्यवत्तदनित्यत्वापत्तेः
नापिविकार्यंक्षीरादिवद्विकारयुक्तस्यानित्यत्वापत्तेः अतोज्ञानेनाज्ञानापनोदेसतिकंठगतविस्मृतचामीकरवत्सिद्धमपिसाध्यमिवोच्यते तस्माद्युक्तमपत्नसाध्यमिति

अपत्नसाध्यंमुनयोवदंतियेचापिमुक्तास्तउपासितव्याः त्वयाचलोकेनचसामरेणतस्मान्नशोचंतिमहर्षिसंघाः १२
अस्मिन्नर्थेपुरागीतंशृणुष्वैकमनानृप यथादैत्येनवृत्रेणभ्रष्टैश्वर्येणचेष्टितं १३ निर्जितेनासहायेनहृतराज्ये
नभारत अशोचताशत्रुमध्येबुद्धिमास्थायकेवलां १३ भ्रष्टैश्वर्यंपुरावृत्रमुशनावाक्यमब्रवीत् काचि
पराजितस्याद्यनव्यथातेस्तिदानव १४ वृत्रउवाच सत्येनतपसाचैवविदित्वासंशयंह्यहं नशोचामिनहृष्या
मिभूतानामागतिंगतिं १५

पेतिअत्रविद्वदनुभवएवप्रमाणमितिभावः नशोचंतिब्रह्मोपासनाल्लोपरमंतेउद्योगिनोऽवश्यंप्रशस्ताःसिरतत्त्वप्राप्तियोगवतामभिवृत्तमितिभावः १२ केवलांसं
गृहीनां १४ सत्येनअवाधितार्थेनवेदवाक्येनतपसामननध्यानात्मकेनआलोचनेनचआगतिंसंसारगतिंमोक्षंअसंशयंविदित्वानशोचामिनहृष्यामि त
थाच मत्वाधीरोहर्षशोकौजहातीतिश्रुतिः १५ ॥ ॥

कालेनेतियुगचतु[illegible]पर्योगपाः पुरापपापाख्याधर्मोलक्ष्यते केचिन्नरके कानिचिद् उत्तानि दिव्यानिस्वर्गाणिहीति १६ कृपपित्वाभोगॆन्नरकेवातंकालेनीत्वापुरापापुरपे समाप्यत्तामामेवन्नतिर्यगादियोनिषापकाम्यांचोदिताः संतः पुनः पुनर्भवंति कालचोदिताइत्यस्यव्याख्यानंसावशेषेणकालेनेति १७ कामबंधनबंधनाः कामयाशब[illegible]ः १८ जीवानिर्जीववंतिभूतानि स्वहृष्ट्वानन्नहृष्टंस्वहृष्टंव्यवहितमतीतमनागतादिचतन्तावातिगच्छतिप्राप्नोतीतिजानातीनरहृष्टवान् स्वतीन्द्रियज्ञानी। स्वेहंवे घ्नीतिशेषः संसरतोजीवानां निदर्शनंशास्त्रघस्यंचजोनामीसर्थः १७ एतदेवाहतिर्यगितिचरित्वानाहृशंकेप्रतिपद्यतेइतिस

मोक्षत्याससुखादिकं ४

नर

कालसंचोदिताजीर्वभजंतिनरकेवशाः परितिष्ठनिसर्वाणिदिव्याणपाकर्मनीषिणाः १६ कृपपित्वाठतंकालंगणितं कालचोदिताः सावशेषेणकालेसंभवंतिपुनः पुनः १७ तिर्यग्योनिसहस्राणिगत्वानरकमेवच निर्गच्छंत्यवशाजीवाः कामबंधनबंधनाः १८ एवंसंसरमाणानिजीवानहमदृष्टवान् यथाकर्मयथालाभइतिशास्त्रनिदर्शनं १९ तिर्यग्गच्छंतिनरकंमानुष्यंदैवमेवच सुखदुःखेप्रियद्वेषेचरित्वापूर्वमेवह २० कृतांतविधि[illegible] संयुक्तः सर्वोलोकः प्रपद्यते गतंगच्छेतिचाध्वानंसर्वाभूतानिसर्वदा २१

दैनसंबंधः कृतांतविधिसंयुक्तः यमयातनांते २० गतमिति यावत्संपानमुषित्वाथैतमेवाध्वानंपुनर्निवर्त्तंतेश्रुतिश्च तेः संपतत्वनेनेतिसंपातः कर्मयावत्तावत्कालंस्थित्वापुनरत्र यथागतंआयांतीतिसर्वदेतिजन्ममरणप्रवाहस्यानंतमुक्तं एतत्वानंप्रत्येचेत्विन्नुमध्येनविशेषणंकालेतिकर्ममानेनमितंतेनतेनैवकर्मप्र यतोनायमध्वास्ती। निदर्शितं २१

भा०
३०८

308

एवंसृष्टिस्थित्योः परायणंपरमात्मानंभाषमाणंकथयन्तंहंसंप्रतिभगवानुशनाशुक्राचार्यः अस्मद्योनिर्नातस्यापीदृशंज्ञानमित्याश्चर्यंमत्वातद्बुद्धिपरीक्षार्थंप्रश्नमा
चत २३ कलापानस्त्रसम्भावविनाशकानस्त्रानर्थकान्वादानस्त्रसरोभूत्वाकथंभाषसइति २४ गंधाघ्राणानंतरमाश्रयोयमदैनेनत्रवंहिसितवान् २५ वैहायस

कालंसंख्यानसंख्यातंसृष्टिस्थितिपरायणं तंभाषमाणंभगवानुशनाप्रत्यभाषत धीमन्नुष्टप्रलापांस्त्वंनाजकस्मात्प्र
भाषसे २३ हंसउवाच प्रश्नमेतद्दुरुक्तंतथामेषांमनीषिणां मयायज्ञपलुब्धेनपरातसंमहन्नयः २४ गंधानाघ्राय
भूतानांरसोश्चविविधानपि अवंहंश्रीन्समाक्रम्यलोकान्वैस्वेनतेजसा २५ ज्वालामालापरीक्षिप्तोवैहायसचरस्त
थाब्रजेपः सर्वभूतानामासन्नित्यमपेतधीः २६ ऐश्वर्यंतपसाप्रासंभ्रष्टंतच्चस्वकर्मभिः श्रुतिमास्थायभगवन्नरो
चामिततस्त्वहं २७ युयुत्सुनामहेंद्रेणपुरामाहंमहात्मना ततोमेभगवान्दृष्टोहरिर्नारायणःप्रभुः २८

चरःविमानेनगच्छन् २७ युयुत्सुनायोद्धुमिच्छुमाततः तत्रयुद्धकालेमेमयाभगवान्सर्वैश्वर्यसंपन्नः दृष्टःइंद्रसहायार्थमागतःसन्नवलोकितः हरिःपापहर्ता
नारायणःनारस्यजीवसंघस्याश्रयःस्थिततयायस्यापंरत्वेलोकान्तप्रभुरंतर्यामी २८ ॥ ॥ ॥

नं १८५१

एम०
३०८

वैकुंठः विकुंठायाश्च पत्यं। विकुंठानाम माता रौद्रस्तल्लंपुत्रमिच्छंतीम हत्तपस्तेपे तस्याः स्वयमेवेंद्रः पुत्रोजनिष्टेत्यनुक्रमणिकावाक्यात् विकुंठनं भूतानां मेलनं करोतीति विकुंठः
स्वार्थे तद्धितः तथाच नामनिर्वचनाध्याये वक्ष्यति। संश्लेषिता मया भूमिरद्भिर्व्योमा च वायुना वायुना चैव तेजश्च वैकुंठत्वं ततो ममेति विद्यासागरीये पुरुषः पूर्णः यतोऽत्र
नंतः त्रिविधपरिच्छेदशून्यः शुक्लः शुद्धः विष्णुः व्यापनशीलः सनातनः कूटस्थः मुंजकेशः मुंजवद्भीतकेशः हरिश्मश्रुः पिंगलश्मश्रुः हिरण्यश्मश्रु हिरण्यकेश इति
श्रुतेः सर्वभूतानि रायतस्तस्य पितामायावी तस्यापि पितामहः ब्रह्म २९ तस्य प्रासंगिकस्य विष्णुदर्शनात्मकस्यातपसः इंद्रविजयपर्यंतैर्लोकाधिपत्यहेतोः मा

वैकुंठः पुरुषोऽनंतः शुक्लो विष्णुः सनातनः मुंजकेशो हरिश्मश्रुः सर्वभूतपितामहः २९ नूनं तु तस्य तपसः सावशे
षमिहास्ति वै यदहं द्रष्टुमिच्छामि भगवन्कर्मणः फलं ३० ऐश्वर्यं वै महद्ब्रह्मन्ब्रह्मणो कस्मिन्व्यतिष्ठितं निवर्तते वा
पि पुनः कथमैश्वर्यमुत्तमम ३१

वशेषं कर्मगतिजिज्ञासोत्यास्कंशेषं किंचिदस्तीत्याह नूनमिति ३० महदैश्वर्यं ब्रह्मवर्णां ब्राह्मणादिषु मे उत्तममैश्वर्यं ब्राह्ममैश्वर्यं निवर्तते च कथं अयमर्थः सर्वान्स्वलोका
नाप्नोति सर्वांश्च कामानाप्नोति तमात्मानमनुविद्य जानातीत्यात्मसाक्षात्कारफलमैश्वर्यं मंतव्यं चेत्कर्मफलाविशेषः न च पुनरावर्तत इति श्रुतिर्व्याकोपश्च अनंतं चेत्तत्र
स्थूलमनण्वित्यादिभिर्निर्विशेषब्रह्मप्रतिपादकश्रुतिविरोधः निर्विशेषसविशेषयोर्ब्रह्मणोः समत्वाकल्पायोगादिति ३१

प्रवर्त्तन्ते चेष्टां कुर्वंति कोनपर्मीत्यर्थः शाश्वतो ब्रह्मभूतेति शेषः किंफलंशाश्वतत्वप्रापकंज्ञानं यज्ञादिफलं ३१ कर्मणा यज्ञादिना ज्ञानेनउपास्त्या फलं विद्याख्यं ३४

कस्माद्भूतानिजीवंतिप्रवर्त्तन्ते तथापुनः किंवाफलंपरंप्राप्यजीवतिष्ठतिशाश्वतः ३२ केनवाकर्मणाशक्यमथज्ञानेनके
नवा तदवाप्तुंफलंविप्रतन्मेव्याख्यातमर्हसि ३३ इतीदमुक्तः समुनिस्तदानीं प्रत्याहयत्तच्छृणुराजसिंह मयोच्यमा
नंपुरुषर्षभत्वमनन्यचित्तः सहसोदरीयः ३४ शांतौमोक्षधर्मेषुवृत्रगीतासु उशनोवाच नमस्तस्मै भगवते देवायप्रभवि
ष्णवे यस्यपृथ्वीतलंतातसाकाशंबाहुगोचरं १ मूर्द्धायस्यत्वनंतंचस्थानंदानवसत्तम तस्याहंतेप्रवक्ष्यामिविष्णोर्महात्म्य
मुत्तमं २ तयोः संवदतोरेवमाजगाममहामुनिः सनत्कुमारोधर्मात्मासंशयच्छेदनायवै ३ सपूजितोसुरेंद्रेणमुनिनोश
नसातथा निषसादासनेराजन्महार्हे मुनिपुंगवः ४ तमासीनंमहाप्राज्ञमुशनावाक्यमब्रवीत् ब्रूह्यस्मैदानवेंद्रायविष्णो
र्माहात्म्यमुत्तमं ५ सनत्कुमारस्ततः श्रुत्वाप्राहवचोर्थवत् विष्णोर्महात्म्यसंयुक्तंदानवेंद्रायधीमते ६ ॥ ॥ छ

नि२

वृत्रएधिकशततमः॥ ॥दुर्वहं प्रथमारंनिर्वैरंदुर्हरिं शरणाकरोतिनमद्गतिःतलंप्रथवीमागः साकाशं आकाशसंहितंसर्वेउपरितनंबाहुगोचरोमध्यस्थमित्यर्थः १ अनंतंतस्था
नंमोक्षः २ विष्णुमनुग्रहमाहतपोरिति ६ ॥ ॥ ॥ ॥ ॥ ॥

माहात्म्यं महाश्वासो ऽग्रात्मा वतस्य भावः विष्णोर्जगज्जन्मादिकर्तृत्वं पृथगभिन्नत्वं च अथ एव उत्तमं तच्छृणु यस्मात् कृतत्वात् तदेवाह विष्णो जगत् कनके कुंडलमिव स्थितं विद्धि । वि
तर्नाचतनं सर्वं विष्णुरेवेत्यर्थः ७ एतदेव व्युत्पादयति सृजतीति ८ निमित्तमुक्त्वा उपादानत्वमाह ईदृशं चास्मिल्लिति कार्यं यत्र लीयते यतश्चोद्भवति तदुपादानमित्यर्थः
एवमभिन्ननिमित्तोपादानेन लक्षणं जगत्कारणत्वं विष्णोरुक्तं तत्प्राप्त्युपायमाह नेति संयमेन योगेन ९ संयमेनैवेत्येवशब्देन ज्ञानादीनां आत्मप्राप्तौ असाधनत्वं माभूदिति

शृणु सर्वमिदं दैत्या विष्णोर्माहात्म्यमुत्तमं । विष्णौ जगत्स्थितं सर्वमिति विद्धि परंतप ७ सृजत्येष महाबाहो भूतग्रामं चराचरं ।
एष चाद्यिपते काले काले विसृजते पुनः ८ अस्मिन्नाप्नोति विलयमस्माच्च प्रभवं जगत् । नैष ज्ञानवता शक्यस्तपसा नैव
चेज्यया ९ संप्राप्तुमिंद्रियाणां तु संयमेनैष शक्यते । बाह्ये चाभ्यंतरे चैव कर्मणा मनसा स्थितः । निर्मलीकुरुते बुध्या सोमृत्वा
नंतमश्नुते १०

ह्वाद्येति यः पुमान् बाह्ये यज्ञादौ विविदिषं नियज्ञेन स्वादिष्कृते विविदिषाहेतौ आभ्यंतरे शांतो दांत उपरत तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुतेः दर्शनहेतौ च
नांतरंगे समाधौ मनसि संकल्पवर्जं मनेनांगसंस्क्रियत इति स्मृतेः आत्मविविदिषा चित्तसंस्कार उभयत्र उभयसंबंधी च बुध्या निश्चयेन स्थितः निष्ठावान् तानि बाह्ययज्ञादीनि
निर्मलीकुरुते ते शुद्धिं शोधयतीत्यर्थः सः अमृतं देहाभिमानत्यागलभ्यं आत्मलोकं गत्वा आनंदं समश्नुते १० ॥ ॥ ॥ ॥ ॥

मी

310

निर्मलीकरणेदृष्टांतांतरमाह यथेति हिरण्यकर्त्तास्वर्णकारः ११ जातिशतैर्जन्मशतैः अनेनप्रज्ञादिनाशमादिनात्मनिपत्नेनलेकजातौएकजन्मन्यपि १२ दृ
ष्टांतांतरमाह। लीलयेति १३ ननुकर्मसंस्कोपमार्गोपिचित्तशुद्धिर्नदृश्यतेतत्सत्कस्याम्यर्थमित्याशंक्यदृष्टांतपूर्वकंआहयावत्फले।सिद्धानीत्याहत्रिभिःय

यथाहिरण्यकर्त्तावैरूप्यमयोविशोधयेत् वह्नुशोतिशयत्नेनमहतात्मकृतेनह ११ तद्वज्जीतिशतैर्जीवःशुद्ध्यतेनेनक
र्मणा यत्नेनमहताचैवाप्येकजातौविशुध्यते १२ लीलयाल्पयथागात्रात्सम्मार्जनात्मनोरजः वह्नियत्नेनमहताद्दोषनि
र्हरणंतथा १३ यथावाल्पेनमाल्येनवासितंतिलसर्षपं नमुंचतिस्वकंगंधंतद्वत्स्पर्शने १४ तदेववहुभिर्मा
ल्यैर्वासमानंपुनःपुनः विमुंचतिस्वकंगंधंमाल्यगंधेचतिष्टति १५ एवंजातिशतैर्युक्तोगुणैरेवप्रसंगिषु वुद्ध्यानि
वर्त्ततेदोषोपायत्नेनाभ्यासजेनच १६ कर्मणात्वनुरक्तानिविरक्तानिचदानव यथाकर्मविशेषांस्तुप्राप्नुवंतितथा
शृणु १७ यथावर्त्तंप्रवर्त्तंतेयस्मिंस्तिष्ठंतिवाविभो तत्तेनुपूर्व्याख्यास्येतदिहैकमनाःशृणु १८

यावेति एवंयुक्तोयोजितःगुणैःसत्वाद्यैःप्रसंगिषुस्त्र्यादिसंगिषु दोषःअभ्यासजेनवास्याभ्यंतरसाधनानां पुनःपुनरावृत्त्यत्येन १६ रक्तानिजीवनातानीतिशेषःकर्मवि
शेषान्रागविरागहेतून् १७ यथावाकर्मणिप्रवर्त्ततेःविद्यादशायांयस्मिन्निमित्तेतिष्टंतिकर्मभ्योनिवर्त्तंतेविद्यायांसत्यांआनुपूर्व्या तिक्रमःपूर्वक्रमार्थ १८

एवंमाधनात्मिमुखीकृतस्यज्ञेयमाह अनादीति अनादिनिधनः निसःधोततइतिदेवश्चिन्मात्रः ननु निसज्ञातंनास्येवघटज्ञानंज्ञातंघटज्ञानंनष्टमित्यनुभवादित्याशंक्याह
श्रीमानितिश्रीयतइतिश्रीरुपाधिस्तद्वान घटाकाशवदौपाधिकावुत्पत्तिलयौ।नतुस्वतइत्यर्थः हरिः संहर्त्तानारायणः सर्वाश्रयः प्रभुः सर्वनियंता १९ अस्यैवमायावि त्वं दृष्टुं नयविधस्य२
गोपादानत्वमाहसर्वाणीतिसर्वे ष्वभूतेषुशरीरेषुक्षरः संघातः अक्षरः जीवः एकादशइंद्रियाणिपिवतिमस्त्तकातिरश्मीभिरिंद्रियैः अव्यक्तात्इतिमहतः सर्गः प्रथम
उक्तः भूतेष्वितिभूतसर्गोद्वितीयउक्तः एकादशेतिवैकारिकस्तृतीयऐंद्रियकःसर्गःउक्तः तएतेत्रयः प्राकृताः सर्गाः यथोक्तंवैष्णवे प्रथमोमहतःसर्गोवि

अनादिनिधनः श्रीमानहरिर्नारायणः प्रभुः सर्वेत्तजतिभूतानिस्थावराणिचराणिच १९ सर्वेसर्वेषुभूतेषुक्षरश्चाक्षरए
वच एकादशविकारात्माजगत्पीबतिरश्मिभिः २० पादौतस्यमहीविद्धिमूर्द्धानंदिवमेवतु बाहवस्तुदिशोदैत्यश्रोत्रमा
काशमेवच २१ तस्यतेजोमयः सूर्योमनश्चंद्रमसिस्थितं बुद्धिर्ज्ञानगतानित्यंरसस्त्वप्सुव्यवस्थितः २२ ॥ ॥

ज्ञेयोब्रह्मणात्मकः तन्मात्राणांद्वितीयस्तुभूतसर्गोहिसस्मृतः वैकारिकस्तृतीयस्तुसर्गऐंद्रियकः स्मृतः इत्येषप्राकृतः सर्गःसस्मृतोबुद्धिपूर्वकइति २० एकात्मसि
दृश्येनारायणावयवत्वेनकृत्स्नंजगद्विरूपयतिपादाविस्तारिनादिवंस्वर्लोकं २१ तेजोमयःचाक्षुषः मनश्चंद्रमसीसाद्यौ आधाराधेयभावोगंगायांजलमितिवद्रसे
दविवक्षयाज्ञेयः बुद्धिर्महत्तत्वंज्ञानगतात्वृत्तिरूपज्ञानाकारासत्यव्यवस्थितः आपोरसनेसर्थः २२ ॥ ॥ ॥ ॥ ॥ ७

अनंतरम् संहिताः नेत्राभ्यां नेत्ररश्मिभिर्निर्वृत्तमिति शेषः पादयोः पादाभ्याम् २३ रज इति एते गुणाः वक्ष्यमाणा विषयाः षट्प्रकाराः नारायणात्मकत्वेन ध्यानविद्धुतया
नतदात्मानो षड्विधजीवसंज्ञा भवंति आश्रमाणामिति संबंधः कर्मणां स्वपादेः फलेन तस्माश्रिरेवसवर्गस्वकृतस्य फलेसस्वर्गात्मकं तत्त्वमित्यर्थः २४ अ
कर्मणः नैष्कर्म्यसंन्यासस्य फलं मोक्षः २५ छंदांसि मंत्राः स्वयं अक्षरं प्रणवः वर्णो वर्णा आश्रमाश्च आश्रमोपस्य २५ परमो धर्मः आत्मदर्शनं। [illegible]य

ऽधोरनंतरात्तस्य ग्रहादानवसत्तम नक्षत्रचक्रं नेत्राभ्यां पादयोर्भूश्च दानव २३ रजस्तमश्च सत्त्वं च विद्धि नारायणा
त्मकं सोऽश्रमाणां फलं तात कर्मणां तत्फलं विदुः २४ अकर्मणः फलं चैव स एव परमव्ययः छंदांसि यस्य रोमाणि
स्वक्षरं च सरस्वती २५ वक्त्राश्रयो वह्निमुखो धर्मोत्कृदित्वमाश्रितः स ब्रह्म परमो धर्मस्तपश्च सदसच्च सः २६ श्रु
तिशास्त्रग्रहोपेतः षोडशर्त्विक्क्रतुश्च सः पितामहश्च विष्णुश्च सोऽश्विनौ स पुरंदरः २७ ॥

योक्तं याज्ञवल्क्येन इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति तपः कृच्छ्रचांद्रायणादि तत्फलमध्ययमेवेत्यर्थः सत् कार्यं असत्
तत्कारणं श्रुतिः मंत्राः शास्त्रं शास्त्रीति शास्त्रप्रवर्तनीवाक्यब्राह्मणं ग्रहाः ऐंद्रवायवादयः सोमपात्राणि षोडशऋत्विजः ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोताए
ते सर्ववेदीयाः होता मैत्रावरुणाच्छावाकोग्रावस्तोता एते ऋग्वेदिनः अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता एते याजुषाः उद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्य एते सामगाः २७

तेऋत्विजः पृथग्दर्शनात् अपिइंद्राग्न्योर्हेंद्रोऽन्यः अग्नेः वैश्वानरोऽन्य इति शास्त्रेणएषकृपितामहादीन्कर्मपृथक्त्ववशात्सर्पंतो पित्रसैकतांतथाकारणत्वेनसंविशंति।
तथाचकात्यायनः कर्मपृथक्त्वाद्धिपृथगभिधानस्तुतयो भवंत्यपि केवलामहात्म्याद्देवतेति क्वचितिरपिनेषदिदमाहुरमुंयजामुंयजेत्येतस्यैवसाविसृष्टिरिति २८ नानेति त्व
यमिति बृहदारण्यकाम्नायः परामृश्यते। सदेवएकंसंतंबहुधाकल्पयंति यो देवानांनामधाएकएवेत्यादिः। अनुभवेनैवेतज्जानोजानातीत्याहनेतइति। विज्ञानानंदरूपासो
पाधिकावस्थायांसावानित्यंपश्यंतीतिहविविक्तंयत्तद्ब्रह्मैवेति २९ ब्रह्मप्राप्तेरंतिरोभम् माह संहारेति संहारस्मिन् विक्षिप्यत्यस्मिन्निति संख्यया संहारविक्षेपश ब्दाभ्यां।

भिन्नोथवरुणास्त्वं पूषमोथधनदस्तथा नेत्थंपृथग्दर्शनात्तस्य संविशंतितथैकतां एकस्यविधिदेवस्य सर्वंजगदिदंवशे
२८ नानाभूतस्यदेवस्य इंद्रस्यैकत्ववंदस्मयं नेतः पश्यंति विज्ञानानंदतो ब्रह्मप्रकाशते २९ संहारविक्षेपसहस्रको
टीस्तिष्ठंतिजीवाः प्रचरंतिचान्ये प्रजाविसर्गस्यचपारिमाणंवापीसहस्राणिबहूनिदैत्य ३० ॥ ॥ ॥

३१

जगद्व्यापोदयकालः कल्पसंज्ञकस्तत्पनेतस्य सहस्रकोटीः कालाध्वनोरत्यंतसंयोगे इति द्वितीयानावत्कालपर्यं येकेचिज्जीवाः तिष्ठंति स्थावराभूत्वान्ये आसनो प्रचरंतिजंगमा
भवंतिचान्येनतत्राप्येकैकस्यकल्पस्यातिप्रमाणत्वंभंग्यंतरेणाह प्रजाविसर्गस्येतिपरिमाणंपरार्द्धैर्नत्वद्धिः बहूनीसमसंख्येयलमुक्तंग ३०

वापीत्येतद्व्याचष्टे। वाप्य इति ह्रस्वा योजनविस्तृताः पंचशता इति वाक्यशेषात् विस्तारयोजनसंख्याते यात्रापा॰ मनः देष्टीत ः योजनतः पंचशता इति संबंधः शता इति लिंगव्य
त्ययश्चार्षः पंचशतानि योजनानीत्यर्थः अवगाढाः नास्ति वगाढो वगाहो पासां ता ः दुःखगाहा इत्यर्थः भागुरिमतेन अवेत्यपसर्गस्या कारलोपं कृत्वा नञ्समासः अनए

॥ वाप्यः पुनर्योजनविस्तारास्ताः कोशं च गंभीरतयावगाढाः आयामतः पंचशतास्ताः सर्वाः प्रत्येकशो योजनतः प्र
वृद्धाः वाप्या जलं क्षिपति बालको घालवणमेकस्या वाप्यथन द्वितीयं तासां कूपे विदुषि परं विसर्गसंहारमेकं च ॥तया
प्रज्ञानां ३२ ॥ ॥

वप्रत्येकशः प्रवृद्धाः ३१ वाप्या इति अयमर्थः यदि बालको घाकेशाग्रेणएकैकस्मिन् दिवसे एकएकाएव विंदुः क्षिप्येत न द्वितीयः तेनक्रमेणएकैकवाप्याउच्छोषणे न
वद्धः सह सवाप्युच्छेदः सात्ताहि संसारस्यापि विज्ञाने नउच्छेदः स्यात् ।एकस्यमुक्तस्याएकस्य विसर्गस्य नाशोप्यनंतानंता जीवाः संतीति सर्वथापि संसारस्यानुच्छेदःएव
पथोक्तं भगवतानां तेन चास्तिं नैव संप्रति षेधेति ३२ ॥ ॥ ॥ ॥ ॥

एवंमुक्तिरोर्लभ्यायसंसारस्यानंतमुक्तं।इदानींरजः सत्वंतमइत्येवविदितागुणात्मकमिति [illegible]।एवोक्तंगुणात्रयंरंजकत्वतुल्यमलिनत्वसाम्यात्रक्तश्वेतकृष्णशब्दै
र्विवक्षितत्वात्तेषांभागभेदेनषट्रूपाणिषट्कल्पंते तथाहिचितंद्विशेषंवत्गुणात्रयमन्योन्यव्यतिरेकेण [illegible] नतिष्ठंति तत्रयदातमसत्वाधिक्यं।सत्वरजसोर्न्यूने
तस[illegible]त्तदाकृष्णोवर्णः अत्यंतयोर्वैपरीत्येसृष्टत्वात्ः तथारजसत्वाधिक्येस[illegible]त्तसोर्न्यूनत्वसमत्वेनीलवर्णः अत्यंतयोर्वैपरीत्येमध्यमध्यमोवर्णः तच्चरक्तंलोकानांसत्व
तरंलोकानांप्रवृत्तिकुशलानामसूढानांसाहसिकानां।सत्वस्याधिक्ये[illegible]रजस्तमसोर्न्यूनत्वसमत्वेहारिद्रः पीतवर्णः तच्चसुखकरंअत्यंतयोर्वैपरीत्यंप्रयुक्तंतच्चासंतत्त्वशव
करंतत्रकृष्णोमुख्यसर्गःस्थावरः चतुर्थः धूम्रस्तैर्यग्योनः पंचमः पीतोदेवसर्गः षष्ठनीलोमानुषसर्गः सप्तमः मध्यमोऽनुग्रहसर्गः अष्टमः शुक्लः कौमारस

षड्जीववर्णाःपरमंप्रमाणंकृष्णोधूम्रोनीलमथास्यमध्यं रक्तंपुनःसह्यतरंसुखंतहारिद्रवर्णोसुसुखंचशुक्लं ३३

र्गः नवमः यथोक्तंवैष्णवे मुख्यसर्गश्चतुर्थस्तुमुख्यावैस्थावराः स्मृताः तिर्यक्स्रोतस्तुयः प्रोक्तस्तैर्यग्योन्यः सउच्यते।तदूर्ध्वस्रोतसांषष्ठोदेवसर्गस्तुसस्मृतः ततोर्वाक्स्रो
तसांसर्गः सप्तमः सतुमानुषः मध्यमोनुग्रहः सर्गः सात्विकस्तामसश्चसः पंचैतेवैकृताः सर्गाः प्राकृतास्तुत्रयः स्मृताः प्राकृतावैकृताश्चैव [illegible]वकौमारोनवमः स्मृतः
अत्रानुग्रहशब्देनहृद्याहप्राजापत्यादेवाश्वासराश्चेतिप्रसिद्धाः शमकामादिचेतोहमतुयाहकाः देवताउच्यंते।सचानुग्रहोजातिभेदाद्भिन्नः यथोक्तंवायुपुराणे
अष्टमोनुग्रहः सर्गस्सचतुर्धाव्यवस्थितः विपर्ययेणवा [illegible]शक्त्यासिद्ध्यातुष्ट्यातथैवच स्थावरेषुविपर्यासस्तिर्यग्योनिषुशक्तितः सिद्ध्यात्मनामनुष्येषुतुष्ट्यादेवेषुकृ
त्स्नशइति ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०
३१३

भा०

313

नं सतरगा ८

परं त्विति एतेषु सर्गेषु शुक्लं कौमारसर्गः रागद्वेषराहित्यात् विमलं निःपापं अत एव विशोकं विशोकत्वमपि कुतः यतो गतक्लमं श्रवण्याख्यश्रमहीनं सिद्ध्यति मो
क्षं साधयति। एतच्चावान्तरं दुर्लभमित्याह गत्वेति योनिप्रभवाणि जन्मानि तत्पोनिजानि षड्धूम्रादिकृत्तं तेषां स्वाधिकारिकाणां नेतरवधो निजं जन्म। गत्वा
प्राप्य। यथोक्तं मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति ३४ यां सिद्धिं जीव उपैति तां स्वावरोहेण तिमिति
शुभदर्शी [illegible] स्वं गत्वा प्राप्य देवः ईड्यः यां गतिं दर्शनमात्मानुभवात्मिकां हउक्तवान् सैव मुक्तवर्णाम् तां सिद्धिरित्यर्थः तथा च श्रुतिः स एतमेव पु

परं तच्छुक्लं विमलं विशोकं गतक्लमं सिद्ध्यति दानवेन्द्र गत्वा तु योनिप्रभवाणि दैत्य सृष्टसहस्रशः सिद्धिमुपैति जीवः ३४ ग
तिं च यां दर्शनमाह देवो गत्वा शुभं दर्शनमेव चापि गतिः पुनर्वर्णकृता प्रजानां वर्णस्तथा कालकृतोऽसुरेन्द्र ३५ ॥

रुषं ब्रह्म ततममपश्यदिदमदर्शमिति ३ तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते इति ततमं ततनमिति एकस्य तकारस्य छान्दसो लोपः ३ इदं ब्रह्मत्र दृशि
त्ययशृं। एतेनेदमिह वाक्यमिह प्रमाणत्वेन दर्शितं इदमेवात्र ज्ञापितं स्पष्टमित्याह गतिरिति निर्वर्णः सत्त्वादितारतम्यं वर्णोऽपि कालकृतः कालः प्रागुक्तः चतुर्यु
गात्मा जीवः धर्मैरतः धर्ममालंबमानः अधर्माद्व्यावृत्तः [illegible] अधर्मैरतः इति क्रमेणोक्तं त्रेताद्वापरकलिसंज्ञः तथा च जीवस्य प्राग्भवीयसंस्कारव
शात्तादृशः सत्त्वाद्याविर्भावस्तादृशी गतिरित्यर्थः ३५

राम०
३१३

शतमिति। सेयं जीवगुणस्य गतिः परायाः पैत्तिकी। दशानामिन्द्रियाणामन्तःकरणचतुष्टयस्य च करणस्य भेदाच्चतुर्दशसंख्याकाः सन्ती तावन्ति शतानि सहस्राणि
शतसहस्राणि लक्षाणि वा विषयभेदाद्भवन्ति न त्वाहि विषयभेदाद्वृत्तिभेदं रूक्षति राहस्त्रयं वैहार्योयं वै दश वशतानि च सहस्राणि च प्रपन्नानि वेत्यादि। आरोहणं
उपर्युपरि सोपानारोहक्रमेण ऊर्द्धगतिस्तैरेव चतुर्दशभिः सत्वतारतम्यप्रधानैः कृतं तत्कृतं स्थानं च तेषु तेषु यदेषु स्थैर्यं तथा निःसरणं तेभ्यः परेभ्यश्च्युतिस्तेषां जीवा

शतं सहस्राणि चतुर्दशेह परा गतिर्जीवगुणस्य दैत्य आरोहणं तत्कृतमेव विद्धि स्थानं तथा निःसरणं च तेषां ३६
कृष्णस्य वर्णस्य गतिर्निकृष्टा स सज्जते नरके पच्यमानः स्थानं तथा दुर्गतिभिस्तु तस्य प्रजाविसर्गान्सुबहून्वदन्ति ३७

नां तत्कृतैव। तस्माद्देवेन चतुर्दशसात्त्विकमार्गप्रवणाः कार्याः इत्यर्थः ३६ अन्यथा दोषमाह। कृष्णस्येति। कृष्णस्य स्थावरत्वप्रापकस्य वर्णस्य निकृष्टा नीचा गतिः पतनं सः
भावी स्थावरः नरके नरकप्रदे कर्मणि सज्जते। अतो नरके पच्यमान एवासौ तेन तेनैव वनस्पत्स्थानं स्थितिर्दुर्गतिभिः तैरेव चतुर्दशभिः दुर्मार्गप्रवृत्तैः भवति। स्थानावधिमाह
। बहूनिति। प्रजाविसर्गान् कल्पान् ३७ ॥

मो०
३१५

वहूनि सप्ख्याख्याशतं सहस्राणि लक्षमित्यर्थः हरितं धूम्रं तिर्यग्योनित्वं अनीशः दीनः शीतवातातपार्दितः सर्वतो मत्स्यभयदर्शी युगक्षयेऽयापभोगक्षये ऽहं हि वर्ण
द्वयं केवला भोगभूमिरेव अतोऽत्र भोगेन क्षपितकलुषस्य दैवात्प्राचीनपुण्यपाकप्रसेति जीवस्तपसा विवेकेन संवृतात्मा व्याप्तचित्तो भूत्वा ३८ सत्त्वगुणेन युक्तः
सन्बुद्ध्या तमोगुणप्रवृत्तिं दूरीकुर्वन् घटते यतते श्रेयसे तदा सत्त्वोत्कर्षे सति लोहितं अष्टमं अनुग्रहसर्गं उपैति शमकामाद्याभिमानि देवतो भावं प्राप्नोतीत्यर्थः

३१५

पा

शतं सहस्राणि ततश्चरित्वा प्राप्नोति वर्णं हरितं तवश्चात   स चैव तस्मिन्निव सत्यनीशो युगक्षये तपसा संवृतात्मा ३८
स वै पदो सत्त्वगुणेन युक्तस्तमोऽप्यपोहन् घटते स्वबुध्या   स लोहितं वर्णमुपैति नीलान्मनुष्यलोके परिवर्तते च ३९
स तत्र संहारविसर्गमेकं स्वधर्मजैर्बंधनैः क्लिश्यमानः ततः   स हारिद्रमुपैति वर्णं संहारविक्षेपशते व्यतीते ४० ॥

सत्त्वापकर्षेत नीलात् नीलत्वं प्राप्य मनुष्यलोके परिवर्तते गतागतं करोति चकारो वाशब्दस्यार्थे ३९ सः नीलत्वं प्राप्तः तत्र मानुषलोके संहारविसर्गं किल्बिषं । वे[illegible] वि-
धिनिषेधनिगडैः क्लिश्यमानः तपोवृद्धिं कुर्वाणः हारिद्रं षष्ठं सर्गं देवत्वाभावं उपैति तत्रापि संहारविक्षेपशते कल्पशते जाते अतिव्यतीते अतिगच्छति कर्मक्षयमतिहारे
तद्गतिकांस्यर्थे सर्वीधातोरंतः प्रक्षिप्तस्य ईधातोः अतिपूर्वस्येदं रूपं तथा च देवो भूत्वा मानुषत्वमुपैति मानुषश्च भूत्वा देवत्वमुपैतीत्यर्थः ४० ॥ ॥

धनैः

एम०
३१५

हा१

एतदेवाह हरिरित्यादिना। देवः सहस्रशः कल्पान् संचरन्नपि च विप्रमुक्तो विषयवियोगहीनो निरयेव संवर्त्तहतानि कल्पे कल्पे कृतानि फलानि भुंजानो गतीः संच रन्ति तिष्ठतीति पूर्वेणान्वयः। गतिसंख्यामाह दश पंच चत्वारि चेत्येकोनविंशतिसहस्राणि। अयमर्थः एकोनविंशति मुखः प्रविविक्तभुगिति श्रुतेः स्वज्ञोपमेत्सर्गोपि दशेंद्रियाणि पंच प्राणाः मनआदिचतुष्टयं चेत्येकोनविंशतिर्जीवस्य हासनामयानि भोगसाधनानि वर्त्तन्ते तान्येव पूर्ववत्तत्तत् वृत्तिशतानि सहस्राणि च भवंति। तत्र दिव्योपभोगो रागद्वेषत्वात् प्रपञ्चकत्वाद् अनित्यत्वाच्च निरय एवेति स्वर्गोपि निरयभोग उक्तः ततश्च एनं नरं निरयात् भोगप्रदकर्मणः सकाशात् विमुक्तं

प१ प्र१

हरिस्वरीक्ष्य प्रज्ञाविसर्गात् सहस्रशस्तिष्ठति संचरन्वै अविमुक्तो निरयेच देवस्ततः सहस्राणि दशापराणि ४१

गतीः सहस्राणि च पंच तस्य चत्वारि संवर्त्तकृतानि चैव विमुक्तमेनं निरयाच्च नित्यं विहीनसर्वेषु चान्येषु च संभवेषु ४२

स देवलोके विहरन् अभीक्ष्णं ततश्च्युतो मानुषतामुपैति संहारविक्षेपशतानि चाष्टौ मर्त्येषु तिष्ठत्यमृतत्वमेति ४३

के१

विदित्सर्गोपि रूपवानि सर्वः अमेषपि संभवेषु स्थावरतैर्यग्योनिषु मानुषवर्जेषु तस्मात्तैर्यक् सर्गवद् देवसर्गोपि भोगभूमित्वान्निरय एवेति भावः ४२ च्युतो देवस मार्थं स्पृष्टयति सर्जे। देवाः मानुषत्वं मानुषाश्च देवत्वं भजन्त इत्यर्थः अमृतत्वं अष्टौ पूर्वोक्तानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणचित्तमनोबुद्ध्याख्यानि ज्ञानेंद्रियाणीह विष्ट विषमाश्रितानि तान्येव तत्तद्विषयत्वपोदप्रकाराणीति विषयभेदानां तान्येव शतानि सहस्राणि वा लयोदयान् मर्त्येषु प्राप्य तिष्ठति उपैतीत्यन्वयः ४३ ॥

सोऽस्मात्संकल्पकृताद्व्योरपप्रवाहात्कालः कलितत्वः न योगाद्ववभवश्यकस्मोत्तलेत्तलवद्धोगते सर्वकृष्टेस्मै वैभ्योनीवेस्यावरेति। अयमारोहाव
रोहप्रवाहपतितः सिद्धान्तिमुच्यते ५५ मुक्त्युपायमेवाह दैवानीति। सप्तमुहूः सप्तसहस्रशतानि दैवानि संछिन्नपरक्लादिक्रमेण अंते शुक्ल एव सन्नावरान्
लोकान्संधावत्तीतिसंबंधः एकस्यानेकधाभावो व्यूहः बुद्धेः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमनोबुद्धिरूपेण सप्तधाभूतायाः तत्तदिंद्रियवृत्तिभेदात्व्यूहानां श
तानिसहस्राणिवाएवंवदूवंति तत्र दैवानि सात्विकानि शमदमादीन्येव संछिन्नप्रथमं रक्तः शमाद्यभिमानिदेवतारूपः अतंतंशमादिमान्भवतित्ततो

सोऽस्माद्ध्यमध्वपतिकालयोगात्कृमेतलेतिष्ठति सर्वकृष्टे यथाल्पपंसिद्धान्तिजीवलोकस्तत्तेभिधासामम
रवीर ५५ दैवानिसप्तसहस्रशतानि सप्तसरक्तोहरिशेयत्तथैवशुक्लेमेतमशवरानर्चीतमान्मलोकान् ५५

द्रुगग्ढेी

संस्रत्सप्तसंध्यायतिश्रु कर

हरिशेदेवस्तत्यतः सक्तः कौमारोवालव[illegible]षभूत्सोभवतित्ततः अष्टावरानअशेपुयः अवराअनुत्कृष्टाः पश्चाद्भूतावपिघुतानृसगुणात्मरूपान्लोकानूर्ध्व
तमानधूम्रादिमार्गप्राप्यचंद्रलोकान्अयोतअर्च्येनरः अर्चिरादिमार्गप्राप्योब्रह्मलोकः ततोपिअर्च्येतमानसानैकप्राप्यलोकान्योगफलभूतानसम्रा
भिधानभक्तीयंदेहभेदे विश्वैश्वर्यकेवलप्राप्तकामइत्यादिश्रुतिप्रसिद्धं तत्तीयमैश्वर्यप्राप्नोतीत्यर्थः ५५ ५५ ५५ ॥ । ॥

अष्टावरणानि येन तद्व्याचष्टे अष्टौ चेति । शतशब्दार्थः प्राग्वत् अपमर्षः सप्ताङ्ग एकोनविंशतिमुख इति जाग्रत्स्वप्नयोः स्थूलत्ववत् अवरणान्तरस्य जा
ग्रद्वस्थापञ्चभूतात्मकः स्थूलदेहः शब्दादिपञ्चकञ्च असद्दृष्टः अङ्गानि वाङ्गस्वरूपभूतमिति अविद्यादर्पणेन मुखवत् पराक्कं प्रापितस्य स
तः प्राप्तेयम् एकोनविंशतिः दशेन्द्रियाणि प्राणापञ्चकं मनो बुद्ध्यहङ्कारचित्तं चतुष्टयं चेति मुखानीव प्राप्तिद्वाराणि । अविद्याकामकर्मात्मिको त्रिंश
कः संघातः जाग्रद्वत्स्वप्नेपि तुल्य इति । यान्यष्टौ उक्तानि तान्येव षष्टीशतानीति योजना । यदा त्वविद्यादि त्रयं त्रिंशकान्त्य पञ्चाणपेतं तदापि सर्वे

अष्टौ च षष्टिं च शतानि यानि मनोविरुद्धानि महाद्युतीनां शुक्लस्य
वर्णस्य परा गतिर्या त्रीण्येव रुद्धानि महानुभाव ४६ ॥ ॥

षामावृत्तया षट्षष्टिः सुषुप्तौ च आनन्दभुक्चेतोमुख इति श्रुतेः भोगप आनन्दः भोगसाधनं चेति द्वयं चेत् षट्षष्टिः तदा जुत्तरस्य वापि एतानि
महाद्युतीनां पूर्णप्रकाशानामात्मविदां मनोविरुद्धानि मननसेव विशेषेण रुद्धानि मूढदृष्ट्या पृथग्भूतान्यपि विदुषां मनोमात्रेणैव वेत्यर्थः । स
यं शुक्लस्य वर्णस्य गतिः संक्षेपेण त्रीणि जाग्रत्स्वप्नसुषुप्त्याख्यानि रुद्धानि च तत्र शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय इति श्रुतिप्र
सिद्धस्य तुर्यस्य प्राप्तिः एवशब्देन अपरोक्षात्मिकैव तुर्यप्राप्तिः तुर्यस्य प्रत्यक्तिनाप्राप्यत्वात् ४६ ॥ ॥ ॥ ॥

एवंविदो जीवन्मुक्तस्यापि प्रारब्धकर्मभोगस्यापरिहार्यत्वमाह संहारेति एकं संहारविक्षेपशतं अनिष्टं वसतीति। एकं भोगायारब्धं जन्म दृष्टिसृष्टिमभिप्रेत्य आलयोदयशतात्मकं इह देहे वसतीत्यध्याहृत्य योज्यं। अस्यैव योगिनः क्रममुक्तिमाह चत्वारीति। अनीशः योगैश्वर्यप्राप्त्यापि तान् दिव्यान् भोगान् त्यक्तुमसमर्थो योगी अन्यानि चत्वारि महर्जनस्तपः सत्यलोकाख्यानि योगबलतारतम्येनैश्वर्यतारतम्यं वर्तते क्रममुक्तिस्थानानि वसति। वासनिमित्तमाह षष्ठस्येति योगतिः सत्वशुद्ध्यात्मिकातस्याः सिद्धावपि असिद्धस्य शुद्धब्रह्मसाक्षात्कारेण जीवन्मुक्ततामप्राप्तस्य गतक्ल-

संहारविक्षेपमनिष्टमेकं चत्वारि चान्यानि वसत्यनीशः षष्ठस्य वर्गस्य परां गतिं यः सिद्धाव् असिद्धस्य
गतक्लमस्य ४७ स तेजनं तत्र वसत्यनीशः संहारविक्षेपशतं सशेषं तस्मादुपावृत्य मनुष्यलोके त-
तो महान्मानुषतामुपैति ४८

मस्यानष्टरागादिदोषस्य योगसिद्धोपि ब्रह्मात्मैक्याज्ञानात् क्रममुक्तिभाग्भवतीत्यर्थः ४७ योगभ्रष्टगतिमाह स तेजनेति अनीशः सम्यग्योगमनुष्ठातुमशक्तः तत्र परोक्षत्वेन निर्दिष्टे स्वर्गलोके सप्त पूर्वोक्तानि श्रोत्रादिपंचकं मनो बुद्धी चातानि उत्तराणि सत्वोत्कर्षबलेन उत्कर्षनियमितानि तादृशं संहारविक्षेपशतं सशेषं कर्मशेषसहितं। ध्येयब्रह्मसाक्षात्कारे हि तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति निःशेषपापदाहः श्रुतेः ततः प्रागारब्धयोगस्य योगिनः कर्मशेषमस्तीति युक्तं। शुद्धकर्मा सन् योगी प्राग्योगसिद्धेः स्वत एव भुवो लोकं स्वर्लोकं च गच्छतीत्यर्थः ततश्च मानुषं जन्म प्राप्य महान् कुलशीलविद्यादिना पूज्यो भवति ४८ ॥

तस्मात् मानुषान्देवादुपावृत्यानिं क्रमपञ्चग्रे उत्तरमुत्तरं भूतसर्गं प्रतिगंतुं संतिष्ठति प्रस्थानं करोति पूर्वाभ्यासवशादुत्तरोत्तरं योगभूमिकामारो
हतीत्यर्थः स एवं प्रतिष्ठमानः सप्तकृत्वः सप्तवारं लोकान्पर्यैति पर्यटति। संहारविक्षेपयोः समानव्युत्पानाभ्यां कृतः संवादितः प्रभाववैश्वर्यं यस्य
नसः अपवर्ग्यः प्रथमां भूमिमारूढो योगी मृतः स्वर्गं प्राप्य ततश्च्युतः सार्वभौमो राजा भवति। एवं सोयं भूलोकजयः। एवं उत्तरोत्तरयोगकला

तस्मादुपावृत्य ततः क्रमेण सोऽग्रेण संतिष्ठति भूतसर्गं सप्तकृत्वश्च
पर्यैति लोकान्संहारविक्षेपकृतप्रभावः ४९ ॥ ॥ ॥ ॥

वृद्ध्या उत्तरमुत्तरं लोकं जयति अंते ब्रह्मलोकं सत्यं प्राप्यापि पुनरावर्तते। यदि द्वेषपवस्तकन्यहं अहं न कुर्वीत तं कुर्वन्स्त ब्रह्मणा सहैव मुच्यते। तत्र प्रमा
णं। प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते। तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः
संसिद्धौ कुरुनंदन इति गीता। आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति च। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मानः प्रविशंति परं पदमि
ति च ४९ ॥ ॥

सप्तेतिसवशब्देपिन्नक्रमः संहारमितिराममुलंतंतासप्रभूरादिसत्यलोकांतानलोकान्मनोबुद्धिसहितानिज्ञानेंद्रियाणिवासंहृत्यैवबोधेनबाधित्वाजीवलो
केसंतिष्ठतिसम्यक्मोहशोकाभावादात्तासंहारेबीजंउपलवानिसंभाव्यतेषांबुध्यादीनांभूरादीनांवादः स्वरूपत्वंनिश्चित्यततोदेहांतेऽव्ययंअपरि
णामिस्थानंअनंतएवानंतंत्रिविधपरिच्छेदशून्यंब्रह्मणतिप्राप्नोतितत्तुस्थानंकेचिद्देवस्यमहादेवस्यसंबंधिकैलासमितिवदंतिशांभवाः विस्नोर्वैकुंठमिति
वैष्णवाः ब्रह्मणोब्रह्मलोकइतिहैरण्यगर्भाः शेषस्यअनंतस्येतितत्भक्ताः नरस्यजीवस्यैवतत्परंस्थाननिमितिसांख्याः देवस्यद्योतमानस्यचिन्मात्र

संप्तैवसंहारमुपप्लवानिसंभाव्यसंतिष्ठतिजीवलोके ततोऽव्ययंस्थानमनंतमेतिदेवस्यविस्नोरथब्रह्मणश्च शेष
स्यचैवाथनरस्यचैवदेवस्यविस्नोःपरमस्यचैव ५० संहारकालेपरिदग्धकायाब्रह्माणमायांतिसदाप्रजाहि
चेष्टात्मनोदेवगणाश्चसर्वेयेब्रह्मलोकादपराःस्मृतेपि ५१

स्यविस्नोर्व्यापिकस्यपरब्रह्मणःतुर्यमूर्त्तिस्वरूपस्यपरमस्येतितद्विस्नोः परमंपदमितिश्रुतिप्रसिद्धमित्यौपनिषदाः ५० एवंशब्दजान्वि
कल्पानमोक्षेउपनस्यसर्ववादिसंमतवस्तुकवत्नमाहसंहारेति।परितःसर्वात्मनादग्धाःबोधेनभस्मीकृताःकायाःस्थूलसूक्ष्मकारणदेहाः
याभिस्ताःब्रह्मणपंब्रह्मपुंस्त्वमार्षदेवगणाइंद्रियाणियेब्रह्मस्वरूपाल्लोकादपराअर्वाचीनाःप्रकृत्यादयस्तेपिपरिदग्धकायाःसंहारकाले
मोक्षेब्रह्मप्राप्नुवंति ५१ ॥

एवमात्मबोधजमानंतिकं प्रलयमुक्त्वाऽवांतरप्रलयमाह प्रजेति प्रलयकाले आसन्नतरे ये देवत्वं प्राप्ता अभुक्तकृत्स्नकर्मफलास्ते
पूर्वकल्पार्जितानि स्वानि स्थानानि कल्पांतरेऽपि सरंति लभंते सर्वेषां कल्पानां पूर्वपूर्वकल्पसादृश्यात् सूर्याचंद्रमसौ धाता यथापूर्व
मकल्पयदित्यादिश्रुतेः एवं ये तु अंते कल्पांते निःशेषतः निःशेषितकालास्ते स्वर्गनाशे इतरवन्मनुष्यत्वमेव यांतीत्यर्थः प्रलयशतेनापि
कृतं कर्म न नश्यतीति तत्त्वज्ञानमंतरेणेति भावः ५२ विधिं अदृष्टं पुण्यपापं तत्फलं यांति प्राप्नुवंति एकस्मिन्नपि कल्पे असकृदारोहावरोहौ
वर्तेते अतः संसारभीरुणा तत्त्वज्ञानमेवाश्रयणीयमिति भावः ५३ एवं सपरिकरं ब्रह्मविद्यां मुक्त्वा तद्वतो दृष्टिमाह स इति सब्रह्मवित्पा

प्रजाविसर्गं तु सशेषकाले स्थानानि स्वान्येव सरंति जीवाः निःशेषतस्तत्पदं यांति चांते सर्वे देवाद्ये सदृशा मनुष्याः
५२ ये तु च्युताः सिद्धलोकात्क्रमेण तेषां गतिं यांति यथानुपूर्व्या जीवाः परे तद्बलतुल्यरूपाः स्वं स्वं विधिं यांति विपर्यये
ण ५३ स यावदेवास्ति सशेषभुक्ते प्रजाश्च देव्यौ च तयैव मुक्ते तावत्तदंगेषु विसृष्टभावः संयम्य पंचेंद्रियरूपमे
तत् ५४ ॥

वत् सशेषभुक् शेषं प्रारब्धकर्म तत् अपरिसमाप्तं भुंक्ते इति सशेषभुक् अस्ति तावत् तदंगेषु तत्स्वरूपे एव प्रजाः सर्वाः भुक्ते देव्यौ पराप
रविद्ये च वर्तेते इति शेषः ब्रह्मविदो विमुक्तकैवल्यावधि कृत्स्नं जगदस्ति अनंतरं नास्तीत्यर्थः अत्र किं मानं तत्राह विसृष्टभावः यो
गसंशोधितचित्तो भूत्वा संयम्य धारणाध्यानसमाध्यात्मकं संयमं अनुष्ठाय एतत् परिदृश्यमानं विपदादि पंचेंद्रियरूपमित्येव विद्यादिति शेषः नत
यादि प्राणेभ्यो देवा देवेभ्यो लोका इति इंद्रियेभ्यः साक्षात् परंपरया च देवानां लोकानां च सृष्टिः श्रूयते स्वप्नमायेंद्रजालवदुपपद्यते चैत
त् जगतः प्रतिभामात्रमित्युपपादितमधस्तात् ५४

उपसंहरति शुद्धामिति। शुद्धां निरविद्यां परमां गतिं शुद्धचिन्मात्रभावं शुद्धेन मनसा विचिन्वन् श्रवणमननध्यानाभ्यासैः शनैः शनैर्मृगयन् परैति दैनन्दिनं पराकृतम् एति प्राप्नोति। ततो ब्रह्मसाक्षात्कारानन्तरं अव्ययं स्थानं मोक्षं उपैति ध्यानवत् आप्यत्वमस्ति नेत्यत आह ब्रह्मेति त्रिविधपरिच्छेदशून्यस्य गगनस्येव प्राप्यत्वं संभवति। अपापि दुष्प्रापं अविद्यादिना व्यवधानात् शाश्वतं नित्यप्राप्तमपि अभ्येति। कंठगतचामीकरव

शुद्धां गतिं तां परमां परैति शुद्धेन नित्यं मनसा विचिन्वन्। ततोऽव्ययं स्थानमुपैति ब्रह्म दुष्प्रापमभ्येति स शाश्वतं वै ५४
इत्येतदाख्यातमहीनसत्व नारायणस्येह बलं मया ते ५५ वृत्र उवाच एवं गते मे न विषादोऽस्ति किंचित्सम्यक्च पश्यामि वचस्तवैतत् श्रुत्वा तु ते वाचमदीनसत्व विकल्मषोऽस्म्यद्य तथा विपाप्मा ५६ प्रवृत्तमेतद्भगवन्महर्षेर्महाद्युतेश्चक्रमनन्तवीर्यं विष्णोरनन्तस्य सनातनं तत्स्थानं सर्गा यत्र सर्वे प्रवृत्ताः स वै महात्मा पुरुषोत्तमो वै तस्मिन्जगत्सर्वमिदं प्रतिष्ठितं ५७ ॥

दित्यर्थः तथा चश्रुतयः ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति। ब्रह्मैव सन्ब्रह्माप्येति तत्वमस्यु पमात्मा ब्रह्मेत्यादयः अस्मिन्नेव ब्रह्मभावं जीवस्योपदिशन्ति ५४ हे अहीनसत्व ५५ एवं उक्तप्रकारेण गते ज्ञाते मनोमात्रत्वे स्थिते सति। वचः वचोऽर्थं ब्रह्माद्वैतं विकल्मषः निरविद्यः विपाप्मा शोकमोहहीनः ५६ श्रुत्वैव विष्णुमाहात्म्यमनुसंधत्ते प्रवृत्तमिति सार्धेन ५७ ॥

एवमितींद्रेणसहपुष्पवृष्ट्यंतकालेप्रवृत्तमेतदित्यादिसार्द्धश्लोकेनविष्णुमनुसंधायआत्मानंब्रह्मणियोजयित्वा ५८ अयंसइतिपुरोवर्त्तिनि
कृष्णेअंगुल्यानिर्दिशति। श्रीकृष्णएवसर्वशास्त्रप्रतिपाद्यइत्यर्थः ५९ राजवन्मूर्त्तिमान्तटस्थईश्वरइतियुधिष्ठिरस्यभ्रमोमाभूदिति
भीष्मउवाचमूलेति। मूलंअधिष्ठानंतद्धिनिर्विकारेणरूपेणतिष्ठतीतिमूलस्थायीयोधिष्ठानचिद्रूपःसमहादेवोमहान्चिदात्मामायानिकृष्टो

भीष्मउवाच एवमुक्त्वासकौंतेयवृत्तःप्राणानवासृजत् योजयित्वात्तथात्मानंपरंस्थानमवाप्तवान् ५८ युधि
ष्ठिरउवाच अयंसभगवान्देवःपितामहजनार्दनः सनत्कुमारोवृत्रायपत्तदाख्यातवान्पुरा ५९ भीष्मउवाच
मूलस्थायीमहादेवोभगवान्स्वेनतेजसा तत्स्थःसृजतितान्भावान्नानारूपान्महामनाः ६० ६० ६०

मूलस्थानीयःप्रथमः सएवमायाशबलोभगवान्षड्विधैश्वर्यवान्कारणात्माभवतिबीजस्थानीयश्चिदचिदुभयात्माद्वितीयःसोपिस्वेनस्व
कीयेनतेजसाउपलक्षितः तेजसाख्यकार्यब्रह्मतांप्राप्तस्तृतीयोवृक्षस्थानीयोभवति तत्स्थःतस्मिन्ब्रह्मांडरूपेकार्येतिष्ठन्नयंश्रीकृष्णस्त्व
नेकबीजगर्भफलस्थानीयश्चतुर्थःतान्भावान्कार्यकारणरूपान्वृक्षबीजाभान्सृजतिमहामनाःमहत्त्वपरिच्छेदाभिमानशून्यंसत्यसंक
ल्पादिगुणकंमनोयस्यसतथा ६० ६०

अस्मात्समाहतुरीयपतितस्यमूलस्यापिनश्चिन्मात्रस्यतुरीयार्द्धेन अष्टमांशेनतिष्ठन्तंइमंमूर्त्तिमंतंकेशवंविद्धि अच्युतमितिमूर्त्तिमतस्तथयावद्विधनित्यत्व
मुक्तं। तथाहिमूलस्यापिपरो चेतन्यंभगवतिमायांशस्यसत्वप्राधान्याद्द्वितीयस्तत्वाविधकेसमष्टिकार्यवीजोसस्याद्द्दैसैवसत्वात्तुरीयांशश्चेतन्यस्यापि
वाष्टिकार्यपरिछिन्नेदेहाद्यभेदाभिमानात अष्टमांशश्चेतन्यस्यास्तितदिदमुक्तंतुरीयार्द्धेनतस्येमंविद्धीति नन्वेवमस्मदादितुल्यत्वमस्यायमितितत्तुद्दि
शयअयंसभगवानितियुधिष्ठिरोक्तिरयुक्ताउपाध्यंशाविवक्षायांतस्माकमपितथात्वमस्तीत्याशंक्याह तुरीयार्द्धेनेति पूर्वोक्तरीत्याकृत्स्नपक्वफला
भेदेशादिस्तत्वष्टत्वंयुक्तं। अपक्वफलाभेदस्यास्मादृत्वनीशत्वंस्फुटमितितेनतस्यसहास्माकंसाम्यप्रसंगः ६१ एतदेवकार्यकारणयोर्लयप्रतिपादनेन

तुरीयार्द्धेनतस्येमंविद्धिकेशवमच्युतं तुरीयार्द्धेनलोकांस्त्रीनभावयत्येवबुद्धिमान ६१ अर्वाक्स्थि
तस्तुयःस्थायीकल्पांतेपरिवर्त्तते सशेतेभगवानप्सुयोसावतिवलःप्रभुः तान्विधात्मप्रसन्नात्मालो
कांश्चरतिशाश्वतान ६२

द्रढयति। अर्वागितिसार्द्धेन अर्वाक्स्थितःस्थायीसमष्टिकार्यात्मातृतीयः अस्मदादिशरीरापेक्षयानित्योपिकल्पांतेपरिवर्त्ततेनश्यतीत्यर्थः
यस्तुभगवानद्वितीयोऽतिवलोनेकब्रह्माद्युलयादक्रमयवीजभूतःप्रभुरंतर्यामीसोपिअप्सुआपइवापःस्तासुसलिलस्वकोदृष्टाऽदृष्टेतोभवतीतिस्कं
त्यापारावारवर्जितिसलिलाभत्वेननिरूपितेअखंडैकरसेब्रह्मणिशेतेलीयतेईश्वरस्यास्यनियंतृत्वव्यवहारापेक्षयैवोच्यतेनतुपरमार्थतइतिनत
त्वयोक्तिरसंगता।तान्नितित्रअनुवाद्यम मयश्चव्यवहारत्वेविषयलोकापेक्षंपुंस्त्वंचातंअखंडैकरसंलोकंआत्मानंशाश्वतंनित्यप्राप्तमेवविधाताचतु
र्मुखःप्रसन्नात्माशुद्धचित्तःसन्अविद्यापनयमात्रेणचरतिगच्छतिप्राप्नोतिब्रह्मादीनांचेतनानामपितदेवलयस्थानमित्यर्थः ६२ ॥

सोयंचानंतः परमात्मासर्वाणिकार्याणिकारणानिचभूतानिस्वसत्तास्फूर्त्तिप्रदानेनप्राणातिकरोतिसनातनः सर्वदैक रूपोपिमायिकोउपाधिविशिष्टेनरूपेणाष्टीकस्यात्मनालोकानसंचरतेच। सचैवंभूतोप्यस्मदादिवद्बहुपाधिधर्म्मैर्ननिरुध्यतेतोऽनिरुद्धे हेकारः सतुजगत्सृजते महात्मासर्वाधारत्वयोग्यः तथाचश्रुतिः अस्मान्मायीसृजतेविश्वमेतत्तस्मिंश्चान्योमाययासन्निरुद्धइतिस्रष्टुर्माया सन्निरुद्धादन्यत्वमाहतत्स्थंबीजेतरोरिवफलेबीजानीवपरमात्मनिकूटस्थेसर्वंजगदस्तितथाचश्रुतिः हिरण्यश्मश्रुर्हिरण्यकेशइतिविच

सर्वाणिभूतानिकरोत्यनंतः सनातनः संचरतेचलोकान् सचानिरुद्धः सृजतेमहात्मातत्स्थंजगत्सर्वमिदंविचि त्रं ६३ युधिष्ठिरउवाच वृत्रेणपरमार्थज्ञदृष्टामन्येत्मनोगतिः शुभातस्मात्ससुखितोनशोचतिपितामह ६४ शुक्लःशुक्लाभिजातीयःसाध्योनावर्त्ततेनघ तिर्यग्गतेश्चनिर्मुक्तोनिरयाच्चपितामह ६५ ॥ ॥ ॥

त्वमर्वितमीश्वरमुपदिश्यइयमेवगतिः सामेत्यूकम्मामात्मनानिरूपितंप्रपंचंतस्पर्कसामचयोग्मावितितदंगुलिपर्वत्विनिर्दिशति अतस्तत्स्थंजगत्अगं गान्तरंतन्यायेनयुक्तं ६३ एवंब्रह्मविद्यांश्रुत्वातत्रस्वस्याधिकारोस्तिनास्तिवेतिसंदिहानः पृच्छतिवृत्रेणेतिमनः आत्मनः तस्मात् आत्मागतिदर्शनात् ६४ शुक्लाभिजातीयः शुक्लवंश्यः। साध्यः साध्यसंज्ञकोदेवोइतिनाऽवर्त्तते ६५ ॥

हारिद्रवर्णे। सत्वाधिक्ये तमः साम्ये रजसोऽल्पत्वे च षष्ठे देवतासर्गे उक्ता तत्पार्श्वे रजस आधिक्ये सत्वस्य साम्ये तमसोऽल्पत्वे च मध्यमेनुग्रहसर्गे च वर्त्तमानः तमोरज
सोः साम्ये तु कदाचिदावरणस्य प्रवृत्तेर्दाउद्रेकः स्यात् तेन न तत्र तिर्यग्गतिः संभाव्यते ६६ वर्णं तु हारिद्रात् च्युताः केवले रजः प्रधाने रक्ते वर्त्तमानाः नीलां मा

हारिद्रवर्णो रक्ते वा वर्त्तमानस्तु पार्थिव तिर्यगेवानुपश्येत कर्मभिस्तामसैर्वृतः ६६ वर्णं तु भृशमापन्ना रक्ताद्दुः
खसुखेऽसुखे कां गतिं प्रतिपत्स्यामो नीलां कृष्णाधमामपि ६७ भीष्म उवाच शुद्धाभिजनसंपन्नाः पांडवाः
शंसितव्रताः विहृत्य देवलोकेषु पुनर्मानुषमेष्यथ ६८ शांतौ मोक्षधर्मेषु वृत्रगीता समाप्ता॥ ॥युधिष्ठिर
उवाच अहो धर्मिष्ठता तात वृत्रस्यामिततेजसः यस्य विज्ञानमतुलं विष्णौ भक्तिश्च तादृशी १ दुर्विज्ञेयं
पदं तात विष्णोरमिततेजसः कथं वा राजशार्दूल पदं तज्ज्ञातवानसौ २ ॥ ॥ ॥ ॥

नुषीं वा कृष्णां ततोऽप्यधमां तिर्यग्गतिं वा कृष्णया सहितां अधमां कृष्णाधमां ६७ एवं भीतं युधिष्ठिरमाश्वासयति शुद्धेति हे पांडवाः यूयं संपन्नाः स्थ ६८ सिद्ध
संख्यां सिद्धेषु गणनां ६९ इति नैलकंठीये भारतभावदीपे शांतौ मोक्षधर्मेषु वृत्रगीतार्थप्रकाशः पंचाधिकशततमः अहो १ पदं स्थानं पदं पदनीयं
२ १ ॥ ॥

वृत्तवधस्यापेक्षत्वद्दर्शिभक्ष्याचैवस्तवसवृत्रस्यवधानर्हत्वंचेतिविरुद्धकोटिद्वयेनव्यक्तसांशयेऽन्यतरकोटिनिश्चायकंदर्शनंव्यक्तदर्शनंतदभावात्अव्यक्तदर्शनात्

भवताकथितंह्येतद्वृद्धेचाहमच्युतं भूयस्तुमेसमुत्पन्नाबुद्धिरव्यक्तदर्शनात् ३ कथंविनिहतोवृत्रः शक्रेणपुरुषर्षभ धर्मिष्ठोविष्णुभक्तश्चतत्त्वज्ञश्चपदान्वये ४ एतन्मेसंशयंब्रूहिपृच्छतेभरतर्षभ वृत्रस्तुराजशार्दूलयथाशक्रेणनिर्जितः ५ यथाचैवाभवद्युद्धंतच्चाचक्ष्वपितामह विस्तरेणमहाबाहोपरंकौतूहलंहिमे ६ भीष्मउवाच रथेनेंद्रः प्रयातोवैसार्द्धंदेवगणैःपुरा ददर्शाथाग्रतोवृत्रंधिष्ठितंपर्वतोत्तमं ७ योजनानांशतान्यूर्द्ध्वंपंचोच्छ्रितमरिंदम शतानिविस्तरेणाथत्रीण्यपवाभ्यधिकानिवै ८ तत्प्रेक्ष्यतादृशंरूपंत्रैलोक्येनापिदुर्जयं वृत्रस्यदेवाः संत्रस्तानशांतिमुपलेभिरे शक्रस्यतुतदाराजन्नूरुस्तंभोव्यजायत भयाद्वृत्रस्यसहसादृष्ट्वातद्रूपमुत्तमं १० ततोनादः समभवद्वादित्राणांचनिस्वनः देवासुराणांसर्वेषांतस्मिन्युद्धेह्युपस्थिते ११ अथवृत्रस्यकौरव्यदृष्ट्वाशक्रमवस्थितं नसंभ्रमोनभीः काचिदास्थावासमजायत १२ ततः समभवद्युद्धंत्रैलोक्यस्यभयंकरं शक्रस्यचसुरेंद्रस्यवृत्रस्यचमहात्मनः १३ असिभिःपट्टिशैःशूलैः शक्तितोमरमुद्गरैः शिलाभिर्विविधाभिश्चकार्मुकैश्चमहास्वनैः ॥

३ पदान्वयेवेदांतवाक्यार्थविचारे १० ११ ११ ॥ ॥ ॥ ॥ ॥

शस्त्रैश्चविविधैर्दिव्यैःपावकोल्काभिरेवच देवासुरैःस्ततःसैन्यैःसर्वमासीत्समाकुलं १५ पितामहपुरोगाश्चसर्वेदेवगणास्तथा
ऋषयश्चमहाभागास्तद्युद्धंद्रष्टुमागमन् १६ विमानाग्र्यैर्महाराजसिद्धाश्चभरतर्षभ गंधर्वाश्चविमानाग्र्यैरप्सरोभिःसमागम
न् १७ ततोंतरिक्षमाहृत्यवृत्रोधर्मभृतांवरः अश्मवर्षेणदेवेंद्रंसमाकिरदतिद्रुतं १८ ततोदेवगणाःक्रुद्धाःसर्वतःशरवृष्टि
भिः अश्मवर्षमपोहंतवृत्रप्रेरितमाहवे १९ वृत्रस्तुकुरुशार्दूलमहामायोमहाबलः मोहयामासदेवेंद्रंमाययायुद्धेनसर्व
शः २० तस्यवृत्रार्दितस्याथमोहआसीच्छतक्रतोः रथंतरेणतंतत्रवसिष्ठःसमबोधयत् २१ वसिष्ठउवाच देवश्रेष्ठोसि
देवेंद्रदैत्यासुरनिबर्हण त्रैलोक्यबलसंयुक्तःकस्माच्छक्रविषीदसि २२ एषब्रह्माचविष्णुश्चशिवश्चैवजगत्पतिः सोमश्च
श्चभगवान्देवःसर्वेचपरमर्षयः २३ माकार्षीःकश्मलंशक्रकश्चिदेवेतरोयथा आर्यायुद्धेमतिंकृत्वाजहिशत्रून्सुरा
धिप २४ एषलोकगुरुस्त्र्यक्षःसर्वलोकनमस्कृतः निरीक्षतेत्वांभगवांस्त्यजमोहंसुराधिप २५ एतेब्रह्मर्षयश्चैवबृह
स्पतिपुरोगमाः स्तवेनशक्रदिव्येनस्तुवंतित्वांजयायवै २६ भीष्मउवाच एवंसंबोध्यमानस्यवसिष्ठेनमहात्मना अतीववा
सवस्यासीद्बलमुत्तमतेजसः २७ ततोबुद्धिमुपागम्यभगवान्पाकशासनः योगेनमहतायुक्तस्तांमायांव्यपकर्षत २८ ततो
गिरःसुतःश्रीमांस्तेचैवसुमहर्षयः दृष्ट्वावृत्रस्यविक्रांतमुपागम्यमहेश्वरं २९ ऊचुर्वृत्रविनाशार्थंलोकानांहितकाम्यया ततो

वतस्तेजोज्वरोभूत्वाजगतोतः समाविशन्महारौद्रंवृत्रंदैत्यवरंतदाविसृष्टश्चभगवान्देवः सर्वलोकाभिपूजकः रोद्रंसमावि
शद्वज्रंत्रैलोक्यसंरक्षणोरतः ३० ततोबृहस्पतिर्धीमानुपागम्यशतक्रतुं वसिष्ठश्चमहातेजाः सर्वेचपरमर्षयः ३१ तेसमा
साद्यवरदंवासवंलोकपूजितं ऊचुरेकाग्रमनसोजहिवृत्रमितिप्रभो ३२ महेश्वरउवाच एषवृत्रोमहांछक्रबले
नमहतावृतः विश्वात्मासर्वगश्चैववहुमायश्चविश्रुतः ३३ तदेनमसुरश्रेष्ठंत्रैलोक्येनापिदुर्जयं जहित्वंयोगमास्था
यमावमंस्थाः सुरेश्वर ३४ अनेनहितपस्तप्तंबलार्थममराधिप षष्टिंवर्षसहस्राणिब्रह्माचास्मैवरंददौ ३५ महत्वं
योगिनांचैवमहामायत्वमेवच महाबलत्वंचतथातेजश्चाग्र्यंसुरेश्वर ३६ एतत्वांमामकंतेजः समाविशतिवासव
व्यग्रमेनंत्वमप्येनंवज्रेणजहिदानवं ३७ शक्रउवाच भगवंस्त्वत्प्रसादेनदितिजंसुदुरासदं वज्रेणनिहनिष्यामि
पश्यतस्तेसुरर्षभ ३८ भीष्मउवाच आविश्यमानेदैत्येतुज्वरेणाथमहासुरे देवतानामृषीणांचहर्षान्नादोमहानभू
त् ३९ ततोदुंदुभयश्चैवशंखाश्चसुमहास्वनाः मुरजाडिंडिमाश्चैवप्रावाद्यंतसहस्रशः ४० असुराणांतुसर्वेषांस्मृ
तिलोपोमहानभूत् मायानाशश्चवलवान्क्षणेनसमपद्यत ४१ तथाविष्टमथोज्ञात्वाऋषयोदेवतास्तथा स्तुवंतः श
क्रमीशानंतथाप्राचोदयन्नपि ४२ रथस्थस्यहिशक्रस्ययुद्धकालेमहात्मनः ऋषिभिः स्तूयमानस्यरूपमासीत्सुदुर्द
शं ४३ शांतौमोक्षधर्मेषुवृत्रवधे भीष्मउवाच २ ॥ ॥

श्र २

मो॰ ३२२

322

त्रस्यतुमहाराजज्वराविष्टस्यसर्वशः अभवन्यानिलिंगानिशरीरेतानिमेशृणु १ ज्वलितास्योभवद्घोरोवैवर्ण्यंचागमत्परं ॥
गात्रकं[illegible]पंश्चसुमहानश्वासश्चाप्यभवन्महान् २ रोमहर्षश्चतीव्रोभून्निश्वासश्चमहान्नृप शिवाचाशिवसंकाशानस्यवक्त्रा
त्सुदारुणा ३ निष्पपातमहाघोरास्मृतिःसातस्यभारत उल्काश्चज्वलितास्तस्यदीप्ताःपार्श्वेप्रपेदिरे ४ गृध्राःकंका
वलाकाश्चवाचोमुंचन्सुदारुणाः वृत्रस्योपरिसंहृष्टाश्चक्रवत्परिवभ्रमुः ५ ततस्तंरथमास्थायदेवाप्यायितआहवे
वज्रोद्यतकरःशक्रस्तंदैत्यंसमवैक्षत ६ अमानुषमथोनादंसमुमोचमहासुरः व्यजृंभच्चैवराजेंद्रतीव्रज्वरसमन्वितः
७ अथास्यजृंभतःशक्रस्ततोवज्रमवासृजत् सवज्रःसुमहातेजाःकालाग्निसदृशोपमः ८ क्षिप्रमेवमहाकायं
वृत्रंदैत्यमपातयत् ततोनादःसमभवत्पुनरेवसमंततः ९ वृत्रंविनिहतंदृष्ट्वादेवानांभरतर्षभ वृत्रंतुहत्वामघवान्
दानवारिर्महायशाः १० वज्रेणविष्णुयुक्तेनदिव[illegible]मेवसमाविशत् अथवृत्रस्यकौरव्यशरीरादभिनिः
सृताः ११ ब्रह्मवध्यामहाघोरारौद्रालोकभयावहा करालदशनाभीमाविकृताकृष्णपिंगला १२ प्रकीर्णमूर्द्धजाचैव
घोरनेत्राचभारत कपालमालिनीचैवकृत्येवभरतर्षभ १३ रुधिरार्द्राचधर्मज्ञचीरवल्कलवासिनी साभिनिष्क्रम्य
राजेंद्रतादृग्रूपाभयावहा १४ वज्रिणंमृगयामासतदाभरतसत्तम ॥

राम॰ ३२२

कस्यचित्त्वपकालस्य वृत्रहा कुरुनंदन १५ स्वर्गायाभिमुखः प्रायाल्लोकानां हितकाम्यया साविनिःसरमार्गांतु दृष्ट्वाश
क्रंमहौजसं १६ जग्राह वध्यादेवेंद्रं सुलग्ना चाभवत्तदा सहितस्मिन्समुत्पन्ने ब्रह्मवध्याकृतंभयं १७ नलिन्याबिसम
ध्यस्थउवासाब्दगणान्बहून अनुसृत्य तु यत्नात्स्मतयावै ब्रह्महत्यया १८ तत्रागृहीतः कौरव्यनिस्तेजाः समपद्य
त तस्माव्यपोहनेशक्रः परंयत्नं चकारह १९ नचाशकत्तां देवेंद्रो ब्रह्मवध्यांव्यपोहितुं गृहीतस्तवतु तयादेवेंद्रो भर
तर्षभ २० पितामहमुपागम्य शिरसाप्रत्यपूजयत् ज्ञात्वागृहीतंशक्रं सद्विजप्रवरवध्यया २१ ब्रह्मासंचिंतयामा
स तदा भरतसत्तम तामुवाच महाबाहो ब्रह्मवध्यां पितामहः २२ स्वरेणामधुरेणाथ सांत्वयन्निव भारत मुच्यतां त्रिद
शेंद्रो यं मत्प्रियं कुरु भाविनि २३ ब्रूहि किं ते करोम्यद्य कामं किं त्वमिहेच्छसि ब्रह्मवध्योवाच त्रिलोकपूजिते देवप्री
ते त्रैलोक्यकर्त्तरि कृतमेवेहमन्यामि निवासं तु विधत्स्व मे २५ त्वयाकृतेयं मर्यादा लोकसंरक्षणार्थिना स्थापना
वै सुमहती त्वया देव प्रवर्त्तिता २६ प्री

तेनत्वपिधर्मज्ञसर्वलोकेश्वरप्रभो शक्रादघगमिष्यामिनिवासंसंविधत्स्वमे २७ भीष्मउवाच तथेतितंप्राहतदाब्रह्म
वध्यांपितामहः उपायतःसशक्रस्यब्रह्मवध्यांव्यपोहत २८ ततःस्वयंभुवाध्यातस्तत्रवह्निर्महात्मना ब्रह्माणमुपसं
गम्यततोवचनमब्रवीत २९ प्राप्तोस्मिभगवन्देवत्वत्सकाशमनिंदित यत्कर्त्तव्यंमयादेवतत्त्वान्वक्तुमर्हति ३०
ब्रह्मोवाच बहुधाविभजिष्यामिब्रह्मवध्यामिमामहं शक्रस्याघविमोक्षार्थंचतुर्भागंप्रतीच्छवै ३१ अग्निरुवाच
ममामोक्षस्यकोंतोवैब्रह्मवध्यापस्यवैप्रभो एतदिच्छामिविज्ञातुंतत्त्वतोलोकपूजित ३२ ३२ ३२ ३२

यस्त्वामितियः आहिताग्निरधिकारी वीजैः पुरोडाशादिना ओषधिरसैः सोमेनपयआदिभिः ३३ ३६ ३७ ४० ४१ ४४ ॥

ब्रह्मोवाच यस्त्वांज्वलंतमासाद्यस्वयंवैमानवःक्वचित् वीजौषधिरसैर्वह्निनयक्ष्यतितमोवृतः ३३ तमेषाया
स्यतिक्षिप्रंतत्रैवचनिवत्स्यति ब्रह्मवध्याहव्यवाहव्येतुतेमानसोज्वरः ३४ इत्युक्तःप्रतिजग्राहतद्वचोहव्यक
व्यभुक् पितामहस्यभगवांस्तथाचतदभूत्प्रभो ३५ ततोवृक्षौषधितृणंसमाहूयपितामहः इममर्थंमहाराज
वक्तुंसमुपचक्रमे ३६ ततोवृक्षौषधितृणंतथैवोक्तंयथातथं व्यथितंवह्निवद्राजन्ब्रह्माणमिदमब्र
वीत् ३७ अस्माकंब्रह्मवध्यायाःकोंतोलोकपितामह देवेनाभिहतानस्मान्नपुनर्हंतुमर्हसि ३८ वय
मग्निंतथाशीतंवर्षंचपवनेरितं सहामःसततंदेवतथाछेदनभेदने ३९ ब्रह्मवध्यामिमामद्यभवतःशास
नाद्वयं ग्रहीष्यामस्त्रिलोकेशमोक्षंचिंतयतांभवान् ४० ब्रह्मोवाच पर्वकालेतुसंप्राप्तेयोवैछेदनभेदनं
करिष्यतिनरोमोहात्तमेषानुगमिष्यति ४१ भीष्मउवाच ततोवृक्षौषधितृणमेवमुक्तंमहात्मना ब्रह्माणमभि
संपूज्यजगामाशुयथागतं ४२ आहूयाप्सरसोदेवस्ततोलोकपितामहः वाचामधुरयाप्राहसांत्वयन्निवभारत
४३ इयमिंद्रादनुप्राप्ताब्रह्मवध्यावरांगनाः चतुर्थमस्याभागांशंमयोक्ताःसंप्रतीच्छथ ४४ ॥ ॥ ॥

अप्सरसऊचुः अहरोकृतबुद्धीनांदेवेशत्वशासनात् मोक्षंसमयतोस्माकंचिंतयस्वपितामह ४५ ब्रह्मोवाच रजस्व
लासुनारीषुयोवैमैथुनमाचरेत् तमेषायास्यतिक्षिप्रंव्येतुवोमानसोज्वरः ४६ भीष्मउवाच तथेतिहृष्टमनसइत्युक्ता
प्सरसांगणाः स्वानिस्थानानिसंप्राप्यारेमिरेभरतर्षभ ४७ ततस्त्रिलोककृद्देवःपुनरेवमहातपाः अपःसंचिंतया
मासध्यातास्ताश्चाप्युपागमन् ४८ तास्तुसर्वाःसमागम्यब्रह्माणममितौजसं इदमूचुर्वचोराजन्प्रणिपत्यपितामहं
४९ इमाःस्मदेवसंप्राप्तास्त्वत्सकाशमरिंदम शासनात्तवलोकेशसमाज्ञापयनःप्रभो ५० ब्रह्मोवाच इयं
वृत्रादनुप्राप्तापुरुहूतंमहाभया ब्रह्मवध्याचतुर्थांशमस्यास्तुप्रतीछत ५१ आपऊचुः एवंभवतुलोकेश
यथावदसिनःप्रभो मोक्षंसमयतोस्माकंसंचिंतयितुमर्हसि ५२ त्वंहिदेवेशसर्वस्यजगतःपरमागतिः कोन्यः
प्रसादोहिभवेद्यन्नःकृछ्रात्समुद्धरेत ५३ ब्रह्मोवाच अल्पाइतिमतिंकृत्वायानरोबुद्धिमोहितः श्लेष्ममूत्रपु
रीषाणियुष्मासुप्रतिमोक्ष्यति ५४ तमिमंयास्यतिक्षिप्रंतत्रैववचनिवत्स्यति तथावोभवितामोक्षइतिसत्यंब्रवीमि
वः ५५ ॥ ॥

ब्रह्मविद्वांवधः इंद्रस्यापिञ्भसंनद्दुःखदंल्लोकनाशहेतुश्चभवतीत्यध्यायतात्पर्यं ६५ सप्ताधिकशततमः॥ पितामह २

ततोविमुच्यदेवेंद्रंब्रह्मवध्यायुधिष्ठिर यथाविसृष्टंतेवासमगमद्देवशासनात् ५६ एवंशक्रेणसंप्राप्ताब्रह्मवध्या
जनाधिप पितामहमनुज्ञाप्यसोश्वमेधमकल्पयत् ५७ श्रूयतेचमहाराजसंप्राप्तावासवेनवै ब्रह्मवध्याततःशुद्धिंह
यमेधेनलब्धवान् ५८ समवाप्यश्रियंदेवोहत्वारीश्चसहस्रशः प्रहर्षमतुलंलेभेवासवःपृथिवीपते ५९ वृत्र
स्यरुधिराच्चैवशिखंडाःपार्थजज्ञिरे द्विजातिभिरभक्ष्यास्तेदीक्षितैश्चतपोधनैः ६० सर्वावस्थंत्वमप्येषांद्विजाती
नांप्रियंकुरु इमेहिभूतलेदेवाःप्रथिताःकुरुनंदन ६१ एवंशक्रेणकौरव्यबुद्धिसौक्ष्म्यान्महासुरः उपायपूर्वं
निहतोवृत्रोह्यमिततेजसा ६२ एवंत्वमपिकौंतेयपृथिव्यामपराजितः भविष्यसियथादेवःशतक्रतुरमित्रहा
६३ येतुशक्रकथांदिव्यामिमांपर्वसुपर्वसु विप्रमध्येवदिष्यंतिनतेप्राप्स्यंतिकिल्बिषं ६४ इत्येतद्वृत्रमाश्रित्य
शक्रस्यात्यद्भुतंमहत् कथितंकर्मतेतातकिंभूयःश्रोतुमिच्छसि ६५ शांतौमोक्षधर्मेषुवृत्रवधःसमाप्तः॥ ॥
युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद अस्मिन्वृत्रवधेदेवविवक्षाममजायते १ ज्वरेणमोहि
तोवृत्रःकथितस्तेजनाधिप निहतोवासवेनेहवज्रेणेतितदानघ २ ॥

मो० प्रसंगात्ज्वरोत्पत्तिंपृच्छतिपितामहेत्यादिना ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
३२५

कथमेषमहाप्राज्ञज्वरःप्रादुर्बभौकुतः ज्वरोत्पत्तिंनिपुणतःश्रोतुमिच्छाम्यहंप्रभो ३ भीष्मउवाच शृणुराजन्ज्वरस्येमंसंभवं
लोकविश्रुतं विस्तरंचास्यवक्ष्यामियादृशश्चैवभारत ४ पुरामेरोर्महाराजशृंगंत्रैलोक्यपूजितं ज्योतिष्कंनामसावित्रं
सर्वरत्नविभूषितं ५ अप्रमेयमनाधृष्यंसर्वलोकेषुभारत तत्रदेवोगिरितटेहेमधातुविभूषिते पर्यंकइवविभ्राजन्नुप
विष्टोबभूवह ६ शैलराजसुताचास्यनित्यंपार्श्वेस्थिताबभौ तथादेवामहात्मानोवसवश्चामितौजसः ७ तथैव
चमहात्मानावश्विनौभिषजांवरौ तथावैश्रवणोराजागुह्यकैरभिसंवृतः ८ यक्षाणामीश्वरःश्रीमान्कैलासनिल
यःप्रभुः उपासंतमहात्मानमुशनाचमहामुनिः ९ सनत्कुमारप्रमुखास्तथैवचमहर्षयः अंगिरःप्रमुखाश्चैवतथादे
वर्षयोपरे १० विश्वावसुश्चगंधर्वस्तथानारदपर्वतौ अप्सरोगणसंघाश्चसमाजग्मुरनेकशः ११ ववौसुखःशि
वोवायुर्नानागंधवहःशुचिः सर्वर्तुकुसुमोपेताःपुष्पवंतोद्रुमास्तथा १२ तथाविद्याधराश्चैवसिद्धाश्चैवतपोध
ना महादेवंपशुपतिंपर्युपासंतभारत १३ भूतानिचमहाराजनानारूपधराण्यथ राक्षसाश्चमहारौद्राःपिशाचा
श्चमहाबलाः १४

शां०
३२५

325

वहुरूपधराहृष्टानानाप्रहरणोद्यताः देवस्यानुचरास्तत्रतस्थिरेचानलोपमाः १५ नंदीचभगवांस्तत्रदेवस्यानुमतेस्थितः
प्रगृह्यज्वलितंशूलंदीप्यमानःस्वतेजसा १६ गंगाचसरितांश्रेष्ठासर्वतीर्थजलोद्भवा पर्युपासततंदेवंरूपिणीकुरु
नंदन १७ सएवंभगवांस्तत्रपूज्यमानःसुरर्षिभिः देवैश्चसुमहातेजामहादेवोव्यतिष्ठत १८ कस्यचित्त्वथकाल
स्यदक्षोनामप्रजापतिः पूर्वोक्तेनविधानेनयक्ष्यमाणोन्वपद्यत १९ ततस्तस्यमखंदेवाःसर्वेशक्रपुरोगमाः गम
नायसमागम्यबुद्धिमापेदिरेतदा २० तेविमानैर्महात्मानोज्वलनार्कसमप्रभैः देवस्यानुमतेगच्छन्गंगाद्वारमिति
श्रुतिः २१ प्रस्थितादेवतादृष्ट्वाशैलराजसुतातदा उवाचवचनंसाध्वीदेवंपशुपतिंपतिं २२ भगवन्क्वनुयांत्येते
देवाःशक्रपुरोगमाः ब्रूहितत्त्वेनतत्त्वज्ञसंशयोमेमहानयं २३ महेश्वरउवाच दक्षोनाममहाभागेप्रजानांपतिरु
त्तमः हयमेधेनयजतेतत्रयांतिदिवौकसः २४ उमोवाच यज्ञमेतंमहादेवकिमर्थंनाभिगच्छसि केनवाप्रतिषेधे
नगमनंतेनविद्यते २५ महेश्वरउवाच सुरैरेवमहाभागेपूर्वमेतदनुष्ठितं यज्ञेषुसर्वेषुममनभागउपकल्पितः २६
पूर्वोपायोपपन्नेनमार्गेणवरवर्णिनि नमेसुराःप्रयच्छंतिभागंयज्ञस्यधर्मतः २७ उमोवाच भगवन्सर्वभूतेषुप्रभा
वाभ्यधिकोगुणैः अजय्यश्चाप्रधृष्यश्चतेजसायशसाश्रिया २८ अनेनतेमहाभागप्रतिषेधेन ॥ ॥

भागतः अतीवदुःखमुत्पन्नंवेपथुश्चममानघ २९ भीष्मउवाच एवमुक्त्वातुसादेवीदेवंपशुपतिंपतिं तूष्णींभूताभ
वद्राजन्दह्यमानेनचेतसा ३० अथदेव्यामतंज्ञात्वाहृद्गतंयच्चिकीर्षितं ससमाज्ञापयामासतिष्ठत्वमितिनंदिनं ३१
ततोयोगबलंकृत्वासर्वयोगेश्वरेश्वरः तंयज्ञंसमहातेजाभीमैरनुचरैस्तदा ३२ सहसाघातयामासदेवदेवःपिना
कधृक् केचिन्नादानमुंचंतकेचिद्धासांश्चचक्रिरे ३३ रुधिरेणापरेराजंस्तत्राग्निंसमवाकिरन् केचिद्यूपान्स
मुत्पाट्यबभ्रमुर्विकृताननाः ३४ आस्यैरन्येचाग्रसंततथैवपरिचारकान् ततःसयज्ञोनृपतेवध्यमानःसमंत
तः ३५ आस्थायमृगरूपंवैखमेवाभ्यगमत्तदा तंतुयज्ञंतथारूपंगच्छंतमुपलभ्यसः ३६ धनुरादाय
बाणेनतदान्वसरतप्रभुः ततस्तस्यसुरेशस्यक्रोधादमिततेजसः ३७ ललाटात्प्रसृतोघोरःस्वेदबिंदुर्बभूव
ह तस्मिन्पतितमात्रेचस्वेदबिंदौतदाभुवि ३८ प्रादुर्भूतोमहानग्निःकालानलोपमः तत्रचाजायत
तदापुरुषःपुरुषर्षभ ३९

५० ५१ शिलातनुर्वातुविशेषः नीलिकारोवाल्तं ५२ ५२ ५३ ५३

ह्रस्वोतिमात्रंरक्ताक्षोहरिश्मश्रुर्विभीषणः ऊर्ध्वकेशोतिरोमांगःश्येनोलूकस्तथैवच ४० कराल
कृष्णवर्णश्चरक्तवासास्तथैवच तंयज्ञंसुमहासत्वोदहत्कक्षमिवानलः ४१ व्यचरत्सर्वतोदेवान्प्राद्रव
न्नृषयस्तथा देवाश्चाप्यद्रवन्सर्वेततोभीतादिशोदश ४२ तेनतस्मिन्विचरतापुरुषेणाविशांपते
पृथिवीह्यचलद्राजन्नतीवभरतर्षभ ४३ हाहाभूतंजगत्सर्वमुपलक्ष्यतदाप्रभुः पितामहोमहा
देवंदर्शयन्प्रत्यभाषत ४४ ब्रह्मोवाच भवतोपिसुराःसर्वेभागंदास्यंतिवैप्रभो क्रियतांप्रतिसंहारः
सर्वदेवेश्वरत्वया ४५ इमाहिदेवताःसर्वाऋषयश्चपरंतप तवक्रोधान्महादेवनशांतिमुपलेभिरे
४६ यश्चैषपुरुषोजातःस्वेदात्तेविबुधोत्तम ज्वरोनामैषधर्मज्ञलोकेषुप्रचरिष्यति ४७ एकीभूतस्यनत्व
स्यधारणेतेजसःप्रभो समर्थासकलापृथ्वीबहुधासृज्यतामयं ४८ इत्युक्तोब्रह्मणादेवोभागेचा
पिप्रकल्पिते भगवंतंतथेत्याहब्रह्माणममितौजसं ४९ परांचप्रीतिमगमदुत्स्मयंश्चपिनाकधृक् अवा
पचतदाभागंयथोक्तंब्रह्मणाभवः ५० ज्वरंचसर्वधर्मज्ञोबहुधाव्यसृजत्तदा शांत्यर्थंसर्वभूतानांशृणुतच्चापि

पुत्रक ५१ शीर्षाभितापोनागानांपर्वतानांशिला
जतु अपांतुनीलिकांविद्यान्निर्मोकंभुजगेषुच ५२

रेवारकः पन्नगानां पादरोगः ५३ रंध्रागतं अश्वगलरंध्रगतं मांसखंडं ६२ अष्टाधिकशततमः॥ ॥ ७

रेवारकः सौरभेयाणांमस्तकं पृथिवीतले पन्नगानामपि धर्मज्ञ दृष्टिप्रत्यवरोधनं ५३ रंध्रागतमथाश्वानां शि
खोद्भेदश्च बर्हिणां नेत्ररोगः कोकिलस्य ज्वरः प्रोक्तो महात्मना ५४ अवीनां पित्तभेदश्च सर्वेषामिति नः
श्रुतं शुकानामपि सर्वेषां हिक्किका प्रोच्यते ज्वरः ५५ शार्दूलेष्वथ धर्मज्ञ श्रमो ज्वर इहोच्यते मानुषेषु तु धर्म
ज्ञ ज्वरो नामैष भारत ५६ मरणे जन्मनि तथा मध्ये चाविशते नरं एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ५७
नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः अनेन हि समाविष्टो वृत्रो धर्मभृतां वरः ५८ व्यजृंभत ततः शक्र
स्तस्मै वज्रमवासृजत् प्रविश्य वज्रो वृत्रं च दारयामास भारत ५९ दारितश्च स वज्रेण महायोगी महासुरः
जगाम परमं स्थानं विष्णोरमिततेजसः ६० विष्णुभक्त्या हि तेनेदं जगद्व्याप्तमभूत्तदा तस्माच्च निहतो युद्धे वि
ष्णोः स्थानमवाप्तवान् ६१ इत्येष वृत्रमाश्रित्य ज्वरस्य महतो मया विस्तरः कथितः पुत्र किमन्यत्प्रब्रवीमि
ते ६२ इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहितो नरः विमुक्तरोगः स सुखी मुदा युतो लभेत का
मान्स यथा मनीषितान् ६३ शांतौ मोक्षधर्मेषु ज्वरोत्पत्तिर्नामाध्यायः॥ ॥ ॥ ॥ ॥

प्राचेतसस्येतिहत्रगीतोपसंहारेअयंसभगवान्देवःपितामहजनार्दनःसनत्कुमारोरुद्रश्चायमयत्नेदाख्यातवान्सुरेतिश्रीकृष्णस्यप्रकरणप्रतिपाद्यत्वो
क्त्यानिर्विशेषब्रह्मावाविद्वान्स्त्वमुक्तोतत्त्वसक्तानुमसक्तोत्वेनहत्रवैष्णवरौद्रत्वंचोक्त्वापुनरपितस्यैवब्रह्मत्वमतःपरमेश्वरस्यपरमकारुणिक
त्वंदर्शयितुंद्विषंतमपिभगवान्दंडपूर्वकमनुगृह्णातीतिदक्षाख्यायिकामुखेनोक्तातत्रकैमुतिकन्यायेनभक्तेष्वनुग्रहः सिद्ध्यतीतिभक्त्या

जनमेजयउवाच प्राचेतसस्यदक्षस्यकथंवैवस्वतेंतरे विनाशमगमद्ब्रह्मन्हयमेधःप्रजापतेः १ देव्या
मन्युकृतंमत्वाक्रुद्धःसर्वात्मकःप्रभुः प्रसादात्तस्यदक्षेणयज्ञःसंधितःकथं एतद्वेदितुमिच्छामितन्मे
ब्रूहियथातथं २ वैशंपायनउवाच पुराहिमवतःपृष्ठेदक्षोवैयज्ञमाहरत गंगाद्वारेशुभेदेशेऋषिसि
द्धनिषेविते ३ गंधर्वाप्सरसाकीर्णेनानाद्रुमलतावृते ऋषिसंघैःपरिवृतंदक्षंधर्मभृतांवरं ४ पृथि
व्यामंतरिक्षेचयेचस्वर्लोकवासिनः सर्वेप्रांजलयोभूत्वाउपतस्थुःप्रजापतिं ५ ॥ ॥

भगवत्तोषणार्थंनाम्नामष्टसहस्रंचवक्तुमयध्यायत्रयारभ्यतेमोक्षधर्मेषुपागव्यास्यसत्त्वस्यसाक्षात्तत्त्वज्ञानेहेतुतयाशमदमादिवत्संमोक्षोपयो
गित्वंइतरेषांतुपश्चादिवविहितेषुद्वासुप्रसादनद्वारातद्धेतुत्वमितित्रयमेवपदशः सम्यग्विभज्यतेतत्रप्राचेतसस्यदक्षस्येत्यादिर्नाम्नामष्टसहस्रेणास्तुतवा
न्वृषभध्वजमितिनंतःस्पष्टार्थोग्रंथः तस्यतात्पर्यंपरमेश्वरद्रोहिणाकृतेकर्मत्र्यनर्थावहंतदनुग्रहमंतरेणादुश्चिकित्स्यंचेतिसर्वप्राप्तम्इति ४ ५

देवदानवगंधर्वाः पिशाचोरगराक्षसाः हाहाहूहूश्च गंधर्वौ तुंबुरुर्नारदस्तथा ६ विश्वावसुर्विश्वसेनो गंधर्वाप्सरसस्तथा
आदित्या वसवो रुद्राः साध्याः सहमरुद्गणाः ७ इंद्रेण सहिताः सर्वे आगता यज्ञभागिनः ऊष्मपाः सोमपाश्चैव धूम
पा आज्यपास्तथा ८ ऋषयः पितरश्चैव आगता ब्रह्मणा सह एते चान्ये च बहवो भूतग्रामाश्चतुर्विधाः ९ जरा
युजांडजाश्चैव सहसा स्वेदजोद्भिदैः आहूतामंत्रिताः सर्वे देवाश्च सहपत्निभिः १० विराजंते विमानस्था दी
प्यमाना इवाग्नयः तान्दृष्ट्वा मन्युना विष्टो दधीचिर्वाक्यमब्रवीत ११ नायं यज्ञो न वा धर्मो यत्र रुद्रो न इज्यते ॥
वधबंधं प्रपन्ना वै किंतु कालस्य पर्ययः १२ किंतु मोहान्न पश्यंति विनाशं पर्युपस्थितं उपस्थितं महाघोरं न बुध्यं
ति महाध्वरे १३ इत्युक्त्वा स महायोगी पश्यति ध्यानचक्षुषा स पश्यति महादेवं देवीं च वरदां शुभां १४ नारदं च म
हात्मानं तस्या देव्याः समीपतः संतोषं परमं लेभे इति निश्चितयोगवित् १५ एकमंत्रास्तु ते सर्वे येनेशो न निमंत्रि
तः तस्माद्देशादपक्रम्य दधीचिर्वाक्यमब्रवीत् १६ अपूज्यपूजनाच्चैव पूज्यानां चाप्यपूजनात् नृघातकसमं पापं श
श्वत्प्राप्नोति मानवः १७ अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन देवतानामृषीणां च मध्ये सत्यं ब्रवीम्यहं १८ आगतं
पशुभर्तारं स्रष्टारं जगतः पतिं अध्वरे ह्यग्रभोक्तारं सर्वेषां पश्यत प्रभुं १९ दक्ष उवाच संति नो बहवो रुद्राः शूलह

स्ताः कपर्दिनः एकादशस्थानगतानाहं वेद्मि महेश्वरं २० दधीचिरुवाच सर्वेषामेव मंत्रोयं येनासौ न निमंत्रितः यथा
हं शंकरादूर्ध्वं नान्यं पश्यामि देवतं तथा दक्षस्य विपुलो यज्ञोयं न भविष्यति २१ दक्ष उवाच एतन्मखेशाय सुवर्णपात्रे ह
विः समस्तं विधिमंत्रपूतं विष्णोर्नयाम्यप्रतिमस्य भागं प्रभुर्विभुश्चाहवनीयरूपः २२ देव्युवाच किं नाम दानं नियमं तपो
वा कुर्यामहं येन पतिर्ममाद्य लभेत भागं भगवानचिंत्यो अर्द्धं तथा भागमथो तृतीयं २३ एवं ब्रुवाणां भगवान्स्वपत्नीं प्रहृष्ट
रूपः क्षुभितामुवाच न वेत्सि मां देवि कृशोदरांगि किं नाम युक्तं वचनं मखेश २४ अहं विजानामि विशालनेत्रे ध्यानेन
हीना न विदंत्यसंतः तवाद्य मोहेन च सेंद्रदेवा लोकास्त्रयः सर्वत एव मूढाः २५ मामध्वरे शंसितारः स्तुवंति रथंतरं सामगा
श्चापगांति मां ब्राह्मणा ब्रह्मविदो यजंते मामाध्वर्यवः कल्पयंते च भागं २६ देव्युवाच सुप्राकृतोपि पुरुषः सर्वः स्त्रीजनसं
सदि स्तौति गर्वायते चापि स्वमात्मानं न संशयः २७ भगवानुवाच नात्मानं स्तौमि देवेशि पश्य मे तनुमध्यमे यं स्रक्ष्या
मि वरारोहे यागार्थे वरवर्णिनि २८ इत्युक्त्वा भगवान्पत्नीं सुमां प्राणैरपि प्रियां सोसृजद्भगवान्वक्त्राद्भूतं घोरप्रहर्षणं
२९ तमुवाचाक्षिप मखं दक्षस्येति महेश्वरः ततो वक्त्राद्विमुक्तेन सिंहेनैकेन लीलया ३० देव्या मन्युव्यपोहार्थं हतो दक्षस्य
वै क्रतुः मन्युना च महाभीमा महाकाली महेश्वरी ३१ आ

त्मनः कर्मसाक्षित्वेतेनसार्द्धंसहानुगा देवस्यानुमतंमत्वाप्रणम्यशिरसाततः ३२ आत्मनःसदृशःशौर्याद्बलरूपसमन्वितः सएव
भगवान्क्रोधः प्रतिरूपसमन्वितः ३३ अनंतबलवीर्यश्च अनंतबलपौरुषः वीरभद्रइतिख्यातोदेव्यामन्युप्रमार्जकः ३४
सोसृजद्रोमकूपेभ्योरौम्यान्नामगणेश्वरान् रुद्रतुल्यागणारौद्रारुद्रवीर्यपराक्रमाः ३५ तेनिपेतुस्ततस्तूर्णंदक्षयज्ञविहिं
सया भीमरूपामहाकायाःशतशोथसहस्रशः ३६ ततःकिलकिलाशब्दैराकाशंपूरयन्निव तेनशब्देनमहतात्रस्तास्त
त्रदिवौकसः ३७ पर्वताश्चव्यशीर्यंतचकंपेचवसुंधरा मारुताश्चैवघूर्णंतिचुक्षुभेवरुणालयः ३८ अग्नयोनैवदीप्यंतेनै
वदीप्यतिभास्करः ग्रहानैवप्रकाशंतेनक्षत्राणिनचंद्रमाः ३९ ऋषयोनप्रकाशंतेनदेवानचमानुषाः एवंतुतिमिरीभूतेनिर्द
हंत्यपमानिताः ४० प्रहरंत्यपरेघोरायूपानुत्पाटयंतिच प्रमर्द्दंतितथाचान्येविमर्दंतितथापरे ४१ आधावंतिप्रधावंतिवा
युवेगमनोजवाः चूर्णंयंतेयज्ञपात्राणिदिव्यान्याभरणानिच ४२ विशीर्णाइवदृश्यंतेतारागगनमस्तले दिव्यान्नपा
नभक्षाणांराशयः पर्वतोपमाः ४३ क्षीरनद्योपदृश्यंतेघृतंपायसकर्दमाः दधिमंडोदकादिव्याःखंडशर्करवालु
काः ४४ षड्रसानिवहंत्येताःगुडकुल्यामनोरमाः उच्चावचानिमांसानिभक्ष्याणिविविधानिच ४५ पा
नकानिचदिव्यानिलेह्यचोष्याणियानिच भुंजतेविविधैर्वक्त्रैर्विलु

पंत्पाक्षिपंक्तिच ४६ रुद्रकोपान्महाकायाः कालाग्निसदृशोपमाः क्षोभयन्सुरसैन्यानिभीषयंतः समंततः ४७ क्रीडंति
विविधाकाराशिवक्षिपः सुरयोषितः रुद्रक्रोधात्प्रयत्नेनसर्वदैवैस्सुरक्षितं ४८ तंयज्ञमदहत्क्षिप्रंघोरंरुद्रकर्मासमंततः
चकारभैरवंनादंसर्वभूतभयंकरं ४९ छित्वाशिरोवैयज्ञस्याननादचमुमोदच ततोब्रह्मादयोदेवादक्षश्चैवप्रजा
पतिः ऊचुःप्रांजलयःसर्वेकस्त्वंतांकोभवानिति ५० वीरभद्रउवाच नाहंरुद्रोनवादेवोनैवभोक्तुमिहागतः देव्या
मन्युकृतंमत्वाक्रुद्धःसर्वात्मकःप्रभुः ५१ द्रष्टुंचानैवविप्रेंद्रानैवकौतूहलेनवा तवयज्ञविद्यानार्थमिसंप्राप्तंविद्धिमा
मिह ५२ वीरभद्रइतिख्यातोरुद्रकोपाद्विनिःसृतः भद्रकालीतिविख्यातादेव्याःकोपाद्विनिःसृता ५३ प्रेषितौदे
वदेवेनयज्ञांतिकमिहागतौ शरणंगच्छविप्रेंद्रदेवदेवमुमापतिं ५४ वरंक्रोधोपिदेवस्यवरदानंनचान्यतः वीरभद्रव
चःश्रुत्वादक्षोधर्मभृतांवरः ५५ तोषयामासस्तोत्रेणप्रणिपत्यमहेश्वरं ५६ प्रपेदेदेवमीशानंशाश्वतंध्रुवमव्ययं
महादेवंमहात्मानंविश्वस्यजगतःपतिं ५७ दक्षःप्रजापतिर्यज्ञैर्द्दीक्षितैःसुसमाहितैः आहूतादेवताःसर्वाऋषय
श्चतपोधनाः ५८ देवोनाहूयतेतत्रविश्वकर्मामहेश्वरः तत्रक्रुद्धामहादेवीगणांस्तत्रव्यसर्जयत ५९ प्रदीप्ते
यज्ञवाटेतुविद्रुतेषुद्विजातिषु तारागणामनुप्राप्तेरौद्रेदीप्तेमहात्मनि ६० मूलनिर्भिन्नहृदयैः ॥ ॥ ॥ ॥

कूजद्भिः परिचारकैः निखातोत्पाटितैर्यूपैरपविद्धैरितस्ततः ६१ उत्पतद्भिः पतद्भिश्च गृध्रैरामिषगृद्धिभिः पक्षवातवि
निर्धूतैः शिवाशतनिनादितैः ६२ यक्षगंधर्वसंघैश्च पिशाचोरगराक्षसैः प्राणापानौ समं निरुध्य वक्त्रस्थानेन यत्नतः
६३ विचार्य सर्वतो दृष्टिं बहुदृष्टिरमित्र[illegible]जित सहसा देवदेवेशो ह्यग्निकुंडात्समुत्थितः ६४ बिभ्रत्सूर्यसहस्रस्य
तेजः संवर्त्तकोपमः स्मितं कृत्वाब्रवीद्वाक्यं ब्रूहि किं करवाणि ते ६५ श्राविते च मखाध्याये देवानां गुरुणा ततः
तमुवाचांजलिं कृत्वा दक्षो देवं प्रजापतिः ६६ ६६ ६६ ६६ ६६ ॥ ॥

यैर्नामधेयैरितिउत्तरार्द्धतानीतिशेषः १ नन्विहनाम्नामष्टसहस्रेणेति अत्राधिकं सहस्रनाम्नांवक्तव्यत्वेनप्रतिज्ञातंतत्रनामपाठेकिं
चिदधिकानिषट्शतनामान्युपलभ्यंतेनचस्तुतिपदेभ्योविपरिणामेननामान्युन्नेतुंशक्यंते अन्यशब्दस्यान्यार्थत्वकल्पनेप्रमाणाभावात्
नचतावन्त्यपिसंख्यापूर्त्तिःसंभवतितस्माद्गलितइहनामसमाम्नायइत्यव्याख्येयमेतत्सहस्रनामस्तोत्रं नापिपठनीयंन्यूनत्वेनवाग्वज्र

भीतंशंकितवित्रस्तंसबाष्पवदनेक्षणं यदिप्रसन्नोभगवान्यदिचाहंभवप्रियः ६७ यदिचाह
मनुग्राह्योयदिदेयोवरोमम यद्दग्धंभक्षितंपीतमशितंयच्चनाशितं ६८ चूर्णीकृतापविद्धंचयज्ञसंभा
रमीदृशं दीर्घकालेनमहताप्रयत्नेनसुसंचितं ६९ तन्नमिथ्याभवेन्मह्यंवरमेतमहंवृणे तथास्त्वित्याह
भगवान्भगनेत्रहरोहरः धर्माध्यक्षोविरूपाक्षस्त्र्यक्षोदेवःप्रजापतिः ७१ जानुभ्यामवनींगत्वादक्षोल
ब्ध्वाभवाद्वरं नाम्नामष्टसहस्रेणस्तुतवान्वृषभध्वजं ७२ युधिष्ठिरउवाच यैर्नामधेयैःस्तुतवान्
दक्षोदेवंप्रजापतिः वक्तुमर्हसिमेतातश्रोतुंश्रद्धाममानघ १ भीष्मउवाच श्रूयतांदेवदेवस्यनामान्यद्भु
तकर्मणः गूढव्रतस्यगुह्यानिप्रकाशानिचभारत २ ॥

त्वात्वाग्वज्रोहिमंत्रोऽध्येतारंनाशयतितथाचोक्तंशिक्षायांमंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाहसवाग्वज्रोयजमानं
हिनस्तियथेंद्रशत्रुःस्वरतोपराधादितिइंद्रंहंतुकामेनत्वष्ट्रापुत्रार्थिनास्वाहेंद्रशत्रुर्वर्द्धस्वेतिमंत्रे॥ ॥ ॥ ॥ ॥

गाहोमं कुर्वतांइंद्रपदं स्वेष्टसिद्धये॥ ऽतो दान्तंप्रयोज्यं तच्चानुप्रयुक्तं प्रस्तुत आपुदान्तमेव तत्पठितमिति इंद्रस्य वत्सपुत्रस्य नाशको जात इत्युपा
ख्यायते त्वष्टा हतपुत्र इत्यनुवाको तस्मादस्य स्तवस्य मोक्षमंत्रत्वात् वर्णितश्चात्संतं ही नत्वान्लेष्टार्थप्रदत्वं युज्यते॥ ऽपितृपाठकानर्थ
करत्वमेवेति चेत् उच्यते इदमिह जाबालाः समामनंति। अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति स होवाच याज्ञवल्क्यः शत
रुद्रियेणेत्येतानि ह वा अमृतस्य नामधेयान्येतैर्ह वा अमृतो भवतीति। अत्र नामजपस्यामृतसाधनत्वं गम्यते तेषां च नाम्नां न्यूनाधिकभावे
नानेकासु शाखासु पठितानां गुणोपसंहारन्यायेनैकत्रोपसंहारेणाभवितव्यं तच्चास्मदादीनामशक्यमिति भगवान्बादरायणः तैत्तिरीय
कवाजसनेयकादिप्रसिद्धशाखास्वविद्यमानानां नाम्नामुपसंहारमिह कृतवान् यथाहि आपस्तंबादिः कल्पकारः स्वपरशाखास्था
न्यंगान्युपदिश्य आग्नेयमष्टाकपालमिति यथासमाम्नातमिति मध्ये प्रधानं सिद्धवन्निर्दिश्य पुनरुपरिष्टात्त्वन्यान्यंगानि उपदिशति।
तद्वदिहापि नमस्ते देवदेवेशेत्यादिना कानिचिन्नामान्युपदिश्य त्रिसौपर्णी तथा ब्रह्म यजुषां शतरुद्रियमिति सौपर्णी शतरुद्रियना
ममालायां सिद्धवन्निर्दिश्य शेषमपि नामधेयगणं पठति तथाच यथाप्रतिज्ञातमष्टोत्तरसहस्रं नाम्नां संख्यापूर्यते नान्यथा तदि
दमभिप्रेत्योक्तं गूढानीति। गुह्यानि अमृतत्वाप्युपहेतेषुं प्रकाशयानि २ ॥ ॥

नमस्ते देवेति ब्रह्मविद्याधिकाराद्ध्यात्मपरत्वेनैवैतानि व्याख्यायन्ते। तत्र हि हे देव जगन्निर्माणकौशलपरे ते तुभ्यं नमोऽस्त्विति युष्मच्छब्दस्य प्रमेयस्य निर्देशः
देवो देशे देवाः इन्द्रियाणि ईशो बुद्धिः पूर्वबुद्धिः ख्यातिरीश्वर इति स्मृतेः एतदुभयात्मक। एतेन प्रमाणप्रमात्रोर्निर्देशः कृतः एवं नामत्रयेण ज्ञेयज्ञानज्ञात्रात्मक
तत्त्वं देवस्योक्तं। तस्मात्प्रपञ्चत्रयेण हरिहरदेवाः शिलिदेवाः शमाद्या इन्द्रियवृत्तयः। तेषामरयः असुराः कामादयः तेषां बलसूदन। तथा च शमकौ हि देवासुरा

नमस्ते देवदेवेश देवारिबलसूदन। देवेन्द्र बलविष्टम्भ देवदानवपूजित ॥ २

द्वयोः प्रयोगो दृष्टः कृत्स्नया हि माया पश्यतो देवा असुराश्चेति देवानामिन्द्रियाणां ईशो बुद्धिः तस्या बलं विषयप्रावण्यं तत्र विशेषेण स्तम्भतीति देवेन्द्र ब
लविष्टम्भ। अत एव देवैरिन्द्रियैर्दानवैर्वाणाद्यैश्च पूजितः आदरेणैरन्तर्येण सत्कारसेवितः। एवं च कामादिजयो धीनिरोधस्तेन द्रष्टादिस्वं मया ध्यात्मकस्व
स्वरूपेण प्रापक इत्युक्तं भवति २ ॥

योगैश्वर्यंप्राप्तायाः सांबमूर्तेः स्वरूपमाह। चतुर्भिः सहस्रमक्षाणियुगपत्सर्वविषयप्रकाशकानींद्रियाणियस्य सर्वज्ञत्वर्थः अतएवविरूपाणित्र्यस्र
दाणींद्रियेभ्योविलक्षणानिचर्मवहित्तदिग्राहकाणींद्रियाणियस्य। अक्षस्त्रीणिसोमसूर्याग्न्याख्यानिअक्षाणियस्य सयक्षाधिपः कुबेरः सप्रियोयस्यास्त्र
याम्बूर्तेर्ज्ञेयंस्वरूपमाहसर्वेतदिति चतुर्भिः भगवद्गीतासुपिज्ञेयंयत्तत्प्रवक्ष्यामीतिप्रतिज्ञायसर्वतः पाणिपादंतदित्यादिनाउक्तमेवस्वरूपमुक्तं सर्वतः पा

सहस्राक्षविरूपाक्षत्र्यक्षयक्षाधिपप्रिय सर्वतः पाणिपादस्त्वंसर्वतोक्षिशिरोमुख ४ सर्वतः श्रुतिमल्लोकेसर्वमावृत्य
तिष्ठसि। शंकुकर्णमहाकर्णकुंभकर्णार्णवालय ५ गजेंद्रकर्णगोकर्णपाणिकर्णनमोस्तुते शतोदरशतावर्तश
तावर्तशतजिह्वनमोस्तुते ६

णः अतः सन्निधिस्त्वयस्यसः सर्वतः पाणिपादस्त्वमुक्तरत्वात्तथाचश्रुतिः विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोवाहुरुतविश्वतः स्पात्संबाहुभ्यांधम
तिसंपतत्रैर्द्यावाभूमिजनयन्देवएक इति धर्मतिवशीकरोति सर्वेषुसंबोधनपदेषुनमस्तेइत्यनुषंजनीयंलोकेसर्वमावृत्यतिष्ठसीत्यस्यविपरिणा
मेणलोकेसर्वमावृत्यतिष्ठनइतिसंबोधनमूहनीयंसार्द्धश्लोकः ४ शंकुकर्णादयः सर्वेश्वरगणाः सर्वाभिन्नत्वादीशस्यतन्नाम्नैवउच्यते ५ शतो
देरेत्यादौवैश्वरूप्यप्रथनार्थः ६

अस्यैवं वर्णितोपास्यस्य लक्षणं तिं पश्यन्ति गायन्तीति गायत्रिणः त्रितं ध्येयं गायत्रीजपपराः त्वामेव गायन्ति गायत्रीप्रतिपाद्यस्त्वमेवासीत्यर्थः अर्किणः
अर्कोपासनपराः त्वां अर्कं सवितारं मंडलाधिष्ठातारम् अर्चन्ति उपतिष्ठंते संध्यासु ब्रह्माणं ब्रह्मविदं चतुर्मुखं वा शतक्रतुं देवं इंद्रं ऊर्ध्वं सर्वोपाधिभ्य उत्कृष्ट
खमिव आकाशवत्सर्वगतं स्वनिष्ठः असंगश्च तादृशं मेनिरे मुनयः अत्रापि गायत्रिणोपः अर्काः अर्कार्च्यैः ब्रह्म शतक्रतोऽ ऊर्ध्वं खवत्सर्वत्वेन

गायंति त्वां गायत्रिणोऽर्चंत्यर्कमर्किणः ब्रह्माणं त्वां शतक्रतुमूर्ध्वं खमिव मेनिरे ७ मूर्तौ हि ते महामूर्ते समुद्राम्बर
संनिभा सर्वा वै देवता ह्यस्मिन्गावो गोष्ठ इवासते ८ भवच्छरीरे पश्यामि सोममग्निं जलेश्वरं आदित्यमथ वै विष्णुं
ब्रह्माणं च बृहस्पतिं ९ भगवान्कारणं कार्यं क्रियाकरणमेव च असतश्च सतश्चैव तथैव प्रभवाप्ययौ १०
नमो भवाय सर्वाय रुद्राय वरदाय च पशूनां पतये नित्यं नमोऽस्त्वन्धकघातिने ११ ॥ ॥ ॥ ॥

मनन्ति नामानुरूपाणि ७ मूर्तौ अष्टरूपायां भूम्यंबुवह्निवाय्वाकाशसूर्यचंद्रयजमानात्मिकायां सर्वदेवतामूर्तेरस्तु संनाम ८ हे भव ते हे सोम अग्नी
रत्नादीनि अष्टौ नामान्यस्यानि ९ भगवन्नित्यादीनि पूर्वार्द्धे पंचसदसत्प्रभवाप्यये सु उत्तरार्द्धे एकं १० भवत्यस्मादिति भवः हिनस्तीति शर्वः रुः पापं द्रा
वयतीति रुद्रः पशूनां ब्रह्मादिस्थावरान्तानां जीवानां ११ ॥ ॥ ॥ ॥ ॥ ॥

नानारूपत्वेनस्तोतित्रिजटापेसादिनात्रिशूलवरेणायुधेनानुप्रवहन्त्रुशीलमस्यतेस्मैत्रिशूलवरपाणिनेत्रीणिशस्त्राचोर्य्यध्यानानित्र्यंबकानिनेत्रा
णीवगमकानिवोधकानियस्यसत्र्यंबकः त्रीणिसोमसूर्याग्न्याख्यानिनेत्राणियस्य ११ चंडः सर्वसहनक्षमः कुंडः स्वमत्रवतस्वस्मिन्सर्वंधारयितुं
क्षमः।स्कंदःग्नलांउदंडिनेदंडधारणयशासितेरसर्थः समश्चासौकर्णश्चेतिसमकर्णः क्रतुर्वेक्रश्वदंडीचासौमुण्डश्चेतिदंडिमुंडः परिव्राजकः १२

त्रिजटायत्रिशीर्षायत्रिशूलवरपाणिने त्र्यंबकायत्रिनेत्रायत्रिपुरघ्नायवैनमः १२ नमश्चंडायमुंडायचंडाया
उधरायचदंडिनेसमकर्णायदंडिमुंडायवैनमः १२ नमोर्ध्वदंष्ट्रकेशायशुक्लायावनतायच विलोहितायधू
म्रायनीलग्रीवायवैनमः १४ नमोस्त्वप्रतिरूपायविरूपायशिवायच सूर्यायसूर्यमालायसूर्यध्वजपताकिने १५

ऊर्ध्वाश्चताः दंष्ट्राः केशाश्चयस्य।शुक्लायशुद्धायअसंगिनेतथापि [illegible] अवनतायअवसन्नेनवाध्येनरूपेणाजगद्रक्षणायनताय अंतश्चविलो
हितायपरजोगुणिने धूम्रायतमोगुणिने।नीलग्रीवायजगद्रक्षणार्थंकंठेविषधारिणेत्वनमालिकाय १४ नास्तिप्रतिरूपः सदृशोयस्य। विविधानि
रूपाणियस्यशिवायपरमकल्याणायसूर्येचस्थितेरूपेणे।सूर्यायसूर्यमंडलरूपायसूर्यमालायतस्मिन्मालेनशोभतेसूर्यमंडलांतर्वर्त्तिनेपरमेश्वररूप
सूर्यवत्प्रख्याः ध्वजाः पताकाश्चयस्य १

समाथाः शिवगणाः इषमेषवसंवीयस्यपर्णानिमृजेलवः चीराणिवल्कलानिवपर्णेयस्यभवरूपिणस्तायसस्मेवा १४ नाभायनाभीजग
दस्मास्तीतिनाभः मलेर्थीयोचुा यस्तितिचतिदिलोपः १० नाम्याय नाभिंत्र्यहतीतिनाभ्यः नाभिनमेचेतियतम सेनभोदेशः नाभिस्थानीया
यत्रस्य ऋरेणेनभिस्थानेकारणकार्यप्रपंचो तयाचस्मृतिः तयथारेणुनभिरर्पितानाभावरान्यर्पिताएवमस्मिन्प्राणासर्वसमर्पितं प्राणब्रह्मणि

नमः प्रमथनाथायवृषस्कंधायधन्विने शत्रुंदमायपरेऽशायपर्णचीरपटायच १६ नमोहिरण्यगर्भायहिरण्यकवचा
यचहिरण्यकृतचूडायहिरण्यपतयेनमः १७ नमः स्तुतायस्तुत्यायस्तूयमानायवैनमः सर्वायसर्वभक्षायसर्व
भूतातरात्मने १८ नमोहोत्रेथमंत्रायशुक्लध्वजपताकिने नमोनाभायनाभ्यायनमः कटकटायच १९ नमो
स्तुकृशनासायकृशांगायकृशायच संहृष्टायनमस्तुभ्यंनमः किलकिलायच २० नमोस्तुशयमानायशयितायो
त्थिताय च स्थिताय धावमानाय मुंडाय जटिलायच २१ नमोनर्तनशीलाय मुखवादित्रवादिने नाद्योपहा
रलुब्धायगीतवादित्रशालिने ॥

सर्वकार्यकारणवाकठानामावरकारणमपिकटायत्र्याचरकायनामहृयेनांतर्वहिर्व्याप्तिदर्शिता १९ किलकिलायशब्दविशेषरूपाय २० सर्व
क्रियाकर्तेतेनस्तोतिनमोस्त्वित्यादिना ० नद्यांभवानिनाद्यानिकमलानि।नान्येनोपहारस्तत्रलुब्धाय।हरिस्तत्सहस्रंकमलवलिमाधाय
पर्यारिसेनतदेनेनसूचितं २२ ॥ ॥ ॥

ज्येष्ठोवयसाधिकः श्रेष्ठोगुणाधिकः बलोवलाभिमानिनीदेवतारुद्रः तस्यप्रथनंपराजयस्तत्कर्त्रे कालस्यापिनाथायनियंत्रे कल्पायसमर्थायाक्षयायमहाप्रलयाय[illegible]। उपक्षयायअवांतरप्रलयाय। उप[illegible]य २३ भीमंव्रतंश्मशानादिवासधरायचत्रे २४ विभीषणायनिर्भयायभीष्मायभयंकरायाहि भीमाप्रेतेः शामादिभिः धरता श्रकलात्यसतसेतेव्रतधराय २५ पद्मायत्रे श्मामं

नमोज्येष्ठायश्रेष्ठायबलप्रमथनायच कालनाथायकल्पायक्षयायोपक्षयायच २३ भीमदुंदुभिहासायभीमव्रतधरायच उग्रायचदशबाहवे २४ नमः कपालहस्तायचितिभस्मप्रियायच विभीषणायभीष्मायभीमव्रतधरायच २५ नमोविकृतवक्त्रायखड्गजिह्वायदंष्ट्रिणे पक्वाममांसलुब्धायतुंबीवीणाप्रियायच २६ नमोवृषांकवृक्षायगोवृषायवृषायच कटंकटायदंडायनमः पचपचायच २७

श्मपक्वश्मशानेउभयविधमांसलुब्धाय २६ वृषायवृक्षिकेत्रेवृक्ष्यायवृषोधर्मलताहिताय धर्मवृद्धिकेत्रे गोवृषायनंदिरूपायाय वृषायधर्मायकटंकटायकटीगतोनितस्वीस्यरिनिहितेमुमागमश्रार्षवाधादिरूपेणनि संगमनशीला[illegible]यसयैः कालायवा दंडायनियंत्रेपचपचायनिसंभूतानांपाककर्त्रेकटिपचौपचायच २७ ॥

गीर्वरः अतिवरो धेनुः ईप्सितमात्रदानं वरः तेनाप्यधिकदानं अतिवरः वरेद्वरदायघ्निंवन्तस्यान्तो धान्तोरिस्यालोपेद्रूपं २० रक्तो रागवान् विरक्तस्त
द्भ्यः तदुभयात्मकाय भावनाय अयात्रो संभिन्नाय कार्याद्व्यपेरासवेतो नुस्रूताय विभिन्नाय कार्यद्व्यपेराय आहत्वाय छायाय छायावेतेनगहते

नमः सर्ववरिष्ठाय वराय वरदाय च वरमाल्यं गंधवस्त्रीयवरान्ति वरेदेनमः २८ नमो रक्तविरक्ताय भावनायाक्षमालि
ने संभिन्नाय विभिन्नाय छायायातपनाय च २९ अघोरघोररूपाय घोरघोरतराय च नमः शिवाय शांताय नमः
शांततमाय च ३० एकपाद्बहुनेत्राय एकशीर्षे नमो नमः क्षुद्राय क्षुद्रलुब्धाय संविभागप्रियाय च ३१ पंचाला
यसितांगाय नमः शमशमाय च नमश्चंडिकघंटाय घंटाघयाघरघंटिने ३२ ॥ ॥ ॥ ॥

घोररूपाय छायाशब्दादर्शे आघन्नू आतपनः आतपः एकपात् एकपदे ३१ पंचालाय विश्वकर्मणो स्वर्णकारलोहकारतक्षादिकर्मकर्त्रे रस
र्थः शमशमाय निःसंज्ञाय मत्तीतिपचपचवत्। चंडिका शत्रुभयंकरी घंटाय स्पतंस्मे चंडिकघंटाय। घंटानादरूपाय। अघंट घंटिने नादेहत्वमोचे
पिनादवेते। अनाहतध्वनिरूपायेत्यर्थः ३२

मो०

३३५

335

पुंसां सहस्रे लेयुगपत्साध्मातार कपिस्तीप्रतिविंवाके वत्प्रत्येकं परिसमाप्तघंटास्येयोगवलवत्तः सतथा। तारशघंटामालाप्रियायप्राणः
पंचवृत्तिर्वायुः सएवघंटावत्तशब्दहेतुर्यस्यतस्मैप्राणघंटाय। गंधः प्रसिद्धः कलकलः ऊष्माकोलाहलोवा ३३ हुंकारः क्रोधवर्णः त
स्यपारोंतः शमः हूंकारः याज्ञिकप्रसिद्धः हुं इतिहिंकारस्य स्वरूपं वः खेरोमिनिजपसेयोभिहिंकार इति आश्वलायनोक्तो : भिहिंकारः त
स्यपारः भूरादिलोकेभ्यः परंशांतं हूं हकारः आकाशः ऊकारः षष्ठी शिवमूर्तिः सर्वेः नाम्नां नामरूपात्मकः प्रपंचोलक्ष्यते। मकारः
तस्यकारतोईश्वरः तस्यपारः तुरीयशांतं ब्रह्मतत्तदिदंसुक्तं हुंहुं हुंकारपारायेति हूंहूंकारप्रियायेति क्रोधवर्जं हूंकारद्वयप्रिया

सहस्राक्षायतघंटाय घंटामालाप्रियायच प्राणघंटायगंधायनमः कलकलायच ३३ हुंहुंहुंकारपारा
यहुंहुंकारप्रियायच नमः शमशमेनित्यंगिरिवृक्षालयायच ३४ गर्भमांसशृगालायतारकायतराय
च नमोयज्ञाययजिनेहुतायप्रहुतायच ३५

य। शम शमशांतो भवशांतो भवेत्याचष्टे शमशमेति। शाम्यशाम्य सर्पाक्षितेमोवादिकर्तमार्ध। शमशमेनीतिशमशब्दतस्मिन्शमशमे
आचारन्नित्यं वेनालकृतेरिंद्रिय ३४ गर्भमांसं हृदयजिह्वावक्षआदयवर्णा न गतंमांसंतत्र शृगालवल्लुब्धापयह्याणभमांसं चपात सा
लुब्धाय। अमृतात् अतिर्वयाद् तिरि ति ब्राह्मणात् तारकाययज्ञेभोः लेन पापमोचकाय। तत्र। यतरस्तेनेते नित्यसुखस्य यज्ञोपकरणा
य। यजिने यजमानाय। ब्रह्महुताय ब्राह्मणमुखेन तत्पाय हुताय अग्निमुखेन तत्पाय। ३५ ॥ ॥ ॥

रुम०

३३५

यज्ञवाहादियज्ञलिंगादिरूपेणापन्नानिर्वोढ्रे दांताय जितेंद्रियायायानप्यामसत्त्वमयाय । ध्यानपनापरज्ञोमयायायानप्यंसत्तंताय कं रज इति सांख्यप्रसिद्धं
नघाय नदाहे नघादिरूपाय नदानां तरवत्तीनां नदीनां पतये समुद्राय ३६ बालाश्च ते ऽनुचराश्च तान् गोपायतीति बालानुचरगोप्ता शुभ्रः श्रीराम

यज्ञवाहाय दांताय प्रतप्याय तपनाय च नमस्तराय नघाय तराणां पतये नमः ३६ अन्नदायान्नपतये नमस्त्वन्नभुजे तथा नमः सहस्रशीर्षाय सहस्रचरणाय च ३७ सहस्रोद्यतशूलाय सहस्रनयनाय च नमो बालार्कवर्णाय बालरूपधराय च ३८ बालानुचरगोप्त्राय बालक्रीडनकाय च नमो वृद्धाय लुब्धाय क्षुब्धाय क्षोभणाय च ३९ तरंगांकितकेशाय मुंजकेशाय वै नमः नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च ४० वर्णाश्रमाणां विधिवत्पृथक्कर्मनिवर्त्तिने नमो घुष्याय घोषाय नमः कलकलाय च ४१ श्वेतपिंगलनेत्राय कृष्णरक्तेक्षणाय च प्राणभग्नाय दंडाय स्फोरनाय कृशाय च ४२ कर्मकामार्थमोक्षाणां कथनीयकथाय च सांख्याय सांख्यमुख्याय सांख्ययोगप्रवर्त्तिने ४३

दिकस्तरएतेन चाग्निपानादिः श्रीकृष्णलीलासूचिता ३९ त्रीणि कर्माणि यजनाध्ययनदानानि ४० कलकलः कोलाहलः ४१ प्राणभग्नाय जितश्वासाय वा हितान्यदिदृक्षितिविशेष्यस्यैव पूर्वनियामः दंडः आयुधस्फोरनं विदारणं ४२ सांख्याय कपिलायेनीश्वरवादिने सांख्यमुख्याय सेश्वराय पातंजलाय । सांख्यं वेदांतविचारः योगो निदिध्यासनं अनुग्रहद्वारा एतयोः प्रवर्त्तकाय ४३

रथ्यः तद्भावो विरथ्यः तदुभयाहीयरथ्यविरथ्याय चतुष्पथे जलाग्निवायाकाशेषु पथायस्य रथ्य स्पतद्भूते रंगोयेति पोठप्रसिद्धोर्थः ४७ ईशाने हे इंद्रशितः वज्रसंघात वज्र वल्कविन शरीर हृषिकेश पिंगल केशत्र्यंबिका त्रिनेत्रा चासौ अंबिका च तस्याः नाथ अन्न खल्वमार्भे अन्नकार्ये तस्य।

मो०
३३६
336

नमो रथ्यविरथ्याय चतुष्पथरथ्याय च कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने ४४ ईशानवज्रसंघात हरि
केश नमोस्तु ते त्र्यंबकांबिकनाथाय अन्नायान्न नमोस्तु ते स्थूलजीर्णांगजटिले वल्कलाजिनधारिणे
४७ दीप्तसूर्याग्निजटिले वल्कलाजिनवाससे सहस्रसूर्यप्रतिम तपोनित्य नमोस्तु ते ४८ उन्मादनशता
वर्त्तगंगातोयार्द्रमूर्धज चंद्रावर्त्तयुगावर्त्त मेघावर्त्त नमोस्तु ते ५० त्वमन्नमन्नभोक्ता च अन्नदोन्नभुगेव च त्वं
अन्नस्रष्टा च पक्ता च पक्वभुक्पवनोनलः ५१

अन्नकारणभूय ४५ कामेतिद्वौ हे स्थूल हे जीर्णांगजटिल वल्कलाजिनधारिन् जटिल तस्मिन् जटिले दीप्तौ यो सूर्याग्नी तद्वद्दीप्यमानजटावत् ४८ हे
उन्मादन आमोह काशते आवर्त्ताः यस्मिन् गंगातोये नार्द्रमूर्धज ४९ चंद्रं आवर्त्तयति पुनः पुनरिति चंद्रावर्त्तस्य हे ५० त्वमिति
अन्नभुक् अन्नपालकः ५१

रम०
३३६

जरेति जरायुजांडजाइतिनामद्वयं संधिराषः हे देव हे देवेश भूतग्रामस्त्वतुर्विध इत्येकं नाम ५२ चरेति ब्रह्मेति ब्रह्मविदांवरेति च नामद्वयं ५३ मनस इति ५४
हापिहार्यीतिसामगेतिशरण्यार्थास्तोभाः तेषामेकं चतुरश्रेएवयः सुरश्रेष्ठेत्येकं ब्रह्मवादिगेयेतिपंचमनुवेयं ५५ यजुरिति वेदोपनिषद्गणस्त्वमितिप नी

अग्रहाप २

जरायुजांडजाश्चैव स्वेदजाश्च तथोद्भिजाः त्वमेव देव देवेश भूतग्रामश्चतुर्विधः ५२ चराचरस्य स्रष्टा त्वं प्रतिहर्ता तथैव च त्वामाहुर्ब्रह्म
विदुषो ब्रह्म ब्रह्मविदांवर ५३ मनसः परमायोनिः खं वायुर्ज्योतिषांनिधिः ऋचस्त्वामाहुस्तथोंकारमाहुस्त्वां ब्रह्मवादिनः ५४
हापिहायिहुवाहायि हामिहार्यापि तथासकृत् गायंति त्वां सुरश्रेष्ठ सामगा ब्रह्मवादिनः ५५ यजुर्मयो ऋङ्मयश्च त्वमाहुतिम
यस्तथा पठ्यसे स्तुतिभिश्चैव वेदोपनिषदां गणैः ५६ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये त्वमेव मेघसंघाश्च वि
द्युतोऽशनिगर्जितः ५७ संवत्सरस्त्वमृतवो मासो मासार्धमेव च युगानि मेषाः काष्ठास्त्वं नक्षत्राणि ग्रहाः कलाः ५८ वृ
क्षाणां ककुभोसि त्वं गिरीणां शिखराणि च आघ्रो मृगाणां पततां तार्क्ष्योनंतश्च भोगिनां ५९

येति चतुर्थं ५६ वर्णावराः संकराः विद्युत्स्तनितं सहश्लिष्टको मेघशब्दः गर्जितं निर्घोषकः सः नवनामानि ५७ वृक्षाणामिति ककुदो मुख्याः
मध्ये भाग्यस्थाः पततां पक्षिणां ह्यपांतपासनार्थे विभूतयः रक्ताः ५९

त्वमिति द्वौ इन्द्रो वायुविशेषः नद्यावामनः ज्ञातः शास्त्रकृद्धिरितिशेषः ६१ दशलक्षणसंयुक्तो धर्मइत्येकं लक्षणानि च अहिंसासत्यास्तेयब्रह्मचर्यापरि
ग्रहाख्यमा इति शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि यमा इति च योगोक्तानि क्षमासत्यादीनि मनूक्तानि वा ६२ त्वमेव अर्थ इति द्वे मृगपक्षिणा इति द्वे

क्षीरोदो मधुदधीनां च यंत्राणां धनुरेवच वज्रः प्रहरणानां च व्रतानां सत्यमेवच ५९ त्वमेव द्वेषइच्छा च रागो मोहः क्षमाक्षमे व्यवसा
यो धृतिर्लोभः कामक्रोधौ जयाजयौ ६० त्वं गदी त्वं शरी चापी खड्गी मुद्गरी तथा छेत्ता भेत्ता प्रहर्ता त्वं नेता मंतापि तामतः
६१ दशलक्षणसंयुक्तो धर्मोऽर्थः काम एवच गंगासमुद्राः सरितः पल्वलानि सरांसि च ६२ लताश्च ल्लस्तृणौषध्यः पशवो मृग
पक्षिणः द्रव्यकर्मसमारंभाः कालपुष्पफलप्रदः ६३ आदित्वांतश्च वेदानां गायत्र्योंकार एवच ६४ हरितो रोहितो नी
लः कृष्णो रक्तस्तथारुणः कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा ६५ सवर्णश्च सुवर्णश्च वर्णकारोऽप्यनौपमः सुवर्ण
नामा च तथा सुवर्णप्रिय एवच ६६ त्वमिंद्रश्च यमश्चैव वरुणो धनदोऽनलः उपप्लवश्चित्रभानुः स्वर्भानुर्भानुरेवच ६७

द्रव्यकर्मणां समारंभ इत्येकं कालः पुष्पफलप्रद इत्येकं ६३ आदिश्चेत्यर्द्धं ६४ हरितादिद्वे शविवोवर्णाः ६६ त्वमिति उपप्लवरूपरागः ६७

होत्रमित्यर्द्धं हूयतेऽस्मिन्निति होत्रं वह्निः होता यजमानः प्रभुः कृतस्य फलद ईश्वरः ५ त्रिसौपर्णस्त्रिसुपर्णो विदितं नामजातं शतरुद्रसंबंधि नामजातं यस्मिन् तत्
शतरुद्रियं तत्त्र्यब्रह्मत्वेदरूपं तेन तद्गणपर्वस्थशतरुद्रियस्य ईशो वा महेश्वरः शंभुरिति नामाष्टोत्तरशतादेश ब्रह्मा हि त्रिः वेदान्तेऽपि शतरुद्रनामानि संभाव्यं तेन तद्ग्राह्य
नैयययजुषामिति यजुषां शतरुद्रियमित्येतावन्मुक्ते द्रोणपर्वस्थस्यापि शतरुद्रियस्य मूलमूर्तिभावेन यजुःसंबंधित्वसंभवाद्वाऽस्मन्मुक्तं तस्य तथात्वेऽपि साक्षाद्देत्ता
भावात् तत स्वकृतं चैव तथा प्रभुरित्येतानि त्र्यष्टाशीत्यधिकं शतत्रयं नाम्नां भवति तथा प विश्वं वपा विश्वा गणापिमासारीनि निमेषान्मेषकमेतं तानि त्र्यशीत्यधिकं शत

होत्रं होता च होम्यं च हुतं चैव तथा प्रभुः त्रिसौपर्णस्तथा ब्रह्म यजुषां शतरुद्रियं ६८

पी

द्रियं तेन षडधिकं षट्शतानि नाम्नामिहाम्नाति त्र्यष्टाधिकसहस्रस्य शेषं द्व्यधिकं नाम्नां शतचतुष्टयं त्रिसुपर्णशतरुद्रियाभ्यां पूर्णीयं तस्मा हि त्रिसुपर्णत्रये चतुर्द
श मंत्राः सर्वशाखानां नाम्नामुपसंहार्यत्वात् खिलसहितेषु नमकानुवाकेषु प्रथमेऽनुवाके षोडश मंत्राः एकादश नामानि चेति सप्तविंशति २७ द्वितीये चत्वारिं
शत् तृतीयचतुर्थयोः षट्सप्तति ततः त्रिके द्विनवतिः ततो द्विके त्र्यशीतिरिति नाम्नामेवान्त्ययोश्चतुर्विंशतिर्मंत्राः शेषं खिले १७ सप्तदश मंत्राः नव
त्वानवगोविंदः इत्याद्यो मूलश्लोकाः एवं एकविंशतिः सर्वेषां संकलने द्व्यधिकं शतचतुष्टयं एतत् पूर्वोक्तषडधिकषट्शत्यायुतमष्टाधिकसहस्रं भवति तथा वा
मूतत्वकामस्यायं नाममतमाम्नायः त्रिसुपर्णत्रयशतरुद्रियाभ्यां समुच्चित एव श्रेयस्करः ततश्च यथाम्नूनतेन वा गवन्त्वापन्नेरितिशिव ६८

पवित्रमिति गिरिंगिरिवदचेतनंदेहंकायतिशब्दयतीतिगिरिकः आतोनुपसर्गेकइतिकः अचेतनमपिदेहादिचेतनंकरोतीत्यर्थः अचेतनयदचितोदेवोऽच
येइतिमंत्रलिंगंचहिंडुकःहिंडतेगत्यागतंकुरुतेइतिहिंडुकःहिंडिगत्यावितस्माद्बहुलकादुकम्विदाभासइत्यर्थः वृक्षः वृश्चतेछिद्यतइतिवृक्षःउपाधिविशिष्ट
तरूपेणनाशवान्जीवःसहस्ररूपेणजीवन्नेवननश्यतीत्यर्थः तथाचश्रुतिर्विज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीतिअविनाशीवाअरे

पवित्रंचपवित्राणांमंगलानांचमंगलं गिरिकोहिंडुकोवृक्षोजीवोपुद्गलएवच ६९ प्राणाःसत्वंरजश्चैवतमश्चाप्रमदस्तथा प्राणोपा
नःसमानश्चउदानोव्यानएवच ७० उन्मेषश्चनिमेषश्चक्षुतंजृंभितमेवच लोहितांतर्गतादृष्टिर्महावक्त्रोमहोदरः ७१ शु
चिरोमाहरिश्मश्रूर्ध्वकेशश्चलाचलः गीतवादित्रतत्वज्ञोगीतवादनकप्रियः ७२ मत्स्योजलचरोजाल्योऽकलःकेलिकलः
कलिः अकालश्चातिकालश्चदुष्कालःकालएवच ७३

ममात्मेतिचपुद्गलःपूयतेगलतिचेतिपुद्गलोदेहः ६९ अप्रमदःप्रमदयास्त्रियाहीनःऊर्ध्वरेताइत्यर्थः ७० लोहितांतर्गताचदृष्टिरस्य पुंवद्भा
वश्चार्षः ७१ चलाचलश्चलंतंचंचलः नद्धावतोऽन्यानत्येतीतिश्रुतेः ७२ मत्स्यइवमत्स्योजीवःसंसारनद्यांजलेचरतीतिजाल्योवासनाजालब
द्धः वक्तृतस्तस्यचकलोदुर्द्धरः कलनंधारणंकलः केलिरेवकलोयस्यलीलयाप्यबद्धत्वंनलभमवशात्मेत्यर्थः ७३ ७३

घंरी२

सुरः छेदनसाधनं क्रमः छेतुंयोग्यः क्रतीछेदनेऽश्वमस्यरूपं पक्षोपिवं अपक्षः अमित्रंतस्य क्षयंकरः संवर्तकबलाहकः कल्पांतमेघः ७५ घंटतिघोतनेऽइतिघंटः प्रकाशवान् अघंटः मायावृतत्वेनप्रछन्नप्रकाशः घटयति कर्मफलैर्योजयतिजंतूनितिघटी घंटावान् चरुचेलीचरंतितेचराः स्थावरजंगमाः जीवाः तैः सा रोमिरचेलतिक्रीडतइतिचरुचेली मिली मिली पि लनसंश्लेषणयोमिलः घञर्थेभावेकः नदस्यास्तीतिमिली कारणतयासर्वकार्येष्वनुस्यूतइत्यर्थः द्विर्वचनेनिमं आसि प्रदर्शनार्थं यद्वामिलीइतिद्विवचनांतेनमिलिइतिमंत्रपदंताभ्यामसमुद्धृतंभवति गोडास्तुचरुचेलीचिलीमिलीइतिपठंति अग्निमप्रभेघंटीमस्य

मृत्युः सूरश्चक्रमश्च पक्षोपक्षक्षयंकरः मेघकालोमहादंष्ट्रः संवर्तकबलाहकः ७४ घंटोघंटोघटीघंटीचरुचेलीमिलीमिली
ब्रह्मकायिकमग्नीनांदंडीमुंडस्त्रिदंडधृक् ७५ चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्तकः चातुराश्रम्यनेताचचातुर्वर्ण्यकरस्तथा
७६ सदाचाक्षप्रियोधूर्तोगणाध्यक्षोगणाधिपः रक्तमाल्यांबरधरोगिरीशोगिरिकप्रियः ७७

वः तद्देतिसंबुद्धिः मिलीवत्त्वीलोविलीशब्दार्थपरिहितपरोऽस्तियो ब्रह्मवर्णः अग्नीनांकायिकंकायेभवंकायिकंजायासइमेवात्मानंद्वेधातपन्नतः पि
तिश्वपत्नीचाभवतामितिश्रुतेः वह्निजायास्वाहेत्यर्थः तेनऊँहरुचीलिचीलिविलिचिलिऊँ स्वाहेतिचशादशार्णोमंत्रउद्धृतोभवति दंडीमुंडइतिप
महत्सः त्रिदंडइतित्रिदंडीत्वकः १३ ७५ गिरिकंकषायंत्रस्यिप्रमस्य ७७

मिलिमिलि२

शिल्पिकः चलःशिल्पी ७८ नमस्कारस्यैवरूपांतरंनमोनमइतिशिष्टवचपोत्नोतारकः प्रणवः तारकामयःप्रचुरनक्षत्रः आकाशरूपः ७९ धाताआदिकर्त्ता
विधाताभौतिकस्त्रष्टाचतुर्मुखः संधाताएकीकृतस्यस्थापकः संस्तहर्त्तामहेश्वरः विधाताविधिरदृष्टंकर्मैसमर्थःधारणः सर्वाधिष्ठानभूतःकारणात्माचधरःना
स्तिधरोधर्त्तायस्येतिसर्वबाधावधिभूतःशुद्धात्माब्रह्माब्रह्मवित् तपश्चादिचतुष्टयंब्रह्मविद्यासाधनं ८० भूतानांजरायुजादीनामात्मा भूतकृत्वियदाद्यु

शिल्पिकः शिल्पिनांश्रेष्ठः सर्वशिल्पप्रवर्त्तकः भगनेत्रांकुशश्चंडः पूष्णोदंतविनाशनः ७८ स्वाहास्वधावषट्कारोनमस्कारोनम
स्कारोनमोनमः गूढव्रतोगुह्यतपास्तारकस्तारकामयः ७९ धाताविधातासंधाताविधाताधारणोधरः ब्रह्मातपश्चसत्यं
चब्रह्मचर्यमथार्जवं ८० भूतात्माभूतकृद्भूतोभूतभव्यभवोद्भवः भूर्भुवःस्वरितश्चैवध्रुवोदांतोमहेश्वरः ८१ दीक्षितो
दीक्षितः क्षांतोदुर्दांतोऽदांतनाशनः चंद्रावर्त्तोयुगावर्त्तः संवर्त्तः संप्रवर्त्तकः ८२

ताद्रक् भूतोनित्यसिद्धः भूतंअतीतंभवतीतिकर्त्तरिक्तः वर्त्तमानंभविष्यंच तयोर्भवः उत्पत्तिर्यस्मात् मायाशबलात् तस्मादेवउद्भवः उत्पत्तिस्थानं भू
भूर्भुवः स्वरितिनामत्रयं इतोध्रुवश्चेत्येकंनाम इतोदृश्यमानादिपदादेरपिध्रुवः शाश्वतइत्यर्थः दांतः जितेंद्रियः अतएवमहेश्वरः इतरेभ्योब्रह्मा
दिभ्यईश्वरेभ्योपिमहान् ८१ अदांतनाशनइतिच्छेदः चंद्रमावर्त्तयतिमासः युगमासः युगमावर्त्तयतिकालः सएवसंवर्त्तः संवर्त्तः संप्रव
र्त्तकः सृष्टिहेतुः ८२

कामः स्वभिलाषः विंदुः रेतो मुनः पुत्रबीजभूतः स्वजइतिसमासांतश्च आर्षः नंदीतिदैर्घ्यमार्षंच मुखइतिच्छेदः ८३ शकुनिः पक्षिवद्गगनगः ८४ गोनर्दः कु
स्मावतारे गोपवाललीलायां गोरिवनर्दतिशब्दं करोतीतितथा गोप्रतारः गवांप्रकर्षेण तारकः विषजलात् शिष्टावृष्टितश्च गोवर्द्धनोद्धरणेन चापत्तारकः गोवृषा
णामीश्वरेण नंदीवाहनं यस्य ८५ गोमार्गः गवामिंद्रियाणां मार्गः इत्यगम्यापथः इंद्रियचालकः इत्यर्थः आमार्गः इंद्रियाणामग्राह्यइत्यर्थः श्रेष्ठः प्रशस्यतमः स्थि

कामो विंदुरणुः स्थूलः कर्णिकारस्रजप्रियः नंदीमुखो भीममुखः सुमुखो दुर्मुखो मुखः ८३ चतुर्मुखो बहुमुखो रणेष्वग्नि
मुखस्तथा हिरण्यगर्भः शकुनिर्महोरगपतिर्विराट् ८४ अधर्महा महापार्श्वश्चंडधारो गणाधिपः गोनर्दो गोप्रतारश्च गोवृ
षेश्वरवाहनः ८५ त्रैलोक्यगोप्ता गोविंदो गोमार्गो मार्ग एव च श्रेष्ठः स्थिरश्च स्थाणुश्च निष्कंपः कंप एव च ८६ दुर्वारणो दुर्वि
षहो दुःसहो दुरतिक्रमः दुर्द्धर्षो दुष्प्रकंपश्च दुर्विषो दुर्जयो जयः ८७

रश्चलनहीनः स्थाणुः त्रैलोक्यधारणस्तंभः निष्कंपः कंपः कंपवान् ८६ दुर्वारणः मत्युरूपेणागच्छन् आगतस्सन् दुःखेनापिवारयितुमशक्यः अम
नरूपेणत्रिगुणात्मकवृत्तिंचन दुर्विषहः दुष्टस्यापिविषस्यहंता संग्रामे दुः सहः दुरतिक्रमः दुर्द्धर्षः भीषयितुमशक्यः दुर्विषः दुःखेन वेष्टुं व्याप्तुं
प्रवेष्टुमशक्यः विरूपान्मायाविनस्सकलान् यस्यापेक्षयाजयः जयस्वरूपी नरो धर्मराजस्यो वा ८७

शशः शीधृग्‌ः शशांकश्चंद्रः शमनोयमः ८८ यन्मृगस्साधुश्च हंता व्याधीनामागमः आधीनांगमस्त ८९ वीणाविदात्मानिन्वंबकानिवस्तं
षिपसाविषहस्तंञ्चाग्निं पिवतीतिविषाग्निपाः विषाग्नयपादिति पाठेविषमेवत्वग्नपादः स्त्रैलोक्याक्रमणाद्धीयस्मात्तितस्तथाविषाग्नेः सकाशात्पातीतिवि
षाग्निपाः सर्वेत्वपिवतीत्येवचामधुस्त्युतानां स्वर्गादित्युरवात्मत्र छानांत्वग्रेश्रुवंपातीतिप्रथमस्तुक्रः श्यापन्नत्रातीत्यर्थः तुषितानांदेवानामाघः ञ

शशः शशांकः शमनः शीतोष्मस्त्युजराविधृक् आधयोव्याधयस्त्वेवमाधिहाव्याधिरेवच ८८ ममयत्नमृगव्याधोव्याधीनामागमोगमः
शिखंडीपुंडरीकाक्षः पुंडरीकवनालयः ८९ दंडधारस्त्वंवकस्त्वमग्रदंडोंतनाशनः विषाग्निपान्सुरश्रेष्ठः सोमपास्त्वंमरुत्पतिः
९० अमृतपास्त्वंजगन्नाथोदेवदेवगणेश्वरः विषाग्निपामृत्युपाश्चक्षीरपाः सोमपास्तथा ९१ मधुस्त्युतानामग्रपास्त्वंत्वमेव
तुषिताघपाः हिरण्यरेताः पुरुषस्त्वमेवत्वंत्वंस्त्रीपुमांस्त्वंचनपुंसकंच वालोयुवास्थविरोजीर्णदंष्ट्रस्त्वंनागेंद्रशक्रस्त्वंविश्वकृत्
विश्वकर्त्ता ९२ त्वंविश्वकृद्विश्वकृतांवरेण्यस्त्वंवरप्रदः विश्ववाहोविश्वरूपस्तेजस्वीविश्वतोमुखः चंद्रादित्यौचक्षुषीतेहृदयंचपिता
महः ९३

स्नात्वंपातीतितुषिताघपाः ९१ हिरण्यरेताः वह्निः विश्वकृत्विश्वकर्त्ता ९२ विश्वंकृंततीतिछिन्नत्तीतिविश्वकृत्विश्वसंहर्त्तेत्यर्थः विश्वकृतांवि
श्वसृजांब्रह्मापतीनांवरेण्यः वरणीयः विश्वंवहतिपालनपोषणेनस्वस्मिन्धारयतीतिविश्ववाहः चंद्रेत्यर्द्धस्फुतिरेव ९३

सरस्वती नदी वा कुत्र गोहूप्यावर्त्तैवैराग्यं निमेषोन्मेषादिकं कर्म पक्ष्मः निमेषोन्मेषकर्मोपयं विना निमेषादिकमपि कमपि कर्त्तुं न कश्चिच्छक्तो नीत्यर्थः तथा च श्रुतिः
नहि त्वदीरं निमिषश्च नेमेशऽइति ततस्तंतः श्रीहरानत्वां विनेत्यर्थः निमिषश्च न मिमेषापि नईशे नईशितवान् श्रवीपांब्रह्मादेनामपि पभूपातापित्वस्मरणाद्वि
नाना सीतात्क्रमतरस्तां नींत नानामत्समारग्यामिति श्रुतिपदार्थः २४ तत्र स्नात्वा प्रभासे विंदइत्यादय एकविंशति श्लोकाः जपहोमादेरेकैकनामगणनापा

महोदधिः सारस्वतीषागवल्समनस्त्वोनिलः अहोरात्रं निमेषोन्मेषकर्मा २४ न ब्रह्मा न भवो विंदः पौराणा ऋषयो न ते महात्म्यं वेदितुं
शक्ता याथातथ्येन ते शिव २५ या मूर्त्तयः सुसूक्ष्मास्ते न मया पांति दर्शनं ताहि मां सततं रक्ष पिता पुत्रमिवौरस २६ रक्ष मां
शरणीयोहं तवानघ नमोस्तु ते भक्तानुकंपी भगवान् भक्तश्चाहं सदा त्वयि २७ यः सहस्राण्यनेकानि पुंसामावृत्य दुर्
दृशः तिष्ठत्येकः समुद्रांते स मे गोप्तास्तु नित्यशः २८

पर्यवसन्नमिति प्रागुक्तं २७ पुंसां सहस्राण्यावृत्य ज्ञानेनाभिभूय एकः ज्ञेयज्ञानज्ञातृभावशून्यः समुद्राणां कामानां अंते नाशे सति तिष्ठति प्रकाश
ते कामं समुद्रमाविशंति मंत्रलिंगात् समुद्रशब्दः कामवचनः यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत
इति कामांते ब्रह्मभावश्रुतेश्च २८

ईदृग्रूपस्तत्तेविहृदस्तुभवंयमाराधयतियोगीनद्राइति विनिद्रत्वेहेतुः जितश्वासाइति।नविद्यतेहि श्वासेनेवाध्ययनापहस्तेनविहृदयाचोनुप्रविस्मरहृदयोमूर्च्छाभवति तांवारयितुंसत्त्वस्थाइति नचाप्यज्ञानमस्तीवेतिमासेोसमाधिः किंतुसत्त्वोत्कर्षस्यप्रसंगेकाष्ठापंजायमानाः हृद्ब्रह्मास्मीतिवाक्यज्ञानाद्वृत्तिः कतकरजोवत्स्वयंचंच विलाप्यस्वयमपिसंस्कारात्मनातिष्ठतीसत्त्वशब्दवाच्यातस्यांतिष्ठंतीतिसत्त्वस्थाः संयतेन्द्रियाइतिज्ञायस्थाशक्तिः ज्योतिः चितितन्मात्रंयुंजानाःयोगिनः ९९ चाशक्तिसोगश्चयमप्यालंबनीयंमूर्त्तिमद्रूपमुपदिशतिजटिलेजटिलेदण्डिनेदण्डिलं नेम्र आचारांक्षिकंतायांत्वातोः कर्ज्जरिक्तस लंबोदरंयच्छरीरंतद्वते क

यंविनिद्राजितश्वासाःसत्त्वस्थाः संयतेन्द्रियाः ज्योतिःपश्यंतियुंजानास्तस्मैयोगात्मनेनमः ९९ जटिलेदण्डिनेनित्यंलंबोदरशरीरिणे क
मंडलुनिषंगायतस्मैब्रह्मात्मनेनमः १०० यस्यकेशेषुजीमूतानद्यः सर्वांगसंधिषु कुक्षौसमुद्राश्चत्वारस्तस्मैतोयात्मनेनमः
१०१ संभक्ष्यसर्वभूतानियुगांतेपर्युपस्थिते यःशेतेजलमध्यस्थस्तंप्रपद्येम्बुशायिनं १०२

मंडलुर्जलपात्रंतदेवनिषंगः बाणाधारोयस्य कमंडलुजलेनैवयक्षराक्षसादीन्नाशयतेइत्यर्थः ब्रह्माचतुर्मुखस्तदात्मने १०० इतरुपर्वोवेदत्रयीधा
रणामाहयस्येति १०१ ध्यानाप्रुपसंहारमाहसंभक्ष्येतिजलमिवजलंनिर्विशेषंब्रह्मतत्रयः मायावीशेतेलीनोभवति कथंसर्वभूतानिस्वाकारा
शादीनिसंभक्ष्यस्वात्मनिप्रविलाप्यस्वयमपिलीयतइत्यर्थः १०

इमं राजयोगमनुष्ठातुमसमर्थस्य हठयोगमाह श्वविश्वंति मुख्यस्य ऊर्ध्वफलके यच्छिद्रं तत्र चर्मांतं लंबिका लंबतो तत्र घंटिकेति लंबिकेति च प्रसिद्धं तत्र यतेत सा रह
चंद्रसूर्य देवतयोरिडापिंगलयोर्नाड्योः संहारकत्वात् राहोर्वदनमित्युच्यते तत्र हि जिह्वाग्रे आक्रम्य धारिते सति वायुनिरोधो भवति सेयं खेचरी नाम मुद्रा हठयोगि
नां प्रसिद्धा सोमं चंद्रसंबंधिनं पीयूषं तयोः पिबते निशि शिरसो रोगान् विनाशयति विभागाभावलक्षणायां समानिशासद्भावे एवमेव हेतुमाह यतः स्वर्भानुः एकरूपः अर्कं चा
तं चंद्रं इडापिंगलेस्मिति तन्मार्गनिरोधेन द्वयोः स्वरूपविभागो गलति यः समाप्त ब्रह्मे सूर्येश्चंतो रसस्तत्र ग्रासयति तरवाकाश निसार्थमयोगे इडायां पिंगलायां चचर

रविशयवदनं राहोर्यः सोमं पिबते निशि ग्रसत्यर्कं च स्वर्भानु
र्हृत्वा मांसो भिरस्तु १०२

तस्वंद्र मात्करे इडायां चंद्रमा तेयः पिंगलायां रविः समस्तमिति शिवयोगे च यतेतपोइमाधारान यत्र स्तानि विशेषतः इमुपक्रम नवमं घंटिकाधारे जिह्वाग्रं तत्र रा
पयेत् सुधाकुलां स्रवते यासांतु सततं मिकाहित्रीयालंबिकाचालनेद्रोह नाम्भांशी स्रोतना सा विपरीत मार्गेण यस्मात्तु मूलांतं गर्भदेशे यत्र वशये सोन्मनतां प्रयाति
ईश्वर शक्तेलंबिकोर्ध्वस्थिते गर्त्ते रसनां विपरीतगां संयोजयेत्प्रयत्नेन सुधाकूपे विचक्षणः मंत्रेणाले खरीडोक्ता भक्ता नामनुरोधतः निरंतरकृताभ्यासो पीयूष
प्रत्यहं पिबेत् तेन विग्रहसिद्धिः स्यान्मृत्युमातंगकेसरीति इयमेव भूमध्ये दृष्टिरित्याह दक्षात्रेयः श्वंतः कपालविवरे जिह्वां प्रविश्य धारयेत् भ्रूमध्ये दृष्टिर

प्येषा मुद्रा भवति खेचरीति १०३

ऽपि विधेऽपि योगे त्रिविधविधानकं मंत्रजातं पठति ये चेति गर्भोऽप्यत्र प्रतनं शिशवः अनुवनुमुक्त सरिष्टमनुपतिताः निर्गतास्तत्र इति शेषः पृथापृथाचनभा
गानुयन्ते उपासते ये देवाः पितरः स्वते भ्यो नमः ते च स्वाहा स्वधा शब्दाभ्यां दत्तेन हव्यकव्येन मुदं हर्षं प्राप्नुवंतु ४ अधिदैवात शांतिं प्रार्थ्याधात्मभूतानां

ये बान्धवा पतिता गर्भाः पृथा भागानुपासते नमस्तेभ्यः स्वधा स्वाहा प्राप्नुवंतु मुदं तु ते ४ येऽगुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनां ५
रक्षंतु ते हि मां नित्यं नित्यं चाप्याययंतु मां ५ येन रोदंति देहस्था देहिनो रोदयंति च हर्षयंति न हृष्यंति नमस्तेभ्योस्तु नित्यशः ६ ये
नदीषु समुद्रेषु पर्वतेषु गुहासु च वृक्षमूलेषु गोष्ठेषु कांतारे गहनेषु च १०७ वनेषु येषु पर्यासु चत्वरेषु नदेषु च हर्म्ये स्वर रथ्यशा
लासु जीर्णेषु पानालयेषु च ८ येषु पंचसु भूतेषु दिशासु विदिशासु च चंद्रार्कयोर्मध्यगता ये च चंद्रार्करश्मिषु ९ रसातलगता ये च
ये च तस्मै परं गताः नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्योस्तु नित्यशः १० येषां न विद्यते संख्या नैव मानं न रूपमेव च अतींद्रियाः परा
ञ नमस्तेभ्योस्तु नित्यशः ११

यथा तेऽहम्भ्यां पेशुपेति अंगुष्ठमात्राः जीवाः ५ आत्मान्तरगमतिपेष्ठति देहिनः जीवानयन्ती रोदयं समोहद्वारेण एते प्राणाः स्मृताः ६ आधिभौतिकेभ्यः सु
तं प्रार्थयते येन इति श्लोकत्रयेण ८ तस्मै तत्परायो परमेश्वर इत्यर्थः परं तत्कष्टं वैराग्यादिकं गताः प्राप्ताः नदिति वा एतस्य महतो भूतस्य नाम भव
तीति श्रुतेः ईश्वरात्मानं ब्रह्माभिधेयत्वमुक्तं १० येषामिति तात्पर्यमेव भंग्यंतरेण ईश्वरस्योक्तं ११

स्वयंते ईश्वरस्यानिमंत्रणे युक्तिमाह सर्वैरिति उपादानतातत्त्वं तथापि लाद्देतएव स्वावनस्य विहितस्य स्वथग्भूतस्येतरस्यैव नवनिमंत्रणं युक्तमित्यर्थः १३ मनुउपादानता
दिनापि रोणमां जानत्कथं निदित्वान सौतासां शंक्याह अथवेति १४ भावगतस्य सृष्टावधिकृतत्वेन एतत्स्वभावगतस्य तत्वेकयाहत्वां त्वजानतदस्यर्थः हृदयं चिन्नं

सर्वभूतकरो यस्मात्सर्वभूतपतिर्हरिः सर्वभूतानां तदात्मा च तेन त्वं न निमंत्रितः १२ त्वमेव हीज्यसे यस्माद्यज्ञैर्विविधदक्षिणैः त्वमे
व कर्त्ता सर्वस्य तेन त्वं न निमंत्रितः १३ अथवा मायया देव सूक्ष्मया तव मोहितः एतस्मात्कारणाद्वापि तेन त्वं न निमंत्रितः १४
प्रसीद मम भद्रं ते भव भावगतस्य मे त्वयि मे हृदयं देव त्वयि बुद्धिर्मनस्त्वयि १५ स्तुतैवं स महादेवं विरराम प्रजापतिः भगवान
पि सुप्रीतः पुनर्दक्षमभाषत १६ परितुष्टोस्मि ते दक्ष स्तवेनानेन सुव्रत बहुनात्र किमुक्तेन मत्समीपे भविष्यसि १७ अश्वमेध
सहस्रस्य वाजपेयशतस्य च प्रजापते मत्प्रसादात्फलभागी भविष्यसि १८ अथैनमब्रवीद्वाक्यं लोकस्याधिपतिर्भवः आश्वा
सनकरं वाक्यं वाक्यविद्वाक्यसंमितं १९ दक्ष दक्ष न कर्त्तव्यो मन्युर्विघ्नमिमं प्रति अहं यज्ञहरस्तुभ्यं दृष्टमेतत्पुरातनं २०

वितर्नीनिस्वपसंक्रमस्त्वत्प्रसादे वर एवमप्राप्स्यसीत्यर्थः १८ वाक्यं वचनं वाक्यं वक्तुमर्हति वाक्यविद्वांवाक्यानि तेषु संमतं युक्तिमत्तमं १९ तुभ्यं तव दृष्टं सर्वक
ल्पेषु तः सर्वेषां कल्पानां समानरूपत्वात् अस्मिन्नपि कल्पे तव देहपक्षहर्त्ताहं ज्ञातः अतो मन्युर्देन्यं न कार्यं अप्रतिकार्यत्वाद्भाविनत्वादित्यर्थः पुरातनं पुराणं २०

मो०
३४३

३४८

१२१ एतत्स्तोत्रं जपांगभूतं अन्तर्हृदये विधिना तुष्टा तुष्टयै देहिकं धर्मं मनुवदन्ति वेदादिति १२२ वेदोक्तं तपादेर्वादिभिः स्तोत्रं तदपेक्षया मया वक्ष्यमाणं अत्र तं श्रेष्ठं पिता
हं अपूर्वमिति वेदषडंगसांख्ययोगतर्कैरनधिगतं किं तर्हि केवलाद्युपनिषत्सु अस्मास्वस्य पदेन प्रकाशितं सर्वतोभद्रं फलकाले साधनकाले च श्रेयोरूपं
सर्वतोमुखं सर्वेषु वर्णाश्रमेषु च अभिमुखं सर्वेषामिहाधिकारोऽस्तीत्यर्थः अयपंको हेतुत्वात् अष्टैः भूयसा कालेन अष्टाभिः सहस्रवत्सरसत्रानैः कर्मि

भूयस्त्वत्ते वदिष्यामि तत्वं गृह्य सुव्रत प्रसन्नवदनो भूत्वा तदिहैकमनाः शृणु २१ वे
दान्ताङ्गाद्युद्धृतं सांख्ययोगाद्युन्नीतं ततः सुतरां विपुलं दुस्तरं देवदानवैः १२२
अपूर्वं सर्वतोभद्रं विश्वतोमुखमव्ययं अष्टादशाहसंयुक्तं गूढमप्राप्तं निवेदितं १२३

र्निर्वाहस्याहैः संयुक्तं दशपंच यमाः पंच नियमाश्च तल एवाहानि यज्ञकर्तव्यो येषां अह्ह: अहःस ऋतुवाचित्वेन वैतान्महानि भवन्ति सोऽस्ति ह्यूभूयसा कालेन
उपपन्नवाय मनियमवद्भिर्लभ्यमित्यर्थः दशाहेति पाठेन दशयागपूर्णैर्लभ्यमित्यर्थः गौडास्तु दशाङ्गेति पठन्ति तन्मते प्राप्तं दशाङ्गैः पंचभिः संयोज्यातमि
त्यादिभिर्मंत्रैः संयुक्तं आग्नेयं भस्मसद्योजातादि पंचमंत्रैः परिगृह्य अंगकमिति जलेनाभिमंत्रितं तत्रादिष्कृते अग्निरिति भस्मेत्याद्यमंत्रैः पाशुपतव्रत
सैव विशेषणं गूढं अन्यासामस्य इति पदमात्रेणास्तुविनं अप्रकाशं अत एव अप्राप्तैः कर्मठैर्निरितं १२३

मो०
३४३

वर्णीति सूत्रसंहितायामस्याश्रमस्य इत्युक्तं आत्माश्रमपदं वर्णोपलक्षणं क्रमवर्णाश्रमधर्मानत्यतिक्रान्तं त्यक्तवर्णाश्रमं कृत्वं तदा नत्यक्तवर्णाश्रमीति तेन पदेन ब्रह्म
विद्विविधभिक्षाब्रह्मचारिगृहस्थवानप्रस्थार्थमुक्तं वर्णाश्रमेनेतिक्रमात्प्रत्युत विचक्षणो मुमुक्षुर्भूयस्त्वाग्रेथेन तत्त्वसरणानुष्ठायस्य वर्णाश्रमाचारेणासिनः
स्तात्मदर्शनात् सवर्णानामप्यात्मवीनतीतत्वात्म निस्थितः तथा न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना आत्मविज्ञानिनामस्तीति तथा चात्मज्ञानाईनेतितस्य
येषां चरणमप्यनुज्ञातं तदिदमभिप्रेत्य क्वचिदुक्तं वर्णादिधर्मविपरीतमुक्तं एतेन तत्स्वैस्तदसंमतमपि निहितं तथा च तत्त्वंसर्वोत्तमानपति स्वधर्माणामपेत दर्शना
दिति च्छांदोग्योपनिषत्कर्ति च कारणात्मग्रामेवक्राणकवास सहेत्यं कुल्माषान्खादं तेविमिश्रं तं होवाच नेतोऽन्ये विद्यंते यच्च ये म इम उपनिहिता इति एतेषां मे देहीति

वर्णाश्रमकृते धर्मे विपरीतं क्वचित्क्रमं गतान्तैरध्यवसितं न मत्याश्रममिदं व्रतं २४

होवाच तानस्मै प्रददौ हंतानुपानमिमुच्छिष्टं वै मे पीतं स्यादिति होवाच न स्विदेतेप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति कामो म उदपानमिति ब्रह्मवि
द्वपत्सइभ्यो उच्छिष्टपक्वमाषभक्षणं तदन्नजलमागस्वत्राणास्य कारुणव विदुषांनिषिद्धाचरणं कामकारनिषेधं च दर्शयति अत एवोक्तं तथा चरेत वै योगीस
तां धर्ममदूषयन् जना यथावमन्येरन् गच्छेयुर्नैव संगतमिति साक्षात्कृतात्मतत्त्वस्य यथाचरणं परिपश्युनां तत्त्वदर्शांचैव क्वो भेदाश्रुतिमभक्षणं इति च क्वचिद्विपरीतम
पि वक्तृतः समर्थमेव विदुषः कर्तृत्वाभिमानाभावेन तत्र विधिनिषेधयोरप्रवृत्तेः गतान्तैः ज्ञातसिद्धान्तैः अध्यवसितं निश्चितं अत्याश्रमं परमहंसपरिव्राज्यं यद्यपि त्या
श्रमलिंगधारणं ब्राह्मणस्यैव तथापि तद्धर्माः शमादयः सर्ववर्णसाधारणाः अत एव गृहस्थादीनामप्यत्याश्रमित्वमुक्तं ब्रह्मचारी गृही वाऽपि सूतसंहितायां श्लोके त
त्र विशिनष्टि इदंव्रतं इदं स्वधर्माणां व्रतं मतमस्मिन्निति इदं व्रतमिति समस्तपदं २४

किंतद्व्रतमित्यतआह मयेति मयावेदस्कन्धादुद्धृत्यादितंश्चकरीकृतं एतद्व्रतंकृपयेतः अथर्वशिरउपनिषदिदव्रतमेतत्पाशुपतं अग्निरितिभस्मजलमितिभस्मस्थलमि
तिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्ममनएतानिचक्षूंषिभस्मानि अग्निरित्यादिनाभस्मगृहीत्वातिमृज्यांगानिसंस्पृशेत् तस्माद्व्रतमेतत्पाशुपतंपशुपाश

मयापाशुपतंदक्षसर्वमुक्तमादितःपुरा तस्यचीर्णस्यतत्सम्यक्फलंभवतिपुष्कलं २५ तद्वास्त्वतेमहाभागसज्यतांमानसोज्वरः
एवमुक्त्वामहादेवः सपत्नीकःसहानुगः अदर्शनमनुप्राप्तोदक्षस्यामिततविक्रमः २६ दक्षप्रोक्तंस्तवमिमंकीर्तयेद्यःशृ
णोतिवा नाशुभंप्राप्नुयात्किंचिद्दीर्घमायुरवाप्नुयात् २७ यथासर्वेषुदेवेषुवरिष्ठोभगवाञ्छिवः तथास्तवोवरिष्ठोयंस्त
वानांब्रह्मसम्मितः २८ यशोराज्यसुखैश्वर्यकामार्थधनकांक्षिभिः श्रोतव्योभक्तिमास्थायविद्याकामैश्चयत्नतः २९
व्याधितोदुःखितोदीनश्चोरग्रस्तोभयार्दितः राजकार्याभियुक्तोवामुच्यतेमहतोभयात् ३० अनेनैवतुदेहेनगणानांस
मतांव्रजेत् तेजसायशसाचैवयुक्तोभवतिनिर्मलः ३१

विमोक्षोयेन पशवोजीवाः पाशः अविद्यायद्यपिसंन्यासःभस्मोद्धूलनंचद्वयमपिविद्यार्थमुक्तंतथापिसन्यासस्यतीव्रतमवैराग्याधिकारिकत्वेन ज्ञात्वा
नभस्मधारणस्यैवमुख्यंविद्यांगत्वंध्येयं २७ ब्रह्मसम्मितःवेदेनतुलितः अस्मिन्स्तवेऽर्द्धंवेदभागोर्द्धंपौराणांशइति २८ विद्याकामैःब्रह्मसाक्षा
त्कारार्थिभिः २९

नामजपे विशेषविधिमाह देवस्येति गुहस्य कार्त्तिकेयस्य अत्रायं प्रयोगः शुचिः कृतनित्यक्रियः कालाग्निरुद्रोपनिषदुक्तप्रकारेण भस्म धृत्वा रुद्राक्षां
श्च धृत्वा मुक्तसंगः पूतसुधादिस्वं पूर्वोक्ता षडशास्त्रमंत्रेणांघ्रिपिस्वतुर्भिर्न्यासोन्निमिश्ववर्तोः पंचांगद्वयं कृत्वा पंचाक्षरेणोक्तविधिना वाम्मासध्यानपूजा

न रक्षसाः पिशाचा वा न भूतान विनायकाः विघ्नं कुर्युर्गृहे तत्र यत्रायं पठ्यते स्तवः ३२ शृणुयाद्वै तथा नारी तद्भक्ता ब्रह्मचारिणी पितृपक्षे मातृपक्षे पूज्या भवति देववत् ३३ शृणुयाद्यः स्तवं कृत्स्नं कीर्तयेद्वा समाहितः तस्य सर्वाणि कर्माणि सिद्धिं गच्छंत्यभीक्ष्णशः ३४ मनसा चिंतितं यच्च यच्च वाचानुकीर्तितं सर्वं संपद्यते तस्य स्तवस्यास्यानुकीर्तनात् ३५ देवस्य च गुहस्यापि देव्या नंदीश्वरस्य च बलिं सुविहितं कृत्वा दमेन नियमेन च ३६ ततस्तु युक्तो गृह्णीयान्नामान्याशु यथा क्रमं ईप्सितांल्लभतेऽत्यर्थान्भोगान्कामांश्च मानवः ३७ मृतश्च स्वर्गमाप्नोति तिर्यक्षु च न जायते इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ३८ शांतौ मोक्षधर्मे पुरुषप्रोक्तः शिवसहस्रनामस्तवः समाप्तः

दिकं कृत्वा गुहादिभ्यो गणदेवताभ्यः पूजापूर्वकं बलिं दत्वा यथाशक्ति स्वार्थानुसंधानपूर्वकं स्तवमावर्त्यान्ते पूजां कृत्वा हृदि देवं विसर्जयेदिति ३७ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ भारतभावदीपे शांतौ मोक्षधर्मे पुरुषप्रोक्तशिव सहस्रनामस्तवार्थप्रकाशो नाम नवाधिकशततमः

एवंतत्त्वपरिगदिनाविशुद्धचेतसोयतन्तेयंतत्स्पृशति अध्यात्ममितिपुरुषस्यात्मनिस्वरूपेवर्त्ततइत्यध्यात्मंस्वरूपादि स्वविवेकार्थशास्त्रंचअध्यात्मंतत
किंकुतश्चास्यपतइतिप्रश्नः १ सर्वज्ञानमिति सर्वमसकृदुक्तमप्यध्यात्ममिहसंक्षिप्यवक्तिउपसंहारार्थंतेनउपक्रमोपसंहारयोरेकरूपेणत्वभा
सेनचशास्त्रस्याध्यात्मपरत्वेनिश्चितेमध्येयद्गणोत्रमधर्मजयादिकमुक्तंतत्करणतदंगभावेनज्ञेयमितिसूच्यते नत्वयदध्यात्ममितस्मात्तत्रेष्ट

युधिष्ठिरउवाच अध्यात्मंनामयदिदंपुरुषस्येहचिंत्यते यदध्यात्मंयतश्चैवतन्मेब्रूहिपितामह १ भीष्मउवाच सर्वज्ञा
नंपरंबुद्धायन्मांत्वमनुपृच्छसि तद्व्याख्यास्यामितेतात तस्यव्याख्यामिमांशृणु २ पृथिवीवायुराकाशमापोज्योतिश्च
पंचमम् महाभूतानिभूतानांसर्वेषांप्रभवाप्ययौ ३ सतेषांगुणसंघातः शरीरंभरतर्षभ सततंहिप्रलीयंतेगुणा
स्तेप्रभवंतिच ४ ततःसृष्टानिभूतानितानियांतिपुनःपुनः महाभूतानिभूतेभ्यऊर्मयःसागरेयथा ५

यिदीत्यादि यत्तस्वेनस्वगतंपुरुषेनिष्ठतोबुद्धिरित्यादि अनयोःपुंबुद्ध्योर्विवेकार्थशास्त्रंअध्यात्मं सर्वज्ञापतेः तेनेतिसर्वज्ञानंतदेवपरंतत्त्वंबु
द्धंबुद्धाबुद्धिमत्त्वयाव्याख्याविस्पष्टंकथयतं २ भूतानांजरायुजादीनां ३ शरीरंस्थूलंसूक्ष्मंचतेषांभूतानांगुणसंघातःकार्यसमूहःगुणाःबुद्ध्यादयः
भौतिकाःपरमकारणेआत्मनिप्रलीयंते ४ ततःआत्मनःसकाशात्भूतानिनिर्जीवाःयांतिलीयंते यथासौषुप्तादीत्मनोःहमर्थस्यजीवस्य
तदुद्भवलयौचैवचलयः एवमहमर्थेषुभूतेषुमहाभूतानामपिलयोदयौभवतइत्यर्थः ५

भूतानि गोदीनि भूतानां जीवादीनां च ह्रसीयांसि क्रमेणांशांशानीवानायासेनैव दृष्टिमात्रेणाविर्भावयितुं तिरोभावयितुं च शक्तानि ६ शरीरस भूतकार्यं तमुक्तं
न च तत्तद्भूतांशानुविधिनक्रिया आकाशादिनि बोधः शब्दः यः शरीरे शुषिरं संघातः कठिनांशः रसो लोहितादिद्रवांशः रूपं गौरादिरूपमाद्य एतन्मयं भूतमयं ७

प्रसार्येवेहाङ्गानि कूर्मः संहरते यथा तद्वद्भूतानि भूतानामल्पीयांसि स्वबोधतः ६ आकाशात्तु यो बोधः संघातस्तु मही
गुणाः वायोः प्राणो रसस्त्वम्भो रूपं तेजस उच्यते ७ एवमेतन्मयमेवैतत्सर्वं स्थावरजंगमं प्रलये च तमभ्येति तस्मादुद्दिश्यते पु
नः ८ महाभूतानि पंचैव सर्वभूतेषु भूतकृत् विषयान्कल्पयामास यस्मिन्यदनुपश्यति ९ शब्दः श्रोत्रं तथा खानि त्रय
माकाशयोनिजं रसः स्नेहश्च जिह्वा च आपामेते गुणाः स्मृताः १० रूपं चक्षुर्विपाकश्च त्रिविधं ज्योतिरुच्यते घ्रेयं घ्राणं श
रीरं च एते भूमिगुणाः स्मृताः ११ प्राणस्पर्शश्च चेष्टा च वायोरेते गुणाः स्मृताः इति सर्वगुणा एतन्न्याख्याताः पांचभौतिकाः

४२

तस्मादुद्दिश्यते तस्मात् भूतकर्तुः ब्रह्मणः सकाशात् उद्दिश्यते जायत इति शब्दमात्रेणोच्यते न तु वस्तुतः न च लीयते उत्पद्यते वा रज्जामुरग इव ८ भूतकृत्
अहंकारः भूतेषु देहेषु भूतानि खादीनि यथा कल्पयामास यस्मिंश्च भूते देहांतः स्थे यत्कार्यं अनुपश्यति तत्सृष्टवानिति शेषः ९ तदेवाह त्रिभिः शब्देति १०

मो०
३४६
346

सत्वमिति एतेषु शब्दादिषु पंचदशसु सात्विकत्वादिकं कालोतीतत्वादिधर्मः आगन्तुकः तावत्तु गुणात्मा विशेषमाह योज्ञो वा कर्म बुद्धिः स्वविषयस्वरूपनिश्चयः यद्वा कर्मव्यापारः शब्दस्य त्वर्थप्रकाशनं श्रोत्रस्य शब्दग्रहणायनमित्यादि बुद्धिः प्रतीतिर्गोचरस्य सदानित्यमेवेत्यवधारणं मन इदमित्थं नवेति संशयः कर्मसहिता बुद्धिः पंचमी मनः षष्ठं स्वभावी १३ अस्मिन्पादतलादिमूर्द्धान्ते शरीरे तस्या बुद्धेर्वशब्दादिमनोन्तेकं विशतितत्वरूपेणाह यदूर्ध्वमिति १४

सत्वं रजस्तमः कालः कर्म बुद्धिः स्वभावतः मनः षष्ठानि चैतेषु ईश्वरः समकल्पयत् १३ यदूर्ध्वं पादतलयोरवाङ्मूर्ध्नश्च पश्यति एतस्मिन्नेव कृत्स्नं च पंचवर्णे तु बुद्धिरन्तरे १४ इंद्रियाणि नरः पंच षष्ठं तु मन उच्यते सप्तमीं बुद्धिमेवाहुः क्षेत्रज्ञः पुनरष्टमः १५ इंद्रियाणि च कर्ता च विचेतव्यानि भागशः तमः सत्वं रजश्चैव तेपि भावास्तदाश्रयाः १६ चक्षुरालोचनायैव संशयं कुरुते मनः बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते १७ तमः सत्वं रजश्चैव कालः कर्म स्वभावतः गुणैर्नेनीयते बुद्धिर्बुद्धिरेवेंद्रियाणि च १८

बुद्धेरेव सत्वरूपत्वमाह इंद्रियाणीति पुनः शब्दः दृश्यान्तमकारत्वमस्य दृशेः स्वमतवेत्तस्वरूपत्वानन्तार्थः १५ भागशः कार्यविभागेन तेपि भावाः सात्विकादयोर्थाः तदाश्रयाः इंद्रियकर्त्राश्रयाः नतत्त्ववात्मिनाइत्यर्थः १६ विभागमेवाह चक्षुरिति चक्षुः इंद्रियमात्रं साक्षी इंद्रियाद्यव्यवधानेन द्रष्टा चिन्मात्रः उदासीनः १७ गुणैः तमआदिपंचभिः नेनीयते पुनः पुनरतिशयेन वा विषयान्प्रति नीयते बुद्धिरेवेंद्रियाणि कारणतमआदिपंच बुद्धिरेव १८

राम०
३४६

अत्र हेतुः बुद्ध्याभावे कुतो गुणाः इति एतदेवआचष्टे येनेतिद्वाभ्यां एतानि मनः षष्ठानि बुद्ध्या कल्पितानीति शेषः अवयवदोषेः अवयवी वदृ द्वियेषु दुष्टेषु बुद्धिर्दुष्य
ति २१ पुरुषस्याश्रिताति तिष्ठतो आध्यात्मिकसंबंधेन वर्त्तमानानां विषुसात्विकादिषु सुखदुःखमोहात्मके षु भावेषु विषयितया बुद्धिर्वर्त्तते २२ एवं हृदृ

मनःषष्ठानि सर्वाणि बुद्ध्यभावे कुतो गुणाः येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते जिघ्रतीभवति घ्राणं रसतो रसना स्मृता
१९ स्पर्शनं स्पर्शतीत्याहुः बुद्धिर्विक्रियते सकृत् यदा प्रार्थयते किंचित्तदा भवति सा मनः २० अधिष्ठानानि बुद्ध्या हि पृथ
गेतानि पंचधा इंद्रियाणीति तान्याहुस्तेषु दुष्टेषु दुष्यति २१ पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्त्तते कदाचिल्लभते प्रीतिं क
दाचिदपि शोचति २२ न सुखेन न दुःखेन कदाचिदपि वर्त्तते सेयं भावात्मिका भावांस्त्रीनेतान्परिवर्त्तते २३ सरितां सागरो
भर्त्ता यथा वेलामिवोर्मिमान् इति भावगता बुद्धिर्भावे मनसि वर्त्तते २४ प्रवर्त्तमानं तु रजस्तद्भावेनानुवर्त्तते प्रहर्षः प्रीतिरान
दः सुखं संशांतचित्तता २५ कथंचिदुपपद्यंते पुरुषे सात्विका गुणाः परिदाहस्तथा शोकः संतापोऽपूर्तिरक्षमा २६ लिंगानि
रजसस्तानि दृश्यंते हेत्वहेतुभिः अविद्यारागमोहौ च प्रमादः स्तब्धता भयं २७ असमृद्धिस्तथा दैन्यं प्रमादः स्वप्नतंद्रिता
कथंचिदुपवर्त्तंते विविधास्तामसा गुणाः २८
एषां पुंबुद्धौ रजस्तमसोरपि आध्यात्मिकसंबंधात् ऐक्यं मत्वा नात्ताः किंतु पुमांसमेव सुखादि
मंतमाहुः न सुखेनेति सार्द्धाभ्यां श्लोकाः २७ २८

श्रीरा०

स्वंस्वंवैषांभावानांधीमान्नन्तमुक्तामतत्त्वेचन्नुयोर्भेदंव्याचष्टेमतेतेसाहिना २४ संतत्त्वसंसर्गकृतनवानन्त्वात्मनोगुणानांचगुणागुणिभावेनसंसर्गोस्ति

मो०
३४७

३५१

नत्वयस्त्रीतिसंयुक्तंकायेमनसिवाभवेत् वर्त्ततेसात्तिकोभावस्तमुपेक्षेतनन्नथा २८ अथयत्दुःखसंयुक्तमप्रीतिकरमात्मनः यद्वन्नंरजइत्येवतदसंरम्भचिंतयेत् ३० अथयन्मोहसंयुक्तंकायेमनसिवाभवेत् अप्रतर्क्यमविज्ञेयंतमइत्युपधारयेत् ३१ इतिबुद्धिगतीःसर्वाव्याख्यातायावतीरिह एतद्बुद्ध्वाभवेद्बुद्धःकिमन्यद्बुद्धलक्षणं ३२ सत्वक्षेत्रज्ञयोरेतदन्तरंविद्धिसूक्ष्मयोः सृजतेतुगुणानेकएकोनसृजतेगुणान् ३३ पृथग्भूतौप्रकृत्यातुसंप्रयुक्तौचसर्वदा यथामत्स्योद्विरम्भःसंप्रयुक्तौभवेतथा ३४ नगुणाविदुरात्मानंसगुणान्वेदसर्वतः परिद्रष्टागुणानांतुसंसृष्टामन्यतेयथा ३५

निमृष्टोयथामन्यतेतथापुंगुणानांपरिद्रष्टातात्त्वात्मेनात्मनिगुणानपश्यतोस्यर्थः ३५

श्री०
३४७

ननु किमाश्रिता तत्र हि गुणाः प्रवर्तन्त इत्यत आह आश्रय इति बुद्धिसत्त्वस्याश्रय उपादानं नास्ति उपादानत्वेन कूटस्थज्ञानस्य सत्त्वस्य तुच्छत्वात् गुणानां सत्त्वादीनां सर्गेण कार्येण महदादिना लिंगेन अस्य मे कारणभूताः गुणाः सृजन्तीत्यनुमीयते कदाचिदपि गुणान् कश्चिदपि न वेद यथा रज्जुरगोपादानमज्ञानं कार्यद्वारैवानुमीयते तेन तत्परोक्षीक्रियते तद्वत् ननु गुणानां तुच्छत्वे तत्कार्यं न दृश्येत खपुष्पवदित्याशंक्याह चेतना इति सत्त्वमस्येति असद्गुणसर्गः सत्त्वं चेत

आश्रयो नास्ति सत्त्वस्य गुणसर्गेण चेतना । सत्त्वमस्य सृजन्त्यन्ये गुणान्वै न कदाचन ३६ सृजते हि गुणान्सत्त्वं क्षेत्रज्ञः परिपश्यति । संप्रयोगस्तयोरेष सत्त्वक्षेत्रज्ञयोर्ध्रुवः ३७ इंद्रियैस्तु प्रदीपार्थं क्रियते बुद्धिरंतरा । निश्चक्षुर्भिरजानद्भिरिंद्रियाणि प्रदीपवत् ३८ एवं स्वभावमेवैनं दुःखाविहतत्वरः । अशोचन्नप्रहृष्यंश्च स्वस्थो विगतमत्सरः ३९ स्वभावसिद्धमेवैतद्यदिमान्सृजते गुणान् । ऊर्णनाभिर्यथा सूत्रं विज्ञेयास्तंतुवद्गुणाः ४०

नाधिष्ठानसत्त्वे बाध्यस्य सत्त्वे समर्थः तथा च नास्त्येतत्तुच्छत्वं गुणानां अनिर्वचनीयस्य तद्रूपस्याभ्युपगमात् अतो न कोऽपि दोषः समर्थः ३६ क्षेत्रज्ञः साक्षी ३७ प्रदीपार्थं प्रदीपप्रयोजनं आवरणभंगं निश्चक्षुर्भिः अचेतनैः अत एव अजानद्भिः इंद्रियाणि प्रदीपवत्सहकारीणि बुद्धिरिंद्रियवत्कारणं चिदाभासात्तु प्रमाता तृतीयः एतेन बुद्ध्यतिरिक्तश्चेतनः सिद्ध इति भावः ३८ दीपवत्स्वभावोऽभासान्रज्जुरगमिव इंद्रियबुद्ध्यादीन्विंति दीपमिव भासयतीत्यादहृत्वमिति ३९ ऊर्णनाभिर्दृष्टांतोऽयं ऊर्णनाभेः सर्गे परिणामत्वात् नास्मिन्क्षेपः ४०

358

यत्कतत्वमाह श्वभ्रलाइति यथा श्वभ्रलोचपेविहीनेनकपालाद्यात्मनाहृष्टेणवर्त्ततेनेत्रंगुणाः विवर्त्ततेयतः घटकपालवर्त्तिहितानांगुणानांप्रवृत्तिः सूक्ष्मा
तयाब्रह्मण्यनोपलभ्यन्तेतेनः रज्जुरगवद्बुद्धिघटतएवेत्यर्थः यत्तु निरहंतिमसंतीतितोवोब्रह्मसन्तुपलंभोदोषोदुःपरिहरइतिभावः ४१ हृदयग्रंथिंछिद्यितोरात्मनतो

श्वभ्रलाननिवर्त्तंतेवर्त्तंतेनोपलभ्यते एवमेकेवसंतीतिनिर्वृतिरितिवापरे ४१ इतीरं हृदयग्रंथिंबुद्धिचिंतामयंदृढंविनु-
च्यमुक्तमासीतविशोकश्छिन्नसंशयः ४२ तामेतुपश्यतांश्वभ्रींमोहश्रुणींनदींनराः यथागाधमविद्वांसोबुद्धियो-
गमयंतथा ४३ नैवतामंतिविद्वांसःस्वबंतःपारमंभसः अध्यात्मविदुषांधीराज्ञानंतुपरमंप्लवः ४४ नभवतिवि-
दुषांमहद्भयंयदविदुषांसुमहद्भयंभवेत् नहिगतिरधिकास्तिकस्यचित्सकृदुपदर्शयतीहतुल्यतां ४५

४१
स्वात्मानंबुद्धिस्वचिंताचतद्रूमयपर्वाबुद्धिचिंतामयं ४३ श्वभ्रींमहतींइमांसंसाररूपांनदीमनुप्रवृत्ताः पतिताः गाधंतलंअविद्वांसः अजानंतः एवंचयं
जीवःबुद्धियोगमनुप्रयुक्तःनाप्नेत् ४४ यथाविद्वदविदुषोरन्तरंएवंविदुषामिथः अंतरंनास्तीत्याहनहीति तत्रहेतुः सकृदितिसकृद्भिमानोहिपत्रब्रह्मलोकदर्शित
श्रुतिः यत्रपाहतिकृतंतारतम्यंमोक्षेनास्तीतिदर्शयतीत्यर्थः ४५

एवंविदः फलमाह यदिति यत्त्वयं ज्ञानी विकुर्वन्दोषं कर्म करोति यच्चानेन पुराज्ञानात्पूर्वकाले कृतं तत्सर्वमेकतः एकेन ज्ञानेनैव दूषयति नाशयति तद्यथा पुष्करपला
शस्यापो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यते तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुतिभ्यां तत्त्वविदः क्रियमाणकर्मा
श्लेषपूर्वकर्मदाहयोरवगमात् दृष्टमपि फलमाह यच्चाज्ञानदशायां त्वप्रियमनिष्टं प्राकृतं दूषयति यच्च गुणो दोषात् तपं करोति तत्तदुभयं त्वप्रियपदस्य

यत्करोति वद्दोषमेकतस्तत्त्वदूषयति यत्पुराकृतं नाप्रियं तदुभयं करोत्यसौ यच्च दूषयति यत्करोति च ४६
शांतौ मोक्षधर्मेषु पांचभौतिकः युधिष्ठिर उवाच शोकाद्दुःखाच्च मृत्योश्च त्रसंते प्राणिनः सदा उभयं नो यथा
न स्यात्तन्मे ब्रूहि पितामह १ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं नारदस्य च संवादं समं
गस्य च भारत २

णकरणात्मकं न करोति द्वैतदर्शनाभावात् स्वपमदुष्टः परदोषमपि न पश्यतीत्यर्थः ४६ इति नैलकंठीये भारतभावदीपे शांतौ मोक्षधर्मेषु पांचभौ
तिकः शतोपरिदशमोऽध्यायः विहत्त्वश्रमाणि वक्तुमारभते शुदुः खेति यामेव विहत्त्वश्रमाणि विघातसाधनानीत्यभिप्रेत्य उभयं नोऽस्माकं कथं केन
प्रकारेण स्यादिति प्रश्नः १ समंगं विद्वांसमगदाहृतमस्तोत्तरमाह अत्रापीति २

भावो न भावो विद्यते ३

स्वमेशिरस्मानमंतिलत्वंतु उग्रसेनवसुदेवप्रमुखेष्वमेवासंतंतविनीतोसीत्यर्थः वाकुम्यांतरसीवभवनदीं अनंतंनसंकरोषिपिनिरपेक्षोसीत्यर्थः एतत्सुखलिंगंत्वानतस्मानां ३ वालव
तृराणहेपमूलः ४ भवतोमिभयंवर्त्तमानंभव्यमेपेतिकर्त्तरिक्तः भूतभविष्यतोस्तत्वेअविद्यमानत्वं आशावंतेवयन्त्वामिवर्त्तमानेपितन्नयेतिनामेनवर्त्तमान
स्मापितत्वंनदेवयथोक्तंभगवत्तानामसतोविद्यतेसनइति नहीयंज्ञालिकम्परिशितधनवृद्धिमूसाभ्यांविहन्नमहतीत्यर्थः ५ अमुपेमापिजगम्मममतत्वं आरं

नारदउवाच उग्रसेनवसुदेवानमसेवाकुम्यांतरसीवच संप्रहृष्टमनानित्यंविशोकइवलक्ष्यसे ३ उद्वेगंनहितेकिंचित्तुसूक्ष्मम
पिलक्षये नित्यतः इवलस्योबालवच्चविचेष्टसे ४ समंगउवाच भूतंभव्यंभविष्यंचसर्वमेतन्नमानद नेषांतत्वानिजा
नामितंतोनविमनाह्यहं ५ उपक्रमानहंवेदपुनरेवफलोदयान् लोकेफलानिचित्राणितत्तोनविमनाह्यहं ६ अगा
धाश्चाशतिष्ठाश्चगतिमंतश्चनारद अंधाजडाश्चजीवंतिपश्यास्मानपिजीवतः ७ विहितेनैवजीवंतिअरोगांगादिवौ
कसः बलवंतोबलाश्चैवतस्मात्स्मान्सभाजय ८

भानफलानिफलवैचित्र्यंचइः स्वहेतुरेवेतिज्ञानन्नपेनारंभादिरप्यहंनमुह्यामीत्याह उपक्रमानिति ६ नत्वानारंभेकथंजीवितव्यमित्याशंक्याह अगाधा
श्चेति अगाधाः निर्धयाः मूर्खाः गाधप्रतिष्ठालिश्मयोग्रंथेचेतिस्मृतेः अप्रतिष्ठाः धनरहिताः शून्याः गतिमंतः ग्रंथधनादिमंतः जडाअन्नतादयः
अस्मानिनिरारंभानपिजीवंतीत्यर्थः ७ कुतस्तेजीवंतीत्यत आह विहितेनैवेति प्राक्कर्मणैवजीवंतिनत्वारंभादिरितिसभाजयपूजय ८

यद्यावयंनशोचेमशोकमूलस्याज्ञानस्याभावात्तदानः अस्माकंधर्मेणआत्मनिग्राह्यरूपाद्धर्माल्लोपजीविनायज्ञादिनावाकर्मणालोकेकिंकेनवाकिंप्र
योजनंनकिमपीत्यर्थः एतद्बु[illegible]वैतद्विद्वांसआकूतेषयः कावयेयाः किमर्थावयमध्येष्यामहेकिमर्थावयंयक्ष्यामहइतिश्रुतेस्तत्त्वविदोनधर्माद्यनुतिष्ठंतीत्य
र्थः शोकाभावेहेतुः कृतांतेतिकृतांतवश्यानिअवंतवंति यतयस्मात्तस्मात्नधर्षयंतिअस्मानितिशेषः १० यस्माद्येमोहादिराहित्यंप्रज्ञायाः मूलंद्वं

सद्धिरणोपिजीवंतिजीवंतिशशिनस्तथा शोकेनचामेजीवंतिपश्यास्मानपिजीवतः ९ यद्यज्ञानशोचेमहिकिंनुनः
स्याद्धर्मेणवानाद्रकर्मणावा कृतांतवश्यानियदासुखानिदुःखानिवायद्यविधर्षयंति १० यस्मैप्रज्ञाः कथयं
तेमनुष्याःप्रज्ञामूलोहीन्द्रियाणांप्रसादः मुह्यंतिशोचंतिततोयेन्द्रियाणिप्रज्ञालाभोनास्तिमूढेंद्रियस्य ११ मूढस्यदर्पः
सपुनर्मोहएवमूढस्यनायंनपरोस्तिलोकः नह्येवदुःखानिसदाभवंतिसुखस्यवानित्यशोलाभएव १२

इंद्रियाणिप्रमुह्यंतिशोचंतीतियस्मैप्रज्ञाः कथयंतेमनुप्राज्ञइत्यध्याहृत्ययोज्यंहृश्योमोहादिर्हृश्यस्वबुद्ध्यानेकभेदभिन्नस्याहंकारस्यैवधर्मोनत्वहृश्य
स्यदृगात्मनइत्यर्थः ११ दर्पः अयंबोस्मीत्यादिरूपः सः मोहःस्वेत्काहानिरतआह मूढस्येतिनहीतिनस्मात्सुखादेरागमापायित्वात्सुख्यहमिति
दर्पः दुःख्यहमितिदैन्यंचनकार्यमितिभावः १२

भवात्मकं संसारदुःखं भोगेति पाठे दृश्यात्मकं संहारं माहृश इत्यन्वयः आत्मज्ञः देहाभिमानशून्यः जातु कस्यचित् न कुर्यात् तन्ही कुर्यात् तथा च श्रुतिः आत्मानं चेद्वि-
जानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति भोगाद्यचिंतनमेव विद्वत्त्वे हेतुरित्याह दृष्टानीति १३ अचिंतायामपि हेतु-

भावात्मकं तं परिवर्जमानं न माहृशः संहरं जातु कुर्यात् दृष्टानुभोगान्नानुरुध्येत् सुखं वा न चिंतयेत् दुःखमनागतं वा १३
समाहितो न स्पृहयेत् परेषां नानागतं चाभिनंदेत लाभं न चापि हृष्येद्विपुलेर्थलाभे तथार्थनाशे च न वै विषीदेत् १४ न बां-
धवा न च वित्तं न कौलं न च श्रुतं न च मंत्रा न वीर्यं दुःखात्त्रातुं सर्व एवोत्सहंते परत्र शीलेन तु यांति शांतिं १५ नास्ति बुद्धि-
रयुक्तस्य नायोगाद्धि दृते सुखं धृतिश्च दुःखत्यागश्चेत्युभयं तु सुखं नृप १६ प्रियं हि हर्षजननं हर्ष उत्सेकवर्धनं उत्से-
को नरकायैव तस्मात्तांस्त्यजाम्यहं १७

समाहितो योगारूढः अचिंतनादेव न स्पृहाभिमानं भवतीत्यर्थः परेषां सुखादीन् नेच्छेत् १४ समाहितत्वं च शमदमादिरूपेण शीलेनैव भवति न बां-
धवादिभिरित्याह नेति शांतिं निर्विकल्पितां १५ योगं विना ज्ञानं सुखं च नास्तीत्याह नास्तीति योगसाधनमाह धृतीति धृतिर्मनः प्राणेंद्रि-
यक्रियाणां स्तंभसामर्थ्यं १६ योगे च समर्थं लौकिकं प्रियं निंदति प्रियमिति उत्सेको दर्पः तान् प्रियप्रहर्षोत्सेकान् १७

श्वासेति छेदः ब्रह्मदेहस्य चाविचेष्टनादिति संबंधः यावद्देहपातमित्यर्थः विमुक्तश्च विमुच्यते भूयश्चांते विश्वमायानिवृत्तिरिति श्रुतिभ्यां द्विर्मुक्तिनाम्या
निवृत्तिरिति श्रुतिभ्यां द्विर्मुक्तिमायानिवृत्तेः इति पादत्रात् नतत्वविरा[illegible] मिंद्रजालतत्वविरामिवच्चावरणांशनिवृत्तावपि विक्षेपांशानु
वृत्तिरस्तीति गम्यते साच प्रतिविंबभ्रमारोहदृष्टांतेन जीवन्मुक्तिसिद्धिः रागद्वेषराहित्यसिद्धिश्च स्वप्नमयाज्ञानसमकालमेव देहपातापत्तिः यस्तु देहपातावधि

एतांल्लोकमयोत्सेकान्मोहनान्मुकलदुःखयोः पश्यामि स्मासि बहुलोके देहस्यास्य विचेष्टनात् १८ अर्थकामौ परित्यज्य विशोको
विगतज्वरः तृष्णामोहौ तु संत्यज्य चरामि पृथिवीमिमां १९ न च मृत्योर्न चाधर्मान्न लोभान्न कुतश्चन पीतामृतस्येवात्यंत
मिह चामुत्र वा भयं २० एतद्ब्रह्मन्विजानामि महत्कृत्वा तपोऽव्ययं तेन नारद संप्राप्तो न मां शोकः प्रबाधते २१ शांतौ मोक्ष
धर्मेषु समंगनारदसंवादः

साक्षिवन्न पश्यति विषयेषु संगं च करोति तत्र स्वजातमपि ज्ञानं न स्पृशतीति भावः यथोक्तं भगवता इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते तदस्य हरति प्रज्ञां वायु
र्नावमिवांभसीति बुद्धिनाशात्प्रणश्यतीति च १९ इह चामुत्र वा न भयमित्यन्वयः २० महत्ब्रह्म विजानामि अव्ययं तपः योगं कृत्वा संप्राप्तो पि
न प्रबाधते शीतोस्मादितः शोको देहस्याभावादेव स्पृशतीति न च मृत्योर्विबुद्धेषु तत्स्वातीवप्रतापोऽस्तीति भावः २२ इति नैलकंठीये भारतभाव
दीपे शांतौ मोक्षधर्मेषु समंगनारदसंवादे एकादशाधिकशततमः

एवमुपदेशप्रधानां व्यवस्थितिं श्रुत्वा तामेवोपपत्तिप्राधान्येन जिज्ञासमानः पृच्छति अतत्त्वज्ञस्य शास्त्राणामिति तत्र शास्त्रं तार्किकपाशुपतपांचरात्र
सांख्यपातंजलादीनि उपपत्तिप्रधानमुपदेशप्रधानं च तत्र वैदिके शास्त्रे पूर्वोत्तरमीमांसे उपदेशप्रधाने वैशेषिकतार्किकपाशुपतपांचरात्रसांख्य
पातंजलादीनि उपपत्तिप्रधानानि अवैदिके पि लोकायतं शास्त्रमुपपत्तिप्रधानं आर्हतसौगते शाक्यबुद्धमुनिप्रणीतागमप्रधाने तत्रापि सौगतेषु चत्वा
रो भेदाः सौत्रांतिकवैभाषिकयोगाचारमाध्यमिकाः सर्वाण्येतानि विभिन्नप्रस्थानानि मोक्षार्थं च प्रवृत्तानि मोक्षस्तु नामः पंथा विद्यते ऽयनायेति ए

युधिष्ठिर उवाच अतत्त्वज्ञस्य शास्त्राणां सततं संशयात्मनः
अकृतव्यवसायस्य श्रेयो ब्रूहि पितामह १

मा१

कमार्गः श्रूयते सर्वेषु च शास्त्रेषु स्वमत एव मोक्षोऽस्ति न परमत इति सप्रत्ययं प्रतिपाद्यते विनिगमनाविरहाच्च तेषामन्यतमस्य स्वैरमध्यवसातुमशक्यं ना
प्येषामैकमत्यं वक्तुं शक्यं विभिन्नप्रस्थानतायाः स्पष्टत्वात् एकशास्त्रोपपन्नेस्व अतः शास्त्राणां तत्त्वानवधारणात्संशयः किमुपादेयमिति ननु मि
द्यते हृदयग्रंथिश्छिद्यंते सर्वसंशया इति श्रुतेः आत्मानुभव एव संशयोच्छेदं करिष्यति किमुत सततसंशं काह अकृतव्यवसायस्येति व्यवसायः आत्म
दर्शनार्थं शमदमाद्यनुष्ठानं तदकुर्वतः किं हितं स्यात्तद्ब्रूहि २

मा२

यद्यपि सर्वं ज्ञानं धर्मिण्येवाभ्रांतं प्रकारे तु विपर्यय इति न्यायेनाशरीरतालक्षणो मोक्षे तत्साधने शमादौ सर्वेषां शास्त्राणामैकमत्यमस्ति तथा हि स्थूलदेहात्मवादिनो माध्यमिक
लौकायतिकाः संघातस्य तुच्छत्वं तस्यैव कर्तृत्वादिधर्माः अपतत्वं च पश्यंति न तु मेव सदात्मानमपलपतः एवं तार्किकादयोपि त्वहमर्थस्यैव कर्तृत्वादिकं पश्यंति न तु विदात्मानम
पलपंति अतो न तेषामात्मापलापे तात्पर्यं किं तु संघातादेस्तुच्छत्वादौ तथा सांख्याश्चापि आत्मनोः संगतामेव पश्यंति न तु प्रधानादिकं कल्पयंति न तु तेषामात्मनः क
र्तृत्वे प्रधानादिसत्वे च आत्मभेदे वा तात्पर्यमस्ति एवं तत्रांतरतात्पर्यमप्यूह्यं सर्वेषामपि देहनाशो दुःखनाशो वा निर्विषयज्ञानधारा वाच्चितितन्मात्रेणावस्थानं वा मोक्ष

श्रीभीष्म उवाच गुरुशुश्रूषणं सततं वृद्धानां पर्युपासनं श्र
वणं चैव शास्त्राणां कूटस्थं श्रेय उच्यते २

इति शब्दतो विकल्पमात्रं तु तुल्यवत् द्वैतदर्शनाभावः सर्वेषां मोक्षे तुल्यः शमादीनां साधनत्वं च व्यावहारिकप्रक्रियाणां चात्मतत्वप्रतिपादनप्रकारभेदानां च तेषां पर
स्परविरोधान्नैकशास्त्रं विधिमुखेनैव वस्तु खंडयित्वा तानंदैकरसं ब्रह्म वेदांताः विस्पष्टं प्रतिपादयंतीति तेषामेव श्रेष्ठत्वं च स्पष्टं तथापि सर्वशास्त्राविरोधेनैवात्मस्वाहगुरु
पूजेति गुरुशुश्रूषा ईश्वरे चेतः प्रणिधानं तस्यैव परमगुरुत्वात् स पूर्वेषामपि गुरुः कालेनानवच्छेदादिति तस्य पातंजले परमगुरुत्वोक्तेः वृद्धानामाचार्याणां । तथा च यस्य देवे
परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति स्मृतेः योरदर्शिनः शास्त्राणां चाविशेषात् सर्वेषां सर्वत्र मोक्षसप्रतिपादनात् श्रवणं गुरुमुखेन त
ग्रहणं एनत्व मननं निदिध्यासनयोरप्युपलक्षणं गुरुदेवशुश्रूषाश्रवणादित्रयं च कूटस्थं अविकारि आत्यंतिकमैकांतिकं च परं श्रेयः तद्रूपं तत्साधनत्वात् उच्यते २

मो०
३५२
352

वीतेति जितेंद्रियः श्रेयस्कामइतिचशिष्यलक्षणं शेषंगुरुलक्षणं ४ भवतित्वयिअनपगानस्थिरान् ५ लोकतत्त्वंआत्मयाथात्म्यं ६ अज्ञानमेवाहज्ञानेहीति
कार्याणांतत्तत्कालोदितकर्तव्यानां चैत्यवंदनतप्तशिलारोहणकृच्छ्रचांद्रायणाग्निहोत्रादीनांअविशेषतः इदंश्रेयइदंनेतिविशेषावधारणहेत्वभावेनसाम्या
त्सर्वंसममेवप्रवृत्तिःस्यात् ततश्चपरस्परविरुद्धधर्मद्वयाचरणादुभयभ्रष्टः स्यादित्यर्थः अतस्तेषांकार्याणांमध्येयत्अस्माकंकार्यंकर्तुमुचितंतन्नव्यवस्यामः न

अत्राप्युदाहरंतीममितिहासंपुरातनं गालवस्यचसंवादंदेवर्षेर्नारदस्यच ३ वीतमोहक्लमंविप्रंज्ञानतृप्तंजितेंद्रियं श्रेयस्कामंयता
त्मानंनारदंगालवोऽब्रवीत् ४ यैःकैश्चित्संमतोलोकेगुणैस्तुपुरुषोमुने भवत्यनपगान्सर्वांस्तान्गुणांल्लक्षयामहे ५ भवानेवंवि
धोऽस्माकंसंशयंछेत्तुमर्हति अमूढश्चिरमूढानांलोकतत्त्वमजानतां ६ ज्ञानेह्येवंप्रवृत्तिःस्यात्कार्याणामविशेषतः यत्कार्यंनव्यव
स्यामस्तद्भवान्वक्तुमर्हति ७ भगवन्नाश्रमाःसर्वेपृथगाचारदर्शिनः इदंश्रेयइदंश्रेयइतिसर्वेप्रबोधिताः ८

निश्चिनुमः सर्वेआश्रमायोवुद्धिसाम्यात् अतः भवान्विशेषदर्शीतद्वक्तुमर्हति ७ एतदेवाहभगवन्निति आश्रमाःनास्तिश्रमोऽनुष्ठानेयोपरिमितश्रमं
ज्ञानं तस्यैवसाधकाः आश्रमाः ब्राह्मणादयश्चआचारश्चवोक्तंदर्शयितुंशीलंयेषांतेपृथगाचारदर्शिनः तैराश्रमैः सर्वेनराः प्रबोधिताः ८

शां०
३५२

नाम्नबोधितान्विविधेनमार्गेणव्यवस्थितान्शास्त्राभिनंदिनः स्वेस्वेशास्त्रेष्वभिनिवेशंदिनुंशीलंयेषांतान्दृष्ट्वायथास्वंस्वशास्त्रैः परितुष्टान्यथातानपिदृष्ट्वासंदिहानाः संतः
श्रेयः प्रशस्ततरंनोपलभामहेनेनिश्चेतुंसमर्थाःस्मः १० कलिलंनानाशंकाकुलंत्वधीहिमध्यापय ११ आश्रमाः शास्त्राणिचत्वारि तत्रधर्मानांतैवेनैकंशास्त्रंत्वत्र
वैदिकः शाक्यादिकल्पितश्चैत्यवंदनादिर्बुधर्मानामद्दत्परंवैलोकएवधर्मानामद्दितितीयंधर्माधर्मातीतंतंवल्कमात्रमलीनिवतुर्थं यथासंकल्पिताः संकल्पितंसंकल्पंच

नानाविधव्यवस्थितान्दृष्ट्वाशास्त्रैः शास्त्राभिनंदिनः स्वशास्त्रैः परितुष्टांश्चश्रेयोनोपलभामहे ९ शास्त्रंयदिभवेदेकंश्रेयोव्यक्तंभवेत्तदा शा-
स्त्रैश्चबहुभिर्भूयः श्रेयोगुह्यंप्रवेशितं १० एतस्मात्कारणाद्ब्रह्मन्कलिलंप्रतिभातिमे ब्रवीतुभगवांस्तन्मेउपसन्नोस्म्यधीहिभो ११
नारदउवाच आश्रमास्तातचत्वारोयथासंकल्पिताः पृथक् तान्सर्वाननुपश्यत्वंसमाश्रित्यचगालव १२ तेषांतेषांतथाहित्वमाश्र-
माणांतत्रगालव नानारूपंगुणोद्देशंपश्यविधिस्थितंपृथक् १३

नतिक्रांताः योयेनश्रेयस्त्वेनभावितस्तस्यतदेवश्रेयइत्यर्थः तथाचश्रुतिः तंयथायथोपासतेतदेवभवतीतिसंकल्पानुसारेणफलंदर्शयतितान्समाश्रित्यचअनु-
पश्य गुरुभ्योऽधिगम्यसम्यगालोचयएतान्बुद्ध्याआलोचयन्स्वयमेवैतेषुप्रशस्ततंयत्तत्ज्ञास्यसीतिभावः १२ गुणोद्देशंआत्मज्ञानंगुणभूतानांधर्माणामुद्देशंसं-
कीर्तनंपृथक्विरुद्धेनप्रकारेणावस्थितं यथापरेषांतप्तशिलारोहणादिर्धर्मः सएवास्माकमधर्मः यथावास्माकंअग्नीषोमीयपश्वालंभोधर्मः सएवपरेषामधर्मइत्यर्थः
१३

नेति नेत्याश्रमाः स्थूलदृष्ट्यानिरीक्ष्यमाणाः सम्यक्कृत्स्नमभिप्रेतं धर्मं त्वात्मतत्त्वं वा न यान्ति न प्रापयन्ति तेषामेव परां गतिं त्वमे सूक्ष्मदृशः ऋजुपथास्मात्तथाऽपश्यन्नात्र कृ
तेनाफलसाधनयोः सर्वत्राविगानात् १४ एतदेवाह यत्विति मित्राणां सर्वभूतानामभयप्रदानं चानुग्रहं चामित्राणां हिंस्राणां च निग्रहं श्रेयश्चाहुरित्यग्रिमेणान्वयः

नयन्तीत्येवं तेन सम्यगभिप्रेतमसंशयं अनुपश्यंस्तथात्मग्गाश्रमाणां परां गतिं १४ यत्तु निःश्रेयसं सम्यक्कृतमेवात्तं शयात्मकं अनुग्रहं
चमित्राणाममित्राणां च निग्रहं १५ संग्रहं च त्रिवर्गस्य श्रेय आहुर्मनीषिणः निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता १६ सद्भिश्च स
मुदाचारः श्रेय एतदसंशयं मार्दवं सर्वभूतेषु व्यवहारेषु चार्जवं १७ वाक्चैव मधुरा प्रोक्ता श्रेय एतदसंशयं देवतेभ्यः पितृभ्यश्च संविभागो
ऽतिथिष्वपि १८ असंत्यागश्च भृत्यानां श्रेय एतदसंशयं सत्यस्य वचनं श्रेयः सम्यग्ज्ञानं तु दुष्करं १९ यद्भूतहितमत्यन्तमेतत्सत्यं ब्रवीम्य
हं अहंकारस्य च त्यागः प्रमादस्य च निग्रहः २० संतोषश्चैकचर्या च कूटस्थं श्रेय उच्यते धर्मेणावेदाध्ययनं वेदाङ्गानां तथैव च २१
ज्ञानार्थानां च जिज्ञासा श्रेय एतदसंशयं शब्दरूपरसस्पर्शान्सह गन्धेन केवलान् २२

हिंस्रनिग्रहः स श्रेयस्त्वोक्ता हिंसा सतस्ता निनिग्रहमुक्तं १७ सर्वत्रं च साधारणधर्मप्रसंगात्तद्वैदिकं धर्ममाह दैवतेभ्य इत्यर्द्धेन १८ सत्यस्य त्वबाधितात्मतत्त्वस्य
वचनं श्रवणादिकं सत्यं सम्यग्ज्ञापकं २१ जिज्ञासा अनुभवेच्छा २२

अतियोगं आहारादीनां यथोक्तं नातिमात्रं तस्य योगोऽस्तीति न चैकान्तमनश्नतः न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुनेति २४ आत्मेति विप्रकर्षमुत्कर्षं नीचादुत्कर्षं नेच्छ न त्वपि तु न्यूनादेवेति भावः २५ आत्मनो गुणाः स्वयमैश्वर्यं न कुर्यात् गुणान् स्वयं पादिति समाहाः क्षिपंतीति निंदति २६ अनूच्यमानाः शिष्यमाणाः २७ विपश्चिद्गुणाः

नात्यर्थमुपसेवेत श्रेयसोर्थी कथंचन नक्तंचर्यां दिवास्वप्नमालस्यं पैशुनं मदं अतियोगमयोगं च श्रेयसोर्थी परित्यजेत् २४ आत्मोत्कर्षं न मार्गेत परेषां परिनिंदया स्वगुणैरेव मार्गेत विप्रकर्षं पृथग्जनात् २५ निर्गुणास्त्वेव भूयिष्ठमात्मसंभाविता नराः दोषैरन्यान्गुणवतः क्षिपंत्यात्मगुणक्षयात् २६ अनूच्यमानास्तु पुनस्ते मन्यंते महाजनात् गुणवत्तरमात्मानं स्वेन मानेन दर्पिताः २७ अब्रुवन्कस्यचिन्निंदामात्मपूजामवर्णयन् विपश्चिद्गुणसंपन्नः प्राप्नोत्येव महद्यशः २८ अब्रुवन्वाति सुरभिर्गंधः सुमनसां शुचिः तथैवाव्याहरन्भाति विमलो भानुरंबरे २९ एवमादीनि चान्यानि परित्यक्तानि मेधया ज्वलंति यशसा लोके यानि न व्याहरंति च ३० न लोके दीप्यते मूर्खः केवलात्मप्रशंसया अपि चापिहितः श्वभ्रे कृतविद्यः प्रकाशते ३१ असदुच्चैरपि प्रोक्तः शब्दः समुपशाम्यति दीप्यते त्वेव लोकेषु शनैरपि सुभाषितं ३२

अद्वेष्टा सर्वभूतानामित्यादयः महद्यशो ब्रह्म न तस्येशे कश्चन तस्य नाम महद्यश इति श्रुतिप्रसिद्धेः ३१ असत् सारवर्जितं यथा स्यात्तथा प्रोक्तः ३२

मूढानामिति यथा सूर्यः सूर्यकांतयोगात्स्वस्याग्निरूपत्वं दर्शयति एवं सुज्ञोपि कुशब्दयोगात्स्वस्वरूपं अंतरात्मानं दर्शयतीत्यर्थः ३३ मृगयंते श्रेयोर्थिनः पृथग्वि
धाम्ना नाम्ना स्वभेदभिन्नान् ३५ वासं परिक्लेशेन वस्तुमिच्छेत् ३६ व्यतिकरः संकरः ३७ आश्रुपातसंगमात्रेणैवेत्यर्थः ३८ अत्र दृष्टांतमाह स्वप्नानामिति स्व
वादीनां संगमात्रं यथा शीतोष्णसुखदुःखदं तथा सदसत्संग एव पुण्यपापद इत्यर्थः ३९ विषयं विषयमनुवर्तंते इत्यनुविषयो रसः तं अपश्यंतः इदं मधुरमि

मूढानामबलिमानामसारं भाषितं बहु दर्शयन्नंतरात्मानमग्निरूपमिवांशुमान् ३३ एतस्मात्कारणात्प्राज्ञं मृगयंते पृथग्विधौ प्रज्ञा
लाभो हि मूढानामुत्तमः प्रतिभाति मे ३४ नापृष्टः कस्यचिद्ब्रूयान्नाप्यन्यायेन पृच्छतः ज्ञानवानपि मेधावी जडवत्समुपाविशेत् ३५
नतो वासं परिक्लेशेन धर्मनित्येषु साधुषु मनुष्येषु वदान्येषु स्वधर्मनिरतेषु च ३६ चतुर्णां यत्र वर्णानां धर्मव्यतिकरो भवेत् न तत्र वासं
कुर्वीत श्रेयोर्थी वै कथंचन ३७ निरारंभोप्ययमिह यथालब्धोपजीवनः पुण्यं पुण्येषु विमलं पापं पापेषु चाप्नुयात् ३८ अपामग्ने
स्तथेंदोस्त्वक्स्पर्शं वेदयते यथा तथा पश्यामहे स्पर्शमुभयोः पुण्यपापयोः ३९ अपश्यंतोनुविषयं भुंजते विघसाशिनः भुंजाना
स्वात्मविषयाद्विषयाद्विद्धि कर्मणो ४०

इतिक्रमित्तमनालोचयंतः केवलं गर्भंभरमात्रार्थं भुंजते विघसो देवतादिशेषं तदशनशीलाः शिष्टाः ये तु आत्मविषयान् बुद्ध्या विशेषयतो बंधकान् रसविशेषा
न् परीक्षापूर्वकं भुंजते तान् कर्मणां विषयान् कर्मपाशगोचरान् विद्धि इंद्रियप्रेषकाणां कदाचिदपि न संसारोपरमसंभावनास्तीत्यर्थः ४०

गुरुशिष्यधर्मोनाहयत्रेत्यादिना आगमंयमाणंजंतानमात्मनः इच्छतां आगमयमानानांकवंतसरूपं ४२ आकाशस्थाः निरालंबनाः अविद्यमानानदोषा

यत्रागमयमानानामसत्कारेण इच्छतां अयुपाद्यासनेणोधर्मेतस्तजेत्तं देशमात्मवान् ४१ शिष्योपाध्यायिकावृत्तिर्यत्रस्यान्नुसमाहिता य
थावच्छास्त्रसंपन्नाकृत्तंदेशंपरित्यजेत् ४२ आकाशस्थाश्रयंयत्रदोषंमूर्वविपश्चितो आत्मपूजाभिकामावैकोवसेत्तत्रपंडितः ४३
यत्रसंलोडितासुव्येः पापसेधर्मसेतवः प्रदीप्तमिवचेलांतंकृत्तंदेशंनसंत्यजेत् ४४ यत्रधर्ममनाशंकाश्चरेयुर्वीतमत्सराः भवेत्त
त्रवसेत्तत्रपुण्यशीलेषुसाधुषु ४५ धर्ममर्थनिमित्तंवचरेयुर्यत्रमानवाः नतानन्ववसेत्तातुतेहिपापकृतोजनाः ४६ कर्मणापत्रपा
येनवर्तंतेजीवितेसवः व्यवधावेत्ततत्तूर्णंससर्पोच्छरणादिव ४७ येनत्वयुक्तंसमारूढःकर्मणानुशयीभवेत् आदितस्तन्नकर्तव्य
मिच्छताभवमात्मनः ४८ यत्रराजाचराजत्वपुरुषाः प्रत्यनंतराः कुटुंबिनामग्रभुंजत्यजेत्तद्राष्ट्रमात्मवान् ४९ श्रोत्रियास्त्वय
मोक्षारोधर्मनित्याः सनातनाः याजनाध्यापनेयुक्तायत्रतद्राष्ट्रमावसेत् ५०

नत्रपुंस्त्वमर्थः ४३ संलोडिताः आकुलीकृताः ४४ भवेत्तत्रसंनिहितः ४५ कामनिषिद्धेनिरंतिधर्ममिनिहाभ्यां ४७ अनुशयीपूर्वकर्मवासनावा
नुवद्धारूढः तीव्रदुःखयुतः ५०

उपसृष्टंसविषं ५२ आत्मवान्जितचित्तः ५४ येशांतेषुउपसृष्टाःसक्रोधास्तेषुयेचसाधुषुदुराचारास्तेषु ५५ कामान्विषयाभिलाषान् कामेशःसर्वसंपत्ति
मान् ५६ विषयवासिनःस्वदेशस्थान् प्रत्युपस्थितेप्रतीयतेनोपस्थितेहीयमानेसतीत्यर्थः ५७ प्रधानेनप्राधान्येनसंख्यातुंकीर्तयितुं ५८ एवंस्त्वनपा

स्वाहास्वधावषट्काराणयत्रसम्यगनुष्ठिताः अजस्रंचैववर्त्तेतवसेत्तत्राविचारयन् ५१ अशुचीमत्रपश्येतब्राह्मणान्हन्तिकर्षितान् तत्रै
त्वद्राष्ट्रमासत्त्रमुपसृष्टमिवाविषं ५२ प्रीयमाणानरायत्रप्रयच्छेयुरयाचिताः स्वस्थचित्तोवसेत्तत्रकृतकृत्यमिवात्मवान् ५३ दंडोयत्रा
विनीतेषुसत्कारश्चकृतात्मसु चरेत्तत्रवसेद्वेचपुण्यशीलेषुसाधुषु ५४ उपसृष्टेषुदांतेषुदुराचारेष्वसाधुषु अविनीतेषुलुब्धेषुसुमह
द्दंडधारणं ५५ यत्रराजाधर्मनित्योराज्यंधर्मेणपालयेत् अपास्यकामान्कामेशोवसेत्तत्राविचारयन् ५६ तथाशीलाहिराजा
नःसर्वविषयवासिनः श्रेयसायोजयंत्याशुश्रेयसिप्रत्युपस्थिते ५७ पृष्टस्त्वमेषयातातश्रेयएतदुदाहृतं नहिशक्यंप्रधानेनश्रेयः
संख्यातुमात्मनः ५८ एवंप्रवर्त्तमानस्यवृत्तिंप्रणिहितात्मनः तपसैवेहबहुलंश्रेयोव्यक्तंभविष्यति ५९ शांतेमोक्षधर्मेषुश्रे
योवाचिकोनाम

दिशाहनिनीविकाप्रदिश्यत्पसास्वधर्मेणप्रणिहितआत्माचित्तंयस्यपाठांतरेप्रणिहितःसमाहितः आत्माचित्तंयस्यबहुलंश्रेयोमोक्षाख्यं ५९ शा
नोपरिहादशः ॥

सर्वतंत्रसाधारण्यान् अहिंसाप्रधानान्मोक्षधर्मान् श्रुत्वा राजा तदनुष्ठानं दुःशकमिति मत्वा नःश्रेयः कथमिति १ सर्वसाधारणं भावयन्नेव संगपाशाद्विमुच्यतइ
ति वक्तुं आख्यायिकामवतारयति अहमत्रेति ३ संपदं उपदेशयोग्यतां श्रियं ४ सक्तेति सक्ता विषयनिमग्ना सा चासौ बुद्धिश्च अशांतश्चासौ आत्मा च तस्माकुलं

युधिष्ठिर उवाच कथं नु मुक्तः पृथिवीं चरेदस्मद्विधो नृपः नित्यं कैश्च गुणैर्युक्तः संगपाशाद्विमुच्यते १ भीष्म उवाच अत्र ते वर्तयिष्ये
ऽहमितिहासं पुरातनं अरिष्टनेमिना प्रोक्तं सगरायानुपृच्छते २ सगर उवाच किं श्रेयः परमं ब्रह्मन्कृत्वेह सुखमश्नुते कथं न शोचेन्न
क्षुभ्येदेतदिच्छामि वेदितुं ३ भीष्म उवाच एवमुक्तस्तदा तार्क्ष्यः सर्वशास्त्रविदां वरः विबुध्य संपदं चाग्र्यां सद्वाक्यमिदमब्रवीत् ४ सु
खं मोक्षसुखं लोके न च मूढोऽवगच्छति प्रसक्तः पुत्रपशुषु धनधान्यसमाकुलः ५ सक्तबुद्धिरशान्तात्मा न शक्यं तच्चिकित्सितुं स्ने
हपाशसितो मूढो न स मोक्षाय कल्पते ६ स्नेहजानिह ते पाशान्वक्ष्यामि शृणु तान्मम सकर्णकेन शिरसा शक्याः छेत्तुं वि
जानता ७ संभाव्य पुत्रान्कालेन यौवनस्थान्निवेश्य च समर्थाञ्जीवने ज्ञात्वा मुक्तश्चर यथासुखं ८

मनः तत् हृद्यं चिकित्सितुमशक्यं पाठांतरे स्पष्टोऽर्थः सितो बद्धः ६ सकर्णकेन शिरसा तेन ताभ्यां यद्वाभ्यां सावधानेन जीवता मर्योलक्ष्यते ७ नि
वेश्य दारैः संयोज्य ८

परार्थं स्वंतिमं पुरुषार्थं मोक्षं भज हि मज ९ कृतकौतूहलः छिन्नौत्सुक्यः कृ हिंसायां मादिः तस्मिन् निष्ठायां कृतमिति रूपं १० उपपन्ना प्राप्तस्य पदस्थ उपलब्धेषु लोकेषु विष
येषु तन्मो रागद्वेषहीनः ११ एष भोगसर्वकः लाभः मोक्षार्थो मोक्षप्रयोजनः १२ मुक्ताः छिन्नस्नेहपाशाः सक्तभावाः विषयासक्तचित्ताः १३ उक्तेर्थे दृष्टांतमाह आ
हारेति आहारं संचिन्वंति संगृह्णंति तादृशाः कीटादयो नश्यंति न तत्संग्रहिणः इत्यर्थः १४ न नु वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः अप्यकार्यशतं

भार्यां पुत्रवतीं वृद्धां लालितां पुत्रवत्सलां त्यक्त्वा व्रज हि कालेन परार्थं मनुदृश्यव ९ सापत्नो निस्पृहो वा पुनः कस्त्वं प्रयास्यसि त्वं इं
द्रियैरिंद्रियार्थैस्त्वमनुभूय यथाविधि १० कृतकौतूहलस्तेषु मुक्तस्त्वं प्रयास्यसि उपपन्नोपलब्धेषु लाभेषु च समो भव ११
एष तावत्समासेन तव संकीर्तितो मया मोक्षार्थो विस्तरेणाथ भूयो वक्ष्यामि तच्छृणु १२ मुक्ता वीतभया लोके चरंति सुखिनो
नराः सक्तभावा विनश्यंति नरास्तत्र न संशयः १३ आहारसंचयाश्चैव तथा कीटपिपीलिकाः असक्ताः सुखिनो लोके स
क्ताश्चैव विनाशिनः १४ स्वजने न च ते चिंता कर्तव्या मोक्षबुद्धिना इमे मया विना भूता भविष्यंति कथं त्विति १५

कृत्वा मत्तेभ्यो मनुष्येभ्यो दीक्षितस्य ते संग्रहं विना कथं मात्रादिजीवनं स्यादित्याशंक्याह स्वजन इति त्रिभिः यथा जन्मादिकं तत्तत्कर्माधीनं एवं भोजनादिक
मपीति मात्रादिविषये चिंता न कार्येत्यर्थः मात्रा पित्रा कृतेन स्वकृतेन वा संग्रहं अधिगच्छंतीति योजना १५

धात्रा स्वकर्मफलविभाजकेन १९ स्वस्मात्किंचित्कारत्वादपि मात्रादिपोषणे वितानकार्यं त्वाह स्वयमित्यादिना च्युहृष्ठेति छेदः २१ जीवंतमिति भरणे प्रत्ने
रक्षणे गर्हादौ अप्रसमाप्ते पि च जन्मादारेण नं भर्त्तारं जीवंतमपि परित्यज्य स्वकर्मतो वयथाभापी हिर्म्रियते पश्चात्तदुभयनाशादूर्ध्वमपि तथैव मरिष्यत्येवेत्यर्थः

स्वयमुत्पद्यते जंतुः स्वयमेव विवर्द्धते सुखदुःखे तथा मृत्युं स्वयमेवाधिगच्छति १७ भोजनाच्छादने चैव मात्रा पित्रा च संग्रहं
स्वकृतेनाधिगच्छंति लोके नास्त्यत्र संशयः १८ धात्रा विहितभक्ष्याणि सर्वभूतानि मेदिनीं लोके विपरिधावंति रक्षितानि स्व
कर्मभिः १९ स्वयं मृत्पिंडभूतस्य परतंत्रस्य सर्वदा को हेतुः स्वजनं पोष्टुं रक्षितुं वा हृतात्मनः २० स्वजनं हि यदा मृत्युर्हंत्येव
तव पश्यतः कृतेऽपि यत्ने महति तत्र बोद्धव्यमात्मना २१ जीवंतमपि चैवैनं भरणे रक्षणे तथा अप्रसमाप्ते परित्यज्य पश्चाद
पि मरिष्यसि २२ यदा मृतश्च स्वजनं न त्वासस्मि कदाचन सुखितं दुःखितं वापि न त्वं बोद्धव्यमात्मना २३ मृते वा त्वपि
जीवे वा परो भोक्ष्यति वै जनः स्वकृतं न नु बुध्येयं कर्त्तव्यं हितमात्मनः २४

२२ यदेति मृतं देशांतरस्थं वा स्वजनं सुखितं दुःखितं वा न त्वास्मि नाप्युपकरिष्यसि यथा एवं आत्मना इदं बोद्धव्यं मामपि मृतं देशांतरगतं पुत्रा
दयो न त्वास्यं नोपकरिष्यंतीति २३ अत्रत्वमिदमुक्तं त्वयि मृते वा जीवति वा जनः पुत्रादिः स्वकृतं जरारोगादिकं भोक्ष्यति त्वं च न तद्धीकर्त्तुं शक्तो
तै१
ऽसि एवमनेऽपि न वेति बुद्ध्वा २४

२५ पस्मेदेहिनः येनपुंसासत्ववान्सत्वाधिकः २६ धूतेइत्यादयः सामीप्येसप्तम्यः नप्रमाद्यतिआत्मानंविस्मृत्यतत्राभिनिविष्टोनभवति २७ क्रियमाणमहंभोक्त
व्यंक्रियमाणमितिरात्रौभोक्तव्यमितियोभोगात्खिन्नः २८ आत्मेति आत्मभावंचित्तस्वभावंस्त्रीषुविषयभूतासुमुक्तंस्वाभिलाषाद्व्यावृत्तं सक्तमितिपाठेसक्तंसंगः तं
भावेनिष्ठाआत्मनः भवनंभावः जन्म स्त्रीसंगंजन्महेतुत्वेनयः पश्यतीत्यर्थः युक्तः सावधानः २९ संभवमिति जन्ममरणजीवनक्लेशजातमुच्यतइत्यर्थः ३०

एवंविज्ञानंल्लोकेस्मिन्कः कस्तमभिनिविशते मोक्षेनिवेशयमनोभूयश्चाप्युपधारय २५ क्षुत्पिपासाश्रमोभावाज्जरापस्मेहदेहिनः
क्रोधोलोभस्तथामोहः सत्ववान्मुक्तएवसः २६ धूतेपानेतथास्त्रीषुमृगयायांचयोनरः नप्रमाद्यतिसंमोहात्सततंमुक्तएवसः २७
दिवसेदिवसेनामरात्रौरात्रौपुमान्सदा भोक्तव्यमितियः खिन्नोदोषबुद्धिः सउच्यते २८ आत्मभावंतथास्त्रीषुमुक्तमेवंपुनः पुनः
यः पश्यतिसदायुक्तोयथावन्मुक्तएवसः २९ संभवंचविनाशंचभूतानांचेष्टितंतथा यस्तत्त्वतोविजानातिलोकेस्मिन्मुक्तएवसः
३० प्रस्थंवाहसहस्रेषुयात्रार्थंचैवकोटिषु प्रासादेमंचकंस्थानंयः पश्यतिसमुच्यते ३१

वाहः धान्यमूल्यांशकरसहस्रेषुकोटिष्वितिसमानाधिकरण्यांमस्थंपुरुषाहारपरिमितंधान्यंयद्वा पंचफलसकोमाषः तेषोडशपलं तानिसार्धत्रयोदशप्रस्थः प्र
स्थशतंआढकः तेशतद्वयंद्रोणः कुनतेदशतेदशवाहइति यात्रार्थंदेहव्यवहारार्थं अधिकतंग्रहोसर्थइतियः पश्यति ३१

अहन्निजीविकायाश्चभावः ३२ नपश्यन्निमेकंपदंमृत्युनाभ्याहतंलोकमिमनुकम्पते ३३ अग्नीषोमाविति अग्निर्जाठरोभोक्तासोमोऽन्नंभोज्यं अहंतु

मृत्युनाभ्याहतंलोकंआधिभिश्चोपपीडितं अहन्निक तंचैवयःपश्यतिसमुच्यते ३२ यःपश्यतिमसंतुष्टेनपश्युश्चविहन्यते य
स्याप्यसनसंतुष्टोलोकेस्मिन्मुक्तएवसः ३३ अग्नीषोमाविदंसर्वमितियश्चानुपश्यति नचसंस्पृश्यतेभावैरद्भुतैर्मुक्तएवसः ३४
पर्यंकशय्याभूमिश्चसमानेयस्यदेहिनः शालयश्चकदन्नंचयस्यस्यान्मुक्तएवसः ३५ क्षौमंचकुशचीरंचकौशेयंवल्कलानिच
आविकंचर्मचसमंयस्यस्यान्मुक्तएवसः ३६ पंचभूतसमुद्भूतंलोकंयश्चानुपश्यति तथाचवर्त्ततेदृष्ट्वालोकेस्मिन्मुक्तएवसः
३७ सुखदुःखेसमेयस्यलाभालाभौजयाजयौ इच्छाद्वेषौभयोद्वेगौसर्वथामुक्तएवसः ३८ रक्तमूत्रपुरीषाणांदोषाणांसं
चयांस्तथा शरीरंदोषबहुलंदृष्ट्वाचैवविमुच्यते ३९ वलीपलितसंयोगंकार्श्यंवैवर्ण्यमेवच कुब्जभावंचजरयायःपश्यति
समुच्यते ४० पुंस्त्वोपघातंकालेनदर्शनोपरमंतथा बाधिर्यंप्राणमंदत्वंयःपश्यतिसमुच्यते ४१

ततोऽन्यद्गतियोनुपश्यतिसम्भावैःसुखदुःखादिभिरद्भुतैर्मायिकैः नसंस्पृश्यतेसंगवान्नभवति ३५ क्षौमंअतसीसूत्रमयंकुशचीरंतृणवल्कंकौशेयंकोश
जं आविकंकंबलं ३६ तथाचसाम्येनेत्यर्थः ४० प्राणोमंदत्वंरोधेस ४१

४१ मोक्षजैः ज्ञानजैः अद्वेष्टृत्वादिभिः ४८ शतोपरित्रयोदशः एवंरागद्वेषहीनःवीतसंगोमुच्यतइत्युक्तंसंगदोषाज्जन्मनामहानपिच्यधोगतिंस्वर्गमार्गप्रतिवंधंवल

गतान्पर्वींस्तथादेवानसुरांश्चतथागतान् लोकादस्मात्परंलोकंयःपश्यतिसमुच्यते ४१ प्रभावैर्ग्रथितानेतान्पार्थिवेन्द्रान्सहस्रशः ये
गताः पृथिवींत्यक्त्वाइतिज्ञात्वाविमुच्यते ४२ अर्थांश्चदुर्लभांल्लोकेक्लेशांश्चसुलभांस्तथा दुःखंचैवकुटुंबार्थेयःपश्यतिसमुच्य
ते ४४ अपत्यानांचवैगुण्यंजनंविगुणमेवच पश्यन्भूयिष्ठशोलोकेकोमोक्षंनाभिपूजयेत् ४५ शास्त्राल्लोकाच्चयोबुद्धःसर्वं
पश्यतिमानवः असारमिवमानुष्यंसर्वथामुक्तएवसः ४६ एतच्छ्रुत्वाममवचोभवांश्चरतुमुक्तवत् गार्हस्थ्येपदिवामोक्षेकृ
तात्मबुद्धिविक्लवः ४७ तत्तस्यवचनंश्रुत्वासम्यक्सपृथिवीपतिः मोक्षजैश्चगुणैर्युक्तःपालयामासचप्रजाः ४८ शान्तौमोक्षध
र्मेषुसगरारिष्टनेमिसंवादः युधिष्ठिरउवाच तिष्ठतेमेसदातातकौतूहलमिदंहृदि तदहंश्रोतुमिच्छामित्वत्तःकुरुपितामह
१ कथंदेवर्षिरुशनाःसदाकाव्योमहामतिः असुराणांप्रियकरःसुराणामप्रियेरतः २ वर्द्धयामासतेजश्चकिमर्थममितौजसां
नित्यंवैरनिबद्धाश्चदानवाःसुरसत्तमैः ३

मतेइतिवक्तुंशुक्रोपाख्यानंप्रस्तूयते तिष्ठतेइति स्थेयार्थ्यायांतत्कौतूहलंआश्चर्यंचिरकालंममहृदिवर्ततेइत्यर्थः २ वर्द्धयामासचिच्छेद अमितौज
सांदेवानां ३

शुक्रत्वं मुक्तोऽमरत्वं ४ नेति तस्याकाशगतिः कुतः कुण्ठितेत्यर्थः समर्पितत्वहेतुत्वेनाश्रित्य नस्य शुक्रस्य भूस्थमूर्त्तिविषय एवायं प्रश्नो न भचक्रस्थमूर्त्तिविषयः ते
न यथा भौमानां वसिष्ठादीनां स्वर्गेपि गतिरस्ति नैवं भौमस्य शुक्रस्यास्तीति निर्गमने ६ कारणात्क्रियात्तदात्मके निमित्ते सति एवं बहुधा व्याख्यायते सुराः किल देवा नाभि

कथं चाप्युशना प्राप्तशुक्रत्वममरद्युतिः ऋद्धिं च स कथं प्राप्तः सर्वमेतद्ब्रवीहि मे ४ न याति च स तेजस्वी मध्येन नभसः कथं
एतदिच्छामि विज्ञातुं निखिलेन पितामह ५ भीष्म उवाच शृणु राजन्नवहितः सर्वमेतद्यथातथं यथामति यथा चैतच्छ्रुतपूर्वं मयानघ
६ एष भार्गवदायादो मुनिर्मान्यो दृढव्रतः सुराणां विप्रियकरो निमित्ते कारणात्मके ७ इन्द्रोऽथ धनदो राजा यक्षरक्षोधिपस्तदा स
प्रभविष्णुश्च कोशस्य जगतश्च तथा प्रभुः ८ तस्यात्मानमथाविश्य योगसिद्धो महामुनिः रुद्ध्वा धनपतिं देवं योगेन हृतवान्वसु ९ हृ
ते धने ततः शर्म नालभद्धनदस्तथा आपन्नमन्युः संविग्नः सोऽभ्यगात्सुरसत्तमं १० निवेदयामास तदा शिवायामिततेजसे देव
श्रेष्ठाय रुद्राय सौम्याय बहुरूपिणे ११

तां भृगुपत्नीमाश्रमं प्रविशन्तीं तं च देवाः प्रवेष्टुमशक्नुवन्तः विष्णुं शरणमीयुः ततो विष्णुश्चक्रेण भृगुपत्न्याः शिरश्चिच्छेद ततो हतावशिष्टाश्च सुरास्तत्तुल्यं शुक्रं शर
णमीयुः स च मातृवधखिन्नः सुरेभ्योऽभयं दत्वा देवानवधीदिति ७ इन्द्रो जगतः प्रभुः धनदः तदीयको[श]स्य प्रभुरित्यन्वयः ८ तस्य धनदस्यात्मानं शरीरं ९
आपन्नमन्युः प्राप्तदैन्यः ११

२७१

१३ बभौऽस्यात्मानंदर्शितवान् १४ महायोगिनः शिवस्यप्रभुः योगसिद्धः शुकः १६ सः शुकः धन्विनाहृद्देशाच्छूलंसमुत्कृष्टं शूलस्यशूलंत्रयोऽक्रमशक्यमितितमे
वशूलंधनरूपंकर्तुंपाणिनासमनामयत्संनामितवान् १७ शूलमेवपिनाकपदेनउवाच यतः पाणिनाऽऽनामयत्अतः पिनाकंतेनआद्यपदस्यार्थः

योगात्मकेनोशनसारुद्ध्वाममहृतंवसु योगेनात्मगतंकृत्वानिःसृतश्चमहातपाः १२ एतच्छ्रुत्वाततःक्रुद्धोमहा योगीमहेश्वरः सं
रक्तनयनोराजन्शूलमादायतस्थिवान् १३ क्वासौक्वासावितिप्राहगृहीत्वापरमायुधं उशनादूरतस्तस्यबभौज्ञात्वाचिकीर्षितं १४
समहायोगिनोबुद्ध्वातंरोषंवैमहात्मनः गतिमागमनंवेत्तिस्थानंचैवततःप्रभुः १५ संचिंत्योग्रेणतपसामहात्मानंमहेश्वरं उ
शनायोगसिद्धात्माशूलाग्रेप्रत्यदृश्यत १६ विज्ञातरूपःसतदातपःसिद्धेनधन्विना ज्ञात्वाशूलंचदेवेशःपाणिनासमनामयत्
१७ आनतेनाथशूलेनपाणिनामिततेजसा पिनाकमितिचोवाचशूलमुग्रायुधःप्रभुः १८ पाणिमध्यगतंदृष्ट्वाभार्गवंतमुमापतिः
आस्यंविवृत्यककुदीपाणिनासंप्राक्षिपच्छनैः १९ सतुप्रविष्टउशनाकोष्ठंमाहेश्वरंप्रभुः व्यचरच्चापितत्रासौमहात्माभृगुनंदनः २०

वर्णांशांद्वितीयस्यमध्यमाभ्यांकवर्णयुक्ताभ्यांपिनाकपदंनिष्पन्नमितियोगप्रदर्शनंकृतं १८ पाणिमध्यगतोधनुषापिवेद्धुमशक्यइतिमत्वाककुदीदेवा
नांपदाधिपतिः हद्रः प्राक्षिपत्त्वासे १९ कोष्ठंउदरं २०

अचरद्देवनतुश्चत्रवत्जोएतांगतः किंवतादृशंचकार्षीत्तपद्वितिशेषः २४ वृद्धिंशुक्रस्योत्कर्षं तत्संयोगेनतपोयोगेन २५ सःशुक्रः २६ निलिल्ये नितरांगतिं

युधिष्ठिरउवाच किमर्थमचरद्राजन्नुशनातस्यधीमतः जगारेदेवदेवस्यकिंचाकार्षीन्महामुनिः २१ भीष्मउवाच पुरासोंतर्जलगतः स्था
णुभूतोमहाव्रतः वर्षाणामभवद्राजन्प्रयुतान्यर्बुदानिच २२ उदतिष्ठत्तपस्तप्त्वादुश्चरंचमहाह्रदात् ततोदेवातिदेवस्तंब्रह्मावै
समतर्पत २३ तपोवृद्धिमपृच्छच्चकुशलंचैवमव्ययः तपःसुचीर्णमितिचप्रोवाचवृषभध्वजः २४ तत्संयोगेनवृद्धिंचाप्यपश्य
त्तनुशंकरः महामतिरचिंत्यात्मासत्यधर्मरतस्सदा २५ सत्तेनाद्योमहायोगीतपसाचधनेनच अशोभतमहाराजत्रिषुलोकेषुवी
र्यवान् २६ ततःपिनाकीयोगात्माध्यानयोगंसमाविशत् उशनातुसमुद्विग्नोनिलिल्येजठरेततः २७ तुष्टावचमहायोगीदेवंतत्रस्थ
एवच निःसारंकांक्षमाणःस्वतेजसप्रतिहन्यते २८ उशनातुतदोवाचजठरस्थोमहामुनिः प्रसादंमेकुरुष्वेतिपुनःपुनररिंदम
२९ तमुवाचमहादेवोगच्छशिश्नेनमोक्षणं इतिसर्वाणिस्रोतांसिनिरुध्यात्रिदशपुंगवः ३० अपश्यमानस्तद्द्वारंसर्वतःपि
हितोमुनिः पर्यक्रामद्दह्यमानस्तत्रस्वेनस्वतेजसा ३१

जगामाचचारेत्यर्थः निःसारंनिर्गमं तेनरुद्रेण २८ २९ ३० ३१ ३१ ३१

कार्येणेति तेन शिश्नद्वारनिर्गमनेन कार्येण निमित्तेन नाःस्मरादिवत् नभसो मध्यतः नागच्छत नाधिगमत् अनेक मलिनानइ ज्ञामद्वम्मस्वरामसिवास्वस्वर्गीतिनिर्निहद्दैस्मर्थः
अमेतु भवकस्यापि मुक्तः सूर्यविषकर्षान्तत्त्वमध्यंगतो न दृश्यत इति तन्मात्रपरतयैवैनद्याचष्टुः तस्मिन्नस्मिन्मुक्तत्वहेतुर्नसंगच्छत इत्यालोचनीयं ३१ ३८

तेनैव निष्क्रम्य शिश्नेन शुक्रत्वमभिपेदिवान् कार्येणानेन नभसो नागच्छत समध्यतः ३२ विनिष्क्रान्तं तु तं दृष्ट्वा ज्वलन्तमिव तेजसा भ
वो रोषसमाविष्टः शूलोद्यतकरः स्थितः ३३ अवारयत तं देवी क्रुद्धं पशुपतिं पतिं पुत्रत्वमगमद्देव्या वारिते शंकरे च सः ३४ दे
व्युवाच हिंसनीयस्त्वया नैव मम पुत्रत्वमागतः न हि देवोदरात्कश्चिन्निःसृतो नाशमर्छति ३५ ततः प्रीतो भवो देव्याः प्रह
संश्चेदमब्रवीत् गच्छत्वेष यथाकाममिति राजन्पुनः पुनः ३६ ततः प्रणम्य वरदं देवं देवीमुमां तथा उशना प्राप्तवान्धीमान्गति
मिष्टां महामुनिः ३७ एतत्ते कथितं तात भार्गवस्य महात्मनः चरितं भरतश्रेष्ठ यन्मां त्वं परिपृच्छसि ३८ शांतौ मोक्षधर्मे भवभार्ग
वसमागमः युधिष्ठिर उवाच अतः परं महाबाहो यच्छ्रेयस्तद्ब्रवीहि मे न तृप्याम्यमृतस्येव वचसस्ते पितामह १

शान्तो परिच्छिन्नदेशः रुद्रेणापि हन्तुमशक्यस्तस्य जठरेपि योनजीर्णः यश्चास्त्वायाः पुत्रत्वं गतस्तादृशस्यापि संगदोषादूर्ध्वगतिः प्रतिबद्धा किमुतान्येषामि
तिमत्वा भीतो राजा पुनः सर्वतं गदोषयेह संक्षेपः किं तत्कारणं च किं कर्मेति पृच्छति अतः परमिति १ १ १ १ १ १

२ अभ्यर्हितत्वात्प्रथमं श्रेयःकारणं कर्मैवाह पराशरगीतयाऽत्रेति ३ प्रतिपन्नयं ज्ञानतयं नत्वनुष्ठानतयं क्रियासाध्यस्य श्रेयसो नित्यत्वापत्तेः तथा च प्रयोगः यत्कृतकं तदनित्यं कार्यत्वाद्घटवदिति श्रुतिश्च तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति ४ सर्वेषां वर्णाश्रमाणां विधानं त्वाचारः

किं कर्म पुरुषः कृत्वा शुभं पुरुषसत्तम श्रेयः परमवाप्नोति प्रेत्य चेह च तद्वद २ भीष्म उवाच अत्र ते वर्तयिष्यामि यथा पूर्वं महायशाः पराशरं महात्मानं पप्रच्छ जनको नृपः ३ किं श्रेयः सर्वभूतानामस्मिंल्लोके परत्र च यद्भवेत्प्रतिपन्नयं तद्भवान्प्रब्रवीतु मे ४ ततः स तपसा युक्तः सर्वधर्मविधानवित् नृपायानुग्रहमना मुनिर्वाक्यमथाब्रवीत् ५ पराशर उवाच धर्म एव कृतः श्रेयानिह लोके परत्र च तस्माद्धि परमं नास्ति यथा प्राहुर्मनीषिणः ६ प्रतिपद्य नरो धर्मं स्वर्गलोके महीयते धर्मात्मकः कर्मविधिर्देहिनां नृपसत्तम ७ तस्मिन्नाश्रमिणः सन्तः स्वकर्माणीह कुर्वते चतुर्विधा हि लोकेऽस्मिन्यात्रा तात विधीयते मर्त्या यत्रावतिष्ठन्ते सा च कामात्प्रवर्तते ९

तद्वित् ६ धर्मस्य लक्षणमाह धर्मेति कर्मविधिः यजेत जुहुयाद्दद्यादि[दियादि] स एव धर्मः एतेन चोदनालक्षणोऽर्थो धर्म इत्युक्तं भवति चोदनेति क्रियायाः प्रवर्तकं वचनं यजेतेत्यादि इदमेव धर्मप्रमाणं च ७ तस्मिन्धर्मे आश्रमिणः सन्तः तन्निष्ठाः कुर्वते इति विधौ लेट् ८ कर्मापेक्षितं वित्तार्जनं कथं स्यादित्यत आह चतुर्विधेति यात्रा जीविका ब्राह्मणस्य प्रतिग्रहः राजन्यस्य करादानं वैश्यस्य कृष्यादि शूद्रस्य भृतिर्वेतनमिति चतुर्विधा ९

भा०
३६१

361

सुकृतासुकृतंपुण्यपापरूपंनियेषम्वन्निमिष्ठतां दृशानामर्द्धपंचभूतानितेषुप्रविभक्तानांविभक्तस्थितानांपंचत्वंप्राप्तानांभूतानांप्राणिनांसूक्ष्मगुरूपावतुर्विधापिचत्रधांतर
नारतम्यात् बहुविधागतिःश्रूयते पापिनांतिर्यक्त्वंपुण्यवतांस्वर्गः तयोःसाम्येमानुषत्वं तत्तज्ज्ञानेनोच्छेदेमुक्तिरिति १० जीवानांकर्मानुरंजितत्वंसदृष्टांतमाहसौव
र्णमिति यथातान्त्रादिमयंपात्रंसौवर्णेनरजतेनवारसेननिषिच्यतेचेतत्सौवर्णमिवराजतमिववाहश्यते तद्वज्जंतुःपूर्वकर्मानुसारेणनिषिच्यतेनिषिक्तोभवतिमाक्त

सुकृतासुकृतंकर्मोनिषेव्यविविधैःक्रमैः दृशांईशविभक्तानांभूतानांबहुधागतिः १० सौवर्णंराजतंचापियथाभांडंनिषिच्यते त
थानिषिच्यतेजंतुःपूर्वकर्मवशानुगः ११ नावीजात्प्रभवेत्किंचिन्नाकृत्वासुखमेधते सुकृतैर्विंदतेसौख्यंप्राप्यदेहक्षयंनरः १२
दैवंतातनपश्यामिनास्तिदैवस्यसाधनं स्वभावतोहितंसिद्धादेवगंधर्वदानवाः १३

दृष्टा

मेण ११ एतत्तर्कबलेनसाधयति नावीजादिति यथाबीजमपांसुगुंठितंबीजमदृष्टमपिवटवाल्यंकुरोत्पादेनानुमीयतेएवंदृष्टाभ्यांकारणाभ्यांसुखादिकं
जायते देहक्षयंदेहाधिपत्यं देहनाशंवा कर्मभिरेवदेहीह [illegible] परत्रचसुखंप्राप्नोतित्यर्थः यथाहर्षैर्नापित्वानुमानंतस्यसाधनमस्ति ननुसुखादिदैवेविचारान
यानुपपत्तिरेवनत्रमानमित्याशंक्याह स्वभावतइति वा दृस्यादिवनस्वभावतएवजायतेनकारणांतरादित्यर्थः १३ १३ १३

नृपो

कृतमाना कृताभ्यागमौप्रसज्येयाताभितिभावः १२ अत्रप्रत्यवतिष्ठते चार्वाकः देवमितिदैवंपुण्यपापलक्षणंनपश्यामि २

स्क०
३६१

अत्रसिद्धांतीशंकते येत्विति ननु येन अकृतं कर्म कर्मफलं न यांति न प्राप्नुवंति एवं सति कृतहानादिदोषप्रसंग इत्यर्थः न चेष्टापत्तिः लोकवादविरोधादित्याह स्मरंतीति न
स्वकर्मणः फलप्राप्तौ अकस्मात् राजमार्गपतितद्रव्यलाभे रोगाद्युत्पत्तौ च सत्सां ते जनाः सदा चतुर्विधं कर्म पुण्यं पापं नीतिरनीतिश्चेति तत्कारणत्वेन तु स्मरंति अ
न्यथा नीतिमतामपि दुःखं अनीतिमतामपि सुखं च दृश्यमानं नोपपद्येतेत्यर्थः अथ ये तु जानंत्यसज्जातिकृतं कर्मेति पठित्वा मत्वा जन्मांतरकृतं कर्म जन्मांतरे फलप्राप्तौ मतां
चतुर्विधं नित्यनैमित्तिककाम्यनिषिद्धलक्षणं कारणत्वेन न स्मरंतीति चार्वाकवच्च न ते वै तमपि श्लोकं व्याचक्षते १४ लोकेति पुण्यपापादिचतुष्टयं यत्सुखादिहेतुत्वेन

ये त्वपांसु कृतं कर्म न स्मरंति सदा जनाः । ते वै तत्फलमाप्नोति कर्म चापि चतुर्विधं ॥ १४ ॥ लो-
कपालाश्चाप्य पश्येव शष्टो वेदाश्रयः कृतः । शांत्यर्थं मनसस्तात तेन नहृष्ट्वानुशासनं ॥ १५ ॥

स्मरंति न त्वेवं चरे वेपि श्रुत्वेति पुण्येपावे पुण्ये न कर्मणा भवति यन्निश्चतज्ञाय तन्माप्य वरणि विवाधनेनेति वेदशास्त्रोपि यः कर्मप्राधान्यपरः सोपि शांत्यर्थपरे हि (म) लक्ष्मस्य हानिं च हृष्ट्वा
उन्नमानां समाधानार्थं शास्त्रकृतकर्मणा न वशान्तुः सुखी नं च दुःखी तिना यत्न वृद्धे धो तीति न संतापत्वया कार्य इति प्रयुज्यते अत एतत् देवप्रतिपादनं बृहह्मानां हृष्ट्वस्मा
दीनां लोकायतागमप्रणेतृणां शासनं न भवति न हि धर्मः प्रत्यक्षस्य विषयः अपौरुषेयात् नाप्यनुमानस्य तस्यापि प्रत्यक्षपूर्वकत्वात् तदुभयाविषये यः शास्त्रः स केवलं (देव)
य वेदार्थ इति भावः ॥ १५ ॥

एतद्रूपयतिचक्षुषेति इंद्रियमनोवाक्शरीरैः शुभमेकं तद्विविधं पुण्यपापमिश्रमिश्रात्मकं तादृशं तत्कार्यं फलं प्रतिपद्यते अयमर्थः कार्यवैचित्र्यात्कारणवैचित्र्यं तावदव
श्यं कल्प्यं तत्र कर्मवैचित्र्यकृतं लोके वेदे च कृतं विहाय समानेपि भौतिकत्वे नंतानवस्थितत्वप्रामाण्यकस्वभाववादं कल्पयतो विस्पष्टं मूर्खत्वमिति भावः १६ एत
देवाह निरंतरमिति कर्मेति तत्फलं लभ्यते कश्चिन्निरंतरं दुःखमेव लभते कदाचित्सुखमेव लभते कदाचिन्मिश्रं सुखदुःखमयं लभते यादृशेषु दुःखं हस्तेमे सुखमिति न

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधं कुरुते यादृशं कर्म तादृशं प्रतिपद्यते १६ निरंतरं च मिश्रं च लभते कर्म पार्थिव कल्या
णं यदि वा पापं न तु नाशोस्य विद्यते १७ कदाचित्सुकृतं तात कूटस्थमिव तिष्ठति मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते १८
ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते सुकृतक्षयाद्दुष्कृतं च तद्विद्धि मनुजाधिप १९ दमः क्षमा धृतिस्तेजः संतोषः सत्यवादिता ह्री
रहिंसाव्यसनिता दाक्ष्यं चेति सुखावहाः २०

चैतत्स्वभाववादे युज्यते नहि वह्नेरुष्णस्वभावः कंचित्कालमुष्णः कंचित्कालं शीतः कंचित्कालमनुष्णाशीत इति दृश्यते न चामुतराविनाशिनः कर्मणः क
र्थं कालांतरीयं फलं युज्यत इत्याशंकाह न तु नाशोस्य विद्यत इति अस्य कर्मणः कर्मजन्मस्य पुण्यपापात्मकस्यापूर्वस्य ईश्वरस्थीतिरूपस्य वा भोगं विना नाशो
नास्तीत्यर्थः १७ इमं श्लोकं व्याचष्टे कदाचिदिति कूटस्थ्यमपक्षपातस्थूलं दुष्कृतविरोधेनेत्यर्थः १९ अथ दीनेतिच्छेदः सुखावहाः पुण्यपापयोः सम्
लोकेदेयत्सुखं तदावहंतीतितथा २० स१

नियतः यावज्जीवमेकैकभागी अन्येनोह्यमानोपभोगस्य भावात् नित्यं समाधाने ब्रह्मदर्शने हृ[illegible] नो समाधौ प्रयतेत २१ न चैतत् मिन्नः पुत्रस्य वा सुकृतेन तत्सुखं शक्यमिति स्मा
हृतानामिति यो यथा करोति स तथा प्राप्नोतीत्यनुवादार्थः २२ सुखदुःखे देहेनैव तत्पाप्यापेक्ष समाधाय तत्फलं सानेनात्मनि प्रविलाप्य पुमानन्येनेन त्यान वर्त्मना गच्छति इष्टं
स्फुप्राप्नोति यश्च संगतो जनः पार्थिवः पृथिवीस्थः स्त्रीपुत्रपशुगृहधनारामादिः स च स्वकर्मतो गच्छति न तु स्वर्गे ऽपवर्गे वा उपकरोतीत्यर्थः २३ परेषामिति यस्म

दुष्कृते सुकृते चापि न जन्तुर्नियतो भवेत् नित्यं मनः समाधाने प्रयतेत विचक्षणः २१ नायं परस्य सुकृतं दुष्कृतं चापि सेवते करो
ति यादृशं कर्म तादृशं प्रतिपद्यते २२ सुखदुःखे समाधाय पुमानन्येन गच्छति अनेनैव जनः सर्वः संगतो यश्च पार्थिव २३
परेषां प्रतिकूलानि न कुर्यात्तत् परं नरः यो वै स तु पथा युक्तः सो ऽवश्यं स नियच्छति २४ भीरू राजन्मोक्षार्थं सर्वभयेभ्यो विशेषतो नी
त्वा वा हीनवर्णोऽलसश्च विद्वान् श्वासी लोहहीनः कुलीनः सन्नाद्धि अरण्यमाश्रिताः स्त्रीचट्टुश्च २५

मे परकृतं स्वरूपेण द्रष्टव्यं निषिद्धं कर्म करोतीति दोषवत्तया वद्धीनतत्तत्त्वयं न कुर्यात् न कि न स प्रापि कर्तव्यानेत्याह यो युक्तः योगी अथ स तु दोषदर्शी सः अव
श्यं निषिद्धं नियच्छति नियमेन स्वीकरोति तस्मात्तं ग्राह्य वर्जितः योगयुक्तो भवेदिति निष्कर्षोऽर्थः २४ यथा तु पापवान् योगी निर्घः एवं विरक्तोऽपि योगमू
मो निषिद्ध एवेति वक्तुं दृष्टान्तपूर्वकमाह भीरुरिति द्वाभ्यां प्रजासु स्नेहहीन इति स्नेहपरित्यागयुक्तं सोऽपि विरक्तः योगाभ्यासहीनः तर्हि शोच्य नायाति तेन योगः
महती परतिभावः २५

२६ शान्तोपरि पंचदशोध्यायः एवं मुमुक्षोर्देहेन्द्रियमनसां प्राक्कर्मणामसक्तत्वं बुद्ध्वा सकलकर्मोच्छेदाय योगमाश्रयेदिति सूचितं तदेव व्याचष्टे मनइति द्वाभ्यां मनोमयेर
थः शरीरं तदेव रथस्तत्र लोकान्तरगतिसाधनं इंद्रियार्थाः शब्दादयः हयाइव वाहकाः यस्य तं मायामयः ज्ञानसंभूतैः तत्तदाकारवृत्तिसंवलितैः रश्मिभिश्चिद्रश्मिभिः ग्र
स्तानि विषयान् चिन्मयत्वेनैव पश्यति स बुद्धिमान् देहं प्राप्य ब्रह्मभावेन विश्वं पश्यन् मुच्यत इत्यर्थः १ अत्र यमनक्रमाणां तीक्ष्णमाहसेवेति अभ्यासेन यत्किंचि
द्गातं तन्मनोभिस्तेन निरालंबनेन मनसा स्थितस्य अतएव वृत्तिहीनस्य पुंसः सेवा भक्तिः ध्यानरूप ईश्वरप्रणिधानं शास्त्रेण निर्विकल्पसमाधिना ब्रह्म्यानं

रागोयुक्तः पच्यमानोत्महेतोर्मूर्खोवक्तानयहीनंचराष्ट्रं एते सर्वे शीघ्रतां यांति राजन् मन्त्रायुक्तः स्नेहहीनः प्रजासु
२६ शांतौ मोक्षधर्मेषु पराशरगीतासु पराशर उवाच मनोरथरथं प्राप्य इंद्रियार्थहयं नरः रश्मिभिर्ज्ञानसंभूतै
र्यो गच्छति स बुद्धिमान् १ सेवाश्रितेन मनसा वृत्तिहीनस्य शस्यते द्विजातिहस्तान्निर्वृत्ता न तु तुल्यात्परस्परात् २
तु

श्रेष्ठमित्यर्थः हे द्विज कीदृशी सेवा अतिहस्तान्निर्वृत्ता हस्तशब्देन तत्साध्यं कर्म लक्ष्यते अतिहस्तो अतिक्रान्तकर्मा सर्वपापानां तरति नैनं कृताकृते तपः
श्रोपते चासकर्मीणामादिक्कतिभ्यः क्षीणकर्मा ब्रह्मवित्तं प्राप्य निर्वृत्ता निष्पन्ना सदाचार्यप्रसादात्तथा न तु परस्परात्तुल्यान्निर्वृत्ता परोक्षज्ञानिनां
न परस्परोपदेशे ऽधिकारः किंतु परोक्षज्ञानमेव उपदेष्टा युक्त इत्यर्थः यथोक्तं परोक्षज्ञानमात्रेणनाचार्यत्वनिपुणस्त इति तद्विज्ञानार्थं स गुरुमेवाभिगच्छे
त्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति श्रुतिस्मृत्योः ब्रह्मनिष्ठं तत्त्वदर्शिन इति विशेषणाच्च २

मनदेवशीघ्रंसाधनीयमित्याहाशेरिति नसुलभंकिंतुदुर्लभं नावकर्षेत्‌विषयसेवनैर्नाशयेत्‌ किंतुपुण्येनकर्मणाउत्कर्षार्थंउन्नयेत्‌स्वर्गस्थभूमिलाभार्थंश्रय
तेत ३ वर्णाभ्यः ब्रह्मगीतासूक्तेभ्यः षड्भ्यः कृष्णधूम्रनीलरक्तहारिद्रशुक्लेभ्यः सत्वरजस्तमसांख्यसच्छूद्रतारतम्यात्कासितेभ्यः शरीरेभ्यः उत्कृष्टाद्वर्णात्‌नीचवर्णो
त्पन्नः संमानंश्रैष्ठ्यंनार्हतिपरिमितफलमेवव्याचष्टेनलितीति ४ नवर्णोत्कर्षंलब्ध्वाकुपुरुषः पापेनस्वात्मानंहन्यात्‌नानानरकपातेनहिंस्यात्‌ ५ पापंदुःखं

आयुर्नसुलभंलब्ध्वानावकर्षेद्विशांपते उत्कर्षार्थंप्रयतेतनरः पुण्येनकर्मणा ३ वर्णेभ्योहिपरिभ्रष्टोनवैसंमानमर्हति न
तुयः सत्क्रियांप्राप्यराजसंकर्मसेवते ४ वर्णोत्कर्षमवाप्नोतिनरः पुण्येनकर्मणा अज्ञानाद्धिकृतंपापंतपसैवाभि
निर्णुदेत्‌ पापंहिकर्मफलतिपापमेवस्वयंकृतं ६ तस्मात्पापंनसेवेतकर्मदुःखफलोदयं पापानुबंधंयत्कर्मयद्य
पिस्यान्महाफलं नतत्सेवेतमेधावीशुचिःकुशलिनंयथा ७ किंकष्टमनुपश्यामिफलंपापस्यकर्मणः प्रत्यापन्न
स्यहितस्यनात्मातावद्विरोचते ८ प्रत्यापत्तिश्चयस्येहबालिशस्यनजायते तस्यापिसुमहांस्तापः प्रस्थितस्योपजायते

६ पापंकर्मेतिसंबंधः कुशलिनंकारुकंचंडालविशेषमित्यर्थः ७ कुत्सितंचतत्कष्टंचकिंकष्टं ततः पापाद्धेतोः प्रत्यापन्नस्यविपरीतदृष्टेः अनात्मा
देहादिरेवविशेषेणआत्मत्वेनरोचते ८ प्रत्यापत्तिः वैराग्यंप्रस्थितस्ययोगेप्रवृत्तस्यउत्तरभूमिलाभात्तापः जायते प्रस्थितस्यमतस्यवा तापोनरकजः ९

विरक्तं स्वतः शुद्धं तत्विपरीतेन रागेण रक्तांतं वहुं शोधयते परंतु कृतेन मस्त्रातकेन उक्तं संहितं रक्तं न शोधयते एवं येन मनः पापं किंचित् शोधितुं शक्यं कोचिद् शक्यमिति नि
वोधवुध्यस्व १० धीपूर्वं कृतं तेन नश्यतीत्याह स्वयमिति ११ अहिंसा अहिंसया तृतीयालोपश्चार्षः ब्राह्मणाः इति पाठे वेदसंबंधिनः १२ तथा अस्त्र उक्तः कर्म काम
कृतं विहिंसा अहिंसा नैवानुकर्षतीति वह्मवादिनः स्मृतिकाराः यथोक्तं प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् कामतो व्यवहार्यस्तु वचनादिह जायत इति कर्म कृत

विरक्तं शोधयत्येवं हृत्तं न तु कर्मोपसंहितं । यथैतेन मनःश्रेष्ठं पापमेवं निबोध मे ॥ १० ॥ तपं कृत्वानुपः पापं मुंचमेवानुतिष्ठति मा
यश्चित्तैनः कर्तुमुभयं सोमुत्रेह च ॥ ११ ॥ अज्ञानात्तु कृतां हिंसामहिंसा व्यपकर्षति । ब्राह्मणः शास्त्रनिर्दिष्टा हिंसा
दुर्बलस्य वादिनः ॥ १२ ॥ तथा कामकृतं नाम्ना विहिंसैवानुकर्षति । इत्याहुर्धर्मशास्त्रज्ञा ब्राह्मणा वेदपारगाः ॥ १३ ॥ अ
हं तु नावगच्छामि कर्मैषदृष्टेनैकृतं । गुणयुक्तं प्रकाशं वा पापेनानुपसंहितं ॥ १४ ॥

मिति पाठे कामतः इत्यध्याहर्तव्यं तथा कामकृतं चास्येति पाठे तु अकामकृतवत् कामकृतमपि अहिंसैवापकर्षतीत्यर्थः १३ एवं परमतमुपन्य
स्य कामतोऽकामतो वा कृतं कर्म वक्तुः अस्य संवाभोग वद्त्वान्नैव नश्यतीति स्वमतमाह अहं त्वित्यादिना गुणयुक्तं पुण्यं कर्म प्रकाशं वुद्धिपूर्वकं प्रकाश
ज्ञात्वेत्यर्थः शमुत्तं तपिदं १४

मनसा बुद्धियुक्तानि इदमित्थं कुर्यामिति विमर्शपूर्वकं इदमित्थं कर्तव्यमेवेति निश्चयेनार्थः यथातथं स्थूलसूक्ष्मतारतम्येन फलंति सुखदुःखादिकं प्रयच्छंति १५
नित्यमत्र यमिवाणि फलं तत्त्वणां न क्षावहं उग्रेण हिंसया यथा बुद्धिपूर्वकं कृतं कर्म नियमेन फलदं एवं अबुद्धिपूर्वं कृतमपि तयोर्विशेषस्तु फलबहुत्वाल्पत्वकृतो
न तु फलसद्भावकृत इति श्लोकद्वयार्थः १६ ननु कर्मफलस्यापरिहार्यत्वे कथं विश्वामित्रेण वशिष्ठस्य पुत्रशतं हतं तत्फलं न रक्षपातश्च न मातङ्गत्वादिकं

न पथा तूर्ण्यानि कर्माणि फलं तो ह्ययथातथं बुद्धियुक्तानि तानीह कृतानि मनसा सह १५ भवत्यल्पफलं कर्म सेवितं नित्य
मुल्बणं अबुद्धिपूर्वं धर्मज्ञ कृतमुग्रेण कर्मणा १६ कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा न चरेत्तानि धर्मात्मा श्रुत्वा
चापि न कुत्सयेत् १७ संचिंत्य मनसा राजन् विदित्वा शक्तिमात्मनः करोति यः शुभं कर्म स वै भद्राणि पश्यति १८ नवे कपा
ले सलिलं सन्न्यस्तं हीयते यथा नवेतरे तथाभावं प्राप्नोति सुखभावितं १९ सतोयेऽन्यत्तु यत्तोयं तस्मिन्नेव प्रसिच्यते वृद्धे हि
वृद्धिमवाप्नोति सलिलं सलिलं यथा २० एवं कर्माणि यानीह बुद्धियुक्तानि पार्थिव समानि चैव यानीह तानि पुण्यतमान्यपि
२१

लौकिकत्वाच्च तदुदाहरणमपि माह कृतानीति १७ नवे अपक्वे सलिलं न्यस्तं चेत् हीयते कपालमेव न वेतरे पक्वे जलं न्यस्तं चेत् तथाभावं यथापूर्वं दृढं स्थितं
तथा पूर्वमेव प्राप्नोति न हीयते एवं तेजस्विनं पापपुण्ये प्राप्तोनेकर्षन हिनस्ति इतरं तु हिनस्त्येवेति भावः २० समानि चानतिविषमाणि २१ २१

मो०
३६५
365

एवं साधारणं धर्ममुक्त्वा राज्ञां विशेषधर्मानाह राजेति श्रेयसेवप्रिश्रविरक्तेनापि मध्येमध्यमेविरक्तेन २२ आत्मानमपिवेत्सहिंसासूचिता गरीयसः गुरुतरानब्र
ह्मविद्यामहतानसतेनब्रह्मज्ञानमपेक्षयेनेनवसत्नीतिवतहेतौतत्नीषा २३ शान्तोपरिरोडशः नवहृंगराज्ञायेषांमुनीनांपालयितास्मि। जेषांयोगफलस्यषष्ठां
शहर्ताचास्मिचतामनब्रह्मज्ञानयेनगुरुसेवाःपेक्षते तेषामहिंसादिभिर्यीपाहिंसादेरपिवृद्धिसंभवात् यथोक्तंप्रातंजले अहिंसाप्रतिष्ठायांतत्संनिधौवैर
४१

एताजेतत्साः शान्तवश्चाचनाश्वसम्यक्कर्तव्यंपालनंचप्रजानां अग्निश्चेयोवहुभिश्चापियज्ञैरंतेमध्येवावनमाश्रित
स्वयं २२ इमाश्चितः पुरुषोधर्मशीलोभूतानिचात्मानमिवानुपश्येत् गरीयसः पूजयेदात्मशक्त्यासत्येनशीले
नमुत्वंनरेंद्र २३ शांतौमोक्षधर्मेषुपराशरगीतासु पराशरउवाच कः कस्यचोपकुरुतेकश्चकस्मैप्रयच्छति मा
णीकुरुतेसयंकर्मसर्वमात्मार्थमात्मना १

नागरूपाशंकाह कः कस्येति यसंप्रतिकर्मजन्मोमोक्षः स्यात्तर्हिगुरुनैवतत्त्वानेकमाक्षोमोक्षः दृष्टार्थंचज्ञानंभोजनादिवत्नरइनरेणामा
त्रंकृतस्योपकरोति कर्मदृष्टफलंभोजनादि आत्मनाशरीरेंद्रियबुद्धिरूपेण आत्मार्थं आत्मनएवतत्साधयं ननुएवंकर्मकश्चित्कुरुतेनीम
र्थः १

राम०
३६५

यत्नुमात्रदेवोमत्वापित्तदेवोमवेस्मादिरक्तनेदेवदराणधितोमात्रादिरुपकरोतेवेत्याशंकानुपकारिणंमात्रादिकमपितज्जंसेवलोकेः तोनकश्चित्कंचिदुप
करोतीत्याह गौरवेणेति यत्नुमात्राघारणधनंतदपिस्वामुष्मिकायैहिकायवासहितायैवनतुमात्रादिहितायेतिभावः १ कथंतस्योत्महितमाचरेदित्यतआह
विशिष्टस्येत्यादि विशिष्टात्प्रतिग्रहः निर्धनसदानेनतुल्यः सधनस्यतुदानंपुण्यप्रतरमित्यर्थः ३ दानप्रशस्तप्रकारमाहन्यायेति ४ कद्धिंधनस्यवृद्धिंनान्यस्य

२१

गौरवेणापिसंकल्पैः स्वेच्छयापिविवर्जयेत् सोऽर्थधनानामपिकिमुतामंश्यग्रनं २ विशिष्टस्यविशिष्टाच्चतुल्योदानप्रतिग्रहे
तयोः पुण्यतरंदानंतद्विजस्यप्रयच्छतः ३ न्यायागतंधनंचैवन्यायेनैवविवर्द्धितम् संरक्ष्यंयत्नमास्थायधर्मार्थमितिनि
श्चयः ४ नधर्मार्थीनृशंसेनकर्मणाधनमर्जयेत् शक्तितः सर्वकार्याणिकुर्वीतनधनर्द्धिमवलम्बयेत् ५ अपोहित्वयतः शीता
त्वापिताह्वलनेनवा शक्तितोऽतिथयेदत्वाक्षुधार्त्तायाश्नुतेफलं ६ रंतिदेवेनलोकेष्वासिद्धिःप्राप्तामहात्मना फ
लपत्रैरथोमूलैर्मुनीनर्चितवानसौ ७ तैरेवफलपत्रैश्चसमाठरमतोषयत् तस्माल्लेभेपरंस्थानंशैब्योपिपृथि
वीपतिः ८ निकुंपी३

रेतद्धर्मार्थेमनुषंजनीयं २ निर्धनस्यापिदानफलमस्तीत्याह अपइति फलंच्चतत्दानस्येतिशेषः ७ अतिथिपूजाफलमुक्त्वादेवपूजाफ
लमाहतैरेवेति समा रंमाठरेणापरिपार्श्वगेणसहितंतमोऽरसूर्यं अतोषयद्धुत्सइतिसंबंधः माठरोऽरुणदंडाख्यचंडांशोः परिपार्श्वगाइत्यमरः ८

२१

१८ वाचा वेदशास्त्रमध्याश्रवणमननादिनेत्यर्थः शेषा वहार्येणा पंचयज्ञशेषेणान्नेन पालनेन मूतदत्ययथा आत्मनोपि अनृणतां व्रजेत् तथाम त्वर्गसपुत्रादेः अदितः कर्मजैर्नक्रमो दि चिकीर्षेत तेनापि आत्मन एवानृणतां व्रजेत् ११ प्रयत्नेन ध्यानधारणादिना द्रुतान् हुतवहं अग्निहोत्रं कृ तेमर्थः १२ कृतीकृतनयो गमदितनत्र अजीगर्तसुतोगमदिति पठनीयं सुनः शेपो ह्यजीगर्तपुत्रः सन्विश्वामित्रपुत्रतामापेतिहि वह्वृचब्राह्म

देवतातिथिभृत्येभ्यः पितृभ्यश्चात्मनस्तथा ऋणवान्जायते मर्त्यस्तस्मादनृणतां व्रजेत् ९ स्वाध्यायेन महर्षिभ्यो देवेभ्यो यज्ञकर्मणा पितृभ्यः श्राद्धदानेन नृणामभ्यर्चनेन च १० वाचा शेषावहार्येण पालनेनात्मनोपि च यथावद्भृत्यवर्गस्य चिकीर्षेत्कर्मयत्नादितः ११ प्रयत्नेन च मेसिद्धा धनेरपि विवर्जिताः सम्यग्धुत्वा हुतवहं मुनयः सिद्धिमागताः १२ विश्वामित्रस्य पुत्रत्वमृचीकतनयो गमत् ऋग्भिः स्तुत्वा महाबाहो देवान्वै यज्ञभागिनः १३ गतः शुक्रत्वमुशना देवदेवप्रसादना ते देवीस्तुत्वानुगगने मोदते यशसा वृतः १४

शेप इत्याम्नायते न च तत्तनयशब्दो गौणपरः कर्तुं शक्यः ऋचीको हि भार्गवः जामदग्न्यस्य पितामह इत्यर्थः अथर्वीकादयो जमदग्निपितरो रामभक्तचरित्रादिपर्वाणि समंतपंचकाख्याने लिंगदर्शनात् अजीगर्तस्त्वांगिरसः यथैवांगिरसस्तत्तनुपेयां तव अत्रता मिति विश्वामित्रं प्रति वह्वृचब्राह्मणे शुनःशेपवचनात् यथाकथंचिद्व्याख्येत्समाधेयं यः विश्वामित्रपुत्रत्वं अगमत् तं देवान् स्तुत्वा सिद्धिमागत इत्यध्याहृत्य इत्यर्थः रोगापाजं १४

२१ अग्निरिति जनयितापः पिता स एव न तत्त्वेः अदात्मपद्यात्मपत्नयः परिचर्याः सेवाः २२ क्लीबः कामहीनः सन् यः प्रीतियोगात्केवलं स्मार्द

असितोदेवलश्चैवतथानारदपर्वतौ कक्षीवान्जामदग्न्यश्चरामस्तांड्यस्तथात्मवान् १५ वसिष्ठोजमदग्निश्चविश्वामित्रो
त्रिरेवच भरद्वाजोहारिश्मश्रुः कुंडधारःश्रुतश्रवाः १६ एतेमहर्षयःस्तुत्वाविष्णुमृग्भिःसमाहिताः लेभिरेतपसासिद्धिं प्र
सादात्तस्यधीमतः १७ अनर्हाश्चार्हतांप्राप्ताः संतःस्तुत्वातमेवह नतुवृद्धिमिहान्विछेत्कर्मकृत्वाजुगुप्सितं १८ ये
र्थाधर्मेणतेसत्यायेधर्मेणधिगस्तुतान् धर्मंवैशाश्वतंलोकेनजह्याद्धनकांक्षया १९ आहिताग्निर्हिधर्मात्मायः सपु
ण्यकृदुत्तमः वेदाहिसर्वेराजेंद्रस्थितास्त्रिष्वग्निषुप्रभो २० सचाप्यग्र्याहितोविप्रःक्रियायस्यनहीयते श्रेयोह्यनाहिताग्नि
त्वमग्निहोत्रंननिष्क्रियं २१ अग्निरात्माचमाताचपिताजनयितातथा गुरुश्चनरशार्दूलपरिचर्यायथातथं २२ मानंत्य
क्त्वायोनरोवृद्धसेवीविद्वान्क्लीबःपश्यतिप्रीतियोगात् दाक्ष्येणाहीनोधर्मयुक्तोनदांतोलोकेस्मिन्वैपूज्यतेसद्भिरार्यः २३

शांतौमोक्षधर्मेषुपराशरगीतासु

यादृष्यापश्यतिदाक्ष्येणसंदेनहीनः अयासमूलः सत्योधर्मपरः नदांतइत्येकंपदं दांतनिष्छिन्निदांतः दान आर्जवछेदनयोरितस्मात्क्त
निरिक्तः नदम्योनदांतः नैकधेतिवत्समासः हिंसाशून्यइत्यर्थः २३ शांतोपीसमरस्याः

ध्रुवोध्यायेयतः स्वस्योपकर्त्तोऽस्मोनास्तित्वतः अात्मोपकारापेक्षयमानं तत्कामान्सेवेतेत्युक्तं तत्र द्विजसेवाप्रधानत्वात्तदर्थं शूद्रस्य वृत्तिं महीकरोति वृत्तिरिति
वर्णोन्मात्राह्मणक्षत्रियवैश्येभ्यः हीनस्य शूद्रस्य वृत्तिः जीविका द्विजसेवा सेवकान्धर्मिष्ठान्कुरुते ऽतः शोभनादृष्टादृष्टोभयार्थत्वात्तन्न हि याजनकराद
ना १

पराशर उवाच वृत्तिः स्वकाशाद्वर्णोभ्यस्त्रिभ्यो हीनस्य शोभना प्रीतोपपन्नोनिर्दिष्टा धर्मिष्ठान्कुरुते सदा १ वृत्तिस्वेच्छालि
शूद्रस्यापि तथैतामहीक्षत्वा नवृत्तिंपरलोमार्गेत्शुश्रूषांतु प्रयोजयेत् २ सद्भिस्तु सह संसर्गः शोभते धर्मदर्शिभिः नित्यं
सर्वास्ववस्थासु नातद्भिरितिमेमतिः ३ यथोदयगिरोद्रव्यंसन्निकर्षेणदीप्यते तथा सत्संनिकर्षेणहीनवर्णोपिदीप्य
ते ४ यादृशेनहिवर्णेनभाष्यतेशुक्लमंबरं तादृशंकुरुतेरूपमेतदेवमवैहिमे ५ तस्माद्गुणेषुरज्येथामादोषेषुकदाच
नअनित्यमिहमर्त्यानांजीवितंहिचलाचलं ६ सुखेवायदिवादुःखेवर्तमानोविचक्षणः यश्चिनोतिशुभान्येवसभद्रा
णीहपश्यति ७

नवाशिष्मादयोविप्रादिजीविकास्तेषांधर्मिणाष्टतायेभवंतिश्वतः सत्सेवयालोकद्वयंसाधयेदितिभावः १ परतःत्रैवर्णिकसेवाव्यतिरेके
ण २ शुश्रूषामेवस्तौतिसद्भिरित्यादिना ३ द्रव्यंमणिकांचनादि दीप्यतेसूर्यसन्निकर्षेण अतएवसंध्ययोः सूर्यरश्मयोग्यप्रभाविद्यु
रणाद्भक्ताः दृश्यंते ६ तंत्राणि।सएवशान्द्वदर्शीत्यर्थः ७

९ एवं पर्जन्यदेवतां कृष्टिमन्नकृषिगोरक्षादि १० अजिह्मैः दंभहीनैः अशठक्रोधैः वित्तशाठ्यक्रोधहीनैः ११ निर्मार्जनं भूमिसंमार्जनादि १३ तस्मादिति
धर्मेणारक्षती निरुह्यते तत्तनुत्पलमात्रेणेत्यर्थः १५ प्राणासंतापपूर्वकमपि निर्दिष्टा रत्नाः काकिनी विंशति वराटिकाः कपिंजलाधिकरणान्नापेन वहु

धर्मोदयेनं यत्कर्म यद्यपि स्यान्महाफलं न तत्सेवेत मेधावी न तद्धितमिहोच्यते ८ यो हत्वा गोसहस्राणि नृपो दद्यादरक्षिता
स शब्दमात्रफलभाक् राजा भवति तस्करः ९ स्वयंभूरसृजच्चाग्रे धातारं लोकसत्कृतं धातासृजत्पुत्रमेकं लोकानां धारणे रतं
१० तमर्चयित्वा वैश्यस्तु कुर्याद्रस्यर्थमृद्धिमत् रक्षितव्यं तु राज्ञैव रूपयोज्यं द्विजातिभिः ११ अजिह्मैरशठक्रोधैर्हव्यक
व्यप्रयोक्तृभिः शूद्रैर्निर्मार्जनं कार्यमेवं धर्मो न नश्यति १२ अप्रनष्टे ततो धर्मे भवन्ति सुखिताः प्रजाः सुखेन तासां राजे
न्द्र मोदन्ते दिवि देवताः १३ तस्माद्यो रक्षति नृपः स धर्मेणाभिपूज्यते अधीते चापि यो विप्रो वैश्यो यश्चार्जने रतः १४ य
श्च शुश्रूषते शूद्रः सततं नियतेन्द्रियः अतोऽन्यथा मनुष्येन्द्र स्वधर्मात्परिहीयते १५ प्राणसंतापनिर्दिष्टाः काकिण्योऽपि महा
फलाः न्यायेनोपार्जिता दत्ताः किमु तान्याः सहस्रशः १६ सत्कृत्य तु द्विजातिभ्यो यो ददाति नराधिपः यादृशं तादृशं
नित्यमश्नाति फलमूर्जितं १७

तन्निलेपपर्यवसन्नं निष्क्रोपिकाकिमः इत्यर्थः १८ यादृशं तादृशं सश्रद्धमश्रद्धं वा यो नित्यं ददाति तथा च श्रुतिः श्रद्धया देयं ह्रिया देयं संविदा देयं

अश्रद्धया देयं श्रिया देयं अश्रिया देयं ।

यं धियादेयमिति १८

तत्तुष्ट्यापात्रतुष्ट्यर्थं अभिष्टुतं सर्वैर्नः प्रशस्तं १८ तं धर्मं दानेदानात्मकं १९ अतिक्रामेत् भयाद्वा विविधेनत्रपापेन संश्रयात् गृहपाशात् २०
दाक्षिण्येनसेवार्थोत्साहेन २१ शांत्योपरिव्राट्दशः दानप्रशंसाप्राकृतामार्गसंतापनिर्दिष्टाइत्यादिना तदर्थमर्थोर्नतोपायंनियमपत्रमानपि

अभिगम्यचतत्तुष्ट्यादत्तमाहुरभिष्टुतं याचितेनतुयद्दत्तंतदाहुर्मध्यमंबुधाः १८ अवज्ञयादीयतेयत्तथैवाश्रद्धयापिवा तदाहुरधमंदानंमुनयःसत्यवादिनः १९ अतिक्रामेत्मज्जमानोविविधेननरःसदा तथाप्रयत्नंकुर्वीतयथामुच्येत संश्रयात् २० दमेनशोभतेविप्रःक्षत्रियोविजयेनतु धनेनवैश्यःशूद्रस्तुनित्यंदाक्ष्येणशोभते २१ शांतोमोऽस्यधर्मेषुपराशरगीतासु० पराशरउवाच प्रतिग्रहागताविप्रक्षत्रियेषुध्विनिर्जिताः वैश्येन्यायार्जिताश्चैवशूद्रैःशुश्रूषयार्जिताः १ देशु
स्वल्पाप्यर्थाः प्रशस्यंतेधर्मस्यार्थेमहाफलाः नित्यंत्रयाणांवर्णानांशुश्रूषुःशूद्रउच्यते २ क्षत्रधर्माविश्यधर्माता वृत्तिः यततेद्विजः शूद्रधर्मापदातुस्यात्तदापततिवैद्विजः ३ वाणिज्यंपाशुपाल्यंचतथाशिल्पोपजीवनं शूद्रस्यापिविधीयंतेयदावृत्तिर्नजायते ४ रंगावतरणंचैवतथारूपोपजीवनं मद्यमांसोपजीव्यंचविक्रयंलोहचर्मणोः
५

यस्तंगार्हस्थ्यधर्मंनपश्यति प्रतिग्रहागताइत्यादि १ नपतनइतिसंबंधः ३ शिल्पंचित्रलेखनादिवृत्तिः सेवारूपा ४ रंगेत्वादिविशेषेण अवतरणं रूपोजीवनंजलमंडपिकेतिदाक्षिण्यात्तेषुनमिदं यत्रसूक्ष्मवस्त्रमवधाय चर्ममयैराकारैः राजामात्यादीनांचार्थम दर्शने ५

अश्विनापि न श्रेयस्म घायुष्ज्ञीवनं न कृतं सोः पूर्वैर्नितन्नवकर्तव्यं ६ सद्भिः नर्धाववृद्धैरिः न या वृद्धैर्दुराचरितमपि न लोकर्तव्यं ७ मदृएवकुतोऽभ

अपूर्वैर्गणनकर्तव्यंकर्मलोकेविगर्हितं कृतपूर्वंतुत्यजतोमहान्धर्मइतिश्रुतिः ६ सवृद्धःपुरुषोलोकेयदाचरतिपापकं म
देनाभिभूतमनसास्तत्र्यनयाप्रमुच्यते ७ अपूर्वंतेहिपुरायोगेषुप्रजाधर्मेदृशासनाः दांताधर्मप्रधानाश्चमायधर्मानुवर्तिकाः
८ धर्मएवसदान्दृणामिहराजन्यशस्यते धर्मवृद्धाग्रणानेवसेवंतेहिनराभुवि ९ तंधर्ममसुरास्तातनामृष्यंतजनाधिप
विवर्द्धमानाः क्रमशस्तत्रतेः न्वाविशन्प्रजाः १० तासांदर्पः समभवत्प्रजानांधर्मनाशनः दर्पात्मनांततः पश्चात्क्रो
धस्तासामजायत ११ ततः क्रोधाभिभूतानांवृत्तंलज्जासमन्वितं ह्रीश्चैवाप्यनशद्राजंस्ततोमोहोव्यजायत १२ त
तोमोहपरीतानामनायश्यंतयथापुरा परस्परावमर्देनवर्द्धयंतोयथासुखं १३ ताः प्राप्यतुसधिग्दंडोनकारणामतो
भवत् ततोऽभ्यगच्छद्देवांश्च ब्राह्मणांश्चावमन्य ह १४

वर्तितत्त्वाहसूपतेह्रीमादिना ९ असुराः कामक्रोधादयः ११ अनशत् अनश्यत १३ नकारणंतासांनियमनेइतिशेषः ततस्ताः प्रजाः
देवान्ब्राह्मणांश्चावमन्यअभ्यगच्छन्विषयान्सेवंतेस्मेत्यर्थः १४

एवं कामक्रोधादिद्वारेण प्रजानां बंधं प्रदर्श्य हंसेप्रेण तद्विहतुपायमाह एतस्मिन्निति देवाः शमदमादयः देवः ईश्वरः ततोपि वरं श्रेष्ठं शिवं तुर्यं मायन्त्वप्र सुषुप्त्या
भिमानि मो विश्वं तैजसः प्राज्ञो भोविराट् सूत्रांतर्यामिमस्वपरं चतुर्थं ब्रह्म शिवमद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेय इति श्रुतिप्रसिद्धं बहुरूपं मायये तिशेषः इंद्रो मायाभिः
पुरुरूप ईयत इति श्रुतेः गुणैः निरतिशयज्ञानैश्वर्यादिभिरधिकं १५ तेन शिवेन साक्षात्कृतेन ते सुराः कामक्रोधाद्याः गगनगाः मायाकाशव्याकृतांतर्गताः सपुराः पुरैः स्थूलसू

८१

एतस्मिन्नेव काले तु देवादेववरं शिवं आगच्छत्पुरगांभीरबहुरूपं गणाधिकं १५
तेन तस्मात्ते गगनगाः सपुराः पतिताः क्षितौ तिष्ठत्येकेन बाणेन देवाप्यापिनतेज
सा १६ तेषामधिपतिस्त्वासीद्भीमो भीमपराक्रमः देवतानां भयकरः सहतः
शूलपाणिना १७

क्ष्मकारणशरीरैः सहिताः क्षितौ ऐश्वर्ये शुद्धचिन्मात्रांतः प्रविष्टेन तथाच श्रुतिः यदा बोधेन तु शरीरात्मा ब्रह्मतत्त्वं प्रपश्यते अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेदिति दे
वैरिंद्रियैः व्याप्तितेन निजतासंस्कारशेषेण सः अर्थः १६ ननु एवं संस्कारशेषेण पुनः उपत्तं मुक्तिमूर्छौ योपुनर्स्ती तानत्र आह तेषामिति तेषां कामादीनामधिपति भीमो भयंक
रो महामोहः शूलपाणिना शूलवत्तीक्ष्णायपयातु व्याप्तः एव भूतया पाशिस्यचेतसाधीनपमर्थः १७

तस्मिन्नहमो हे हृते स्वं भावं ब्रह्मभावं मानवाः जीवाः ब्रह्मपद्यंत ब्रह्मैव भवति । स एवैष तत्त्वतस्तेषां निष्कृतेः यथापुरेति सृष्ट्यादौ यथा मरीच्यादयो वैदिकनिष्ठा ब्रा
ह्मणाः तथा ततः स्नातो नरमपि जीवन्मुक्ताः अनादि तस्यास्तनावशात् दैवनिष्ठाए वात्रजानर्थः १८ ततइति देवानां इंद्रियाणां राज्ञेव शीले दिवि हार्द काशे वा तवं वास
यति स्वरूपचैतन्येन शरीरेंद्रियादीनि तिवासवं षिवराज्यात् तंअभिषिच्य ब्रह्मनिष्ठत्वेन जितेंद्रियान्भूत्वा सप्तर्षयः षट्यिणाः लोकशिष्यांकृत वंतइत्यर्थः १९ आधि
कारिकेभ्यः सप्तर्षिभ्योपि ब्रह्मविद् श्रेष्ठमाह सप्तर्षीणामिति आर्कीभिलक्षमसकृर्ध्वे ब्रह्मत्वमिमशोभि हितं विष्णुरूपं तस्मात्सम आयय सप्ततीरेवागत

तस्मिन्नहृते यथास्वं भावं ब्रह्मपद्यंत मानवाः आपद्यंत च वेदाश्चैव शास्त्राणि च यथा पुरा १८
ततोभिषिच्य राज्येन देवानां दिवि वासवं सप्तर्षयः स्वायंभुवं जनं राजा दंडधारिणं १९
सप्तर्षीणामथोर्ध्वं च विष्णुर्नाम पार्थिवः राजानः क्षत्रियाश्चैव मंडलेषु पृथक् पृथक् २०

मोक्षलक्षणासंविधानेति स्कंते शिरसि सहस्रारे ब्रह्मनिहितं तस्य समीपे श्रोत्रादिस्थानेषु इन्द्रामेव गोत्तम भरद्वाजा विश्वामित्र कश्यपास्त्रयः षट्ष्टिर्विधीयते ततो
ऽधस्तनेषु मूलाधारादिषु चक्रेषु राजशब्दितं तत्तद्देवताधिष्ठितेषु ब्रह्मैव विराजते इत्यर्थः ऋषीणां श्रोत्रादीनां ऊर्ध्वे उपरि सहस्रारे विष्णुर्विगतं पृथु पृथिवीना
ते अवयवा पवयारुसु शरीरं तद्वहितः अशरीरः परमात्मास्ति पार्थिवः पृथिवी शरीरं तदाश्रितः तथा च अशरीरं शरीरेषु अनवस्थेष्ववस्थितमिति श्रु
तावशरीरस्यापि शरीरस्थत्वं श्रुतं राजानइति राजानः षट्चक्राधिपाः गणेशाद्याः क्षत्रियाः योगविघ्नविनाशिन इत्यर्थः २०

ईहकृत्तानानिदानस्यकामादिजयस्यदौर्लभ्यमाहावधानार्थंमहाकुलेष्वित्यादिना २३ संसिद्धः निष्पत्तिसिद्धस्यात्मानात्तदधिगमंआत्मज्ञानंआत्मसुखभावनिर्वृत्तयेसंपादनीयमित्यर्थः त

धा२

महाकुलेषुयेजाताहृद्धाःसर्वतरक्रतुये तेषामभ्यासयोगोभावोहृद्यान्नापसर्पति २१ तस्मात्तेनैवभावेनसानुषंगेणपार्थिवाः आ
सुरणेपवकर्माणिरामतेवतृभीमविक्रमाः २२ यस्तत्तिष्ठश्चतेषेवत्तामेवस्यापयंतपि भजंतेतेनवा पियेवालिशतराननरः २३
तस्माद्दृढंत्रतीमित्वांराजन्कंचिंतशास्त्रतः संसिद्धाधिगमंकुर्यात्कर्मनहिंसात्मकंत्यजेत् २४ नसंकरेणद्रविणंप्रचिन्वीयाद्वि
चक्षणः धर्मार्थंन्यायमुत्सृज्यनतत्कल्याणमुच्यते २५ सत्वमेवंविधोदांतःक्षत्रियःप्रियबांधवः प्रजाभृत्यांश्चपुत्रांश्चस्वधर्मे
णानुपालय २६ इष्टानिष्टसमायोगोवैरंसौहार्दमेवच अथजातिसहस्राणिबहूनिपरिवर्तते २७ तस्माद्गुणेषुरज्येथामा
दोषेषुकदाचन निर्गुणोऽपिहिदुर्बुद्धिरात्मनःसोतिरज्यते २८ मानुषेषुमहाराजधर्माधर्मौप्रवर्तितः नतथान्येषुभूतेषुमनु
ष्यरहितेष्विह २९ धर्मशीलोनरोविद्वानीहकोनीहकोऽपिवा आत्मभूतःसदालोकेचरेद्भूतान्यहिंसया ३०

त्रोपायःकर्मनहिंसात्मकंत्यजेदित्यादि २६ इष्टेति सर्वेष्वपिजन्मसुइष्टादियोगोस्त्येवेत्यर्थः २७ आत्मानःगतोः अतिरज्यते आतीवतुष्टोभवति २९ ईहकोःआयुष्यर्थी ३०

हृदि स्थितमतस्येति हृद्यत्वं सावधानमनस्त्वं आनन्त्यं अनंतत्वं अहंकारः अज्ञानं वा तद्रहितत्वेनेत्यर्थः ३१ एतेन कृतार्थत्वमुक्तमिति भावः निर्ममत्वं निरहंकारः निर्गतता अज्ञानं वा मनोऽयदा भवति तदा
कल्याणं ब्रह्मानंदं ऋच्छति प्राप्नोति ३१ शान्तिपर्वणि नीलकंठीये भारतभावदीपे ३१ इति मोक्षधर्मपर्वणि टीकायां अष्टाशीत्यधिकद्विशततमोऽध्यायः शीलाधिकारेषु तपः प्रशंसितुं गार्हस्थ्यं निंदति प्रायेणेत्यादिना २

परस्परेण हृद्यत्वं मनो भवति तस्य वै । आनंत्यं चैव भवति तथा कल्याणमर्हति ३१ शां० मो० क्षधर्मेषु पराशरगीतासु पञ्च०
पराशर उवाच एष धर्मविधिस्तात गृहस्थस्य प्रकीर्तितः । तपोविधिं तु वक्ष्यामि तन्मे निगदतः शृणु १ प्रायेण च गृहस्थस्य ममत्वं
नाम जायते । संगागतं नरश्रेष्ठ भावै राजसतामसैः २ गृहाण्याश्रित्य गावश्च क्षेत्राणि च धनानि च । दाराः पुत्राश्च भृत्याश्च
भवंतीह नरस्य वै ३ एवं तस्य प्रवृत्तस्य नित्यमेवानुपश्यतः । रागद्वेषौ विवर्द्धेते ह्यनित्यत्वमपश्यतः ४ रागद्वेषाभिभूतं च
नरं द्रव्यवशानुगं । मोहजाता रतिर्नाम समुपैति नराधिप ५ कृतार्थो भोगिनं मत्वा सर्वो रतिपरायणः । लाभं ग्राम्य-
सुखादन्यं रतितो नानुपश्यति ६ ततो लोभाभिभूतात्मा संगाद्वर्द्धयते जनं । पुष्ट्यर्थं चैव तस्येह जनस्यार्थं चिकीर्षति
७ स जानन्नपि चाकार्यमर्थार्थं सेवते नरः । बालस्नेहपरीतात्मा तत्क्षयाच्चानुतप्यते ८
भोगिनं आत्मानं मत्वेति शेषः ६ जनं कुटुंबं दासादासादिकं अर्थं धनं चिकीर्षति विक्षिपति हृद्यर्थं कुसीदं व्यापारं करोतीत्यर्थः ७ ८

येन स्वादिना भोगी भोगसंपन्नः स्यादिति मन्वानस्तत्करोति तस्माद्देवत्वादिकं विनश्यति ९ बुद्धियुक्तानां फलासंगिनां तज्जतां निषिद्धकाम्यकर्मरणीति
शेषः १० देहापतनं स्त्रीपुत्रादि ११ तप एवानुपश्यति श्रेयस्त्वेन १२ धनत्वमर्थवानेतादृशा अविवेकवान् प्रियसुखेत्वादि तसुत निमित्तं श्रीरागः क्लेशं श्रा

ततो मानेन तं प्रपन्नो रक्षन्नात्मपराजयं करोति येन भोगी स्यादिति तस्माद्धि नश्यति ९ तथा हि बुद्धियुक्तानां शाश्वतब्रह्मवा
दिनां चैव विद्धतां मुधे कर्मन्नरक्षणां तज्जनां सुखं १० देहापतननाशाश्च धननाशाश्च पार्थिव आधि आधिपतापश्चानिर्वेदमुप
यान्ति ११ निर्वेदाद्धात्मसंबोधः संबोधाच्छास्त्रदर्शनं शास्त्रार्थदर्शनाद्राजंस्तप एवानुपश्यति १२ दुर्लभो हि मनुष्येषु
नराः प्रशमवान् यो नरो वै प्रियसुखे हीनतस्तपः कर्तुमवस्यति १३ तपः सर्वगतं तात हीनस्यापि विधीयते जितें
द्रियस्य दान्तस्य स्वर्गमार्गप्रवर्तकं १४ प्रजापतिः प्रजाः पूर्वमसृजत्तपसा विभुः क्वचित्क्वचिद्व्रतपरो व्रतान्यास्थाय पा
र्थिव १५ २५

तः तत्र दोषदृष्ट्या तपः कर्तुं निश्चिनोति १३ सर्वगतं साधारणं स्मरणात् हानादि हीनस्य शूद्रादेरपि १४ प्रजापतिः सृष्टियज्ञमानावस्थायां क्व
चित्क्वचिन्निकृष्टे देशे व्रतानि स्नानोपासनादीनि सोपासनानि कर्माणि वान्यास्थाय फलावस्थायां ब्रह्मत्राणसमर्थ इति संबंधः १५

एवमादित्यादयोपिपूर्वंयजमानास्तत्तत्पदप्रापकाणिकर्माणिकृत्वाः दित्यादिभावंप्राप्ताइत्यर्थः तथाचश्रुतिः अग्निर्वाअकामयतअन्नादोदेवानांस्यामितिसएतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालंनिरवपदित्यादि येचिरंवयंतत्रयजमानास्तस्मिन्नग्निशब्दंप्रयोगेणाभिविनीयतेनिशामित्रसतेयः यस्मेतिएवयन्तस्तेदेवतान्यामद्रावस्वकला

आदित्यावसवोरुद्रास्तथैवाश्विमरुद्गणाः विश्वेदेवास्तथासाध्याः पितरोथमहर्षयः १६ यक्षरक्षसगंधर्वाः सिद्धाश्चान्येदिवौकसः संसिद्धास्तपसातातयेचान्येस्वर्गवासिनः १७ येवार्देब्राह्मणाः सम्यग्ब्रह्मणातपसापुरा नैभावपृतः पृथिवींचदिवंतथा १८ मर्त्य लोकेचराजानोयेचान्येगृहमेधिनः महाकुलेषुदृश्यंतेतत्सर्वंतपसःफलं १९ कौशिकानिचवस्त्राणिशुभान्याभरणानिच वाहना सनयानानितत्सर्वंतपसःफलं २० मनोनुकूलाःप्रमदारूपवत्यःसहस्रशः वासःप्रासादपृष्ठेचतत्सर्वंतपसःफलं २२ शयना निचमुख्यानिभोज्यानिविविधानिच अभिप्रेतानिसर्वाणिभवन्तिशुभकर्मिणां २३ नाप्राप्यंतपसःकिंचित्त्रैलोक्येपिपरंतप उ पभोगपरित्यागःफलान्यकृतकर्मणां २४ सुखितोदुःखितोवापिनरोलोभंपरित्यजेत् अवेक्ष्यमनसाशास्त्रंबुद्ध्याचनरपत्तम २५

तेषांप्राप्यतइतिशेषहं २३ नाप्राप्यमिति अकृतकर्मणांकृतकर्मस्वल्पहीनानांअनुत्तमत्वतत्प्राणानांअनुत्तमत्वतत्प्राणानांतपसःफलानिउपभोगपरित्या गोवैराग्यं २४ शास्त्रंअवेक्ष्यलोभंत्यजेदितिसंबंधः २५

ततः असंतोषात्कलोभाव २६ अज्ञानाशेऽपि किंस्यादत आह नैषइति मायंकर्त्तव्याकर्त्तव्यनिर्णयं योवैप्रियसुखेक्षीणाइत्युपक्रांतमुपसंहरतितस्मादिति २७ कृतस्य
तपसः फलंसुखंअकृतस्यदुःखं २८ प्राकाश्यंविख्याततां ३० धर्मइति धर्मादेर्यथाकालकर्त्तव्येषुसत्तिअस्यविधिमात्रविहितकार्यचिकीर्षाजायते तथापिनिष्क

असंतोषोसुखायेतिलोभादिंद्रियविभ्रमः ततोस्यनश्यतिप्रज्ञाविद्येवाभ्यासवर्जिता २६ नष्टप्रज्ञोयदाभवतितदान्यायंनपश्यति तस्मात्सुख
क्षयेप्राप्तेपुमानुग्रंतपश्चरेत् २७ यदिष्टंतत्सुखंप्राहुर्द्वेष्यंदुःखमिहोच्यते कृताकृतस्यतपसःफलंपश्यतयादृशं २८ नित्यंभद्रा
णिपश्यंतिविषयांश्चोपभुंजते प्राकाश्यंचैवगच्छंतिकृत्वानिष्कल्मषंतपः २९ अप्रियाण्यवमानांश्चदुःखंबहुविधात्मकं फला
र्थीतत्फलंतस्मात्प्राप्नोतिविषयात्मकं ३० धर्मेतपसिदानेचविधित्साचास्यजायते सकृत्वापापकान्येवनिरयंप्रतिपद्यते ३१
सुखेतुवर्त्तमानोवैदुःखेवापिनरोत्तम सुवृत्ताद्योनचलतिशास्त्रचक्षुःसमानवः ३२ इषुप्रणतमात्रंहिस्पर्शयोगेरतिःस्मृता रस
नेदर्शनेघ्राणेश्रवणेचविशांपते ३३

र्मकालेयोऽन्यानिकर्माणिकामकारेणकरोतिसतान्येवपापानिकृत्वानरकंप्रतिपद्यते एतेनअनित्याकरणमात्रात्प्रत्यवायोनेतिपरास्तं अभावाद्भावोत्पत्त्यसंभवात् ३१
इषुरिति यावताकालेनइषुःधनुषोमुक्तोबाणोभूमौपततितावत्कालिकमेवस्त्र्यादिस्पर्शेसुखमित्यर्थः सएवमायोरसनादावपीत्याह रसनइति ३३ ॥

नत्स्यात्सुखस्यात्नर्हि नित्यं सुखमेव कुतो न स्यान्न प्रार्थयंते इत्याशंक्याह अबुधा इति पतनो भूयः अतो नित्यं सुखं मोक्षाख्यं न प्रशंसंत्यपि किमु तदर्थं यतिष्यंते बुधा येन प्र
शंसंतो निपारेयेन तीव्रवेदनादुःखेन हेतुना बुधाः मोक्षं प्रशंसंतीति संबंधः ३४ ततो विषयसंसर्गान्तां तीव्रवेदनाकारत्वाद्धेतोः सर्वस्य विवेकिनः प्राप्तिफलार्थं फलाप
मोक्षाय गुणाः शमादयः भवंति तत्साधने तत्र स्वतंत्रकामार्थौ नाभिभवितुं शक्नुतस्तस्मादहं धर्मेति ३५ ननु सर्वेषां रब्धकर्माधीनं किं मे हि केन यत्नेनेत्याशंक्याह अप्रय

ततोऽस्य जायते तीव्रा वेदना तत्प्रमादतः अबुधा न प्रशंसंति मोक्षं सुखमनुत्तमं ३४ ततः फलार्थं सर्वस्य भवंति ज्यायसे गुणाः
धर्मवृत्त्या च सततं कामार्थाभ्यां न हीयते ३५ अप्रयत्नागताः सेव्या गृहस्थैर्विषयाः सदा प्रयत्नेनोपगम्यश्च स्वधर्म इति मे मतिः
३६ मानिनां कुलजातानां नित्यं शास्त्रार्थचक्षुषां क्रियाधर्मविमुक्तानामशक्त्या संवृतात्मनां ३७ क्रियमाणं यदा कर्म नाशं
गच्छति मानुषं तेषां नान्यदृते लोके तपसः कर्म विद्यते ३८

त्वयोर्विषयौ विभजते अप्रयत्नेनेति प्रारब्धकर्मोपस्थापिताः स्वान्नपानादयः सेव्याः तेषु हि कश्चित्कस्यचित्संबाद दर्शनेन पुरुषकारस्य दौर्बल्यात् धर्मे हि पुरुषका
रप्राबल्यात् अन्यथा विधिनिषेधशास्त्रमनर्थकं स्यादिति भावः ३६ मानिनामिति पूर्वोक्तानामपि तान्क्रियाउन्नयणद्वैपात्तैः कर्तुमशक्तेरसमर्थः संवृतात्म
नां मूढमनसां ३७ अभयेषाधर्मान्विभजते क्रियमाणमभिसारिना कर्मयज्ञादिकं मानुषं मनुष्योद्दिष्टमभिमानवता कृतं यस्मादेवं तस्मात्तेषां शास्त्रचक्षु
षां तपसो विद्याएदन्यत्कर्म न विद्यते ३८

संहृतात्मनां धर्ममाह सर्वात्मनेति कर्मनिश्चयं यज्ञादौ बुद्धिं ४० शान्तोपरिविंशतितमः एवंधर्मानुक्त्वाउत्तरेणांतरमुत्कर्षापकर्षौ पृच्छतिवर्णाइति तत्रवर्णाः पूर्वोक्ताः ष
ट् कल्मषधूम्रनीलरक्तपीतश्वेताः कर्मणाबुद्धिसत्त्वेनतमोरजोंशयोरधिकाल्पाभ्यामपकर्षजाः तत्रविशेषः स्वाभाविकवर्णाद्राधिक्यंतमोरजसोर्ह्रासह्रासइत्यर्थः यदेतदितिसार्द्ध

सर्वात्मनानकुर्वीतगृहस्थः कर्मनिश्चयं दाम्भेणाहम्यकृत्वार्थे स्वधर्मविचरन्नृप ३९ यथानदीनदाः सर्वेसागरेयांतिसंस्थितं
एवमाश्रमिणः सर्वेगृहस्थेयांतिसंस्थितिं ४० शांतौमोक्षधर्मेषुपराशरगीतासु जनकउवाच वर्णोविशेषवर्णानांमहर्षेकेन
जायते एतदिच्छाम्यहंज्ञातुंतद्ब्रूहिवदतांवर १ यदेतज्जायतेपत्यंसएवायमितिश्रुतिः कथंब्राह्मणतोजातोविशेष
ग्रहणंगतः २ पराशरउवाच एवमेतन्महाराजयेनजातः सएवसः तपसस्त्वपकर्षेणजातिग्रहणतांगतः ३ सुक्षेत्राच्च
सुबीजाच्चपुण्योभवतिसंभवः अतोऽन्यतरतोहीनादवरोनामजायते ४ वक्त्राद्भुजाभ्यामूरुभ्यांपद्भ्यांचैवाथजज्ञिरे सृजतःप्र
जापतेर्लोकानितिधर्मविदोविदुः ५

कस्मात्ब्राह्मणोऽपत्येलोके सात्विकैरेवब्राह्मणैर्भवितव्यं कथंरजआदिप्रधानंक्षत्रादिविशेषग्रहणंजातिग्रहणंतत्रतत्रइत्याक्षेपार्थः ३ तपसोऽप्यपकर्षः कुतइ
त्यतआहसुक्षेत्रादितिसात्विकयोर्दंपत्योःपुण्यः संभवः तयोरन्यतरस्यहीनत्वेहीनइत्यर्थः ४ अन्यतरहीनत्वमपिकुतइत्याशंक्योत्पत्तिस्थानभेदादित्याह वक्त्रादि
तिद्वाभ्यां ५

७ अंबष्टादीनां स्वरूपं जातिविवेकादिभ्यो ज्ञेयं सवर्णायां ब्राह्मणात् क्षत्रेण मूर्धावसिक्तः क्षत्रियायां वैश्यायां अंबष्ठः निषादस्तु शूद्रायां पारसवश्च सहस्तादिना ९ मनुनिरपवादमाकृत्या ज्ञागृह्य नमिति सर्वैश्वर्यस्यैतेन कुतो वयं वक्ष्यमाणेन निर्यांकते ब्रह्मणेति ब्राह्मणेनेति पाठे एकेन ब्रह्मणोत्पादितेष्वं नानात्वं ब्रह्मसृष्टानां दिभावेन भिन्नत्वं गोत्रतः अत्र पृष्टः गोत्रा

मुखजा ब्राह्मणास्तात बाहुजाः क्षत्रियाः स्मृताः ऊरुजा धनिनो राजन् पादजाः परिचारकाः ६ चतुर्णामेव वर्णानामागमः पुरुषर्षभ अतोऽन्ये त्वतिरिक्ता ये ते वै संकरजाः स्मृताः ७ क्षत्रजातिरथांबष्ठा उग्रा वैदेहकास्तथा श्वपाकाः पुल्कसाः स्तेना निषादाः सूतमागधाः ८ आयोगाः करणा व्रात्याश्चंडालाश्च नराधिप एते चतुर्भ्यो वर्णेभ्यो जायंते वै परस्परम् ९ जनक उवाच ब्रह्मणैकेन जातानां नानात्वं गोत्रतः कथं बहूनीह हि लोके वै गोत्राणि मुनिसत्तम १० यत्र तत्र कथं जाताः स्वयोनिं मुनयो गताः शूद्रयोनौ समुत्पन्ना वियोनौ च तथापरे ११ पराशर उवाच राजन्नैतद्भवेद्ग्राह्यमपकृष्टेन जन्मना महात्मनां समुत्पत्तिस्तपसा भावितात्मनां १२

णो ब्रह्मसृष्टादीनि तथांबष्ठादीनि च तस्मान्नानात्वमपकृष्टमित्यर्थः १० तस्मादेतेऽपि ब्राह्मणा इत्याशंक्याह यत्रेति यथा काशीवत्सा शूद्रायामुत्पादिताः पुत्रा ब्राह्मणत्वं नीताः ननु तेन निषादत्वं प्राप्तमित्यर्थः तस्मात्कारणं हि एकार्यं द्वाराणां जातिभेदो न युक्त इति भावः ११ नैतदभ्युपगमेनैव परिहरति नैतदित्यादिना सार्धसप्तदशं हरतीति अपकृष्टेन वर्णेनात्र जन्मतः स्थितमतो रजस्तमोयुक्तेन १२

१६ मूलेतिमूलंकार्यंब्रह्मतत्रचत्वारिगोत्राणिनामानिसमुत्पन्नानिगुणयोगात्तथाचश्रुतिः एतमंगिराइत्याचक्षतेंगानांहिरसस्तेनेति तंदेवा त्वन्नन्वन्नयेषेनः सर्वेषां
वशिष्ठइतितस्माद्वसिष्ठइत्याचक्षतएनमेवसंतमित्यादिका १७ कर्मतोन्यानिगोत्राणितस्येदंविश्वंमित्रमासीद्यदिदंकिंचतस्माद्विश्वामित्रइत्याचक्षतएनमेवसंतमि

उत्पाद्यपुत्रान्मुनयोनृपतेयत्रतत्रह स्वेनैवतपसातेषामृषित्वंविदधुःपुनः १३ पितामहश्चमेपूर्वमृष्यशृंगश्चकश्यपः वेद
स्तांड्यः कृपश्चैवकाक्षीवत्कमठादयः १४ यवक्रीतश्चनृपतेद्रोणश्चवदतांवरः आयुर्मतंगोदत्तश्चद्रुमदोमत्स्यएवच
१५ एतेस्वांप्रकृतिंप्राप्तावैदेहतपसोश्रयात् प्रतिष्ठितावेदविदोदमेनतपसैवहि १६ मूलगोत्राणिचत्वारिसमुत्पन्ना
निपार्थिव अंगिराःकाश्यपश्चैववशिष्ठोभृगुरेवच १७ कर्मतोन्यानिगोत्राणिसमुत्पन्नानिपार्थिव नामधेया
नितपसातानिचग्रहणंसतां १८ जनकउवाच विशेषधर्मान्वर्णानांप्रब्रूहिभगवन्मम ततःसामान्यधर्मांश्चसर्व
त्रकुशलोह्यसि १९ पराशरउवाच प्रतिग्रहोयाजनंचतथैवाध्यापनंनृप विशेषधर्मोविप्राणांरक्षाक्षत्रस्यशोभना
२०

सादिष्कृतेः कर्मजान्येवसर्वाणिगोत्राणिपरमात्मनिकर्मजन्यैववर्णाश्रमगोत्रकल्पनेतिप्रघट्टकार्थः यानानिचगोत्राणितपसार्जितनामधेयापरपर्या
याणिसतांग्रहणंस्वार्षेयवरणंविवाहादिश्रौतस्मार्तव्यवहारालंबनंभवतीतिशेषः १८ एवंवर्णाद्युत्पत्तिंहान्वातदीयान्सामान्यविशेषधर्मान्पृच्छतिविशेषे
ति १९ २०

२२ आनृशंस्यादित्रयोदशकोगणः सर्ववर्णेष्वपिसाधारणः २४ अधीकारः उपनयनसंस्कारः मनुष्येषु चतुर्त्वमिति हैर्धः धर्मेषु द्विपदेषु २५ विकर्म निषिद्धं कर्म स्वकर्मसु संतं

कृषिरक्षणपाशुपाल्यं वाणिज्यं च विशामपि द्विजातीनां परिचर्या च शूद्रकर्म नराधिप २१ विशेषधर्मा नृपते वर्णानां परिकीर्तिताः धर्मान्सा
धारणांस्तात विस्तरेण शृणुष्व मे २२ आनृशंस्यमहिंसा चाप्रमादः संविभागिता श्राद्धकर्मातिथेयं च सत्यमक्रोध एव च २३ स्व
दारेषु संतोषः शौचं नित्यानसूयता आत्मज्ञानं तितिक्षा च धर्माः साधारणा नृप २४ ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः
अत्र तेषामधीकारो धर्मेषु द्विपदां वर २५ विकर्मावस्थिता वर्णाः पतन्ते नृपते त्रयः उन्नमन्ति यथा सन्तमाश्रित्येह स्वकर्मसु २६
न चापि शूद्रः पततीति निश्चयो न चापि संस्कारमिहार्हतीति वा श्रुतिप्रवृत्तं न च धर्ममाप्नुते न चास्य धर्मे प्रतिषेधनं कृतं २७

नरं आश्रितस्ववर्णाः सत्वादिगुणाः उन्नमंति २६ नचेति संस्कारार्हो द्विजत्वाभावे पतने तु न तत्वं यन्नाथे समर्थः धर्मे आनृशंस्यादित्रयोदशकरूपे २७ २७ २७

हे वैदेह द्विजाः शूद्रकं प्रजापतिं ब्राह्मणेन तुल्यमाहुः अहं तु तं विष्णुं क्षत्रियतुल्यं पश्यामि ब्रह्मविन्मूर्हि ब्राह्मणक्षत्रियौ यथोक्तं श्रेणपर्वणि श्रेणां प्रकृतब्रह्मकल्पोद्भवत्वात्से
श्वात्वे नारायणोपमः इति प्राचः वक्ष्यत स्तकये स्थूलं शरीरं समस्तं लिंगमेवात्मत्वेन प्रतिपन्नास्ते विदेहाः ये तु स्थूलसूक्ष्मे समस्तं प्रधानं स्वं कारणमात्मत्वेन प्रतिपन्नास्ते प्रक
तिलयाः त्रयमतिक्रांताः ब्राह्मणाः आद्यसमुक्तिर्जन्मद्वयेन अवहिता द्वितीयस्यैकेन अवांतरसत्यः एवं सति द्विजाः शूद्रं वैदेहकं विदेहेषु विदितं आहुः शूद्रः चिद्रूपं ब्रह्म जन्म

वैदेहकं शूद्रमुदाहरंति द्विजा महाराज श्रुतोपपन्नाः अहं हि पश्यामि नरेंद्र देवं विश्वस्य विष्णुं जगतः प्रधानं २८ सतां वृत्तिमधिष्ठाय
निहीना उज्जिहीर्षवः मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीः क्रियाः २९ यथा यथा हि सद्वृत्तमालंबंतीतरे जनाः तथा तथा सुखं प्रा
प्य प्रेत्य चेह च मोदते ३० जनक उवाच किं कर्म दूषयत्येनमथो जातिर्महामुने संदेहो मे समुत्पन्नस्तन्मे व्याख्यातुमर्हसि ३१
पराशर उवाच असंशयं महाराज उभयं दोषकारकं कर्म चैव हि जातिश्च विशेषं तु निशामय ३२

नीचाद्यब्राह्मणो भवतीत्यर्थः स्वमते तु सप्रधानं अत एकमेव जन्म प्राप्य मुच्यंते इति २८ ननु अयत्नस्य शूद्रस्य चित्तशुद्ध्यभावात्कथं विदेहत्वादिकं स्यादित आह सतामि
ति सतां वृत्तं स्मयाचारानादि विहीनाः शूद्राः उज्जिहीर्षवः आत्मानं उद्धर्तुमिच्छवः निहीनानिति पाठे कामादीन् दोषान् उज्जिहीर्षवः उच्छेत्तुमिच्छव इत्यर्थः २९
मोदते मोदते ३० एनं नरं दूषयति हीनतां नयति ३१

दुष्टकर्मत्यागेज्ञातिकर्मणोर्द्वयोरन्तरस्यापिचहेतुत्वमाहद्वाभ्यांज्ञात्वेति ३६ संन्यस्यायोग्यपरिग्रहंसंत्यज्येत्यर्थः यथाक्रमंप्रवितर्कविचारानंदास्मितारूप्यासुयोगभूमि-
षुपूर्वपूर्वभूमिकांसमारुह्योत्तरोत्तरभूमिकारोहणरूपकर्मपथयोगं ३७ प्रश्रिताः प्रह्वावंतः सुसंशिताः व्रतिनःसूक्ष्मबुद्धयः ३८ त्यक्त्वाऽधर्ममितिच्छेदः ३९ शांतोपरि

ज्ञात्वावकर्मणाचैवदुष्टंकर्मनसेवते ज्ञात्वादुष्टंस्वयंपापंनकरोतिविमत्सरः ३३ ज्ञात्वाचधान्यंपुरुषंकुर्वाणंकर्मधिक्कृतं कर्मेतरत्
दृष्ट्वापसेवंतस्मात्कर्मनशोभनं ३४ जनकउवाच कानिकर्माणिधर्म्याणिलोकेस्मिन्द्विजसत्तम नहिंसंतीहभूतानिक्रियमाणा-
निसर्वदा ३५ पराशरउवाच शृणुमेचमहाराजयन्मांत्वंपरिपृच्छसि यानिकर्माण्यहिंस्राणिनरंत्रायंतिसर्वदा ३६ संन्यस्याग्रे-
नुदासीनाः पश्यंतिविगतज्वराः नैःश्रेयसंकर्मपथंसमारुह्ययथाक्रमं ३७ प्रश्रिताविनयोपेतादमनित्याः सुसंशिताः प्र-
यांतिस्थानमजरंसर्वकर्मविवर्जिताः ३८ सर्वेवर्णाधर्मकार्याणिसम्यक्कृत्वाराजन्सत्यवाक्यानिचोक्त्वा त्यक्त्वाऽधर्मंदा-
रुणंजीवलोकेयांतिस्वर्गंनात्रकार्योविचारः ३९ शांतौमोक्षधर्मेषुपराशरगीतासु पराशरउवाच पितासुखायोगुरवः स्त्रि-
यश्चननिर्गुणानामभवंतिलोके अनन्यभक्ताः प्रियवादिनश्चहिताश्चवश्याश्चतथैवराजन् १

एकविंशः कानिधर्मकार्याणीत्यपेक्षायामाहपितेति निर्गुणानांभक्त्यादिहीनानामपिपित्रादयः यथोक्तंसेवाफलंदातुंनप्रभवंति येतुभक्तास्तेपित्रादिसे-
वाफलंप्राप्नुवंत्येवेत्यर्थः १

मो०
३७८

378

लाभंलाभहेतुंजिताःइंद्रियार्थाःयैस्ते शब्दादिविषयजयिनः ३ पार्थिवैःरथाश्वकवचादिभिःअनुघंतंआयुधमप्येवंयंतेंनं स्वयहीनंवा ४ अतिक्रमेत्नयेत् ७

पित्तापरैर्वतंमानवानांमातुर्विशिष्टंपिनंवरंति लानस्यलाभंपरमंवदंतिजितेंद्रियार्थाःपरमाप्नुवंति १ रणाग्निरेषप्रज्ञशराग्नि
संस्तरेन्नपान्मजोयातमवाप्यरक्षते ययातिलोकानमरैःसुडलंभान्विषवतेस्वर्गफलंपथासुखं ३ यातंभीतंन्वयष्टशस्त्रहृतदंतंपर
श्रुतंपार्थिवैःस्वहीनं अनुघंतेरोगिणंयाचमानंनवैहिंसाद्बालवृद्धौचराजन् ४ पार्थिवैःतुल्यकश्रुयतंतुस्तंआगतं स्व
तिक्रमेन्नंनृपतिःसंग्रामेक्षत्रियात्मजं ५ गुल्मादिहवधःश्रेयाविशिष्टावेतिनिश्चयः निहीनाक्रान्तदेवयक्रुपणाकहिंसावधः
६ पापात्मापहमाचारविहीनाश्चनराधिप पापएषवधःप्रोक्तोनकार्येतिनिश्चयः ७ नकश्चित्क्षातिग्रैराजन्नदिष्ठं
नवशमागतं स्ववशेपाप्यंवापिकश्चिवैवापकर्षति ८ त्रिस्रेस्वक्रियमाणानिकर्माणीहनिवर्तयेत् हिंसात्मकानि
सर्वाणिनायुरिछमराभुण ९

दिष्टांतंमृत्युं ८ त्रिस्रैःमात्रादिभिःक्रियमाणानिकर्माणिगादीनिनायुरितिपरमायोः प्राणान्नपोषयेत् ९ ९ ९ ९ ९ ९

स्म०
३७८

गृहस्थानामितिविनाशंवंधस्यवंयद्भाविः पक्षीपरमात्मापुरः सपक्षीभूत्वाहिरण्मयः शकुनिर्ब्रह्मनामह्यासुपर्णोऽस्मादिश्रुतिषुपरमात्मनिपक्षित्वाविशद्
त्रुपोगदर्शनात्तत्रनदृत्यंभाषेत्तीया परमात्मभावेनशंपरमानंदस्त्वभिकांक्षकामिनर्थः पुलिनपुपुलिनवन्नुतीर्थेषुनिधनंमरणंश्वेपः क्रियावतांतीर्थवासुश्रि
तकर्मवतां तथाचस्मृतिः यस्यहस्तौचपादौचमनश्चैवसुसंयतं विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुतइतिपुलिनेषपिसमुद्रगामिन्यएवनद्यः पश्चात्ताः
तथावश्यतिः इदंतेमाभिरस्मानमद्रुपोकास्वसिंधुंप्रवहंतिनद्यः सर्पोजीर्णामिवत्वचंजहातिपापंशशिरस्कोऽभ्युपेत्यति योऽनुनावंपतिष्ठितांवेदमन्ये

गृहस्थानांतुसर्वेषांविनाशमभिकांक्षतां निधनंशोभनंतानांपु
लिनेषुक्रियावतां १०

वतिष्ठतीतिच नीवंतारकाख्यांमरणावरूपांब्रह्मतत्त्वविद्यांयद्यप्येवंसर्वोऽसामपांब्रह्मविद्याप्रदत्वंभातंतथापिपद्यापुरोऽस्माशंचतद्ब्रह्मीकरोतित्वायेषंचतु
द्धीकरोतीतिवत्सामान्यशास्त्रविशेषेणावरूध्यतेएकंत्वत्रहिजंतोः मरणेसूक्ष्ममाणोपुरुषस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतीतिविशे
षश्रुतेःविमुक्तोऽन्तर्गतास्तेषामुत्तत्त्वियम्मते अत्रापिचश्रुहइतिश्रौतसप्तमीपुलिनेद्वितिपदेवसामीप्यव्याख्यानानेनत्वपांसमीपेपिमरणंयुक्तं ।

तद्धनहठेन संपादनीयमित्याह आयुषीति तथाहि तेन हि यद्दृष्टामरणप्रकारेण यत्कारणाद्भवति अज्ञानमात्रापनयेन स्वतः सिद्धं मोक्षरूपं तत्
कारणैः तीर्थमरणैः तीर्थमरणैर्हठादुपपादितं भवति। यथोक्तं वाशिष्ठे रचितग्रंथे मोक्षक्षेत्रेषु मृतानां कारणायेः श्रवणामृताः क्षेत्रमज्ञानमतलोपि सन्ति
क्षेत्रफलाश्रिताः इति। विमूढानां कारणाः इदं मुक्तिक्षेत्रमपि समवज्ञानानां क्षेत्रफलं मोक्षलक्षणं विना मुक्ताः इत्यर्थः अत्र हि तं तीर्थोदाहरणं प्रमाय यपि च

आयुषि क्षयमापन्ने पंचत्वमुपगच्छति तथा हि कारणाद्भवति कारणेनोपपादितं ११
तथा शरीरं भवति देहाद्येनोपपादितं अध्यानं गमकस्त्वायं यातस्त्वायं गेहहह १२

अन्यात्मज्ञानापनयोस्यैव तथापि स एवात्र शमादिकं विना मरणेन हठात्साध्यत इति मोक्षस्यापि हठसाध्यत्वमुपचाराद्युक्तं भवति ११ तीर्थेपि हठ
ठान्मरणं निंदति नयेति देहात्तलक्षणोपेपंचमी देहंप्राप्यमयेन पुंसा पंचत्वमिमनुकम्प्यते उपपादितं हठेन जलप्रवेशादिना संपादितं तस्मात् तथा शरीरस्य
वै देहप्रकारमेव शरीरं भवति देहस्यागोयातना शरीरं प्राप्नोतीत्यर्थः सोयं अध्यानं मोक्षमार्गं ततोपि कुत्सितत्वात् अध्यानं गतकः यतोयं मोक्षक्षेत्रेपि
गहाहहहेहाद्देहंमोक्षः १२

नत्विमस्य मोक्षो नास्त्येवेत्याशंक्याह द्वितीयमिति तत्र गृहहानरूपमोक्षे द्वितीयं कारणं काश्यपानृतस्यापि यातनादेहप्राप्तौ एकं कारणं देहमरणमभूत ततोऽपि देहोत्तरप्राप्तौ
नीयं कारणं नास्ति तस्य यातनादेहस्य भोगदेहत्वेन कर्मदेहत्वाभावाद्देहान्तरोत्पादकत्वं नास्तीत्यर्थः तद्देहं कीदृक्त्वमाह देहिनां सोऽपि यातनादेहः मोक्षभूतेषु मोक्षयोग्ये
पुरुषपिशाचेषु युक्तं आत्महत्यापापनिर्हरणाय यातनार्थं योजितं वर्तते १३ यातनादेहस्य स्वरूपमेतद्देहतुल्यमित्याह शिर इति गुणानां विषयाणां वासनामयानां १४
त्वगन्तं तु गौवस्त्रं तेन समापेयसत्वगस्थिमात्रमेरोमांसवर्जितमित्यर्थः गुणैः सात्त्विकादिभिः मर्त्यतां वायवीयमपि पूर्ववासनावशात् मनुष्यमात्राभिव्यक्त १५ अतएवत

द्वितीयं कारणं तत्र नान्यत्किंचन विद्यते न देहं देहिनां युक्तं मोक्षभूतेषु वर्तते १३ शिरःस्नाय्वस्थिसंघातं बीभत्सामेध्यसंकुलं भू
तानामिन्द्रियाणां च गुणानां च समागमं १४ त्वगन्तं देहमित्याहुर्विद्वांसोऽध्यात्मचिन्तकाः गुणैरपि परिक्षीणं शरीरं मर्त्यतां गतं १५
शरीरिणा परित्यक्तं निश्चेष्टं गतचेतनं भूतैः प्रकृतिमापन्नैस्ततो भूमौ निमज्जति १६

अशरोऽपि मर्त्यशरीरवत्ताश्रवदेवेत्याह शरीरिणेति कंचुकिना कंचुकमिव युक्ते न परित्यक्तं भूतैः अपंचीकृतैः प्रकृतिं स्वस्वकारणं प्राप्तैः भूतैर्यातनादेहारंभकैः प्रकृतिं
आत्मानं प्राप्तैः एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं यन्तीति श्रुतेः ततो भूमौ निमज्जति लोकदृष्ट्यां तथा च तस्याप्राणा उत्क्रामंत्य
त्रैव समवनीयन्ते इति प्राणानां तत्रैवात्मनि विलयदृष्ट्या लयं प्रदर्श्य तत्र छिद्रं यथा ध्मातो मृतः शेत इति लोकदृष्ट्या शरीरस्य भूमौ लयोऽपि क्रमात्प्रदर्शितः इदमपि रुद्रपिशा
चानामेव दृष्ट्या न त्वस्मद्दृष्ट्या नैवेत्तत्स्वतन्त्रमात्रादिति ध्येयं १६

ननु पाद्ये माघमाहात्म्ये वाराणस्यां मृतस्यापि ब्राह्मणस्य दशजन्मानि स्मर्यन्ते तत्कथं हि त्वामोघं कारणं तत्रैति जन्मान्तरप्रापकं कारणांतरं तस्य नास्तीत्यक्रमिमाशंकाहार्ध्वेन भावि
तमिति तत्तिशाच शरीरं कर्मयोगेन त्वात्महत्यायाद् वब्रह्महत्यादीनामनेकजन्मप्रापकाणामनेकेषां कर्मणां काश्यां कृतानां संभवात् तत्र तत्कर्म वासनया तत्रतत्र यातनाश
रीरं जायते १७ नैवं वरे शांतमरणादविशेषः स्यादाशंकाह इदमिति इदं यातनाशरीरं स्मृतं पत्र विषयेस्मिन् यत्र तत्र ध्रियते तत्तत्त्वभावः तत्रहृष्टोऽपरः विसर्गः जन्मकर्मणः

भावितं कर्मयोगेन जायते यत्र तत्र ह १७ इदं शरीरं वै देहि ह्यवयते यत्र यत्र ह तत्त्वभावोपरो हृष्टो विसर्गः कर्मणस्तथा १७
न जायते तु नृपते कर्मविकालमयं पुनः । शरीरमत्ति भूतानां मायामिवाबुधोरिमहान् १८ स पुनर्जायते राजन्नृपायेहा
यतनं नृप मनसः परमो ह्यात्मा इन्द्रियेभ्यः परं मनः । विविधानां च भूतानां जंगमाः परमा नृप १९ २०

फलभूतो हृष्टः यातनाशरीरविसर्गात्मकशरीरसन्तानीपोनमयतीत्यर्थः विसमर्देशतिपाठेपि स एवार्थः १७ यातनादेहस्तनुमतो वै लक्षणमाह न जायत इ
ति। भूतात्मा रुद्रपिशाचः न जायते स्वेन रूपेण ताविर्भवति यावत्पापक्षयं १८ च्यायतनं त्र्यधिष्ठानं प्राप्य तत्प्राधिजनितकालुष्यत्यागेनाः वगम्य त्र्यायतनस्वरूपमा
हमनस इति नि: संकसत्वमोक्षणामिमर्थः तस्मान्नि: संकल्पस्तस्योत्पत्ति इदेन त्मोक्षलक्षणामिति मैत्रायणीयश्रुतेः १९ एवं जंतूनां तारतम्यवर्जिमां देशविशेषा
यन्नां गतिमुक्त्वा कालायन्नां गतिं वक्तुं जंतूनां तारतम्यं तावदाह विविधानामिति २०

वर्मो ह्नल १

२१ आत्मसंबुद्धाः योगिनः अमानिनः योगैश्वर्यकृतदर्पहीनाः दर्पत्यागमूलं वि वेकमाह ज्ञातमिति २२ पुण्यकृत्ब्रह्मलोकं गंतुं अधिकारीत्यर्थः २३ तत्रमुख्यं साधनं
जनं क्लेशेन अयोजयित्वेति अत्रापि याहच्छिकमेव मरणं श्रेयः इत्याह मृत्युनेति आत्मकृतेन कालजेन २४ विषमिति योगं स्वतंत आधिपीडाग्रस्तोपि दुर्मरणं नेच्छेदित्यर्थः २६

जंगमानामपि तथा द्विपदाः परमा मताः द्विपदानामपि तथा द्विजा वै परमाः स्मृताः २१ द्विजानामपि राजेंद्र प्रज्ञावंतः परा मताः प्राज्ञा
नामात्मसंबुद्धाः संबुद्धानाममानिनः २२ जातमन्वेति मरणं नृणामिति विनिश्चयः अंतवंति हि कर्माणि सेवंते गुणतः प्रजाः २३ आप
न्नेनुत्तरां काष्ठां सूर्ये यो निधनं व्रजेत् नक्षत्रे च मुहूर्ते च पुण्ये राजन्स पुण्यकृत् २४ अयोजयित्वा क्लेशेन जनं साप्यमदुष्कृतं मृत्युनात्म
कृतेनेह कर्म कृत्वात्मशक्तिभिः २४ विषमुद्बंधनं दाहो दस्युहस्तात्तथा वधः दंष्ट्रिभ्यश्च पशुभ्यश्च प्राकृतो वध उच्यते २५
न चैभिः पुण्यकर्माणो युज्यंते चाभिसंधिजैः एवंविधैश्च बहुभिरपरैः प्राकृतैरपि २६ ऊर्ध्वं भित्वा प्रतिष्ठंते प्राणाः पुण्यवतां नृप
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्मणां २७ एकः शत्रुर्न द्वितीयोस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् येनावृतः कुरुते संप्रयुक्तो
घोराणि कर्माणि सुदारुणानि २८

उत्तरायणे मृतानां पुण्यकृतां गतिमाह। ऊर्ध्वमिति। सूर्यमंडलं भित्वेत्यर्थः सूर्यद्वारेण ते विरजाः प्रयांतीति श्रुतेः मध्यतो मनुष्यलोके। प्रासंगिकोयमर्द्धश्लोकः २७
देशकालनिरपेक्षा गतिस्तु केवलं अज्ञानात्यागसाध्या अपरागममात्रादेवेत्याह एक इति द्वाभ्यां २८

भा०
३७९

397

यस्य प्रबाधनार्थं क्रतिधर्मयुक्तं पथ्यास्यान्नथाहृद्धानुपास्य च भवेन्नसः अज्ञानशत्रुः प्रज्ञाशरेणोन्मथितः परैति नश्यति हे राजपुत्र २९ आश्रम च पधर्मः प्रज्ञाफातो
त्रपायइत्याह अधीत्येतिश्रेयः स्थित्वा श्रेयोर्थेति धृतिमन्न्रद्धो भवतीतिश्रेयः स्थित्वा मोक्षकामः आतोमनिन्क्रतिद्वनिपस्त्वेतिवनिवंतोपंशद्वः ३० अपिनाद्वियोग्यां

ष्ठर

प्रबाधनार्थं क्रतिधर्मयुक्तं वृद्धानुपास्य च भवेत पश्य बुध्यस्व तात्यो हि मराजपुत्र प्रज्ञाशरेणोन्मथितः परैति २९ अधीत्य वेदां
स्तपसा ब्रह्मचारी यज्ञाञ्छक्त्या संनिसृज्येह पंच वनं गच्छेत्पुरुषो धर्मकामः श्रेयः स्थित्वा स्थापयित्वा स्ववंशं ३० उपभोगैरपि त्य
क्तं नात्मानं सादयेन्नरः चंडालत्वेपि मानुष्यं सर्वथा तात शोभनं ३१ इयं हि योनिः प्रथमा यां प्राप्य जगतीपते आत्मा वै श
क्यते त्रातुं कर्मभिः शुभलक्षणैः ३२ कथं न विप्रणश्याम योनितोस्या इति प्रभो कुर्वंति धर्मं मनुजाः श्रुतिप्रामाण्य
दर्शनात् ३३ यो दुर्लभतरं प्राप्य मानुष्यं द्विषते नरः धर्मावमंता कामात्मा भवेत्स खलु वंच्यते ३४ यस्तु प्रीतिपुरो
गेण चक्षुषा तात पश्यति दीपोपमानि भूतानि यावदर्थान्न पश्यति ३५

रूपेणि प्रशंसन्निरुपभोगैरीतिचतुर्भिः ३३ योधर्मावमंतासकामात्माभवेत्सखलुकामेनवंच्यते ३४ प्रीतिपुरोगेणनमीत्सचिंतनेन पुरोगेणोतिपादः स्व
च्छः दीपोपमानिस्नेहेनसंवर्द्धनीयानि यावदर्थान्सर्वान्विषयान् दयावान्भूतानिपश्यतिविरक्तोः यर्थान्नपश्यतिय स्तमहीपतेइत्युत्तरेणसंबंधः ३५

राम०
३७९

३६ पुनरावृत्तिमतीं गतिमाह हानमित्यादिना शोभना मूर्तिः शांता आकृतिः हेमपूपस्रग्धरः आढ्यः तपसा च शरीरं क्षामं शोधनीयं तत्र आपः क्रमादात्मन आह सरस्वतीति

सांतेनान्नप्रदानेन प्रियवादेन चाप्युत । समदुःखसुखो भूत्वा स परत्र महीयते ३६ दानं त्यागः शोभना मूर्तिरद्भ्यो भूयः प्लावनं तपसा
वै शरीरं । सरस्वती नैमिषपुष्करेषु ये चाप्यन्ये पुण्यदेशाः पृथिव्यां ३७ गृहेषु येषामसवः पतंति तेषामतो निर्हरणं प्रशस्तं । या
नेन वै प्रापणं च श्मशाने शौचेन नूनं विधिना चैव दाहः ३८ इष्टिः पुष्टिर्यजनं याजनं च दानं पुण्यानां कर्मणां च प्रयोगः । श
क्त्या पित्र्यं यच्च किंचित्प्रशस्तं सर्वाण्यात्मार्थे मानवो यः करोति ३९ धर्मशास्त्राणि वेदाश्च षडंगानि नराधिप । श्रेयसोर्थे वि
धीयंते नरस्याक्लिष्टकर्मणः ४० भीष्म उवाच । एतद्वै सर्वमाख्यातं मुनिना सुमहात्मना । विदेहराजाय पुरा श्रेयसोर्थे
नराधिप ४१ शांतौ मोक्षधर्मेषु पराशरगीतासु । भीष्म उवाच । पुनरेव तु पप्रच्छ जनको मिथिलाधिपः । पराशरं
महात्मानं धर्मे परमनिश्चयं १ जनक उवाच । किं श्रेयः का गतिर्ब्रह्मन्किं कृतं न विनश्यति । क्व गतो न निव
र्तेत तन्मे ब्रूहि महामते २

स्वर्गे कुरुक्षेत्रादयः ३७ उक्तमेवार्थं प्रकारांतरेणाह गृहेष्विति ४१ शांतौ परिष्वांगिवाशः उक्तमर्थं संक्षेपेण वक्तुमारंभते पुनरेवेत्यध्यायः १ श्रेयः श्रेयसाधनं २

म १

ज्ञानमेवपरागतिः हेतुः ज्ञानं हि चिन्मात्रस्वरूपप्रतिपत्तिरेवपरागतिरित्यर्थः वापः दानं क्षेत्रे सत्पात्रे बीजमिति पाठे बीजमिवसुप्तमिति स एवार्थः ३ किंकृतं न
मित्रयुतीतस्येत्येवोक्त रमायेणा धायशेषः अधर्मेतिशेषः अभयकृतं अभयकरं दानं दत्वा सम्यक् संकल्पेनेत्यर्थः सिद्धिं मोक्षं अत्र निवर्त्तनं प्याानं इदं चतुर्थमन्त्रान्तरं ४

पराशरउवाच असंगः श्रेयसोमूलंज्ञानंज्ञानगतिःपरा चीर्णंतपोनप्रणश्येद्वीजंक्षेत्रेननश्यति ३ छित्वाधर्ममयंपा
शंयदाधर्मेभिरज्यते दत्वाभयकृतंदानंतदासिद्धिमवाप्नुते ४ योददातिसहस्राणिगवामश्वशतानिच अभयंसर्वभूते
भ्यस्तद्दानमतिवर्त्तते ५ वसन्विषयमध्येपिनवसत्येवबुद्धिमान् संवसत्येवदुर्बुद्धिरसत्सुविषयेष्वपि ६ नाधर्मःश्लि
ष्यतेप्राज्ञंपयःपुष्करपर्णवत् अप्राज्ञमधिकंपापंश्लिष्यतेजतुकाष्ठवत् ७ नाधर्मःकारणापेक्षीकर्त्तारमभिमुंचति
कर्त्ताखलुयथाकालंततःसमभिपद्यते ८ नभिद्यंतेकृतात्मानआत्मप्रत्ययदर्शिनः बुद्धिकर्मेन्द्रियाणांहिप्रम
त्तोयोनबुध्यते शुभाशुभेष्वसक्तात्माप्राप्नोतिसुमहद्भयं १०

अभयंसर्वभूतेभ्योयोददातितंमभितःसदाभयंवर्त्तते ५ बुद्धिमानअसंगभूतः दुर्बुद्धिः मनसाविषयसंगवान् ६ श्लिष्यतेआलिंगतितद्वत् आर्षः
पर्णोपत्रपर्णमिव ७ कारणफलदानात्मिकाक्रियातत्रिरपेक्षस्वपेक्षीसमभिपद्यतेफलंप्राप्नोति ततः अधर्मात्कर्त्ताकर्तृत्वाभिमानी ८ नभिद्यंते
कर्मफलैर्नक्लिश्यंतितेषांकर्मासंभवात् ९ कस्तर्हिभिद्यते तत्राहबुद्धीतिनबुध्यतेदृश्यते स्थितमितिशेषः १०

११ यथानद्यांवद्धः सेतुर्नैवसीदतिस्रोतः पुष्टिंचकरोति एवंच्चसन्तः धर्मएवसेतुर्येषांतेः मर्यादायांवद्धः नैवसीदति। संचयः तपोवृद्धिस्वस्फीताभवतीत्यर्थः
१२ समाधिनानियमेनदृष्टांते दार्ष्टांतिकेतुसमाधिनाध्यायेन। यथामणिः सौरंतेजआदत्ते एवंजीवोब्रह्मभावमादत्ते मणिराहारावृद्धेरिवयोगद्वाराब्रह्मभावा

वीतरागोजितक्रोधः सम्यग्भवतियःसदा विषयेवर्त्तमानोपिनसपापेनयुज्यते ११ मर्यादायांधर्मसेतुर्निवद्धोनैवसीदति
पुष्टस्रोतस्त्वासक्तः स्फीतोभवतिसंचयः १२ यथाभानुगतंतेजोमणिः शुद्धः समाधिना आदत्तेराजशार्दूलतथायोगःप्र
वर्त्तते १३ यथातिलानामिहपुष्पसंश्रयात्पृथक्पृथग्यातिगुणोतिसौम्यतां तथानराणांभुविभावितात्मनांयथा
श्रयंसत्वगुणः प्रवर्त्तते १४ जहातिदारांश्चजहातिसंपदः पदंचयानंविविधाश्चसत्क्रियाः त्रिविष्टपेजातमतिर्यदानरः
सदास्यवुद्धिर्विषयेषुभिद्यते १५ प्रसक्तएवहिविषयेषुयोनरोनवुध्यतेह्यात्महितंकदाचन सर्वभावानुगतेनचेतसान्
पामिषेणेवझषोविकृष्यते १६ संघातवन्मर्त्यलोकः परस्परमपाश्रितः कदलीगर्भनिःसारोनौरिवाप्सुनिमज्जति १७

भिद्यक्किमेवत्तीत्यर्थः १३ सौम्यतांरम्यतां यथाश्रयं पुनः पुनर्वासनाभ्यासात्तावुब्लातंतद्भावेनास्यः सत्वगुणः प्रवर्त्तते १४ भिद्यतेशब्दादिभ्योव्यावृ
त्तोभवति १५ आमिषेणवडिशगर्भितेनझषःमत्स्यः १६ संघातवत्देहेंद्रियादिसमुदायवत्मर्त्यलोकः स्त्रीपुत्रपश्वादिसमुदायः अपाश्रितःउ
पकारकः १७

पो०
३८१

381

नैतिसदा मृत्युः संनिहितोस्तीति सदैव धर्मः कार्य इत्यर्थः १८ धर्मेण चित्तशुद्धौ सत्यां योगाभ्यासः कार्य इत्याह यथेति। अंधो वै दिपि मार्गे गृहं गंतुं प्रवृत्तः अभ्यासादेव गच्छतीत्यर्थः
१९ योगाभावे निर्वाहमरणमिति जन्मनि जन्मनिमित्तं मोक्षधर्मेषु मोक्षधर्मान् अजानन् २० ज्ञानमार्गप्रवृत्तस्य तु भयं नापि सुखमित्याह बुद्धिमार्गेति २१
विस्तराः वैतानिकानि अग्निहोत्रादीनि संक्षेपाः त्यागादयः परार्थं अनात्मभूतफलार्थं मृणालेति लुप्तविभक्तिकं विसतंतुः कर्द्दममिव आत्मा उपाधिभूतं मनः

नधर्मकालः पुरुषस्य निश्चितो नचापि मृत्युः पुरुषं प्रतीक्षते सदा हि धर्मस्य क्रियैव शोभना यदा नरो मृत्युमुखेभिवर्त्तते १८ यथांधः स्वगृहे युक्तो भ्यासादेव गच्छति यथा युक्तेन मनसा प्राज्ञो गच्छति तां गतिं १९ मरणं जन्मनि प्रोक्तं जन्म वै मरणाश्रितं अविद्वान्मोक्षधर्मेषु बद्धो भ्रमति चक्रवत् २० बुद्धिमार्गप्रयातस्य सुखं त्विह परत्र च विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः परार्थं विस्तराः सर्वे त्यागमात्महितं विदुः २१ यथा मृणालानुगतमाशु मुंचति कर्द्दमं तथात्मा पुरुषस्येह मनसा परिमुच्यते
२२ मनः प्रणयते त्मानं स एनमभियुंजति युक्तो यदा स भवति तदा तं पश्यते परं २३

त्यजतीत्यर्थः २२ मनः कृतः संसारो मनसैव नश्यतीत्याह मनइति आत्मानं संधिरूपं प्रणयते योगोन्मुखं करोति स योगी एनं मनोरूपमात्मानं अभियुंजति परस्यां काष्ठायां युनक्ति प्रविलापयति युक्तः योगसिद्धः तं परं सर्वोपाधिविहीनं आत्मानं २३

राम०
३८१

परार्थे इंद्रियतत्त्वार्थे एतदेव स्वं कार्यमिति यो मन्यते मूढः सः स्वकार्यात् योगात् २४ योगात्च्युतस्य गतिमाह अधइति स्वर्गे परांगतिं इदं लोकं २५ योग
स्य स्वगतिमाह मृन्मये इति द्रवः द्रवद्रव्यं जलादि न श्यति न क्षीयते न स्रवतीत्यर्थः श्यतीति शेषः तनूकरणे इत्यस्य रूपं शरीरं बुद्धिलिंगवान् तस्य आलोचितं वि
षयं ब्रह्मलोकांतं अश्नुते व्याप्नोति न तु सज्जतीत्यर्थः २६ शरीरपदेन लिंगस्यैव भोक्तृत्वं सूचितं तद्याचष्टे विषयानिति यो विषयान् अश्नुते आलोकरूपं व्याप्नोति
प्रकाशयति स भोग्ना तो भोक्तेत्यर्थः यत्तु आत्मा बुद्धिप्रधानः चिदाभासो जीवो भोक्ता भोगांस्त्यजेत् वैराग्यवशात् स एव भोक्तुं प्रवसति अथ अवसाये करोति

परार्थवर्तमानस्य स्वं कार्यं नाभिमन्यते इंद्रियार्थेषु संसक्तः स्वकार्यात्परिभ्रश्यते २४ अधस्तिर्यग्गतिं चैव स्वर्गे चै
व परांगतिं प्राप्नोति सुकृतैरात्मा प्राज्ञस्येहेतरस्य च २५ मृन्मये भाजने पक्वे यथा वै न श्यति द्रवः तथा शरीरं तपसा
तप्तं विषयमश्नुते २६ विषयानश्नुते यस्तु न स भोक्ष्यत्यसंशयं यस्तु भोगांस्त्यजेदात्मा स वै भोक्तुं प्रवसति २७
नीहारेण हि संवीतः शिश्नोदरपरायणः जात्यंध इव पंथानमावृतात्मा न बुध्यते २८

मा१
तथा च श्रुतिर्द्विविधमात्मानं दर्शयति द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति भो
क्तुं विनश्यतीति पाठे भोगार्थं जन्मांतरलाभायैव म्रियत इत्यर्थः २७ ननु भोक्तात्मा कुतो नोपलभ्यत इत्यत आह नीहारेणेति आवृतात्मा जीवः न
बुध्यते नावृतं स्वस्वरूपमित्यर्थः तथा च श्रुतिः भोक्तारमीशमाह तं दर्शयति न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहारेण प्रावृता ज
ल्पा चासुतृप उक्थशासश्चरंतीति २८

यो०
३८२

अहोरात्र १

यथार्थंमूलधनानुसारेणयथाधनलाभः एवंकर्मविज्ञानानुसारेणगतिरित्यर्थः २९ तस्मादात्मनोक्षापयन्नेतेनाशयेनाहइति अहोरात्रमयेकालप्रधाने
३१ ज्ञानतत्त्वसजन्मांतरंनास्तीत्याह दृष्टांतेनैव नहीत्यनिच्छमतज्जलामरं ३३ भावेनधीवराभिप्रायेणधीवरस्तंतुनानावमिवमनः अभियोगेनमा

382

अहोरात्रमये १

वणिग्यथासमुद्राद्धियथार्थंलभतेधनं तथामर्त्येषुजंतोः कर्मविज्ञानतोगतिः २९ अहोरात्रमयेलोकेजरारूपेणसंचरन्
मृत्युर्ग्रसतिभूतानिपवनंपन्नगोयथा ३० स्वयंकृतानिकर्माणिजातोजंतुःप्रपद्यते नाकृत्वालभतेकश्चित्किंचिदत्रप्रि
याप्रियं ३१ शयानंयांतमासीनंप्रवृत्तंविषयेषुच शुभाशुभानिकर्माणिप्रपद्यंतेनरंसदा ३२ नह्यमन्त्रीरमालाघपुनर्ल
ब्धुंवसति दुर्लभोहृश्यतेह्यस्मिन्निपातोमहार्णवे ३३ यथाभावावसक्ताहिनौर्महांभसितंतुना तथामनोभियोगाद्धि
शरीरंप्रविकीर्षति ३४ यथासमुद्रमभितः संस्रुताः सरितोपराः तथाद्याप्रकृतियोगादभिसंस्रीयतेसदा ३५ स्नेह
पाशैर्बहुविधैरासक्तमनसोनराः प्रकृतिस्थाविषीदंतिजलेसैकतवेश्मवत् ३६

वनाभिनिवेशेनशरीरंप्रविकीर्षतिअंतर्भावितणप्यर्थोयं कारयितुमिच्छतीत्यर्थः ३४ अभियोगबलादेवनदीसमुद्रदृष्टांतेनमनसोमूलप्रकृतौलयमाह
यथेति योगात् अभियोगात् अभिसंस्रीयतेमनसेतिशेषः ३५ योगाभावेदोषमाह स्नेहेतिप्रकृतिस्थाः अज्ञानवशाः ३६

रा०
३८२

शरीरगृहस्यस्नेहेनैवसंज्ञायस्य देहगतंनामरूपंआत्मधर्मस्तेनममस्मानस्यदेहिनोदेहाभिमानवतः शौचंआंतरंभावशुद्धिःबाह्यंचयथासिद्धंबुद्धिरात्मज्ञानं देव
ताद्युपासनंवा ३७ विस्तराइतिश्लोकोव्याख्यातः ३८ योगविघ्नभूताकुटुंबचिंतानकार्येत्याहसंकल्पजइत्यादिना ३९ दानमेवपाथेयंस्वर्गमार्गेहितंचो
दनस्थानीयंपाथेयंयस्यसः दानपथ्योदनः ४० अष्टापदपदंसुवर्णकार्षापणाः तत्स्थानीयेनेंद्रियथामुद्रारेखाविशेषोल्लङ्घ्यमात्रादयइत्यर्थः स्वर्णवत्

शरीरगृहसंज्ञस्यशौचतीर्थस्यदेहिनः बुद्धिमार्गप्रयातस्यसुखंत्विहपरत्रच ३७ विस्तराःक्लेशसंयुक्ताःसंक्षेपास्तुसुखावहाः प
रार्थेविस्तराःसर्वेत्यागमात्महितंविदुः ३८ संकल्पजोमित्रवर्गोज्ञातयःकारणात्मकाः भार्यापुत्रश्चदासश्चस्वमर्थमनुयुंजते ३९ नमातानपिताकिंचित्कस्यचित्प्रतिपद्यते दानपथ्योदनोजंतुःस्वकर्मफलमश्नुते ४० मातापुत्रःपिताभ्राताभार्यामित्रजनस्तथा अष्टापदपदस्थानेदक्षमुद्रेवलक्ष्यते ४१ सर्वाणिकर्माणिपुराकृतानिशुभाशुभान्यात्मनोयांतिजंतोः उपस्थितंकर्मफलंविदित्वाबुद्धिंतथाचोदयतेंऽतरात्मा ४२ व्यवसायंसमाश्रित्यसहायान्योऽधिगच्छति नतस्यकश्चिदारंभः कदाचिदवसीदति ४३

स्वादृष्टमेवस्वाभ्युदयहेतुः रेखावत्बांधवादयोनाममात्रंस्वपरेरेखेवनिर्दिष्टमात्रादयोनिष्फलाइत्यर्थः दक्षस्तत्रैवलक्ष्यतइतिपाठेतत्रैवतत्रकेनमुद्रयेति
यावत् यथामुद्रयाकार्षापणविशेषोलक्ष्यतेएवंमात्रादिनाजातिविशेषइत्यर्थः ४१ यांतिफलंदातुमितिशेषः ४२ व्यवसायंउद्योगं ४३ ४३

अहेर्धमनतं एकाग्रचित्तं ४४ विस्मयात्स्मयो गर्वः तदभावात् ४५ गर्भात् गर्भप्रवेशमात् आप्नुयात् यस्मात् तत्र शुभं अशुभं च परिहारो न परिहर्तुम् अशक्यः कालेन प्राप्ते
न विच्छेदिना जीवननाशकेन सहायेन मृत्युः कर्मान्तिकं दिष्टान्तं विनाशाख्यं प्रापयेत् द्वारैः काष्ठसंघूर्णोऽश्मसारविछिन्नक कचक्रतोसमाशीनो एमहाम्पवनोगतिर्यस्मत्
मगतिर्वायुः हाहत्यूर्णामिवमृत्युर्नरं कालेनान्तं नयतीत्यर्थः तस्माद्यदृच्छयागतैरत्रारिभिः प्राणान्धारयित्वात्मोत्साश्वार्थयन्नीयमितिसिद्धं ४६ स्वकृतान्स्वरूपं हिरण्यप

अहेर्धमनतं युक्तं मूर्धीरं विपश्चितं नश्रीः हंसजन्तेनित्यमासितमिवात्मयः ४४ आत्मिकात्मयतात्मापाप्मानुपापाहिस्मपाहिया
त्माभेदनिर्यात्मानतोर्थः परिलोरति ४५ सर्वः त्वानिशुभाशुभानि निपतंकर्माशिशवन्तुः स्वयंगर्भाम्बंपतिपद्यतेनडुभयंपनेन
पृथक्कृतं मृत्युस्वापरिहारो न समगतिः कालेन विच्छेदिना द्वारेस्वर्णिमिनाश्मसाविहितं कर्मान्तिकं प्रापयेत् ४६ स्वकृत
तात्मकृतं च विस्तारं कुलानुरूपं यत्समृद्धि संचयं मरोहि सर्वो लभते यथाकृतं शुभाशुभेनात्मकृतेन कर्मणा ४७
गा

शत्वो विवाहादिनिष्कृतं रूपमिदं रूपं यस्य स्वकुलानुसारि विवाहादिकं न देवतर्त्तां त्वात्मकृतं विसर्जयेद्वसंतमादि पोष्कसंकुलानुरूपं सकुले जन्म यथाकृतं कु
तमनतिक्रम्य यस्मात्सर्वं प्राक्कर्मवशादेव लभते नतदर्थं यत्नमकुर्वन् आत्मलाभान्नपरं विद्यत इति वचनात् आत्मनत्वसाश्वार्थयतेनैवेति भावः ४७

४८ इतिमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेशांतौमोक्षधर्मेषुपराशरगीतासमाप्तात्र्योविंश
त्यधिकशततमः ॥ अत्रापवर्ग्ययत्नमकुर्वतामपकर्तव्यं तन्निहत्यापितुं हंसगीतारभ्यते सत्यंदमक्षमांप्रशंसंतिमहिना ४ हेद्विजपक्षिन् ६ मोक्षमतास्थाः अ

भीष्मउवाच इत्युक्तोजनकोराजन्याथातथ्यंमनीषिणा श्रुत्वाधर्मविदांश्रेष्ठः परांमुदमवापह ४८ शांतौमोक्षधर्मेषुपराशरगीतास
माप्ता युधिष्ठिरउवाच सत्यंदमंक्षमांप्रज्ञांप्रशंसंतिपितामह विद्वांसोमनुजालोकेकथमेतन्मतंतव १ भीष्मउवाच अत्रतेव
र्तयिष्येहमितिहासंपुरातनं साध्यानामिहसंवादंहंसस्यचयुधिष्ठिर २ हंसोभूत्वाथसौवर्णस्त्वजोनित्यःप्रजापतिः सवै
पर्येतिलोकानखिलानथसाध्यानुपागमात् ३ साध्याऊचुः शकुनेवयंस्मदेवावैसाध्यास्त्वामनुयुंक्ष्महे पृच्छामस्त्वांमोक्षधर्मंभ
वांस्त्वंकिलमोक्षवित् ४ श्रुतोसिनःपंडितोधीरवादीसाधुशब्दश्चरतेतेपतत्रिन् किंमन्यसेश्रेष्ठतमंद्विजत्वंकस्मिन्मनस्तेरम
तेमहात्मन् ५ तन्नःकार्यंपक्षिवरप्रशाधियत्कार्याणांमन्यसेश्रेष्ठमेकं यत्कृत्वावैपुरुषः सर्वबंधैर्विमुच्यतेविहगेंद्रेहशीघ्रं
६ हंसउवाच इदंकार्यममृताशाःशृणोमितपोदमः सत्यमात्माभिगुप्तिः ग्रंथीन्विमुच्यहृदयस्यसर्वान्प्रियाप्रियेस्वंवशमा
नयीत ७

मृतभुजोदेवाः तपः स्वधर्माचरणं दमोबाह्येंद्रियनियमः सत्यंयथार्थभाषणं आत्माभिगुप्तिश्चित्तजयः ग्रंथीन्रागादीन्स्वंवश्यंस्वाधीनंतांप्रियाप्रिययोर्हर्षवि
षादौनकर्तव्याविति अर्थः ७

अरुंतुदः मर्मच्छिन्नृशंसावारौ नृनिष्ठुरवादी च न स्यात् हीनतः नीचात् परं शास्त्ररहस्यं नाददीत उशतीं कल्याणीं दाहकरीं पापलोक्यां नरकप्रदां १० क्षेपायमा
णं अधिक्षेपकारिणां अभिषंगं व्यलीकं अभिनिवेशवशादप्रियं १२ उपनिषत् रहस्यं वेदाधिगमस्य फलं सत्यवचनमित्यर्थः तस्यापि फलं दमः १३ विधित्सा विशि

नारुंतुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत यथास्य वाचा पर उद्विजेत न तां वदेदुशतीं पापलोक्यां ८ वाक्सायका वदनान्निः
नरः ततः क्लेशमवाप्नोतिपरत्रेहतथैवच ८७ पश्यतिच्छिन्नभूतंहिजीवलोकंस्वकर्मणा ततुरुष्वतथापुत्रकृत्स्नंयत्स
मुदाहृतं ८८ ॥ ॥ ॥ ॥

राम०
५७९

९१ मोक्षदैशिकं मोक्षोपदेशं पावकस्य धर्मस्य पावकस्येति पाठेऽपि स एवार्थः पावकाध्ययनं चित्तशोधकाध्ययनं नाम ९२ शतोपरि पंचचत्वारिंशः सन्मोक्षोपयो

नदेतत्तं संप्रदृश्येव कर्मभूमिं प्रपश्यता शुभान्याचरितव्यानि परलोकमभीप्सता ८९ मासर्तुसंज्ञापरिवर्तकेन सूर्याग्निना रात्रिदि
वेंधनेन स्वकर्मनिष्ठाफलसाक्षिकेन भूतानि कालः पचति प्रसह्य ९० धनेन किं यन्न ददाति नाश्नुते बलेन किं येन रिपुं न बाध
ते श्रुतेन किं येन न धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो वशी ९१ भीष्म उवाच इदं द्वैपायनवचो हितमुक्तं निशम्य तु शुको
गतः परित्यज्य पितरं मोक्षदैशिकं ९२ शांतौ मोक्षधर्मे शुपावकाध्यायनं नाम युधिष्ठिर उवाच यद्यस्ति दत्तमिष्टं वा तपस्तप्तं त
थैव च गुरूणां वापि शुश्रूषा तन्मे ब्रूहि पितामह १ भीष्म उवाच आत्मनानर्थयुक्तेन पापे निविशते मनः सकर्म कलुषं कृत्वा
क्लेशे महति धीयते २ दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं भयाद्भयं मृतेभ्यः प्रमृतां यांति दरिद्राः पापकर्मिणः ३ उत्सवा
दुत्सवं यांति स्वर्गात्स्वर्गं सुखात्सुखं श्रद्दधानाश्च दांताश्च धनस्थाः शुभकारिणः ४ व्यालकुंजरदुर्गेषु सर्पचोरभयेषु च
हस्तावापेन गच्छंति नास्तिकाः किमतः परं ५ प्रियदेवातिथेयाश्च वदान्याः प्रियसाधवः क्षेम्यमात्मवतां मार्गमास्थिता ह
स्तदक्षिणाः ६ ॥ ॥

गिवैराग्यपरेण स्वधर्मानुष्ठाने तेषां वैयर्थ्यं नाशंक्यं तेषामपि सत्फलमनिवार्यमित्याह यद्यस्तीत्यादिना १ प्राग्व्याख्यातोयमध्यायः ॥ ॥ ॥

मो०
४२०

480

पुलकाश्ववधान्येषु शस्त्रिंशश्वपक्षिषु नहि धारास्ति मनुष्येषु येषां धर्मो न कारणं ७ सुशीघ्रमपि धावंतं विधानमनुधावति शेते सह शयानेन
नयेनेयेनयथाकृतं ८ पापंतिष्ठतितिष्ठंतं धावंतमनुधावति करोति कुर्वतः कर्म छायेवानुविधीयते ९ येनयेनयथायद्यत्पुराकर्मसुनि
श्चितं तत्तदेवांतरं भुंक्ते नित्यं विहितमात्मना १० समानकर्मविक्षेपविधानपरिरक्षणं भूतग्राममिमं कालः समंतादपकर्षति ११ अचो
द्यमानानियथापुष्पाणि च फलानि च स्वकालं नातिवर्त्तंते तथा कर्म पुराकृतं १२ संमानश्चावमानश्च लाभालाभः क्षयोदयौ प्रवृत्ता
नि वर्तंते निधनांता पदे पदे १३ आत्मना विहितं दुःखमात्मना विहितं सुखं गर्भशय्यामुपादाय भज्यते पूर्वदेहिकं १४ बालो युवा वा
वृद्धश्च यत्करोति शुभाशुभं तस्यां तस्यामवस्थायां भुंक्ते जन्मनि जन्मनि १५ यथा धेनुसहस्रेषु वत्सो विंदति मातरं तथा पूर्वकृतं कर्म कर्त्ता
रमनुगच्छति १६ मलिनं हि यथा वस्त्रं पश्चाच्छुद्ध्यति वारिणा उपवासैः प्रतप्तानां दीर्घं सुखमनंतकं १७ दीर्घकालेन तपसा सेवितेन म
हात्मने धर्मनिर्धूतपापानां संसिध्यंते मनोरथाः १८ शकुनानामिवाकाशे मत्स्यानामिव चोदके पदं यथा न दृश्येत तथा पुण्यकृतां गतिः
१९ ॥ ॥

राम०
४२०

२० शांतोपरिसप्तचत्वारिंशः शकुनानामिवाकाशइतिब्रह्मनिष्ठानांनिष्कलासंख्कलासन्यासमहितब्रह्मनिष्ठावानस्तुकः सत्तिपथमवतीर्णास्तद्वियेनेवमोर्गे

स्खलमनेनेरुपालध्वैः कीर्त्तिनैस्त्वव्यतिक्रमैः पेशलंचातुरूपंचकर्त्तव्यंहितमात्मनः २० शांतौमोक्षधर्मेषुकालमुनिकेना
म युधिष्ठिरउवाच कथंव्यासस्यधर्मात्माशुकोजज्ञेमहातपाः सिद्धिंचपरमांप्राप्तस्तन्मेब्रूहिपितामह १ कस्यांचोत्पा
दयामासशुकंव्यासस्तपोधनः नह्यस्यजननींविद्मजन्मचाग्र्यंमहात्मनः २ कथंचबालस्यसतःसूक्ष्मज्ञानेगतामतिः यथा
नान्यस्यलोकेस्मिन्द्वितीयस्येहकस्यचित् ३ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहामते नहिमे तृप्तिरस्तीहशृण्वतोमृतमुत्त
मं ४ माहात्म्यमात्मयोगंचविज्ञानंचशुकस्यह यथावदानुपूर्व्येणतन्मेब्रूहिपितामह ५ भीष्मउवाच नहायनैर्नप
लितैर्नवित्तेनचबंधुभिः ऋषयश्चक्रिरेधर्मंयोनूचानःसनोमहान् ६ तपोमूलमिदंसर्वंयन्मांपृच्छसिपांडव तदिं
द्रियाणिसंयम्यतपोभवतिनान्यथा ७ इंद्रियाणांप्रसंगेनदोषमृच्छत्यसंशयं संनियम्यतुतान्येवसिद्धिंप्राप्नोतिमानव
: ८ अश्वमेधसहस्रस्यवाजपेयशतस्यच योगस्यकलयातातनतुल्यंविद्यतेफलं ९ अत्रतेवर्त्तयिष्यामिजन्मयोगफ
लंतथा शुकस्याग्र्यांगतिंचैवदुर्विदामकृतात्मभिः मेरुशृंगेकिलपुराकर्णिकारवनायुते विजहारमहादेवोभीमैर्भू
तगणैर्वृतः ११ ॥

राँहस्ताहस्त्वःसौमितिमन्वानस्यजन्मादिकंसर्वंपृच्छतिकथंव्यासस्यधर्मात्मेत्यादि १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ योगेनात्मानमाविश्यान्तर्हृदयेइंद्रियाणिनिरुध्यमये: १३ १४ १५ २० २१ २३ २५ ॥ ॥ ॥ ॥ ॥

शैलराजसुतोचैवदेवीतत्राभवत्पुरा तत्रदिव्यंतपस्तेपेकृष्णद्वैपायनस्तदा १२ योगेनात्मानमाविश्ययोगधर्मपरायणः धा
रयन्सतपस्तेपेपुत्रार्थंकुरुसत्तम १३ अग्नेर्भूमेरपांवायोरंतरिक्षस्यवाविभो धैर्येणसंमितः पुत्रोममभूयादितिस्मह १४
संकल्पेनाथयोगेनदुःप्रापमकृतात्मभिः वरयामाससदेवेशमास्थितस्तपउत्तमं १५ अतिष्ठन्मारुताहारःशतंकिलसमाःप
भुः आराधयन्महादेवंबहुरूपमुमापतिं १६ तत्रब्रह्मर्षयश्चैवसर्वेराजर्षयस्तथा लोकपालाश्चलोकेशंसाध्याश्चवसुभिः
सह १७ आदित्याश्चैवरुद्राश्चदिवाकरनिशाकरौ वसवोमरुतश्चैवसागराःसरितस्तथा १८ अश्विनौदेवगंधर्वास्तथा
नारदपर्वतौ विश्वावसुश्चगंधर्वःसिद्धाश्चाप्सरसस्तथा १९ तत्ररुद्रोमहादेवःकर्णिकारमयींशुभां धारयानःस्रजंभा
तिज्योत्स्नामिवनिशाकरः २० तस्मिन्दिव्येवनेरम्येदेवदेवर्षिसंकुले आस्थितःपरमंयोगमृषिःपुत्रार्थमच्युतः २१
नचास्यहीयतेप्राणोनग्लानिरुपजायते त्रयाणामपिलोकानांतदद्भुतमिवाभवत् २२ जटाश्चतेजसातस्यवैश्वानर
शिखोपमाः प्रज्वलंत्यःस्मदृश्यंतेयुक्तस्यामिततेजसः १२ मार्कंडेयोहिभगवानेतदाख्यातवान्मम सदेवचरितानी
हकथयामाससमेसदा २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कृष्णस्यव्यासस्य २८ तद्भावभावीतिब्रह्मभावंब्रह्माहमितिभावंआशयंभावयतीतितद्भावभावीतद्दृष्टिर्वाएतस्यमहतोभूतस्यनामभवतीतितच्छ्रुतस्यब्रह्मनामधेयत्वस्य
तेनकेवलंभावनामात्रंकृतं अपितुतद्बुद्धिः तदेवबुद्धिर्निश्चयोयस्येत्येतेनअशुद्धावनुच्यते तदेवात्माचित्तंयस्येतितदात्मा तदपाश्रयइतितत्रस्थैर्येणशांनेनं तदेवमुच्यते २९

एतास्वथापिकृष्णस्यतपसातेनदीपिताः अग्निवर्णाज्वलान्तप्रकाशंतेमहात्मनः २५ एवंविधेनतपसातस्यभक्त्याचभारत म
हेश्वरः प्रसन्नात्माचकारमनसामतिं २६ उवाचचैवंभगवांस्त्र्यंबकः प्रहसन्निव एवंविधस्तेतनयोद्वैपायनभविष्यति २७ य
थाह्यग्निर्यथावायुर्यथाभूमिर्यथाजलं यथाचखंतथाशुद्धोभवितातेसुतोमहान् २८ तद्भावभावीतद्बुद्धिस्तदात्मातदपाश्रयः
तेजसावृत्यलोकांस्त्रीन्यशः प्राप्स्यतितेसुतः २९ शांतौमोक्षधर्मेशुकोत्पत्तौ भीष्मउवाच सलब्ध्वापरमंदेवाद्वरंसत्यवतीसु
तः अरणींसहितांगृह्यममंथाग्निचिकीर्षया १ अथरूपंपरंराजन् बिभ्रतींस्वेनतेजसा घृताचींनामाप्सरसमपश्यद्भ
गवानृषिः २ ऋषिरप्सरसंदृष्ट्वासहसाकाममोहितः अभवद्भगवान्व्यासोवनेतस्मिन्युधिष्ठिर ३ साचदृष्ट्वातदा
व्यासंकामसंविग्नमानसं शुकीभूत्वामहाराजघृताचीसमुपागमत् ४ सतामप्सरसंदृष्ट्वारूपेणान्येनसंवृतां शरी
रजेनानुगतः सर्वगात्रातिगेनह ५ ॥

मा तापरिसप्तचत्वारिंशोध्यायः अरणीदृश्यघृतेंद्ररसहितेनमिथुनस्य १ २ ३ ४ ५ ॥ ॥ ॥

९ शुक्रे निर्मथ्यमाने जातः कालात् शुकः ईति रेफलोपेनास्य नाम कृतं १० महात्मा महादेवः उपानयत् स्वशिष्यं कृतवान् १८ ॥ ॥ ॥ ॥

सतु धैर्येण महता निगृह्णन् हृच्छयं मुनिः नशशाक नियंतुं तत् व्यासः प्रविसृतं मनः ६ भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतः
यत्नान्नियच्छतस्तस्य मुनेरग्निचिकीर्षया ७ अरण्यामेव सहसा तस्य शुक्रमवापतत् सोविशंकेन मनसा तथैव द्विजसत्तमः ८
अरणीं ममंथ ब्रह्मर्षिस्तस्यां जज्ञे शुको नृप शुक्रे निर्मथ्यमाने स शुको जज्ञे महातपाः ९ परमर्षिर्महायोगी अरणीगर्भसंभवः
यथाध्वरे समिद्धोग्निर्भाति हव्यमुदावहन् १० तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा बिभ्रत्पितुश्च कौरव्य रूपवर्णमनुत्तमं
११ बभौ तदा भावितात्मा विधूम इव पावकः तं गंगा सरितां श्रेष्ठा मेरुपृष्ठे जनेश्वर १२ स्वरूपिणी तदाभ्येत्य स्नपयामास वारि
णा अंतरिक्षाच्च कौरव्य दंडः कृष्णाजिनं च ह १३ पपात भुवि राजेंद्र शुकस्यार्थे महात्मनः जेगीयंते स्म गंधर्वा ननृतुश्चाप्सरो
गणाः १४ देवदुंदुभयश्चैव प्रावाद्यंत महास्वनाः विश्वावसुश्च गंधर्वस्तथा तुंबुरुनारदौ १५ हाहाहूहूश्च गंधर्वौ तुष्टुवुः
शुकसंभवे तत्र शक्रपुरोगाश्च लोकपालाः समागताः १६ देवा देवर्षयश्चैव तथा ब्रह्मर्षयोपि च दिव्यानि सर्वपुष्पाणि
प्रववर्ष च मारुतः १७ जंगमाजंगमं चैव प्रहृष्टमभवज्जगत् तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः १८ ॥ ॥

२२ ईश्वरप्रसादात्वयं भातिवेदोपिशिष्टाचारपालनार्थेबृहस्पतिंगुरुंचकारेत्याहबृहस्पतिमिति २७ अतोपरिअष्टाचत्वारिंशत् मोक्षंमोक्षशास्त्रं अनुचिंत्यउपादेय

जातमात्रंमुनेःपुत्रंविधिनोपानयत्तदा तस्यदेवेश्वरःशक्रोदिव्यमद्भुतदर्शनं १९ ददौकमंडलुंप्रीत्यादेववासांसिचाविभो हंसाश्च शतपत्राश्चसारसाश्चसहस्रशः २० प्रदक्षिणमवर्त्तंतशुकाश्चाषाश्चभारत आरणेयस्ततोदिव्यंप्राप्यजन्ममहाद्युतिः २१ तत्रै वोवासमेधावीव्रतचारीसमाहितः उत्पन्नमात्रंतंवेदाःसरहस्याःससंग्रहाः २२ उपतस्थुर्महाराजयथास्यपितरंतथा बृहस्प तिंचवव्रेसवेदवेदांगभाष्यवित् २३ उपाध्यायंमहाराजधर्ममेवानुचिंतयन् सोधीत्यनिखिलान्वेदान्सरहस्यान्ससंग्रहान् २४ इति हासंचकार्त्स्न्येनराजशास्त्राणिचाविभो गुरवेदक्षिणांदत्वासमावृत्तोमहामुनिः २५ उग्रंतपःसमारेभेब्रह्मचारीसमाहि तः देवतानामृषीणांचबाल्येपिसमहातपाः २६ सम्मंत्रणीयोमान्यश्चज्ञानेनतपसातथा नत्वस्यरमतेबुद्धिराश्रमेषु नराधिप त्रिषुगार्हस्थ्यमूलेषुमोक्षधर्मानुदर्शिनः २७ शांतौमोक्षधर्मेषुशुकोत्पत्तौ भीष्मउवाच समोक्षमनुचिंत्यैवशु कःपितरमभ्यगात् प्राहाभिवाद्यचगुरुंश्रेयोर्थीविनयान्वितः १ मोक्षधर्मेषुकुशलोभगवान्प्रब्रवीतुमे यथामेमनसः शांतिःपरमासंभवेत्प्रभो २ श्रुत्वापुत्रस्यतुवचःपरमर्षिरुवाचतं अधीष्वपुत्रमोक्षंवैधर्मांश्चविविधानपि ३ ॥

७६४

५ उवाचेति जनकं प्रति मेघरां मति संवादार्थी न तज्ज्ञानाय न यार्थे मोक्षार्थे मोक्षशास्त्रार्थे १३ मेरोर्वर्षमित्यादि हरेर्वर्षं हरिवर्षाख्यं हैमवंतं वर्षं किंपुरुषाख्यं १४ १५

पितुर्नियोगाज्जग्राह शुको धर्मभृतां वरः योगशास्त्रं च निखिलं कापिलं चैव भारत ४ स तं ब्राह्म्या श्रिया युक्तं ब्रह्मतुल्यपराक्रमं
मेने पुत्रं पदा व्यासो मोक्षधर्मविशारदं ५ उवाच गच्छेति तदा जनकं मिथिलेश्वरं स ते वक्ष्यति मोक्षार्थं निखिलं मिथिलेश्व
रः ६ पितुर्नियोगमादाय जगाम मिथिलां नृप प्रष्टुं धर्मस्य निष्ठां वै मोक्षस्य च परायणं ७ उक्तश्च मानुषेणा त्वं पथा गच्छे
त्यविस्मितः न प्रभावेन गंतव्यमंतरिक्षचरेण वै ८ आर्जवेनैव गंतव्यं न सुखान्वेषिणा तथा नान्वेष्टव्या विशेषा [illegible] स्ति विशे
षा हि प्रसंगिनः ९ अहंकारो न कर्तव्यो याज्ये तस्मिन्नराधिपे स्थातव्यं च वशे तस्य स ते छेत्स्यति संशयं १० स धर्मकुशलो रा
जा मोक्षशास्त्रविशारदः ११ याज्यो मम स यद्ब्रूयात्तत्कार्यमविशंकया एवमुक्तः स धर्मात्मा जगाम मिथिलां मुनिः पद्भ्यां श
क्तो नभः क्रांतुं पृथ्वीं ससागरां १२ स गिरींश्चाप्यतिक्रम्य नदीस्तीर्थसरांसि च बहुव्यालमृगाकीर्णा अटवीश्च वना
नि च १३ मेरोर्हरेश्च द्वे वर्षे वर्षं हैमवतं ततः क्रमेणैव व्यतिक्रम्य भारतं वर्षमासदत् १४ स देशान्विविधान्पश्यंश्चीन
हूणनिषेवितान् आर्यावर्तमिमं देशमाजगाम महामुनिः १५ ॥ ॥ ॥ ॥

१६ पश्यन्नपि न पश्यति तुष्ट्या त्वनिश्चयात्वैराग्याद्वा २३ तं मां संजिज्ञासार्थं अर्थं मोक्षं २४ तस्याद्वारमित्यादिना अध्यायशेषेण रागस्य क्रोधकामतयोर्बाध्यते २५ २८

पितुर्वचनमाज्ञाय तमेवार्थं विचिंतयन् अध्वानं सोऽतिचक्राम खचरः खेचरन्निव १६ पत्तनानि च रम्याणि स्फीतानि नगराणि च रत्ना
नि च विचित्राणि पश्यन्नपि न पश्यति १७ उद्यानानि च रम्याणि तथैवायतनानि च पुण्यानि चैव रत्नानि सोऽत्यक्रामदथाध्वगः १८
सोऽचिरेणैव कालेन विदेहानाससाद ह रक्षितान् धर्मराजेन जनकेन महात्मना १९ तत्र ग्रामान्बहून्पश्यन्बहून्नरसभोजनान् प
ल्लीघोषान्समृद्धांश्च बहुगोकुलसंकुलान् २० स्फीतांश्च शालियवसैर्हंससारससेवितान् पद्मिनीभिश्च शतशः श्रीमतीभिरलं
कृतान् २१ स विदेहानतिक्रम्य समृद्धजनसेवितान् मिथिलोपवनं रम्यमाससाद समृद्धिमत् २२ हस्त्यश्वरथसंकीर्णं नरनारी
समाकुलं पश्यन्नपश्यन्निव तत्समतिक्रामदच्युतः २३ मनसा तं वहन्भारं तमेवार्थं विचिंतयन् आत्मारामः प्रसन्नात्मा मि
थिलामाससाद ह २४ तस्याद्वारं समासाद्य निःशंकः प्रविवेश ह तत्रापि द्वारपालास्तमुग्रवाचा न्यषेधयन् २५ तथैव च शु
कस्तत्र निर्मन्युः समतिष्ठत न चातपाध्वसंतप्तः क्षुत्पिपासाश्रमान्वितः २६ प्रताप्यते ग्लायति वा नापैति च तथातपात् तेषां
तु द्वारपालानामेकः शोकसमन्वितः २७ मध्यंगतमिवादित्यं दृष्ट्वा शुकमवस्थितम् पूजयित्वा यथान्यायमभिवाद्य कृतांजलिः २८

प्रावेशयत्ततः कक्षांद्वितीयांराजवेश्मनः तत्रासीनः शुकस्तातमोक्षमेवान्वचिंतयत् २९ छायायामातपेचैवसमदर्शीमहाद्युतिः तंमु
हूर्त्तादिवागम्यराज्ञोमंत्रीकृतांजलिः ३० प्रावेशयत्ततः कक्षांद्वितीयांराजवेश्मनः तत्रांतः पुरसंबद्धंमहच्चैत्ररथोपमं ३१ सुविभक्तजला
क्रीडंरम्यंपुष्पितपादपं शुकंप्रवेशयन्मंत्रीप्रमदावनमुत्तमं ३२ सतस्यासनमादिश्यनिश्चक्रामततः पुनः तंचारुवेशाः सुश्रोण्यस्त
रुण्यः प्रियदर्शनाः ३३ सूक्ष्मरक्तांबरधरास्तप्तकांचनभूषणाः संलापोल्लापकुशलानृत्यगीतविशारदाः ३४ स्मितपूर्वाभिभाषिण्यो
रूपेणाप्सरसांसमाः कामोपचारकुशलाभावज्ञाः सर्वकोविदाः ३५ परंपंचाशतंनार्योवारमुख्याः समाद्रवन् पाद्यादीनिप्रतिग्राह्य
पूजयापरयार्चयन् ३६ कालोपपन्नेनतदासाध्वन्नेनाप्यतर्पयन् तस्यभुक्तवतस्तात तदंतः पुरकाननं ३७ सुरम्यंदर्शयामासुरे
कैकश्येनभारत क्रीडंत्यश्चहसंत्यश्चगायंत्यश्चापिताः शुभं ३८ उदारसत्वंसत्वज्ञाः स्त्रियः पर्यचरंस्तथा आरणेयस्तुशुद्धात्मा
निः संदेहः स्वकर्मकृत् ३९ वश्येंद्रियोजितक्रोधोनहृष्यति तस्मैशय्यासनंदिव्यंदेवार्हंरत्नभूषितं ४० स्पर्द्ध्यास्तरणसंकीर्णंद
दुस्ताः परमस्त्रियः पादशौचंतुकृत्वैवशुकः संध्यामुपास्यच ४१ ॥ ॥ ॥ ॥ ॥ ॥

नकुप्यति २

निषसादासनेपुण्येतमेवार्थंविचिंतयन् शर्वरीप्रथमंतत्रासौभूत्वाध्यानपरायणः ४२ मध्यरात्रेयथान्यायंनिद्रामाहारयत्प्रभुः त
तोमुहूर्तात्समुत्थायकृत्वाशौचमनंतरं ४३ स्त्रीभिःपरिवृतोधीमान्ध्यानमेवान्वपद्यत अनेनविधिनाकार्ष्णिस्तदहःशेषमच्युतः
तांचरात्रिंनृपकुलेवर्तयामासभारत ४५ शांतौमोक्षधर्मेषुशुकोत्पत्तौ भीष्मउवाच ततःसराजाजनकोमंत्रिभिःसहभारत
पुरःपुरोहितंकृत्वासर्वाण्यंतःपुराणिच १ आसनंचपुरस्कृत्यरत्नानिविविधानिच शिरसाचार्घ्यमादायगुरुपुत्रंसमभ्यगात् २
सतदासनमादायबहुरत्नविभूषितं स्पर्ध्यास्तरणसंस्तीर्णंसर्वतोभद्रमृद्धिमत् ३ पुरोधसासंगृहीतंहस्तेनालभ्यपार्थिवः
प्रददौगुरुपुत्रायशुकायपरमार्चितं ४ तत्रोपविष्टंतंकार्ष्णिंशास्त्रतःप्रत्यपूजयत् पाद्यंनिवेद्यप्रथमंम अर्घ्यंगांचन्यवेदयत् ५
सचतांमंत्रवत्पूजांप्रत्यगृह्णाद्यथाविधि प्रतिगृह्यतुतांपूजांजनकाद्द्विजसत्तमः ६ गांचैवसमनुज्ञायराजानमनुमान्यच पर्य
पृच्छन्महातेजाराज्ञःकुशलमव्ययं ७ अनामयंचराजेन्द्रःशुकःसानुचरस्यह अनुशिष्टस्तुतेनासौनिषसादसहानुगः
८ उदारसत्वाभिजनोनम्रोराजाकृतांजलिः कुशलंचाव्ययंचैवपृष्ट्वावैयासकिंनृपः ९ ॥ ॥ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१३ यत्कार्यमित्यादिना ब्रह्मचारी भूत्वा गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेदिति क्रमस्युक्तः कर्मसमुच्चयपक्षोऽदर्शितः १८ वीतरागात्मा विरक्तचित्तः । ब्रह्माश्रमः

किमागमनमित्येव पर्यपृच्छत पार्थिवः ९ शुक उवाच पित्राहमुक्तो भद्रं ते मोक्षधर्मार्थकोविदः विदेहराजो याज्यो मे जनको नाम विश्रुतः १० तत्र गच्छस्व वै तूर्णं यत्ते हृदि हि संशयः प्रवृत्तौ वा निवृत्तौ वा स ते छेत्स्यति संशयं ११ सोऽहं पितुर्नियोगात्त्वामुपप्रष्टुमिहागतः तन्मे धर्मभृतां श्रेष्ठ यथावद्वक्तुमर्हसि १२ किं कार्यं ब्राह्मणेनेह मोक्षार्थश्च किमात्मकः कथं च मोक्षः प्राप्तव्यो ज्ञानेन तपसाथवा १३ जनक उवाच यत्कार्यं ब्राह्मणेनेह जन्मप्रभृति तच्छृणु कृतोपनयनस्तात भवेद्वेदपरायणः १४ तपसा गुरुवृत्त्या च ब्रह्मचर्येण वा विभो देवतानां पितॄणां चाप्यनृणश्चानसूयकः १५ वेदानधीत्य नियतो दक्षिणामपवृज्य च अभ्यनुज्ञामथ प्राप्य समावर्तेत वै द्विजः १६ समावृत्तश्च गार्हस्थ्ये स्वदारनियतो वसेत् अनसूयुर्यथान्यायमाहिताग्निस्तथैव च १७ उत्पाद्य पुत्रपौत्रं तु वन्याश्रमपदे वसेत् तानेवाग्नीन्यथाशास्त्रमर्चयन्नतिथिप्रियः १८ स वनेऽग्नीन्यथान्याय।मात्मन्यारोप्य धर्मवित् निर्द्वंद्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् १९ ॥ ॥ ॥ ॥ ॥ ॥

सन्यासाश्रमाः तरे स्वपरं पदं स्थानं तत्र १९ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एतदाक्षिपति। उत्पन्न इति। ज्ञानं शास्त्रजा धीः विज्ञानं अनुभवः तस्मिन्मोक्षाश्रमे फले ब्रह्मचर्याश्रमे एव उत्पन्ने सति त्रिषु ब्रह्मचर्यादिषु। समुच्चयपक्षे पर्यवसितत्वाद्ब्रह्म-
चर्यादिष्वपवर्गेऽनुरूढा ह्यावतान्तरा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति नियमस्य निर्बाध्येति भावः २२ तत्र ब्रह्मचर्यस्यावश्यकत्वं तावदाह नविनेति २३ प्लावयिता कर्ण-
धारः ज्ञानं शास्त्रं तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतेः केवलमात्मनिरूपणेयाभोक्तान्येनेव सुज्ञानायाथ प्रेक्षेमादिश्रुतिभिरन्वयव्यति-

श्रीशुक उवाच उत्पन्ने ज्ञानविज्ञाने निर्द्वंद्वे हृदि शाश्वते किमवश्यं निवस्तव्यमाश्रमेषु भवेत्त्रिषु २० एतद्भवंतं पृच्छामि तद्भवान्वक्तु-
मर्हति यथा वेदार्थतत्त्वेन ब्रूहि मे त्वं जनाधिप २१ जनक उवाच न विना ज्ञानविज्ञाने मोक्षस्याधिगमो भवेत् न विना गुरुसंबंधं ज्ञा-
नस्याधिगमः स्मृतः २२ गुरुः प्लावयिता तस्य ज्ञानं प्लव इहोच्यते विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् २३ अनुच्छेदाय
लोकानामनुच्छेदाय कर्मणां पूर्वैराचरितो धर्मश्चातुराश्रम्यसंकरः २४ अनेन क्रमयोगेन बहुजातिषु कर्मणां हित्वाशु-
भाशुभं कर्म मोक्षो नामेह लभ्यते २५ भावितैः करणैश्चायं बहुसंसारयोनिषु आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे
२६

रेकाभ्यां आचार्यकरणस्य विद्याहेतुत्वावगमात्तदावश्यकमिति भावः न तु भयं आचार्यशास्त्रे २३ वामदेववत् ब्रह्मचर्यात्प्रागपि ज्ञाने जाते सति किं तेनेत्याशंक्याह
अनुच्छेदायेति। लोकाशिक्षार्थमपि तदावश्यकमिति भावः २४ जातिषु जन्मसु २५ भावितैः शोधितैः करणैः बुद्ध्यादिभिः २६ ॥ । । ॥

नमिति चित्तशुद्ध्यर्थमाश्रमाश्रमधर्माः तद्बुद्धौतुतेव्यर्थाइत्यर्थः २८ सर्वभूतेष्वनुगतमात्मानंसंप्रज्ञातेपश्यतेनपश्यतिसर्वभूतानिचआत्मनिरज्जूरगवत्विलीनानिच्चसं
प्रज्ञातेपश्यति। वारिचरोहंसादिः २९ प्रवणात्निम्नात्यथाखेचरः पर्वतात्पर्वतंगछन्निम्नेदेशमनुसृत्यगछतिनैवंपक्षीतद्विहान्देहंनानुसरतीत्यर्थः ३१ ज्योतिःचि

तमासाद्यतुमुक्तस्यदृष्टार्थस्यविपश्चितः त्रिष्वाश्रमेषुकोन्वर्थ्योभवेत्परममीप्सतः २७ एजसंसारामसंशैवनिःसंदेशाविवर्जे
येत्सात्विकमार्गमास्थायपश्येदात्मानमात्मना २८ सर्वभूतेषुचात्मानंसर्वभूतानिचात्मनि संपश्यन्नोपलिप्येतजलेवारिच
रोयथा २९ पक्षिवत्प्रवणादूर्ध्वममुत्रानंत्यमश्नुते विहायदेहान्निर्मुक्तोनिर्द्वंद्वः प्रशमंगतः ३० अत्रगाथापुरागीताः म
हाराज्ञाययातिना धार्यंतेयाद्विजैस्तातमोक्षशास्त्रविशारदैः ३१ ज्योतिरात्मनिनान्यत्रसर्वजंतुषुतत्समं स्वयंचशक्यंतेद्रष्टुंसु
समाहितेनचेतसा ३२ नबिभेतिपरोयस्मान्नबिभेतिपराच्चयः यश्चनेछतिनद्वेष्टिब्रह्मसंपद्यतेनतदा ३३ यदाभावंनकुरु
तेसर्वभूतेषुपापकं कर्मणामनसावाचाब्रह्मसंपद्यतेतदा ३४ संयोज्यमनसात्मानमीर्ष्यामुत्सृज्यमोहिनीं त्यक्त्वाकामं
चमोहंचतदाब्रह्मत्वमश्नुते ३५ यदाश्राव्येचदृश्येचसर्वभूतेषुचाप्ययं समोभवतिनिर्द्वंद्वोब्रह्मसंपद्यतेतदा ३६ यदास्तु
तिंचनिंदांचसमत्वेनैवपश्यति कांचनंचायसंचैवसुखदुःखेतथैवच ३७ ॥ ॥ ॥ ॥ ॥

त्माचैतन्यंब्रह्मत्वात्मनिबुद्धौ। समंएकं। एकमेवास्मिन्ननुभवरूपमाननमित्याह स्वयमिति। सुष्ठुसमाहितंयोगारूढंचेतोयस्यतेन ३१ दर्शनलिंगमाह नबिभेतीत्यादिना ३३
३४ ३५ ३६ ३७

४९ तमःपरिगतंअंधकारस्थानंअज्ञानव्याप्तंचावेश्मगृहंसर्वोक्षितुंब्रह्मच ५० ५१ ५२ ६०

शीतमुष्णंतथैवार्थमनर्थंप्रियमप्रियं जीवितंमरणंचैवब्रह्मसंपद्यतेनरः ४८ प्रसार्येहयथांगानिकूर्मःसंहरतेपुनः तथेंद्रि
याणिमनसासंयंतव्यानिभिक्षुणा ४९ तमःपरिगतंवेश्मयथादीपेनदृश्यते तथाबुद्धिप्रदीपेनशक्यआत्मानिरीक्षितुं ५०
एतत्सर्वंचपश्यामित्वयिबुद्धिमतांवर यच्चान्यदपिवेत्तव्यंतत्वतोवेदतद्भवान् ५१ ब्रह्मर्षेविदितश्चासिविषयांतमुपागतः गु
रोस्तवप्रसादेनतवचैवोपशिक्षया ५२ तस्यैवचप्रसादेनप्रादुर्भूतंमहामुने ज्ञानंदिव्यंमयापीदंतेनास्मिविदितोमम ५३
अधिकंतवविज्ञानमधिकाचगतिस्तव अधिकंतवचैश्वर्यंतच्चत्वंनावबुध्यसे ५४ बाल्याद्वासंशयाद्वापिभयाद्वाप्यवि
मोक्षजात् उत्पन्नेचापिविज्ञानेनाधिगच्छसितांगतिं ५५ व्यवसायेनशुद्धेनमद्विधैश्छिन्नसंशयः विमुच्यहृदयग्रंथीना
साद्यतितांगतिं ५६ भवांश्चोत्पन्नविज्ञानः स्थिरबुद्धिरलोलुपः व्यवसायादृतेब्रह्मन्नासादयतितत्परं ५७ नास्तिते
सुखदुःखेषुविशेषोनास्तिलोलुपः नौत्सुक्यंनृत्यगीतेषुनरागउपजायते ५८ नबंधुष्वनुबंधस्तेनभयेष्वस्तितेभयं प
श्यामित्वांमहाभागतुल्यलोष्टाश्मकांचनं ५९ अहंत्वामनुपश्यामियेचाप्यन्येमनीषिणः आस्थितंपरमंमार्गमक्षयं
तमनामयं ६० ॥ ॥ ॥ ॥

५१ अध्यायः एतत्श्रुत्वानुवचनमित्यादिरध्यायस्य तात्पर्यं तु यत्र शिवविष्णुस्कंदब्रह्मादीनां महामहिम्नां समागम तत्र पुत्रापत्यमेदेशे योगिना ध्यानार्थं गंतव्यं विधा च

यत्फलं ब्राह्मणस्येह मोक्षार्थं व्ययरात्मकः तस्मिन्नेव व्रतेऽस्य त्वं किमन्यत्परिपृच्छसि ५१ शांतो मोक्षधर्मे मुमुक्षुको सक्तो भीष्म उवा-
च एतत्ते पृष्टस्तु तातु वचनेन कृतात्मा कृतनिश्चयः आत्मनात्मानमास्थाय दृष्ट्वा चात्मानमात्मना १ कृतकार्यः सुखी शांतस्तूष्णीं
प्रायादुदङ्मुखः शैशिरं गिरिमुद्दिश्य सधर्मो मातरिश्वनः २ एतस्मिन्नेव काले तु देवर्षिर्नारदस्तथा हिमवन्तमियात् द्रष्टुं सि-
द्धचारणसेवितं ३ तमप्सरोगणाकीर्णं शान्तस्वननिनादितं किंनराणां सहस्रैश्च भृंगराजैस्तथैव च ४ मद्गुभिः खञ्जरीटैश्च वि-
चित्रैर्जीवजीवकैः चित्रवर्णैर्मयूरैश्च केकाशतविराजितैः राजहंससमूहैश्च हंसैः परभृतैस्तथा ६ पक्षिराजो गरु-
त्मांश्च यस्मिन्नित्यमधितिष्ठति चत्वारो लोकपालाश्च देवाः सर्षिगणास्तथा ७ तत्र नित्यं समायाति लोकस्य हितकाम्य-
या विष्णुना यत्र पुत्रार्थं तपस्तप्तं महात्मना ८ तत्रैव च कुमारेण बाल्ये क्षिप्ता दिवौकसः शक्तिर्न्यस्ता क्षितितले त्रैलोक्य-
मवमन्य वै ९ तत्रोवाच जगत्स्कंदः क्षिपन्वाक्यमिदं तदा योऽन्योऽस्ति मत्तोऽभ्यधिको विप्रा यस्याधिकं प्रियाः १० यो ब्र-
ह्मण्यो द्वितीयोऽस्ति त्रिषु लोकेषु वीर्यवान् सोऽभ्युद्धरत्विमां शक्तिमथवा कंपयत्विति ११ ॥ ॥ ॥ ॥

गोपनीया गुरुशिष्याभ्यां च स्वोचितधर्मं गास्थेयमिति १ शैशिरं गिरिं हिमालयं २ ३ ४ ५ ६ ७ ८ ९ १० ११
खंजरीटैश्चेति खंजरीटः खंजन इति वैजयंती जीवंजीवादयो जलचरपक्षिभेदाः। केका मयूरस्य वाचः श्वेतैर्वैरेतिरानसंश्लिष्टैरितरपक्षिभ्यो वैलक्षण्यं पक्षाचितमि-
तिबोद्धव्यम् ३ । ४ । ५१७ । ११

तत्क्रुद्धास्त्वथितालोकाः कद्रमामुद्धरेदिति अथ देवगणाः सर्वे संभ्रांतेंद्रियमानसं १२ अपश्यद्भगवान्विष्णुः क्षिप्तं सासुरराक्षसं कि
मत्र सुकृतं कार्यं भवेदिति विचिंतयन् १३ अनामभ्यत्ततः शेषमेवेत्यत्र च पावकिं संप्रगृह्य विशुद्धात्मा शक्तिं प्रज्वलितां तदा १४ कं
पयामास सव्येन पाणिना पुरुषोत्तमः शक्त्यां तु कंप्यमानायां विष्णुना बलिना तदा १५ मेदिनी कंपिता सर्वा सशैलवनकानना श
केनापि समुद्धर्तुं कंपिता सा भवत्तदा १६ रक्षितास्तं क्रुद्धराजस्य धर्षणात्प्रभविष्णुना तां कंपयित्वा भगवान्प्रह्लादमिदमब्रवीत् १७
पश्य वीर्यं कुमारस्य नैतदन्यः करिष्यति सोमप्यमाणास्तद्वाक्यं समुद्धरणनिश्चितः १८ जग्राह तां तदा शक्तिं नैवैनां स व्यकंपयत्
नादं महांतमुत्सृज्य मूर्छितो गिरिमूर्धनि १९ विह्वलः प्रापतद्भूमौ हिरण्यकशिपोः सुतः तत्रोत्तरां दिशं गत्वा शैलराजस्य पार्श्वतः
२० तपो तप्यत दुर्धर्षं तातनिसं वृषध्वजः पावकेन परिक्षिप्तं दीप्यता यस्य चाश्रमं २१ आदित्यपर्वतं नाम दुर्धर्षमकृतात्मभि
ः न तत्र शक्यते गंतुं पक्षसद्दानवैः २२ दशयोजनविस्तारमग्निज्वालासमावृतं भगवान्पावकस्तत्र स्वयं पतिष्ठति वीर्यवा
न् २३ सर्वान्विघ्नान्प्रशमयन्महादेवस्य धीमतः दिव्यं वर्षसहस्रं हि पादेनैकेन तिष्ठतः २४ देवान्संतापयंस्तत्र महादेवो
महाव्रतः ऐंद्रीं तु दिशमास्थाय शैलराजस्य धीमतः २५ विविक्ते पर्वततटे पाराशर्यो महातपाः वेदानध्यापयामास व्यासः
शिष्यान्महातपाः २६ सुमंतुं च महाभागं वैशंपायनमेव च जैमिनिं च महाप्राज्ञं पैलं चापि तपस्विनं २७ यत्र शिष्यैः
परिवृतो व्यासस्त्वास्ते महातपाः तमाश्रमपदं रम्यं ददर्श पितुरुत्तमं २८ आरणेयो विशुद्धात्मा नभसीव दिवाकरः अथ व्या
सपरिक्षिप्तं ॥ ॥ ॥ ॥ ॥

स्कूस ५

मो०
४८८
488

लंतमिवपावकं २८ ददृशेसुतमायांतंदिवाकरसमप्रभं असज्जमानंवृक्षेषुशैलेषुविषयेषुच योगयुक्तंमहात्मानंयथाबाणंगुणाच्चु
तं २९ सोभिगम्यपितुःपादावगृह्णादरणीसुतः यथोपजोषंतैश्चापिसमागच्छन्महामुनिः ३० ततोनिवेदयामाससपित्रेसर्वम
शेषतः शुकोजनकराजेनसंवादंप्रीतिमानसः ३१ एवमध्यापयंछिष्यान्व्यासःपुत्रंचवीर्यवान् उवासहिमवत्पृष्ठेपाराशर्योमहा
मुनिः ३२ ततःकदाचिच्छिष्यास्तंपरिवार्यावतस्थिरे वेदाध्ययनसंपन्नाःशांतात्मानोजितेंद्रियाः ३३ वेदेषुनिष्ठांसंप्राप्यसां
गेष्वपितपस्विनः अथोचुस्तेतदाव्यासंशिष्याःप्रांजलयोगुरुं ३४ शिष्याऊचुः महतातेजसायुक्तायशसाचापिवर्द्धिताः एकंत्वि
दानीमिच्छामोगुरुणानुग्रहंकृतं ३५ इतितेषांवचःश्रुत्वाब्रह्मर्षिस्तानुवाचह उच्यतामितितद्वत्सायद्वःकार्यंप्रियंमया ३६ ए
तद्वाक्यंगुरोःश्रुत्वाशिष्यास्तेहृष्टमानसाः पुनःप्रांजलयोभूत्वाप्रणम्यशिरसागुरुं ३७ ऊचुस्तेसहिताराजन्निदंवचनमुत्त
मं यदिप्रीतउपाध्यायोधन्याःस्मोमुनिसत्तम ३८ कांक्षामस्तुवयंसर्वेवरंदातुंमहर्षिणा षष्ठःशिष्योनतेख्यातिंगच्छेदत्रप्रसी
दनः ३९ चत्वारस्तेवयंशिष्यागुरुपुत्रश्चपंचमः इहवेदाःप्रतिष्ठेरन्नेषनःकांक्षितोवरः ४० शिष्याणांवचनंश्रुत्वाव्यासोवे
दार्थतत्त्ववित् पराशरात्मजोधीमान्परलोकार्थचिंतकः ४१ उवाचशिष्यान्धर्मात्माधर्म्यंनैःश्रेयसंवचः ब्राह्मणायसदादे
यंब्रह्मशुश्रूषवेतथा ४२ ब्रह्मलोकेनिवासंयोध्रुवंसमभिकांक्षति भवंतोबहुलाःसंतुवेदोविस्तार्यतामयं ४३ नाशिष्ये
संप्रदातव्योनाव्रतेनाकृतात्मनि एतेशिष्यगुणाःसर्वेविज्ञातव्यायथार्थतः ४४ नापरीक्षितचारित्रेविद्यादेयाकथंचन यथा
हिकनकंशुद्धंतापच्छेदनिकर्षणैः ४५ ॥ ॥ ॥ ॥ ॥

एम०
४८८

परीक्षेततथाशिष्यानीक्षेत्कुलगुणादिभिः ननियोज्यास्त्ववः शिष्याश्चनियोगेमहाभये ४६
यथामतियथापाठंतथाविद्याफलिष्यति सर्वस्तरतुदुर्गाणिसर्वोभद्राणिपश्यतु ४७ श्रा
वयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतः वेदस्याध्ययनंहीदंतच्चकार्यंमहत्स्मृतं ४८ ॥ ॥

५१ स्वाध्यायः एतच्छ्रुत्वागुरोर्वाक्यमि...रेः व्यासः पुत्रमवारयदित्यंतस्य तात्पर्यं विद्याप्रचारः कर्तव्यः विदुषापि वेदाध्ययनं न त्याज्यं स्वाध्यायानध्यायपरिपालनं च

५७३

कृत्स्नमर्थमिहेहदेवानांवेदाःसृष्टास्वयंभुवा योनिर्वदेत्तंसंमोहान्नब्राह्मणोवेदपारगः ४९ सोभिध्यानाद्ब्राह्मणस्यपराभूया
त्संशयं यश्चाधर्मेणविब्रूयाद्यश्चाधर्मेणपृच्छति ५० तयोरन्यतरःप्रैतिविद्वेषंचाधिगच्छति एतद्वःसर्वमाख्यातंस्वाध्या
यस्यविधिंप्रति उपकुर्याच्चशिष्याणामेतच्चहृदिवोस्तु ५१ श्रांतानांमोक्षधर्मेषुशुकोत्पत्तौ भीष्मउवाच एतच्छ्रुत्वागुरो
र्वाक्यंव्यासशिष्यामहौजसः अन्योन्यंहृष्टमनसः परिषस्वजिरेतदा १ उक्ताःस्मोयद्भगवतातदात्वायतिसंहितं तन्नो
मनसिसंरूढंकरिष्यामस्तथाचतत् २ अन्योन्यंसंविभाष्यैवंसुप्रीतमनसःपुनः विज्ञापयंतिस्मगुरुंपुनर्वाक्यविशारदा
ः ३ शैलादस्मान्महींगंतुंकांक्षितंनोमहामुने वेदाननेकधाकर्तुंयदितेरुचितंप्रभो ४ शिष्याणांवचनंश्रुत्वापराशरा
त्मजःप्रभुःप्रत्युवाचततोवाक्यंधर्मार्थसहितंहितं ५ क्षितिंवादेवलोकंवागम्यतांयदिरोचते अप्रमादश्चवःकार्योब्र
ह्महिप्रचुरछलं ६ तेनुज्ञातास्ततःसर्वेगुरुणासत्यवादिना जग्मुःप्रदक्षिणंकृत्वाव्यासंमूर्ध्नाभिवाद्यच ७ ॥ ॥

कर्तव्यमिति १ तदात्वायतिसंहितंतदात्वेनतत्कालेच्चापतोउत्तरकालेचसंहितंसम्यक्कृहितं २ ३ ४ ५ ६ ७ ८

चातुर्होत्रं चतुर्होतृसंज्ञाका मंत्राः ।७ चित्तिः स्रुक् चित्तमाज्यमित्यादयोऽध्यात्माधियज्ञयोरभेददर्शनार्थाः तत्सर्वं कं प्रवृत्तं कर्म चातुर्होत्रं अग्निहोत्रादिकं सोमांतं अकल्पयन् प्रव

अवतीर्य महीं तेऽथ चातुर्होत्रमकल्पयन् संयाजयंतो विप्रांश्च राजन्यांश्च विशस्तथा ८ पूज्यमाना द्विजैर्नित्यमेव यथाविधि ते रताः या
जनाध्यापनरताः श्रीमंतो लोकविश्रुताः ९ अवतीर्णेषु शिष्येषु व्यासः पुत्रसहायवान् तूष्णीं ध्यानपरो धीमानेकांते समुपाविश
त् १० तं ददर्शाश्रमपदे नारदः सुमहातपाः अथैनमब्रवीत्काले मधुराक्षरया गिरा ११ भो भो ब्रह्मर्षे वासिष्ठ ब्रह्मघोषो न व
र्त्तते एको ध्यानपरस्तूष्णीं किमास्से चिंतयन्निव १२ ब्रह्मघोषैर्विरहितः पर्वतोऽयं न शोभते रजसा तमसा चैव सोमः सोपप्लवो
यथा १३ न भ्राजते यथापूर्वं निषादानामिवालयः देवर्षिगणजुष्टोऽपि वेदध्वनिनिराकृतः १४ ऋषयश्च हि देवाश्च गंधर्वाश्च
महौजसः वियुक्ता ब्रह्मघोषेण न भ्राजंते यथापुरा १५ नारदस्य वचः श्रुत्वा कृष्णद्वैपायनोऽब्रवीत् महर्षे यत्त्वया प्रोक्तं वेद
वादविचक्षण १६ एतन्मनोनुकूलं मे भवानर्हति भाषितुं सर्वज्ञः सर्वदर्शी च सर्वत्र च कुतूहली १७ त्रिषु लोकेषु यद्वृत्तं स
र्वं तव मते स्थितं तदाज्ञापय विप्रर्षे ब्रूहि किं करवाणि ते १८ यन्मया समनुष्ठेयं ब्रह्मर्षे तदुदाहर वियुक्तस्येह शिष्यैर्मे नाति
हृष्टमिदं मनः १९ ॥

वर्त्तिनं वंतः ।१२ सोऽप्लवो राहुग्रस्तः ।१८ नातिहृष्टमिदं मन इति विदुषामपि शिष्यादिसंयोग वियोग वियोगजं सुखदुःखमपरिहार्यमिति भावः ।१९ ॥ ॥

590

अनाम्नायः अनारतिस्स एवमलोरुपणीयेषु २९ ततोनध्यायइत्यादिश्लोकैः योगिनांस्वेच्छयाकृतेलोके ब्रह्मांडे संचारयोग्यताइच्छयोद्दिष्टायागमस्तयाभवतीनाह् श्रीविद्यावक्तुंप्रव
र्त्तेते २६ कुतइतिवायोर्मलकारणंप्रश्नः विचेष्टितमितिवायुकर्मप्रश्नः २८ प्रश्नमभिनंदन्नसाधंस्मजिज्ञासाच्चतिदुर्लभेतिसूचयतिदिव्यमिति योगसंस्कृतंतचक्षु

नारदउवाच अनाम्नायमलोवेदाब्राह्मणस्याव्रतंमलं मलंपृथिव्यावाहिकाः स्त्रीणांकौतूहलंमलं २१ अधीयतांभवान्वेदा
न्साईं पुत्रेणधीमता विधुन्वन्ब्रह्मघोषेणरक्षोभयकृतंतमः २१ भीष्मउवाच नारदस्यवचः श्रुत्वाव्यासः परमधर्मवित्
तथेत्युवाचंसहृष्टोवेदाभ्यासदृढव्रतः २२ शुकेनसहपुत्रेणवेदाभ्यासमथाकरोत् स्वरेणोच्चैः सशैक्ष्येणलोकानापूरय
न्निव २३ तयोरभ्यसतोरेवंनानाधर्मप्रवादिनोः वातोतिमात्रप्रववौसमुद्रानिलवेजितः २४ ततोनध्यायइतितं
व्यासः पुत्रमवारयत् शुकोवारितमात्रस्तुकौतूहलसमन्वितः २५ अपृच्छत्पितरंब्रह्मन्कुतोवायुरभूदयं आख्या
तुमर्हतिभवान्वायोः सर्वंविचेष्टितं २६ शुकस्यैतत्तुवचः श्रुत्वाव्यासः परमविस्मितः अनध्यायनिमित्तेस्मिन्निदंवच
नमब्रवीत् २७ दिव्यंतेचक्षुरुत्पन्नंस्वयंतेनिर्मलंमनः तमसारजसाचापित्यक्तः सत्वेव्यवस्थितः २८ ॥ ॥

व्यवहितार्थग्राहित्वात् मनश्चनिर्मलं अतीतादिग्राहित्वेसर्वज्ञत्वादिहेतोर्बुद्धिसत्वे २९ ॥ ॥ ॥ ॥

आत्मनिर्बुद्धेर्वेदान्तवेद्यार्थान् असक्तः हापोहायोहान् मां परिभाव्य बुद्ध्यानिश्चयेन समनुचिंतय वायुः कुतोऽस्ति इति सारं किं विचारय ३० देवयानेति यो विष्णो सोऽपि
कस्य परमात्मनः संबंधी देवयानोऽर्चिरादिमार्गस्तत्र चरतीति तेन मार्गेण तासात्विकान् उपासकान् विष्णुलोकं अपुनरावृत्तिपदं प्रापयतीत्यर्थः पितृयानश्च धूमा
दिपितृयाणमार्गप्रदश्चायमेव स तु तामसः पुनरावृत्तिदत्वात् ३१ पृथिव्यामिति पृथिव्यां पिंडे। अंतरिक्षे ब्रह्मांडे संवांति संगच्छंति वायुमार्गाः वायुसंचारस्था
नानि। तत्र देहे तावत् वायुस्थानवर्णबीजानि नकुलीशयोगपारायणे प्रोक्तानि प्राणो ग्राह्य अहं नाभिपादांगुष्ठांतसंस्थितिः नीलः सोकारेफादिबीजेन विनि

आदेशे स्वामिवच्छायां पश्य स्वात्मानमात्मना असक्तमनित्यं वेदान्बुद्ध्या समनुचिंतय ३० देवयानचरो विष्णोः पितृयानश्च
तामसः इत्येतौ प्रेत्य पंथानौ दिवं चाधश्च गच्छतः ३१ पृथिव्यामंतरिक्षे च यत्र संवांति वायवः सप्तैते वायुमार्गा वै तान्निबोधानुपूर्
वशः ३२

योजितः ॐ यमित्यर्थः रुक्सोपानः रुकादिस्थः पृष्ठपृष्ठांतपाश्रितः सतारकनकारांतबीजेन विनियोजितः ॐ पमित्यर्थः पाकचापनिभो व्यानस्त्वगिंद्रियनिकेतनः तार
कोपितयांतान बीजेन जो विराजितः ॐ लमित्यर्थः मूर्द्धस्योगन्धनाल्वमकंठहृत्सतत्वाश्रयः उदानो त्युवहरणछायास्तारकाक्रांतयांतयुक् ॐ रमित्यर्थः मेचनः
समानो हृन्नाभिसर्वसंधिनिकेतनः प्रणवाक्रांतलांतेन बीजेनासंततमुज्ज्वल इति ॐ वमित्यर्थः षट्सप्तम मार्गौ तु जीवन्मुक्तिविदेहमुक्तिप्रदौ वक्ष्यति। देवगणा।
अध्यात्मं इंद्रियाणि तेषां पुत्र समानः इंद्रियाणां सामान्यावृत्तिरेव समानाख्यः तदुक्तं सांख्यसमये सामान्याकरणवृत्तिः प्राणाद्या वायवः पंचेति। एवं आधिदै
वमपि साध्यानां देवानां समानाद्यरस्थः पिंडब्रह्मांडयोरभेदात् ३२ ॥ ३२ ॥ ३२ ॥ ॥

सामान्यरूपं। सामान्यरूपं।

९१

३३ उदान इति सतेषां मुख्यत्वेन सर्वकार्यत्वात् उन्नेयत्वं स्थूलत्वं ज्ञेयं ३४ अनपत इति प्राणस्य कार्यांतरं नास्ति सर्वापेक्षया स्थूलत्वं च दर्शितं ३५ पिंडे प्राण
कार्ये प्राणशब्दप्रवृत्तिनिमित्तं चाह प्राणिनामिति ३६ अप्येवाधिदैवकर्म नामनीत्याह प्रेरयतीति सोर्द्धेन धूमोष्मजानेव घनान्स्नेहं संस्कारं च अवयवसहयु
तान् जलवृष्टिकालं प्राप्य प्रवर्षे प्रेरयतीति योजना। स एव वायुः धूमज्योतिस्सलिलक्रमेण विद्युत्वं प्राप्य महाद्युतिः स्वभवति। विद्युन्मध्ये इति पंचमोल्पत्वोपे

तत्रैव गणाः साध्या महाभूता महाबलाः तेषामप्यभवत्पुत्रः समानो नाम दुर्ज्जयः ३३ उदानस्तस्य पुत्रोभूद्व्यानस्तस्याभव
त्सुतः अपानश्च ततो ज्ञेयः प्राणश्चापि ततोपरः ३४ अनपत्योभवत्प्राणो दुर्द्धर्षः शत्रुतापनः पृथक्कर्माणि तेषां तु
प्रवक्ष्यामि यथातथं ३५ प्राणिनां सर्वतो वायुश्चेष्टां वर्त्तयते पृथक् प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते ३६ प्रेरय
त्यभ्रसंघातान्धूमजांश्चोष्मजांश्च यः प्रथमः प्रथमे मार्गे प्रवहो नाम योनिलः अंबरे स्नेहमभ्येत्य तडिद्भ्यश्चोत्तमद्यु
तिः ३७ ॥ ॥

प्रथमः विष्णुरेव समानादिक्रमेण सप्तमोपि संहारक्रमेण प्रथम इत्यर्थः अयंभावः। पृथ्वोदारतघाराणां तदन्नामिपादांगुष्ठानां मध्ये न्यस्तेमस्थानि प्राणा
निरोध्य नीलवर्णं प्राणं ३७ यमिति वीजशरीरं संचिन्तयन् योगी कियता कालेन सिद्धिं प्राप्तो जीवन्नेव शरीरेण प्रवहमार्गेण संचरतीति इहांतेन च प्रवहे
ण ताराणां सप्रमोनाति एवं सर्वत्र प्रयोगो ज्ञेय इति ३७

आध्यात्मिकस्याग्नेः समाधिदैवकर्मेनामनी आह आवह इति मध्यके आसमंताद्वहतीत्यावहः आहारेत्युक्ते स्वेनेन उद्दीपके न जठराग्निरिति आहारेणाऽपानः अपा
नस्य जाठरोद्दीपकत्वमाह याज्ञवल्क्यः स्वयं नयानं संप्राप्य मेनैव सह मारुतः प्रयाति ज्वलनं तत्र प्राणो मध्यगतः पुनः वायुना वाजितो वह्निरेकोनि न मान्ने शनैः शनैः तत्र
दीप्यतः ज्वल ति विप्रेंद्र सकले देहमध्यमे प्राणः अपानं प्राप्य प्रवर्त्य ज्वलनं प्रयाति प्रवर्तयति अपानेन [illegible] वायुना वाजितः वीजितः वोविध्यनेनेत्युक्त इति उष्णता ह्यधातो

आवहो नाम संवाति द्वितीयः श्वसनानलः उदयं ज्योतिषां सम्यक् सोमादीनां करोति यः ३८ अंगे देहेषु चादानं यथावद्
निमवीषिणः यस्त्वनुभ्यः समुद्रेभ्यो वायुरुद्धारयेज्जलं उद्धृत्य दत्ते चापोजीमूतेभ्यो वरेनिलः ३९ योद्भिः संयोज्य
जीमूतान् मेघाय प्रपद्यति उद्वहो नाम वंहिष्ठस्तृतीयः स सदागतिः ४० समुह्यमाना बहुधा येन नीताः पृथग्घ
नाः वर्षमोक्षकृतारंभास्ते भवंति घनाघनाः ४१ ॥ ॥ ॥ ॥ ॥

निष्ठायां सृष्ठा हि विप्रेंद्र गार्गि इति याज्ञवल्क्यश्लोकार्थः आदानस्यापानस्य नामांतरं योगिप्रसिद्धमित्यर्थः ३८ अंगे देहे धृत्स्वं इंदुदानमिति पाठे उन्नयन
द्धमादानसाम्यादुद्वहादानयोरैक्यं ३९ पर्जन्याय प्रयच्छति मानिनि देवतायैवं वहिष्ठः अतिशयेन वदुः ४० वर्षमोक्षाय कृतः आरंभो यैस्ते रिष्यमानो मेघः पूर्णाः
गोलाद्धनाघन उच्यत इत्यर्थः ४१ ॥

संहताः संवीभू[illegible]ताश्चापियेनहेतुनातेश्यकुत्राविद्धाः प्रक्षिप्ताः भवंति अतस्तेषां बाधमानेवेणुवन्न्दृतांशब्दंकुर्वंतानदाइतिनामभवतिरक्षणार्थायगोस्तानवनसे
चनातरिक्तात्रापितेमेघत्वंयांतिमिहसेचनइतिधातुः नतु [illegible]रसफलवन्नश्यंतीत्यर्थः ५२ यो [illegible]सविति। वहनइतिपादेपिसएवार्थः। तृश्चुहिंसायामितिधातोरूपं ५३
मर्द्दनेमेवाहयेनेतिबलेनपरोपमर्द्दनत्वंहंतिगच्छंतितिबलाहकाः पृषोदरादित्वान्नकारलोपः श्रीहिगतौ इतिधातुः ५४ दारुणेति। दारुणाः लोकनाशसूचकाः

संहतायेनचाविद्धाभवंतिनदंतानदाः रक्षणार्थायसंभृतामेघत्वमुपयांतिच ५२ योसौवहतिभूतानांविमानानिविवि
हायसा चतुर्थःसंवहोनामवायुःसगिरिमर्द्दनः ५३ येनवेगवताहृग्णारूक्षेणारुजतानगोन् वायुनासहितामेघा
स्तेभवंतिबलाहकाः ५४ दारुणोत्पातसंचारोनभसस्तनयित्नुवान् पंचमःसमहावेगोविवहोनाममारुतः ५५
यस्मिन्पारिप्लवादिव्यावहंत्यापोविहायसा पुण्यंचाकाशगंगायास्तोयंविष्टभ्यतिष्ठति ५६ दूरात्प्रतिहतोयस्मिन्ने
करश्मिर्दिवाकरः योनिरंशुसहस्रस्यनभातिवसुंधरा ५७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

घमेकेनसंवर्त्तमेघादयः उत्पातास्तेषांसंचारोयेनस्तनयित्नुःसगर्ज्जितोमेघत्वदानविषमवहनाद्विवहः ५५ परित्तः उपप्लवयस्यवेगात्संतंतिनलघःयंतीतिप
रिप्लवाः स्वार्थेतद्धितःयः तोयंविष्टभ्यस्थाकाशेएवावस्थाप्य ५६ दूरादितियेनप्रतिहतः सूर्यः सहस्ररश्मिरप्येकरश्मिरिवभातीत्यर्थः ५० ५७ ५०

एवं पिंडब्रह्मांडान्तर्गतानूर्ध्वाधिकारिकान्पंचवायूनुक्त्वा षष्ठं तदंतर्गतमपि तदस्पर्शिनं वायुमाह यस्मादिति यस्मात्सहस्ररश्मिस्थितात् चिद्रद्वारभ्यात् त्रयं सोमो ब्रह्मां
डान्तर्गतः क्षीरोदधिरोपः ब्रह्मांडाप्यायनकर्तापिंडान्तर्गतमनश्चापिंडाप्यायनकर्ता एतद्द्वयं प्राप्य आप्यायनेन इतेषः परिवहः सर्वतो वहनाद्व्यापकः कारणात्मा षष्ठो
वायुरित्यर्थः ४८ अनुकोलिकल्पांतेनिरस्यति संहरति मृत्युवैवस्वतावपि यदनुरोधिनौ तयोरपि प्रेरक इत्यर्थः एतेन मृत्युरस्मानां ब्रह्मादीनां तदधीनत्वं कैमुति
कन्यायसिद्धं ४९ अध्यात्मचिंतकाः इति पूजायां बहुवचनं पुत्रसंबोधनं । शांतयावासनाशून्यतरविषयेभ्य उपरतया बुद्ध्या सम्यक्कृत्स्नं इदं ब्रह्मास्मीति वा क्वाप्यनुसंधा

यस्मादाप्याययन्ते मे सोमः क्षीरोदः संपूर्णा मे दरत्नः षष्ठः परिवहो नाम स वायुर्जयतां वरः ४८ सर्वप्राणभृतां प्राणान्यो नुत्का
लेनिरस्यति यस्य वर्त्मानुवर्तेते मृत्युवैवस्वतावुभौ ४९ सम्यगन्वीक्षतां बुद्ध्या शांतयाध्यात्मचिंतकाः ध्यानाभ्यासा।
भिरामाणां योऽमृतत्वाय कल्पते ५० यं समासाद्य वेगेन दिशांतं प्रतिपेदिरे दक्षस्य दशपुत्राणां सहस्राणि प्रजापते
: ५१ येन सृष्टः पराभूतो यात्येव न निवर्त्तते परावहो नाम परो वायुः स दुरतिक्रमः ५२ ॥ ॥ ॥ ॥

नपूर्वकं अन्वीक्षतां श्रवणमननध्यानेन पश्यतां ध्यानमेवाभ्यासोऽभिरमं येषां तेषां योऽमृतत्वाय कल्पते ५० दिशांतं प्रतिपेदिरे ब्रह्मांडं निर्भिद्य गता इ
त्यर्थः ५१ सप्तममाह येनेति सृष्टः उपसृष्टः एक एवायं निर्बीजसमाधिगम्यः यावदारब्धकर्मभोगं यस्मिन्लीनोऽपि योगी संस्कारशेषसत्वात्पुन
रावर्त्तते। प्रारब्धभोगांते देहनाशे तु नावर्तते इति एतयोर्भेदः अतो दक्षपुत्राणामपि आरब्धकर्मभोगांतानावृत्तिरेव ज्ञेया ५२ ॥ ॥ ॥

अस्निन्तः स्वं उ न शून्यायाः अदीनायाः परमचित्तेः पुत्र इव पुत्रा रूपभेदाः ५४ पर्वतकंपने हेतुमाह विस्फोरिति। यतो यः पवेदो विस्फोरिति। पवनो यः पवेदो विष्णोर्निश्वास
वातः महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्यादि श्रुतेः ॥ सयदा वेगेन समीरितः सहसा अकस्मात् उदीर्यते उच्चैः पच्यते तदा जगद्व्यथते मूलपुरुषनि

एवमेतेऽदितेः पुत्रा मारुताः परमाद्भुताः अनारतं ते संवान्ति सर्वगाः सर्वधारिणः ५३ एतत्तु महदाश्चर्यं यदयं पर्वतोत्त
मः कंपितः सहसा तेन वायुनाभिप्रवायता ५४ विष्णोर्निश्वासवातोयं यदा वेगसमीरितः सहसोदीर्यते तात ज
गत्प्रव्यथते तदा ५५ तस्माद्ब्रह्मविदो वेदान्नाधीयन्तेतिवायति वायौ वायुभयं प्रोक्तं ब्रह्म तत्पीडितं भवेत् ५६
एतावदुक्त्वा वचनं पराशरसुतः प्रभुः उक्त्वा पुत्रमधीष्वेति व्योमगंगामगात्तदा ५७ शांतौ मोक्षधर्मेषु शुकोत्प
त्तिः समाप्ता ॥

निश्वासः सहसा उच्चैरुत्थितः कदाचित्सर्वसंहरेच्छितिर्हेतोरिति भावः ५५ आख्यायिकाया विधित्सितमाह तस्मादिति वायुर्वेदरूपो वेगेनोत्थाप्यमानः एवं
वातः वायुक्तं भयजनको भवति तेन च नद्ब्रह्म जगद्रूपं वेदरूपं वा पीडितं भवति अतो महावायौ वायति वाति सति नाध्येतव्यमित्यर्थः ५७ शांतौ परिद्धियचाश
त्तमः

आत्मज्ञानेनसंचितक्रियमाणयोःकर्मणोर्दाहश्लेषौभवतः प्रारब्धंतुज्ञानेनाप्यपरिहार्यमितिसर्वत्रसिद्धं योगीतुनिर्विकल्पकसमाध्यभ्यासेनवासुल्लभावत्गृहांतरमिवदेहा
द्देहांतरंप्रविश्यवाप्सुकर्तव्यंथप्रारब्धंयोगेनवादेहसिद्ध्यावादेहारंभकंकर्मप्रतिवध्नातिउच्छिनत्तिदर्शयिष्यंतुशुकोमहातेनमारब्धेते। अतएवयोगीज्ञानिभ्योपिमहानितिगी

भीष्मउवाच एतस्मिन्नंतरेशून्येनारदःसमुपागमत् शुकंस्वाध्यायनिरतंवेदार्थान्प्रष्टुमीप्सया १ देवर्षिंतुशुकोदृष्ट्वाना
रदंसमुपस्थितं अर्घ्यपूर्वेणविधिनावेदोक्तेनाभ्यपूजयत् २ नारदोथाब्रवीत्प्रीतोब्रूहिधर्मभृतांवर केनत्वांश्रेयसावत्सयोज
यामीतिहृष्टवत् ३ नारदस्यवचःश्रुत्वाशुकःप्रोवाचभारत अस्मिंल्लोकेहितंयत्स्यात्तेनमांयोक्तुमर्हसि ४ नारदउवाच
तत्त्वंजिज्ञासतांपूर्वमृषीणांभावितात्मनां सनत्कुमारोभगवानिदंवचनमब्रवीत् ५ नास्तिविद्यासमंचक्षुर्नास्तिसत्यसमं
तपः नास्तिरागसमंदुःखंनास्तित्यागसमंसुखं ६ निवृत्तिःकर्मणःपापात्सततंपुण्यशीलता सद्वृत्तिःसमुदाचारःश्रेयए
तदनुत्तमं ७ मानुष्यमसुखंप्राप्ययःसज्जतिसमुह्यतिनालंसदुःखमोक्षायसंयोगोदुःखलक्षणं ८ सक्तस्यबुद्धिश्च
लतिमोहजालविवर्धिनी मोहजालावृतोदुःखमिहचामुत्रसोश्नुते ९ ॥ ॥ ॥ ॥ ॥ ॥

तास्वप्युक्तं तपस्विभ्योधिकोयोगीज्ञानिभ्योपिमतोधिकइतितत्रतावल्लोकदूषस्यहानार्थंतुच्छत्वंप्रदर्श्यतेनारदवाक्येन। एतस्मिन्नंतरेइत्यादिना शुकनारदउ
यागमत्शुकोवेदार्थान्प्रष्टुमीहयानारदमभ्यपूजयदितिसंबंधः १ ॥ ॥ ॥ ॥ ॥ ॥

१५ आत्मभूतैरेहेंद्रियादिभिः सहचवर्त्तते विनैवपृथक्कवर्त्ततेनेकः अनुभूतः देहादिनादात्म्यंबाधित्वाकेवलीभूतः १६ १८ २० २२ ॥ ॥ ॥ ॥ ॥

छिद्रंपरद्दे ७

सर्वोपायात्तुकामस्यक्रोधस्यचविनिग्रहः कार्यःश्रेयोर्थिनातौहिश्रेयोघातार्थमुद्यतौ १० नित्यंक्रोधात्तपोरक्षेच्छ्रियंरक्षेतमत्सरात्
विद्यांमानावमानाभ्यामात्मानंतुप्रमादतः ११ आनृशंस्यंपरोधर्मः क्षमाचपरमंबलं आत्मज्ञानंपरंज्ञानंनसत्याद्विद्यतेपरं १२
सत्यस्यवचनंश्रेयः सत्यादपिहितंवदेत् यद्भूतहितमत्यंतमेतत्सत्यंमतंमम १३ सर्वारंभपरित्यागीनिराशीर्निष्परिग्रहः येनस
र्वंपरित्यक्तंसविद्वान्सचपंडितः १४ इंद्रियैरिंद्रियार्थांनश्चरत्यात्मवशैरिह असज्जमानःशांतात्मानिर्विकारःसमाहितः १५
आत्मभूतैरतद्भूतःसहचैवविनैवच सविमुक्तःपरंश्रेयोनचिरेणाधिगच्छति १६ अदर्शनमसंस्पर्शस्तथासंभाषणंसदा यस्य
भूतैः सहमुनेसश्रेयोविंदतेपरं १७ नहिंस्यात्सर्वभूतानिमैत्रायणगतश्चरेत् नेदंजन्मसमासाद्यवैरंकुर्वीतकेनचित् १८
आकिंचन्यंसुसंतोषोनिराशीस्त्वमचापलं एतदाहुःपरंश्रेयआत्मज्ञस्यजितात्मनः १९ परिग्रहंपरित्यज्यभवतातजितेंद्रि
यः अशोकंस्थानमातिष्ठइहचामुत्रचाभयं २० निरामिषानशोचंतित्यजेदामिषमात्मनः परित्यज्यामिषंसौम्यदुःखता
पाद्विमोक्ष्यसे २१ तपोनित्येनदांतेनमुनिनासंयतात्मना अजितंजेतुकामेनभाव्यंसंगेष्वसंगिना २२ ॥

३३ शेषग्रंथः स्पष्टार्थो व्याख्यातप्रायश्चेति न व्याख्यायते ३४ ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गृहासंगेष्वनासक्त एकचर्यारतः सदा आत्मज्ञो न चिरादेव सुखमाप्यात्यनुत्तमं २३ द्वंद्वारामेषु भूतेषु य एको रमते मुनिः विद्धि प्रज्ञा
नतृप्तं तं ज्ञानतृप्तो न शोचति २४ शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषं अशुभैश्चाप्यधो जन्म कर्मभिर्लभतेवशः २५
तत्र मृत्युजरादुःखैः सततं समभिद्रुतः संसारे पच्यते जंतुस्तत्कथं नावबुध्यसे २६ अहिते हितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः ।
अनर्थे चार्थसंज्ञस्त्वं किमर्थं नावबुध्यसे २७ संवेष्ट्यमानं बहुभिर्मोहात्तंतुभिरात्मजैः कोशकार इवात्मानं वेष्टयन्नावबुध्य
से २८ अलं परिग्रहेणेह दोषवान्हि परिग्रहः कृमिर्हि कोशकारस्तु बध्यते स्वपरिग्रहात् २९ पुत्रदारकुटुंबेषु सक्ताः सीदंति
जंतवः सरः पंकार्णवे मग्ना जीर्णा वनगजा इव ३० महाजालसमाकृष्टान्स्थले मत्स्यान्निवोद्धृतान् स्नेहजालसमाकृष्टान्
पश्य जंतून्सुदुःखितान् ३१ कुटुंबं पुत्रदारांश्च शरीरं संचयाश्च ये पारक्यमध्रुवं सर्वं किं स्वं सुकृतदुष्कृतं ३२ यदा सर्वान्परित्य
ज्य गंतव्यमवशेन ते अनर्थे किं प्रसक्तस्त्वं स्वमर्थं नानुतिष्ठसि ३३ अविश्रांतमनालंबमपाथेयमदैशिकं तमः कांतारमध्वा
नं कथमेको गमिष्यसि ३४ न हि त्वा प्रस्थितं कश्चित्पृष्ठतोनुगमिष्यति सुकृतं दुष्कृतं च त्वां यास्यंतमनुयास्यति ३५ ॥

मो०

४९५

४९५

विद्याकर्मचशौचंचज्ञानंचबहुविस्तरं क्षेमकआरित्राणिनौचालनदंडाः यस्यांधर्मस्थैर्यवटारकानौकर्मतारज्जुर्यस्यां ४१ महाभूतेति पंचभूतानिमहत्तत्वबुद्धिः यच्चआत्र

विद्याकर्मचशौचंचज्ञानंचबहुविस्तरं अर्थार्थमनुसार्यंतेसिद्धार्थश्चविमुच्यते ३६ निबंधनीरज्जुरेषायायामेवसतोरतिः छित्वै
तांसुकृतोयांतिनैनांछिंदंतिदुष्कृतः ३७ रूपकूलामनःस्रोतास्पर्शद्वीपारसावहा गंधपंकाशब्दजलास्वर्गमार्गदुरावहा ३८
क्षमारित्रासत्यमयीधर्मस्थैर्यवटारका त्यागवाताध्वगाशीघ्रानौतार्यातानदींतरेत् ३९ त्यजधर्ममधर्मंचतथासत्यानृतेत्यज
उभेसत्यानृतेत्यक्त्वायेनत्यजसितंत्यज ४० त्यजधर्ममसंकल्पादधर्मंचाप्यलिप्सया उभेसत्यानृतेबुध्यावुद्धिंपरमनिश्च
यात् ४१ अस्थिस्थूणंस्नायुयुतंमांसशोणितलेपनं चर्मावनद्धंदुर्गंधिपूर्णंमूत्रपुरीषयोः ४२ जराशोकसमाविष्टंरोगा
यतनमातुरं रजस्वलमनित्यंचभूतावासमिमंत्यज ४३ इदंविश्वंजगत्सर्वमजगच्चापियद्भवेत् महाभूतात्मकंसर्वंमह
द्यत्परमाणुयत् ४४ इंद्रियाणिचपंचैवतमःसत्त्वंरजस्तथा इत्येषसप्तदशकोराशिरव्यक्तसंज्ञकः ४५ सर्वैरिहें
द्रियार्थैश्चव्यक्ताव्यक्तैर्हिसंहितः चतुर्विंशकइत्येषव्यक्ताव्यक्तमयोगुणः ४६ ॥ ॥ ॥ ॥

राम०

४९५

यातेइहलोकंपरलोकगामिरजसप्तदशकः इंद्रियाणिपंचचकारात्पंचप्राणाः तमआदित्रयंएकमिति ४४ इंद्रियार्थैः आदिभिः शब्दादिभिः पंचभिः मंतव्यंबोद्धव्यंअहं
कर्तव्यंचातैः सहाष्टभिः एवंचतुर्विंशकः ४५ ४६

५१ रिष्यते ५२ हिंस्यते ५३ तीर्थवित्मोक्षोपायवित् ५३ ५४ ५५ ५६ ५७ ५८ ॥ ॥ ॥ ॥

एतैस्सैवः समायुक्तः पुमानित्यभिधीयते त्रिवर्गंतुसुखंदुःखंजीवितंमरणंतथा ४७ यइदंवेदतत्वेनसवेदप्रभवाप्ययौ
पारंपर्येणबोद्धव्यंज्ञानानामयत्रकिंचन ४८ इंद्रियैर्गृह्यतेयद्यत्तत्तद्व्यक्तमितिस्थितिः अव्यक्तमितिविज्ञेयंलिंगग्राह्यमती
द्रियं ४९ इंद्रियैर्नियतैर्देहीधारा भिरिवतर्प्यते लोकेविततमात्मानंलोकांश्चात्मनिपश्यति ५० परावरदृशः शक्तिर्ज्ञा
नमूलानश्यति पश्यतःसर्वभूतानिसर्वावस्थासुसर्वदा ५१ सर्वभूतस्यसंयोगोनाशुभेनोपपद्यते ज्ञानेनविविधान्क्लेशा
नतिवृत्तस्यमोहजान् ५२ लोकेबुद्धिप्रकाशेनलोकमार्गोनरिष्यते अनादिनिधनंजंतुमात्मनिस्थितमव्ययं ५३ ।
अकर्तारममूर्तंचभगवानाहतीर्थवित् योजंतुःस्वकृतैस्तैस्तैः कर्मभिर्नित्यदुःखितः ५४ सदुःखप्रतिघातार्थंहंतिजंतू
ननेकधा ततः कर्मसमादत्तेपुनरन्यन्नवंबहु ५५ तप्यतेथपुनस्तेनभुक्त्वापथ्यमिवातुरः अजस्रमेवमोहांधोदुःखेषु
सुखसंज्ञितः ५६ बध्यतेमथ्यतेचैवकर्मभिर्मंथवत्सदा ततोनिव[illegible]संयोनिकर्मणामुदयादिह ५७ परिभ्रमतिसंसारं
चक्रवद्बहुवेदनः सतुनिवृत्तबंधस्तुनिवृत्तश्चापिकर्मतः ५८ ॥ ॥ ॥ ॥ ॥

संयमेनधारणाध्यानसमाध्यात्मकेना नवंदृष्टिमात्रेणोत्पन्नं ५६ अध्यायः अशोकं १७ द्रावनैर्थे इष्टस्यदिरिद्वविनाशः स्वशरीरतापस्त्र २ ६ १० १२

सर्वविन्सर्वजित्सिद्धोभवभावविवर्जितः संयमेननवंबंधंनिवर्त्येनयसोवलात् संप्राप्नावहवःसिद्धिमप्यवाधासुखोदयं ५६ शां
तोमोक्षधर्मेषु नारदउवाच अशोकंशोकनाशार्थंशास्त्रंशांतिकरंशिवं निशम्यलभतेबुद्धिंतांलब्ध्वासुखमेधते १ शोक
स्थानसहस्राणिभयस्थानशतानिच दिवसेदिवसेमूढमाविशंतिनपंडितं २ तस्मादनिष्टनाशार्थमितिहासंनिबोधमे तिष्ठ
तेचेद्वशेबुद्धिर्लभतेशोकनाशनं अनिष्टसंप्रयोगाच्चविप्रयोगात्प्रियस्यच मनुष्यामानसैर्दुःखैर्युज्यंतेस्वल्पबुद्धयः ४ द्र
व्येषुसमतीतेषुयेगुणास्तान्नचिंतयेत् नतानाद्रियमानस्यस्नेहबंधःप्रमुच्यते ५ दोषदर्शीभवेत्तत्रयत्ररागःप्रवर्त्तते
अनिष्टवर्द्धितंपश्येत्तथाक्षिप्रंविरज्यते ७ नार्थोनधर्मोनयशोयोतीतमनुशोचति अप्यभावेनयुज्येततच्चास्यननिव
र्त्तते ८ गुणैर्भूतानियुज्यंतेवियुज्यंतेतथैवच सर्वाणिनैतदेकस्यशोकस्थानंहिविद्यते ९ मृतंवायदिवानष्टंयोतीतमन
नुशोचति दुःखेनलभतेदुःखंद्वावनर्थौप्रपद्यते १० नाश्रुकुर्वंतियेबुद्ध्यादृष्ट्वालोकेषुसंततिं सम्यक्प्रपश्यतःसर्वंना
श्रुकर्मोपपद्यते ११ दुःखोपघातेशारीरेमानसेवाप्युपस्थिते यस्मिन्नशक्यतेकर्तुंयत्नस्तन्नानुचिंतयेत् १२ ॥॥

भैषज्यमेतदुःखस्ययदेतन्नानुचिंतयेत् चिंत्यमानंहिनव्येतिभूयश्चापिप्रवर्द्धते १३ प्रज्ञयामानसंदुःखंहन्याच्छारीरमौषधैः एतद्विज्ञानसा
मर्थ्यंनवालैःसमतामियात् १४ अनित्यंयौवनंरूपंजीवितंद्रव्यसंचयः आरोग्यंप्रियसंवासोगृध्येत्तत्रनपंडितः १५ नजानपदिकंदुः
खमेकःशोचितुमर्हति अशोचन्प्रतिकुर्वीतयदिपश्येदुपक्रमं १६ सुखाद्बहुतरंदुःखंजीवितेनात्रसंशयः स्निग्धत्वंचेंद्रियार्थेषुमोहान्म
रणमप्रियं १७ परित्यजतियोदुःखंसुखंवाप्युभयंनरः अभ्येतिब्रह्मसोत्यंतंनतंशोचंतिपंडिताः १८ त्यजंतेदुःखमर्थाहिपालनेन
चतेसुखाः दुःखेनचाधिगम्यंतेनाशमेषांनचिंतयेत् १९ अन्यामन्यांधनावस्थांप्राप्यवैशेषिकींनरः अतृप्तायांतिविध्वंसंसंतोषं
यांतिपंडिताः सर्वेक्षयांतानिचयाः पतनांताःसमुछ्रयाः संयोगाविप्रयोगांतामरणांतंहिजीवितं २० अंतोनास्तिपिपासायास्तु
ष्टिस्तुपरमंसुखं तस्मात्संतोषमेवेहधनंपश्यंतिपंडिताः २१ निमेषमात्रमपिहिवयोगच्छन्नतिष्ठति स्वशरीरेष्वनित्येषुनित्यंकिमनु
चिंतयेत् २२ भूतेषुभावंसंचिंत्ययेबुध्वामनसःपरं नशोचंतिगताध्वानःपश्यंतःपरमांगतिं २३ संचिन्वानकमेवैनंकामानामवितृप्त
कं व्याघ्रः पशुमिवासाद्यमृत्युरादायगच्छति २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

३० अध्यायः विपर्यासः सुखेदुःखधीः दुःखेसुखधीः १ ३ विधित्साभिः विपासाभिः तृष्णाभिः ५ व्यत्ययः पौर्वापर्यं ६ ॥ ॥ ६ ॥

तथाप्युपायं संपश्येत् दुःखस्य परिमोक्षणं अशोचन्नारभेतैव मुक्तश्चाव्यसनी भवेत् २५ शब्देस्पर्शे च रूपे च गंधेषु च रसेषु
च नोपभोगात्परं किंचिद्धनिनो वाधनस्य वा २६ प्राक्संप्रयोगाद्भूतानां नास्ति दुःखं परायणे विप्रयोगात्तु सर्वस्य न शोचेत्प्रकृति
स्थितः २७ धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा चक्षुःश्रोत्रे च मनसा मनो वाचं च विद्यया २८ प्रणयं प्रतिसंहृत्य संस्तु
तेष्वितरेषु च विचरेदसमुन्नद्धः स सुखी स च पंडितः २९ अध्यात्मरतिरासीनो निरपेक्षो निरामिषः आत्मनैव सहायेन यश्चरेत्स सु
खी भवेत् ३० शांतौ मोक्षधर्मे शुकाभिपतने नारद उवाच सुखदुःखविपर्यासो यदा समुपपद्यते नैनं प्रज्ञा सुनीतं वा
त्रायते नापि पौरुषं १ स्वभावाद्यत्नमातिष्ठेद्यत्नवान्नावसीदति जरामरणरोगेभ्यः प्रियमात्मानमुद्धरेत् २ रुजंति हि शरी
राणि रोगाः शारीरमानसाः सायका इव तीक्ष्णाग्राः प्रयुक्ता दृढधन्विभिः ३ व्यथितस्य विधित्साभिस्ताम्यतो जीवितैषिणः
अवशस्य विनाशाय शरीरमपकृष्यते ४ स्रवंति न निवर्त्तंते स्रोतांसि सरितामिव आयुरादाय मर्त्यानां रात्र्यहानि पुनः पु
नः ५ व्यत्ययो ह्ययमत्यंतं पक्षयोः शुक्लकृष्णयोः जातान्मर्त्यान्जरयति निमेषान्नावतिष्ठते ६ ॥ ॥ ॥ ॥

सुखदुःखानिभूतानामजरोजरयस्तसौ आदित्योस्तमस्तम र्येतिपुनःपुनरुदेतिच ७ अदृष्टपूर्वानादायभावानपरिशंकितान् दृष्टानि
हान्मनुष्याणामस्तंगच्छतिएवमयः ८ योयमिच्छेद्यथाकामंकामानांतत्सवाप्नुयात् यदिस्यान्नपराधीनंपुरुषस्यक्रियाफलं ९ संयता
श्चहिदक्षाश्चमतिमंतश्चमानवाः दृश्यंतेनिष्फलाःसंतःप्रहीणाःसर्वकर्मभिः १० अपरेबालिशाःसंतोनिर्गुणाःपुरुषाधमाः आ
शीर्भिरप्यसंयुक्तादृश्यंतेसर्वकामिनः ११ भूतानामपरःकश्चिद्धिंसायांसततोत्थितः वंचनायांचलोकस्यससुखेष्वेवजीर्यते १२
अचेष्टमानमासीनंश्रीःकंचिदुपतिष्ठते कश्चित्कर्मानुसृत्यान्योनाप्राप्यमधिगच्छति १३ अपराधंसमाचक्ष्वपुरुषस्यस्वभावतः शु
क्रमन्यत्रसंभूतंपुनरन्यत्रगच्छति १४ तस्ययोनौप्रयुक्तस्यगर्भोभवतिवानवा आम्रपुष्पोपमायस्यनिर्वृत्तिरुपलभ्यते १५
केषांचित्पुत्रकामानामनुसंतानमिच्छतां सिद्धौप्रयतमानानांनचांडमुपजायते १६ गर्भाच्चोद्विजमानानांक्रुद्धादाशीविषादिव
आयुष्मान्जायतेपुत्रः कथंप्रेतइवाभवत् १७ देवानिष्ट्वातपस्तप्त्वाकृपणैःपुत्रगृद्धिभिः दशमासान्परिधृताजायंतेकुल
पांसनाः १८ अपरेधनधान्यानिभोगांश्चपितृसंचितान् विपुलानभिजायंतेलब्धास्तैरेवमंगलैः १९ ॥ ॥ ॥

देहेन २

२० शीघ्रमिति परशरीरस्थि शरीरं तत्स्थि प्राप्नुवंती ति शेषः छिन्नं वीजं स्वर्गनरकांकुरवीजं स्थूलशरीरं यस्य जं शरीरिणां करा [illegible] प्राणसंरोधमिति कीदृशं शरीरिणां मांसस्थि ता दियुक्तेन वीभत्सेन चेष्टितं चेष्टा यस्य तं मरणोपि सद्यः शरीरांतरमायातीति देहवंधविछेदो न कस्यचित्स्त्रीसमर्थः २१ परेदेहे देहांतरे निरुद्धं जीवं विनश्यंतं जीवं अभिलक्ष्य

वमि २

अन्योन्यं समभिप्रेत्य मैथुनस्य समागमे । उपद्रववशाद्वापि विष्टायोनिर्गर्भः प्रपद्यते २० शीघ्रं परशरीरस्थि छिन्नवीजं शरीरिणां प्राणि नं प्राणसंरोधमासंस्थ्मविचेष्टितं २१ निरुद्धं परदेहे तु परदेहं चलाचलं विनश्यंतं विनाशांते ना विनार्त्ताहितं २२ संक्रमाज ठरस्यान्तरे तौ विंदुमेचेतनं केनयत्नेन जीवंतं गर्भे त्वमिह पश्यसि २३ अन्नपानानि जीर्यंते यत्र भक्ष्याश्च भक्षिताः तस्मिन्नेवोद रे गर्भः किंनान्नमिव जीर्यते २४ गर्भे मूत्रपुरीषाणां स्वभावनियता गतिः धारणा वा विसर्गे वा न कर्त्ता विद्यते वशः २५ अवते स्युदरे ह्यगर्भो जायमाना न हत्यापरे आगमेन तथा मे धाविना पाउपपद्यते २६ एतस्माद्योनिसंबंधाद्यो वीजं परिमुच्यते प्रजा च
लभते कोपि मुग्धे देहेषु सज्जति २७

[illegible] परे देहे देहांतरं चलाचलं परिणामितया निचपलं अहि तउपस्थ्या वित्तं भवति कर्मेति शेषः २२ देहधारणमस्माध्व
योनिस्माह संगत्येति २३ २४ २५ २६ २७

सक्तस्येति सहजातस्य स्वनदिप्रवाहस्येव वृद्धस्य देहस्य गर्भवासो जन्म बाल्यं कौमारं पौगंडं यौवनं स्थावीर्य्यं जरा प्राणरोधो नाशश्चेति दश शरीरस्य दशा स्तासु नवमीस्थाविर्पत्तेत्र पुत्र दारकुटुंबभरणादिचिंतया आकुलेन नवमीं तु प्राणरोधः तां उभयीं यंच मृत्योर्नैव प्राप्नुवंति न [illegible] ततः नवमीं प्राप्य न भवति दशमीं स्वभावदशां च प्राप्नुवंतीत्यर्थः गतायुषः

सक्तस्य सहजातस्य सप्तमीं नवमीं दशां प्राप्नुवंति ततः पंचत्वं भवति गतायुषः २८ नाभ्युत्थाने मनुष्याणां योगाः स्युर्नात्र संशयः व्या धिभिश्च विमथ्यंते व्याधैः क्षुद्रमृगा इव २९ व्याधिभिर्मथ्यमानानां त्यजतां विपुलं धनं वेदनां नापकर्षंति यतमाना श्चिकित्सका : ३० ते चापि निपुणा वैद्याः कुशलाः संभृतौषधाः व्याधिभिः परिकृष्यंते मृगा व्याधैरिवार्दिताः ३१ ते पिबंतः कषायांश्च सर्पींषि विविधानि च दृश्यंते जरया भग्ना नगा नागैरिवोत्तमैः ३२ के वा भुवि चिकित्संते रोगार्त्तान्मृगपक्षिणः श्वापदानि दरिद्रांश्च प्रायो ना र्त्ता भवंति ते ३३ घोरानपि दुराधर्षान्नृपतीनुग्रतेजसः आक्रम्याददते रोगाः पशून्पशुगणा इव ३४ इति लोकमनाक्रंदं मोह शोकपरिप्लुतं स्रोतसा सहसाक्षिप्तं ह्रियमाणं बलीयसा ३५ न धनेन न राज्येन नोग्रेण तपसा तथा स्वभावमतिवर्तंते ये नियु क्ताः शरीरिणः ३६ न म्रियेरन्न जीर्येरन् सर्वे स्युः सर्वकामिनः नाप्रियं प्रतिपश्येयुरुत्थानस्य फलेन ते ३७ ॥ ॥ ॥

सक्तः तस्येति संबंधः २८ योगाः सामर्थ्यानि ३४ अनाक्रंदं वेदनया मूढं ३५ ३६ ३७ ॥ ॥ ॥ ॥

~~४८ असंश्लिष्टः सर्वबाधाविनिर्मुक्तः ४९ ५०~~ ॥ ॥ ॥

उपर्युपरिलोकस्यसर्वोगंतुंसमीहते यततेचयथाशक्तिनचतद्वर्त्ततेतथा ३८ ऐश्वर्यमदमत्तांश्चमत्तान्मद्यमदेनच अप्रमत्ताः
शठाः शूराविक्रांताः पर्युपासते ३९ क्लेशाः परिनिवर्त्तंतेकेषांचित्समीक्षिताः स्वंस्वंचपुनरन्येषांनकिंचिदधिगम्यते ४० महच्च
च फलवैषम्यं दृश्यतेकर्मसंधिषु वहंति शिबिकामन्येयांत्यन्येशिबिकागताः ४१ सर्वेषामृद्धिकामानामन्येरथपुरःसराः मनु
ष्याश्चगतस्त्रीकाः शतशोविविधाः स्त्रियः ४२ द्वंद्वारामेषुभूतेषुगच्छंत्येकैकशोनराः इदमन्यत्पदंपश्यमात्रमोहंकरिष्यसि ४३ त्यज
धर्ममधर्मंचउभेसत्यानृतेत्यज उभेसत्यानृतेत्यक्त्वायेनत्यजसितंत्यज ४४ एतत्तेपरमंगुह्यमाख्यातमृषिसत्तम येनदेवाः परित्य
ज्यमर्त्यलोकंदिवंगताः ४५ नारदस्यवचः श्रुत्वाशुकः परमबुद्धिमान् संचिंत्यमनसाधीरोनिश्चयंनाध्यगच्छत ४६ पुत्रदारैर्म
पा३ हान्क्लेशोविद्यायामहांश्रमः किंनुस्याच्छाश्वतंस्थानमल्पक्लेशंमहोदयं ४७ ततोमुहूर्त्तंसंचिंत्यनिश्चितांगतिमात्मनः परा
वरज्ञोधर्मस्यपरांनैःश्रेयसींगतिं ४८ कथंत्वहमसंश्लिष्टोगच्छेयंगतिमुत्तमां नावर्त्तेयंयथाभूयोयोनिसंकरसागरे ४९ परं
भावंहिकांक्षामियत्रनावर्त्ततेपुनः सर्वसंगान्परित्यज्यनिश्चितोमनसागतिः ५० ॥ ॥ ॥ ॥।

५१ अवबंधः नीचोदेहबंधः ५२ दिवाकरमितिअर्कमंडलांतर्वर्त्तीगर्भः परवाच्यः संसारबीजभर्जनकत्वात्सर्वेषांप्राणिनांबुद्धेः प्रवर्त्तकोगायत्रीप्रतिपाद्योग्राह्यः
तत्तचिराद्दिमार्गपर्वमूर्धन्यमंडलाभिमानिनमादित्यंकुतएतत्तत्कार्यब्रह्मलोकंप्रतितद्गमनस्याद्दर्शनात्सुकस्तमारुतात्ऊर्ध्वेगतिंकृत्वांतरिक्षगाद्दर्शपिनाप्रमा

वंस्त्वंप्रत्यमूप्योभवतदेतिगाथा
शोवेश्युद्धप्रत्यमा १

तत्रयास्यामियत्रात्माग्रामेमेधिगमिष्यति अक्षयश्चाव्ययश्चैवयत्रस्थास्यामिशाश्वतः ५१ नतुयोगमृतेशक्याप्राप्तुंसा
परमागतिः अवबंधोहिबुद्धस्य कर्मभिर्नोपपद्यते ५२ तस्माद्योगंसमास्थायसन्त्यक्त्वागृहकलेवरं वायुभूतः प्रवेक्ष्यामिते
जोराशिंदिवाकरं ५३ नेशोऽक्षयतांयातिसोमः सुरगणैर्यथा कंपितः पततेभूमिंपुनश्चैवाधिरोहति ५४ क्षीयतेहि
सदासोमः पुनश्चैवाभिपूर्यते नेच्छाम्येवंविदित्वेतत्ह्रासवृद्धीपुनःपुनः ५५ रविस्तुसंतापयतेलोकान्रश्मिभि।
रुल्बणैः सर्वतस्तेजआदत्तेनित्यमक्षयमंडलः अतोगमिष्याम्यादित्यंदीप्ततेजसं ५६ अत्रवत्स्यामिदुर्धर्षोनिः
शंकेनांतरात्मना सूर्यस्यसदनेचाहंनिक्षिप्येदंकलेवरं ५७ ॥ ॥ ॥ ॥ ॥ ॥

त्वद्दर्शनाच्चसूर्यमंडलपर्यंतंगमनंतुतस्ययोगप्रभावदर्शनमात्रमितितुअत्रैवस्पष्टमस्ति ५३ आचंद्रमार्गेनिर्दिष्टानहीतिसोमःसोमादिमार्गेणसोम
लोकंगतः ५४ तल्लोकाधिपतेरपिह्रासवृद्धीतत्रगताश्चपितारस्तादृशाएवभवंतीत्याहक्षीयतेहीति ५६ अत्रवत्स्यामीतिलिंगान्नात्रमार्गपर्वमूर्धन्यत्वा
दित्योगृह्यतेसर्पपदोर्हारेणतेविरजाःप्रयांतीतिस्पष्टार्थत्वमात्रश्रवणात् ५७

सेोरंसर्वस्थमादित्यंसांतर्यामिायस्थादित्ये तिष्ठन्नादित्यांतरोपमादित्यो मनवेदेत्यादिश्रुतेस्तंतामत् ६४ अध्यायः निःसृत्यसो १ २ ३ ४

ऋषिभिः सहसायास्यामिसोत्संगे जोतिडःसह आपृछामिनगान्नागान्गिरिमुर्वींदिशोदिवं ५८ देवदानवगंधर्वान्पिशाचो रगराक्षसान्लोकेषुसर्वभूतानिप्रवेक्ष्यामिनसंशयः ५९ पश्यंतुयोगवीर्यंमेसर्वेदेवाःसहर्षिभिः अथानुज्ञाप्यतमृ षिंनारदंलोकविश्रुतं ६० तस्मादनुज्ञांसंप्राप्यजगामपितरंप्रति सोभिवाद्यमहात्मानंकृष्णद्वैपायनंमुनिं ६१ शुकः प्रदक्षिणंकृत्वाकृष्णमापृष्टवान्मुनिं श्रुत्वाचर्षिस्तद्वचनंशुकस्यप्रीतोमहात्मापुनराहचैनं ६२ भोभोपुत्रस्थीयतांतावदद्य यावच्चक्षुःप्रीणयामित्वदर्थे निरपेक्षःशुकोभूत्वानिःस्नेहोमुक्तसंशयः ६३ मोक्षमेवानुसंचिंत्यगमनायमनोदधे पित रंसंपरित्यज्यजगाममुनिसत्तमः कैलासपृष्टंविपुलंसिद्धसंघनिषेवितं ६४ शांतौमोक्षधर्मेषुशुकाभिगमने भीष्मउवाच गिरिशृंगंसमारुह्यसुतोव्यासस्यभारत समेदेशेविविक्तेसनिःशलाकउपाविशत् १ धारयामासचात्मानंयथाशास्त्रं यथाविधि पादप्रभृतिगात्रेषुक्रमेणक्रमयोगवित् २ ततःसप्राङ्मुखोविद्वानादित्येनाचिरोदिते पाणिपादंसमादाया विनीतव उपाविशत् ३ नतत्रपक्षिसंघोतानशब्दोनापिदर्शनं यत्रवैयासकिर्धीमानयोक्तुंसमुपचक्रमे ४

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

११ व्यवसायेन सार्वात्म्यनिश्चयेन १५ अधःकायात्तु चैवं के तपसा स्थैर्यं तद्दर्शितः स्वदेहस्याधोभागं न वपश्यन्तोऽसृथेः १६ १०

सदृश्यं सदात्मानं सर्वसंगविनिःसृतं प्रजहास ततो हासं शुकः संप्रेक्ष्य तत्परं ५ स पुनर्योगमास्थाय मोक्षमार्गोपलब्धये महायोगीश्व
रो भूत्वा सोऽत्यक्रामद्विहायसं ६ ततः प्रदक्षिणां कृत्वा देवर्षिं नारदं तदा निवेदयामास चैतं स्वयोगं परमर्षये ७ शुक उवाच दृष्टो मार्ग
: प्रवृत्तोऽस्मि स्वस्ति तेऽस्तु तपोधन त्वत्प्रसादाद्गमिष्यामि गतिमिष्टां महाद्युते ८ नारदेनाभ्यनुज्ञातः शुको द्वैपायनात्मजः अभिवा
द्य पुनर्योगमास्थायाकाशमाविशत् ९ कैलासपृष्ठादुत्पत्य स पपात दिवं तदा अंतरिक्षचरः श्रीमान्वायुभूतः सुनिश्चितः १०
तमुद्यंतं द्विजश्रेष्ठं वैनतेयसमद्युतिं ददृशुः सर्वभूतानि मनोमारुतरंहसं ११ व्यवसायेन लोकांस्त्रीन्सर्वान्सोऽथ विचिंतयन् आस्थि
तो दीर्घमध्वानं पावकार्कसमप्रभः १२ तमेकमनसं यांतमव्यग्रमकुतोभयं ददृशुः सर्वभूतानि जंगमानि चराणि च १३ य
थाशक्ति यथान्यायं पूजां वै चक्रिरे तदा पुष्पवर्षैश्च दिव्यैस्तमवचक्रुर्दिवौकसः १४ तं दृष्ट्वा विस्मिताः सर्वे गंधर्वाप्सरसां गणाः
ऋषयश्चैव संसिद्धाः परं विस्मयमागताः १५ अंतरिक्षगतः कोऽयं तपसा सिद्धिमागतः अधःकायोर्ध्ववक्त्रश्च नेत्रैः सम
भिरज्यते १६ ततः परमधर्मात्मा त्रिषु लोकेषु विश्रुतः भास्करं समुदीक्षन्स प्राङ्मुखो वाग्यतोऽगमत् १७ ॥ ॥ ॥

शब्देनाकाशमखिलंपूरयन्निवसर्वशः तमापतंतंसहसादृष्ट्वासर्वाप्सरोगणाः १८ संभ्रांतमनसोराजन्नासन्परमविस्मिताः पंचचूडाप्रम
तयोमन्यमुत्फुल्ललोचनाः १९ दैवतंकतमंह्येतदुत्तमांगतिमास्थितं सुनिश्चितमिहायातिविमुक्तमिवनिःस्पृहं २० ततःसमभिचक्राममम
लयंनामपर्वतं उर्वशीपूर्वचित्तिश्चयंनित्यमुपसेवतः २१ तस्यब्रह्मर्षिपुत्रस्यविस्मयंययतुःपरं अहोबुद्धिसमाधानंवेदाभ्यासरतेद्विजे
२२ अचिरेणैवकालेननभश्चरतिचंद्रवत् पितृशुश्रूषयाबुद्धिंसंप्राप्तोयमनुत्तमां २३ पितृभक्तोदृढतपाःपितुःसुदयितःसुतः अन
न्यमनसातेनकथंपित्राविसर्जितः २४ उर्वश्यावचनंश्रुत्वाशुकःपरमधर्मवित् उदैक्षतदिशःसर्वावचनेगतमानसः २५ सोंतरिक्षंम
हींचैवसशैलवनकाननां विलोकयामासतदासरांसिसरितस्तथा २६ ततोद्वैपायनसुतंबहुमानात्समंततः कृतांजलिपुटाःसर्वानि
रीक्ष्यंतेस्मदेवताः २७ अब्रवीत्तास्तदावाक्यंशुकःपरमधर्मवित् पितायद्यनुगच्छेन्मांक्रोशमानःशुकेतिवै २८ ततःप्रतिवचोदेयंस
र्वैरेवसमाहितैः एतन्मेस्नेहतःसर्वेवचनंकर्तुमर्हथ २९ शुकस्यवचनंश्रुत्वादिशःसर्वाःसकाननाःसमुद्राःसरितःशैलाःप्रत्यू
चुस्तंसमंततः ३० ॥ ॥

३१ अध्यायः इत्येवमिति दोषांश्चतुरः सात्विकान् मोक्षप्रतिबंधकान् मोक्षप्रतिबंधकान् धर्मज्ञानवैराग्यैश्वर्याणि हानात् एतैः किल्बिषसंसर्गाः नैश्वर्याख्यान् यदाहमनुः
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान्ध्यानेनानैश्वरान्गुणानिति वा योगानिति पाठे वितर्कविचारानंदास्मितारव्यान् संप्रज्ञा
तभेदान्तत्फलानीत्यर्थः १ अष्टविधं पुर्यष्टकं प्रकारं तमः पंचविधं विषयपंचकं प्रवर्तकं वासनामयं रजः नवगुणं रजइति पाठे त्रसागित्वमकारूपेण सुखदुः

यथाज्ञापयसे विप्र बाढमेवं भविष्यति इत्येवमाहतुस्तौ वाक्यं प्रतिवक्ष्यामहे वयं ३२१ शांतौ मोक्षधर्मे शुकाभिपतने
भीष्म उवाच इत्येवमुक्त्वा वचनं ब्रह्मर्षिः सुमहातपाः प्रातिष्ठत शुकः सिद्धिं हित्वा दोषांश्चतुर्विधान् १ तमो ह्यष्टविधं हि
त्वा जहौ पंचविधं रजः ततः सत्वं जहौ धीमांस्तदद्भुतमिवाभवत् २ ततस्तस्मिन्पदे नित्ये निर्गुणे लिंगवर्जिते ब्रह्मणि प्र
त्यतिष्ठत्स विधूमोऽग्निरिव ज्वलन् ३ उल्कापाता दिशां दाहा भूमिकंपास्तथैव च प्रादुर्भूताः क्षणे तस्मिंस्तदद्भुतमिवाभ
वत् ४ द्रुमाः शाखाश्च मुमुचुः शिखराणि च पर्वताः निर्घातशब्दैश्च गिरिर्हिमवान्दीर्यतीव ह ५ ॥ ॥ ॥ ॥ ॥

खोपसेवनं भेदः परुषता चैव कामः क्रोधः स्थैर्यं चा दर्पो द्वेषोऽतिवादश्च एते प्रोक्ता रजोगुणा इति प्रोक्ता ज्ञेयाः सत्वं बुद्धिं सत्वेन सर्वं सत्वं जपस्तमपि सत्वं येन
सतासितसंजेतिना दिनोपदिष्टत्वात् २ तस्मिन्नाद्यादिसंतत्योऽभिगिणा परब्रह्मणि नित्ये पुनरपदे निर्वर्जिते यत्नो निर्गुणोऽप्रत्यतिष्ठत ३ महापुरुषस्य
परमे हि जगदमाग्यसूचकाः उत्पाता भवंतीत्याह उल्कापाता इति ४ ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

६ ववौमारुतः शुकस्योत्पतनेशकुनानि ९ द्विधाकृते मारेणा समुद्धूलघेनेहनुमन्मारेणमेदं द्रूयवेतरुवमथामायेन्मर्थः १५ ततस्तिरश्चीनोत्क्रामुसत्त्वसुवा

र्न बभासे सहस्रांशुर्न जज्वालाच पावकः ह्रदाश्च सरितश्चैव चुक्षुभुः सागरास्तथा ७ ववर्ष वासवस्तोयं रसवच्च सुगंधि
च ववौ समीरणश्चापि दिव्यगंधवहः शुचिः स शृंगे प्रथमे दिव्ये हिमवन्मेरुसंभवे संश्लिष्टे श्वेतपीते द्वे रुक्मरूप्यमये
शुभे ८ शतयोजनविस्तारे तिर्यगूर्ध्वं च भारत उदीचीं दिशमास्थाय रुचिरे संददर्श ह ९ सोविशंकेन मनसा तथैवा
भ्यपतच्छुकः ततः पर्वतशृंगे द्वे सहसैव द्विधाकृते १० अदृश्येतां महाराज तदद्भुतमिवाभवत् ततः पर्वतशृंगाभ्यां सह
सैव विनिःसृतः ११ न च प्रतिजघानास्य स गतिं पर्वतोत्तमः ततो महानभूच्छब्दो दिवि सर्वदिवौकसां १२ गंधर्वाणा
मृषीणां च ये च शैलनिवासिनः दृष्ट्वा शुकमतिक्रांतं पर्वतं तद्द्विधाकृतं १३ साधु साध्विति तत्रासीन्नादः सर्वत्र भा
रत स पूज्यमानो देवैश्च गंधर्वैर्ऋषिभिस्तथा १४ यक्षराक्षससंघैश्च विद्याधरगणैस्तथा दिव्यैः पुष्पैः समा
कीर्णमंतरिक्षं समंततः १५ आसीत्किल महाराज शुकाभिपतने तदा ततो मंदाकिनीं रम्यामुपरिष्टादभिव्रजन् १६
शुको ददर्श धर्मात्मा पुष्पितद्रुमकाननां तस्यां क्रीडंत्यभिरता ह्लाश्चैवाप्सरसां गणाः १७ शून्याकारं निराकाराः शु
कं दृष्ट्वा विवाससः तं प्रक्रामंतमाज्ञाय पिता स्नेहसमन्वितः १८ ॥ ॥

विद्यासु पंचम्याः ज्ञानकर्मसमुच्चयरूपायाः पार्यंतिकं फलं पंचमवायुस्थानस्पर्शं शकिं निर्दिशस्प्राप्तिः १६ १७ ॥ ॥

शुकस्येति महता नादेनात्मन ऊर्ध्वगाम्यैर्गौतम तत्र शमिति निष्क्रान्ते: १९ आस्म उत्पापन्त्यिरार्षः २१ शुकेति मुक्तानिकृते श्रुतिः स्वस्तुत उपस्थित

ऊर्ध्वमार्गगतिमास्थाय पृष्ठतो नुससार ह शुकस्तमाहृत ऊर्ध्वगतिं कृत्वान्तरिक्षगं १९ दर्शयित्वा प्रभावं स्वं ब्रह्मभूतो भवत्तदा म
हायोगगतिं लब्ध्वा आसीन्ध्यायमहातपाः २० निमेषान्तरमात्रेण शुकाभिपतनं ययौ सद्दृष्ट्वा द्विधाकृत्वा पर्वताग्रं शुकं गतं २१
शैलशृङ्गे श्रेषयत स्वकर्म पुत्रस्य तत्तदा ततः शुकेति दीर्घेण शैरेनाक्रन्दत्तदा २२ स्वयं पित्रा स्वरेणोच्चैस्त्रीलोकाननुनाद
यैवं शुकः सर्वगतो भूत्वा सर्वात्मा सर्वतोमुखः २३ प्रत्यभाषत धर्मात्मा भोः शब्देनानुनादयन् ततस्त्वेकाक्षरं नादं भोरित्येवम
मीरयन् २४ प्रत्याहरज्जगत्सर्वमुच्चैः स्थावरजङ्गमं ततः प्रभृति चाद्यापि शब्दानुच्चारितान्पृथक् २५ गिरिगह्वरपृष्ठेषु
व्याहरन्ति शुकं प्रति अन्तर्हितः प्रभावं तु दर्शयित्वा शुकस्तदा २६ गुणान्संत्यज्य शब्दादीन्पदमभ्यगमत्परं महिमानं तु तं दृष्ट्वा
पुत्रस्यामिततेजसः २७ निषसाद गिरिप्रस्थे पुत्रमेवान्वचिन्तयन् ततो मन्दाकिनीतीरे क्रीडन्तो ऽप्सरसां गणाः २८ आ
साद्य तमृषिं सर्वाः संभ्रान्ता गतचेतसः जले निलिल्यिरे काश्चित्काश्चिद्गुल्मान्प्रपेदिरे २९ वसनान्याददुः काश्चित्तं द
ष्ट्वा मुनिसत्तमं तां मुक्ततां तु विज्ञाय मुनिः पुत्रस्य वै तदा ३० सक्ततामात्मनश्चैव प्रीतो ऽभूद्व्रीडितश्च ह ॥ ॥ ॥

इति श्रुतवन्ध्यावान्तप्रकृतिभागः २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ॥ ॥

तमुवाचमहादेवइत्यादिनाछायायाःशुकस्यदानंव्यासादीनामपिपुत्रशोकोपसंतापपरिहारायइतिसूचनेनशुकवद्देवेनैष्ठिकंब्रह्मचर्यमतिश्रेष्ठमादिश्रेयोदर्शितः ३१ ४२

तंदेवगंधर्ववृतोमहर्षिगणपूजितः पिनाकहस्तोभगवानभ्यागच्छतशंकरः ३२ तमुवाचमहादेवः सांत्वपूर्वमिदंवचः पुत्रशोकाभिसंतप्तंकृष्णद्वैपायनंतदा ३३ अग्नेर्भूमेरपांवायोरंतरिक्षस्यचैवह वीर्येणसदृशः पुत्रः पुरामत्तस्त्वयावृतः ३४ सतथालक्षणोजातस्तपसातवसंभृतः ममचैवप्रसादेनब्रह्मतेजोमयः शुचिः ३५ सगतिंपरमांप्राप्तोदुःप्रापामजितेंद्रियैः दैवतैरपिविप्रर्षेतंत्वंकिमनुशोचसि ३६ यावत्स्थास्यंतिगिरयोयावत्स्थास्यंतिसागराः तावत्तवाक्षयाकीर्तिः सपुत्रस्यभविष्यति ३७ छायांस्वपुत्रसदृशींसर्वतोनपगांसदा द्रक्ष्यसेत्वंचलोकेस्मिन्मत्प्रसादान्महामुने ३८ सोनुनीतोभगवतास्वयंरुद्रेणभारत छायांपश्यन्समावृत्तः समुनिः परयामुदा ३९ इतिजन्मगतिश्चैवशुकस्यभरतर्षभ विस्तरेणसमाख्यातंयन्मांत्वंपरिपृच्छसि ४० एतदाचष्टमेराजन्देवर्षिर्नारदः पुरा व्यासश्चैवमहायोगीसंजल्पेषुपदेपदे ४१ इतिहासमिमंपुण्यंमोक्षधर्मोपसंहितं धारयेद्यः शमपरः सगच्छेत्परमांगतिं ४२ शांतौमोक्षधर्मेषुशुकोत्पतनंसमाप्तं ॥

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोः श्रीनीलकंठस्यकृतौभारतभावदीपेशांतौमोक्षधर्मेषुसप्तपंचाशदधिकशततमोध्यायः ॥ ॥ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुतेर्भक्त्या मामभिजानातीति भगवद्वचनाच्च भक्त्यैव ज्ञानं तत्र गलं बुद्ध्वा भजनी
यां देवतां पृच्छति गृहस्थ इति १ कुतः कस्य प्रसादात् प्रभवः अनावृत्तिफलको ऽयं लोकः ३ तस्माद्देवादीनां जनकात् ४ तर्कया तर्केण। आर्षो लिंग
व्यत्ययः ५ ज्ञानागमेन नान्येन विना ७ चतस्रो मूर्तयः नराद्याः स्वयंभुवस्त्वेनेनेवानुत्स्वेष्वेवेति चत्वारो व्यूहा अस्य जन्मानः तेन तुर्ये वरात्राणामिव वा

युधिष्ठिर उवाच गृहस्थो ब्रह्मचारी वा वानप्रस्थोथ भिक्षुकः य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः १ कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैःश्रेयसं परं विधिना केन जुहुयाद्दैवं पित्र्यं तथैव च २ मुक्तश्च कां गतिं गच्छेन्मोक्षश्चैव किमात्मकः स्वर्गतश्चैव किं कुर्याद्येन न च्यवते दिवः ३ देवतानां च को देवः पितॄणां च पिता तथा तस्मात्परतरं यच्च तन्मे ब्रूहि पितामह ४ भीष्म उवाच गूढं मां प्रश्नवित्प्रश्नं पृच्छसे त्वमिहानघ न ह्येष तर्कया शक्यो वक्तुं वर्षशतैरपि ५ ऋते देवप्रसादाद्वा राजन् ज्ञानागमेन वा गहनं ह्येतदाख्यानं व्याख्यातव्यं तवारिहन् ६ अत्राप्युदाहरंतीममितिहासं पुरातनं नारदस्य च संवादं ऋषेर्नारायणस्य च ७ नारायणो हि विश्वात्मा चतुर्मूर्तिः सनातनः धर्मात्मजः संबभूव पितैवं मेभ्यभाषत ८ ॥ ॥ ॥ ॥

सुदेवात्परमकारणात्संकर्षणाख्यो जीव उत्पद्यते ततः प्रद्युम्नाख्यं मनो जायते ततो निरुद्धाख्योऽहंकार उत्पद्यत इति मतं निरस्तं। तथा च सूत्रं उत्पत्त्यसंभवादिति नच कर्तुः करणमिति च। जीवस्यास्य नित्यत्वेनाविनाशित्वस्यात्तथा च मोक्षिणां। भावः कर्तुः सकाशात्कारणोत्पत्तिर्दृष्टा लोक इति सूत्रार्थः

शाकेरे शकरवत्सरे प्रिये शशिरि। कनकवत्सोर कलात्कनकामयं तन्मयं पोस्थि लोनि शेषः श्रेष्ठो श्रीविधा चक्रवत्सवाहकानियस्थाने तेः पंचभिर्युक्तैः हिरण्हैर्लोकमसि
द्धमिदं नरनारायणयोः शरीरे तु मायामये इत्यर्थः वक्ष्यति च मायायिषामयाः एव यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसीति ११ कृत

कृतेयुगे महाराज पुरा स्वायंभुवेन्तरे। नरो नारायणश्चैव हरिः कृष्णः स्वयंभुवः ८ तौ तु नारायणा नरौ तपस्तेपतुरव्ययौ वदर्याश्रम
मासाद्य शकटे कनकामये अष्टचक्रे हि तद्यानं भूतयुक्तं मनोरमं ९ यत्राद्यौ लोकनाथौ तौ कृशौ धमनि संततौ तपसा तेजसा चै
व दुर्निरीक्ष्यौ सुरैरपि १० यस्य प्रसादं कुर्वाते स देवौ द्रष्टुमर्हति नूनं तयोरनुमते हृदि हृच्छय चोदितः ११ महामेरोर्गिरेः शृंगा
त्प्रच्युतो गंधमादने नारदः सुमहद्भूतं सर्वलोकानचीचरत् १२ तं देशमगमद्राजन् बदर्याश्रममाशुगः तयोराह्निकवेलायां
तस्य कौतूहलं त्वभूत् १३ इदं तदास्पदं कृत्स्नं यस्मिन्लोकाः प्रतिष्ठिताः सदेवासुरगंधर्वाः सकिन्नरमहोरगाः १४ एकामू
र्तिरियं पूर्वं जाता भूयश्चतुर्विधा धर्मस्य कुलसंतानं धर्मादिभिर्विवर्द्धिता १५ अहो ह्यनुगृहीताद्य धर्म एभिः सुरैरिह नरना
रायणाभ्यां च कृष्णेन हरिणा तथा १६ अत्र कृष्णो हरिश्चैव कस्मिंश्चित्कारणांतरे स्थितौ धर्मोत्तरो ह्येतौ तथा तपसि धिष्ठि
तौ १७ एतौ हि परमं धाम कानयोराह्निका क्रिया पितरौ सर्वभूतानां दैवतं च यशस्विनौ १८ कां देवतां तु यजतः पि
तॄन्वा कान्महामती इति संचिंत्य मनसा भक्त्या नारायणस्य तु १९ ॥ ॥ ॥ ॥ ॥

नमितो द्रष्टुं योन्तर्यामी तेन प्रेरितः १३ आह्निकं ब्रह्मयज्ञादि आस्पदं अधिष्ठानं १५ १६ १७ १८ १९ ॥ ॥

२० अवाच्यमपि भक्तिमत्त्वाद्वक्ष्यामीत्यर्थः २८ सूक्ष्मं दुर्लक्ष्यं यतः अविज्ञेयं दुष्पादिपर्यन्तं यतः अव्यक्तं नास्ति अक्तं कार्यं यस्य कारणामपि नेत्यर्थः २

सहसाप्रादुरभवत्समीपे देवयोस्तदा कृते दैवे च पित्र्ये च ततस्ताभ्यां निरीक्षितः २० पूजितश्चैव विधिना यथाप्रोक्तेन शा-
स्त्रतः तद्दृष्ट्वा महदाश्चर्यमपूर्वं विधिविस्तरं २१ उपोपविष्टः सुप्रीतो नारदो भगवानृषिः नारायणं संनिरीक्ष्य प्रसन्नेनान्त-
रात्मना नमस्कृत्वा महादेवमिदं वचनमब्रवीत् २३ नारद उवाच वेदेषु सपुराणेषु सांगोपांगेषु गीयसे त्वमजः शाश्व-
तो धाता मतोऽमृतमनुत्तमं २४ प्रतिष्ठितं भूतभव्यं त्वयि सर्वमिदं जगत् २५ चत्वारो ह्याश्रमा देव सर्वे गार्हस्थ्यमूलकाः
यजंते त्वामहरहो नानामूर्तिसमास्थितं २६ पिता माता च सर्वस्य जगतः शाश्वतो गुरुः कं त्वद्य यजसे देवं पितरं कं न
विद्महे २७ श्रीभगवानुवाच अवाच्यमेतद्वक्तव्यमात्मगुह्यं सनातनं तव भक्तिमतो ब्रह्मन्वक्ष्यामि तु यथातथं
२८ यत्तत्सूक्ष्ममविज्ञेयमव्यक्तमचलं ध्रुवं इंद्रियैरिंद्रियार्थैश्च सर्वभूतैश्च वर्जितं २९ स ह्यंतरात्मा भूतानां क्षे-
त्रज्ञश्चेति कथ्यते त्रिगुणव्यतिरिक्तोऽसौ पुरुषश्चेति कल्पितः ३० ॥ ॥ ॥

यतः अचलं कूटस्थं विकारिणस्त्वकारणत्वनियमात् ध्रुवं शाश्वतं तत्सद्रूपमित्यर्थः एतेन नन्दसत्वशंका निरस्ता २९ पुरि शरीरे वसतीति यो-
गात्पुरुष इति कल्पितः न तु तस्य देहे संगित्वं वास्तवमस्तीत्यर्थः ३० ॥ ॥

अव्यक्तं सांख्यैर्निःसत्त्वेन कल्पितं प्रधानं ननु पुरुषस्य अव्यक्तजनकत्वे कोऽस्य व्याहतिरत आह अव्यक्तेति यासत्त्वा सैव अव्यक्ता। घटादिर्यथा निष्कृष्टा पाल
स्याः अग्रहणात् अव्यक्तं सुच भावेषु घटस्य न निलिसद्रूपेण तिष्ठति सैव सत्त्वा अव्यया अपरिणामिनी प्रकृतिरुपादानं। रज्जुरगवद् ह्रासरूपज्ञानं विवर्तेर
सम्मुपगमोऽन्तग्रसरणः कोऽस्य हानिरित्यर्थः कल्पितस्य कार्यस्य कारणं कार्यसजातीयं कल्पितमेव भवति तत्त्वं च कल्पनासमानकालिकमेव। न हि
रज्जुरगस्य सत्त्वे दृष्टान्ताभावा ग्रस्तीत्येवं किं चिन्मात्रमकल्पितं च बाधकाभावात् कार्यस्य कल्पितत्वमेवासिद्धमिति वाच्यं। यत्र नास्ति करूपावरणं पूर्वं कम
भेदेन भाति तत्त्वं कल्पितमिति नियमेनाहंकारादेर्मिथ्यात्वावगमात् भाति च चिदात्मनोः सगरूपमाहेस्तत्र भेदेन प्रसज्यात्मा अहं सुखी दुःखी

तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम अव्यक्ताव्यक्तभावस्थायां या सा प्रकृतिरव्यया ३०

आद्यन्तयोगेऽरः कारणमिति। सुवर्णं कुण्डलस्याध्यस्तत्वं माभूदिति तात्विकेति ननु अहंकारधर्मो दुःखादयस्तु द्वात्मनि चिदात्मधर्मो चेत्तस्माद
योऽहंकारे बाध्यस्तत्तोऽकिं धर्माध्यासकल्पनेनेति चेत् न यत्र द्विधर्ममात्रमध्यस्तं तत्र धर्मिणा उक्तं स्वाश्रयपते यथा लोहितः स्फटिक इति लोहि
सगोत्रमुत्प्रेक्षितेनजपाकुसुममपि। अहंकाराध्यासे तु अहं दुःखी निधर्मं तु गोत्व पूर्वकं धर्माध्यासः प्रतीयमानस्तत्र धर्मिणोऽप्यध्यस्तत्वं विस्पष्ट
मावेश। तस्माद्व्यस्तत्वेनाहमादेर्मिथ्यात्वात्तेन कारणस्याव्यक्तस्यापि तथात्वेन दृष्टिसमसमयकल्पितत्वस्याव्यभिचरितत्वात्तस्माद्व्यक्तमुत्पन्नमित्यव
तोत्पत्तिवचनं संगच्छते तत्त्वमिति दिक् ३० ॥ ॥

अस्यवाव्यक्तस्याव्यक्तस्यजीवेशविभागेदृ तुलनाहतंयोनिमितित्रिविधयापक्षंस्फोटं तंनिष्कलंचैतन्यरूपंमायया आविष्टजीवेश्वरयोः प्रकृतिंविद्धितथाचश्रुतिः
जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीतिश्रुतिः योसौनिष्कलः सदसदात्मकः सदसतीकार्य[illegible]कारणेनतत्त्वेना श्वानेनात्मरात्मकः

तंयोनिमात्वयोविद्धियोसौसदसदात्मकः अवाप्यांगभूतस्मेहिदैवेपित्र्येचकल्प्यते ३१ नास्तितस्मात्परोमंत्रोहिपितादेवोथवा
द्विजआत्माहिनः सविज्ञेयस्तस्मात्पूजयावहे ३२ तेनैषाप्रथितास्मत्कर्मणालोकभाविनी दैवंपित्र्यंच[illegible]कर्तव्यमिति
स्मानुशासनं ३३ ब्रह्मास्थाणुर्मनुर्दक्षोभृगुर्धर्मस्तथायमः मरीचिरंगिराअत्रिः पुलस्त्यः पुलहः क्रतुः ३४ वसिष्ठः परमे
ष्ठीचविवस्वान्सोमएवच कर्दमश्चापियः प्रोक्तः क्रोधोविक्रीतएवच ३५ एकविंशतिरुत्पन्नास्तेप्रजापतयः स्मृताः तस्य
देवस्यमर्यादांपूजयंतःसनातनी ३६ दैवंपित्र्यंचसततंतस्यविज्ञायतत्त्वतः आत्मप्राप्तानिचततः प्राप्नुवंतिद्विजोत्तमा
: ३७ स्वर्गस्थाअपियेकेचित्तान्नमस्यंतिदेहिनः तेतत्प्रसादाद्गच्छंतितेनादिष्टफलांगतिम् ३८ येहीनाः सप्तदशभिर्गुणैः
कर्मभिश्चैवच कलाः पंचदशत्यक्त्वातेमुक्ताइतिनिश्चयः ३९ ॥ ॥ ॥ ॥ ॥ ॥

सर्वप्रजापतेरानंदात्मासर्वैरिष्यते: ३२ तेनमायोपाधिना ३३ सप्तदशभिः पंचप्राणमनोबुद्धिदशेंद्रियैः गुणैः सत्वादिभिः कर्मभिः शुक्लकृष्णैः येस्वयं
चंद्रकलात्वेराजीयाः सक्ताः शर्वाद्दलिंगभंगउक्तः उत्तरार्द्धेस्थूलभंगउक्तः उभयोरप्येकोनविंशतिमुखत्वस्यमांडूक्यतुल्यवद्धवरणात् तन्मेवैकोन
विंशतिरतभोवेनसप्तदशपंचदशचभवंति ३९

मो०
५०६

511

क्षेत्रज्ञश्चिदात्मा सर्वगुणात्मा मायया निर्गुणात्मस्वतः ४० प्रसृतौ निर्गतौ ४१ अस्मिन्नेवाध्याये सर्वे प्रश्नाः समाहिताः ज्ञेयाः ४४ शांतौ० ३३९ चा२ अधिकः

मुक्तानांतुगतिर्ब्रह्मन्क्षेत्रज्ञइतिकल्पिता सहिसर्वगुणश्चैवनिर्गुणश्चैवकथ्यते ४० दृश्यतेज्ञानयोगेनआवांचप्रसृतौत
तः एवंज्ञात्वातमात्मानंपूजयावःसनातनं ४१ तंवेदाश्चाश्रमाश्चैवनानामतसमास्थिताः भक्त्यासंपूजयंत्याद्यंगतिं
चैषांददातिसः ४२ येतुतद्भाविताालोकेएकांतित्वंसमास्थिताः एतदभ्यधिकंतेषांयत्तेतंप्रविशंत्युत ४३ इतिगुह्यस
मुद्देशस्तवनारदकीर्तितः भक्त्याप्रेम्णाचविप्रर्षेअस्मद्भक्त्याचतेश्रुतः ४४ शांतौमोक्षधर्मेषुनारायणीये भीष्मउवा
च सएवमुक्तोद्विपदांवरिष्ठोनारायणेनोत्तमपूरुषेण जगादवाक्यंद्विपदांवरिष्ठंनारायणंलोकहिताधिवासं १ नार
दउवाच यदर्थमात्मप्रभवेनजन्मतवोत्तमंधर्मगृहेचतुर्धा तत्साध्यतांलोकहितार्थमद्यगच्छामिद्रष्टुंप्रकृतिंतवाद्यां
२ पूजागुरूणांसततंकृतामेपरस्यगुह्यंनचभिन्नपूर्वं वेदाःस्वधीताममलोकनाथतप्तंतपोनानृतमुक्तपूर्वं ३ गुप्ता
निचत्वारियथागमंमेशत्रौचमित्रेचसमोस्मिनित्यं तंचादिदेवंसततंप्रपन्नएकांतभावेनवृणोम्यजस्रं ४ ॥ ॥

एम०
५०६

ध्याततमोध्यायः सख १ आत्मप्रभवेन स्वयंभुवा जन्म अवतारः आर्षा मूर्तिश्चेयं तद्दीपस्थां २ तद्दर्शने स्वस्याधिकारसंपत्तिमाह पूजामिति ३ चत्वारि पाणि
पादोदरोपस्थानि ४ ॥ ॥

८ उत्तरपश्चिमेन वायव्यकोणेन । योत्तरतः यः उत्तरतः ९ मेरुमूलात् द्वात्रिंशत्सहस्रयोजनादूर्ध्वं अनिंद्रियाः स्थूलदेहसंगहीनाः अत एव अनशनाः अ
हारादिविषयभोगशून्याः निस्पंदहीनाः निश्चेष्टाः [illegible]धिः परमात्मानुसंधिः पुण्यवर्द्धनमिति मंत्रलिंगात् शोभनः सुभगंधिः सुगंधिः

एभिर्विशेषैः परिशुद्धसत्वः कस्मान्नपश्येयमनंतमीशं तत्पारमेष्ठ्यस्य वचो निशम्य नारायणः शाश्वतधर्मगोप्ता ५ गच्छेति तं
नारदमुक्तवान्स संपूजयित्वात्मविधिक्रियाभिः ततो विसृष्टः परमेष्ठिपुत्रः सोऽभ्यर्चयित्वा तमृषिं पुराणं ६ खमुत्पपातोत्तमयो।
गयुक्तस्ततोऽधिमेरौ सहसा निलिल्ये तत्रावतस्थे च मुनिर्मुहूर्तमेकांतमासाद्य गिरेः सशृंगे ७ आलोकयन्नुत्तरपश्चिमेन ददर्श चा
श्चर्यमनुत्तमं सः क्षीरोदधेर्योत्तरतो हि द्वीपः श्वेतः स नाम्ना प्रथितो विशालः ८ मेरोः सहस्रैः सहि योजनानां द्वात्रिंशतोर्ध्वं क
विभिर्निरुक्तः अनिंद्रियाश्चानशनाश्च तत्र निस्पंदहीनाः ससुगंधिनस्ते ९ श्वेताः पुमांसो गतसर्वपापाश्चक्षुर्मुषः पा
पकृतां नराणां १० वज्रास्थिकायाः सममानोन्मानादिव्यावयवरूपाः शुभसारोपेताः १० ॥ ॥

सोऽहमित्यभिध्यानेन चरंतीति सुगंधिनः ९ श्वेताः शुद्धसत्वप्रधानाः चक्षुर्मुषः तेजस्विनां मानस्य उन्मानोपमानस्य समौ येषां ते। शुभः योगप्रभावजः सारो
बलं तेन उपेताः १०

छत्राकृतिशीर्षाः निर्मांसग्रीवत्वात् समं पीनत्वरहितं मुष्कयोर्वृषणयोर्वृत्तं मुष्कं अन्तरयोः कथं ग्रीवं नराणां स्वमुष्कचतुष्कं वा किंभूता वा न्मुष्कयोर्वेष्टद्व्यासतत इति
लिंगान्मुष्कौ वाङ्कः मुष्ककाष्ठतुल्यं येषां। संमुष्कं चतुष्कारश्मिपि पठंति एजीवनः षष्टिसंयुक्ताः शिरोरेखाः नासां येते युक्ताः पादा येषां। नाडीशतपादाः
निपादांतरं अष्टावष्टिसंख्यैः दंतैरिव जगच्छरणक चरणाश्रमैः संवत्सरैर्युक्ताः अष्टौ दिशः सर्वेषां आम्नायमूलाः नाभिश्च युक्ताः देशकालो येषां मुख
मध्यप्रविष्टा विसर्यः सूर्यरामरोचनस्फुटीक्रियंते दिनमासर्तुसंवत्सरा न्महाकालस्तं विश्ववक्त्रं विश्वं वक्त्रे यस्य तादृशं जिह्वाभिरिव सर्वांग मत्ता

छत्राकृतिशीर्षा मेघौघनिनादाः सममुष्कचतुष्का राजीवशतपादाः षष्ट्या दन्तैर्युक्ताः शुक्लैरष्टाभिर्दंष्ट्राभिर्ये जिह्वाभि
र्ये विश्ववक्त्रं लेलिह्यन्ते सूर्यप्रख्यं ११ भक्त्या देवं विश्वोत्पन्नं यस्मात्सर्वे लोकाः संप्रसूताः वेदा धर्मा मुनयः शान्ता दे
वाः सर्वे तस्य निसर्गाः १२ युधिष्ठिर उवाच अनिन्द्रिया निराहारा अनिस्पंदाः सुगंधिनः कथं ते पुरुषा जाताः का ते
षां गतिरुत्तमा १३ ये च मुक्ता भवन्तीह नरा भरतसत्तम तेषां लक्षणमेतद्धि श्वेतद्वीपवासिनां १४ ॥ ॥ ॥

नि१

भिः रसनाशक्तिभिर्लेलिह्यंते पायसमिव लिहंति। कुत एतेषामीदृशं कालग्रसनसामर्थ्यमत आह देवमिति यस्मात्तेहेतोः देवं परमेश्वरं संप्रसूताः ध्या
नबलेन तद्रूपव्यक्तीकृतं वंतः सस्वगोरेमातापुत्रमिव। तमेव देवं विशिनष्टि। विश्वोत्पन्नं विश्वमुत्पन्नं यस्मात्। वेदादयस्तस्यैव निसर्गाः अपत्यरचिताः ११
श्वेतद्वीपनिवासिनां जीवन्मुक्तानां च निरिंद्रियत्वादिकं एकमेव लक्षणं कथं मूर्ते ब्रह्मणि धीयेनाम ज्ञानां अमूर्ते वेद्ये ध्यायिनां च योगिनां तुल्यत्वं कथ
मितिभावः १३ १४

२६ सात्वतंसात्वतानांपांचरात्राणांहितं।तच्छेषेणपितृशेषेण २२ प्रायणंऽपहारं २३ २४ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्मान्मेसंशयंछिंधिपरंकौतूहलंहिमे त्वंहिसर्वकथारामस्त्वांचैवापाश्रितावयं १४ भीष्मउवाच विस्तीर्णैषाकथाराजन्श्रु
तामेपितृसन्निधौ यैषातवहिवक्तव्याकथासाराहिसामता १५ राजोपरिचरोनामबभूवाधिपतिर्भुवः आखंडलसखःख्यातो
भक्तोनारायणंहरिं १६ धार्मिकोनित्यभक्तश्चपितुर्नित्यमतंद्रितः साम्राज्यंतेनसंप्राप्तंनारायणवरात्पुरा १६ सात्वतंवि
धिमास्थायप्राक्सूर्यमुखनिःसृतं पूजयामासदेवेशंतच्छेषेणपितामहान् १७ पितृशेषेणविप्रांश्चसंविभज्याश्रितांश्चसः
शेषान्नभुक्सत्यपरःसर्वभूतेष्वहिंसकः १८ सर्वभावेनभक्तःसदेवदेवंजनार्दनं अनादिमध्यनिधनंलोककर्तारमव्य
यं १९ तस्यनारायणेभक्तिंवहतोमित्रकर्षिणः एकशय्यासनंदेवोदत्तवान्देवराट्स्वयं २० आत्माराज्यंधनंचैवं
कलत्रंवाहनंतथा यत्तद्भागवतंसर्वमितितत्प्रोक्षितंसदा २१ काम्यनैमित्तिकाराजन्यज्ञियाःपरमक्रियाः सर्वाःसात्व
तमास्थायविधिंचक्रेसमाहितः २२ पंचरात्रविदोमुख्यास्तस्यगेहेमहात्मनः प्रायणंभगवत्प्रोक्तंभुंजतेवाग्रभोजनं
२३ तस्यप्रशासतोराज्यंधर्मेणामित्रघातिनः नानृतावाक्समभवन्मनोदुष्टंनचाभवत् २४ नचकायेनकृतवान्स
पापंपरमण्वपि येहितेऋषयःख्याताःसप्तचित्रशिखंडिनः २५

सप्तप्रकृतयोमहदहंकारादिमूर्तयः स्वायंभुवस्तत्प्रकृतिरेवामहदात्मकतादिदं शास्त्र मुपादेयमितिपांचरात्रागमस्तेनस्तुतिरध्यायशेषेणास्त्याथ

तैरेकमतिभिर्भूत्वायत्प्रोक्तंशास्त्रमुत्तमं वेदैश्चतुर्भिःसमितंकृतंमेरौमहागिरौ २६ आस्यैः सप्तभिरुद्गीर्णंलोकधर्ममनुत्तमं मरीचिरत्र्यंगिरसौपुलस्त्यः पुलहः क्रतुः २७ वसिष्ठश्चमहातेजास्तेहिचित्रशिखंडिनः सप्तप्रकृतयोह्येतास्तथास्वायंभुवोष्टमः एताभिर्धार्यतेलोकस्ताभ्यः शास्त्रंविनिःसृतं २८ एकाग्रमनसोदांतामुनयः संयमेरताः भूतभव्यभविष्यज्ञाः सत्यधर्मपरायणाः २९ इदंश्रेयइदंब्रह्मइदंहितमनुत्तमं लोकान्संचिंत्यमनसाततः शास्त्रंप्रचक्रिरे २९ तत्रधर्मार्थकामाहिमोक्षः पश्चाच्चकीर्तितः मर्यादाविविधाश्चैवदिविभूमौचसंस्थिताः ३० आराध्यतपसादेवंहरिंनारायणंप्रभुं दिव्यंवर्षसहस्रंवैसर्वेतेऋषिभिस्सह ३१ नारायणानुशास्ताहितदादेवीसरस्वती विवेशतान्ऋषीन्सर्वांल्लोकानांहितकाम्यया ३२ ततःप्रवर्तितासम्यक्तपोविद्भिर्द्विजातिभिः शब्देचार्थेचहेतौचएषाप्रथमसर्गजा ३३ आदावेवहितच्छास्त्रमोंकारस्वरभूषितं ऋषिभिः श्रावितंतत्रयत्रकारुणिकोह्यसौ ३४ ततः प्रसन्नोभगवाननिर्दिष्टशरीरगः ऋषीनुवाचतान्सर्वानदृश्यः पुरुषोत्तमः ३५ कृतंशतसहस्रंहिश्लोकानामिदमुत्तमं लोकतंत्रस्यकृत्स्नस्ययस्माद्धर्मः

प्रवृत्तौचनिवृत्तौचयस्मादेतद्भविष्यति यजुर्ऋक्सामभिर्जुष्टमथर्वांगिरसैस्तथा ३७ यथाप्रमाणांहिमयाकृतोब्रह्माप्रसादज
ः रुद्रश्चक्रोधजोविप्रायूयंप्रकृतयस्तथा ३८ सूर्याचंद्रमसौवायुर्भूमिरापोग्निरेवच सर्वेचनक्षत्रगणायच्चभूताभिशब्दितं ३९
अधिकारेषुवर्त्तंतेयथास्वंब्रह्मवादिनः सर्वेप्रमाणंहियथातथातच्छास्त्रमुत्तमं ४० भविष्यतिप्रमाणंवैएतन्मदनुशासनं त
स्मात्प्रवक्ष्यतेधर्मान्मनुःस्वायंभुवःस्वयं ४१ उशनाबृहस्पतिश्चैवयदोत्पन्नौभविष्यतः तदाप्रवक्ष्यतःशास्त्रंयुष्मन्मतिभि
रुद्धृतं ४२ स्वायंभुवेषुधर्मेषुशास्त्रेचौशनसेकृते बृहस्पतिमतेचैवलोकेषुप्रतिचारिते ४३ युष्मत्कृतमिदंशास्त्रंप्रजापा
लोवसुस्ततः बृहस्पतिसकाशाद्वैप्राप्स्यतेद्विजसत्तमाः ४४ सहिसद्भावितोराजामद्भक्तश्चभविष्यति तेनशास्त्रेणलोकेषु
क्रियाःसर्वाःकरिष्यति ४५ सलंहियुष्मच्छास्त्राणांशास्त्रमुत्तमसंज्ञितं एतदर्थ्यंचधर्म्यंचरहस्यंचैतदुत्तमं ४६ अस्यप्र
वर्त्तनाच्चैवप्रजावंतोभविष्यथ सचराजाश्रियायुक्तोभविष्यतिमहान्वसुः ४७ संस्थितेतुनृपेतस्मिन्शास्त्रमेतत्सनातनं
अंतर्द्धास्यतितत्सर्वमेतद्वः कथितंमया ४८ एतावदुक्त्वावचनमदृश्यःपुरुषोत्तमः विसृज्यतान्ऋषीन्सर्वान्कामपिप्र
स्थितोदिशं ४९ ५९

५२ अध्यायः ततोतीतेमहाकल्पे इत्यध्यायः परमेश्वरदर्शनस्यैकांतभक्तदर्शनाच्चतद्दर्शनसिद्धिरित्येतत्प्रतिपादयतिस्पष्टार्थश्च १२३

ततस्तेलोकपितरः सर्वलोकार्थचिंतकाः प्रावर्त्तयंततच्छास्त्रंधर्मयोनिंसनातनं ५० उत्पन्नेंगिरसेचैवयुगेप्रथमकल्पि
ते सांगोपनिषदंशास्त्रंस्थापयित्वाबृहस्पतौ ५१ जग्मुर्यथेप्सितंदेशंतपसेकृतनिश्चयाः धारणाः सर्वलोकानांस
र्वधर्मप्रवर्त्तकाः ५२ शांतिमोक्षधर्मेषुनारायणीये भीष्मउवाच ततोतीतेमहाकल्पेउत्पन्नेंगिरसः सुते बभुवुर्नि
र्वृतादेवाजातेदेवपुरोहिते १ वृहद्ब्रह्ममहच्चेतिशब्दाः पर्यायवाचकाः एभिः समन्वितोराजनगुणैर्विद्वान्बृहस्पतिः
२ तस्यशिष्योबभूवाग्र्योराजोपरिचरोवसुः अधीतवांस्तदाशास्त्रंसम्यक्चित्रशिखंडिजं ३ सराजाभावितः पूर्वंदैवे
नविधिनावसुः पालयामासपृथिवींदिवमाखंडलोयथा ४ तस्ययज्ञोमहानासीदश्वमेधोमहात्मनः बृहस्पतिरुपा
ध्यायस्तत्रहोताबभूवह ५ प्रजापतिसुताश्चात्रसदस्याश्चाभवंस्त्रयः एकतश्चद्वितश्चैवत्रितश्चैवमहर्षयः ६
धनुषाख्योथरैभ्यश्चअर्वावसुपरावसू ऋषिर्मेधातिथिश्चैवताण्ड्यश्चैवमहानृषिः ७ ऋषिः शांतिर्महाभागस्त
थावेदशिराश्चयः ऋषिः श्रेष्ठश्चकपिलः शालिहोत्रपितास्मृतः ८ आद्यः कठस्तैत्तिरिश्चवैशंपायनपूर्वजः।
कण्वोथदेवहोत्रश्चएतेषोडशकीर्त्तिताः ९ ॥ ॥

संभृताः सर्वदेवभागास्तस्मिन्राजन्महाक्रतौ नतत्रपशुघातोभूत्सराजैवास्थितोभवत् १० अहिंस्रः शुचिरक्षुद्रो निराशीः कर्मसंस्तुतः आ
रण्यकपदोद्भूताभागास्तत्रोपकल्पिताः ११ प्रीतस्ततोस्यभगवान्देवदेवः पुरातनः साक्षात्तंदर्शयामाससोदृश्योन्येनकेनचित् १२
स्वयंभागमुपाघ्रायपुरोडाशंगृहीतवान् अदृश्येनहृतोभागोदेवेनहरिमेधसा १३ बृहस्पतिस्ततःक्रुद्धः स्रुचमुद्यम्यवेगितः आ
काशंघ्नन्स्रुचापातैरोषादश्रूण्यवर्तयत् १४ उवाचचोपरिचरंमयाभागोयमुद्यतः ग्राह्यःस्वयंहिदेवेनमत्प्रत्यक्षंनसंशयः १५
युधिष्ठिरउ० उद्यतायज्ञभागाहिसाक्षात्प्राप्ताः सुरैरिह किमर्थमिहनप्राप्तोदर्शनंसहरिर्विभुः १६ भीष्मउवाच ततः सतंसमु
द्धूतंभूमिपालोमहान्वसुः प्रसादयामासमुनिंसदस्यास्तेचसर्वशः १७ ऊचुश्चैनमसंभ्रान्तानरोषंकर्तुमर्हसि नैषधर्मःकृ
तयुगेयस्त्वंरोषमचीकृथाः १८ अरोषणोह्यसौदेवोयस्यभागोयमुद्यतः नशक्यःसत्वयाद्रष्टुमस्माभिर्वाबृहस्पते १९
यस्यप्रसादंकुरुतेसवैतंद्रष्टुमर्हति एकतद्वितस्त्रितश्चैवाचुक्तास्तचित्रशिखंडिनः २० वयंहिब्रह्मणःपुत्रामानसाः परिकीर्ति
ताः गतानिःश्रेयसार्थंहिकदाचिद्दिशमुत्तरां २१ तप्त्वावर्षसहस्राणिचरित्वातपउत्तमं एकपादस्थितास्सम्यक्काष्ठभूताः
समाहिताः २२ मेरोरुत्तरभागेतुक्षीरोदस्यानुकूलतः सदेशोयत्रनस्तप्तंतपः परमदारुणं २३ ॥ ॥ ॥ ॥ ॥

कथंपश्येमहिवयंदेवंनारायणात्मकं वरेण्यंवरदंतंवैदेवदेवंसनातनं २४ कथंपश्येमहिवयंदेवंनारायणमित्युत अथव्रतस्यावभृ
थेवागुवाचाशरीरिणी २५ स्निग्धगंभीरयावाचाप्रहर्षणकरीविभोः सुतप्तंवस्तपोविप्राःप्रसन्नेनांतरात्मना २६ यूयंजिज्ञासवोभक्ताः
कथंद्रक्ष्यथतंविभुं क्षीरोदधेरुत्तरतःश्वेतद्वीपोमहाप्रभः २७ तत्रनारायणपरामानवाश्चंद्रवर्चसः एकांतभावोपगतास्तेभक्ताःपु
रुषोत्तमं २८ तेसहस्रार्चिषंदेवंप्रविशंतिसनातनं अतींद्रियानिराहाराअनिस्पंदाःसुगंधिनः २९ एकांतिनस्तेपुरुषाःश्वेतद्वीपनि
वासिनः गछध्वंतत्रमुनयस्तत्रात्मामेप्रकाशितः ३० अथश्रुत्वावयंसर्वेवाचंतामशरीरिणीं यथाख्यातेनमार्गेणतंदेशंप्रतिपेदि
रे ३१ प्राप्यश्वेतंमहाद्वीपंतच्चित्तास्तद्दिदृक्षवः ततोस्मद्दृष्टिविषयस्तेजसाप्रतिहतोभवत् नचपश्यामपुरुषंतत्तेजोहृतदर्शनाः ततो
नःप्रादुरभवद्विज्ञानंदेवयोगजं नकिलातप्ततपसाशक्योद्रष्टुमंजसा ३२ ततःपुनर्वर्षशतंतप्त्वातात्कालिकंमहत् व्रतावसा
नेचशुभान्नरान्ददृशिरेवयं ३३ श्वेतांश्चंद्रप्रतीकाशान्सर्वलक्षणलक्षितान् नित्यांजलिकृतान्ब्रह्मजपतःप्रागुदङ्मुखा
न् ३४ मानसोनामसजपोजप्यतेतैर्महात्मभिः तेनैकाग्रमनस्त्वेनप्रीतोभवतिवैहरिः ३५ याःभवन्मुनिशार्दूलभाःसूर्यस्ययुगक्ष
ये एकैकस्यप्रभातादृक्साभवन्मानवस्यह ३६ तेजोनिवासःसद्वीपइतिवैमेनिरेवयं नतत्राभ्यधिकःकश्चित्सर्वेवैते।। ।। ।।

समिद्धतेजसः ३७ अथसूर्यसहस्रस्यप्रभांयुगपदुत्थितां सहसादृष्टवंतस्मपुनरेवरहस्यते ३८ सहिताश्चाभ्यधावंततस्तेमा
नवाद्रुतं कृतांजलिपुटाहृष्टानमइत्येववादिनः ३९ ततोहिवदतांतेषामश्रौषविपुलंध्वनिं बलिःकिलोपक्रियतेतस्यदेव
स्यतेनरैः ४० वयंतुतेजसातस्यसहसाहृतचेतसः नकिंचिदपिपश्यामोहतचक्षुर्बलेंद्रियाः ४१ एकस्तुशब्दोविततः
श्रुतोस्माभिरुदीरितः जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज इतिशब्दः श्रुतोस्मा
भिःशिक्षाक्षरसमन्वितः ४३ एतस्मिन्नंतरेवायुःसर्वगंधवहःशुचिः दिव्यान्युवाहपुष्पाणिकर्मण्याश्चौषधीस्तथा
४४ तैरिष्टःपंचकालज्ञैर्हरिरेकांतिभिर्नरैः भक्त्यापरमयायुक्तैर्मनोवाक्कर्मभिस्तदा ४५ नूनंतत्रागतोदेवोयथातैर्वा
गुदीरिता वयंत्वेनंनपश्यामोमोहितास्तस्यमायया ४६ मारुतेसंनिवृत्तेचबलौचप्रतिपादिते चिंताव्याकुलितात्मानोजा
ताःस्मांगिरसांवर ४७ मानवानांसहस्रेषुतेषुवैशुद्धयोनिषु अस्माकंकश्चिन्मनसाचक्षुषावाप्यपूजयत् ४८ तेपि
स्वस्थामुनिगणाएकभावमनुव्रताः नोस्मासुदधिरेभावंब्रह्मभावमनुष्ठिताः ४९ ततोस्मान्सुपरिश्रांतांस्तपसाचातिक

षितान् उवाचखस्थंकिमपिमूर्तंतत्राशरीरकं ५० देवउवाच दृष्ट्वावः पुरुषाश्वेताः सर्वेंद्रियविवर्जिताः दृष्टोभवतिदेवेशाय
भिर्दृष्टोर्द्विजोत्तमैः ५१ गछध्वंमुनयः सर्वेयथागतमितोचिरात् नसशक्यस्त्वभक्तेनद्रष्टुंदेवः कथंचन ५२ कालेकालेनम
हतारूकांतिस्समुपागतैः शक्योद्रष्टुंसभगवान्प्रभामंडलदुर्दृशः महत्कार्यंचकर्त्तव्यंयुष्माभिर्द्विजसत्तमाः ५३ इतः कृतयुगे
तीतेविपर्यासंगतेपिच वैवस्वतेंतरे विप्राः प्राप्तेत्रेतायुगेपुनः ५४ सुराणांकार्यसिध्यर्थंसहायावैभविष्यथ ततस्त
दद्भुतंवाक्यंनिशम्यैवामृतोपमं ५५ तस्यप्रसादात्प्राप्ताः स्मोदेशमीप्सितमंजसा एवंसुतपसाचैवहव्यकव्यैस्तथैवच ५६
देवोस्माभिर्नदृष्टः सकथंत्वंद्रष्टुमर्हसि नारायणोमहद्भूतंविश्वस्त्रक्हव्यकव्यभुक् ५७ अनादिनिधनोव्यक्तोदेवदा
नवपूजितः एवमेकतवाक्येनद्वितत्रितमतेनच ५८ ॥ ॥श्रीकृष्णायनमः ॥ ॥श्रीकृष्णायनमः॥ ॥ ॥

६३ अध्यायः यदा भागवतोत्यर्थमित्यादिरध्यायो वैष्णवानां हिंसायज्ञवर्जनार्थः १ २ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अनुनीतः सदस्यैश्च बृहस्पतिरुदारधीः समानयत्ततो यज्ञं दैवतं समपूजयत् ५९ समाप्तयज्ञो राजापि प्रजां पालितवा
न्वसुः ब्रह्मशापाद्दिवो भ्रष्टः प्रविवेश महीं ततः ६० स राजा राजशार्दूलसत्यधर्मपरायणः अन्तर्भूमिगतश्चैव सततंध
र्मवत्सलः ६१ नारायणपरो भूत्वा नारायणजपं जपन् तस्यैव च प्रसादेन पुनरेवोत्थितस्तु सः ६२ महातलाद्
तः स्थानं ब्रह्मणः समनन्तरं परां गतिमनुप्राप्त इति नैष्ठिकमंजसा ६३ शान्तौ मोक्षधर्मेषु नारायणीये युधिष्ठिर
उवाच यदा भागवतोत्यर्थमासीद्राजा महान्वसुः किमर्थं स परिभ्रष्टो विवेश विवरं भुवः १ भीष्म उवाच अत्रा
प्युदाहरन्तीममितिहासं पुरातनं ऋषीणां चैव संवादं त्रिदशानां च भारत २ अजेन यष्टव्यमिति प्राहुर्देवा द्विजो
त्तमान् स च च्छागो ह्यजो ज्ञेयो नान्यः पशुरिति स्थितिः ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०

५१२

512

अजसंज्ञानि वीजानि। तस्मादेष एतेषां प्रयुक्ततमो यदजस्तेजमालभंत सोजादालब्धादुदक्रामत्सऽइमां प्राविशत्तस्मादियं मेध्याभवत्तमस्यामन्ववायंस्सोनुगतो व्रीहिरभवदिति वह्वृचब्राह्मणं। सर्वेषां पशूनां। सः यज्ञो मेध्यतायुक्तः इमां पृथिवीं प्रविष्टोऽन्ववायन अन्वेषितवंतः इयं श्रुतिः पुरोडाशस्तुतिमात्रपरा न तु पशुनामभेध्यत्वप्रतिपादनपरा। न हि निंदा निंद्यं निंदितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमिति न्यायात् इति भोगलोलुपानां देवानां मतं। वीतरागाणां ऋषीणां तु मानांतरविसंवादात् अहिंसा शास्त्रानुग्रहात् च अवांतरतात्पर्येणाप्रतीयमानोर्थो यथाभूत एव न तु सः स्वार्थे अप्रमाणं यथाहुः संप्रदायविदः विरोधे गु

ऋषय ऊचुः बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः अजसंज्ञानि बीजानि छागं नो हंतुमर्हथ ४ नैष धर्मः सतां देवा यत्र व ध्येत वै पशुः इदं कृतयुगं श्रेष्ठं कथं वध्येत वै पशुः ५ भीष्म उवाच तेषां संवदतामेवमृषीणां विबुधैः सह मार्गागतो नृपश्रेष्ठस्तं देशं प्राप्तवान्वसुः ६ ॥ श्रीरामनारायणवासुदेवश्रीकृष्णमे विष्णुमधुकैटभारेः ॥ ॥ ॥ ॥

णवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति तत्र यजमानः प्रस्तर इत्यादिः प्रस्तरयजमानयोरभेदस्य प्रत्यक्षविरोधात् प्रस्तरस्तु त्यर्थं गुणवादोयं अग्निर्हिमस्य भेषजमिति लोकावगतार्थत्वादनुवादः मेधातिथिं ह काण्वायनं मेषो भूत्वा जहारेत्यादि विरोधानुवादयोरभावात् भूता र्थवाद इति द्रष्टव्यः सो कार्थः न चापि क्रत्वर्थे नालंभविधिना पुरुषार्थे निषेधस्य विरोधोस्ति अतोर्थवादोप्ययं स्वार्थे अवांतरतात्पर्यविषयादेवताधिकरणन्या येन प्रामाण्यमश्नवीत अन्यथा भारतरामायणादीनामपि स्वार्थे प्रामाण्यं विहन्येतेति तस्मादजस्य स्वमेधस्य वीजेषु संक्रमाद्वीजान्येवाजसंज्ञानीति युक्तं

राम०

५१२

ंतरिक्षचरः श्रीमान्समग्रबलवाहनः तंदृष्ट्वासहसायांतंवसुंतेत्वंतरिक्षगं ८ ऊचुर्द्विजातयोदेवानेषछेत्स्यतिसंशयं यज्वादानपतिः
श्रेष्ठः सर्वभूतहितःप्रियः कथंस्विदन्यथाब्रूयादेषवाक्यंमहान्वसुः एवंतेसंविदंकृत्वाविबुधाऋषयस्तथा ~ अपृच्छन्सहितानेत्य
वसुंराजानमंतिकात् भोराजन्केनयष्टव्यमजेनाहोस्विदौषधैः ९ एतन्नःसंशयंछिंधिप्रमाणंनोभवान्मतः सतान्कृतांजलिर्भू
त्वापरिपप्रच्छवैवसुः १० कस्यवैकोमतःकामोब्रूतसत्यंद्विजोत्तमाः ऋषयऊचुः धान्यैर्यष्टव्यमित्येवंपक्षोस्माकंनराधिप
देवानांतुपशुःपक्षोमतोराजन्वदस्वनः ११ भीष्मउवाच देवानांतुमतंज्ञात्वावसुनापक्षसंश्रयात् छागेनाजेनयष्टव्यमेवमुक्तं
वचस्तदा १२ कुपितास्ततःसर्वेमुनयःसूर्यवर्चसः ऊचुर्वसुंविमानस्थंदेवपक्षार्थवादिनं १३ सुरपक्षोगृहीतस्तेयस्मा
त्तस्माद्दिवःपत अद्यप्रभृतितेराजन्नाकाशेविहितागतिः १४ अस्मच्छापाभिघातेनमहींभित्त्वाप्रवेक्ष्यसि ततस्तस्मिन्मुहूर्ते
थराजोपरिचरस्तदा १५ अधोवैसंबभूवाशुभूमेर्विवरगोनृप स्मृतिस्त्वेवनविजहौतदानारायणाज्ञया १६ देवास्तुसहि
ताःसर्वेवसोःशापविमोक्षणं चिंतयामासुरव्यग्राःसुकृतंहिनृपस्यतत् १७ १७ १७ १७ ॥॥

मो०
५१३

513

२४ अत्रराज्ञः शापहेतुत्वात् हिंसायज्ञः धर्मोपिवसोर्धाराभागप्रापकदेवानुग्रहवशात् किंचित्फलमपिजनयतीत्येतैर्वसुश्चिंत्य २५ २६ २७ २८ २९ ३०

अनेनास्मत्कृतेराज्ञाशापः प्राप्तोमहात्मना अस्यप्रतिप्रियंकार्यंसहितैर्नोदिवौकसः १८ इतिबुध्वाव्यवस्याशुगत्वानि
श्चयमीश्वराः ऊचुः संहृष्टमनसोराजोपरिचरंतदा १९ ब्रह्मण्यदेवभक्तस्त्वंसुरासुरगुरुर्हरिः कामंसततंतुष्टात्मा॥
कुर्याच्छापविमोक्षणं २० माननात्तुद्विजातीनांकर्त्तव्यावैमहात्मना अवश्यंतपसातेषांफलितव्यंनृपोत्तम २१
यतस्त्वंसहसाभ्रष्टआकाशान्मेदिनीतले एकंत्वनुग्रहंतुभ्यंदद्मोवैनृपसत्तम २२ यावत्त्वंशापदोषेणकालमासि
ष्यसेनघ भूमेर्विवरगोभूत्वातावन्तंकालमाप्स्यसि २३ यज्ञेषुसुहुतांविप्रैर्वसोर्धारांसमाहितैः प्राप्स्यसेस्मदनु
ध्यानान्माचत्वांग्लानिरस्पृशत् २४ नक्षुत्पिपासेराजेन्द्रभूमेश्छिद्रेभविष्यतः वसोर्धाराभिपीतत्वात्तेजसाप्यायि
तेनच २५ सदेवोस्मद्वरात्प्रीतोब्रह्मलोकंहिनेष्यति एवंदत्वावरंराज्ञेसर्वेतेचदिवौकसः २६ गताः स्वभवनंदेवा
ऋषयश्चतपोधनाः चक्रेचवसुस्तत्र पूजांविष्वक्सेनायभारत २७ जप्यंजगौचसततंनारायणमुखोद्गतं त-
त्रापिपंचभिर्यज्ञैः पंचकालानरिंदम २८ अयजद्धरिंसुरपतिंभूमेर्विवरगोपिसन् ततोस्यतुष्टोभगवान्भक्त्या
नारायणोहरिः २९ अनन्यभक्तस्यसतस्तत्परस्यजितात्मनः वरदोभगवान्विष्णुः समीपस्थंद्विजोत्तमं ३०

एम०
५१३

३७ वसोर्धारेत्यलुक्समासः ३८ अध्यायतात्पर्यमाहकेवलमिति ४० अध्यायः प्राप्येति १ २ ३ ॥ ॥ ॥ ॥ ॥

गरुत्मंतंमहावेगमावभोषस्नितंतदा द्विजोत्तममहाभागपश्यतांवचनान्मम ३१ संभाव्यराजावसुनामधर्मात्मासंशित
व्रतः ब्राह्मणानांप्रकोपेनप्रविष्टोवसुधातलं ३२ मानितास्तेतुविप्रेंद्रास्त्वंतुगच्छद्विजोत्तम भूमेर्विवरसंगुप्तंगरुडेहममाज्ञ
या ३३ अधश्चरंनृपश्रेष्ठंखेचरंकुरुमाचिरं गरुत्मानथविक्षिप्यपक्षौमारुतवेगवान् ३४ विवेशविवरंभूमेर्यत्रास्तेपा
र्थिवोवसुः ततएनंसमुत्क्षिप्यसहसाविनतासुतः ३५ उत्पपातनभस्तूर्णंतत्रचैनममुंचत अस्मिन्मुहूर्तेसंजज्ञेराजो
परिचरः पुनः ३६ सशरीरेणराजेंद्रब्रह्मलोकंनृपोत्तमः एवंतेनापिकौंतेयवाग्दोषाद्देवताज्ञया ३७ प्राप्तागतिरध
स्ताच्चद्विजशापान्महात्मना केवलंपुरुषेंद्रेणसेवितोहरिरीश्वरः ततः शीघ्रंजहौशापंब्रह्मलोकमवापच ३८ भीष्म
उवाच एतत्तेसर्वमाख्यातंसंभूतामानवायथा नारदोपियथाश्वेतंद्वीपंसगतवानृषिः तत्तेसर्वंप्रवक्ष्यामिशृणुष्वैक
मनानृप ४० शांतौमोक्षधर्मेषुनारायणीये भीष्मउवाच प्राप्यश्वेतंमहाद्वीपंनारदोभगवानृषिः ददर्शतानेवन
रान्श्वेतांश्चंद्रसमप्रभान् १ पूजयामासशिरसामनसातैश्चपूजितः दिदृक्षुर्जप्यपरमः सर्वकृच्छ्रगतः स्थितः २
भूत्वैकाग्रमनाविप्रऊर्ध्वबाहुः समाहितः स्तोत्रंजगौसविश्वायनिर्गुणायगुणात्मने ३ ॥ ॥ ॥॥

मो०
५१४

514

देवैः इंद्रियैर्दीव्यतीति जीवः देवेश्वरस्तस्य ईशोंतर्यामी १ निष्क्रियः आपकत्वात् २ निर्गुणः असंगत्वात् ३ लोकसाक्षी उदासीनत्वे बोधरूपत्वात् ४ क्षेत्रज्ञः
देहद्वयप्रकाशकोजीवः ५ पुरुषोत्तमः शरीरजीवेभ्योऽन्योपायात् ६ अत एवानंतः देशतः कालतः वस्तुतश्च परिच्छेदशून्यः ७ पुराणि व्यष्टिस्थूल
सूक्ष्मकारणशरीराणि श्रोषति दहतीति पुरुषः अत एवानंतरं सुतरां महापुरुषः समष्टिस्थूलादिदाहकत्वात् ९ अत एव पुरुषेषु अन्नमयादिषु
उत्तमः सत्यज्ञानानंतानंदरूपः १० त्रिगुणः सादिनामायिकं रूपं सैाति सत्वरजस्तमोरूपं ११ प्रधानतत्संघातरूपं १२ अमृतं सुधा १३ अमृताद्दे

नारद उवाच नमस्ते देवदेवेश १ निष्क्रिय २ निर्गुण ३ लोकसाक्षिन् ४ क्षेत्रज्ञ ५ पुरुषोत्तम ६ अनंत ७ पुरुष ८ म
हापुरुष ९ पुरुषोत्तम १० त्रिगुण ११ प्रधान १२ अमृत १३ अमृताख्य १४ अनंताख्य १५ व्योम १६ सनातन १७
सदसद्व्यक्ताव्यक्त १८ ऋतधामन् १९ आदिदेव २० वसुप्रद २१ प्रजापते २२ [illegible] सुप्रजापते २३
वनस्पते २४ महाप्रजापते २५ ऊर्जस्पते २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वास्तवाख्य १४ अनंताख्यः शेषशयन १५ व्योम आकाशाख्य १६ सनातनोनादिः १७ सदसतोः कार्यकारणयोः रूपेणाव्यक्तोऽव्यक्तश्च ग्राह्योऽग्राह्यश्चेत्यर्थः
१८ ऋतं सत्यं अविकारं धाम प्रकाशो यस्य १९ आदिदेवो नारायणः २० वसुप्रदः कर्मफलदाता २१ प्रजापतिर्दक्षादिः २२ सुप्रजापतिः सनकादिः मोक्षगु
रुत्वात् २३ वनस्पतिः अश्वत्थादिः २४ महाप्रजापतिश्चतुर्मुखः २५ ऊर्जस्पते ऊर्जो ब्रह्मादयो जीवरूपाः पशवः तेषां पते अलुक्समासः एकत्वं नासभि
मायं २६

राम०
५१५

वाचस्पतिः वाचः प्रवर्त्तकोदेवाचार्योवा २७ जगत्पतिरिंद्रः २८ मनस्पतिः सत्त्वात्मा २९ दिवस्पतिः सूर्यः ३० मरुत्पतिः प्राणवायुः ३१ सलिलपतिर्वरुणः ३२ पृथिवीपतिः राजा ३३ दिक्पतिः इंद्रादयः ३३ सर्वनिवासमहाप्रलयेजगदाधार ३४ गुह्यस्त्र्यप्रकाश्य ३५ ब्रह्मपुरोहितब्रह्मणोवेदस्मरः योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्यइतिश्रुतेः ३६ ब्रह्मकायिकब्राह्मणशरीरसाध्ययज्ञाध्ययनादिरूप ३७

वाचस्पते २७ जगत्पते २८ मनस्पते २९ दिवस्पते ३० मरुत्पते ३१ सलिलपते ३२ दिक्पते ३३ सर्वनिवास ३४ गुह्य ३५ ब्रह्मपुरोहित ३६ ब्रह्मकायिक ३७ महाराजिक ३८ चातुर्महाराजिक ३९ आभासुर ४० महाभासुर ४१ सप्तमहाभाग ४२ याम्य ४३ महायाम्य ४४ संज्ञासंज्ञ ४५ तुषित ४६ महातुषित ४७ प्रमर्दन ४८ परिनिर्मित ४९ अपरिनिर्मित ५० वशवर्त्तिन ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

महाराजिकादयश्चत्वारोदेवानांगणविशेषाः ४१ सप्तभिर्गायत्र्यादिभिश्छंदोभिः यः सेव्यते स महाभागः सप्तमहाभागः ४२ याम्ययमगण ४३ महायाम्यचित्रगुप्तादिरूप ४४ संज्ञायमपत्नीतन्नामक ४५ तुषितमहातुषितौदेवगणविशेषौ ४७ प्रमर्दनोमरुत्सुः ४८ परिनिर्मितंमरुत्सुसहायत्वेनकल्पितंकौमारगणादि ४९ अपरिनिर्मितंतत्स्वतन्त्रमश्विन्यादि ५० वशवर्त्तीकामादिग्रस्तेन ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

८१

अपरिनिंदितः शमादिमत्वात् ५२ अपरिमितः सर्वजातीयद्वापिद्रूपेषु अनंतः ५३ वशवर्त्ती शास्यः ५४ अवशवर्त्ती शास्ता ५५ यज्ञोग्निहोत्रादिः ५६ महायज्ञो ब्रह्मयज्ञा दिः ५७ यज्ञसंभवो ज्ञातिगादिः ५८ यज्ञयोनिर्वेदः ५९ यज्ञगर्भो ग्निः ६० यज्ञहृदयं यज्ञांगोपासनारूपः ६४ पंचकालाः अहोरात्र १ मास २ ऋतु ३ अयन ४ संवत्सराः पंचकर्त्तारः अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा

अपरिनिंदित ५२ अपरिमित ५३ वशवर्त्तिन ५४ अवशवर्त्तिन ५५ यज्ञ ५६ महायज्ञ ५७ यज्ञसंभव ५८ यज्ञयोने ५९
यज्ञगर्भ ६० यज्ञहृदय ६१ यज्ञस्नात ६२ यज्ञभागह ६३ पंचयज्ञ ६४ पंचकालकर्त्तृपते ६५ पंचरात्रिक ६६ वैकुं[illegible] ६७ ८२
अपराजित ६८ मानसिक ६९ नामनामिक ७० परस्वामिन ७१ सुस्नात ७२ हंस ७३ परमहंस ७४ महाहंस ७५
परमयाज्ञिक ७६ सांख्ययोग ७७

पंचैते तस्य हेतवः इति गीतोक्ताः तत्कर्म पतेह ६५ पंचरात्रागमगम्यः ६६ वैकुंठः अकुंठितविकुंठायाः पुत्रो वा ६७ मानसिकमनउपाधिक ६९ नामनामिकनाम्निनाम्नि विदितः नामानि सर्वाणि यमाविशंतीति श्रुतेः ७० परोक्षज्ञानस्य स्वामी ७१ सुस्नातसमाधवेदव्रत ७२ हंसस्त्रिदंडी ७३ परमहंस एकदंडी
७४ महाहंसो दंडादिहीनः ७५

७८ अमृतंजीवः ७९ हिरण्यंहृदयं ८० देवाइंद्रियाणि ८१ कुंभसमुद्रजलंब्रह्मवेदः पद्मंब्रह्मांडं एतेषुशयनात्तुश्रमेते शयादिनरसंज्ञकः ८५ विश्वकृत्सर्वेनोगमनशीलः
भक्तपालनार्थंसेनायस्य ८६ जगतिसन्नाहरूपरणान्वयोस्य ८७ वडवामुखनामाग्निस्त्वमेव ८९ सारथिरश्मिप्रवर्त्तकस्त्वंसारथिःस केशीतिमंत्रवर्णात्अग्निर्वायुःसूर्यश्च
केशिनइतिस्तोमस्तामन्त्राग्निर्वप्रकरणाज्ञात्यः ९५ चक्षुरग्न्यात्त्ववेक्षणेनसंस्कृतंयज्ञियंसर्पिः ९८ भानुभोमकः ९९ विदिक्करिकोणः १०१ ब्रह्ममेतुमाणि

सांख्यमूर्त्ते ७८ अमृतेशय ७९ हिरण्येशय ८० देवेशय ८१ कुंभेशय ८२ ब्रह्मेशय ८३ पद्मेशय ८४ विश्वेश्वर ८५ विश्व
केतन ८६ त्वंजगद्गन्वयः ८७ त्वंजगत्प्रकृतिः ८८ त्वमग्निरास्यं ८७ वडवामुखोग्निः ८८ त्वमाहुतिः ८९ सारथिः
९० त्वंवषट्कारः ९१ त्वमोंकारः त्वंतपः ९२ त्वंमनः ९३ त्वंचंद्रमाः ९४ त्वंचक्षुराज्यं ९६ त्वंसूर्यः ९७ त्वंदिशांगजः
९८ त्वंदिग्भानो ९९ विदिग्भानो १०० हयशिरः १ प्रथमत्रिसौपर्णः २ वर्णधरः ३ पंचाग्ने ४ त्रिणाचिकेत ५

त्यादीनित्रीणिसुपर्णानितैत्तिरीयोपनिषदिपठ्यंते तत्र प्रथमंसवितुर्देवस्यसंज्ञगर्त्तेसमर्थः चतुष्कप दायुवतिःसुपेशाइत्यादिकृत्स्नेवरमंत्रत्रयंतत्प्रथम
त्रिसुपर्णः २ वर्णाः ब्राह्मणादयस्तेषांधारकः ३ पंचाग्नेहेपसर्दक्षिणाग्न्याहवनीयसभ्यावसथ्याख्याग्निरूप ४ त्रिणाचिकेतनाचिकेताख्योग्निः त्रिवारं
चितोयेनसत्रिणाचिकेतसंज्ञः ५ ५

पंड्गानिशिक्षादीनिधीयंतेस्मिन्निति साङ्गेवरहूप ६ प्राग्ज्योतिषंज्येष्ठमासेनिचंद्रे सामनीनाम्यंगेयज्ञोतोवाहायीनिसामप्राग्ज्योतिषंज्योनेदिवइम स्यामरवि
गीयमानेसामज्येष्ठसाम ८ सामिकानांसामगानांव्रतैर्वर्व्रतंधारयतीसामिकव्रतधर ९ अथर्वशिरः संज्ञाउपनिषत्तद्रूप १० पंचमहाकल्पाः सौरशाक्त

षडंगनिधान ६ प्राग्ज्योतिष ७ ज्येष्ठसामग ८ सामिकव्रतधर ९ अथर्वशिरः १० पंचमहाकल्प ११ फेनपाचार्य १२ वा
लखिल्य १३ वैखानस १४ अभग्नयोग १५ अभग्नपरिसंख्यान १६ युगादि १७ युगमध्य १८ युगनिधन १९ आखंडल
२० प्राचीनगर्भ २१ कौशिक २२ पुरुष्टुत २४ पुरुहूत २५ विश्वकृत २६ अनंतगति २७ अनंतभोग २८ अनंत २९
अनादि ३० अमध्य ३१ अव्यक्तमध्य ३२ अव्यक्तनिधन ३३ व्रतावास ३४ समुद्राधिवास ३५ यशोवास ३६
तपोवास ३७ दमावास ३८ लक्ष्म्यावास ३९ विद्यावास ४० कीर्त्यावास ४१ श्रीवास ४२ सर्वावास ४३ वासुदेव
४४ सर्वछंदक ४५ हरिहय ४६ हरिमेध ४७ महायज्ञभागहर ४८ वरप्रदसुखप्रद ४९ धनप्रद ५० हरिमेध ५१

गाणेशशैववैष्णवागमाः तत्प्रतिपाद्य १५ परिसंख्यानंविचारः १८ युगनिधनंयुगान्तः १९ आखंडलः इंद्रः २० प्राचीनगर्भःकौशिकोमुनी २२ पुरुवसु २३
२७ भोगः शरीरं ४४ सर्वछंदकमनोरथप्रद ४५ हरिः कपिः मस्वरमावर्त्तारिहयोस्यायस्य ४६ हरिमेध अश्वमेधा ४७ महायज्ञोयोगः तत्रभागोहो
मंदुव्यजीवः तस्यहर्ता ५० हरिमेधाबुद्धिर्यस्यहरिमन्त्र ५१ ॥

महानियमो यमादीनामेव प्रकाशः ५० प्रवचनेन अध्ययनेन गतः स्थितो ब्रह्मचारी ६४ महती विपदादिस्था हि रूपा विभूतिर्यस्य ६५ माहात्म्ययुक्तं विराडाख्यं शरीरमस्य ६६ पवित्राणि शुद्धिक्रियारूपकाणीति ६७ महापवित्राणि पावमानीसूक्तादीनि ६८ हिरण्मयानि मंडलब्राह्मणादीनि ६९ बृहत्त्वेन रूढं ब्रह्मेति

यम ५१ नियम ५२ महानियम ५४ कृच्छ्र ५५ अतिकृच्छ्र ५६ महाकृच्छ्र सर्वकृच्छ्र ५७ नियमधर ५८ निवृत्ताश्रम ५९ प्रवचनगत षष्ठिगर्भप्रवृत्त ५० प्रवृत्तवेदक्रिय ५९ अज ६० सर्वगत ६१ सर्वदर्शिन ६२ अग्राह्य ६३ अचल ६४ महाविभूते ६५ माहात्म्यशरीर ६६ पवित्र ६७ महापवित्र ६८ हिरण्मय ६९ बृहत् ७० अप्रतर्क्य ७१ अविज्ञेय ७२ ब्रह्माग्र्य ७३ प्रजासर्गकर ७४ प्रजानिधनकर ७५ महामायाधर ७६ चित्रशिखंडिन ७७ वरप्रद ७८ पुरोडाशभागहर ७९ गताध्वर ८० छिन्नतृष्ण ८१ छिन्नसंशय ८२ सर्वतोवृत्त ८३ निवृत्तरूप ८४ ब्राह्मणरूप ८५ ब्राह्मणप्रिय ८६ विश्वमूर्ते ८७ महामूर्ते ८८ बांधव ८९ भक्तवत्सल ९० ब्रह्मदेव ९१ देवभक्तोऽहं त्वां दिदृक्षुरेकांतदर्शनाय नमो नमः १९२ शांतौ मोक्षधर्मेषु महापुरुषस्तवः समाप्तः ॥ ॥ ॥ ॥ ॥ ॥

ध्यनाद ३ का१

जप्यचतुष्टयात्मकेत्यर्थः ७० अप्रतर्क्यस्तर्कागम्यः ७१ अविज्ञेयो रूपादिहीनत्वात् ७२ ब्रह्मणां कार्यकारणानां महतां नामधेयानामग्र्यं श्रेष्ठं संहारणं ७९ गताध्वरं प्रापयन् ८० ८२ सर्वतोवृत्तं वर्त्तनं यस्य ९१ दिदृक्षुर्द्रष्टुमिच्छुः एकमेव ज्ञेयज्ञानज्ञातृविभागहीनं वस्तु अप्यं तेनाप्येतत् [illegible] यस्मिन्नतं तं निर्विकल्पकं दर्शनं तस्मै मोक्षायेत्यर्थः १९२ शांतौ परिहारपति नमः १६२ ॥

एवं विश्वानिसर्वाणिरूपाणिधारयतीतिविश्वरूपधृक् १ एतेदेवस्यहृत्यतिकिंचिदित्यादिना ३ ज्ञानरूपस्वरूपयोरंतरंवेजात्मकेनतेजोभेदोज्ञेयः ७ सहस्र

मो०
५१७

517

श्रीगणेशउवाच एवंश्रुत्वाततःसभगवान्गुणेशस्तेश्चेश्वनामभिः नम्मुनिंदर्शयामासनानारंगंविश्वरूपधृक् १ किंचिच्चंद्रद्युतिशुद्धा
त्माकिंचिच्चंद्रद्दिशेषवान् कृशानुवर्णःकिंचिच्चकिंचिद्दिव्याकृतिःप्रभुः २ शुकपत्रनिभंकचिन्किंचित्स्फटिकसन्नि
भः नीलांजनचयप्रख्योनानारूपप्रभःक्वचित् ३ प्रवालांकुरुवर्णश्चश्वेतवर्णस्तथाक्वचित् क्वचित्सुवर्णवर्णाभोवैदू
र्यसदृशःक्वचित् ४ नीलवैडूर्यसदृशंइंद्रनीलनिभःक्वचित् मयूरग्रीववर्णाभोमुक्ताहारनिभःक्वचित् ५ एतान्वर्णा
न्विधान्वर्णानरूपंविभ्रन्सनातनेः सहस्रनयनःश्रीमांछतशीर्षःसहस्रपात् ६ सहस्रोदरबाहुश्चस्वश्रमकंतःशतिवक्त्रो
चित् अंकारमुक्तिरत्नवक्त्रात्साविश्रीचनदत्त्वयं ७ शेषोपिभ्रश्चैवचक्रेभ्यश्चतुर्वेदानिरन्तरम् आरण्यकंजगौदेवो
हरिनारायणोवशी ८ वेदीकमंडलुंश्रुभ्रान्मणीनुपानहौकुशान् अजिनंदंडकाष्ठंचहुलितंचहुताशनं ९ धारया
मासदेवेशोहस्तैर्यज्ञपतिस्तदा तंप्रसन्नंप्रसन्नात्मानारदोद्विजसत्तमः १० वाग्भतःप्रणतोभूत्वावंदेपरमेश्वरं ना
मुवाचनतंमूर्ध्नादेवानामादिरव्ययः ११ श्रीभगवानुवाच एकतश्चद्विजैश्चैवविनैश्चैवमहर्षयः इमेदेशमनुप्राप्तामम

राम०
५१७

नयनरूपादिनाविश्वंवेदायज्ञात्रममनुरितिदर्शितं ८ ९ १० ११ १२ १२ १२ १२

हृषीकेशरद्दृशः पुरुषव्यत्ययश्चार्षः २० मां प्रवेक्ष्यंतीत्युक्तं तत्र प्रवेशार्हं आत्मस्वरूपमाह नदृश्य इत्यादिना न घ्रेयः चात्रसनीयत्वादिवर्जितः यतो वा गंधादिनावि

नच मां ते ददृशिरे नच द्रक्ष्यति कश्चन ऋते ह्येकांतिकश्रेष्ठात्त्वं चैवैकांतिकोत्तमः १३ ममैतास्तनवः श्रेष्ठा जाता धर्मगृहे द्वि
ज तास्त्वं भजस्व सततं साधयस्व यथागतं १४ वृणीष्व च वरं विप्र मत्तस्त्वं यदिहेच्छसि प्रसन्नोहं तवाद्येह विश्वमूर्तिरिहाव्ययः
१५ नारद उवाच अद्य मे तपसो देव यमस्य नियमस्य च सद्यः फलमवाप्तं वै दृष्टो यद्भगवान्मम १६ वर एष ममात्यंतं दृष्टस्त्वं
यत्सनातनः भगवन्विश्वदृक्सिंहः सर्वमूर्तिर्महान्प्रभुः १७ भीष्म उवाच एवं संदर्शयित्वा तु नारदं परमेष्ठिनं उवाच वचनं
भूयो गच्छ नारद माचिरं १८ इमे ह्यनिंद्रियाहारा मद्भक्ताश्चंद्रवर्चसः एकाग्राश्चिंतयेयुर्मां नैषां विघ्नो भवेदिति १९
सिद्धाश्चैते महाभागाः पुरा ह्येकांतिनोभवन् तमोरजोभिर्निर्मुक्ता मां प्रवेक्ष्यंत्यसंशयं २० न दृश्यश्चक्षुषा योसौ न स्पृ
श्यः स्पर्शनेन च न घ्रेयश्चैव गंधेन रसेन च विवर्जितः २१ सत्वं रजस्तमश्चैव न गुणास्तं भजंति वै यश्च सर्वगतः सा
क्षी लोकस्यात्मेति कथ्यते २२ ॥ ॥

वर्जितः २१ हृषाधमाचमाहसत्वमितिनाकार्यकारणातीतमित्यर्थः २२ २२ २२ २२

मो०
५१८

518

अस्योपाधिधर्मोऽस्पर्शित्वमाह। भूतेति। अजो नित्य इति जन्मादिसर्वभावविकारनिषेधः। शाश्वत इति प्रकृतिवत्परिणामराहित्यम्। यतो निर्गुणः चत्वं गुण
वत्त्वमिति न्यायेन साम्यदशायामपि गुणानां परिणामरूपत्वात्परिणामात् गुणानामपि गुणवत्त्वेन न भवत्यनवस्थानात्। अत आह निष्कल इति। एकत्र
शरीरे गुणान्तरस्यापि उपसर्जनत्वेन प्रवेशसत्त्वान्न गुणानां निष्कलत्वम्। लक्षणं निरवयवत्वमस्तीति तत्तोऽप्यनन्यत्व इत्यर्थः २३ द्विहीदृशेभ्यः च

भूतग्रामशरीरेषु नश्यत्सु न विनश्यति। अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा २३ द्विहीदृशेभ्यस्तेभ्यः ख्यातोऽयः
पंचविंशकः पुरुषो निष्क्रियश्चैव ज्ञानदृश्यश्च कथ्यते २४ यं प्रविश्य भवन्तीह मुक्ता वै द्विजसत्तमाः स वासुदेवो विज्ञेयः
परमात्मा सनातनः २५ पश्य दैवस्य माहात्म्यं महिमानं च नारद। शुभाशुभैः कर्मभिर्यो न लिप्यति कदाचन २६ सत्त्वं रज
स्तमश्चेति गुणानेतान् प्रचक्षते। एते सर्वशरीरेषु तिष्ठन्ति विचरन्ति च २७ एतान् गुणांस्तु क्षेत्रज्ञो भुङ्क्ते नैभिः स भुज्यते
निर्गुणो गुणभुक् चैव गुणस्रष्टा गुणाधिकः २८ जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योति
र्वायौ प्रलीयते खे वायुः प्रलयं याति मनस्याकाशमेव च मनो हि परमं भूतं तदव्यक्ते प्रलीयते २९ ॥ ॥ ॥ ॥

तुर्विंशतिभ्यः ज्ञानदृश्यः सूक्ष्मबुद्धिग्राह्यः दृश्यते त्वग्र्यया बुद्ध्येति श्रुतेः प्रवेशं हेतुरूपउपयाद्योपसंहरति यमिति २४ तं प्रविश्येत्ययः स न लिप्यत
इत्यर्थः २६ गुणाधिकः गुणेभ्योऽतिरिक्तः २७ निर्गुणत्वं वक्तुमव्यक्तस्य कार्यस्य प्रलयमाह जगदित्यादिना २९ ॥ ॥ ॥ ॥

एम०
५१८

अव्यक्तमिति अव्यक्तस्यापि लयं वदतां सांख्यमतमपास्तं ३० एतदेव व्यतिरेकमुखेन द्रढयति नित्यमिति नित्यं अविनाशि भूतं नित्यमस्ति इदं परस्मादन्यत्रासीत्यर्थः ३१
एवं तत्पदार्थस्वरूपमुक्त्वा त्वंपदार्थस्वरूपमाह सर्वेति सर्वेषां भूतानां आत्मभूतः प्रत्यगात्मा वासुदेवं एतदेव कथमित्यत आह पृथिवीत्यादिना ३२ सत्यपदं हस्त
विष्ठ्यानखाग्रेभ्य इति श्रुतेरर्थं संगृह्णाति तदिति आविशति निमित्तवेशान्तःप्रवेशो यांचराचराभिमंता जीवोऽस्य त्रियक्षो(पास्तः लघुविक्रमः शीघ्रकारी । एतेन

अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये संप्रलीयते नास्ति तस्मात्परतरः पुरुषाद्वै सनातनात् ३० नित्यं हि नास्ति जगति भूतं स्थावरजंगमं ऋते तमेकं पुरुषं वासुदेवं सनातनं ३१ सर्वभूतात्मभूतो हि वासुदेवो महाबलः पृथिवी वायुराकाशमापो ज्योतिश्च पंच। मं ३२ ते समेता महात्मानः शरीरमिति संज्ञितं तदाविशति यो ब्रह्मन्नदृश्यो लघुविक्रमः ३३ उत्पन्न एव भवति शरीरं चेष्टयन् प्रभुः न विना धातुसंघातं शरीरं भवति क्वचित् ३४ न च जीवं विना ब्रह्मन्वायवश्चेष्टयंत्युत स जीवः परिसंख्यातः शेषः संकर्षणः प्रभुः ३५ ॥।

दृष्टिसृष्टिरुक्ता घटाकाशवद्युयाद्युत्पत्त्या उत्पन्न इति । एव शीघ्रः नवधारणे ३३ प्रवेशाभावे चेष्टानुपपत्तिमाह नविनेति ३४ स इति योऽयं प्रविष्टः स जीवः संकर्षणाख्यो विश्वविधारको भगवद्व्यूहः स जीव एव सनत्कुमारस्त्वं जीवन्मुक्तस्त्वं स्वेन ध्यानाचेनाह्निकमेलाभते ३५ ॥ ॥ ॥

एवमविद्योपाधिकंजीवमुपपाद्यतस्मादेवजीवात्प्रद्युम्नाख्यंमनउत्पद्यतेइत्साहयस्मिन्निति प्रद्युम्नसंज्ञकेमनसिसर्वेषांभूतानांलयोऽर्थोऽवगन्तोव्यतोमानस्येश्वर
येसम्भिरितिभावः ३६ तस्मात्प्रभूतइतिनत्वंछेदेनसंकर्षणःपरामृश्यतेतस्मात्सर्वमितितच्छेदेनप्रद्युम्नःसएवचानिरुद्धाख्योऽहंकारः ३७ एवंत्वपदार्थम

तस्मात्मनत्कुमारत्वंयोलभस्त्वेनकर्मणा यस्मिंश्चसर्वभूतानिप्रलयंयान्तिसंक्षये ३६ समनःसर्वभूतानांप्रद्युम्नःपरिपठ्यते
तस्मात्प्रसूतोयःकर्ताकारणंकार्यमेवच ३७ तस्मात्सर्वंसंभवतिजगत्स्थावरजंगमम् सोऽनिरुद्धःसईशानोव्यक्तःससर्वकर्म
सु योवासुदेवोभगवान्क्षेत्रज्ञोनिर्गुणात्मकः ज्ञेयःसएवराजेन्द्रजीवःसंकर्षणःप्रभुः ३८ संकर्षणा[illegible]च्चप्रद्युम्नोमनोभूत
तःसउच्यते प्रद्युम्नाद्योऽनिरुद्धस्तुसोऽहंकारःसईश्वरः ३९ मत्तःसर्वंसंभवतिजगत्स्थावरजंगमम् अक्षरंचक्षरंचैवसच्चा
सच्चैवनारद ४० मांप्रविश्यभवंतीहमुक्ताभक्तास्तुयेमम अहंहिपुरुषोज्ञेयोनिष्क्रियःपंचविंशकः ४१ ॥ ॥ ॥

प्रद्युम्नादिजनकंजीवंमु[illegible]क्त्वा स्वपूर्वोक्तेनतत्पदार्थेनाभेदमाहयोवासुदेवइति ३८ परमकारणात्तस्मैवाहमत्तइति अक्षरंजीवःक्षरंप्रकृतिमहदहंकारादि
सत्कारणं ४० मांप्रविश्यमुक्तःप्रवेशोनदीसमुद्रदृष्टांतेनमाभूदितिस्वस्यउपाधिशवलत्वंनिराचष्टेअहंहीति पुरुषःचिन्मात्रःनिष्क्रियःकूटस्थःज्ञेयएवन
तुप्राप्यःसर्वभूतप्रसगात्मत्वात् ४१

निर्गुणत्वान्मुमुक्षुभिर्विवेचनवासनाशेषवतीप्राप्तिः निष्कलत्वान्नसंयोगरूपा अतएवनिर्द्वंद्वः महाकाशघटाकाशयोरिवोपाध्यपगममात्रकृतत्वाद्भेदात् अंतर
वउपाध्यभावाद्वासनादिरूपःपरिग्रहोपिनास्ति ४१ ननुविश्वरूपस्यतवकथंनिष्कलत्वमतआह एतदितित्रयं रूपवानितियत्तदेतन्नत्वयाज्ञातव्यं मायेत्यर्थः अहंमु
हूर्त्तान्नश्येयंअदृश्योभवेयंइच्छितिमरीक्षामात्रेणसृष्टिसंहारावित्यर्थः ४२ देवत्वादिवद्दर्शनेपिविश्वरूपत्वंनापैतीत्याशंक्याह मायेतिनिष्कलस्यममदे

निर्गुणोनिष्कलश्चैवनिर्द्वंद्वोनिष्परिग्रहः ४१ एतत्त्वयानविज्ञेयंरूपवानितिदृश्यते इछन्मुहूर्त्तान्नश्येयमीशोहंजगतोगुरुः
४२ मायाह्येषामयासृष्टायन्मांपश्यसिनारद सर्वभूतगुणैर्युक्तंनैवंत्वंज्ञातुमर्हसि ४३ मयैतत्कथितंसम्यक्तवमूर्त्तिचतुष्ट
यं अहंहिजीवसंज्ञातोमयिजीवःसमाहितः ४४ नैवंतेबुद्धिरत्राभूद्दृष्टोजीवोमयेतिवै अहंसर्वत्रगोब्रह्मन्भूतग्रामांतरा
त्मकः ४५ भूतग्रामशरीरेषुनश्यत्सुननशाम्यहं सिद्धाहितेमहाभागानराह्येकांतिनोभवन् ४६ तमोरजोभ्यांनिर्मु
क्ताः प्रवेक्ष्यंतिचमांमुने हिरण्यगर्भोलोकादिश्चतुर्वक्त्रोनिरुक्तगः ४७ ॥ ॥ ॥ ॥ ॥ ॥

स्वरूपमेवमायेत्यर्थः सर्वेभूतगुणैः रूपादिभिरेवंप्रकारेणयुक्तंमांज्ञातुंनार्हसिनिर्गुणत्वान्ममेत्यर्थः ४३ संज्ञातः जीवत्वेनसम्यक्ज्ञातः पांचांतरेजीव
स्यापकरणभूतः संघातः जडवर्गोप्यहमेवजीवत्वयाधिष्ठानत्वाज्जीवोप्यहमेवेतिभावः ४४ यतः जडाजडवर्गात्माऽहमेवततोहेतोस्त्वस्तुषामाद
श्वासोपाधिकस्समष्टिजीवएवमयादृष्टः नत्वीश्वरइतिनमंतव्यंजीवादिरूपेणममैवावस्थानादित्याहनैवमिति ४५ स्पष्टार्थोध्यायशेषः ४७॥

मो०
५२०

520

ब्रह्मासनातनोदेवोममसर्वार्थचिंतकः ललाटाच्चैवमेरुद्रोदेवः क्रोधाद्विनिःसृतः ४८ पश्यैकादशमेरुद्रान्दक्षिणंपार्श्वमास्थितान् द्वाद
शैवतथादित्यान्वामपार्श्वंसमास्थितान् ४९ अग्रतश्चैवमेपश्यवसूनष्टौसुरोत्तमान् नासत्यंचैवदस्रंचभिषजौपश्यदैवतः ५० सर्वान्प्रजा
पतीन्पश्यपश्यसप्तऋषींस्तथा वेदान्यज्ञांश्चशतशः पश्यामृतमथौषधीः ५१ तपांसिनियमांश्चैवयमानपिपृथग्विधान् तथाष्टगु
णमैश्वर्यमेकस्थंपश्यमूर्त्तिमत् ५२ श्रियंलक्ष्मींचकीर्त्तिंचपृथिवींचककुद्मिनीं वेदानांमातरंपश्यमत्स्थांदेवींसरस्वतीं ५३ ध्रुवंचज्यो
तिषांश्रेष्ठंपश्यनारदखेचरं अंभोधरान्समुद्रांश्चसरांसिसरितस्तथा ५४ मूर्त्तिमंतःपितृगणांश्चतुरःपश्यसत्तम त्रींश्चैवेमान्गुणान्पश्य
मत्स्थान्मूर्त्तिविवर्जितान् ५५ देवकार्यादपिमुनेपितृकार्यंविशिष्यते देवानांचपितृणांचपिताह्येकोहमादितः ५६ अहंहयशि
रोभूत्वासमुद्रेपश्चिमोत्तरे पिबामिसुहुतंहव्यंकव्यंचश्रद्धयान्वितं ५७ मयासृष्टःपुराब्रह्मामांयज्ञमयजत्स्वयं ततस्तस्मिन्वरान्प्रीतो
दत्तवानस्म्यनुत्तमान् ५८ मत्पुत्रत्वंचकल्पादौलोकाध्यक्षत्वमेवच अहंकारकृतंचैवनामपर्यायवाचकं ५९ त्वयाकृतांचमर्या
दांनातिक्रमिष्यतिकश्चन त्वंचैववरदोब्रह्मन्वरेप्सूनांभविष्यसि ६० सुरासुरगणानांचऋषीणांचतपोधन पितृणांचमहाभागसततं
६१ संशितव्रत विविधानांचभूतानां ॥

एम०
५२०

त्वमुयास्यामविष्यसि ६० प्रादुर्भावगतश्चाहं सुरकार्येषु नित्यदा अनुशास्यं त्वया ब्रह्मन्नियोज्यश्च सुतो यथा ६१ एतांश्चान्यांश्च रुचिरा
न्ब्रह्मरोमितनेजसे अहं दत्वा वरान्प्रीतो निवृत्तिपरमो भवं ६२ निर्वाणं सर्वधर्माणां निवृत्तिः परमा स्मृता तस्मान्निवृत्तिमापन्नश्चरेत्स
र्वांगनिर्वृतः ६३ विद्यासहायवंतं मां आदित्यस्थं समाहितं कपिलं प्राहुराचार्याः सांख्यनिश्चितनिश्चयाः ६४ हिरण्यगर्भो भगवाने
षछंदसि सुष्टुतः सोऽहं योगरतिर्ब्रह्मन्योगशास्त्रेषु शब्दितः ६५ एषोऽहं व्यक्तिमागम्य तिष्ठामि दिवि शाश्वतः ततो युगसहस्रांते संहरि
ष्ये जगत्पुनः ६६ कृत्वात्मस्थानि भूतानि स्थावराणि चराणि च एकाकी विद्यया [illegible] सार्द्धं विहरिष्ये द्विजे सुनः ६७ ततो भूयो जगत्सर्वं ग५
करिष्यामीह विद्यया अस्मन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययं ६८ स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोऽप्यजीजनत प्रद्युम्नादनिरु
द्धोऽहं सर्गो मम पुनः पुनः ६९ अनिरुद्धात्तथा ब्रह्मा तन्नाभिकमलोद्भवः ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ७० ए
एतां सृष्टिं विजानीहि कल्पादिषु पुनः पुनः यथा सूर्यस्य गगनादुदयास्तमने इह ७१ नष्टे पुनर्बलात्काल आनयत्यमितद्युतिः
तथा बलादहं पृथ्वीं सर्वभूतहिताय वै ७२ सत्वैराक्रांतसर्वांगां नष्टां सागरमेखलां आनयिष्यामि स्वस्थानं वाराहं रूपमास्थितः
७३ हिरण्याक्षं वधिष्यामि दैतेयं बलगर्वितं नारसिंहं वपुः कृत्वा हिरण्य[illegible]कशिपुं पुनः ७४ ॥ ॥ ॥ ॥ ॥

मो०
५२१

521

सुरकार्यं हनिष्यामि यज्ञघ्नं दितिनंदनं विरोचनस्य बलवान्बलिः पुत्रो महासुरः ७५ अवध्यः सर्वे लोकानां सदेवासुररक्षसां भवि
ष्यति स शक्रं च स्वराज्याच्च्यावयिष्यति ७६ त्रैलोक्ये परहृते तेन विमुखे च शचीपतौ अदित्यां द्वादशादित्यः संभविष्यामि कश्यपात्
७७ ततो राज्यं प्रदास्यामि शक्रायामिततेजसे देवतां स्थापयिष्यामि स्वे स्वे स्थाने पुनारद ७८ बलिं चैव करिष्यामि पातालवा
सिनं दानवं च व[illegible]लिं श्रेष्ठमवध्यं सर्वदैवतैः ७९ त्रेतायुगे भविष्यामि रामो भृगुकुलोद्वहः क्षत्रं चोत्सादयिष्यामि समृद्धबलवाहनं
८० संध्यांशे समनुप्राप्ते त्रेतायां द्वापरस्य च अहं दाशरथी रामो भविष्यामि जगत्पतिः ८१ त्रितोपघाताद्वैरूप्यमेकतोथ द्वितस्तथा
प्राप्स्यंति वानरत्वं हि प्रजापतिसुतावृषी ८२ तयोर्ये त्वन्वये जाता भविष्यंति वनौकसः महाबला महावीर्याः शक्रतुल्यपराक्रमाः
८३ ते सहाया भविष्यंति सुरकार्ये मम द्विज ततो रक्षःपतिं घोरं पुलस्त्यकुलपांसनं ८४ हनिष्ये रावणं रौद्रं सगणं लोककंटकं
द्वापरस्य कलेश्चैव संधौ पर्यवसानिके ८५ प्रादुर्भावः कंसहेतोर्मथुरायां भविष्यति तत्राहं दानवान्हत्वा सुबहून्देवकंटकान् ८६
कुशस्थलीं करिष्यामि निवेशं द्वारकां पुरीं वसानस्तत्र वै पुर्यामदित्या विप्रियंकरं ८७ हनिष्ये नरकं भौमं मुरं पीठं च दानवं प्रा
ग्ज्योतिषपुरं रम्यं नानाधनसमन्वितं ८८ कुशस्थलीं नयिष्यामि हत्वा वै ॥ ॥ ॥ ॥ ॥ ॥

तत३

मम०
५२१

दानवोत्तमं महेश्वरमहासेनौ बाणप्रियहितैषिणौ ८९ पराजेष्याम्यथोद्युक्तौ देवौ लोकनमस्कृतौ ततः सुतं बलेर्जित्वा बाणं बाहुसह
स्रिणं ९० विनाशयिष्यामि ततः सर्वान्सौभनिवासिनः यः कालयवनः ख्यातो गर्गतेजोभिसंवृतः ९१ भविष्यति वधस्तस्य मत्त एव द्वि
जोत्तम जरासंधश्च बलवान्सर्वराजविरोधनः ९२ भविष्यत्यसुरस्फीतो भूमिपालो गिरिव्रजे मम बुद्धिपरिस्पंदाद्वधस्तस्य भविष्यति ९३
शिशुपालं वधिष्यामि यज्ञे धर्मसुतस्य वै समागमे तु बलिषु पृथिव्यां सर्वराजसु ९४ वासविः सुसहायो वै मम ह्येको भविष्यति युधिष्ठिरं स्था
पयिष्यामि स्वराज्ये भ्रातृभिः सह ९५ एवं लोका वदिष्यंति नरनारायणावृषी उद्युक्तौ दहतः क्षत्रं लोककार्यार्थमीश्वरौ ९६ कृत्वा भारावतरणं
वसुधायां यथेप्सितं सर्वसात्वतमुख्यानां द्वारकायाश्च सत्तम ९७ करिष्ये प्रलयं घोरमात्मज्ञानाभिसंवृतं कर्माण्यपरिमेयानि चतुर्मू
र्त्तिधरो ह्यहं ९८ कृत्वा लोकान्गमिष्यामि स्वानहं ब्रह्मसत्कृतान् हंसः कूर्मश्च मत्स्यश्च प्रादुर्भावा द्विजोत्तम ९९ वाराहो नरसिंहश्च
वामनो राम एव च रामो दाशरथिश्चैव सात्वतः कल्किरेव च १०० यदा वेदश्रुतिर्नष्टा मया प्रत्याहृता पुनः सवेदाः सश्रुतीकाश्च कृताः
पूर्वं कृते युगे १ अतिक्रांताः पुराणेषु श्रुतास्ते यदि वा क्वचित् अतिक्रांताश्च बहवः प्रादुर्भावा ममोत्तमाः २ ॥ ॥ ॥ ॥

लोककार्याणिकृत्वाचपुनः स्वांप्रकृतिंगताः नचैतद्ब्रह्मणाप्राप्तमीदृशंममदर्शनं ३ यत्त्वयाप्राप्तमद्येहएकांतगतबुद्धिना एतत्तेस
र्वमाख्यातंब्रह्मन्भक्तिमतामया ४ पुराणंचभविष्यंचसरहस्यंचसत्तम भीष्मउवाच एवंसभगवान्देवोविश्वमूर्तिधरोऽव्ययः एता
वदुक्त्वावचनंतत्रैवांतर्दधेपुनः ६ नारदोपिमहातेजाःप्राप्यानुग्रहमीप्सितं नरनारायणौद्रष्टुंवदर्याश्रममाद्रवत् ७ इदंमहोपनि
षदंचतुर्वेदसमन्वितं सांख्ययोगकृतंतेनपंचरात्रानुशब्दितं ८ नारायणमुखोद्गीतंनारदोश्रावय [illegible]
त्पुनः ब्रह्मणःसदनेतातयथादृष्टंयथाश्रुतं ९ युधिष्ठिरउवाच एतदाश्चर्यभूतंहिमाहात्म्यंतस्यधीमतः किंब्रह्मानजानीतेयतः
शुश्रावनारदात् १० पितामहोपिभगवांस्तस्माद्देवादनंतरः कथंसनविजानीयात्प्रभावममितौजसः ११ भीष्मउवाच महाक
ल्पसहस्राणिमहाकल्पशतानिच समतीतानिराजेंद्रसर्गाश्चप्रलयाश्चह १२ सर्गस्यादौस्मृतोब्रह्माप्रजासर्गकरःप्रभुः जाना
तिदेवप्रवरंभूयश्चातोधिकंनृप परमात्मानमीशानमात्मनःप्रभवंतथा येतेवैब्रह्मसदनेसिद्धसंघाःसमागताः १४ तेभ्यस्तछ्रा
वयामासपुराणंवेदसंमितं तेषांसकाशात्सूर्यस्तुश्रुत्वावैभावितात्मनां १५ आत्मानुगामिनांराजन्श्रावयामाससैवततः षट्षष्टिर्हि
सहस्राणिऋषीणांभावितात्मनां १६ सूर्यस्यतपतोलोकान्निर्मितायेपुरःसराः तेषामकथयत्सूर्यः सर्वेषांभाविता ॥ ॥

त्मनां १७ सूर्यानुगामिभिस्तात ऋषिभिस्तैर्महात्मभिः मेरौ समागता देवाः श्राविताश्चेदमुत्तमं १८ देवानां तु सकाशाद्वै ततः श्रुत्वासितो
द्विजः श्रावयामास राजेन्द्र पि[illegible]णां मुनिसत्तम १९ मम चापि पिता तात कथयामास शान्तनुः ततो मयापि श्रुत्वा च कीर्तितं तव भारत २०
सुरैर्वा मुनिभिर्वापि पुराणं यैरिदं श्रुतं सर्वैस्ते परमात्मानं पूजयन्ते समन्ततः २१ इदमाख्यानमार्षेयं पारंपर्यागतं नृप नावासुदेवभक्ताय
त्वया देयं कथंचन २२ मत्तोन्यानि च ते राजन्नुपाख्यानशतानि वै यानि श्रुतानि सर्वाणि तेषां सारोयमुद्धृतः २३ सुरासुरैर्यथा राजन्नि
र्मथ्यामृतमुद्धृतं एवमेतत्पुरा विप्रैः कथामृतमिहोद्धृतं २४ यश्चेदं पठते नित्यं यश्चेदं शृणुयान्नरः एकान्तभावोपगत एकान्तेषु समा
हितः २५ प्राप्य श्वेतं महाद्वीपं भूत्वा चंद्रप्रभो नरः स सहस्रार्चिषं देवं प्रविशेन्नात्र संशयः २६ मुच्येदार्तस्तथा रोगाच्छ्रुत्वेमामादितः
कथां जिज्ञासुर्लभते कामान्भक्तो भक्तगतिं व्रजेत् २७ त्वयापि सततं राजन्नभ्यर्च्यः पुरुषोत्तमः स हि माता पिता चैव कृत्स्नस्य जग
तो गुरुः २८ ब्रह्मण्यदेवो भगवान्प्रीयतां ते सनातनः युधिष्ठिर महाबाहो महाबुद्धिर्जनार्दनः २९ वैशंपायन उवाच श्रुत्वैत
दाख्यानवरं धर्मराड्जनमेजय भ्रातरश्चास्य ते सर्वे नारायणपराभवन् ३० जितं भग॥ ॥ ॥ ॥ ॥॥

मो०
५२३

523

वनीतेनपुरुषेणेतिभारत निसंजप्यपरंब्रह्मासरस्वतीमुदीरयन् ३१ योऽस्माकंगुरुः श्रेष्ठः कृष्णद्वैपायनोमुनिः जगौपरमकंजप्यंनारा-
यणमुदीरयन् ३२ गत्वांतरिक्षात्सततंक्षीरोदममृताशयं पूजयित्वाचदेवेशंपुनरायात्स्वमाश्रमं ३३ भीष्मउवाच एतत्तेसर्वमा-
ख्यातंनारदोक्तंमयेरितं पारंपर्यागतंह्येतत्पित्रामेकथितंपुरा ३४ सूतउवाच एतत्तेसर्वमाख्यातंवैशंपायनकीर्तितं जनमेज-
येनतच्छ्रुत्वाकृतंसम्यग्यथाविधि ३५ यूयंहितप्ततपसः सर्वेचचरितव्रताः सर्वेवेदविदोमुख्यानैमिषारण्यवासिनः ३६

२९ शांतापारित्रिविष्टतमः कथमस्ति यज्ञधारीयज्ञकृत एकस्यैवयज्ञभोक्तृत्वंयज्ञकर्तृत्वंचविरुद्धमित्यर्थः तथापरस्परविरुद्धयोः प्रवृत्तिनिवृत्तिधर्मयोः एकस्यशा

शौनकस्यमहासत्रेप्राप्ताः सर्वेद्विजोत्तमाः यज्ञभुक्तुंतेयज्ञैः शाश्वतंपरमेश्वरं पारंपर्यागतंह्येतत्पित्रामेकथितंपुरा ३०
श्रुतंमेमोक्षधर्मेषुनारायणीये शौनकउवाच कथंसभगवान्देवोयज्ञेष्वग्रहरः प्रभुः यज्ञधारीचसततंवेदवेदांगवित्तथा
१ निवृत्तंचास्थितोधर्मंक्षेमीभागवतः प्रभुः निवृत्तिधर्मान्विदधेसएवभगवान्प्रभुः २ कथंप्रवृत्तिधर्मेषुभागार्हादेवताः ष्ता: ३
कथंनिवृत्तिधर्माश्चकृताव्यावृत्तबुद्धयः ३ एतंनः संशयंसौतेछिंधिगुह्यंसनातनं त्वयानारायणकथाश्रुतावैधर्मसंहिता
४ सौतिरुवाच जनमेजयेनयत्पृष्टः शिष्योव्यासस्यधीमतः तत्तेहंकथयिष्यामिपौराणंशौनकोत्तम ५ श्रुत्वामा
हात्म्यमेतस्यदेहिनांपरमात्मनः जनमेजयोमहाप्राज्ञोवैशंपायनमब्रवीत् ६ जनमेजयउवाच इमेसब्रह्मकालोकाः।
ससुरासुरमानवाः क्रियास्वभ्युदयोक्तासुसक्तादृश्यंतिसर्वशः ७ मोक्षश्चोक्तस्त्वयाब्रह्मन्निर्वाणंपरमंसुखं येचमुक्ता
भवंतीहपुण्यपापविवर्जिताः ८ तेसहस्रार्चिषंदेवंप्रविशंतीहशुश्रुम अहोहिदुरनुष्ठेयोमोक्षधर्मः सनातनः ९
यंहित्वादेवताः सर्वाहव्यकव्यभुजोभवन् किंचब्रह्माचरुद्रश्चशक्रश्चबलभित्प्रभुः १० ॥ ॥ ॥ ॥

स्तृत्वंविरुद्धंप्रतारकत्वापत्तेरितिप्रश्नार्थः स्वेनजीवभावेनास्मदृशान्प्रतिप्रवर्त्तयत्यनिवृत्तिधर्मभावेनप्रवृत्तिंत्यजेयं ४ देहिनांपरमात्मनः अन्तरात्मनः ८ सहस्रा
र्चिषंसूर्यांतर्यामिणंत्वनंतचिद्रूपंवा ९

मो०
५२४

S24

यदीतिनिवृत्तिधर्मेष्वेतच्छ्रेयानृतंहिंदयेः स्पदयेक्ष्याजगत्तत्वत्रयधिकंजानंतितेपित्रह्मरुद्रादयः स्वष्टिसंहारादौनप्रवर्त्तेयुः अतःप्रतारणामात्रंनिवृत्तिधर्मेः स्तथेः

सूर्यस्ताराधिपोवायुरग्निर्वरुणएवच आकाशंजगतीचैवयेचशेषादिवौकसः ११ प्रलयंनविजानंतिआत्मनःपरिनिर्मितं
ततस्तेनास्थितामार्गंध्रुवमक्षरमव्ययं १२ स्मृतिकालपरीमाणंप्रवृत्तिंयेसमास्थिताः दोषःकालपरीमाणेमहानेषक्रि
यावतां १३ एतन्मेसंशयंविप्रहृदिशल्यमिवार्पितं छिंधीतिहासकथनात्परंकौतूहलंहिमे १४ कथंभागहराःप्रोक्तादे
वताःक्रतुषुद्विज किमर्थंचाध्वरेब्रह्मन्निज्यंते त्रिदिवौकसः १५ येचभागंप्रगृह्णंतियज्ञेषुद्विजसत्तम तेयजंतो
महायज्ञैःकस्यभागंददंतिवै १६ वैशंपायनउवाच अहोगूढतमःप्रश्नस्त्वयापृष्टोजनेश्वर नातप्ततपसाह्येषनावेदवि
दुषातथा १७ नापुराणविदाचैवशक्योव्याहर्त्तुमंजसा हंततेकथयिष्यामियन्मेपृष्टःपुरागुरुः १८ कृष्णद्वैपायनो
व्यासोवेदव्यासोमहानृषिः सुमंतुर्जैमिनिश्चैवपैलश्चसुदृढव्रतः १९ अहंचतुर्थःशिष्योवैपंचमश्चशुकःस्मृतः ए
तान्समागतान्सर्वान्पंचशिष्यान्दमान्वितान् २० शौचाचारसमायुक्तानजितक्रोधानजितेंद्रियान् वेदानध्यापयामास
महाभारतपंचमान् २१ मेरौगिरिवरेरम्येसिद्धचारणसेविते तेषामभ्यस्यतांवेदान्कदाचित्संशयोभवत् २२ ॥ ॥

प्रष्ठ कथमितियथादेवाःदेवांतराभावात्इतरेभ्योभागमदत्वास्वयंतुस्वनेष्वेनेवंवयमपिसुखंस्थास्यामइतिप्रवृत्तिमार्गोपाक्षेपः १६

४१

१४ मयेति आत्मानुमानाभ्यां पारोक्ष्येण गृहीतोऽर्थो योगिनां प्रत्यक्षः स्यादितियोगजं प्रत्यक्षं प्रकृतमुक्तं योगभाष्येऽनन्तरं प्रत्यक्षेन श्रुतानुमानयोर्बीजमिति
योगसिद्धभावितुम्आगममगम्यएवायमर्थो वस्तायः २० परमात्मनः प्रतिबिंबभूतं परमात्मानं येन रूपेण महीवक्तुः तेनैव नरूपेणास्वयं पूर्ज्ञायन्नमा
गादिरूपालब्धवंतः यथोक्तं भागवते यद्धर्मानो भगवते विदधीत मानं तच्चात्मनः प्रतिमुखस्य यथा मुखश्रीरिति अतः फलावस्थायामस्वयं भ्राकुर्वंतो

एवमेव यस्त्वया पृष्टस्तेनैवं वा प्रकीर्तितः तत: श्रुतो मयाचापि तद्वाक्यं पाद्मभारत २३ शिष्याणां वचनं श्रुत्वा सर्वज्ञाननिधि
र्गुरुः पराशरसुतः श्रीमान्व्यासो वाक्यमथाब्रवीत् २४ मयाहि सुमहत्तप्तं तपः परमदारुणं भूतं भव्यं भविष्यं च
जानीयामिति सत्तमाः २५ तस्य मे तप्ततपसो निगृहीतेंद्रियस्य च नारायणप्रसादेन क्षीरोदस्यानुकूलतः २६ त्रैका
लिकमिदं ज्ञानं प्रादुर्भूतं यथेप्सितं तच्छृणुध्वं यथान्यायं वक्ष्ये संशयमुत्तमं २७ यथावृत्तं हि कल्पादौ दृष्टं मे ज्ञानचक्षु
षा परमात्मेति यं प्राहुः सांख्ययोगविदो जनाः २८ महापुरुषसंज्ञां स लभते स्वेन कर्मणा तस्मात्प्रसूतमव्यक्तं प्रधानं तं
विदुर्बुधाः २९

पिदेवाश्चस्मदन्नात्मज्ञभागानभुंजते। अस्माकं चैतेभ्योऽप्रदानेमहान्दोषः उक्तान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः
इति गीतावचनात् अतः प्रवृत्तिमार्गो वश्यमनुसरणीय इत्याह परमात्मेति यं प्राहुरित्यादिना सनः सनत्सुजातश्चैव सतः प्राक्तेनेनयेथेन २८ २९

अव्यक्ताद्व्यक्तमुत्पन्नंलोकसृष्ट्यर्थमीश्वरात् अनिरुद्धोहिलोकेषुमहानात्मेतिकथ्यते ३० योसौव्यक्तित्वमापन्नोनिर्ममेचपि
तामहं सोहंकारइतिप्रोक्तःसर्वतेजोमयोहिसः ३१ पृथिवीवायुराकाशमापोज्योतिश्चपंचमं अहंकारप्रसूतानिमहाभूतानि
पंचधा ३२ महाभूतानिसृष्ट्वैवतान्गुणान्निर्ममेपुनः भूतेभ्यश्चैवनिष्पन्नामूर्तिमंतश्चतांछृणु ३३ मरीचिरंगिराश्चात्रिः
पुलस्त्यः पुलहः क्रतुः वसिष्ठश्चमहात्मावैमनुःस्वायंभुवस्तथा ३४ ज्ञेयाःप्रकृतयोष्टौतायासुलोकाःप्रतिष्ठिताः वेदवेदांग
संयुक्तान्यज्ञयज्ञांगसंयुतान् ३५ निर्ममेलोकसिद्ध्यर्थंब्रह्मालोकपितामहः अष्टाभ्यःप्रकृतिभ्यश्चजातंविश्वमिदंजगत्
रुद्रोरोषात्मकोजातोदशान्यान्सोसृजत्स्वयं एकादशैतेरुद्रास्तुविकाराःपुरुषाःस्मृताः ३७ तेरुद्राःप्रकृतिश्चैवसर्वेचैवसुर
र्षयः उत्पन्नालोकसिध्यर्थंब्रह्माणंसमुपास्थिताः ३८ वयंसृष्टाहिभगवंस्त्वयावैप्रभविष्णुना येनयस्मिन्नधीकारेवर्तित
व्यंपितामह ३९ योसौत्वयाभिनिर्दिष्टोह्यधिकारोर्थचिंतकः परिपाल्यः कथंतेनसोहंकारेणकर्तृणा ४० प्रदिशत्वबलं
तस्ययोधिकारार्थचिंतकः एवमुक्तोमहादेवोदेवांस्तानिदमब्रवीत् ४१ ब्रह्मोवाच साध्वहंज्ञापितोदेवायुष्माभिर्भद्रमस्तु
वः ममाप्येषासमुत्पन्नाचिंतायाभवतांमता ४२ लोकत्रयस्यकृत्स्नस्यकथंकार्यपरिग्रहः कथंबलक्षयोनस्याद्युष्मा
कंह्यात्मनस्तुमे ४३ इतः ॥

सर्वेपिगच्छामः शरणंलोकसाक्षिणं महापुरुषमव्यक्तंसनोवक्ष्यतियद्धितं ४४ ततस्तेब्रह्मणासार्द्धमृषयोविबुधास्तथा क्षीरोदस्यो
त्तरंकूलंजग्मुर्लोकहितार्थिनः ४५ तेतपःसमुपातिष्ठन्ब्रह्मोक्तंवेदकल्पितं समहानियमोनामतपश्चर्यासुदारुणः ४६ ऊर्ध्वदृष्टि
र्बाहवश्चैकाग्रचमनोभवन् एकपादास्थिताःसर्वेकाष्ठभूताःसमाहिताः ४७ दिव्यंवर्षसहस्रंतेतपस्तप्त्वासुदारुणं शुश्रुवुर्मधु
रांवाणींवेदवेदांगभूषितां ४८ श्रीभगवानुवाच भोभोःसब्रह्मकादेवाऋषयश्चतपोधनाः स्वागतेनार्च्यवः सर्वान्श्रावयेवा
क्यमुत्तमं ४९ विज्ञातंवोमयाकार्यंतच्चलोकहितंमहत् प्रवृत्तियुक्तंकर्तव्यंयुष्मत्प्राणोपबृंहणं ५० सुतप्तंचतपोदेवाममा
राधनकाम्यया भोक्ष्यथास्यमहासत्वास्तपसःफलमुत्तमं ५१ एषब्रह्मालोकगुरुर्महान्लोकपितामहः यूयंचविबुधश्रे
ष्ठामांयजध्वंसमाहिताः ५२ सर्वेभागान्कल्पयध्वंयज्ञेषुममनित्यशः तथाश्रेयोभिधास्यामियथाधीकारमीश्वराः ५३
वैशंपायनउवाच श्रुत्वैतद्देवदेवस्यवाक्यंहृष्टतनूरुहाः ततस्तेविबुधाःसर्वेब्रह्मातेचमहर्षयः ५५ वेददृष्टेनविधिनावैष्ण
वंक्रतुमाहरन् तस्मिन्सत्रेसदाब्रह्मास्वयंभागमकल्पयत् ५६ देवादेवर्षयश्चैवसर्वेस्वंभागमकल्पयन् तेकार्तयुगधर्माणो
भागाःपरमसत्कृताः ५७ प्रापुरादित्यवर्णंतंपुरुषंतमसःपरं बृहंतंसर्वगंदेवमीशानंवरदंप्रभुं ५८ ततोथवरदोदेव
स्तान्सर्वानमरान्स्थितान् अशरीरोबभाषेदंवाक्यंखस्थो

महेश्वरः ५९ येनयः कल्पितोभागः सतथामामुपागतः प्रीतोहंप्रदिशाम्यत्रफलमावृत्तिलक्षणं ६० एतद्वोलक्षणंदेवामत्प्रसा
दसमुद्भवं यूयंयज्ञैरिज्यमानाः समाप्तवरदक्षिणैः ६१ युगेयुगेभविष्यध्वंप्रवृत्तिफलभागिनः यज्ञैर्येचापियक्ष्यंतिसर्वलोके
षुवैसुराः ६२ कल्पयिष्यंतिवोभागांस्तेनरावेदकल्पितान् योमेयथाकल्पितवान्भागमस्मिन्महाक्रतौ ६३ सतथायज्ञभा
गार्होवेदसूत्रेमयाकृतः यूयंलोकान्धारयध्वंयज्ञभागफलोचिताः ६४ सर्वार्थचिंतकालोकेयथाधीकारनिर्मिताः याःक्रिया
प्रचरिष्यंतिप्रवृत्तिफलसत्कृताः ६५ ताभिराप्यायितबलालोकान्वैधारयिष्यथ यूयंहिभाविताम‍र्त्यैः सर्वयज्ञेषुमानवैः ६६
मांततोभावयिष्यध्वमेषावोभावनामम इत्यर्थंनिर्मितावेदायज्ञाश्चौषधिभिः सह ६७ ६७ ६७ ॥

७१ एवं त्रयः प्रधानानां प्रवृत्तिमार्गमुक्त्वा सत्त्वप्रधानानां योग्यं निवृत्तिमार्गमाह सन इति ७४ कुतस्त्वं मार्गभेदोऽधिकारिभेदश्चेत्साशंकमाह यतोहमिति त्र
हंकारः यतस्त्रिगुणः सात्त्विको राजसस्तामसश्चातः सृष्टिं त्रैविध्यं जानीयेः सत्तं सात्त्विकास्ते धर्मज्ञानवैराग्यैश्वर्यवत्त्वेन तत्त्वाहंकारात्परं क्षेत्रज्ञं संहा

एभिः सम्यक्प्रयुक्तैर्हि प्रीयंते देवताः क्षितौ निर्माणमेतद्युष्माकं प्रवृत्तिगुणकल्पितं ६८ मयाकृतं सुरश्रेष्ठा यावत्कल्प
क्षयादिह चिंतयध्वं लोकहितं यथाधीकारमीश्वराः ६९ मरीचिरंगिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः वसिष्ठ इति स
प्तैते मानसा निर्मिता हि ते ७० एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः प्रवृत्तिधर्मिणश्चैव प्राजापत्येन कल्पिताः ।
७१ अयं क्रियावतां पंथा व्यक्तीभूतः सनातनः अनिरुद्ध इति प्रोक्तो लोक[illegible] सर्गकरः प्रभुः ७२ स
नः सनत्सुजातश्च सनकः ससनंदनः सनत्कुमारः कपिलः सप्तमश्च सनातनः सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः
सुताः स्वयमागतविज्ञाना निवृत्तिं धर्ममास्थिताः ७३ एते योगविदो मुख्याः सांख्यज्ञानविशारदाः आचार्या धर्मशा
स्त्रेषु मोक्षधर्मप्रवर्तकाः ७४ यतोहं प्रसृतः पूर्वमव्यक्तात्त्रिगुणो महान् तस्मात्परतरो योसौ क्षेत्रज्ञ इति कल्पितः ७५

रक्रमेण प्रविशंति ये राजसास्ते हंकारात्प्राचीनमेव ब्रह्मादिकं पुरुषार्थत्वेन पश्यंतः प्रवृत्तावाधिक्रियंत इत्यर्थः ७५ ७५

मो०
५२७

527

सोहमितिसोहंनिवृत्तिमार्गरूपः आम्नातिकीनिवृत्तिरात्ममात्रावशेषैवेति आत्मैवनिवृत्तिरूपःपंथाः सक्रियावतां [illegible]

छि ४

सोहंक्रियावतांपंथाः पुनरावृत्तिदुर्लभः योयथानिर्मितोजंतुर्यस्मिन्यस्मिंश्चकर्मणि ७६ प्रवृत्तोवानिवृत्तोवातत्फलंसोश्नुतेम
हत् एषलोकगुरुर्ब्रह्माजगदादिकरःप्रभुः ७७ एषमातापिताचैवयुष्माकंचपितामहः मयानुशिष्टोभवितासर्वभूतवर
प्रदः ७८ अस्यचैवात्मजोरुद्रोललाटाद्यःसमुत्थितः ब्रह्मानुशिष्टोभवितासर्वभूतधरःप्रभुः ७९ गच्छध्वंस्वानधीकारान्नचि
न्तयध्वंयथाविधि प्रवर्त्यंतांक्रियाःसर्वाःसर्वलोकेषुमाचिरं ८० प्रदिश्यंतांचकर्माणिप्राणिनांगतयस्तथा परिनिष्ठितका
लानिआयूंषीहसुरोत्तमाः ८१ इदंकृतयुगंनामकालःश्रेष्ठःप्रवर्तितः अहिंस्यायज्ञपशवोयुगेस्मिन्नतदन्यथा ८२
चतुष्पात्सकलोधर्मोभविष्यत्यत्रवैसुराः ततस्त्रेतायुगंनामत्रयीयत्रभविष्यति ८३ प्रोक्षितायत्रपशवोवधंप्राप्स्यंतिवै
मखे यत्रपादश्चतुर्थोवैधर्मस्यनभविष्यति ८४ ततोवैद्वापरंनाममिश्रःकालोभविष्यति द्विपादहीनोधर्मश्चयुगेतस्मि
न्भविष्यति ८५ ततस्तिष्येथसंप्राप्तेयुगेकलिपुरस्कृते एकपादस्थितोधर्मोयत्रतत्रभविष्यति ८६ देवाश्चर्षयश्चो
चुस्तमेवंवादिनंगुरुं एकपादस्थितेधर्मेयत्रक्वचनगामिनि कथंकर्तव्यमस्माभिर्भगवंस्तद्वदस्वनः ८७ ॥ ॥

[illegible]ः पुनरावृत्तिमतांदुर्लभः पुनरावृत्तिदुर्लभः मध्यमपदलोपीसमासः ७६ मार्गद्वैविध्यादिकमुपसंहरतियोयथेति ७६ एषलोकगुरुरित्यादिस्पष्टार्थः ८१
८६ ८७

राम०
५२७

८० एवमुक्त्वा तदा व्यासवाक्यं ८८ ब्रह्माणं कोऽभरोत्तराः सयुक्त्वा उपसंहरति। एवं महत्या दिना ९९ १००

श्रीभगवानुवाच यत्रैव वेदाश्च यज्ञाश्च तपः सत्यं दमस्तथा अहिंसाधर्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः सवैदेशः सेवित
व्योमावोधर्मः पदास्पृशेत् ८८ व्यासउवाच तेनुशिष्टा भगवता देवाः सर्षिगणास्तथा नमस्कृत्वा भगवते जग्मुर्देशा
न्यथेप्सितान् ८९ गतेषु त्रिदिवौकःसु ब्रह्मैकः पर्यवस्थितः दिदृक्षुर्भगवंतं तमनिरुद्धतनौस्थितं ९० तं देवो द
र्शयामास कृत्वा हयशिरो महत् ससांगानावर्तयन्वेदान्कमंडलुत्रिदंडधृक् ९१ ततोऽश्वशिरसं दृष्ट्वा तं देवममितौज
सं लोककर्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया ९२ मूर्ध्ना प्रणम्य वरदं तस्थौ प्रांजलिरग्रतः सपरिष्वज्य देवेन वचनं
श्रावितस्तदा ९३ भगवानुवाच लोककार्यगतीः सर्वास्त्वं चिंतय यथाविधि धाता त्वं सर्वभूतानां त्वं प्रभुर्जगतो गुरुः
त्वय्यावेशितभारोहं धृतिं प्राप्स्याम्यथांजसा ९६ यदा च सुरकार्यं ते अविषह्यं भविष्यति प्रादुर्भावं गमिष्यामि तदात्म
ज्ञानदेशिकं ९७ एवमुक्त्वा हयशिरास्तत्रैवांतरधीयत तेनानुशिष्टो ब्रह्मापि स्वं लोकमचिराद्गतः ९७ एवमेष महाभा
गपद्मनाभः सनातनः यज्ञेष्वग्रहरः प्रोक्तो यज्ञधारी च नित्यदा ९९ निवृत्तिं चास्थितो धर्मं गतिमक्षयधर्मिणां प्रवृत्ति
धर्मान्विदधे कृत्वा लोकस्य चित्रतां १०० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भक्त्यातिशयाच्छिष्यान्तरमुक्तास्तं परमात्मानं स्तौति स सृष्टिरिति धाता दधाति धारयति पोषयति तस्य धेयं धारणीयं पोषणीयं च १ नाम्नां निर्वचनं तु स्वयमेव।

सृष्टिः समध्यः स चान्तः प्रजानां स धाता स धेयः स कर्ता स कार्यं युगान्ते स सुप्तः सुसंक्षिप्य लोकान्युगादौ प्रबुद्धो जगद्ध्युत्ससर्ज १ तस्मै नमध्वं देवाय निर्गुणाय महात्मने अजाय विश्वरूपाय धाम्ने सर्वदिवौकसां २ महाभूताधिपतये रुद्राणां पतये तथा आदित्यपतये चैव वसूनां पतये तथा ३ अश्विभ्यां पतये चैव मरुतां पतये तथा वेदयज्ञाधिपतये वेदाङ्गपतयेऽपि च ४ समुद्रवासिने नित्यं हरये मुञ्जकेशिने शान्तये सर्वभूतानां मोक्षधर्मानुभाषिणे ५ तपसां तेजसां चैव पतये यशसामपि वाचश्च सरितां चैव पतये सततं तथा ६ कपर्दिने वराहाय एकशृङ्गाय धीमते विवस्वतेऽश्वशिरसे चतुर्मूर्तिधृते सदा ७ गुह्याय ज्ञानदृश्याय अक्षराय क्षराय च एष देवः संचरति सर्वत्रगतिरव्ययः ८ एष चैतत्परं ब्रह्म ज्ञेयो विज्ञानचक्षुषा एवमेतत्पुरा दृष्टं मया वै ज्ञानचक्षुषा ९ कथितं तच्च वः सर्वं मया पृष्टेन तत्त्वतः क्रियतां मद्वचः शिष्याः सेव्यतां हरिरीश्वरः १० गीयतां वेदशब्दैश्च पूज्यतां च यथाविधि वैशंपायन उवाच इत्युक्तास्तु वयं तेन वेदव्यासेन धीमता सर्वे शिष्याः सुतश्चास्य शुकः परमधर्मवित् १२ स चास्माकमुपाध्यायः सहास्माभिर्विशांपते चतुर्वेदोद्गताभिस्तमृग्भिः समभितुष्टुवे १३ ॥ ॥ ॥

करीष्यतीति न व्याख्यायन्ते २ २ २ २ २ २ २ २ २

एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि एवमेकथयद्राजन्पुराद्वैपायनोगुरुः १४ यश्चेदंशृणुयान्नित्यंयश्चैवंपरिकीर्त्तयेत् न
मोभगवतेकृत्वासमाहितमतिर्नरः १५ भवत्यरोगोमतिमान्बलरूपसमन्वितः आतुरोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् १६
पामान् ३ "कामीलभेत्कामान्दीर्घमायुरवाप्नुयात् ब्राह्मणःसर्ववेदीस्यात्क्षत्रियोविजयीभवेत् १७ वैश्योविपुललाभःस्याच्छूद्रःसुखम
वाप्नुयात् अपुत्रोलभतेपुत्रंकन्याचैवेप्सितंपतिं लग्नगर्भाविमुच्येतगर्भिणीजनयेत्सुतं १८ वंध्याप्रसवमाप्नोतिपुत्रपौत्रस
मृद्धिमत् क्षेमेणगच्छेदध्वानंयइदंपठतेपथि १९ योयंकामंकामयतेतंतमाप्नोतिचध्रुवं २० इदंमहर्षेर्वचनंविनिश्चितं
महात्मनःपुरुषवरस्यकीर्त्तनं समागमंचर्षिदिवौकसामिमंनिशम्यभक्ताःसुसुखंलभंते १२१ शांतौमोक्षधर्मेषुनारायणी
ये जनमेजयउवाच श्रीलोपीयैरिमैर्व्यासःसशिष्योमधुसूदनं नामभिर्विविधैरेषांनिरुक्तंभगवन्मम १ वक्तुमर्हसिशु
श्रूषोःप्रजापतिपतेर्हरेः श्रुत्वाभवेयंयत्पूतःशरच्चंद्रइवामलः २ वैशंपायनउवाच शृणुराजन्यथाचष्टफाल्गुनस्यहरिः
प्रभुः प्रसन्नात्मात्मनोनाम्नांनिरुक्तंगुणकर्मजं ३ नामभिःकीर्त्तितैस्तस्यकेशवस्यमहात्मनः पृष्टवान्केशवंराजन्फा
ल्गुनःपरवीरहा ४ ॥ ॥

१२ अष्टादशगुणं सत्वं प्रीतिः प्रकाश उद्रेको लघुता सुखमेव च। अकार्पण्यमसंरंभः संतोषः श्रद्दधानता क्षमा धृतिरहिंसा च शौचमक्रोध एव च आर्जवं समता सत्य मनसूया तथैव चेति तत्त्वगुणोपाधिः प्रीत्यादिशक्तिर्भवतीति गौणानामनिर्वचनं। साष्टादशगुणमयी मदंशमम परा प्रकृतिः स्वरूपेरोदसी धारयत्थिआत्मिकाया

अर्जुन उवाच भगवन्भूतभव्येश सर्वभूतसृगव्यय लोकधाम जगन्नाथ लोकानामभयप्रद ५ यानि नामानि ते देव कीर्तितानि महर्षिभिः वेदेषु सपुराणेषु यानि गुह्यानि कर्मभिः ६ तेषां निरुक्तं त्वत्तोहं श्रोतुमिच्छामि केशव न ह्यन्यो वर्णयेन्नाम्नां निरुक्तं त्वामृते प्रभो ७ श्रीभगवानुवाच ऋग्वेदे सयजुर्वेदे तथैवाथर्वसामसु पुराणे सोपनिषदे तथैव ज्योतिषेर्जुन ८ सांख्ये च योगशास्त्रे च आयुर्वेदे तथैव च बहूनि मम नामानि कीर्तितानि महर्षिभिः ९ गौणानि तत्र नामानि कर्मजानि च कानिचित् निरुक्तं कर्मजानां त्वं शृणुष्व प्रयतोनघ १० कथ्यमानं मया तात त्वं हि मेर्द्धं स्मृतः पुरा नमोतियशसे तस्मै देहिनां परमात्मने ११ नारायणाय विश्वाय निर्गुणाय गुणात्मने यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः १२ योसौ योनिर्हि सर्वस्य स्थावरस्य चरस्य च अष्टादशगुणं यत्तत्सत्वं सत्ववतां वर १३ प्रकृतिः सा परा मह्यं रोदसी योगधारिणी ऋता सत्यामरा जय्या लोकानामात्मसंज्ञिता तस्मात्सर्वाः प्रवर्त्तंते सर्गप्रलयविक्रियाः १४

गतंलोकान्धारयतीतियोगधारिणी १३ ऋताकर्मफलभूतात्रह्लोकांतास्तसा अबाधितचिन्मात्ररूपा तस्मादमृताचालकात्परमात्मनं ध्वस्तात्सता ते १४

तपआदिरूपो निरुद्धस्व १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ ॥

तपोयज्ञश्चयष्टाचपुराणः पुरुषोविराट् अनिरुद्धइतिप्रोक्तोलोकानांप्रभवाव्ययः १५ ब्राह्मेरात्रिक्षयेप्राप्तेतस्यह्यमिततेजसः प्रसा
दात्प्रादुरभवत्पद्मंपद्मनिभेक्षण १६ तत्रब्रह्मासमभवत्सतस्यैवप्रसादजः अह्नः क्षयेललाटाच्चसुतोदेवस्यवैतथा १७ क्रोधा
विष्टस्यसंजज्ञेरुद्रः संहारकारकः एतौद्वौविबुधश्रेष्ठौप्रसादक्रोधजावुभौ १८ तदादेशितपंथानौसृष्टिसंहारकारकौ निमित्तमा
त्रंतावत्रसर्वप्राणिवरप्रदौ १९ कपर्दीजटिलोमुंडः श्मशानगृहसेवकः उग्रव्रतचरोरुद्रोयोगीपरमदारुणः २० दक्षक्रतुह
रश्चैवभगनेत्रहरस्तथा नारायणात्मकोज्ञेयः पांडवेययुगेयुगे २१ तस्मिन्हिपूज्यमानेवैदेवदेवेमहेश्वरे संपूजितोभवेत्पार्थ
देवोनारायणः प्रभुः २२ अहमात्माहिलोकानांविश्वेषांपांडुनंदन तस्मादात्मानमेवाग्रेरुद्रंसंपूजयाम्यहं २३ यद्यहंनार्च
येयंवैईशानंवरदंशिवं आत्मानंनार्चयेत्कश्चिदितिमेभावितात्मनः २४ मयाप्रमाणंहिकृतंलोकः समनुवर्त्तते प्रमाणा
निहिपूज्यानिततस्तंपूजयाम्यहं २५ यस्तंवेत्तिसमांवेत्तियोनुतंसहिमामनु रुद्रोनारायणश्चैवसत्त्वमेकंद्विधाकृतं २६
लोकेचरतिकौंतेयव्यक्तिस्थंसर्वकर्मसु नहिमेकेनचिद्देयोवरः पांडवनंदन २७ ॥ ॥ ॥

३४ चतुर्विधाः आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी चेति गीतोक्ताः अन्याश्चान्यातिरिक्ता देवतास्तास्ता अन्यदेवताः तथा च श्रुतिः आथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति न त सवे

इतिसंचिंत्यमनसापुराणंहृषीकेश्वरं पुत्रार्थमाराधितवानहमात्मानमात्मना २८ नहिविष्णुः प्रणमतिकस्मैचिद्विबुधायच ऋतेआत्मा
नमेवेतिततोहंदंभजाम्यहं २९ सब्रह्मकाः सरुद्राश्चसेंद्रादेवाः सहर्षिभिः अर्चयंतिसुरश्रेष्ठंदेवंनारायणंहरिं ३० भविष्यतांवर्त्ततांच
भूतानांचैवभारत सर्वेषामग्रणीर्विष्णुः सेव्यः पूज्यश्चनित्यशः ३१ नमस्यहव्यदंविष्णुंतथाशरणदंनमवरदंनमस्व
कौंतेयहव्यकव्यभुजंनम ३२ चतुर्विधाममजनाभक्ताएवंहिमेश्रुतं तेषामेकांतिनः श्रेष्ठायेचैवानन्यदेवताः ३३ अ
हमेवगतिस्तेषांनिराशीः कर्मकारिणां येचशिष्टास्त्रयोभक्ताः फलकामाहितेमताः ३४ सर्वेच्यवनधर्मास्तेप्रतिबु
द्धस्तुश्रेष्ठभाक् ब्रह्माणंशितिकंठंचयाश्चान्यादेवताः स्मृताः ३५ प्रबुद्धचर्याः सेवंतोमामेवैष्यंतियत्परं भक्तंप्रतिवि
शेषस्तेएषपार्थानुकीर्त्तितः ३६ त्वंचैवाहंचकौंतेयनरनारायणौस्मृतौ भारावतरणार्थंतुप्रविष्टौमानुषींतनुं ३७ जाना
म्यध्यात्मयोगांश्चयोहंयस्माच्चभारत निवृत्तिलक्षणोधर्मस्तथाभ्युदयिकोपिच ३८ ॥ ॥ ॥ ॥ ॥ ॥

द यथा पशुरेवं स देवानामिति अन्योपास्तिं निंदति अनन्याः आत्मैव देवता येषां ते आत्मेत्येवोपासीतेत्यादि श्रुतेः ज्ञानिन इत्यर्थः ३३ ३८ ॥ ॥

प्रतिज्ञातं नाम निर्वचनं करोमि नराणामित्यादिना । नरा जीवाः बिंबप्रतिबिंबमिव यत्राध्यस्ताः अतस्तेषामयनं नारायणः स्यादित्यर्थः तद्धि न दृश्ये कार्ये दर्पणादिस्व
च्छं दृश्यमप्राप्यास्य रविरश्मिवत्प्रतिस्रोतः प्रवृत्तैर्नयनरश्मिभिः ग्रीवास्थमेव मुखं पूर्वं प्रवृत्तानां पराक्तकारात्प्रत्यङ्मुखत्वाद्युपाधिधर्मविशिष्टं दृश्यते अन्यथा तस्
तानमनुगतपुरुषादिदर्शनं दृश्येतानेन स्यात् तद्विषयकसंस्काराभावात् योग्यं दर्पणादृष्टः संस्कारयमित्यबाधितप्रत्यभिज्ञाबलाच्च न दृश्येतोऽभिनवमुखाध्यास इति युक्तमित्यादि
तं वेदान्तकृतकैरस्माभिः अतिस्वच्छजीवयोर्बिंबप्रतिबिंबभावं दर्शयति । यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बह्वेकोऽनुगच्छन् । उपाधिना क्रियते भेद

नराणामयनं ख्यातमहमेकः सनातनः आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं मम तत्पूर्वमतो नारायणो
ह्यहं ३९ छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहं ४० ४० ॥ ॥

सूनवः पौत्राः क्षेत्रज्ञेष्वेवमेव उपमात्मेति तस्माद्विंचैचैतन्ये व्यस्तस्य जीवाख्यप्रतिबिंबस्याविद्यादर्पणापनये यत्रैव विलय इति युक्तं तस्य नारायणत्वं निर्वचनं तस्मा
हा नरो जीवः तद्विद्याकल्पितं तत्त्वं प्रधानत्वात् आपः पुरुषश्च सोऽभवन्नेति श्रुतेः तद्वयमिति शरीरमुच्यते । तरस्य पूर्वं अयनं प्रवेशस्थानं उपाधिसृष्टिसमकालीनं
घटाकाशवदुपाधौ चितेः प्रवेशः उपाध्यभिमानानन्तरं च जीवत्वमिति विवेकः अत उक्तं मम तत्पूर्वमयनमिति ३९ वासयत्याच्छादयति विश्वं वसत्यस्मिन्निति वा
मिति वा वासुः वसत्याच्छादनेन च सन्निवासे इत्यनयोः संप्रसारणोऽसौ देवश्चेति वासुदेवस्तस्यार्थः एतेनेश्वरावास्यमिदं सर्वं कर्माध्यक्षः सर्वभूताधिवास इति श्रुत्यर्थ
वद्रूः संगृहीतः ४० ॥ ॥ ॥

विछगतौतुदादेः विछदीप्तौचुरादेः विष्लृव्याप्तौजुहोत्यादेः विषुसेचनेभ्वादेः विशप्रवेशनेतुदादेः ष्णुप्रस्रवणेअदादेः एतेषामन्यतमस्यरूपंविष्णुरित्यभिप्रेत्या
हगतिरित्याहे। विछ्छतिलीयतेऽस्मिन विछ्छत्यस्माल्लोकाकारइति वा वेवेष्टिव्याप्नोतीति वा विछ्छयति दीप्यतइति वा अधिभूतानि सर्वाणि प्राणिजातानि दिक्ष्वादिकानि अन्ते
षु देहावसानेषु यत्ब्रह्म इच्छन्नस्म्यभावश्चार्थः इच्छितं वनितं इस्मि सर्वकामप्रदत्वकमिति विशेषेणाश्नोतीति प्रसवति कामं क्षीरमिति वा वक्रत्वात् सिंचतीति जीवने

गतिश्च सर्वभूतानां प्रजनश्चापि भारत व्याप्ता मे रोदसी पार्थ कान्तिश्चाभ्यधिका मम ४१ अधिभूतानि चान्तेषु तदिच्छंश्चा
स्मि भारत क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ४२ दमात्सिद्धिं परीप्सन्तो मां जनाः कामयन्तिह दिवं चोर्वीं च मध्यं च
तस्माद्दामोदरो ह्यहं ४३ पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ममैतानि सदा गर्भः पृश्निगर्भस्ततो ह्यहं ४४ ॥ ॥ ॥

प्रविशति हृदयं क्रामति कार्यमिति वा विष्णुरित्यर्थः एतेन गच्छतस्मिन्नागच्छन्ति च यस्मात्प्रजाः येनावृतं खं च दिवं मही च तस्य भासा सर्वमिदं विभाति यदिच्छं
तो ब्रह्मचर्यं चरन्ति तद्भावेनात्मानं स्पतीति अत्रोद्दोवर्धविष्णुदान इत्यादिश्रुत्यर्थ उक्तः। ४२ दमनं दामः तेन उत्ता उत्कर्षेण क्रामन्ति प्राप्नुवन्ति स्वर्गादिकं
यस्मादिति दामोदरं इत्यभिप्रायाहत्मादिति ४३ पृच्छ्यते सेनजिज्ञासवा धर्मेज्ञातमिति वा पृच्छ्यते सेनक्षुधितादय इति वा पृश्निर्वेदः अन्नादि वा गर्भो गर्भस्था
नीयत्वात्: पृश्निगर्भोऽहमित्यर्थः ४४ ॥ ॥

ऋषयइतिद्वौ एतन्नामज्ञयफलमाहतुः ४५ केशैः केशवत्सूक्ष्मैः सूर्यादिरश्मिभिस्तद्द्वयेणवावानिगछतीतिकेशवइत्याहसूर्यस्येति। यद्वादिस्सगतेजोजगन्न्यासय

ऋषयः प्राहुरेवंमांत्रितंतत्कूपनिपातितं हरिश्मिगर्भेत्रितंपाहीत्सिकतोहितपातितं ४५ ततः सब्रह्मगणाः पुत्रस्त्राघोद्यषिव
ह्लितः उन्नतारोरूपाताहे हरिश्मिगर्भोनुकीर्त्तनात् सर्वस्यस्तपितोलोकानेद्रैः सोमस्यचाप्युत क्लेशवोपमकाशंतेममते
केशसंज्ञिताः ४६ सर्वज्ञाः केशवंतस्मान्मामाहुर्द्विजसत्तमाः सपत्न्यामाहितोगर्भउतथ्येनमहात्मना ४७ उतथ्यत
हितेचैवकस्यचित्त्वमायायाबृहस्पतिरथाविंदत्पत्नीतस्यमहात्मनः ४८ तेजोवैतदृषिश्रेष्ठंमैथुनापगतंतथा उवाच
गर्भः कौंतेयपंचभूतसमन्वितः ४९ पूर्वांगतोहंवरद नाहंसर्वांप्रवाधितुं एतद्बृहस्पतिः श्रुत्वा चुक्रोधचशशापच ५०
मैथुनायागतोयस्मात्त्वयाहंविनिवारितः तस्मादंधोयास्यसित्वंमच्छापान्नात्रसंशयः ५१ सशापादृषिमुख्यस्यदीर्घतम
उपेयिवान् सहिदीर्घतमानामनाम्नाख्यातो हृषिःपुरा ५२ वेदानवाप्यचतुरः सांगोपांगान्सनातनान् प्रयोजयामाससतदा
नामगुह्यमिदंमम ५३ ॥ ॥

तेरिवलं।पंद्रंइमसियच्चाग्नेनातेतेजोविद्धिमामकमितिभगवद्वचनार्थः केशवमर्दस्युत्पत्युत्त्वामिदं ४६ केशवशब्दज्ञयफलंमेधस्यचक्षुः प्राप्तिरित्याहसपत्न्यामि
साद्दिना ४७ ५० ५३

५३ गौतमः गोशब्देन चक्षुश्चक्षुरुच्यते चक्षुष्मत्तमत्वमस्यार्थः ५४ तापनादाप्यायनाच्च लोकं हर्षयत इति ह्रषी अग्नीषोमौ जाठराग्न्यादिरूपेण तौ केशाख्यस्य निह्रषीके
शत्वे तन्मयं सुसादयितुं अग्नीषोममयो भोक्तृभोग्ययोरेकयोनित्वमहं देवानामित्यादिना एकयोनित्वं विना भोक्तृभोग्यभावासंभवः अग्निमुखा वा ह्यग्नियोन्यः स्यु

स चक्षुष्मान्समभवद्गौतमस्तस्य प्रसादतः एवं हि वरदं नाम केशवेति मम फाल्गुन ५३ देवानामथ सर्वेषामृषीणां च महात्मनां
अग्निः सोमेन संयुक्त एकयोनित्वमागतः ५४ अग्नीषोममयं तस्माज्जगत्कृत्स्नं चराचरं अपि हि पुराणे भवति एकयो
न्यात्मकावग्नीषोमौ देवाश्चाग्निमुखा इति एकयोनित्वाच्च परस्परं महयंतो लोकान्धारयत इति ५६ शांतौ मोक्षधर्मे
नारायणीये अर्जुन उवाच अग्नीषोमौ कथं पूर्वमेकयोनी प्रवर्तितौ एष मे संशयो जातस्तं छिंधि मधुसूदन १
श्रीभगवानुवाच हंत ते वर्तयिष्यामि पुराणं पांडुनंदन आत्मतेजोद्भवं पार्थ शृणुष्वैकमना मम २ संप्रक्षालन
काले तिक्रांते चतुर्युगसहस्रांते अव्यक्ते सर्वभूतप्रलये सर्वभूते स्थावरजंगमे ३ ॥ ॥ ॥

रोचक्षुषोरपि भोग्यभोक्तृभावः स्यादित्याशयेनाह परस्परं महयंत इति भोक्तृभोग्यत्वमिति शेषः ५६ अध्यायः तेजोद्भवं सर्वाधारभूतं संप्रक्षालनकाले प्रलयकाले
२ चतुर्युगानां सहस्रांते जले कारणे सलिलवह्निरेकसमुद्रे ३ ॥

आप इत्येवमिति सलिल एको द्रष्टाद्वैतो भवतीति श्रुतेः ब्रह्मभूतस्य अप्पर्यायसलिलशब्देनोपादानात्तत्कारणत्ववद्द्वितीये इत्यर्थः प्रतिष्ठिते स्वमहिम्नी
ति शेषः ४ न रात्र्यामद्य आसीदकृतः नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यदिति तावतः कालभागस्यार्थसंगतत्वान्न रा
त्र्यामिति। सति प्रधाने असति सूक्ष्मे व्यक्ते परमाणुवादे। अव्यक्ते मायाशबलपरव्योमाख्ये ५ एवं निर्विशेषसन्मात्रे ब्रह्मण्यवस्थिते सति अनिर्व

ज्योतिर्द्धरणिवायुरहिते चांधे तमसि जलैकार्णवे लोके ३ आप इत्येवं ब्रह्मभूतसंज्ञके द्वितीये प्रतिष्ठिते नैव रात्र्यां
न दिवसे न सत्ति नासत्ति न व्यक्ते न चाप्यव्यक्ते व्यवस्थिते ५ एवमस्यामवस्थायां नारायणगुणाश्रयादजरामरादनिंद्रि
यादग्राह्यादसंभवात्सत्यादहिंस्राल्ललामाद्विविधप्रवृत्तिविशेषादवैरादक्षयादमरादजरादमूर्त्तितः सर्वव्यापिनः
सर्वकर्त्तुः शाश्वतस्तमसः पुरुषः प्रादुर्भूतो हरिरव्ययः ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चनीयात्तमसः सृष्टिमाह। एवमस्यामित्यादिना। नारायणगुणानामैश्वर्यादीनामाश्रयात्। अजरामरत्वं भूताकाशेऽस्ति ननु तस्य श्रोत्रेंद्रियात्मनो नि
रिंद्रियत्वमसिद्धमत उक्तमनिंद्रियादिति। तदपि कालेऽस्तीत्यत आह अग्राह्यादिति कालस्यापि षडिंद्रियवेद्यत्वमस्ति इदानीं घटं पश्यामीत्याद्यनुभ
वात् विशिष्टप्रत्यक्षस्य च विशेषणप्रत्यक्षं विनाऽसंभवादित्यर्थः। अथवा तार्किकाभिमतमनः प्रत्यक्षात्मग्राह्यत्वमर्थमिदं। तदस्य ईश्वरे वारणार्थमाह।
असंभवादिति। तस्य हि क्षित्यादिकं सकर्त्तृकं कार्यत्वात् घटवदित्यनुमा ॥ ॥ ॥ ॥

ततः संभवोऽस्ति । न चैतत्तथा । अस्यज्ञत्वाभ्युपगमात् । तस्मात्तद्व्यवहारतद्दीतिशेषः नतु परीक्षातः समस्तमस्यालिनत्वे हेतुः अहिं स्नादिति स्वभूव्याघ्रोहि हि निद्रा
दोषरोगापसुत भीणयेसेवनतु हिनस्तित्तदूदेतनसस्मेले आहिं स्नत्वेनोपपद्यतेत्यर्थः नन्वेवं नामांतरेणान्नस्य देवोक्ते ने सोऽहल नामादिति चिंतामोता
रत्नवद्भावरूपादित्यर्थः अत एवं विविधाः सर्वांत्रविशेषाः यस्मात् । भावरूपत्वेपि ज्ञउत्वात्तुच्छत्वाच्चैवरस्य यज्ञ एव सुसूत्रेयो स्य संभवं तिद्दृ
शमपि सर्वव्यापकं सर्वकर्तृचेतिशास्त्रमंत्र एवं अनादियं च मंत्रार्थे सूत्रम् । तमसः सकाशात् विराडात्मा प्रादुर्भूतो व्यक्तो नागतः अहं मत्स्य विषये ते

निदर्शनमपि स्पष्टं भवति ७ नासीदहो न रात्रिरासीन्नासदासीन्नासदासीत्तम एव
पुरस्तादभवद्विश्वरूपं सा विश्वरूपस्य रजनीहि एवमस्यार्थानुभाष्यः ८ ॥ ॥

गतः हिरण्मयः ३ निदर्शनस्फाति रूपं प्रमाणं ७ नेदं वपठतिनासीदिति तम एव पुरस्तादभवद्विश्वरूपमिति अस्मिन्नर्थे स्फुरं तत्र समस्ति । तम
आ[illegible]सीत्तमसागूहमग्रे प्रकेतं सलिलं सर्वमा इदं तुच्छेनाभ्वपिहितं यदासीत्तमसस्तन्महिना जायतैकमिति श्रुत्यंतराणि प्राग्यौनार
वमस्यार्थानुभाष्यः । अग्नीषोमयोरेकयोनित्वं भावितमेव ख्मसुद्धात्मावशेषो व्यापुनरप्यनुभाष्यः हरिप्रभवत्वेनेत्यर्थः ८ ॥ ॥ ॥ ॥

तेदेवाहन्तस्पदानीमित्यादिना स पुरुषः हरिः ब्रह्मणा ब्राह्मणेन मंत्रवादेपि ब्राह्मणमाहात्म्यप्रख्यापकः ९ हे अग्ने त्वं देवादीनां हितोसि पत्नः त्वं यज्ञानां होता हो

ततस्यदानीतमसः संभवस्य पुरुषस्य ब्रह्मयोनेर्ब्रह्मणः प्रादुर्भावे स पुरुषः प्रजाः सिसृक्षमाणो नेत्राभ्यामग्नीषोमौ ससृजे
ततो भूतसर्गेषु प्रजाक्रमवशाद्ब्रह्मक्षत्रमुपातिष्ठत यः सोमस्तद्ब्रह्म यद्ब्रह्म ते ब्राह्मणाः योग्निस्तत्क्षत्रं क्षत्राद्ब्रह्म बलवत्त
रं कस्मादिति लोकप्रत्यक्षगुणमेतत्तद्यथा ब्राह्मणेभ्यः परं भूतं नोत्पन्नपूर्वं दीप्यमानेग्नौ जुहोतीति यो ब्राह्मणमुखे जु
होतीति कृत्वा ब्रवीमि भूतसर्गः कृतो ब्रह्मणा भूतानि च प्रतिष्ठाप्य त्रैलोक्यं धार्यत इति मंत्रवादोपि हि भवति ९ त्वमग्ने यज्ञा
नां होता विश्वेषां हितो देवानां मानुषाणां च जगत इति १० निदर्शनं चात्र भवति विश्वेषामग्ने यज्ञानां त्वं होतेति त्वं हितो देवैर्मा
नुषे जगत इति अग्निर्हि यज्ञानां होता कर्ता स चाग्निर्ब्रह्म १२ ॥ ॥ ॥ ॥ ॥ ॥

तत्स्वरूपो ऋत्विग्यो होता तेनाग्निस्तवनम् अग्निर्होतापि होता ब्राह्मणोधिकरिति दर्शितं १० संक्षिप्य मंत्रमाचष्टे निदर्शनमिति ११ विस्तरेण आचष्टे। अग्निर्ही
ति होता ऋत्विक् यो यजमानः उभौ होतृस्वार्थौ उभयरूपी अग्निर्ब्रह्म ब्राह्मणाः १२

ब्राह्मणस्यैवेदं धारित्वेन ब्रह्मभावं उपपादयति नहीति साहित्ना १३ अग्नाविति अग्नौ मोहुतेन सति ब्राह्मणेन तृप्यति ब्राह्मणमुखे हुतेनैव [illegible]गमादयो देवताः ब्राह्मणशरीरं प्रविश्य धारयं तस्मात् ब्राह्मात् स्पंतीति शतपथवाक्यार्थः १५ शैकाइव शैकाः शैक्य समुदायः यथा शैक्यं गव्यादीन् धारयति एवं ब्राह्मणो मसादी

नस्यंते मंत्राणां हवनमस्ति न विना पुरुषं तपः संभवति हविर्मंत्राणां संपूजा विद्यते देवमानुषआर्षीणाम नेनत्वं होतेति नियुक्तः येच मानुषहोत्राधिकारास्तेच ब्राह्मणस्य हि याजने विधीयते न क्षत्रवैश्ययोर्द्विजासोस्तस्माद्ब्राह्मणस्याग्निमन्तायज्ञानुद्वहंति यज्ञास्ते देवांस्तर्पयंति देवाः पृथिवीं भावयंति शतपथेपि हि ब्राह्मणमुखे भवति १३ अग्नौ समि[illegible]धे सजुहोति यो विद्वान् ब्राह्मणमुखेनाहुतिं जुहोति १४ एवमप्यग्निमन्ता ब्राह्मणा विद्वांसाश्चाग्निभावयंति अग्निर्विष्णुः सर्वभूतान्यनुप्रविश्य प्राणान्धारयति १५ अपि चात्र सनत्कुमारगीताः श्लोका भवंति ब्रह्मा विश्वं सृजन् सर्वं सर्वादि दिनि रवस्कृते ब्रह्मघोषैर्हि वेगच्छेमत्परा ब्रह्मयोनयः ब्राह्मणानां मतिर्वाक्यं कर्मश्रद्धा तपांसि च धारयंति महीं द्यां च शैक्याद्वाग्अमृतं तथा १६ नास्ति सत्यात्परो धर्मो नास्ति मातृसमो गुरुः ब्राह्मणेभ्यः परं नास्ति प्रेत्य चेह च भूतये १७ नैषां मुक्ता वहति नोत वाहा न गर्गरेण मथ्यंति संप्रदाने अपध्वस्ता दस्युभूता भवंति येषां राष्ट्रे ब्राह्मणा वृत्तिहीनाः १८ ॥ ॥

राम०
५३४

६

नद्दृसत्यर्थः १७ गर्गरः दधि सुते लादि निपीड्नयंत्रं ये षां राष्ट्रे कृष्यादिहीनत्वात् दृष्टा राजानो इति शाक्यचाराश्च भवंतीत्यर्थः १८

न१

वेदपुराणेतिहासप्रमाणपान्नारायणसुरेवाङ्गताः सर्वात्मानः सर्वात्मानः सर्वकर्त्तारः सर्वभावाः स्वयम्बाह्मणास्या। तावत्संयमकाले हि तस्य वरप्रदस्य
देवदेवस्य ब्राह्मणाः प्रथमं प्रादुर्भूता ब्राह्मणो मुख्यविशेषा वर्णाः प्रादुर्भूताः। इत्थं च सुरासुरविशिष्टा ब्राह्मणा यत्र मया ब्रह्मभूतेन पुरा स्वयमेवो
त्पादिताः सुरासुरमहर्षयः भूतविशेषाः स्थापिता निगृहीताश्च ब्रह्मस्याधर्मेण निमित्तं हि गौतमाद्धरिश्मश्रुतामिन्द्रः प्राप्तः कौशिकनिमि
त्तं चेन्द्रो मुष्कवियोगं मेषवृषणत्वं चावाप अश्विनोर्ग्रहप्रतिषेधोद्यतवज्रस्य पुरंदरस्य च्यवनेन स्तम्भितो बाहुः क्रतुवधप्राप्तमन्युना च दक्षेण भूय
स्तपसा चात्मानं संयोज्य नेत्राकृतिरन्या ललाटे रुद्रस्योत्पादिता पुरवधार्थं दीक्षामुपगतस्य रुद्रस्य उशनसा जटाः शिरस उत्कृत्त्य प्रयुक्ताः ततः प्रा
दुर्भूता भुजगास्तैरस्य भुजगैः पीड्यमानः कण्ठो नीलतामुपगतः पूर्वे च मन्वन्तरे स्वायंभुवे नारायणहस्तग्रहणान्नीलकण्ठत्वमेव च। अमृतोत्पा
दनपुरश्चरणतामुपगतस्याङ्गिरसो बृहस्पतेरुपस्पृशतो न प्रसादं गतवत्यः किलापः अथ बृहस्पतिरपांचुक्रोध यस्मान्ममोपस्पृशतः कलु
षीभूता न च प्रसादमुपगतास्तस्मादद्यप्रभृति झषमकरकच्छपजन्तुभिः कलुषीभवतेति तदाप्रभृत्यापो यादोभिः संकीर्णाः संवृत्ताः। विश्व
रूपो हि वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्त्रीयोऽसुराणां स प्रत्यक्षं देवेभ्यो भागमददात् परोक्षमसुरेभ्यः अथ हिरण्यकशिपुं पुरस्कृत्य वि
श्वरूपमातरं स्वसारमसुरा वरमयाचन्त हे स्वसः अयं ते पुत्रस्त्वाष्ट्रो विश्वरूपस्त्रिशिरा देवानां पुरोहितः प्रत्यक्षं देवेभ्यो भागमददात् परोक्षमस्मा
कं ततो देवा वर्द्धन्ते वयं क्षीयामस्तदेनं त्वं वारयितुमर्हसि तथा यथास्मान् भजेदिति अथ विश्वरूपं नन्दनवनमुपगतं माता उवाच पुत्र किं प
रपक्षवर्द्धनस्त्वं मातुलपक्षं नाशयसि नार्हस्येवं कर्तुमिति। स विश्वरूपो मातुर्वाक्यमनतिक्रमणीयमिति मत्वा संपूज्य हिरण्यकशिपुमगा
त्। हैरण्यगर्भाच्च वसिष्ठाद्धिरण्यकशिपुः शापं प्राप्तवान्। यस्मात् त्वयान्यो वृतो होता तस्मादसमाप्तयज्ञस्त्वमपूर्वात् सत्त्वजाताद् वधं प्राप्स्य
सीति तच्छापदानाद्धिरण्यकशिपुः प्राप्तवान् वधं। अथ विश्वरूपो मातृपक्षवर्द्धनोऽत्यर्थं तपस्यभवत् तस्य व्रतभङ्गार्थमिन्द्रो बह्वीः श्रीमत्यो
ऽप्सरसो नियुयोज ताश्च दृष्ट्वा मनः क्षुभितं तस्याभवत् तासु चाप्सरःसु नचिरादेव सक्तोऽभवत् सक्तं चैनं ज्ञात्वाप्सरस ऊचुः गच्छामहे वयं यथा
गतमिति। ता त्वाष्ट्र उवाच क्व गमिष्यथ आस्यतां तावन्मया सह श्रेयो भविष्यतीति। तास्तमब्रुवन् वयं देवस्त्रियोऽप्सरसः इन्द्रं देवं वरदं पुराप्रभ

विष्णुं शरणमिच्छतीति। अथ तं विश्वरूपोऽब्रवीदृषे वैसंद्रो देवानामभविष्यतीति। ततो मंत्रानुज्जापयत्तमैत्रेर वर्द्धत त्रिशिराः एकनास्येन सर्वलोकेषु यथावृद्धि
जैः क्रियावशिष्यैर्न्येषु सुतं सोमं पपौ एकेनान्ये एकेनेसंद्रान्देवानेथ्रेस्तं विवर्द्धमानं सोमपानाप्यायितसर्वगात्रं दृष्ट्वा चिंतामापेदे सह देवै
ः ततो देवाः सेंद्रा ब्रह्माणमभिजग्मुः विश्वरूपेण सर्वयज्ञेषु सुतः। तः सोमः पीयते वयमभागाः संवृत्ताः असुरपक्षो वर्द्धते वयं क्षीयामः तदर्हसि
नो विधातुं श्रेयोऽनन्तरमिति तान्ब्रह्मोवाच ऋषिर्भार्गवस्तपस्तप्यते दधीचः स याच्यतां वरः स यथा कलेवरं जह्यात्तथा विधीयतां तस्यास्थि
भिर्वज्रं क्रियतामिति। ततो देवास्तत्रागच्छन्यत्र दधीचो भगवानृषिस्तपस्तेपे। सेंद्रा देवास्तं तथाभिगम्योचुर्भगवंस्तपः सुकुशलमविघ्नं चेति
तान्दधीच उवाच स्वागतं भवद्भ्यः उच्यतां किं क्रियतामिति। यद्ब्रूयथ तत्करिष्यामीति। ते तमब्रुवन् शरीरपरित्यागं लोकहितार्थं भगवान्कर्तुमर्हतीति
ति अथ दधीचस्तथैवाविमनाः सुखदुःखसमो महायोगी आत्मानं समाधाय शरीरपरित्यागं चकार तस्य परमात्मन्यवसृते तेतान्यस्थीनि धाता संगृ
ह्य वज्रमकरोत् तेन वज्रेणाभेद्येनाप्रधृष्येण ब्रह्मास्थिसंभूतेन विष्णुप्रविष्टेन इंद्रो विश्वरूपं जघान शिरसां चास्य छेदनमकरोत्। तस्मादनंतरं वि
श्वरूपगात्रमथनसंभवं त्वष्ट्रोत्पादितमेवारिं वृत्रमिंद्रो जघान तस्यां द्वैधीभूतायां ब्रह्मवध्यायां भयादिंद्रो देवराज्यं परित्यज्य अप्सु संभवां च
शीतलां मानससरो गतां नलिनीं प्रतिपेदे तत्र चैश्वर्ययोगादणुमात्रो भूत्वा बिसग्रंथिं प्रविवेश। अथ ब्रह्मवध्याभयप्रनष्टे त्रैलोक्यनाथे शचीपतौ
जगदनीश्वरं बभूव देवान्रजस्तमश्चाविवेश। मंत्रा न प्रावर्त्तंत महर्षीणां रक्षांसि प्रादुरभवन् ब्रह्म चोत्सादनं जगाम। अनिंद्राश्चाबला लोकाः सु
प्रधृष्या बभूवुः अथ देवा ऋषयश्चायुषः पुत्रं नहुषं नाम देवराज्येऽभिषिषिचुः नहुषः पंचभिः शतैर्ज्योतिषां ललाटे ज्वलद्भिः सर्वभूततेजोहरैस्त्रि
विष्टपं पालयां बभूव। अथ लोकाः प्रकृतिमापेदिरे। स्वस्थाश्च हृष्टाश्च बभूवुः अथोवाच नहुषः सर्वं मां शक्रोपभुक्तमुपस्थितं ऋते शचीमिति स
एवमुक्त्वा शचीसमीपमगमत् उवाच चैनां सुभगे हमिंद्रो देवानामभजस्व मामिति तं शची प्रत्युवाच प्रकृत्या त्वं धर्मवत्सलः सोमवंशोद्भवश्च नार्हसि
परपत्नीधर्षणं कर्तुमिति। तामथोवाच नहुषः ऐंद्रं पदमध्यास्यते मया। अहमिंद्रस्य राज्यरत्नहरो नात्राधर्मः कश्चित्त्वमिंद्रोपभुक्तेति सा त
मुवाचास्ति मम किंचिद्व्रतमपर्यवसितं तस्यावभृथे त्वामुपगमिष्यामि कैश्चिदेवाहोभिरिति। स शच्यैवमभिहितो जगाम। अथ शची दुःखशोकार्त्ता भ

येनत्वमंशं ज्ञात्वा बृहस्पतिरुवाच अनेनैव व्रतेन तपसा चान्विता देवीं वरदामुपश्रुतिमाह्वय तदा सा ते इन्द्रं दर्शयिष्यतीति। सा च महानियमस्थिता देवीं वरदामुपश्रु- ४४
तिं मंत्रैराह्वयति। सोपश्रुतिः शचीसमीपमगात् उवाच चैनां प्रियमस्मीति त्वया हूतोपस्थिता किं ते प्रियं करवाणीति तां मूर्ध्ना प्रणम्योवाच शची भगवत्यर्हसि मे भर्तारं ४५
दर्शयितुं त्वं सत्या ऋता चेति सैनां मानससरो नयत्। तत्रेन्द्रं बिसग्रंथिगतमदर्शयत्। तामथ पत्नीं कृशां ग्लानां चेन्द्रो दृष्ट्वा चिन्तयाबभूव। अहो मम दुःखमिदमुप-
गतं नष्टं हि मामियमन्विष्योपागमद्दुःखार्तेति तामिन्द्र उवाच कथं वर्तयसीति सा तमुवाच नहुषो मामाह्वयति। पत्नीं कर्तुं कालश्चास्य मया कृत इति। ता-
मिन्द्र उवाच। गच्छ नहुषमल्पपापाचारः। अपूर्वेणामामृषियुक्तेन यानेन त्वमधिरूढ उद्वहस्वेति। इन्द्रस्य महान्ति वाहनानि सन्ति मनःप्रियाण्यधिरूढानि मया त्वमने- ४६
नोपयातुमर्हसीति। सैवमुक्ता हृष्टा जगाम। इन्द्रो बिसग्रंथिमेवाविवेश भूयः। अथेन्द्राणीमभ्यागतां दृष्ट्वा तामुवाच नहुषः सकाल इति। तं शच्यब्रवीच्छक्रेण यथ- ४७
योक्तं। स महर्षियुक्तं वाहनमधिरूढः शचीसमीपमुपागच्छत्। अथ मैत्रावरुणिः कुंभयोनिरगस्त्य ऋषिवरो महर्षीन्धिक्क्रियमाणांस्तान्नहुषेणापश्यत् ४८
।पद्भ्यां च तमस्पृशत्। ततः स नहुषमब्रवीत्। अकार्यप्रवृत्त पापपत त्वं महीं सर्पो भव यावद्भूमिर्गिरयश्च तिष्ठेयुस्तावदिति। स महर्षिवाक्यसमकालमेव ४९
तस्माद्यानादवापतत्। अथानिन्द्रं पुनस्त्रैलोक्यमभवत्। ततो देवा ऋषयश्च भगवन्तं विष्णुं शरणमिन्द्रार्थेऽभिजग्मुः। ऊचुश्चैनं भगवन्निन्द्रं ब्रह्महत्याभिभूतं त्रा- ५०
तुमर्हसीति। ततः स वरदस्तानब्रवीत्। अश्वमेधं यज्ञं वैष्णवं शक्रोऽभियजतां ततः स्वस्थानं प्राप्स्यतीति। ततो देवा ऋषयश्चेन्द्रं नापश्यन्यदा तदा शचीमूचुः।
गच्छ सुभगे इन्द्रमानयस्वेति। सा पुनस्तत्सरः समभ्यगच्छदिन्द्रश्च तस्मात्सरसः समुत्थाय बृहस्पतिमभिजगाम। बृहस्पतिश्चाश्वमेधं महाक्रतुं शक्रायाह- ५१
रत्। तत्र कृष्णसारंगं मेध्यमश्वमुत्सृज्य वाहनं तमेव कृत्वा इन्द्रं मरुत्पतिं बृहस्पतिः स्वस्थानं प्रापयामास। ततः स देवराट् देवैर्ऋषिभिः स्तूयमानस्त्रिवि- ५२
ष्टपस्थो व्यपगतकल्मषो बभूव ब्रह्मवध्यां च तुर्षु स्थानेषु वनितान्निवनस्पतिगोषु व्यभजत्। एवमिन्द्रो ब्रह्मतेजःप्रभावोपबृंहितः शत्रुवधं कृत्वा स्वस्थानं प्रा- ५३

५४ पितः आकाशगंगागतस्तत्पुरा भारद्वाजो महर्षिरुपास्पृशत्। त्रीन्क्रमान्क्रमता विष्णुनाभ्यासादितः स भरद्वाजेन सलिलमजलेन पाणिनोद्धरिषतादि-
५५ तः सलक्ष्मणेन रक्षः संवृत्तः भृगुणा महर्षिणा शप्तोऽग्निः सर्वभक्षत्वमुपानीतः अदितिर्वै देवानामन्नमपचत्। एतद्भुक्त्वासुरान्हनिष्यंतीति। तत्रा-
५६ बुधो व्रतचर्यासमाप्तावागच्छददितिं चावोचद्भिक्षां देहीति तत्र देवैः पूर्वमेतत्प्राशयत्वान्यैनेत्यदितिर्भिक्षां नादात्। अथ भिक्षाप्रत्याख्यानरुषि-
५७ तेन बुधेन अदितिः शप्ता अदितेरुदरे भविष्यति व्यथा विवस्वतो द्वितीयजन्मनि अंडसंज्ञितस्य चांडमातुरदित्याः स्मारितः स मार्तंडो विव-
५८ स्वानभवद्धाद्देवः दक्षस्य या वै दुहितरः षष्टिरासन्। ताभ्यः कश्यपाय त्रयोदश प्रादात्। दशधर्माय दशमनवे सप्तविंशतिमिंदवे। तासु तुल्या- ५९
सु नक्षत्रास्वागतासु सोमो रोहिण्यामभ्यधिकं प्रीतिमानभूत्। ततस्ताः शिष्टाः पत्न्य ईर्ष्यावश्याः पितुः समीपं गत्वा इममर्थं शशंसुः भगवन्नस्मा- ६०
सु तुल्यप्रभावासु सोमो रोहिण्यां प्रत्यधिकं भजतीति। सोऽब्रवीद्यक्ष्मैनमाविशत्विति। दक्षशापात्सोमराजानं यक्ष्माविवेश स यक्ष्मणाविष्टो दक्षम- ६१
गमद्दक्षश्चैनमब्रवीत् न समं वर्तयसीति तत्र श्रेयः सोममब्रुवन् क्षीयसे यक्ष्मणा पश्चिमस्यां दिशि समुद्रे हिरण्यसरस्तीर्थं गत्वा आत्मानमभि-
षेचयस्वेति। अथागच्छत्सोमस्तत्र हिरण्यसरस्तीर्थं गत्वा चात्मनः सेचनमकरोत्। स्नात्वा चात्मानं पाप्मनो मोक्षयामास॥ ॥ ॥ ॥ ॥

तत्रचावभासितस्तीर्थेयत्रसोमस्तत्रप्रभृतिचतीर्थेतस्यभासमितिनाम्नाख्यातंबभूव।तच्छायापिस्थापितसोमः अमावास्यांतरास्थः पौर्णमासीमात्रेधिष्ठितः
मेघलेखाप्रतिच्छन्नेवपुरेंदुश्शशितिमेघसदृशंवर्णमगमत्तदस्यशशलक्ष्मविमलमभवत् स्थूलशिरामहर्षिर्मेरोः प्रागुत्तरेशिखरविभागेतपस्तेपेततस्तस्यतत

ध्ववृहः सुचिर्वायुर्विवायमानः शरीरमस्पृशत् सतपसातापितशरीरः कृशोवायुनोपवीज्यमानोहृदयेपरितोषमगमत्
तत्रकिलतस्यानिलव्यजनकृतपरितोषस्यसद्योवनस्पतयः पुष्पशोभांनदर्शितवंतइति सएतानशशापनसर्वकालंपुष्प
वंतोभविष्यथेति नारायणोलोकहितार्थंवडवामुखोनामपुराणमहर्षिर्बभूवतस्यमेरौतपस्तप्यतः समुद्रआहूतोनागतस्ते
नामर्षिणेतिनात्मगात्रोष्मणासमुद्रस्तिमितजलः कृतः स्वेदप्रस्यंदनसदृशश्चास्यलवणभावोजनितः उक्तश्चाप्यपेयोभ
विष्यसितच्चतेतोयंवडवामुखसंज्ञितेनपीयमानंमधुरंभविष्यति तदेतदद्यापिवडवामुखसंज्ञितेनानुवर्तिनातोयं
समुद्रात्पीयतेहिमवतोगिरेर्दुहितरमुमांकन्यांरुद्रश्चकामेभृगुरपिचमहर्षिर्हिमवंतमागत्याब्रवीत् कन्यामिमांमेदेहि
तितमब्रवीद्धिमवानभिलक्षितोवरोरुद्रइति।तमब्रवीद्भृगुर्यस्मात्त्वयाहंकन्यावरणकृतभावः प्रत्याख्यातस्तस्मान्नरत्ना
नांभवानभाजनंभविष्यतीति अथयमत्येतदवस्थितमृषिवचनंतदेवंविधंमाहात्म्यंब्राह्मणानां ६२ क्षत्रमपिचब्रा
ह्मणप्रसादादेवशाश्वतीमव्ययांचपृथिवीपत्नीमभिगम्यबुभुजे तदेतद्ब्रह्माग्नीषोमीयंतेनजगद्धार्यते ६४ ॥ ॥

पत्यमानस्यसर्वेगांमूलं।ब्राह्मणमाहात्म्यकथनपरोग्रंथःसप्तार्थः ६२ क्षत्रियमाहात्म्यमप्याहक्षत्रमपिचेति ६३ उपसंहरतितदेतदितियदे
तद्ब्रह्मक्षत्रगतंतेजोऽग्नीषोमीयंअन्तस्तेनैवैतज्जसाजगद्धार्यतेऽतोजगदप्यग्नीषोमीयमित्यर्थः ६५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सूर्याचंद्रमसोग्नीषोमौ चक्षुः परमेश्वरे नेत्राभ्यामुत्पन्नत्वात् केशाः अंशवः किरणाः बोधयन् चंद्रः तापयन् सूर्यः तौ जगत् हर्षयतः यस्मात्तस्मा
त्तौ हृषी हृष्यते रनेन स्मरगुपधान्नकिदितिकित्वं अनुक्रममामः हृषी अग्नीषोमौ केशौ अंशरूपौ यस्यासौ हृषीकेश इत्यर्थः ६५ हरिनामनिर्वक्ति।
इलेति इलोपहूतास हृदि वेत्सारिमंत्रेणाहूतो हंतद्योगात्पत्नभागं हरे हरणां कुर्वे तो हं हरिरित्यर्थः वर्णश्च हरिः हरिन्मणितुल्यः तस्माद्धरिरिति ६६

उच्येते सूर्याचंद्रमसौ चक्षुः केशाश्चैवांशवः स्मृताः बोधयंस्तापयंश्चैव जगदुत्तिष्ठते पृथक् बोधनात्तापनाच्चैव जगतो ह
र्षणं भवेत् अग्नीषोमकृतैरेभिः कर्मभिः पांडुनंदन हृषीकेशोहमीशानो वरदो लोकभावनः ६५ इलोपहूतयोगेन।
हरे भागं क्रतुष्वहं वर्णश्च मे हरिः श्रेष्ठस्तस्माद्धरिरहं स्मृतः ६६ धाम सारो हि भूतानामृतं चैव विचारितं ऋतधामा
ततो विप्रैः सद्यश्चाहं प्रकीर्तितः ६७ नष्टां च धरणीं पूर्वमविंदं वै गुहागतां गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुतः ६८
शिपिविष्टेति चाख्यायां हीनरोमा च यो भवेत् तेनाविष्टं तु यत्किंचिच्छिपिविष्टेति च स्मृतः ६९ यास्को मामृषिरव्यग्रो
नैकयज्ञेषु गीतवान् शिपिविष्ट इति ह्यस्माद्गुह्यनामधरो ह्यहं ७० ॥ ॥ ॥ ॥ ॥ ॥

ऋतधामशब्दं निर्वक्ति। धामशब्दो लोकसारवाची ऋतमबाधितं धाम सत्तास्फूर्तिरूपं यस्य स ऋतधामेत्यर्थः ६७ नष्टां जले मग्नां गां धरणीं विं
दतिलभत इति गोविंद इत्यर्थः ६८ हीनानि सन्ति निरोमाणी वेरोमाणि अंशवः अवयवाः येन स शिपिर्निष्कल इत्यर्थः तेन शिपिना रूपेण
यत्किंचिन्नश्वाविष्टं येन असौ शिपिविष्ट इत्यर्थः ६९ ७० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्प३

अधीनस्यैवेदं हरणेवत्तायांपातोलैः नहिज्ञे ७१ अज्ञशब्दं निवृक्तिनहीति ७२ नोक्तेतिसत्यभाषित्वात् ७३ पृथिव्यग्नेर्जासिस्तत्तवाय्वाकाशैस्सत
तदुभयात्मत्वाद्दासस्तनामाहमित्यर्थः पौष्करेमन्त्राभिकमेलो [illegible] ७४ सतेनतायश्चेपालयतेवासत्वो नेनोतिविस्तारयति। सत्वेमस्सस्मिन्निति
सत्वतः सत्वपूर्वकेर्मेवसर्वं कर्माचरतीतिसत्वतः तारक्षेतानपालनयोस्तनुविस्तारेअर्थयोःसत्वशब्दपूर्वाभ्यांः तः पर्वमहत्याभिस्यत्रअंक्तोमत

स्कृत्वामांशिपिविष्टेतियास्कऋषिरुदारधीः मत्प्रसादाद्दधोनष्टंनिरुक्तमभिजग्मिवान् ७१ नहिजातोनजायेयंनजनिष्यक
दाचन क्षेत्रज्ञः सर्वभूतानांतस्मादहमजः स्मृतः ७२ नोक्तपूर्वंमयाक्षुद्रमश्लीलंवाकदाचन आसाब्रह्मसुतासामेसत्यादे
वीसरस्वती ७३ सच्चासच्चैवकौंतेयमय्यावेशितमात्मनि पौष्करेब्रह्मसदनेसत्यंमामृषयोविदुः ७४ सत्वान्नच्युतपूर्वोहंस
त्वंवैविद्धिमत्कृतं जन्मनीहाभवत्सत्वंपौर्विकंमेधनंजय ७५ निराशीः कर्मसंयुक्तः सत्वतश्चाप्यकल्मषः सात्वतज्ञानद
ष्टोहंसत्वतामितिसात्वतः ७६ कृषामिमेदिनींपार्थभूत्वाकार्ष्णायसोमहान् कृष्णोवर्णश्चमेयस्मात्तस्मात्कृष्णोहमर्जुन
७७ ॥ ॥ ॥ ॥ ॥

स्प१

थीयः तं प्रयोवाकुलकान्मस्तशब्दाद्दीपा अनेनतद्विंतानानुकरणेमेवप्रानिपरिकीसत्वब्रह्मनतंस्तः सर्वज्ञः। आर्षभत्वंतेषामिदंतत्वंसात्वतं। पांचरात्रा
दितज्ञानदृष्टेनेनदृष्टोहंसात्वतः सत्वतएवसात्वतेनावतभिप्रेत्साहसत्वादिति ७५ निराशीः कर्मनिष्कामकर्म ७६ कृषामीति। कृष्णायसोलांगल
कालरूपी ७७ ॥ ॥ ॥ ॥ ॥ ॥

मो०
५३९

535

विशाखः पक्षिवाचीव्योमचारित्वसामान्यात्वायुस्तेजसोः मेघरूपावस्थत्वंकुः पृथ्वीठशब्दआकाशवचनः एतेषांसमा[illegible]रोविकुंठंचरणोगमेनविकुंठशब्द
सन्नः विकुंठनामसंश्लेषणकर्तावैकुंठइत्यभिसंधायाहमस्येति। विगताकुंठायंवानांभूतानांमेलनेअसामर्थ्यंयस्मात् विकुंठः स्वार्थेतद्धितः इतिसंक्षेपा
र्थः ७८ अधरस्तिपृथिवीअस्याधोरक्षनौक्षः आकाशः तेउभेसंजपतिसंगेनधारयतीतिअधोक्षजःस्मादृपृथिवीति। अधोक्ष[illegible] पूर्वोक्तेःकः

अनिदितामितिन
कारलोपः ३

मयासंश्लेषिताभूमिरद्भिर्व्योमचवायुना वायुश्चतेजसासार्द्धंवैकुंठत्वंततोमम ७८ निर्वाणंपरमंब्रह्मधर्मोसौपरउच्यते त
स्मान्नच्युतपूर्वोहमच्युतस्तेनकर्मणा ७९ पृथिवीनभसीचोभेविश्रुतेविश्वतोमुखे तयोःसंधारणार्थंहिमामधोक्षजमंजसा
८० निरुक्तंवेदविदुषोयेचशब्दार्थचिंतकाः तेमांगायंतिप्राग्वंशेअधोक्षजइतिस्थितिः ८१ शब्दएकपदैरेषव्याहृतःपरम
र्षिभिः नान्योह्यधोक्षजोलोकेऋतेनारायणंप्रभुं ८२ घृतंममार्चिषोलोकेजंतूनांप्राणधारणं घृतार्चिरहमव्यग्रैर्वेद
ज्ञैः परिकीर्तितः ८३ ॥ ॥ ॥ ॥

८० निर्वचनांतरमाहनिरुक्तमितिएकपदैः पृथक्पदैः प्राग्वंशेयज्ञशालैकदेशे अश्नातिसततंगच्छत्यस्मिन्नितिअक्षः अतसातत्यगमने स्मादुःधोक्षः
उत्पत्तिरेवः स्मात्तेजोगाद्धिकः सगुणाभवभावोजायते स्मात्सर्वमितिजः जगत्त्रयस्थितिजन्मस्थानमित्यर्थः ८२ ममवह्निस्वरूपस्यार्चिषोवर्द्ध
कमितिशेषः ८३ ॥ ॥ ॥ ॥ ॥

शां०
५३९

त्रयोधातवउणधिमृताः संत्यस्मस्त्रिधातुः ८७ विभुपदंख्याचेष्टः नचादिर्नितिति ९० चीर्णि ककुदानिउच्चणेरेशास्कंधयोत्त्रयं ह्यायस्त्रिककुदः शरीरस्यति
सामानाधिकरणंच ९१ विरोधेणारित्ताक्रितस्त्वांनापरिसंख्यानारंभप्रविलयंकरोतीतिविरिंचद्रस्यर्थः रेचनादितिपारेरेचनद्वारातन्माध्यंचेतनमेवलस्स

त्रयोहिधातवः ख्याताः कर्मजाइतिचस्मृताः पित्तंश्लेष्माचवायुश्चएषसंघातउच्यते ८४ एतैश्चधार्यतेजंतुरेतैःक्षीणैश्चक्षी
यतेआयुर्वेदविदस्तस्मात्त्रिधातुंमांप्रचक्षते ८५ वृषोहिभगवान्धर्मः ख्यातोलोकेषुभारत नैघंटुकपदाख्यानेविद्धिमांवृ
षमुत्तमं ८६ कपिर्वराहः श्रेष्ठश्चधर्मश्चवृषउच्यते तस्माद्वृषाकपिंप्राहकश्यपोमांप्रजापतिः ८७ नचादिंनमध्यंतथा
चैवनांतंकदाचिद्विदंतेसुराश्चासुराश्च अनाद्योह्यमध्यस्तथाचाप्यनंतः प्रगीतोहमीशोविभुर्लोकसाक्षी ८८ शुचीनिश्र
वणीयानिशृणोमीहधनंजय नचपापानिगृह्णामिततोहंवैशुचिश्रवाः ८९ एकशृंगः पुराभूत्वावराहोदिव्यदर्शनः इ
मांचोद्धृतवान्भूमिमेकशृंगस्ततोह्यहं ९० तथैवासंत्रिककुदोवाराहंरूपमास्थितः त्रिककुत्तेनविख्यातः शरीरस्यमा
मापनात् ९१ विरिंचइतियःप्रोक्तःकापिलज्ञानचिंतकैः सप्रजापतिरेवाहंचेतनात्सर्वलोककृत् ९२ विद्यासहायवं
तंमामादित्यस्थंसनातनं कपिलंप्राहुराचार्याः सांख्यानिश्चितनिश्चयाः ९३ ॥ ॥ ॥ ॥ ॥ ॥

णीयं ९२ कपिलंपीतंआदित्यपुरुषंप्रकृतसंछोदोगेष्वाम्राणवान्सर्वस्यवसुवर्णशितिष्कोतेः ९३ ॥ ॥ ॥ ॥ ॥।

छंदांसि समष्टिलिंगाभिमानी सत्रात्मा भुवि चतुर्मुखः ९९ क्रमविभागः पदद्वयमादाय पूर्वं विसृज्य उत्तरमुत्तरेण सह ध्यानं यथा अग्निमीळे ईळे पुरोहितं
यज्ञस्य इत्यादिः अक्षरविभागः पदविभागः १०० वामेति वामदेवादिर्दृष्टेन ध्यानमार्गेण मामाराध्य पणायाचालेन मुनिना १ कंडरीक इति कुलनाम

पे२

हिरण्यगर्भो द्युतिमान्यस्य छंदांसि सूक्तजः योगैः संपूज्यते नित्यं स एवाहं भुवि स्मृतः ९४ एकविंशतिसाहस्रं ऋग्वेदं मा
प्रचक्षते सहस्रशाखं यत्साम ये वै वेदविदो जनाः ९५ गायंत्यारण्यके विप्रा मंद्रक्रोसि हि दुर्लभाः षट्पंचाशतमष्टौ च स
प्तत्रिंशतमिति स्मृतं ९६ यस्मिंश्छाखा यजुर्वेदे सोहं साध्वर्यवे स्मृतः पंचकल्पमथर्वाणं कल्पाभिः परिबृंहितं ९७
कल्पयंति हि मां विप्रा अथर्वाणविदस्तथा शाखाभेदाश्च ये केचिद्याश्च शाखासु गीतयः ९८ स्वरवर्णसमुच्चाराः स
र्वांस्तान्विद्धि मत्कृतान् यत्तद्धयशिरः पार्थ समुदेति वरप्रदं ९९ सोहमेवोत्तरे भागे क्रमाक्षरविभागवित् वाममोर्द वा४
शितमार्गेण मत्प्रसादान्महात्मना पांचालेन क्रमः प्राप्तस्तस्माद्भूतात्सनातनात् १०१ बाभ्रव्यगोत्रः स च भो प्रथ
मं क्रमपारगः नारायणाद्वरं लब्ध्वा प्राप्य योगमनुत्तमं २ क्रमं प्रणीय शिक्षां च प्रणयित्वा स गालवः कंडरीकोथ
राजा च ब्रह्मदत्तः प्रतापवान् ३ जातीमरणजं दुःखं स्मृत्वा स्मृत्वा पुनः पुनः सप्तजातिषु मुख्यत्वाद्योगानां संपदं गत
५

२ साप्तजन्मिकं जन्मादि दुःखं स्मृत्वा तीव्रतमवैराग्यात् शीघ्रं योगिनां संपदं ऐश्वर्यं गतः प्राप्तः ४ ॥ ॥ ॥ ॥ ॥

६ अपाहरत् [illegible]नाशितवान् रुद्र इति शेषः ७ शूलं कं तं आवयोर्नरनारायणयोरंतिकात् आगच्छत् आगतं ८ तत्तेजसा स्वलेन तेजसा १० एनं समुद्

पुराहमात्मजः पार्थ प्रथितः कारणांतरे धर्मस्य कुरुशार्दूल ततोहं धर्मजः स्मृतः ५ नरनारायणौ पूर्वं तपस्तेपतुरव्ययं धर्मया-
नं समारूढौ पर्वते गंधमादने ६ तत्कालसमये चैव दक्षयज्ञो बभूव ह नचैवाकल्पयद्भागं दक्षो रुद्रस्य भारत ७ ततो दधी-
चिवचनाद्दक्षयज्ञमपाहरत् ससर्ज शूलं कोपेन प्रज्वलंतं मुहुर्मुहुः ८ तच्छूलं भस्मसात्कृत्वा दक्षयज्ञं सविस्तरं आवयोः सह-
सागच्छद्बदर्याश्रममंतिकात् ९ वेगेन महता पार्थ पतन्नारायणोरसि ततः स्वतेजसाविष्टाः केशा नारायणस्य ह
१० ब[illegible]भूवुर्मुंजवर्णास्तु ततोहं मुंजकेशवान् तच्च शूलं विनिर्धूतं हुंकारेण महात्मना जगाम शंकरकरं नारायणसमा-
हतं अथ रुद्र उपाधावत्तावृषी तपसान्वितौ ११ तत एनं समुद्धूतं कंठे जग्राह पाणिना नारायणः स विश्वात्मा तेनास्य शि-
तिकंठता १२ अथ रुद्रविघातार्थमिषीकां नर उद्धरन् मंत्रैश्च संयुयोजाशु सोभवत्परशुर्महान् १३ क्षिप्तश्च सहसा तेन खंड-
नं प्राप्तवांस्तदा ततोहं खंडपरशुः स्मृतः परशुखंडनात् १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तमुड्डीयागतं रुद्रं शितिकंठता कृष्णवर्णस्य नारायणस्यांत बंधात् नीलकंठत्वं रुद्रे आगतमित्यर्थः १२ इषीकैव परशुतां प्राप्ता १३ क्षिप्तः आक्षिप्तः तेन नरेण रुद्रं प्र
लेन रुद्रेणवा रुद्रस्य खंडपरशुत्वप्रसिद्धिः कामदहनमखादिस्यर्थः १४ ॥ ॥

मो०
५४१

541

अर्जुनउवाच अस्मिन्युद्धेतुवार्ष्णेयत्रैलोक्यशमनेतदा कोजयंप्राप्तवांस्तत्रशंसैतन्मेजनार्दन १५ श्रीभगवानुवाच तयोःसंलग्नयोर्यु
द्धेरुद्रनारायणात्मनोः उद्विग्नाःसहसाकृत्स्नाःसर्वेलोकास्तदाभवन् १६ नागृह्णात्पावकःशुभ्रंमखेषुसुहुतंहविः वेदानप्रतिभांति
स्मऋषीणांभावितात्मनां १७ देवान्रजस्तमश्चैवसमाविविशतुस्तदा वसुधासंचचकंपेचनभश्चविपफालह १८ निष्प्रभाणिचते
जांसिब्रह्माचैवासनच्युतः अगाच्छोषंसमुद्रश्चहिमवांश्चव्यशीर्यत १९ तस्मिन्नेवंसमुत्पन्नेनिमित्तेपांडुनंदन ब्रह्मावृतोदेवगणै
ऋषिभिश्चमहात्मभिः २० आजगामाशुतंदेशंयत्रयुद्धमवर्तत सोंजलिप्रग्रहोभूत्वाचतुर्वक्त्रोनिरुक्तगः २१ उवाचवचनंरु
द्रंलोकानामस्तुवैशिवं न्यस्यायुधानिविश्वेशजगतोहितकाम्यया २२ यदक्षरमथाव्यक्तमीशंलोकस्यभावनं कूटस्थंकर्तृ
निर्द्वंद्वमकर्तेतिचयंविदुः २३ व्यक्तिभावगतस्यास्यएकामूर्तिरियंशुभा नरोनारायणश्चैवजातौधर्मकुलोद्वहौ २४ त
पसामहतायुक्तौदेवश्रेष्ठौमहाव्रतौ अहंप्रसादजस्तस्यकुतश्चित्कारणांतरे २५ त्वंचैवक्रोधजस्तातपूर्वसर्गेसनातनेः मयाच
सार्द्धंवरदंविबुधैश्चमहर्षिभिः २६ प्रसादयाशुलोकानांशांतिर्भवतुमाचिरं ब्रह्मणात्वेवमुक्तस्तुरुद्रःक्रोधाग्निमुत्सृजन्
२७ प्रसादयामासततोदेवंनारायणंप्रभुं शरणंचजगामाद्यंवरेण्यंवरदंप्रभुं २८ ततोथवरदोदेवोजितक्रोधोजितेंद्रि
यः प्रीतिमानभवत्तत्ररुद्रेणसहसंगतः २९ ऋषिभिर्ब्रह्मणाचैवविबुधैश्चसुपूजितः उवाचदेवमीशानमीशःसजग

एम०
५४१

[illegible]नोहरिः ३० यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु नावयोरंतरं किंचिन्मा
ते भूद्बुद्धिरतोन्यथा ३१ अद्यप्रभृति श्रीवत्सः शूलांको मे भवत्वयं ममपाण्यंकितश्चापि श्रीकंठस्त्वं भविष्यति ३२ श्रीभगवानुवाच एवं ल
क्षणमुत्पाद्य परस्परकृतं तदा सख्यं चैवातुलं रुद्रेण सहितावृषी ३३ तपस्तेपतुरव्यग्रौ विसृज्य त्रिदिवौकसः एष ते कथितः पार्थ
नारायणजयो मृधे ३४ नामानि चैव गुह्यानि निरुक्तानि च भारत ऋषिभिः कथितानीह यानि संकीर्तितानि ते ३५ एवं बहुविधैरूपैश्च
रामीह वसुंधरां ब्रह्मलोकं च कौंतेय गोलोकं च सनातनं ३६ मया त्वं रक्षितो युद्धे महांतं प्राप्तवान्जयं यस्तु ते सोग्रतो याति युद्धे संप्रत्युपस्थि
ते ३७ तं विद्धि रुद्रं कौंतेय देवदेवं कपर्दिनं कालः स एव कथितः क्रोधजेति मया तव ३८ निहतांस्तेन वै पूर्वं हतवानसि यान्रिपून् अप्र
मेयप्रभावं तं देवदेवमुमापतिं नमस्व देवं प्रयतो विश्वेशं हरमक्षयं ३९ यश्च ते कथितः पूर्वं क्रोधजेति पुनः पुनः तस्य प्रभावमे
वाग्रे यच्छ्रुतं ते धनंजय १४० शांतौ मोक्षधर्मेषु नारायणीये शौनक उवाच सौते सुमहदाख्यानं भवता परिकीर्तितं यच्छ्रुत्वा मुनयः
सर्वे विस्मयं परमं गताः १ सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनं न तथा फलदं सौते नारायणकथा यथा २ पावितांगाः स्म संवृत्ताः
: श्रुत्वेमामादितः कथां नारायणाश्रयां पुण्यां सर्वपापप्रमोचनीं ३ : ॥ ३॥ ३॥ ॥ ॥ ॥ ॥

मो०
५४२

542

ददर्शभगवान्देवः सर्वलोकनमस्कृतः सनन्दनैः सुरैः कृत्स्नैरन्यैश्चैवमहर्षिभिः ४ दृष्ट्वा[illegible]न्नारदोयत्तुदेवंनारायणंह
रिं नूनमेतद्ध्यनुमतंतस्यदेवस्यतत्त्वत ५ पदृष्टवानजगन्नाथमनिरुद्धंतनौस्थितं यस्माद्धवसुनर्भूयोनारदोदेवसत्तमो नरना
रायणौगद्रष्टुंकारणंतद्ब्रवीहिमे ६ सू[illegible]तउवाच तस्मिन्यज्ञेवर्त्तमानेराज्ञः पारिक्षितस्यवै कर्मान्तरेषुविधिवद्वर्त्तमानेषुशौनक
७ कृष्णद्वैपायनंव्यासमृषिंवेदनिधिंप्रभु परिपप्रच्छराजेन्द्रः पितामहपितामहं ८ जनमेजयउवाच श्वेतद्वीपान्निवृत्तेन[illegible]
नारदेनसुरर्षिणा ध्यायताभगवद्वाक्यंचेष्टितंकिमतः परं ९ बदर्याश्रममागम्यसमागम्यचतावृषी कियन्तंकालमवसत्
कांकथांपृष्टवांश्चसः १० इदंशतसहस्राद्धिभारताख्यानविस्तरात् आमथ्यमतिमन्थेनज्ञानोदधिमनुत्तमं ११ ११

राम०
५४२

नवनीतंयथादध्नोमलयाच्चंदनंयथा आरण्यकंचवेदेभ्यश्चौषधिभ्योमृतंयथा १२ समुद्धृतमिदंब्रह्मन्कथामृतमिदंतथा तपोनिधे
त्वयोक्तंहिनारायणकथाश्रये १३ सएषभगवान्देवः सर्वभूतात्मभावनः अहोनारायणंतेजोदुर्दर्शंद्विजसत्तम १४ यत्राविश
न्तिकल्पांतेसर्वेब्रह्मादयःसुराः ऋषयश्चसगंधर्वायच्चकिंचिच्चराचरं १५ नततोस्तिपरंमन्येपावनंदिविचेहच सर्वाश्रमाभिगम
नंसर्वतीर्थावगाहनं १६ नतथाफलदंचापिनारायणकथायथा सर्वथापाविताःस्मेहश्रुत्वेमामादितःकथां १७ हरेर्विश्वेश्व
रस्येहसर्वपापप्रणाशनीं नचित्रंकृतवांस्तत्रयदार्योमेधनंजयः १८ वासुदेवसहायोयःप्राप्तवान्जयमुत्तमं नचास्यकिंचिद
प्राप्यंमन्येलोकेष्वपित्रिषु १९ त्रैलोक्यनाथोविष्णुःसयस्यासीत्सत्यकृत्सखे धन्याश्चसर्वएवासन्ब्रह्मंस्तेममपूर्वजाः २०
हितायश्रेयसेचैवयेषामासीज्जनार्दनः तपसाप्यसुदर्शोहिभगवान्लोकपूजितः २१ यंदृष्टवंतस्तेसाक्षाच्छ्रीवत्सांकविभूष
णं तेभ्योधन्यतरश्चैवनारदःपरमेष्ठिजः २२ नचाल्पतेजसमृषिंवेद्मिनारदमव्ययं श्वेतद्वीपंसमासाद्ययेनदृष्टःस्वयंहरिः २३
देवप्रसादानुगतंव्यक्तंतत्तस्यदर्शनं यद्दृष्टवांस्तदादेवमनिरुद्धतनौस्थितं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०
५४३

5 43

३४ जालपादाहंसास्यदंकितभुजौहंसपदांकितभुजौ। चक्रांकितपादौ ३५ ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कान२

बदरीमाश्रमंयत्तुनारदः प्राद्रवत्पुनः नरनारायणौद्रष्टुंकिंतुतत्कारणंमुने २५ श्वेतद्वीपान्निवृत्तश्चनारदः परमेष्ठिजः
बदरीमाश्रमंप्राप्यसमागम्यचतावृषी २६ कियंतंकालमवसत्प्रश्नान्पृष्टवांश्चह श्वेतद्वीपादुपावृत्तेतस्मिन्वासुमहा
त्मनि २७ किमब्रूतांमहात्मानौनरनारायणावृषी तदेतन्मेयथातत्त्वंसर्वमाख्यातुमर्हसि २८ वैशंपायनउवाच नमो
भगवतेतस्मैव्यासायामिततेजसे यस्यप्रसादाद्वक्ष्यामिनारायणकथामिमां २९ प्राप्यश्वेतंमहाद्वीपंदृष्ट्वाचहरिमव्ययं।
निवृत्तोनारदोराजंस्तरसामेरुमागमत ३० हृदयेनोद्वहन्भारंयदुक्तंपरमात्मना पश्चादस्याभवद्राजन्नात्मनः साध्व
संमहत ३१ यद्गत्वादूरमध्वानंक्षेमीपुनरिहागतः मेरोःप्रचक्रामततः पर्वतंगंधमादनं ३२ निपपातचखात्तूर्णंविशालां
बदरीमनु ततः सददृशेदेवौपुराणावृषिसत्तमौ ३४ तपश्चरंतौसुमहदात्मनिष्ठौमहाव्रतौ तेजसाभ्यधिकौसूर्यात्सर्व
लोकविरोचनात् श्रीवत्सलक्षणौपूज्यौजटामंडलधारिणौ जालपादभुजौतौतुपादयोश्चक्रलक्षणौ व्यूढोरस्कौदीर्घ
भुजौतथामुष्कचतुष्किणौ ३५ षष्टिदंतावष्टदंष्ट्रौमेघौघसदृशस्वनौ स्वास्यौपृथुललाटौचसुभ्रूसुहनुनासिकौ ३६

शां०
५४३

आतपत्रेणसदृशेशिरसीदेवयोस्तयोः एवंलक्षणसंपन्नौमहापुरुषसंज्ञितौ ३७ तौदृष्ट्वानारदोहृष्टस्ताभ्यांचप्रतिपू
जितः स्वागतेनाभिभाष्याथपृष्टश्चानामयंतथा ३८ बभूवांतर्गतमतिर्निरीक्ष्यपुरुषोत्तमौ सदोगतास्तत्रयेवैसर्वभूतनमस्कृ
तौः ३९ श्वेतद्वीपेमयादृष्टास्तादृशावृषिसत्तमौ इतिसंचिंत्यमनसाकृत्वाचाभिप्रदक्षिणं ४० सचोपविविशेतत्रपीठेकु
शमयेशुभे ततस्तौतपसांवासौयशसांतेजसामपि ऋषीशमदमोपेतौकृत्वापूर्वाह्णिकंविधिं पश्चान्नारदमव्यग्रौपाद्यार्घ्यास्या
मर्थ्यार्चतः ४२ पीठयोश्चोपविष्टौतौकृतातिथ्याह्निकौनृप तेषुतत्रोपविष्टेषुसदेशोऽभिव्यराजत ४३ आज्याहुतिमहाज्वालैर्य
ज्ञवाटोऽयथाग्निभिः अथनारायणस्तत्रनारदंवाक्यमब्रवीत् सुखोपविष्टंविश्रांतंकृतातिथ्यंसुखस्थितं ४४ नरनारायणा
उचतुः अपीदानींसभगवान्परमात्मासनातनः श्वेतद्वीपेत्वयादृष्टआवयोःप्रकृतिःपरः ४५ नारदउवाच दृष्टोमेपुरुषः
श्रीमान्विश्वरूपधरोऽव्ययः सर्वेलोकाहितत्रस्थास्तथादेवाः महर्षिभिः ४६ अद्यापिचैनंपश्यामियुवांपश्यन्सनातनौ यैर्ल
क्षणैरुपेतः सहरिरव्यक्तरूपधृक् ४७ ॥

५७ अनश्नन्नोत्सेधामितश्चनलवत्सर्येमुक्तात्मनल२शतेन अंगुलशतैर्न अंगुलैर्यासंख्या तत्तेलितिपादेपिहस्तस्यनलमंगुलोच्छाययेमेवमभवत् ५९ ५९

तैर्लक्षणैरुपेतोहि अक्रूरपद्यैरायुध्यं दृष्टोयुध्यामपानश्चतस्यैदेवस्यपार्श्वतः ४८ देहेवचागतोस्मध्यविसृष्टः परमात्मना को
हिनामभवेत्तस्यतेजसायशसाश्रिया ४९ सदृशस्त्रिषुलोकेषुक्तेधर्मात्मजोयुध्यं तेनेमकथितः कृत्स्नोधर्मः श्वेतद्वीपसं
स्थितः ५० प्रादुर्भावास्तुकथितानभविष्याइहयेयथा तत्रयेपुरुषाः श्वेताः पंचेंद्रियविवर्जिताः ५१ प्रतिबुद्धाश्चतेसर्वेभक्ता
श्चपुरुषोत्तमं तेर्चयंतिसदादेवं तैःसार्धंरमतेचसः ५२ प्रियभक्तोहिभगवान्परमात्माद्विजप्रियः रमतेसोर्च्यमानोहि
सदाभागवतप्रियः ५३ विश्वभुक्सर्वगोदेवोमाधवोभक्तवत्सलः सकर्त्ताकारणंचैवकार्यंचातितलद्युतिः ५४ हेतु
श्चाज्ञाविधानंचतत्त्वंचैवमहायशाः तपसायोज्यचात्मानंश्वेतद्वीपात्परंहिप्यत् ५५ तेजइत्यभिविख्यातंस्वयंभासावभा
सितं शांतिःसात्रिषुलोकेषुविहिताभावितात्मना ५६ एतयाशुभयाबुद्ध्यानैष्ठिकंव्रतमास्थितः नतत्रसूर्यस्तपतिनसो
मोभिविराजते नवायुर्वातिदेवेशेतपश्चरतिदुश्चरं ५७ वेदीमष्टनलोत्सेधांभूमावास्थायविश्वकृत् एकपादेस्थितोदे
वऊर्ध्वबाहुरुदङ्मुखः ५८ सांगानावर्त्तयंश्चेदांस्तपस्तेपेसुदुश्चरं यद्ब्रह्माऋषयश्चैवस्वयंपशुपतिश्चयत् ५९ ॥

६१ एकांतगतबुद्धिभिः अव्यभिचारितबुद्धिभिः ६४ अध्यायः धर्मोऽसीत्यध्यायेस्तपंचकात्मकं शरीरं मन एकं येन स्पृष्टो विद्यासहायो विधेकात्म्यस्त स

शेषाश्चविबुधश्रेष्ठा दैत्यदानवराक्षसाः नागाः सुपर्णा गंधर्वाः सिद्धा राजर्षयस्तथा ६० हव्यं कव्यं च सततं विधिपुक्तं प्रयुंजते
कृत्स्नं तु तस्य देवस्य चरणावुपतिष्ठताः ६१ याः क्रियाः संप्रयुक्ताः स्युरेकांतगतबुद्धिभिः ताः सर्वाः शिरसा देवः प्रतिगृह्णा
ति वै स्वयं ६२ न तस्यान्यः प्रियतरः प्रतिबुद्धैर्महात्मभिः विद्यते त्रिषु लोकेषु ततोऽस्म्यैकांतिकं गतः ६३ इह चैवागतस्तेन विसृ
ष्टः परमात्मना एवं मे भगवान्देवः स्वयमाख्यातवान्हरिः आसिष्ये तत्परो भूत्वा युवाभ्यां सह नित्यशः ६४ शांतो मोक्षधर्मेषु
नारायणीये नरनारायणाऊचतुः धन्योऽस्यनुगृहीतोऽसि यत्ते दृष्टः स्वयं प्रभुः न हि तं दृष्टवान्कश्चित्पद्मयोनिरपि स्वयं
१ अव्यक्तयोनिर्भगवान्दुर्दृशः पुरुषोत्तमः नारदैतद्धि नो सत्यं वचनं समुदाहृतं २ नास्य भक्तात्प्रियतरो लोके कश्च
न विद्यते ततः स्वयं दर्शितवानात्मानं द्विजोत्तम ३ तपो हि तप्यतस्तस्य यत्स्थानं परमात्मनः न तत्संप्राप्नुते कश्चि
दृते ह्यावां द्विजोत्तम ४ या हि सूर्यसहस्रस्य समस्तस्य भवेत् द्युतिः स्थानस्य सा भवेत्तस्य स्वयं तेन विराजता ५ तस्मा
दुत्तिष्ठते विप्र देवाद्विश्वभुवः पते क्षमा क्षमावतां श्रेष्ठ यया भूमिस्तु युज्यते ६ ॥ ॥ ॥ ॥ ॥

यद्दोरेणविश्वंतोस्युक्तंतत्रायमर्थः १ २ ३ ४ ५ ६ ॥ ॥ ॥ ॥ ॥

तस्माज्ज्योतिर्निष्टतेदेवात्सर्वमृतहिताद्रसः आपोहितेनयुज्यंतेद्रवत्वंप्राप्नुवंतिच ७ तस्मादेव समुद्भूतंतेजोरूपगुणात्मकंयेनसं
युज्यतेसूर्यस्ततोलोकेविराजते ८ तस्माद्देवात्समुद्भूतः स्पर्शस्तुपुरुषोत्तमात् येनसंयुज्यतेवायुस्ततोलोकांश्चिवाससे
९ तस्माज्ज्योतिर्निष्टतेशब्दः सर्वलोकेस्वरात्मभोः आकाशेयुज्यतेयेनततस्तिष्ठत्यसंहतं १० तस्माज्ज्योतिर्निष्टतेदेवात्सर्वमृतगतं
मनः चंद्रमायेनसंयुक्तः प्रकाशगुणधारणः ११ संभूतोत्सात्स्कंदनामततस्थानेवेदसंज्ञितं विद्यासहायोयपत्रास्तेभगवान्हव्य
कव्यभुक् १२ येहिनिष्कलुषालोकेपुण्यपापविवर्जिताः तेषांवैक्षेमरध्वानंगच्छतांद्विजसत्तम १३ ॥ ॥ ॥ ॥

आदित्यमंडलांतःस्थेनादपेणसम्यग्दृष्टाः पुरुषलोकैकाग्रतपाप्यदग्धशरीरंसर्वांगमनाविस्मरंतितत्तदारभ्यसर्वांगीभवंति। ततो आदित्यपुरुषाकारंम
नः कोमलपुरुषाकृतिंपरित्यज्य अणुः स्मितमात्राकारेणतवचंद्रमात्राकारेणवाभवंतएवंसूक्ष्मीकृतंमनः सकारणंथं विशंति अनिरुद्धाख्यंहंकारम्

सर्वलोकतमोहंताआदित्योद्वारमुच्यते आदित्यदग्धसर्वांगा अदृश्याः केनचित्क्वचित् १४ परमाणुभूताभूत्वातुतं
देवंप्रविशंत्युत तस्मादपिचनिर्मुक्ताअनिरुद्धतनौस्थिताः १५ मनोभूतास्ततोभूत्वाप्रद्युम्नंप्रविशंत्युत प्रद्युम्नाच्चापि
निर्मुक्ताजीवंसंकर्षणंततः १६ विशंतिविप्रप्रवराः सांख्याभागवतैःसह ततस्त्रैगुण्यहीनास्तेपरमात्मानमंजसा
१७ प्रविशंतिद्विजश्रेष्ठाः क्षेत्रज्ञंनिर्गुणात्मकं सर्वावासंवासुदेवंक्षेत्रज्ञंविद्धितत्वतः १८ समाहितमनस्काश्च
नियताःसंयतेंद्रियाः एकांतभावोपगतावासुदेवंविशंतिते १९ आवामपिचधर्मस्यगृहेजातौद्विजोत्तम रम्यांवि
शालामाश्रित्यतपउग्रंसमास्थितौ २० येतुतस्यैवदेवस्यप्रादुर्भावाःसुरप्रियाः भविष्यंतित्रिलोकस्थास्तेषांस्व
स्तीत्यथोद्विज २१ विधिनास्वेनयुक्ताभ्यांयथापूर्वंद्विजोत्तम आस्थिताभ्यांसर्वकृच्छ्रंव्रतंसम्यगनुत्तमं २२ ॥

विशंत्येतावतापिअनिरुद्धाकारतांपरित्यज्यतत्कारणंभूतंप्रद्युम्नाख्यंमनस्तदपिमकारोर्थेअंतर्यामिणिसंकर्षणाख्येजीवेसुषुप्तपदा
र्थेप्रविशंतितमपिपरित्यज्यचतुर्थेऽर्धमात्रार्थेशुद्धेब्रह्मणिवासुदेवाख्येमहाकाशकल्पेघटाकाशवत्प्रविशंतीति १६ विशालांबदरीं २२

भगवद्दर्शनाराधनस्वस्तीत्याशिषाज्जस्यालनीयस्यविश्वस्यकल्याणंचिंतितंभवति २७ अध्यायः देवंकृत्वेत्यादिप्रश्नज्ञानस्योत्तरमुक्तंविधिनोक्त

आवाभ्यामपिदृष्टस्त्वंश्वेतद्वीपेतपोधन समागतोभगवतासंकल्पंकृतवांस्तथा २३ सर्वंहिनोसंविदितंत्रैलोक्येसच
राचरे यद्भविष्यतिवृत्तंवावर्त्ततेवाशुभाशुभं सर्वंसतेकथितवान्देवदेवोमहामुने २४ वैशंपायनउवाच एतच्छ्रुत्वा
तयोर्वाक्यंतपस्युग्रेचवर्त्तते नारदःप्रांजलिर्भूत्वानारायणपरायणः २५ जजापविधिवन्मंत्रान्नारायणगतान्ब
हून् दिव्यंवर्षसहस्रंहिनरनारायणाश्रमे २६ अवसत्समहातेजानारदोभगवानृषिः तमेवाभ्यर्चयन्देवंनरना
रायणौचतौ २७ इतिश्रीमोक्षधर्मेषुनारायणीयेवैशंपायनउवाच कस्यचित्त्वथकालस्यनारदःपरमेष्ठिजः देवं
कृत्वायथान्यायंपित्र्यंचक्रेततःपरं १ ततस्तंवचनंप्राहज्येष्ठोधर्मात्मनःप्रभुः कइज्यतेद्विजश्रेष्ठदैवेपित्र्येचकल्पिते
२ त्वयामतिमतांश्रेष्ठतन्मेशंसयथागमं किमेतत्क्रियतेकर्मफलंवास्यकिमिष्यते ३ नारदउवाच त्वयैतत्कथि
तंपूर्वंदैवंकर्त्तव्यमित्यपि दैवतंचपरोयज्ञःपरमात्मासनातनः ४ ततस्तद्भावितोनित्यंयजेवैकुंठमव्ययं तस्माच्च
प्रसृतःपूर्वंब्रह्मालोकपितामहः ५ ममवैपितरंप्रीतःपरमेष्ठ्यप्यजीजनत् अहंसंकल्पजस्तस्यपुत्रःप्रथमकल्पितः

ननुद्भवोर्हिदेवपित्र्यंतयैववचस्यस्योत्तरमाहकस्यचिद्विर्थेयस्याद्दिना १२ ममपितरंप्रजापतिंब्रह्माणंपरमेष्ठीतिसंबंधः ६ ॥ ॥ ॥

नारदेहरहस्यस्यापाप्यज्ञापनेः स्वकायामुनर्जन्मप्राप्यते इति हरिवंशोक्तिः। तस्य ब्रह्मणः नारायणविधेयत्वं त्रिकेष्वज्ञोद्रोश्रुतिश्वेति स्वमिष्टात्रादीन पुत्रान्पितरोऽदेवा

यज्ञांश्चैव पितॄन्भावो नारायणविधीकृते एवं स एव भगवान्पिता माता पितामहः ९ इज्यते पितृयज्ञेषु तथा नित्यं जगत्पतिः
श्रुतिश्चाप्यपरा देवी पुत्रान्हि पितरोऽयजन् ० वेदश्रुतिः प्रनष्टा च पुनरध्यापिता सुतैः ततस्ते मंत्रदाः पुत्राः पितृत्वमुपपे
दिरे ९ नूनं पुरैतद्विदितं युवयोर्भावितात्मनोः पुत्राश्च पितरश्चैव परस्परमपूजयन् १० त्रीन्पिंडान्न्यसे वै पृथ्व्यांपू
र्वं दत्वा कुशानिति कथं तु पिंडसंज्ञां ते पितरो लेभिरे पुरा ११ नरनारायणावूचतुः इमां हि धरणीं पूर्वं नष्टां सागरमेखलां । गो
विंद उज्जहाराशु वाराहं रूपमास्थितः १२ स्थापयित्वा तु धरणीं स्वे स्थाने पुरुषोत्तमः जलकर्दमलिप्तांगो लोकका
र्यार्थमुद्यतः १३ प्राप्ते चाह्निककाले तु मध्यंदिनगते रवौ दंष्ट्राविलग्नान्मृत्पिंडान्विधूय सहसा प्रभुः १४ स्थापयामा
स वै पृथ्व्यां कुशानास्तीर्य नारद स तेष्वात्मानमुद्दिश्य पित्र्यं चक्रे यथाविधि १५ संकल्पयित्वा त्रीन्पिंडान्स्वेनैव विधि-
ना प्रभुः आत्मगात्रोष्मसंभूतैः स्नेहगर्भैस्तिलैरपि १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

५८१

अध्यायासुरैः सह युद्धार्थं गतास्तत्र शिवेरोपितानां तेषां श्रुतिः प्रनष्टा न प्रतिभाति तिस्रः पुत्रैस्तु पुनरेव वेदमधीतवंतः तस्माव्यापिकायुराणांतरप्रसिद्धास्थवि
ता ९ पूर्वं पृथ्व्यां कुशान्दत्वा तत्र पिंडार्घं दैवानपिंडांश्च प्रजापन्नेति संबंधः ११

न्यस

अहंहीतिपितरः पितृत्व १८ विष्णोः शालग्रामइवपितृरूपंमूर्तिः पिंडाएवेत्याह दंष्ट्राभ्यामिति २० पितापितामहेश्चेत्यादिनाश्राद्धंसर्वंविष्णुरे

मो०
५४७

547

प्रोक्ष्यापवर्गं देवेशः प्राङ्मुखः कृतवान्स्वयं मर्यादास्थापनार्थं च ततो वचनमुक्तवान् १७ वृषाकपिरुवाच अहं हि
पितरः स्रष्टुमुद्यतो लोककृत्स्वयं तस्य चिन्तयतः सद्यः पितृकार्यविधौ परान् १८ दंष्ट्राभ्यां प्रविनिर्धूता ममैते दक्षिणां दि
शं आश्रिता धरणीं पिंडास्तस्मात्पितर एव ते १९ त्रयो मूर्त्तिविहीना वै पिंडमूर्त्तिधरास्त्विमे भवन्तु पितरो लोके मया सृष्टाः
सनातनाः २० पिता पितामहश्चैव तथैव प्रपितामहः अहमेवात्र विज्ञेयस्त्रिषु पिंडे
षु संस्थितः २१ नास्ति मत्तोऽधिकः कश्चित्को वाभ्यर्च्यो मया स्वयं को वा मम पिता लोके अहमेव पितामहः २२ पितामह
पिता चैव अहमेवात्र कारणं इत्येतदुक्त्वा वचनं देवदेवो वृषाकपिः २३ वराहपर्वते विप्र दत्त्वा पिंडान्सविस्तरान् आत्मा
नं पूजयित्वैव तत्रैवादर्शनं गतः २४ एषा तस्य स्थितिर्विप्र पितरः पिंडसंज्ञिताः लभन्ते सततं पूजां वृषाकपिवचो य
था २५ ये यजन्ति पितॄन्देवान्गुरूंश्चैवातिथींस्तथा गाश्चैव द्विजमुख्यांश्च पृथिवीं मातरं तथा २६ कर्मणा
मनसा वाचा विष्णुमेव यजन्ति ते अन्तर्गतः स भगवान्सर्वसत्त्वशरीरगः २७ समः सर्वेषु भूतेषु ईश्वरः सुखदुःखयो
ः महान्महात्मा सर्वात्मा नारायण इति श्रुतः २८ शांतौ मोक्षधर्मे पुनाणपर्वणि ॥ ॥ ॥ ॥

रम०
५४७

वयमेवेतिपितृप्रकारोदर्शितः २१ २२ २३ २४ २५ २६ २७ २८ २८ २८

श्रुत्वैतन्नारदो १० ११ अस्यतास्पर्येसर्वभूतात्मकोविभुःशाहमकुर्वाणोनपरमेश्वरःसम्यगाराधनीयइति ११ १२ १३

वैशंपायनउवाच श्रुत्वैतन्नारदोवाक्यंनरनारायणेरितं अत्यंतभक्तिमान्देवे एकांतित्वमुपेयिवान् १ प्रोष्यवर्ष
सहस्रंतुनरनारायणाश्रमे श्रुत्वाभगवदाख्यानंदृष्ट्वाचहरिमव्ययं २ हिमवंतंजगामाशुयत्रास्यस्वकआश्रमः
तावपिख्याततपसौनरनारायणावृषी ३ तस्मिन्नेवाश्रमेरम्येतेपतुस्तपउत्तमं त्वमप्यमितविक्रांतःपांडवा
नांकुलोद्वहः ४ पावितात्माद्यसंवृत्तःश्रुत्वेमामादितःकथां नैवतस्यापरोलोकोनायंपार्थिवसत्तम ५ कर्म
णामनसावाचायोद्विष्याद्विष्णुमव्ययं मज्जंतिपितरस्तस्यनरकेशाश्वतीःसमाः ६ योद्विष्याद्विबुधश्रेष्ठंदेवंना
रायणंहरिं कथंनामभवेद्द्वेष्यआत्मालोकस्यकस्यचित् ७ आत्माहिपुरुषव्याघ्रज्ञेयोविष्णुरितिस्थितिः यए
षगुरुरस्माकंऋषिर्गंधवतीसुतः ८ तेनैतत्कथितंतातमाहात्म्यंपरमात्मनः तस्माच्छ्रुतंमयाचेदंकथितंचतवा
नघ ९ नारदेनतुसंप्राप्तःसरहस्यःससंग्रहः एषधर्मोजगन्नाथात्साक्षान्नारायणान्नृप १० एवमेषमहान्
धर्मःसतेपूर्वंनृपोत्तम कथितोहरिगीतासुसमासविधिकल्पितः ११ कृष्णद्वैपायनंव्यासंविद्धिनारायणंभु
वि कोह्यन्यःपुरुषव्याघ्रमहाभारतकृद्भवेत् धर्मान्नानाविधांश्चैवकोब्रूयात्तमृतेप्रभुं १३ ॥ ॥ ॥

मो०
५४८

548

१४ एतत्तु इति गुरवे ह्रस्यमिति ११ सहीतिः सः नारायणः शमस्य नियमो निग्रहस्तत्परः यमाः नियमाश्च पंच पंच अहिंसाद्यः सत्याद्यश्च १७ कृतधर्मः कृतयुगधर्मः सत्यादिः तद्दिष्टो १८ १९ चत्वारः वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्या आत्मनः तान् धारयति सत्तया । पूर्त

वर्त्तितो ते महायज्ञो यथा संकल्पितस्त्वया संकल्पितात्वमेधस्त्वं कृतधर्मश्च तत्त्वतः १४ सौतिरुवाच एतत्तु महदाख्यानं श्रुत्वा पार्थिवसत्तमः ततो यज्ञसमाप्त्यर्थं क्रियाः सर्वाः समारभत् १५ नारायणीयमाख्यानमेतत्ते कथितं मया । पृष्टेन शौनकाद्येह नैमिषारण्यवासिषु १६ नारदेन पुरा यद्वै गुरवे तु निवेदितं ऋषीणां पाण्डवानां च श्रृण्वतोः कृष्णभीष्मयोः १७ स हि परमर्षिर्जनभुवनपतिः पृथुधरणीधरः श्रुतिविनयनिधिः शमनियम[निधिरुपमति]
यमपरो द्विजवरसहितस्तव च भवतु गतिर्हरिरमरहितोऽसुरवधकरस्तपसां निधिः सुमहतां यशसां च भाजनं मधुकैटभहा कृतधर्मविदां गतिदोऽभयदो मखभागहरोऽस्तु शरणं स ते १८ त्रिगुणो विगुणश्चतुरात्मधरः पूर्तेष्टयोश्च फलभागहरः विदधाति नित्यमजितोऽतिबलो गतिमात्मगां सुकृतिनामृषीणां १९ तं लोकसाक्षिणमजं पुरुषं पुराणं रविवर्णमीश्वरगतिं बहुशः प्रणमध्वमेकमनसो यतः सलिलोद्भवोऽपि तमृषिं प्रणतः २०

वाय्वादिः इष्टमग्निहोत्रादिः आत्मगां आत्मकर्तृगामिनी सलिलं उद्भवो यस्य नारायणस्य शेषशायीत्यर्थः कर्षी वासुदेवं २० ॥

राम०
५४८

लोकस्याव्यक्तोर्दृष्टयोनिः अव्यक्तस्यमोक्षस्यपरंस्थानं। परंपरनोपेहउदारंतमृतंध्यातमितिपाठांतरं। पुत्रात्मभिर्निरहंकृतैः॥ २१ अध्यायः १६९
श्रुतंभगवतस्तस्येत्यादिरध्यायोहयशिरोवाचनारायणप्रयोजनंमाहात्म्यंचप्रतिपादयति। तस्यतास्यंयोरजस्तमोभ्यांवेदानष्टानितिरोहितांयोभवतिस

सहिलोकेयोनिरव्यक्तस्यपरंसूक्ष्मंपरायणमचलंलिंगपदं तन्मांख्ययोगिभिरुदारधृतंबुध्यायतात्मभिरिदंसनातनं
२१ शान्तौमोक्षधर्मेषुनारायणीये शौनकउवाच श्रुतंभगवतस्तस्यमाहात्म्यंपरमात्मनः जन्मधर्मगृहेचैवन
रनारायणात्मकं १ महावराहसृष्टाचपिंडोत्पत्तिः पुरातनी प्रवृत्तौचनिवृत्तौचयोयथापरिकल्पितः २ त
थाचनः श्रुतोब्रह्मन्कथ्यमानस्त्वयानघ यच्चतत्कथितंपूर्वंत्वयाहयशिरोमहत् ३ हव्यकव्यभुजोविष्णोरुदक्पू
र्वेमहोदधौ तच्चदृष्टंभगवताब्रह्मणापरमेष्ठिना ४ किंतदुत्पादितंपूर्वंहरिणालोकधारिणा रूपंप्रभावंम
हतामपूर्वंधीमतांवर ५ दृष्ट्वाहिविबुधश्रेष्ठमपूर्वममितौजसं तदश्वशिरसंपुण्यंब्रह्माकिमकरोन्मुने ६
एतन्नःसंशयंब्रह्मन्पुराणंज्ञानसंभवं ७ कथयस्वोत्तममते महापुरुषनिर्मितं पाविताःस्मत्वयाब्रह्मन्पुण्यां
कथयताकथां ८ सूतउवाच कथयिष्यामितेसर्वंपुराणंवेदसंमितं जगौयंभगवान्व्यासोराज्ञःपारिक्षितस्य

त्वेनतुअथेतःसम्यक्प्रकाशंतनइतिहव्यकव्यभुजःमलविष्णुनारिल्वात्कः अकारांतःशब्दः उदकपूर्वे [illegible] शानकारणमहोदधौतत्समीपे
५ अपूर्वंप्रागदृष्टं अपूर्वं अद्भुतं ६ ७ ८ ९

लोकस्याव्यक्तोरेर्योनिः अनंतस्यमोक्षस्यपरंस्थानं । परंपरनीपेहेतुरारत्नमहंतंध्यानमितिपाठांतरं । धृतात्मभिर्निहृदविंदैः २१ अध्यायः १६९
श्रुतंभगवतस्तस्येत्यादिरध्यायोहयग्रीवावतारस्यप्रयोजनंमाहात्म्यंचप्रतिपादयति । तस्यतात्पर्यं रजस्तमोभ्यांवेदानष्टास्तिरोहितास्ताभ्यांमंत्रितस

सहिलोकस्ययोनिरनंतस्यपदंसत्सूक्ष्मंपरायणमचलंहिपदं तत्सांख्ययोगिभिरुदारधृतंबुध्यायतात्मभिरिदंसनातनं
२१ शांतौमोक्षधर्मेषुनारायणीये शौनकउवाच श्रुतंभगवतस्तस्यमाहात्म्यंपरमात्मनः जन्मधर्मगृहेचैवन
रनारायणात्मकं १ महावराहसृष्टाचपिंडोत्पत्तिःपुरातनी प्रवृत्तौचनिवृत्तौचयोयथापरिकल्पितः २ त
थाचनःश्रुतोब्रह्मन्कथ्यमानस्त्वयानघ यच्चतत्कथितंपूर्वंत्वयाहयशिरोमहत् ३ हव्यकव्यभुजोविष्णोरुदक्
पूर्वेमहोदधौ तच्चदृष्टंभगवताब्रह्मणापरमेष्ठिना ४ किंतदुत्पादितंपूर्वंहरिणालोकधारिणा रूपंप्रभावंम
हतामपूर्वंधीमतांवर ५ दृष्ट्वाहिविबुधश्रेष्ठमपूर्वममितौजसं तदश्वशिरसंपुण्यंब्रह्माकिमकरोन्मुने ६
एतन्नःसंशयंब्रह्मन्पुराणंज्ञानसंभवं ७ कथयस्वोत्तममतेमहापुरुषनिर्मितं पाविताःस्मत्वयाब्रह्मन्पुण्यां
कथयताकथां ८ सूतउवाच कथयिष्यामितेसर्वंपुराणंवेदसंमितं जगौयद्भगवान्व्यासोराज्ञःपारिक्षितस्य

त्वेनतुअर्थतःसम्यक्प्रकाशितइतिहव्यकव्यभुजःमलविमुक्तारित्वात्कःअकारांतःशब्दःउदक्पूर्वेईशानकोणेमहोदधौतत्समीपे
५ अपूर्वंप्रागदृष्टं अपूर्वं अद्भुतं ६ ७ २ ९

१० दर्शितवान् ततस्त्वश्वशिरोरूपं ११ वेदो वेदरहस्तत्त्वं वेदाश्चाप्यार्षी विरहस्यमित्यादिकं सर्वं भगवल्लीलामात्रमिति हृदस्योत्तरं वक्ष्यन् तत्र तत्त्वेन सृष्टि
मेवतावदुपक्रमते यत्किंचिदिति ईश्वरबुद्धिभिः ईश्वरसंकल्पमात्रैः १२ लयमाह भूतेति १५ अव्यक्ते महत्तत्त्वे मनो लीनं चेत् तु व्यक्तमपि अव्यक्तं तां
गुणसाम्यावस्थां गते सति पुरुषे बलमर्थ्यां पुंसि सर्वगते ब्रह्मणि लीने सति प्रलयावस्थायां १६ तम एवाभवत् सर्वं विज्ञानं सर्वं लुप्तमित्यर्थः तम

श्रुत्वाश्वशिरसो मूर्तिं देवस्य हरिमेधसः उत्पन्नसंशयो राजा तमेवमनुचोदयत् १० जनमेजय उवाच यत्तद्दर्शितवान् ब्र
ह्मा देवं हयशिरोधरं किमर्थं तत्समभवत् तन्ममाचक्ष्व सत्तम ११ वैशम्पायन उवाच यत्किंचिदिह लोके वै देहसत्त्वं विशांपते
सर्वं पंचभिराविष्टं भूतैरीश्वरबुद्धिभिः १२ ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् भूतान्तरात्मा वरदः सगुणो निर्गुणोपि च
१३ भूतप्रलयमव्यक्तं शृणुष्व नृपसत्तम धरण्यामथ लीनायामप्सु चैकार्णवे पुरा १४ ज्योतिर्भूते जले चापि लीने
ज्योतिषि चानिले वायौ चाकाशसंलीने आकाशे च मनोनुगे १५ व्यक्ते मनसि संलीने व्यक्ते चाव्यक्ततां गते अव्यक्ते पु
रुषं याते पुंसि सर्वगतेपि च १६ तम एवाभवत्सर्वं न प्राज्ञायत किंचन तमसो ब्रह्म संभूतं तमोमूलामृतात्मकं १७ ॥

मम सकाशात् ब्रह्म जगत्कारणं परव्योमाख्यमुत्पन्नं तमः कुत उत्पन्नमित्याकांक्षायामाह तमोमूलामृतात्मकमिति अधिष्ठानमात्रात्मकं तदुरगेश्वर
ज्जुमात्रात्मकः ततो मूलामृतं स्वाध्यस्ततमसा उपेतं सत् विश्वभावाः सर्वरूपं संज्ञानाम तद्दृग्प्रपंचात्मकमित्यर्थः पौरुषं वैराजी १७ ॥ ॥

अनिरुद्धस्वरूपस्य महतो व्यक्तसंज्ञितो यः १८ निर्याणं निर्विशेषं तन्मात्राकारो चेतोहानिः अपुनर्निर्विशेषब्रह्मणः शयनं स्वयं परिचयं जगाम १९ सत्ववि

तोऽहं स्वभावसंज्ञं तं पौरुषीं तनुमास्थितं सोऽनिरुद्ध इति प्रोक्तः स प्रधानं प्रवर्तते १८ तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम वि
द्यासहायवान् देवो विष्वक्सेनो हरिः प्रभुः १९ अप्स्वेव शयनं चक्रे निद्रायोगमुपागतः जगतीं चिन्तयन् तत्र शेषे चित्रो बहुगु
णोऽभवत् २० तस्य चिन्तयतः सृष्टिं महानात्मगुणः स्मृतः अहंकारस्ततो जातो ब्रह्मा स तु चतुर्मुखः २१ हिरण्यगर्भो भग
वान् सर्वलोकपितामहः पद्मेऽनिरुद्धात् संभूतस्तदा पद्मनिभेक्षणः २२ सहस्रपत्रे द्युतिमाननुप्रविष्टः सनातनः ददृशेऽद्भु
तसंकाशो लोकानापोमयान् प्रभुः २३ सत्त्वस्थः परमेष्ठी स ततो भूतगणान् सृजन् पूर्वमेव च पद्मस्य पत्रे सूर्यांशुसप्रभे
२४ नारायणकृतौ बिन्दू अपामास्तां गुणोत्तरौ तावपश्यत्स भगवाननादिनिधनोऽच्युतः २५ एकस्तत्राभवद् बिन्दुर्म
ध्वाभो रुचिरप्रभः स तामसो मधुर्जातस्तदा नारायणाज्ञया २६ कठिनस्त्वपरो बिन्दुः कैटभो राजसस्तु सः तावभ्यधावतां श्रे
ष्ठौ तमोरजोगुणान्वितौ २७ बलवन्तौ गदाहस्तौ पद्मनालानुसारिणौ ददृशातेऽरविन्दस्थं ब्रह्माणममितप्रभं २८
सृजन्तं प्रथमं वेदांश्चतुरश्चारुविग्रहान् ततो विग्रहवन्तौ तौ वेदान् दृष्ट्वासुरोत्तमौ २९ ॥ ॥ ॥ ॥ ॥ ॥

५१

दिदृक्षो जगतः सृष्टिं चिन्तयन् वक्रः स्वां प्रज्ञां योगे योगनिद्रां स्मरणं कुर्वन् २० २१ पद्मप्रसंगात् अनिरुद्धात् अहंकारतत्त्वसंभूतो आविर्भूतः ब्रह्मा २२ २ पद्मस्य पत्रे अ
दैकदेशे २३ २४ २५ २६ २७ २८ २९ ॥

२६ रजस्तमोभ्यामभिभूते नष्टज्ञाने निरीश्वरे एवं जपध्यानादीनां ज्ञानलाभार्थमनुसरणीयः स्माशयेनाह ओं नमस्ते इति २९ तुभ्यं नवलोकधाम

महसा जगतां हेतुर्वेदान्ब्रह्मणः पश्यतस्तदा अथ तौ दानवश्रेष्ठौ वेदान्गृह्य सनातनान् ३० रसां विविशतुस्तूर्णमुदक्पूर्वे महोदधौ ततो हृतेषु वेदेषु ब्रह्मा कश्मलमाविशत् ततो वचनमीशानं प्राह वेदैर्विनाकृतः ३१ ब्रह्मोवाच वेदा मे परमं चक्षुर्वेदा मे परमं बलं वेदा मे परमं धाम वेदा मे ब्रह्म चोत्तमं ३२ मम वेदा हृताः सर्वे दानवाभ्यां बलादितः अंधकारा हि मे लोका जाता वेदैर्विनाकृताः ३३ वेदानृते हि किं कुर्यां लोकानां सृष्टिमुत्तमां अहो बत महद्दुःखं वेदनाशनजं मम ३४ प्राप्तं दुनोति हृदयं तीव्रशोकपरायणं को हि शोकार्णवे मग्नं मामितोद्य समुद्धरेत् ३५ वेदांस्तांश्चानयेन्नष्टान्कस्य चाहं प्रियो भवे इत्येवं भाषमाणस्य ब्रह्मणो नृपसत्तम ३५ हरेः स्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतां वर ततो जगौ परं जप्यं प्रांजलिः प्रग्रहः प्रभुः ३६ ब्रह्मोवाच ॐ नमस्ते ब्रह्महृदय नमस्ते मम पूर्वज लोकाद्य भुवनश्रेष्ठ सांख्ययोगनिधे प्रभो ३७ व्यक्ताव्यक्तकराचिंत्य क्षेमं पंथानमास्थित विश्वभुक् सर्वभूतानामंतरात्मन्नयोनिज अहं प्रसादजस्तुभ्यं लोकधाम स्वयंभुवः ३८ ॥ ॥ ॥

प्रकाशकः सचौसौखयंभस्वतस्य ३८ ३८ ३८ ३८ ३८ ॥ ॥

त्वन्नामइतिाननुज्ञानमप्रतिबंधंयस्यवैराग्यंचजगत्सुतेः ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयमितिस्मृतासहायमीशांचेत्क्रीयन्मदृष्टमन्नासिकस्मात्तुविभेमी
तिकस्माद्बिभेष्यतद्वितीयोहंभयंयभवतीतिश्रुतान्मद्दृष्टणाचबलहलणः स्वतः सिद्धज्ञानलमुक्तं। सतिचज्ञानेजन्मातरेनास्तीतिकथंतत्समसमजन्मानु
चिंत्य। अभ्युपगमेत्तात्तानसिद्धत्वानस्यैवफलंचवेत्तोश्वर्यमोक्षधर्मान्वाख्यानमितिचेत्अत्रवदसः अवस्यहंकाराद्युत्पत्त्यचतुर्मुखस्वस्यैवराज्ञेरूपस
र्वेनामरूपात्मकमनुसंधानामन्मतेमहायघस्मकाशनेनत्वत्तेदैवासन्मितितावत्तिवैराज्ञोनिजन्मानीति। स्थूलेप्रपंचात्मकंमानसंभोगहारामनस्तमिक

त्वन्नामैमानसंजन्मप्रथमंद्विजपूजितं चाक्षुषंवैद्वितीयंमेजन्मचासीसुरातनं तत्प्रसादात्तुमेजन्मतृतीयंवाचिकंमहत्
त्वत्तः श्रवणजंचापिचतुर्थंजन्ममेविभो नासत्यंचापिमेजन्मत्वत्तः परममुच्यते अंडजंचापिमेजन्मत्वत्तः षष्ठंविनिर्मितं
इदंचसप्तमंजन्मपद्मजन्मेतिवैप्रभो सर्गेसर्गेह्यहंपुत्रस्तवन्निर्गुणवर्जितं ५० ॥ ॥ ॥ ॥ ॥ ॥

रप्रथमंवैराजजन्म। रूपप्रपंचात्मकंचाक्षुषंततोपिवाह्यत्वात्द्वितीयं। वचनमात्रोपस्थापितमेरुस्वर्गाद्यात्मकंततोपिवाह्यत्वात्तृतीयं। अरससंभोगप
तपाः श्रोत्रस्योपस्थापकोवैराज्ञामानामप्रपंचस्ततोपिवाह्यत्वाच्चतुर्थः नासत्यमिति। अश्विदेवसघ्राणजन्मतंन्मगंधप्रपंचात्मकंनामतोहेत्वष्ठंव
कारूपस्मारकत्वयाततोपिविहिरंगत्वात्पंचमं अंडजं ब्रह्मांडतदृर्शनसंस्कारजंवासनात्मकंस्वाप्नप्रपंचमयंततोपिवाह्यंषष्ठंततोपिवाह्यंपद्म
तेगम्यतइतिवापाधंसर्वप्रासिद्धीवासनोद्बोधककारणात्मकमिदंसप्तमं। इतोपिवाह्यरलक्षुद्धिचिन्मात्रोष्टमः सर्वेष्टकोर्ययत्तुरीयत्वात्पितामह
चत्वमस्तैयैवकार्यसप्तकरूपेणाभासनतयात्वत्पुत्रोस्मीत्याहसर्गेसर्गइति ५० ॥ ६२ ॥ ॥
मा१

प्रधानंमुख्योगुणःसत्वेनेनकल्पितः सृष्टःसत्वमयशरीरस्तस्यः ४३ यतोवेदचक्षुरहंऋतःवेयातिगःकालजित् ४४ अध्यायशेषःसंख्यायः ५०५२

ततेप्रिपो २

प्रथमः पुंडरीकाक्षप्रधानगुणकल्पितः त्वमीश्वरः स्वभावश्च कर्ममेवंधस्त्वयंभुवः ४१ त्वयाविनिर्मितोहंवैवेदचक्षुर्वे
योतिगः त्वमेवेदाहृतास्वचक्षुरंधोजातोस्मिजागृहि ४२ ददस्वचक्षूंषिममप्रियोसिमे एवंस्तुतः सभगवान्पुरुषः स
र्वतोमुखः ४३ जहौनिद्रामथतदावेदकार्यार्थमुद्यतः ऐश्वर्येणप्रयोगेनद्वितीयांतनुमास्थितः ४४ सुनासिकेन
कायेनभूत्वाचंद्रप्रभस्तदा कृत्वाहयशिरःशुभ्रंवेदानामालयंप्रभुः ४५ तस्यमूर्धासमभवद्द्यौःसनक्षत्रतारका
ःकेशाश्चास्याभवन्दीर्घारवेरंशुसमप्रभाः ४६ कर्णावाकाशपातालेललाटंभूतधारिणी गंगासरस्वतीश्रो
ण्यौभ्रुवावास्तांमहोदधी ४७ चक्षुषीसोमसूर्यौतेनासासंध्यापुनःस्मृता ॐकारस्त्वथसंस्कारोविद्युज्जि
ह्वाचनिर्मिता ४८ दंताश्चपितरोराजन्सोमपाइतिविश्रुताः गोलोकोब्रह्मलोकश्चओष्ठावास्तांमहात्मनः
४९ ग्रीवाचास्याभवद्राजन्कालरात्रिर्गुणोत्तरा एतद्धयशिरःकृत्वानानामूर्तिभिरावृतं ५० अंतर्दधौसविश्वे प्रो २
विश्वेश्वरसांप्रभुः रसांपुनःप्रविष्टश्चयोगंपरममास्थितः ५१ शैक्ष्यंस्वरंसमास्थायओमितिप्रासृजत्स्वरं स
स्वरः सानुनादीचसर्वशःस्निग्धएवच ५२ ॥

बभूवांतर्महीभूतः सर्वभूतगुणान्वितः ततस्तावसुरौ कृत्वा वेदान्समयबंधनात् ५३ रसातले विनिःक्षिप्य यतः शब्दस्ततो द्रुतौ ए
तस्मिन्नंतरे राजन्देवो हयशिरोधरः ५४ जग्राह वेदानखिलान्रसातलगतान्हरिः प्रादाच्च ब्रह्मणे भूयस्ततः स्वां प्रकृतिं गतिः
५५ स्थापयित्वा हयशिर उदक्पूर्वे महोदधौ वेदानामालयं चापि बभूवाश्वशिरास्ततः ५६ अथ किंचिदपश्यंतौ दानवौ म
धुकैटभौ पुनराजग्मतुस्तत्र वेगितौ पश्यतां च तौ ५७ यत्र वेदा विनिक्षिप्तास्तत्स्थानं शून्यमेव च ततउत्तममास्थाय वेगं बलव
त्तांवरौ ५८ पुनरुत्तस्थतुः शीघ्रं रसानामालयात्तदा ददृशाते च पुरुषं तमेवादिकरं प्रभुं ५९ श्वेतं चंद्रविशुद्धाभमनिरुद्धत
नौस्थितं भूयोप्यमितविक्रांतं निद्रायोगमुपागतं ६० आत्मप्रमाणरचिते अपामुपरिकल्पिते शयने नागभोगाढ्ये ज्वालामा
लासमावृते ६१ निःकल्मषेण सत्वेन संपन्नं रुचिरप्रभं तं दृष्ट्वा दानवेंद्रौ तौ महाहासममुंचतां ६२ ऊचतुश्च समाविष्टौ रज
सा तमसा च तौ अयं स पुरुषः श्वेतः शेते निद्रामुपागतः ६३ अनेन नूनं वेदानां कृतमाहरणं रसात् कस्यैष को नु खल्वेष किं च
स्वपिति भोगवान् ६४ इत्युच्चारितवाक्यौ तौ बोधयामासतुर्हरिं युद्धार्थिनौ हि विज्ञाय विबुद्धः पुरुषोत्तमः ६५ निरीक्ष्य चा
सुरेंद्रौ तौ ततो युद्धे मनो दधे अथ युद्धं समभवत्तयोर्नारायणस्य वै ६६ रजस्तमोविष्टतनू तावुभौ मधुकैटभौ ब्रह्मणोपचितिं कु
र्वन् जघान मधुसूदनः ६७ ततस्तयोर्वधेनाशु वेदापहरणेन च शोकापनयनं चक्रे ब्रह्मणः पुरुषोत्तमः ६८ ॥ ॥ म

ततः परिवृतो ब्रह्मा हरिणा वेदसत्कृतः निर्ममे स ततो लोकान्कृत्स्नान्स्थावरजंगमान् ६९ दत्त्वा पितामहायाग्र्यां मतिं
लोकविसर्गिकीं ततो वा तत्रैवांतर्दधे देवो यत एवागतो हरिः ७० तौ दानवौ हरिर्हत्वा कृत्वा हयशिरस्तनुं पुनः प्रवृत्तिधर्मार्थं ता
मेव विदधे तनुं ७१ एवमेव महाभागो बभूवाश्वशिरा हरिः पौराणमेतत्प्रख्यातं रूपं वरदमैश्वरं ७२ यो ह्येतद्ब्राह्मणो नि
त्यं शृणुयाद्धारयीत वा न तस्याध्ययनं नाशमुपगच्छेत्कदाचन ७३ आराध्य तपसोग्रेण देवं हयशिरोधरं पंचालेन क्रमः प्रा
प्तो देवेन पथि देशितः ७४ एतद्धयशिरो राजन्नाख्यानं तव कीर्तितं पुराणं वेदसमितं यन्मां त्वं परिपृच्छसि ७५ यां यामिच्छेत्त
नुं देवः कर्तुं कार्यविधौ क्वचित् तां तां कुर्याद्विकुर्वाणः स्वयमात्मानमात्मना ७६ एष वेदनिधिः श्रीमानेष वै तपसो निधिः
एष योगश्च सांख्यं च ब्रह्म चाग्र्यं हविर्विभुः ७७ नारायणपरा वेदा यज्ञा नारायणात्मकाः तपो नारायणपरं नारायणपरा गतिः
७८ नारायणपरं सत्यमृतं नारायणात्मकं नारायणपरो धर्मः पुनरावृत्तिदुर्लभः ७९ प्रवृत्तिलक्षणश्चैव धर्मो नारायणा
त्मकः नारायणात्मको गंधो भूमौ श्रेष्ठतमः स्मृतः ८० अपां चापि गुणा राजन्रसा नारायणात्मकाः ज्योतिषां च परं रूपं
स्मृतं नारायणात्मकं ८१ नारायणात्मकश्चापि स्पर्शो वायुगुणः स्मृतः नारायणात्मकश्चैव शब्द आकाशसंभवः
८२ मनश्चापि ततो भूतमव्यक्तगु॥ ॥ ॥

णलक्षणं नारायणपरः कालोज्योतिषामयनंचयत् ८३ नारायणपराकीर्त्तिःश्रीश्चलक्ष्मीश्चदेवता नारायणपरंसांख्यंयो
गोनारायणात्मकः ८४ कारणंपुरुषोयेषांप्रधानंचापिकारणं स्वभावश्चैवकर्माणिदैवंयेषांचकारणं ८५ अधिष्ठानंतथाकर्त्ता
करणंचपृथग्विधं विविधाचतथाचेष्टादैवंचैवात्रपंचमं ८६ पंचकारणसंख्यातोनिष्ठासर्वत्रवैहरिः तत्वंजिज्ञासमानानांहेतुभिः
सर्वतोमुखैः ८७ तत्वमेकोमहायोगीहरिर्नारायणः प्रभुः ब्रह्मादीनांसलोकानामृषीणांचमहात्मनां ८८ सांख्यानांयो
गिनांचापियतीनामात्मवेदिनां मनीषितंविजानातिकेशवोनतुतस्यते ८९ येकेचित्सर्वलोकेषुदैवंपित्र्यंचकुर्वते दानानि
चप्रयच्छंतितप्यंतेचतपोमहत् ९० सर्वेषामाश्रयोविष्णुरैश्वरंविधिमास्थितः सर्वभूतकृतावासोवासुदेवेतिचोच्यते ९१

मो०
५५३

553

६३ अध्यायः योऽन्यत्रानिवृत्यचरणः सप्तजन्मानुक्तानि मानसं चाक्षुषं वाचिकं श्रावणं नासत्यं अण्डजं पार्द्मं चेति तान्येव परब्रह्मणः स्वरूपाणि तेषां म
कोपासितत्वं निर्द्वाराण्यचरमसत्तमं तत्त्वं एवमध्यायस्यारम्भे अहो ह्येकान्तिनामित्यादि सर्वान्सन्निधिवद्ब्रह्मणः अस्तोपासकान्नमस्तोपासकांश्च १ इदं च

अयं हि नित्यः परमो महर्षिर्महाविभूतिर्गुणवर्जिताख्यः गुणैश्च संयोगमुपैति शीघ्रं कालो यथर्तावृतुसंप्रयुक्तः ८१ नैवास्य
विन्दन्ति गतिं महात्मनो न चागतिं कश्चिदिहानुपश्यति ज्ञानात्मकाः संयमिनो महर्षयः पश्यन्ति नित्यं पुरुषं गुणाधिकं ८२
शान्तौ मोक्षधर्मेषु नारायणीये जनमेजय उवाच अहो ह्येकान्तिनः सर्वान्प्रीणाति भगवान्हरिः विधिप्रयुक्तां पूजां च गृह्णा
ति भगवान्स्वयं १ ये तु दग्धेन्धना लोके पुण्यपापविवर्जिताः तेषां त्वयाभिनिर्दिष्टा पारम्पर्यागता गतिः २ चतुर्थ्यां चैव ते गतिं
गच्छन्ति पुरुषोत्तमम् एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदं २ नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः अगत्वा गतयस्तिस्रो
यद्गच्छन्त्यव्ययं हरिं ३ सहोपनिषदान्वेदान्ये विप्राः सम्यगास्थिताः पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ४ ॥॥

नाः नष्टवासनाः पारम्पर्यागतां गुरुसंप्रदायागतां गतिं श्रेणिं २ चतुर्थ्याम् अनिरुद्धप्रद्युम्नसंकर्षणानपेक्ष्य चतुर्थ्यां वासुदेवाख्यायां हरिभक्तानां वि
शेषमाह एकान्तिनस्त्विति एकान्तिनो निष्कामभक्ताः गतयः गतीः अनिरुद्धादीन् त्रीन् अनुपास्यैव वासुदेवं गच्छन्तीत्यर्थः ३ ज्ञापयितुमेवैषु
क्तानां श्रेष्ठतामाह सहेति ४

राम०
५५३

गतिः१

७ अगतिः गतिस्मृनोज्ञानधर्मः गतिमान् उपासनाधर्मः ८ सामवेदेनसामवेदोक्तंतत्वमसीतिवाक्यंयथाऽधिकारिणः ज्ञानजनकं एवं वेदत्रयधर्मोपिज्ञा
नाधिमतोऽसद्यः कैवल्यहेतुरित्यर्थः। तथाचयोगशास्त्रे तीव्रवैराग्यवतां आसन्नसमाधिलाभस्तत्रमृदुमध्याधिमात्रत्वात्ततोपिविशेषइतिमृदुतीव्र

तेभ्योविशिष्टंज्ञानमितिगतिमकांतिनान्तरणां केनैषधर्मःकथितोदेवेनऋषिणापिवा ५ एकांतिनांचकाचर्याकदाचोत्सा
दितविभो एतन्मेसंशयंछिंधिपरंकौतूहलंहिमे ६ वैशंपायनउवाच समुपोढेष्वनीकेषुकुरुपांडवयोर्मृधे अर्जुनेविम
नस्केचगीताभगवतास्वयं ७ अगतिश्चगतिश्चैववपूर्वंतेकथितामया गहनोह्येषधर्मोवैदुर्विज्ञेयोकृतात्मभिः ८ सं
मितःसामवेदेनपुरैवादियुगेकृतः धार्यतेस्वयमीशेनराजन्नारायणेनच ९ एतदर्थंमहाराजपृष्टःपार्थेननारदः ऋ
षिमध्येमहाभागः शृण्वतोःकृष्णभीष्मयोः १० गुरुणाचममाप्येषकथितोनृपसत्तम यथातु कथितंतत्र
नारदेनतथाशृणु ११

अतिमात्रतीव्रवैराग्यवतां आसन्नतमः समाधि लाभइत्युक्त्वा ईश्वरप्रणिधानाद्वेतिईश्वरप्रणिधानस्यसर्वाधिकत्वमुक्तं तेनैकांतिनमहादेवेन

९ १० ११

मो०
५५५

554

ऐ५१

परासीदिति। अत्र मानसादीनां सप्तानां पूर्वपूर्वस्मिन्नुत्तरेषां सर्वेषामनुगमोऽस्ति न तूत्तरस्मिन्पूर्वपूर्वस्य कारणं हि कार्येऽनुगतं न तु कार्यं कारणेऽनुगमोऽस्तीति प्र
सिद्धं लोके। तत्र मानसं नाम स्थूलं समित्कुशाज्यगंधपुष्पधूपदीपाद्युपकरणं शालग्रामप्रासादादिप्रतिमालंबनं दैवं पित्र्यं च धर्मं नारायणेनोपदिष्टं फेन
पादयोऽनुवर्तन्ते इति श्लोकत्रयार्थः। अयं भावः। अग्न्यर्केन्दूपशालग्रामप्रतिमादिस्थूलालंबनेन पुरश्चरणादरेणैनं तत्र दीर्घकालोपबृंहितं हृदि
देशोपासीनस्य अस्मादीनां चेतनेन रूपं दृष्टिगोचरं भवति। तत्र हि तदुत्तमस्थतरं हृद्गमिव सर्पः सम्यग्निरीक्ष्यमाणो लीयते रज्जुरेव प्रकाशते तेन दहरादिहाप्यत्रा

परासीन्मानसं जन्म नारायणमुखोद्भूतं ब्रह्मणः पृथिवीपाल तत्र नारायणः स्वयं १२ तेन धर्मेण कृत
वान्दैवं पित्र्यं च भारत फेनपा ऋषयश्चैव तं धर्मं प्रतिपेदिरे १३ वैखानसाः फेनपेभ्यो धर्ममेतं प्रपेदिरे
वैखानसेभ्यः सोमस्तु ततः सोऽन्तर्दधे पुनः १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दीनां तीव्राभिनिवेशेन निरीक्ष्यमाणानां जाड्यं लीयते चैतन्यं च प्रकाशते। सेयं महाविदेहा नाम धारणा यां प्रकृत्योक्तं योगसूत्रकृता बहिरकल्पिता वृत्ति
र्महाविदेहा ततः प्रकाशावरणक्षय इति। देहाद्बहिर्मनसो वृत्तिर्यावत्स्याकाराद्वृत्तिः सोऽस्य कल्पिता। अकल्पिता अस्यामसिद्धायामेव प्रतिमादीनां
जाड्यं तिरोधीयते नान्यथा। तद्दूरं नैते चैतन्यं परिच्छेदो ध्वंसते स्थैवेक्ष्याणां प्रविलापनीयस्तेन नतरीयमाने संप्रकाशते। यत्स्थमशरीरे यथोत्तरं ज्येनेन
चहदृष्टान्तस्यापि सविशेषत्वमेव प्रविलाप्य निर्विशेषस्ताचिन्मात्रात्मना तिष्ठेदिति १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सा२

एम०
५५५

यदासीच्चाक्षुषमिति। चाक्षुषं चक्षुर्ग्राह्यं तेजः सूर्यादिरश्मिरूपं तत्र निविष्टं तत्सुक्ष्मभास्वरं धकारकं अन्यप्रत्यस्तमितसमस्तविशेषं तद्रूपं दृष्टिं धारयतोपि पूर्ववदेव हविस्स
रेणापि तेन त्रैविश्वरूपं प्रकाशं तेन तत्र चिन्मात्रमिति द्वितीयो योगप्रकारः। एतौ द्वौ वाह्यालंबनौ योगौ। १७ अन्तरालंबनं तृतीयमाह। तृतीयमिति। वाचिकं वा

यदासीच्चाक्षुषंजन्मद्वितीयंब्रह्मणोनृप तदापितामहेनैषसोमाद्धर्मः परिश्रुतः १५ नारायणात्मकोराजन्रुद्रायप्रददौचतं ततोयो
गस्थितोरुद्रः पुराकृतयुगेनृप १६ वालखिल्यानृषीन्सर्वान्धर्ममेनमपाठयत् अंतर्दधेततोभूयस्तस्यदेवस्यमायया १७ तृ
तीयंब्रह्मणोजन्मयदासीद्वाचिकंमहत् तत्रैषधर्मः संभूतः स्वयंनारायणान्नृप १८ सुपर्णोनामतमृषिः प्राप्तवान्पुरुषोत्तमात् त
पसावैसुतप्तेनदमेननियमेनच १९ त्रिः परिक्रांतवानेतत्सुपर्णोधर्ममुत्तमं यस्मात्तस्माद्व्रतंह्येतत्त्रिसौपर्णमिहोच्यते २०
ऋग्वेदपाठपठितंव्रतमेतद्धिदुश्चरं सुपर्णाच्चाप्यधिगतोधर्मएषसनातनः २१ वायुनाद्विपदांश्रेष्ठकथितोजगदायुषा वा
योः सकाशात्प्राप्तश्चऋषिभिर्विघसाशिभिः २२ तेभ्योमहोदधिश्चैवप्राप्तवान्धर्ममुत्तमं अंतर्दधेततोभूयोनारायणसमाहितः २३

द्विर्वर्तेमंत्रार्थचिंतनपूर्वकंजपं तत्रापि मातृकास्मरणमतीत्य मंत्रार्थमात्रंध्यायतस्तदाकारायांचित्तवृत्तौपुनः पूर्ववदेवस्वरूपाधिगमद्वारा चिन्मात्रेणावस्थानं
१९ त्रिः परिः क्रांतवान् त्रिरावर्तितवान्। मत्स्यहमिति शेषः २० ऋग्वेदपाठपठितं त्रिसौपर्णं चतुष्कपर्दा युवतिः सुपेशा इत्यादि सुपर्णलिंगकमंत्रत्रयं २१
२२ । २३

मो०
५५५

555

पा१

यदाभूयश्रुति। श्रवणजा। अनाहतध्वनिरूपास्ततेदेवनादब्रह्मंहेसोपनिषत्समिदं २४ तदुपासनं ज गत्सृष्ट्यादिसामर्थ्यंभवतीत्याहस्त्रथेति ३० ३१ ३२ ३६

यदाभूयः श्रवणजासृष्टिरासीन्महात्मनः ब्रह्मणः पुरुषव्याघ्रतत्तेकीर्तयतः शृणु २४ जगत्स्रष्टुमनादेवोहरिर्नारायणः स्वयंचिंतयामासपुरुषंजगत्सर्गकरंप्रभु २५ अथचिंतयतस्तस्यकर्णाभ्यांपुरुषः सृतः प्रजासर्गकरोब्रह्मातमुवाचजगत्पतिः २६ सृजप्रजाः पुत्रसर्वामुखतः पादतस्तथा श्रेयस्तवविधास्यामिबलंतेजश्चसुव्रत २७ धर्मंचमत्तोगृह्णीष्वसात्वतंनामनामतः तेनसृष्टंकृतयुगंस्थापयस्वयथाविधि २८ ततोब्रह्मानमश्चक्रेदेवायहरिमेधसे धर्मंचाग्र्यंसजग्राहसरहस्यंससंग्रहं २९ आरण्यकेनसहितंनारायणमुखोद्भवं उपदिश्यततोधर्मंब्रह्मणेमिततेजसे ३० तंकार्तयुगधर्माणंनिराशीःकर्मसंज्ञितं जगामतमसः पारंयत्राव्यक्तंव्यवस्थितं ३१ ततोथवरदोदेवोब्रह्मालोकपितामहः असृजत्सततोलोकान्कृत्स्नान्स्थावरजंगमान् ३२ ततः प्रावर्ततत्तदाआदौकृतयुगंशुभं ततोहिसात्वतोधर्मोव्याप्यलोकानवस्थितः ३३ तेनैवाद्येनधर्मेण। ब्रह्मालोकविसर्गकृत् पूजयामासदेवेशंहरिंनारायणंप्रभुं ३४ धर्मप्रतिष्ठाहेतोश्चमनुंस्वारोचिषंततः अध्यापयामासतदालोकानांहितकाम्यया ३५ ततः स्वारोचिषः पुत्रंस्वयंशंखपदंनृप अध्यापयत्पुराव्यग्रः सर्वलोकपतिर्विभुः ३६ ॥

शां०
५५५

३८ नासत्ये जन्मनीति नासत्येति पूर्वोक्तरीत्या गंधसंवित्सारसादिसंविदां प्रागुक्तानामुपलक्षणं। अनाहतध्वनि। श्रवणे कारणाभावेपि गुरूक्तयुक्त्या स्फुरति गं
धादिसंविदस्तु चित्तवैयग्र्यक्षणेन स्फुरंतीति पूर्वस्मात्सूक्ष्माः तत्रापि गंधांशस्त्वकांसचिन्मात्रे स्थैर्यमिति योगः ४३ अंडजे जन्मनि तत्त्वात्मनि। अत्र धारणा

९३

ततः शंखपदश्चापि पुत्रमात्मजमौरसं दिशांपालं सुवर्णाभमध्यापयत भारत ३८ सोंतर्दधे ततो भूयः प्राप्ते त्रेतायुगे पुनः
नासत्ये जन्मनि पुरा ब्रह्मणः पार्थिवोत्तम धर्ममेतं स्वयं देवो हरिर्नारायणः प्रभुः ३९ उज्जगारारविंदाक्षो ब्रह्मणः पश्यतस्त
दा सनत्कुमारो भगवांस्ततः प्राधीतवान्नृप ४० सनत्कुमारादपि च वीरणो वै प्रजापतिः कृतादौ कुरुशार्दूल धर्ममेतमधीत
वान् ४१ वीरणश्चाप्यधीत्यैनं रैभ्याय मुनये ददौ रैभ्यः पुत्राय शुद्धाय सुव्रताय सुमेधसे ४२ कुक्षिनामाय प्रददौ
दिशांपालाय धर्मिणे ततोप्यंतर्दधे भूयो नारायणमुखोद्भवः ४३ अंडजे जन्मनि पुनर्ब्रह्मणो हरियोनये एष धर्मः स
मुद्भूतो नारायणमुखात्पुनः ४४ गृहीतो ब्रह्मणा राजन्प्रयुक्तश्च यथाविधि अध्यापिताश्च मुनयो नाम्ना बर्हिषदो
नृप ४५ बर्हिषद्भ्यश्च संप्राप्तः सामवेदांतगं द्विजं ज्येष्ठं नामाभिविख्यातं ज्येष्ठसामव्रतो हरिः ४६ ज्येष्ठाच्चाप्यनुसं
क्रांतो राजानमविकंपनं अंतर्दधे ततो राजन्नेष धर्मः प्रभोर्हरेः ४७ ॥ ॥ ॥ ॥ ॥ ॥

यासिद्ध्या अहं ब्रह्मास्मीति वाक्यश्रवणमात्रात्तत्त्वमस्येतीति निर्विकल्पापेक्षायीत्यर्थः सर्वापेक्षया श्रेयान् ४७ ४० ४० ॥

यदिदं सप्तममीति। अंतर्यामिरूपं जन्माह। सैव समुपोढेष्वनीकेषु इत्यादिना उपक्रांतं गीतायामुक्तमिति। प्रत्यभिज्ञानार्थं इमं विवस्वते योगं प्रोक्तवान्
हमव्ययं विवस्वान्मनवे प्राहान्मनुरिक्ष्वाकवेऽब्रवीदिति तत्र संवशंकी नैनेनष्टयति विवस्वान् जगृहे ननतरस्मादिना ५६ एकव्यूहेति अत्रानिरुद्धस्व

यदिदं सप्तमं जन्म पद्मजं ब्रह्मणो नृप तत्रैष धर्मः कथितः स्वयं नारायणेन हि ४८ पितामहाय शुद्धाय युगादौ लोककारिणे।
पितामहश्च दक्षाय धर्ममेतं पुरा ददौ। ४९ ततो ज्येष्ठे तु दौहित्रे प्रादाद्दक्षो नृपोत्तम आदित्ये सवितुर्ज्येष्ठे विवस्वान् जगृहे त
तः ५० त्रेतायुगादौ च ततो विवस्वान्मनवे ददौ। मनुश्च लोकभूत्यर्थं सुतायेक्ष्वाकवे ददौ। ५१ इक्ष्वाकुणा च कथितो व्याप्य लो
कानवस्थितः गमिष्यति क्षयांते च पुनर्नारायणं नृप ५२ यतीनां चापि यो धर्मः स ते पूर्वं नृपोत्तम कथितो हरिगीतासु स
मासविधिकल्पितः ५३ नारदेन तु संप्राप्तः सरहस्यः ससंग्रहः एष धर्मो जगन्नाथात्साक्षान्नारायणान्नृप ५४ एवमेष
महान्धर्म आद्यो राजन्सनातनः दुर्विज्ञेयो दुष्करश्च सात्वतैर्धार्यते सदा ५५ धर्मज्ञानेन चैतेन सुप्रयुक्तेन कर्मणा अहिंसा
धर्मयुक्तेन प्रीयते हरिरीश्वरः ५६ एकव्यूहविभागो वा क्वचिद्द्विव्यूहसंज्ञितः त्रिव्यूहश्चापि संख्यातश्चतुर्व्यूहश्च दृश्यते
५७ हरिरेव हि क्षेत्रज्ञो निर्ममो निष्कलस्तथा जीवश्च सर्वभूतेषु पंचभूतगुणातिगः ५८ ॥ ॥ ॥

तुर्यानुगतः प्रद्युम्नस्त्रितयानुगतः संकर्षणः द्वितयानुगतः वासुदेवः एक एवानेन देवश्चतुर्व्यूहः क्रमेणान्नाद्यभिमानी अधिकारतारतम्यादेषामुपासना नानावस्था
५७ जीवश्च हरिरेवेति संबंधः ५८ ॥

मनश्चाहंकारोपिहरिरेवेत्यन्वयः ५६ एषहरिःलोकविधिःलोकप्रवर्त्तकोंतर्यामी ५९ एकांतधर्मः निष्कामानांभक्तानांधर्मः ६१ आशीःकर्मकाम्यक

मनश्चप्रथितंराजन्पंचेंद्रियसमीरणं एषलोकविधिर्धीमानेषलोकविसर्गकृत ५८ अकर्त्ताचैवकर्त्ताचकार्यंकारणमेवचय
थेछतितथाराजन्क्रीडतेपुरुषोव्ययः ५९ एषएकांतधर्मस्तेकीर्तितोनृपसत्तम मयागुरुप्रसादेनदुर्विज्ञेयोकृतात्मभिः
६० एकांतिनोहिपुरुषादुर्लभाबहवोनृप यद्येकांतिभिराकीर्णंजगत्स्यात्कुरुनंदन ६१ अहिंसकैरात्मविद्भिःसर्वभूत
हितेरतैः भवेत्कृतयुगप्राप्तिराशीःकर्मविवर्जिता ६२ एवंसभगवान्व्यासोगुरुर्ममविशांपते कथयामासधर्मज्ञो[धर्म]
धर्मराज्ञेद्विजोत्तमः ६३ ऋषीणांसन्निधौराजन्शृण्वतोःकृष्णभीष्मयोः तस्याप्यकथयत्पूर्वंनारदःसुमहातपाः ६४
देवंपरमकंब्रह्मश्वेतंचंद्राभमच्युतं यत्रचैकांतिनोयांतिनारायणपरायणाः ६५ जनमेजयउवाच एवंबहुविधंधर्मं
प्रतिबुद्धैर्निषेवितं नकुर्वंतिकथंविप्राअन्येनानाव्रतेस्थिताः ६७ वैशंपायनउवाच तिस्रःप्रकृतयोराजन्देहबंधे
षुनिर्मिताः सात्विकीराजसीचैवतामसीचैवभारत ६८ देहबंधेषुपुरुषःश्रेष्ठःकुरुकुलोद्वह सात्विकःपुरुषव्याघ्रभ
वेन्मोक्षायनिश्चितः ६९ अत्रापिसविजानातिपुरुषंब्र[ह्म]वित्तमं नारायणपरोमोक्षस्ततोवैसात्विकःस्मृतः ७०

कर्म ६२ योगधर्मोनादरहेतुमवि[द्यां]दर्शयति। एवमित्यादिना ६७ देहबंधेषुदेहस्यबंधोयेषांतेषुजीवेषु ६८ पुरुषःसात्विकःश्रेष्ठइतियोजना।
६९ सात्विकलक्षणमाह। अत्रापीत्यादिना ७० ॥

७२ जायमानमिति जन्मसमये राजसादिषु एव मां प्रपश्येत् न तु रूपेयेतिशेषः ७४ ईशकृपयैव ज्ञानं जायते न तु स्वेच्छयेत्याह नारायणेनेति । तस्माद्भक्तिरेव श्रेयसीति भा
वः ७५ भक्तिमेव विशेषयमाह राजसीति । व्यामिश्रे सदोषे ७६ एनं राजसं ब्रह्मा पश्यति प्रवृत्तिमार्गे नियोजयतीत्यर्थः ७७ काममिति वैकारिकाः सात्त्विकाहं

मनीषितं च प्राप्नोति चिन्तयन्पुरुषोत्तमं एकान्तभक्तिः सततं नारायणपरायणः ७१ मनीषिणो हि ये केचिद्यतयो मोक्षधर्मि
णः तेषां विच्छिन्नतृष्णानां योगक्षेमवहो हरिः ७२ जायमानं हि पुरुषं यं पश्येन्मधुसूदनः सात्त्विकस्तु स विज्ञेयो भवेन्मोक्षे च
निश्चितः ७३ सांख्ययोगेन तुल्यो हि धर्म एकान्तसेवितः नारायणा[illegible]त्मके मोक्षे ततो यान्ति परां गतिं नारायणेन दृष्टश्च प्र
तिबुद्धो भवेत्पुमान् ७४ एवमात्मेच्छया राजन्प्रतिबुद्धो न जायते राजसी तामसी चैव व्यामिश्रे प्रकृती स्मृते ७५ तदात्मकं हि
पुरुषं जायमानं विशांपते प्रवृत्तिलक्षणैर्युक्तं नावेक्षति हरिः स्वयं ७६ पश्यत्येनं जायमानं [illegible] ब्रह्मा लोकपितामहः
रजसा तमसा चैव मानसं समभिप्लुतं ७७ कामं देवाश्च ऋषयः सत्त्वस्था नृपसत्तम हीनाः सत्त्वेन सूक्ष्मेण ततो वैकारिकाः स्मृ
ताः ७८ जनमेजय उवाच कथं वैकारिको गच्छेत्पुरुषः पुरुषोत्तमं वद सर्वं यथादृष्टं प्रवृत्तिं च यथाक्रमं ७९ ॥ ॥ ॥

कारजाः सत्त्वेन सूक्ष्मेणापि स्वेन सात्त्विकाः सन्तः कदाचिन्मुच्यन्त इत्यर्थः अत एव वेदद्वारा ब्रह्मज्ञानेन मुच्यन्ते छान्दोग्यपरिशु ७८ वैकारिकोऽहंकारः जीवः स पु
रुषोत्तमं कथं गच्छेत् तत्त्वमसि प्रत्यगात्मताः योगान्न जीवस्य ब्रह्मभावो घटत इत्यर्थः ७९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अज्ञानुभवस्थमानमित्याह सुसूक्ष्ममिति। सुसूक्ष्मं दुर्ज्ञेयं तत्त्वेन अनारोपितेन रूपेण युक्तं अधिष्ठानमात्रं स्वयथाव ह्येव चतुर्विंशतितत्त्वरूपोपाधियुतं। तदेव त्रिभिरक्षरैः अकारउकारमकारैः संयुक्तं सम्यक्तमाहितं उपाधिसंयोगेन एतदेव पुरुषः पुरुषं गच्छेदिति सुष्यते न तत्र प्राप्यप्रापकत्वलक्षणो गमनगरमनव स्येदस्ति किंतु उपाधिवियोग एव तत्प्राप्तिरित्यर्थः २० एवमिति एकं समुच्चितं सांख्यं आत्मानात्मविवेकः योगश्चित्तवृत्तिनिरोधः वेदारण्यके श्री

वैशंपायन उवाच सुसूक्ष्मं तत्त्वसंयुक्तं संयुक्तं त्रिभिरक्षरैः पुरुषः पुरुषं गच्छेन्निष्क्रियः पंचविंशकः २० एवमेकं सांख्य योगं वेदारण्यकमेव च परस्परांगाण्येतानि पंचरात्रं च कथ्यते २१ एष एकांतिनां धर्मो नारायणपरात्मकः यथा समुद्रा त्प्रसृता जलौघास्तमेव राजन्पुनराविशंति २२ इमे तथा ज्ञानमहाजलौघा नारायणं वै पुनराविशंति एष ते कथितो धर्मः सात्वतः कुरुनंदन २३ कुरुष्वैनं यथान्यायं यदि शक्तोसि भारत एवं हि स महाभागो नारदो गुरवे मम २४ श्वेतानां य तीनां चाह एकांतगतिमव्ययां व्यासश्चाकथयत्प्रीत्या धर्मपुत्राय धीमते २५ स एवायं मया तुभ्यमाख्यातः प्रसृतो गु रोः इत्थं हि दुश्चरो धर्म एष पार्थिवसत्तम २६ यथैव त्वं तथैवान्ये भवंतीह विमोहिताः ॥ ॥ ॥ ॥ ॥ ॥"

वचस्तोमेदपरं तत्त्वमस्यादिवाक्यं तज्ज्ञानं पंचरात्रं भक्तिमार्गः परमगुरोः कृतानां वैदिकानां कर्मणामर्पणं एतत्सर्वं एककार्यकारित्वात्समुच्चितमे वमत्र तु विकल्पितमित्यर्थः २० उपसंहरति एष इति नारायणपरात्मकः नारायणनिष्ठः २१ यथेति २४ श्वेतानां रहस्यादीनां यतीनां काम्याप्यधारिणां २७ ॥ ॥ ॥ ॥ ॥

मो०
५५८

558

कृष्णोऽद्वैतं प्रतिपादितं निगमपतिः कृष्ण एवेति। भावनः पालकः ८८ एकसप्तत्यधिकशततमोऽध्यायः। कृष्णोऽद्वैतमुक्तं तत्त्वं सांख्यादिभिः सर्वैः प्राप्यं स्वकैर्मैवेति चउक्तं तत्र
तैः समुच्चितैर्विकल्पितैर्वा प्राप्यं तदिति संदिहानः पृच्छति सांख्येति १ अज्ञानतमोनुदायेति छेदः ३ पितामहस्य आद्यो नारायणः तं पंचमं नारायणावतारं वदं
तीत्यर्थः तथाहि कार्यस्य कारणानन्यत्वाद्ब्रह्म आत्मा वै पुत्रनामासीति गौणाभेदाद्वा व्यासस्य नारायणांशत्वाद्वा पञ्चमनारायणत्वं कपिलहिरण्यगर्भैः तदीयैश्च

कृष्ण एव हि लोकानां भावनो मोहनस्तथा संहारकारकश्चैव कारणं च विशांपते ८८ शांतो मोक्षधर्मेषु एकांतिभावे जनमेजय उवाच सांख्ययोगं पंचरात्रं वेदारण्यकमेव च ज्ञानान्येतानि ब्रह्मर्षे लोकेषु प्रचरन्ति ह १ किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने प्रब्रूहि वै मया पृष्टः प्रवृत्तिं च यथाक्रमं २ वैशंपायन उवाच जज्ञे बहुज्ञं परमत्युदारं यं द्वीपमध्ये सुतमात्मयोगात् पराशराद्गन्धवती महर्षिं तस्मै नमोऽज्ञानतमोनुदाय ३ पितामहाद्यं प्रवदन्ति षष्ठं महर्षिमार्षेयविभूतियुक्तं नारायणस्यांशजमेकपुत्रं द्वैपायनं वेदमहानिधानं ४ तमादिकाले सुमहाविभूतिर्नारायणो ब्रह्ममहानिधानं ससर्ज पुत्रार्थमुदारतेजा व्यासं महात्मानमजः पुराणः ५

इत्युक्तं। नारायणस्यांशजं कृष्णद्वैपायनं व्यासं विद्धि नारायणांशजमिति स्मृतेः पितामहाद्यमारभ्य यं षष्ठं वदंतीति वा यस्मात् पितामहाद्यं षष्ठं वदंतीति
वा० ध्यात्तस्योज्यं सर्वथापि पितामहाद्यनिर्देशकं पदं ४ ५ ॥ ॥ श्रीरामाय नमः ॥ ॥श्रीकृष्णाय नमः श्रीसरस्वत्यै नमः ॥ ।

राम०
५५८

नारायणात्पुत्रार्थं व्यासः संजज्ञे स्पेन्द्रास्विपतितत्वेपवेति १२ इत्यत्रारम्भमन्त्रानांसे हेतोमेपसंतोयंथः स्पष्टार्थः १३ १४ १७

जनमेजय उवाच त्वयैव कथितः पूर्वं संभवो द्विजसत्तम वसिष्ठस्य सुतः शक्तिः शक्तिपुत्रः पराशरः पराशरस्य दायादः
कृष्णद्वैपायनो मुनिः ६ भूयो नारायणसुतं त्वमेवैनं प्रभाषसे किमतः पूर्वजं जन्म व्यासस्यामिततेजसः कथयस्वोत्तममते
जन्म नारायणोद्भवं ७ वैशंपायन उवाच वेदार्थान्वेत्तुकामस्य धर्मिष्ठस्य तपोनिधेः गुरोर्मे ज्ञाननिष्ठस्य हिमवत्पाद आसतः
८ कृत्वा भारतमाख्यानं तपःश्रान्तस्य धीमतः शुश्रूषां तत्परा राजन्कृतवन्तो वयं तदा ९ सुमन्तुर्जैमिनिश्चैव पैलश्च सुदृढ
व्रतः अहं चतुर्थः शिष्यो वै शुको व्यासात्मजस्तथा १० एभिः परिवृतो व्यासः शिष्यैः पंचभिरुत्तमैः शुशुभे हिमवत्पादे भू
तैर्भूतपतिर्यथा ११ वेदानावर्तयन्सांगान्भारतार्थांश्च सर्वशः तमेकमनसं दांतं युक्ता वयमुपास्महे १२ कथांतरेऽथ क
स्मिंश्चित्पृष्टोऽस्माभिर्द्विजोत्तमः वेदार्थान्भारतार्थांश्च जन्म नारायणात्तथा १३ स पूर्वमुक्त्वा वेदार्थान्भारतार्थांश्च तत्त्व
वित् नारायणादिदं जन्म व्याहर्तुमुपचक्रमे १४ शृणुध्वमाख्यानवरमिदमार्षेयमुत्तमं आदिकालोद्भवं विप्रास्तपसा
धिगतं मया १५ प्राप्ते प्रजाविसर्गे वै सप्तमे पद्मसंभवे नारायणो महायोगी शुभाशुभविवर्जितः १६ ससृजे नाभितः पूर्वं ब्र
ह्माणममितप्रभः ततः स प्रादुरभवदथैनं वाक्यमब्रवीत् १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ममत्वंनाभितोजातः प्रजासर्गकरः प्रभुः सृजप्रजास्त्वंविविधाब्रह्मन्सजडपंडिताः १८ सएवमुक्तोविमुखश्चिंतयाआकुलमानसः
प्रणम्यवरदंदेवमुवाचहरिमीश्वरं १९ काशक्तिर्ममदेवेशप्रजाःस्रष्टुंनमोस्तुते अप्रज्ञावानहंदेवविधत्स्वयदनंतरं २० सएवमु
क्तोभगवानभूत्तत्रांतर्हितस्ततः चिंतयामासदेवेशोबुद्धिंबुद्धिमतांवरः २१ स्वरूपिणीततोबुद्धिरुपतस्थेहरिंप्रभुं योगेनैवेनानि
योगःस्वयंनियुयुजेतदा २२ सत्तामैश्वर्ययोगस्याबुद्धिर्गतिमतीसती अवाक्वचनंदेवोबुद्धिंवैप्रभुरव्ययः २३ ब्रह्माणंप्रविशस्व
त्रिलोकस्यार्थसिद्धये ततस्तमीश्वरादिष्टाबुद्धिःक्षिप्रंविवेशसा २४ अथैनंबुद्धिसंयुक्तंपुनःसददृशेहरिः भूयश्चैवंवचःप्रा
ह सृजेमाविविधाःप्रजाः २५ बाढमित्येवकृत्वासौयथाज्ञांशिरसाहरेः एवमुक्त्वासभगवांस्तत्रैवांतरधीयत २६ प्रापचैवंमुहू
र्तेनस्वस्थानंदेवसंज्ञितं तांचैवप्रकृतिंप्राप्यएकीभावगतोभवत् २७ अथास्यबुद्धिरभवत्पुनरन्यातदाकिल सृष्टाःप्रजाइमा
ःसर्वाब्रह्मणापरमेष्ठिना २८ दैत्यदानवगंधर्वरक्षोगणसमाकुला जाताहीयंवसुमतीभाराक्रांतातपस्विनी २९ बहवोबलि
नःपृथ्व्यांदैत्यदानवराक्षसाः भविष्यंतितपोयुक्तावरान्प्राप्स्यंतिचोत्तमान् ३० अवश्यमेवतैःसर्वैर्वरदानेनदर्पितैः बाधित
व्याःसुरगणाऋषयश्चतपोधनाः ३१ तत्रन्याय्यमिदंकर्तुंभारावतरणंमया अथनानासमुत्पन्नैर्वसुधायांयथाक्रमं ३२
निग्रहेणचपापानांसाधूनांप्रग्रहेणच इयंतपस्विनीसत्याधारयिष्यतिमेदिनी ३३ मयाह्येषाहिध्रियतेपातालस्थेनभोगिना
मयाधृताधारयतिजगद्विश्वंचराचरं ३४ तस्मात्पृथ्व्याःपरित्राणंकरिष्येसंभवंगतः स्वयंसंचिंत्यपितातुभगवान्मधुसूदनः ३५

स्वरूपाण्यनेकान्सृजन्प्राक्कूर्मोवभवायसः वाराहंनारसिंहंचवामनंमानुषंतथा ३६ एभिर्मयानिहन्तव्यादुर्विनीताः सुरारयः स्थापयिष्योजगन्स्व
धर्मैः शब्देनानुनादयन् ३७ सरस्वतीमुच्चचारतत्रसारस्वतोभवत् अपान्तरतमानामसुतोवाक्संभवः प्रभुः ३८ भूतभव्यभविष्यज्ञः सत्य
वादीदृढव्रतः तमुवाचनतंमूर्ध्नादेवानामादिरव्ययः ३९ वेदाख्यानेश्रुतिः कार्यात्वयामतिमतांवर तस्मात्कुरुयथाज्ञप्तंममैतद्वचनंमुने
४० तेनभिन्नास्तदावेदामनोः स्वायंभुवेन्तरे ततस्तुतोषभगवान्हरिस्तेनास्यकर्मणा ४१ तपसाचसुतप्तेनयमेननियमेनच मन्व
न्तरेषुपुत्रत्वमेवंमेवंप्रवर्त्तकः ४२ भविष्यसिचलोब्रह्मन्नप्रधृष्यश्चवैनिसर्गः पुनस्तिष्येचसंप्राप्तेकुरवोनामभारताः ४३ भविष्यन्
तिमहात्मानोराजानः प्रथिताभुवि तेषांत्वत्तः प्रसूतानांकुलभेदोभविष्यति ४४ परस्परविनाशार्थंत्वामृतेद्विजसत्तम तत्राप्यनेक
धावेदान्भेत्स्यसेतपसान्वितः ४५ कृष्णेयुगेचसंप्राप्तेकृष्णवर्णोभविष्यसि धर्माणांविविधानांचकर्त्ताज्ञानकरस्तथा ४६ भविष्य
सितपोयुक्तोनचरागाद्विमोक्ष्यसे वीतरागश्चपुत्रस्तेपरमात्माभविष्यति ४७ महेश्वरप्रसादेननैतद्वचनमन्यथा यंमानसंवैप्रवदंतिवि

मो०
५६०

560

प्राः पितामहस्योत्तमबुद्धियुक्तः। वसिष्ठमप्यंचतपोनिधानंयस्यातिसूर्यंव्यतिरिच्यतेभाः ४९ तस्मात्स्वयंचापितितोमहर्षिः पराशरेणा
ममहाप्रभावः पितासितेवेदनिधिर्वरिष्ठोमहातपावैतपसोनिवासः ५० कानीनगर्भः पितृकन्यकायांतस्माद्दृषेस्त्वंभवितात्वपुत्रः
५१ भूतभव्यभविष्याणांछिन्नसर्वार्थसंशयः येह्यतिक्रान्तकाः पूर्वंसहस्रयुगपर्ययाः ५२ तांश्चसर्वान्मयोद्दिष्टान्द्रक्ष्यसेत्वंतपसान्वि
तः पुनर्द्रक्ष्यसिचानेकसहस्रयुगपर्ययान् ५३ अनादिनिधनंलोकेचक्रहस्तंचमांमुने अनुध्यानान्मममुनेनैतद्वचनमन्यथा
५४ भविष्यति महासत्त्वंख्यातिश्चाप्यतुलातव शनैश्चरः सूर्यपुत्रोभविष्यतिमनुर्महान् ५५ तस्मिन्मन्वंतरेचैवमन्वादिगणा
पूर्वकः त्वमेवभवितावत्समत्प्रसादान्नसंशयः ५६ ॥ ॥ ॥ ॥ ॥ ॥

राम०
५६०

६२ अत्रैवकेचिदध्यायंसमापयंति।प्रासंगिकोपसंहारपूर्वकंप्रश्नस्योत्तरंवक्तुंप्रतिजानीतेसपतत्र्यति ६३ नानामतानिभिन्नप्रस्थानानि ६४ सर्वेषांप्रमाणपसिद्धेति

के दत

यत्किंचिदिहधेनलोकेसर्वेतन्मद्विचेष्टितं अन्योपायस्यचिंतयतिस्वच्छंदंविदधाम्यहं एवंसारस्वतस्तृषिमपांतरतमस्तथा ५० उक्त्वावचनमीशा
नः साधयस्वेसथाब्रवीत सोहंतस्यप्रसादेनदेवस्यहरिमेधसः ५८ अपांतरतमानामततोजातोज्ञयाहरेः पुनस्वजातोविख्यातोवशिष्ठ
कुलनंदनः ५९ तदेतत्कथितंजन्ममयापूर्वकमात्मनः नारायणप्रसादेनतथानारायणांशजं ६० मयाहिसुमहत्तप्तंतपः परमदारुणं पु
रामतिमतांश्रेष्ठाः परमेणसमाधिना ६१ एतद्वः कथितंसर्वेयन्मांपृछतपुत्रकाः पूर्वजन्मभविष्यंचभक्तानांस्नेहतोमया ६२ वैशं
पायनउवाच एषतेकथितः पूर्वसंभवोस्मद्गुरोर्नृप व्यासस्याक्लिष्टमनसोयथापृष्टः पुनः शृणु ६३ सांख्यंयोगंपंचरात्रंवेदाः
पाशुपतंतथा ज्ञानान्येतानिराजर्षेविद्धिनानामतानिवै ६४ सांख्यस्यवक्ताकपिलः परमर्षिः सउच्यते हिरण्यगर्भोयोगस्यवे
त्तानान्यः पुरातनः ६५ अपांतरतमाश्चैववेदाचार्यः सउच्यते प्राचीनगर्भंतमृषिंप्रवदंतीहकेचन ६६ उमापतिर्भूतपतिः
श्रीकंठोब्रह्मणः सुतः उक्तवानिदमव्यग्रोज्ञानंपाशुपतंशिवः ६७ पंचरात्रस्यकृत्स्नस्यवेत्तातुभगवान्स्वयं सर्वेषुचनृपश्रेष्ठ
ज्ञानेष्वेतेषुदृश्यते ६८ ॥

मसा ८

शिवपूर्वकत्वेनसर्वाणिमानीति सांख्यस्येत्यादिना ६५ ६६ ६७ ६८ ६८ ६८ ६८

आगमेवेदंतानंअनुभवंचानतिक्रम्यएतेषांसर्वेषांनिष्ठापरमतात्पर्यविषयीभूतोर्थस्तुनारायणःपरमात्मैवेतिदृष्टव्यतइत्यर्थः ६९ अत्रभिन्नप्रस्थानत्वाभिमा
नोमूढानामेवत्याहनचैनमितिस्वमतमाहतमेवेति ७० निःसंशयेषुश्रुत्यनुभवबलादित्थमितिनिश्चयःहेतुबलात्कुतर्कबलात्ससंशयान ७१ इदमेवपांच
रात्रप्रेमिमुच्यतइत्याहपंचरात्रेति ७२ सनातनेअनादिप्रवृत्तियाहितत्वाथतमूल्वउभेअपि।तेननपांचरात्रस्यपुंप्रणीतत्वेवेदविरुद्धत्वेचसत्यपितथापिअत्रांतर

यथागमंयथाज्ञानंनिष्ठानारायणःप्रभुः नचैनमेवंजानंतितमोभूताविशांपते ६९ तमेवशास्त्रकर्त्तारःप्रवदंतिमनीषिणः
निष्ठांनारायणमृषिंनान्योस्तीतिवचोमम ७० निःसंशयेषुसर्वेषुनित्यंवसतिवैहरिः ससंशयानहेतुबलान्नाध्यावसतिमा
धवः ७१ पंचरात्रविदोयेतुयथाक्रमपरानृप एकांतभावोपगतास्तेहरिंप्रविशंतिवै ७२ सांख्यंचयोगंचसनातनेद्वेवेदाश्चस
र्वेनिखिलेनराजन सर्वैःसमस्तैर्ऋषिभिर्निरुक्तोनारायणोविश्वमिदंपुराणं ७३ शुभाशुभंकर्मसमीरितंयत्प्रवर्त्ततेसर्व
लोकेषुकिंचित तस्मादृषेस्तद्भवतीतिविद्याद्दिव्यंतरिक्षेभुविचाप्सुचेति ७४ इतिशांतौमोक्षधर्मेषुद्वासप्ततिः ७४

तात्पर्यभेदेपिपरमतात्पर्येएकमेवेत्याहएतेसर्वेरिति।एकविंशतिनारायणइतिएकंसर्वपदमात्माब्रह्मैवेदंसर्वमित्यादिश्रुतिनेरश्चोप्यब्रह्मात्माहैतरूपोदर्शितः ७३ शुभाशु
भमितिसर्वत्रनारायणएवप्रवर्त्तकोंतर्यामीत्यर्थः समीरितंचेष्टितंविहितं।तस्माद्दृषेर्नारायणात ७४ द्वासप्तत्यधिकशततमः ॥ ॥ ॥ ॥

पुरुषभेदमंतरेणबंधमोक्षव्यवस्थानुपपत्तेः श्रूयमाणस्यात्मैकत्वस्यैनतिलंघनीयत्वात् संदिहानः पृच्छतिबहवइति नन्वेकस्मिन्नाकाशे कर्णशष्कुलीरूपो
पाधिभेदात् श्रोत्रभेदः कल्पितोबाधिर्यसुश्रवत्वादिव्यवहारहेतुः शब्दग्रहासंकरहेतुश्चवस्वमेकस्मिन्नात्मनिश्रोत्रे करणभेदाज्जीवभेदः कल्पितोबद्धमुक्त
व्यवहारहेतुर्भोगासंकरहेतुश्चभविष्यतीतिव्यवहारपरमार्थदशापुरुषबहुत्वैकत्वेसंभवतइतिननत्रप्रश्नश्चमसंगतोस्याशंक्याहकोह्यत्रेति। योषावावर्गोनेमा

कए१

जनमेजयउवाच बहवंपुरुषाब्रह्मन्नुताहोएकवतु
कोह्यत्रपुरुषः श्रेष्ठः कोवायोनिरिहोच्यते १
वैशंपायनउवाचबहवः पुरुषालोकेसांख्ययोग
विचारिणा नैतदिच्छंतिपुरुषमेकंकुरुकुलोद्वह २

ष्विगितिवदात्मैवेदंसर्वमित्यात्माभेदश्रुतेरुपासनार्थंगौणभेदपरत्वेनाप्युपपत्तेरात्मैकत्वासिद्धेःशष्कुलीदृष्टांतेनापिउक्तव्यवस्थाकल्पनस्यनिर्मूलत्वा
त्स्मान्नानात्वेरणस्योह्येनासिद्धेः कः श्रेष्ठः पुरुषोस्तिकोवायोनिरस्तिनकोपीत्यर्थः १ लोकेव्यवहारेशास्त्रतस्तस्मिन्व्यवहारे व्यवहारेबहवएवपुरुषा
नत्वेकइत्यर्थः परमार्थतस्त्वेकएवनबहवइतिभावः २ ॥

हव१

सम्मतमाह। बहूनामिति। पुरुषु उपाधिषु वसन्तीति पुरुषाणां घटमठाकाशादीनां मूलप्रतिबिंबाद्यात्मनां यथैका योनिर्महाकाशबिंबपुरुषादिरूपा तथैव तं स्मरीनोपोनिः एकपुरुषमाख्यास्यामीत्यर्थः। अयं भावः। एकात्म्यश्रुतेर्नानात्मवादस्य मानान्तरविरोधाद्वास्तवत्वेन नासः। एकस्मादपि प्राणिकर्मवासनागर्भितज्ञानसहायात् स्वप्नवद्विषयाद्युत्पत्तेरविरोधात्। शङ्कुलीन्यायेन कस्मिन्नैयायिकभेदकल्पनया वर्मोक्षाद्व्यवस्थोपपत्तेः स्वानाद्यः। उपक्रमोपसंहाराभ्यासोऽपूर्वताफलं अर्थवादोपपत्ती च लिङ्गैः श्रुतेरैकात्म्ये एव तात्पर्यदर्शनात्। तथा हि सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति उपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति च उपक्रमोपसंहारयोरेकरूप्येण तदात्म्यमित्यादेरसकृच्छ्रवणमभ्यासः। मानान्तरानवगतत्वात्

बहूनां पुरुषाणां च यथैका योनिरुच्यते तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकं ३

त्वादात्मैकत्वस्यापूर्वता। उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानात्सर्वविज्ञानं फलं। यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादित्यादिमृदादिदृष्टान्ता उपपत्तयः। लवणमेतदुदकेऽवधायेत्यग्रोधफलमत आहरेति स्यादित्यर्थवादः। लवणोदकन्यायेन ब्रह्मणि जगल्लयं न्यग्रोधकणिकान्यायेन ततो जगदुत्पत्तिं च प्रतिपादयन्नदित्येकाद्वितीयत्वमवगमयति। एवमैकात्म्यं प्रतिपाद्य घटसंवृतमाकाशं नीयमाने यथा घटे घटी नीयेत नाकाशं तद्वज्जीवो नभोपमः। एक एव तु भूतात्मा भूते भूते प्रतिष्ठितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्। अवरोहोऽस्मिन् गेहे ततोऽन्यत्र लोकेनविविंद्यसत् नितेन हि प्रसूढा दृश्यादिश्रुतिभिः घटाकाशजलचन्द्रादिदृष्टान्तपूर्वकं बन्धस्याज्ञानकार्यत्वं प्रतिपाद्यते। तेन श्रुतेरूपासना यां तात्पर्यमस्ति

का १

इतीमे च गुरुं नमस्कारपूर्वकं आख्यायिकामुखेनोपपादयति नमस्कृत्येत्यादिना आख्यायिकेयमिष्टार्था १५ १९ ॥ ॥ ॥ ॥

नमस्कृत्वा च गुरवे व्यासायाविदितात्मने तथा युक्ताय दान्ताय वंद्याय परमर्षये ४ इदं पुरुषसंज्ञो हि सर्ववेदेषु पार्थिव आ
तन्मतस्य च विख्यातमृषिसिंहेन चिन्तितं ५ उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः अध्यात्मचिन्तामाश्रित्य शास्त्रा
ण्युक्तानि भारत ६ समासतस्तु यद्व्यासः पुरुषैकत्वमुक्तवान् तत्तेऽहं संप्रवक्ष्यामि प्रसादादमितौजसः ७ अत्राप्युदा
हरन्तीममितिहासं पुरातनं ब्रह्मणा सह संवादं त्र्यंबकस्य विशांपते ८ क्षीरोदस्य समुद्रस्य मध्ये हाटकसंप्रभः वैजयन्त
इति ख्यातः पर्वतप्रवरो नृप ९ तत्राध्यात्मगतिं देवः एकाकी प्रविचिन्तयन् वैराजसदनान्नित्यं वैजयन्तं निषेवते १०
अथ तत्रासतस्तस्य चतुर्वक्त्रस्य धीमतः ललाटप्रभवः पुत्रः शिव आगाद्यदृच्छया ११ आकाशेन महायोगी पुरा
त्रिनयनः प्रभुः ततः खान्निपपाताशु धरणीधरमूर्धनि १२ अग्रतश्चाभवत्प्रीतो ववन्दे चापि पादयोः तं पादयोर्नि
पतितं दृष्ट्वा सव्येन पाणिना १३ उत्थापयामास तदा प्रभुरेकः प्रजापतिः उवाच चैनं भगवांश्चिरस्यागतमात्मजं १४
पितामह उवाच स्वागतं ते महाबाहो दिष्ट्या प्राप्तोऽसि मेऽन्तिकं कच्चित्ते कुशलं पुत्र स्वाध्यायतपसोः सदा नित्यमुग्रतपा अस्ति
दि ततः पृच्छामि ते पुनः १५ ॥ ॥ ॥ ॥ ॥

२३ बहवः पुरुषाब्रह्मन्निति पुरुषाणां सृष्टापि पुरुषाणां प्रणामतीत्याश्चर्यं संघातान्यः पुरुषो नास्तीति भावः २४ बहवः पुरुषाः पुत्रेति ये संघातान्मा
नस्त्वयोद्धृताः सन्त इति क्रान्तिमसृक्षे सौ वा यत्न विषये वेदाप्रतिया धैनेत न दृष्टमित्यर्थः अनधिगतार्थज्ञापकं हि प्रमाणं आत्मभेदस्वाधिग

उद्धवउवाच त्वत्प्रसादेन भगवन्त्वा ध्यायतत्परो मम कुशलं चाव्ययं चैव सर्वस्य जगतस्तथा १७ चिरदृष्टोहि भगवानद्वै
रजसर्दृष्टेन मया तेनाहं पर्वतं प्राप्तस्तिमं त्वत्प्रसादसेवितं १८ कौतूहलं चापि हि मे स्वकान्तगमनेन ते नैतत्कारणमल्पं हि
भविष्यति पितामह १९ किं नु तत्सदनं श्रेष्ठं क्षुत्पिपासाविवर्जितं सुरासुरैरध्युषितं ऋषिभिश्चामितप्रभैः २० गंधर्वैरप्स
रोभिश्च सततं संनिषेवितं उत्सृज्येमं गिरिवरमेकाकी प्राप्तवानसि २१ ब्रह्मोवाच वैजयंतो गिरिवरः सततं सेव्यते मया
अत्रैकाग्रेण मनसा पुरुषश्चिंत्यते विराट् २२ रुद्रउवाच बहवः पुरुषा ब्रह्मन्स्त्वया सृष्टाः स्वयंभुवा सृज्यन्ते चापरे
ब्रह्मन्नैवैकः पुरुषो विराट् २३ कोऽसौ चिन्त्यते ब्रह्मंस्त्वयैकः पुरुषोत्तमः एतन्मे संशयं ब्रूहि महत्कौतूहलं हि मे
२४ ब्रह्मोवाच बहवः पुरुषाः पुत्र ये त्वया समुदाहृताः एवमेतदतिक्रान्तं द्रष्टव्यं नैवमित्यपि २५ आधारं तु प्रवक्ष्या
मि एकस्य पुरुष[illegible]स्य ते बहूनां पुरुषाणां स यथैका योनिरुच्यते २६ ॥ ॥ ॥ ॥ ॥ ॥

तत्सेवितेन शास्त्रस्य विषयः तत्परत्वाद्धि हि मम स्यमे वज्रामिति वत्त शास्त्रस्यानुवादकत्वापत्तेः अतस्तत्समस्तादिवाक्यं न गोणाभेदपरमित्यर्थः २५ आधा
रोधिष्ठानं एकस्य विराजः सोपाधिकत्वे पि पुरुषस्यैकत्वमस्ति किमुत निरुपाधिकत्वे इति भावः २६ ॥ ॥ ॥ ॥ ॥ ॥

५६३

विश्वं विराजं परमं सर्वात्मानं सुमहत्तमं कारणं निर्गुणं सगुणं। अनेनानिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः अमी श्लोकाः तत्र निर्गुणस्यैव निर्गुणो वासुदेव एवेश इत्यर्थः २०
अध्यायः २ एवमेव पुरुषैकत्वं दर्शयन्निरूपयन्नध्यायान्तरमादाय मोक्षधर्मस्यार्थमुपसंहरति अणुपूर्वमित्यादिना पुरुषः पूर्णत्वात् शाश्वतः आद्यन्तशून्यत्वात् अव्ययः
अपरिणामित्वात्। अतएव अक्षयः अपचयहीनः अप्रमेयः वाङ्मनसातीतत्वात् सर्वगः सर्वोपादानत्वात् १ सगुणः बुद्धीन्द्रियादिसहितैः निर्गुणैः सा

तथाहं पुरुषं विश्वं परमं सुमहत्तमं निर्गुणं निर्गुणात्मूलात् प्रविशंति सनातनं २० शांतौ मोक्षधर्मेषु नारायणीये ब्रह्मोवाच अ
णुपूर्वं यथाह्येष पुरुषः शाश्वतोऽव्ययः अक्षयश्चाप्रमेयश्च सर्वगश्च निरुच्यते १ न स शक्यस्त्वया द्रष्टुं मयान्यैर्वापि सत्तम स
गुणो निर्गुणो विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः २ अशरीरः शरीरेषु सर्वेषु निवसत्यसौ वसन्नपि शरीरेषु न स लिप्यति कर्मभि
ः ३ ममांतरात्मा तव च ये चान्ये देहसंज्ञिताः सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित् ४ विश्वमूर्द्धा विश्वभुजो वि
श्वपादाक्षिनासिकः एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखं ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मादिहीनैः मूढैः विश्वो विश्वात्माऽज्ञानेन चिन्मात्रेणैव दृश्यः स्वयंप्रकाश इत्यर्थः २ अशरीरः स्थूलसूक्ष्मकारणशरीरैर्विरहितः न लिप्यते आकाश इव घटयत
नैर्दीपैर्वृत्तलाद्भिर्गन्धादिभिर्वा ३ असान्तरस्थत्वाद्वा रागनिकृत्तरागात्मापि न ग्राह्यः उपाध्यभिनिवेशात् ४ अयमेव विश्वरूप इत्याह विश्वेति सर्वेषां शरीरे
ष्वयमेव शरीरीत्यर्थः ५ ॥ ॥ ॥ ॥

अस्यैव क्षेत्रज्ञत्वं सनिरुक्तमाह क्षेत्राणीति ६ नन्वयमेव क्षेत्रज्ञश्चेत् उत्क्रान्तिगत्यागत्यादिकमस्यैव प्रसक्तमित्याशंक्याह नागतिरिति। घटाकाशस्येवास्य नेति नः आगत्यादिमत्स्वेपि वक्तृत्वेनानैवाक्रियत्वं तेनैव संज्ञेया आत्मनि गतिरस्तीति न ज्ञातव्यमित्यर्थः ७ कातर्हि गतिमतीतेत्यगतिरि। त्याशंक्य अनिर्वचनीया।

क्षेत्राणि हि शरीराणि बीजं चापि शुभाशुभम् तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते ६
नागतिर्न गतिस्तस्य ज्ञेया भूतेषु केनचित् सांख्येन विधिना चैव योगेन च यथाक्रमम् ७ चिन्त
यामि गतिं चास्य न गतिं वेद्मि चोत्तरां यथाज्ञानं तु वक्ष्यामि पुरुषं तु सनातनं ८ तस्यैकत्वम
हत्त्वं च स चैकः पुरुषः स्मृतः महापुरुषशब्दं स बिभर्त्येकः सनातनः ९ ॥ ॥ ॥

स्तिनातिमतीतिरित्याह चिन्तयामीति गतेरन्तर अनिर्वचनं सर्वेन वाङ्निरूप्यं पुरुषं यथाज्ञानं श्रुतियुक्त्यनुसृतीरनतिक्रम्य वक्ष्यामि यतः सनातनं नित्यैकरूपं वे
न दृश्यमित्यर्थमेवेत्ति दुर्निरूपमित्यर्थः ८ अस्य महापुरुषत्वं निर्वक्ति। तस्येति पुरुषान्तरसत्वे एकस्य महत्त्वं न स्यात समत्वात पुरुषाणां ९ ॥ ॥

छिन्नानारूपं १

ननूक्तेरग्न्यादिभिरपरामृष्ट ईश्वर इति योगवार्त्तिकं स च मतान्तरमाशंक्य स्वरूपनिर्णयाय आह एकोऽग्निरित्यादि। एकः सूर्य एव तपति अन्य उपाधितः। एकस्य नानात्वमुपाधिना ... स्वरूपेण तु एक एव। तदुक्तं एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्। द्वितीयपक्षे अग्निरेकधर्मा अग्निरेकधा ... यथा एकोऽग्निर्बहुधा समिध्यते एकः सूर्यो विश्वमनु प्रभूतः एकैवोषाः सर्वमिदं विभाति एकं वा इदं विबभूव सर्वमिति निदर्शनत्रयं पृथक् ... सर्वेष्वेक एव ...

एकोऽग्निर्नाशो बहुधा समिध्यते एकः सूर्यस्तपसो योनिरेका एको वायुर्बहुधा वा
ति लोके महोदधिश्चाभसां योनिरेकः ॥ १० ॥ पुरुषश्चैको निर्गुणो विश्वरूपस्तं नि
र्गुणं पुरुषं चाविशन्ति हित्वा गुणमयं सर्वकर्म हित्वा शुभाशुभं उभे सत्यानृते सत्का
एवं भवति निर्गुणः ॥ ११ ॥

दृष्टान्तान्तरेण वायुदृष्टान्तोऽप्यसंगत्वेनैवासमुद्रदृष्टान्तस्तु उत्पत्तिलयस्थानत्वेनेति विवेकः ॥ १० ॥ दृष्टान्तानुक्त्वा दार्ष्टान्तिकमाह पुरुषश्चेति निर्गुणो गुणमायया विश्व
रूपो भवतीति विश्वानि च रूपाणि तमेव चाविशन्ति समुद्रमिवापः समुद्रमिवेत्यर्थः। कथं निर्गुणं पुरुषं विशन्तीत्यत आह हित्वेति गुणमयं देहेन्द्रियादि स्वं देहं का
रणं च हित्वा तत्कार्यं शुभाशुभं कर्म सत्कारणानि सत्यानृते सत्यमक्षरं जीवाख्यं ... तं प्रधानं मोक्षार्थं सत्कामस्यार्थः अक्षरं प्रधानं ममतां क्षरं हरः क्षरात्मा
नावीशते देव एक इति श्रुतेः अक्षरमिति निर्वचनम् अक्षरमत्ताक्षर इति छान्दसो उत्वाभावः ॥

तं निर्गुणमचिंत्यं मनोऽतीतं ज्ञात्वा साक्षात्कृत्य चतुष्टयं भावस्थूक्ष्मं निचरेत् भावस्य सत्तामात्रस्य स्थूलस्य सूक्ष्मस्य स्वरूपभूतं चतुष्टयं अनिरुद्धप्रद्युम्नसंकर्षणवासुदे-
वापरपर्यायं अधिदैवं विराट्सूत्राव्याकृतशुद्धब्रह्मरूपं। अध्यात्मं विश्वतैजसप्राज्ञतुरीयसंज्ञं अवस्थाचतुष्टयं यः संचरेत् स्थूलसूक्ष्मप्रविलापनक्रमेणा-
योनित्यं समाधिमनुतिष्ठेदित्यर्थः। तस्माल्लक्षणात् असमुन्नद्धः अनपेतशांतः सत्वपरं पुरुषं गच्छेन्नान्य इत्यर्थः १२ एवं योगमार्गेणैके चिंतयोगाः अपरे सां-

अचिंत्यं चापि तं ज्ञात्वा भावस्थूक्ष्मं चतुष्टयं विचेरे घोरसमुन्नद्धः स गच्छेत्पुरुषं शुभं १२ एवं हि परमात्मानं के-
चिदिच्छंति पंडिताः एकात्मानं तथात्मानमपरे ज्ञानचिंतकाः १३ तत्र यः परमात्मा हि स नित्यं [illegible] निर्गुणः स्मृ-
तः सहि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा १४ कर्मात्मा त्वपरो यो-
सौ मोक्षबंधैः स युज्यते स सप्तदशकेनापि राशिना युज्यते च सः एवं बहुविधः प्रोक्तः पुरुषस्ते यथाक्रमं १६

ख्याः आत्मानं प्रत्यंचं एकात्मानं ब्रह्माभिन्नं इच्छंति १३ पक्षद्वयेपि परमात्मशब्दार्थमाह सोऽहं न तत्रेति १४ आत्मशब्दार्थमाह कर्मेति १५ सप्तदशके-
न राशिना लिंगशरीरेण सोपाधिरात्मा जीवः सर्वकर्मभेदात् देवतिर्यगादिभावमापन्नो बहुविध इत्याह एवमिति एवं सोपाधिके पुरुषबहुत्वे सति ये सां-
तं एवं पुंबहुत्वं प्राहुः निरीश्वरसांख्यास्ते नानात्वं नामार्थः १६ ॥

एवंचरव: पुरुषाराजन्नूनाहो एक एवचेतस्य प्रयस्यात्रंरसिद्धांते पुरुषैकमुक्तं संप्रतिब्रह्मविद्यासमाप्तौ मंगलार्थं तदेवानुसंदधानः भोक्ताभोग्यप्रेरितारंचमत्वासं
वंप्रोक्तंत्रिविधंब्रह्ममेतदिति श्रुतेरर्थं भोक्तृभोग्ययोर्ब्रह्माभेदंदर्शयन्ति यन्नुद्ध्यादिना ध्यानप्रकाशकं विज्ञप्तिः तदेवपरं बुध्यते देववेवो द्वयोर्यंवोद्धा जीवः सएव
बोधनीयं स्वरसस्यार्थः यथोक्तं हेदं: अन्येष्वप्यात्मविज्ञाना नात्माकृप्रमात्मत्वमात्मनः अविष्टः स्यात्प्रमीतेवयाप्रहेयापादिवर्जितइति नकेवलं आत्मन एवमतक
त्वादिकं अपितुद्धयत्वादिकमपितत्स्यैवेत्याह घातेत्यादिना १९ किंबहुना यत्प्रधानं अनात्मत्वेन प्रसिद्धं घ्रेयादीनामुपादानं तदपि आत्मैवेत्याह यदिति
यत्प्रधानमितिप्रोक्तं यदपिधातुः आद्यविधानं महत्तत्वं तत्तेनतदपिएवेवत्यन्वयः एतदेवविशिनष्टि निस्संशयं सहीनं। अत एव शास्त्रं तत्त्वनादि। अवयंप्र

यदुक्तं तल्लोकंतत्रस्यधामेव यद्यत्परं बोधनीयः सबोद्धा मंतामंतव्यं प्राशिताप्राशनीयं दृष्टाद्रष्टव्यं रसितारसनीयं १८
घ्राताघ्रेयंस्पर्शितास्पर्शनीयं दृष्टाद्रष्टव्यं श्राविताश्रावणीयं ज्ञाताज्ञेयं सगुणं निर्गुणं च यदं हे प्रोक्तं तात सम्यक् प्रधानं १९
नि संवेत्तद्धाग्वतेत्तचाव्ययं च यदेहं स्तेनधातुराद्यविधानं तद्देहविप्राः प्रवर्तंते निरुद्धं यदेहे लोके वैदिके कर्मसाधु आशीषु
क्तंवद्दितत्स्यैव भाव्यं देवाः सर्वेमुनयः साधुयंतास्तत्प्रागंवशेषं तत्र भागं भजंते अहंब्रह्मा आद्यदेशः प्रजानां तत्स्माज्जात
स्त्वंचमत्तः प्रसूतः २० मंत्रोजगज्जंगमं स्थावरं च सर्वे वेदाः सरहस्याहि पुत्र २१ ॥ ॥ ॥

परिणामिपरिणामिनोहि विकारत्वाद्यत्वनवत्वप्रधानस्ययुक्तं तेन तु अनादृशस्य पुरुषस्य १९ तदेवं परं धाम हत्तेनाभिन्नं विप्राः पूर्णता
नाः प्राप्तराः अनिरुद्धं मंहं कारख्याख्याः अयमेववैदिककर्मणामधिष्ठातृदेव तस्याहतदेहलोकेहति। आशीषुक्तं कोम्यत्तस्यैवं तदाहार्थ्यैनेव
भाव्यंचिंतनीयं अनेनाग्निहोत्रे राव अनिरुद्धात्मा वासुदेवः प्रियतामिति कर्मावसरे नुसंधानं कर्तव्यमित्यर्थः इदमेवसदाचार प्रदर्शनेन तद्रूप
यतिदेवा इत्यादिना २० मंत्र इति मम अवाराध्यो देवतामं त्रैरपि स्थावरजंगमात्मकैर्जीवैराधनीय इत्यर्थः २१ २१

पांचरात्रमार्गमुपसंहरति चतुर्विभक्त इति । चतुर्विभक्तः चतुर्धा वासुदेवादिरूपेण विभक्तः क्रीडतीति शास्त्रप्रणयनभावने चेत्यर्थः । एवं स भगवान्वा सुदेवरूपाभ्यावेशात्तत्त्वबुद्ध्वा स्वरूपाभिन्नेन ज्ञानेन प्रतिबोधितः सन् जीवत्वं परित्यज्य वासुदेव एव भवतीत्यर्थः । ननु चतुर्विभक्त इत्युपसंहारेण नयुक्तः पांचरात्रमतस्यावैदिकस्यात्रोति सांख्ययोगमतेः स्वत्रुपसंहार्यत्वादिति चेत्सत्यं तन्मतावाहिनिवृत्तः तथाहि भगवदाराधनं विना समासपूर्वकं सांख्यमनुतिष्ठन्नपि वैनैकाग्र्यस्याभावान्न तुष्टिं स्वरूपतितत्स्वारूप्यमितितोति अभयमप्यष्टाभवंतीति यथोक्तं श्रीभागवते । श्रेयः सृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनां । ये न्येरविंदाक्ष विमुक्तमा

चतुर्विभक्तः पुरुषः स क्रीडति यथेच्छति एवं स भगवान्स्वेन ज्ञानेन प्रतिबोधितः २२

निनस्त्वय्यस्तभावादविशुद्धबुद्धयः आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोनादृतयुष्मदंघ्रय इति । तथा योगिनामपि प्रत्यक्षत्वाधिगमोंऽतरायाभाव एव न भगवदाराधनं विना भवतीति स्मर्यते ततः प्रत्यक्चेतनाधिगमोंऽतरायाभावश्च । अंतरायास्तु योगेश्वरोक्ताः व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंतरायाः दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुव इति तथा न ते माधव तावकाः क्वचिद्भ्रंश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो इति तस्मात् भक्तोक्तत्वस्य शास्त्रफलस्यांतर्भावोऽस्ति अतस्तयैवोपसंहारो युक्तः २२ २३

परमप्रकृतौ सांख्ययोगावुपसंहरति। एतत्त्वदिति। तथा च ज्ञानेस्य च प्रकरणे तत्त्वात्मकरणोपदिष्टा तामक्तिसत्संगमा भावे मज्जनत इति भावः तथा चोक्तं भगवता भक्त्यामा
मभिजानातीति। ऋजिरपि यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति भक्तेर्हीनाङ्गत्वं दर्शयति तदयं संग्रहः क
र्मभिर्भगवद्भक्तिर्भक्त्या स्वरूपावाप्तिर्ज्ञानं तेन विमुक्तिरेव मोक्षधर्मार्थसंग्रहः २३ इति श्रीनैलकंठीये भारतभावदीपे मोक्षधर्मे सुनारायणीयं समाप्तं च
तुःसप्तत्यधिकशततमोऽध्यायः। यद्यपि सुलभाजनकसंवादे समासेनैव श्रेष्ठं स्थितं तथापि सर्वैः प्रकारैः सुखहेतुत्वेन श्रेष्ठतरः को वाऽऽश्रम इति जिज्ञास

एतत्ते कथितं पुत्र यथावदनुपृच्छतः। सांख्यज्ञानं तथा योगं यथावदनुवर्णितं २३ शांतौ मोक्षधर्मे सुनाराय
णीयं समाप्तं। युधिष्ठिर उवाच। धर्माः पितामहेनोक्ता मोक्षधर्माश्रिताः शुभाः। धर्ममाश्रमिणां श्रेष्ठं वक्तुमर्ह
तित्तभवान् १

म१

याः पृष्टास्ते धर्मा इति आश्रमिणां आश्रितानां मध्ये श्रेष्ठं प्रशस्यतमं धर्मं आश्रमधर्ममेव वक्तुमर्हति भवान् अयं भावः संन्यासः श्रेष्ठोऽपि तद्धर्मो राणामसंततुरनुष्ठे
यत्वात् यथोक्तैतैव सुलभाजनकसंवादे आधिपत्येन तथा तुल्ये निग्रहानुग्रहात्मकैः एतैर्भिर्भिक्षुकास्त्यामुच्यन्ते केनेह नुनेति तत्रारूढपातित्संकल्पोऽसं
भावितः अन्येनान यथानः पततत्पद्धतिमायेन पतपातित्यं नास्ति अथ गंगति सर्वैः सर्वप्रकारैः संभाव्यते तादृश आश्रमः प्रशस्ततरः कः इति प्रष्टुरभिप्राय इति १

सर्वत्राश्रमेषु विहितो धर्मः स्वर्गः स्वर्गसाधनं सत्यस्य फलं अव्याधितं मोक्षाख्यफलसाधनं च भवति। साधने साध्योपचारः बहूनि यज्ञदानादीनि द्वाराणि यस्य २

भीष्म उवाच सर्वत्र विहितो धर्मः स्वर्गः सत्यफलं महत् बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया १ यस्मिन्यस्मिंश्च विषये यो यो याति विनिश्चयं स तमेवाभिजानाति नान्यं भरतसत्तम ३ इमां च त्वं नरव्याघ्र श्रोतुमर्हसि मे कथां पुरा शक्रस्य कथितां नारदेन महर्षिणा ४ महर्षिर्नारदो राजन्सिद्धस्त्रैलोक्यसंमतः पर्येति क्रमशो लोकान्वायुरव्याहतो यथा ५ स कदाचिन्महेष्वास देवराजालयं गतः सत्कृतश्च महेन्द्रेण प्रत्यासन्नगतोऽभवत् ६ तं कृतक्षणमासीनं पर्यपृच्छच्छचीपतिः महर्षे किंचिदाश्चर्यमस्ति दृष्टं त्वयानघ ७ यद्वा त्वमपि विप्रर्षे त्रैलोक्यं सचराचरं जातकौतूहलो नित्यं सिद्धश्चरसि साक्षिवत् ८ न ह्यस्त्यविदितं लोके देवर्षे तव किंचन श्रुतं वाप्यनुभूतं वा दृष्टं वा कथयस्व मे ९ तस्मै राजन्सुरेन्द्राय नारदो वदतां वरः आसीनायोपपन्नाय प्रोक्तवान्विपुलां कथां १० यथा येन च कल्पेन स तस्मै द्विजसत्तमः कथां कथितवान्पृष्टस्तथा त्वमपि मे शृणु ११ शांतौ मोक्षधर्मेषु उंछवृत्युपाख्याने ९ ॥ ॥ ॥ ॥

यस्मिन्निति सर्वेष्वाश्रमेषु स्वर्गो मोक्षश्चास्तीति यत्र यस्य रुचिस्तेन स कृतक्षणो नान्यं धर्मं बहु मन्यत इति श्लोकद्वयार्थः २ एवं सत्यपि न्यायागतधनस्य गृहस्थस्य श्रेष्ठतमत्वं प्रतिपादयितुमुंछवृत्युपाख्यानमारभते इमां च त्वं नरव्याघ्रेत्यादिना। ११ अध्यायः ॥

आसीद्१ सोमान्वये अत्रिर्गोत्रगताच्छान्तमार्गः ६ अध्यायः समुत्पन्नाअत्राभिधानीं बंधनरज्जुः अस्या अभिधानीमाहृत्य इति ब्राह्मणात् ।ते

धा २

भीष्म उवाच आसीत्किल नरश्रेष्ठ महापद्मे पुरोत्तमे गंगाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः १ सौम्यः सोमान्वये वेदे गताध्वा छिन्नसंशयः धर्मनित्यो जितक्रोधो नित्यं तृप्तो जितेंद्रियः २ तपः स्वाध्यायनिरतः सत्यः सज्जनसंमतः न्यायप्राप्तेन वित्तेन स्वेन शीलेन चान्वितः ३ ज्ञातिसंबंधिविपुले सलाध्याश्रमसंमिते कुले महति विख्याते विशिष्टां वृत्तिमास्थितः ४ स पुत्रान्वहुलान्दृष्ट्वा विपुले कर्मणि स्थितः कुलधर्माश्रितो राजन् धर्मचर्यास्थितोऽभवत् ५ ततः स धर्मं वेदोक्तं यथा शास्त्रोक्तमेव च शिष्टाचीर्णं च धर्मं च त्रिविधं चिंत्य चेतसा ६ किं नु मे स्याच्छुभं कृत्वा किं कृतं किं परायणं इत्येवं खिद्यते नित्यं न च यातिविनिश्चयं ७ तस्यैवं खिद्यमानस्य धर्मं परममास्थितः कदाचिदतिथिः प्राप्तो ब्राह्मणः सुसमाहितः ८ स तस्मै सत्क्रियां चक्रे क्रियायुक्तेन हेतुना विश्रांतं सुखमासीनमिदं वचनमब्रवीत् ९ शांतो मोक्षधर्मेषु उद्धृत्य सुपाख्याने ब्राह्मण उवाच समुत्पन्नाभिधानोऽस्मि वाङ्माधुर्येण तेऽनघ मित्रतामभिपन्नस्त्वे किंचिद्वक्ष्यामि तच्छृणु १ गृहस्थधर्मं विप्रेंद्र कृत्वा पुत्रे गतेऽहं धर्मं परमकं कुर्यां को हि मार्गो भवेद्द्विज २ ॥ ॥ ॥ ॥ ॥ ॥

स१

नाभिधानशब्दो बंधनवाची ज्ञानं बंधनरज्ज्वा येः १ २ २ २ २ २ २ २

आत्मानं आस्थाय आलंब्य एकः एव आत्मनः स्थितिं आत्मज्ञानार्थं एकाकी तथास्थानं तु संन्यासं कर्तुं इच्छामि गुणैर्विषयपाशैर्निबद्धः स्वर्गं नेच्छामि। यथा मे
हाग्निर्वृद्धः हारं कामयाना नोष्मोऽर्थ्य दोषेण भोक्तुं नेच्छामि तद्वदित्यर्थः ४ कुतो धर्ममयः प्लवः कुतः कुत्राश्रमे। प्लवं संसारात्तरणसाधनं ५ धर्मेष्व
वापेक्ष्यो हेतुमाह संपु ज्यमानानीति शम्य आलोच्य निर्यात्यमानानीति पीड्यमानानि साल्विकानि देवारीनि धर्मस्य यमस्य ध्वजे केतवोपताका दंडेश प

अहमात्मानमास्थाय एक एवात्मनि स्थितः कं नु कांक्षामि नेच्छामि विद्धः साधारणैर्गुणैः ३ यावद्देहस्तीतं तेमेवयः पुत्र
फलाश्रितं तावदिच्छामि पार्थयेमादातुं पारलौकिकं ४ अस्मिन्हि लोकसंभोरे परंपारमभीप्सतः उत्पन्नो मम तिरियं कु
तो धर्ममयः प्लवः ५ संपु ज्यमानानि निशम्य लोके निर्यात्यमानानि च साल्विकानि दृष्ट्वा तु धर्मध्वजकेतुमालां प्रकी
र्यमाणामुपरि प्रजानां ६ न मे मनो रज्यति भोगकाले दृष्ट्वा यतीन्प्रार्थयतः परत्र तेनातिथे बुद्धिबलाश्रयेण धर्मेण ध
र्मे विनियुंक्ष्व मां त्वं ७ सोऽतिथिर्वचनं तस्य श्रुत्वा धर्माभिभाषिणः प्रोवाच वचनं श्लक्ष्णं प्राज्ञो मधुरया गिरा ८ अति
थिरुवाच अहमप्यत्र मुह्यामि ममाप्येष मनोरथः न च संनिश्चयं यामि बहुद्वारे त्रिविष्टपे ९ ॥ ॥ ॥ ॥

माः रोगाद्यः तेषां मालासंततिः तां दृष्ट्वा मे मनः भोगकाले निरज्यती सुत्तरेण संबंधः ६ तर्हि किं भोगं त्यागे रज्यति नेत्याह यतीन्परिव्राजकानपि परत्र
गृहे वस्त्रान्नादिकं प्रार्थयतः प्रार्थयमानान्दृष्ट्वा च यतिधर्मेपि मे मनो न रज्यति अतः दोलायमानं मां धर्मे नियुंक्ष्व ७ ८ ९ ॥ ॥

१६ अध्यायः उप ३ चक्षुःश्रवाः सर्पः ४ त्रिविधकर्मज्ञानोपास्यात्मके ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

केचिन्मोक्षंप्रशंसंतिकेचिद्यज्ञफलंद्विजाः वानप्रस्थाश्रयाः केचिद्गार्हस्थ्यंकेचिदास्थिताः १० राजधर्माश्रयंकेचित्केचिदा
त्मफलाश्रयंगुरुधर्माश्रयंकेचित्केचिद्वाक्संयमाश्रयं ११ मातरंपितरंकेचित्शुश्रूषंतोदिवंगताः अहिंसयापरेस्वर्गंसत्ये
नचतथापरे १२ आहवेभिमुखाः केचिन्निहतास्त्रिदिवंगताः केचिदुंछव्रतैः सिद्धाः स्वर्गमार्गसमाश्रिताः १३ केचिदध्यय
नेयुक्तावेदव्रतपराः शुभाः बुद्धिमंतोगताः स्वर्गंतुष्टात्मानोजितेंद्रियाः १४ आर्जवेनापरेयुक्तानिहतानार्जवैर्जनैः ऋजवो
नाकपृष्ठेवैशुद्धात्मानः प्रतिष्ठिताः १५ एवंबहुविधैर्लोकेधर्मद्वारैरनावृतैः ममापिमतिराविग्नामेघलेखेववायुना
१६ शांतौमोक्षधर्मेषुउंछवृत्त्युपाख्याने अतिथिरुवाच उपदेशंतुतेविप्रकरिष्येहंयथाक्रमं गुरुणामेयथाख्या
तमर्थतत्वंतुमेशृणु १ यत्रपूर्वाभिसर्गेवैधर्मचक्रंप्रवर्तितं नैमिषेगोमतीतीरेतत्रनागाह्वयंपुरं २ समग्रैस्त्रिदशै
स्तत्रइष्टमासीद्द्विजर्षभ यत्रेंद्रातिक्रमंचक्रेमांधाताराजसत्तमः ३ कृताधिवासोधर्मात्मातत्रचक्षुःश्रवामहान् प
द्मनाभोमहानागः पद्मइत्येवविश्रुतः ४ सवाचाकर्मणाचैवमनसाचद्विजर्षभ प्रसादयतिभूतानित्रिविधेवर्त्मनि
स्थितः ५ ॥ ।

मो०
५६६

चक्षुः चक्षुरादिध्यानेन वस्तुतत्त्वानुसंधानेन ६ अतिक्रम्य उपगम्य ७ आमिकामिकैः आभीप्सितैः ८ निर्मलसलिल वन्निर्मलः निर्मलसलिलः ९॥

Sff

साम्नामेदेन दानेन दंडेनेति चतुर्विधं विषमस्थं समस्थं च चक्षुर्ध्यानेन रक्षति ६ तमतिक्रम्य विधिना प्रभुर्महर्षिसिंकांक्षितं सेत
परमं कंधर्मेन मिथ्या दर्शयिष्यति ७ स हि सर्वातिथिर्नागो बुद्धिमान्यविशारदः गुणैरनुपमैर्युक्तः समस्तैरभिकामिकैः
८ प्रकृत्या नित्यसलिलो नित्यमध्ययनेरतः तपोदमाभ्यां संयुक्तो वृत्तेनानवरेण च ९ यज्ञादानपतिः क्षांतो वृत्ते च परमे
स्थितः सत्यवागनसूयश्च वशी त्ववान्नियतेंद्रियः १० शोभात्मनो ज्ञाव वचनानुकूलो हिताजेवोत्कृष्टकृताकृतज्ञः अत्रैव
रक्तम्भूनहितैर्नियुक्तो गंगाहदो मोभिजनो पपन्नः ११ शांतो मोक्षधर्मेषु उंछवृत्त्युपाख्याने ब्राह्मण उवाच अतिभा
रोद्यतैश्चैव भारावतरणं महत् पराश्वासकरं वाक्यमिदं मे भवतः श्रुतं १ अध्वक्रांतस्य श्रांतस्य यानस्य क्रांतस्य चास
ने तृषितस्य च पानीयं क्षुधार्तस्य च भोजनं २ ईप्सितस्येव संप्राप्तिरन्नस्य समये तिथेः एषितस्यात्मनः कालेवृद्धस्ये
व सुतो यथा ३ मनसा चिंतितस्येव प्रीतिस्निग्धस्य दर्शनं प्रह्लादयति मां वाक्यं भवता यदुदीरितं ४ दत्तचक्षुरि
वाकाशे पश्यामि विमृशामि च प्रज्ञान वचनाद्योपमुपदेशो हि मे कृतः ५ बाढमेवं करिष्यामि यथा मे भाषते भवान् इमां
हि रजनीं साधो निवसस्व मया सह ६

ए०
५६६

अध्यायः अति २ ३ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चतुर्थधर्मःमोक्षधर्मःतेनसंयुक्तं ११ अध्यायः सवनानि १ २ ३ ४ ५ ६ ॥

प्रभातेयास्यतिभवान्पर्याश्वस्तःसुखोषितः असौहिभगवान्सूर्योमंदरश्मिरवाङ्मुखः ७ भीष्मउवाच ततस्तेनकृता
तिथ्यःसोतिथिःशत्रुसूदन उवासकिलतांरात्रिंसहतेनद्विजेनवै ८ चतुर्थधर्मसंयुक्तांतयोःकथयतोस्तदा व्यतीतासानि
शाकृत्स्नासुखेनदिवसोपमा ९ ततःप्रभातसमयेसोतिथिस्तेनपूजितः ब्राह्मणेनयथाशक्त्यास्वकार्यमभिकांक्षता
१० ततःसविप्रःकृतकर्मनिश्चयःकृताभ्यनुज्ञःस्वजनेनधर्मवित् यथोपदिष्टंभुजगेंद्रसंश्रयंजगामकालेसुकृतैकनि
श्चयः ११ शांतौमोक्षधर्मेषुउंछवृत्त्युपाख्याने भीष्मउवाच सवनानिविचित्राणितीर्थानिचसरांसिच अभिगच्छ
न्क्रमेणासकंचिन्मुनिमुपस्थितः १ तंसतेनयथोद्दिष्टंनागंविप्रेणब्राह्मणः पर्यपृच्छद्यथान्यायंसचैववचनंजगामसः
२ सोभिगम्ययथान्यायंनागायतनमर्थवित् प्रोक्तवानहमस्मीतिभोःशब्दालंकृतंवचः ३ ततस्तस्यवचःश्रुत्वारूपिणी
धर्मवत्सला दर्शयामासतंविप्रंनागपत्नीपतिव्रता ४ सातस्मैविधिवत्पूजांचक्रेधर्मपरायणा स्वागतेनागतेकृत्वाकिंक
रोमीतिचाब्रवीत् ५ ब्राह्मणउवाच विश्रांतोभ्यर्चितश्चास्मिभवत्याश्लक्ष्णयागिरा द्रष्टुमिच्छामिभवतिदेवंनागमनुत्तमं
६

२ विवासकरणं प्रवासकारणं १३ अध्यायः। अथ तेन ३ समतिक्रम्य तपेस ४ ५ ।। ।। ।। ।।

एतद्धि परमं कार्यमेतन्मे परमेप्सितं अनेन चार्थेनास्म्यद्य संप्राप्तः पन्नगाश्रयं ७ नागभार्योवाच आर्यः सूर्यरथं वोढुं
गतोसौ मासचारिकः सप्ताष्टभिर्दिनैर्विप्र दर्शयिष्यत्यसंशयं ८ एतद्विदितमार्यस्य विवासकरणं मम भर्तुर्भवतु किं चान्यत्क्रि
पतां तद्ब्रूहि मे ९ ब्राह्मण उवाच अनेन निश्चयेनाहं साध्वि संप्राप्तवानिह प्रतीक्षन्नागमं देवि वत्स्याम्यस्मिन्महावने १०
संप्राप्तस्यैव चाव्यग्रमावेद्योहमिहागतः ममाभिगमनं प्राप्तो वाच्यस्त्ववचनेत्वया ११ अहमप्यत्र वत्स्यामि गोमत्याः पु
लिने शुभे कालं परिमिताहारो यथोक्तं परिपालयन् १२ ततः स विप्रस्तां नागीं समाधाय पुनः पुनः तदेव पुलिनं नद्या
ः प्रत्यपद्यत ब्राह्मणर्षभः १३ शांतौ मोक्षधर्मे उंछवृत्युपाख्याने भीष्म उवाच अथ तेन नरश्रेष्ठ ब्राह्मणेन तपस्विना नि
राहारेण वसता दुःखितास्ते भुजंगमाः १ सर्वे संभूय सहितास्तस्य नागस्य बांधवाः भ्रातरस्तनया भार्या ययुस्तं ब्राह्मणं प्रति
२ ते पश्यन्पुलिने तं वै विविक्ते नियतव्रतं समासीनं निराहारं द्विजं जप्यपरायणं ३ ते सर्वे समतिक्रम्य विप्रमभ्यर्च्य चास
कृत् ऊचुर्वाक्यमसंदिग्धमातिथेयस्य बांधवाः ४ षष्ठो हि दिवसस्तेद्य प्राप्तस्येह तपोधन न चाभिभाषसे किंचिदाहारंध
र्मवत्सल ५

अस्मानभिगतस्त्वासिवयंचलाभमुपस्थिताः कार्यंचातिथ्यमस्माभिर्वयंसर्वेकुटुम्बिनः ६ मूलंफलंवापर्णंवापयोवाद्वि-
जसत्तम आहारहेतोरन्नंवाभोक्तुमर्हसिब्राह्मण ७ सक्ताहारेणभवतावनेनिवसतालया बालवृद्धमिदंसर्वंपीड्यते
धर्मसंकरात् ८ नहिनोब्रह्महाकश्चित्तजातोपघ्नोपिवा श्वींशीवाकुलेस्मिन्नेहवनातिथिबंधुषु ९ ब्राह्मणउ
वाच उपदेशेनयुष्माकमाहारोयंकृतोमया द्विरूनंदशरात्रंवैनागस्यागमनंप्रति १० यद्यष्टरात्रेऽतिक्रान्तेनागमिष्य
तिपन्नगः तदाहारंकरिष्यामितन्निमित्तमिदंव्रतं ११ कर्तव्योनचसंतापोगम्यतांचयथागतं तन्निमित्तमिदंस
र्वंनैतन्मेत्तुमिहार्हथ १२ तेनतेनसमनुज्ञाताब्राह्मणेनभुजंगमाः स्वमेववभवनंजग्मुरकृतार्थानरर्षभ १३ शां
न्तोमोक्षधर्मेषुउञ्छवृत्त्युपाख्याने भीष्मउवाच अथकालेबहुतिथेपूर्णेप्राप्तोभुजंगमः दत्ताभ्यनुज्ञः स्ववेश्मकृ
तकर्माविवस्वता १ तंभार्याप्युपचक्रामपादशौचादिभिर्गुणैः उपसन्नांचतांसाध्वींपन्नगः पर्यपृच्छत २ अथ
त्वमसिकल्याणिदेवतातिथिपूजने पूर्वमुक्तेनविधिनायुक्तायुक्तेनतत्समं ३ नखल्वस्यकृतार्थेनस्त्रीबुध्यामा
र्दवीकृता मद्वियोगेनसुश्रोणिविमुक्ताधर्मसेतुना ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मो०
५७१

५७१

१२ मेमांप्रतिख्यातिकथयति [illegible] १३ वर्त्तयन्नावर्त्तयन्ब्रह्मवेदं १४ दर्शनश्रवः हेसर्पे १६ अध्यायः ॥ ॥ ॥ ॥ ॥

नागभार्योवाच शिष्याणांगुरुशुश्रूषाविप्राणांवेदधारणं भृत्यानांस्वामिवचनंराज्ञोलोकानुपालनं ५ सर्वभूत
परित्राणंक्षत्रधर्मइहोच्यते वैश्यानांयज्ञसंवृत्तिरातिथेयसमन्विता ६ विप्रक्षत्रियवैश्यानांशुश्रूषाशूद्रकर्मतत्
गृहस्थधर्मोनागेंद्रसर्वभूतहितैषिता ७ नियताहारतानित्यंव्रतचर्यायथाक्रमं धर्मोहिधर्मसंबंधादिंद्रियाणांविशे
षतः ८ अहंकस्यकुतोवापिकः कोमेहभवेदितिप्रयोजनमतिर्नित्यमेवंमोक्षाश्रमेभवेत् ९ पतिव्रतात्वंभार्यायाः
परमोधर्मउच्यते तवोपदेशान्नागेंद्रतच्चतत्वेनवेद्मिवै १० साहंधर्मंविजानंतीधर्मनित्येत्वयिस्थिते सत्पथंकथमु
त्सृज्ययास्यामिविषमंपथं ११ देवतानांमहाभागधर्मचर्यानहीयते अतिथीनांचसत्कारेनित्ययुक्तास्म्यतंद्रिता
१२ सप्ताष्टदिवसास्त्वद्यविप्रस्येहागतस्यवै सचकार्यंनमेख्यातिदर्शनंतवकांक्षति १३ गोमत्यास्त्वेषपुलिनेत्वद्द
र्शनसमुत्सुकः आसीनोवर्त्तयन्ब्रह्मब्राह्मणः शंसितव्रतः १४ अहंत्वनेननागेंद्रसत्यपूर्वंसमाहिता प्रस्थाप्योमत्स
काशंसः संप्राप्तोभुजगोत्तमः १५ एतच्छ्रुत्वामहाप्राज्ञतत्रगंतुंत्वमर्हसि दातुमर्हसिवातस्यदर्शनंदर्शनश्रवः १६
शांतौमोक्षधर्मेभुजंगेंद्रवृत्तुपाख्याने ॥ ॥

शान०
५७१

अथ २ सौरभेयाः दिव्यगंधवहाः ५ स्तोककः चातकः ६ हित्वा विना प्रतिपाल्य येन प्राप्नुयात् त्वद्दर्शनं विनास्य कोपि विघ्नो मा भूदित्यर्थः अभिजने सद्वंशे

शु१

नाग उवाच अथ ब्राह्मणरूपेण कं त्वं समनुपश्यसि मानुषं केवलं विप्रे देवं वाथ शुचिस्मिते १ को हि मां मानुषः शक्तो द्रष्टुकामो यशस्विनि संदर्शनरुचिर्वाक्यमाज्ञापूर्वं वदिष्यति २ सुरासुरगणानां च देवर्षीणां च भाविनि ननु नागा महावीर्याः सौरभेयास्तरस्विनः ३ वंदनीयाश्च वरदा वयमप्यनुयायिनः मनुष्याणां विशेषेण नाविशन्तीति मे मतिः ४ नागभार्योवाच आर्जवेनविजानामि नासौ देवोऽनिलाशन एकं त्वस्मिन्विजानामि भक्तिमानतिरोषण ५ स हि कार्यांतराकांक्षी जलेप्सुः स्तोकको यथा वर्षं वर्षप्रियः पक्षी दर्शनं तव कांक्षति ६ हित्वा त्वद्दर्शनं किंचिद्विघ्नं न प्रतिपालयेत् तुल्येप्यभिजने जातो न कश्चित्पर्युपासते ७ तद्रोषं सहजं त्यक्त्वा त्वमेनं द्रष्टुमर्हसि आशाछेदेन तस्याद्य नात्मानं दग्धुमर्हसि ८ आशया त्वभिपन्नानामकृत्वाश्रुप्रमार्जनं राजा वा राजपुत्रो वा भ्रूणहत्येव युज्यते ९ मौनेज्ज्ञानफलावाप्तिर्दानेन च यशो महत् वाग्मित्वं सत्यवाक्येन परत्र च महीयते १० भूप्रदानेन च गतिं लभत्याश्रमसंमितां न्यायस्यार्थस्य संप्राप्तिं कृत्वापि फलमुपाश्नुते ११ अभिप्रेतामसंक्लिष्टां कृत्वा चात्महितां क्रियां न याति निरयं कश्चिदिति धर्मविदो विदुः १२

पु४.

जातः तुल्येपि स्वतो नागोपि कश्चित्त्वं न पर्युपासते न परित्यज्य न आस्ते। अतिथिं त्वां न त्यक्त्वा त्वत्कुले आस्ते इत्यर्थः ७ सहजं स्वपक्षजातिजं ८ भ्रूणहत्येव
भ्रूणहत्यैव १० ।। १२

नागउवाच अभिमानेनमानोमेजातिदोषेणवैमहान् रोषःसंकल्पजःसाध्विदग्धोवाचाग्निनात्वया १३ नचरोषादहं
साध्वीपश्येयमधिकंतमः तस्यवक्तव्यतांयांतिविशेषेणभुजंगमाः १४ रोषस्यहिवशंगत्वादशग्रीवःप्रतापवान् तथाश
क्रपतिस्पर्द्धीहतोरामेणसंयुगे १५ अंतःपुरगतंवत्संश्रुत्वारामेणनिर्हृतं धर्षणाद्रोषसंविग्नाःकार्त्तवीर्यसुताहताः १६ जा
मदग्न्येनरामेणसहस्रनयनोपमः संयुगेनिहतोरोषात्कार्त्तवीर्योमहाबलः १७ तदेषतपसांशत्रुःश्रेयसांविनिपात
नकःनिगृहीतोमयारोषःश्रुत्वैवंवचनंतव १८ आत्मानंचविशेषेणप्रशंसाम्यनपायिनी यस्यमेत्वंविशालाक्षिभा
र्यागुणसमन्विता १९ एषतत्रैवगच्छामियत्रतिष्ठत्यसौद्विजः सर्वथाचोक्तवाक्यःसकृतार्थःप्रयास्यति २० शांती
मोक्षधर्मेषुउंछवृत्त्युपाख्याने भीष्मउवाच सपन्नगपतिस्तत्रप्रययौब्राह्मणंप्रति तमेवमनसाध्यायन्कार्यवत्तांविचा
रयन् १ तमतिक्रम्यनागेंद्रोमतिमान्सनरेश्वर प्रोवाचमधुरंवाक्यंप्रकृत्याधर्मवत्सलः २ भोभोक्षाम्यभिभाषेत्वां
नरोषंकर्त्तुमर्हसि इहत्वमभिसंप्राप्तःकस्यार्थेकिंप्रयोजनं ३ आभिमुख्यादभि॰क्रम्यस्नेहात्पृच्छामितेद्विज विविक्तेगो
मतीतीरेकंवात्वंपर्युपाससे ४

करणले

धर्मारण्यंप्रमुनिंमांविद्धिपद्मनाभंनागंद्रष्टुमागतं ९ अक्लेशशंनिवारकं १२ अनर्थज्ञः अर्थोनाभिज्ञः १३ आत्मानंत्वंस्तंआत्मनोजीवस्यगतिंविश्रांतिस्था

ब्राह्मणउवाच धर्मारण्यंहिमांविद्धिनागंद्रष्टुमिहागतं पद्मनाभंद्विजश्रेष्ठंतत्रमेकार्यमाहितं ५ तस्यचाहमसान्निध्यं
श्रुतवानस्मितंगतं स्वजनंतंप्रतीक्षामिपर्जन्यमिवकर्षकः ६ तस्यचाक्लेशकरणंस्वस्तिकारसमाहितं आवर्तयामि
तद्ब्रह्मयोगयुक्तोनिरामयः ७ नागउवाच अहोकल्याणवृत्तस्त्वंसाधुसज्जनवत्सलः अवाच्यस्त्वंमहाभागपरंस्नेहे
नपश्यसि ८ अहंसनागोविप्रर्षेयथामांविंदतेभवान् आज्ञापययथास्वैरंकिंकरोमिप्रियंतव ९ भवंतंस्वजनादस्मि
संप्राप्तंश्रुतवानहं अतस्त्वांस्वयमेवाहंद्रष्टुमभ्यागतोद्विज १० संप्राप्तश्चभवानद्यकृतार्थःप्रतियास्यति विस्र
ब्धोमांद्विजश्रेष्ठविषयेयोक्तुमर्हसि ११ वयंहिभवतासर्वेगुणक्रीताविशेषतः यस्त्वमात्महितंत्यक्त्वामामेवेहानुरुध्य
से १२ ब्राह्मणउवाच आगतोहंमहाभागतवदर्शनलालसः कंचिदर्थमनर्थज्ञःप्रष्टुकामोभुजंगम १३ अहमा
त्मानमात्मस्थोमार्गमाणोत्मनोगतिं वासार्थिनंमहाप्रज्ञचलचित्तमुपास्महे १४ प्रकाशितस्त्वंस्वगुणैर्यशोगर्भग
भस्तिभिः शशांककरसंस्पर्शैर्हृद्यैरात्मप्रकाशितैः १५ ॥ ॥ ॥ ॥ ॥ ॥

तंआत्मस्थोविषयेभ्योव्यावृत्तः एवंविधोपिचलच्चित्तंवासार्थिनंगृहासक्तमपिमहाप्राज्ञंगृहेदोषदर्शिनंउपास्महेनतथाचनरक्तोनापिविरक्तोस्मीत्यर्थः १४
१५

५७३

१६ अध्यायः विवस्व ४ तवांतपुरोवातादिरूपेणविभज्य शिरामंनीला ५ महात्मांऽतर्यामी ६ पादरश्मयःपादोऽवयवःनीलमेघरूपेणाप्ययमे

तस्मिन्मेप्रश्नमुक्तं तच्छिंधिलमनिलाशन पश्चात्कार्यंवदिष्यामिश्रोतुमर्हतितन्भवान् १६ शांतोमोक्षधर्मेषुउंछवृ-
त्त्युपाख्याने ब्राह्मणउवाच विवस्वतोगच्छतिपर्ययेणवोढुंभवांस्तंरथमेकचक्रं आश्चर्यभूतंयदितत्रकिंचित्
दृष्टंत्वयाशंसितुमर्हसित्वं १ नागउवाच आश्चर्याणामनेकानांप्रतिष्ठाभगवान्रविः यतोभूताःप्रवर्त्तंतेसर्वे
त्रैलोक्यसंमताः २ यस्यरश्मिसहस्रेषुशाखास्विवविहंगमाः वसंत्याश्रित्यमुनयः संसिद्धादैवतैःसह ३ यतोवा
युर्विनिःसृत्यसूर्यरश्म्याश्रितोमहान् विजृंभत्यंबरेतत्रकिमाश्चर्यमतःपरं ४ विभज्यतंतुविप्रर्षेप्रजानांहितका
म्यया तोयंसृजतिवर्षासुकिमाश्चर्यमतःपरं ५ यस्यमंडलमध्यस्थोमहात्मापरमत्विषा दीप्तःसमीक्षतेलो
कान्किमाश्चर्यमतःपरं ६ शुक्रोनामासितःपादोयस्यवारिधरोंबरे तोयंसृजतिवर्षासुकिमाश्चर्यम
तःपरं ७ योष्टमासांस्तुशुचिनाकिरणेनोक्षितंपयः प्रत्यादत्तेपुनःकालेकिमाश्चर्यमतःपरं ८ यस्यते
जोविशेषेषुस्वयमात्माप्रतिष्ठितः यतोबीजंमहीचेयंधार्यतेसचराचरं ९ यत्रदेवोमहाबाहुःशाश्वतःपुरुषोत्त
मः अनादिनिधनोविप्रकिमाश्चर्यमतःपरं १०

वर्षणीत्यर्थः २ यतःसूर्यात्वीजंऔषधं ९ १० १०

११ दृष्ट्वांयुगंपफलंसर्गं। प्रत्यादित्यप्रतीकाशं आदित्यांतरसुस्नेजसंकमूतं। समदृश्यतदृष्टं १२ सद्दृतितनदेवमूतंपरांमुनदृश्यते १ अध्यायः अनिलसंतोवः

आश्चर्याणामिवाश्चर्यमिदमेकंतुमेशृणु विमलेयन्मयादृष्टमंबरेसूर्यसंश्रयात् ११ पुरामध्याह्नसमयेलोकांस्तपतिभा
स्करे प्रत्यादित्यप्रतीकाशः सर्वतः समदृश्यत १२ सलोकांस्तेजसासर्वान्स्वभासानिर्विभासयन् आदित्याभिमुखोभ्येतिग
गनंपाटयन्निव १३ हुताहुतिरिवज्योतिर्व्याप्यतेजोमरीचिभिः अनिर्देश्येनरूपेणद्वितीयइवभास्करः १४ तस्याभिगमन
प्राप्तौहस्तौदत्तोविवस्वता तेनापिदक्षिणोहस्तोदत्तः प्रत्यर्चनार्थिना १५ ततोभित्त्वैवगगनंप्रविष्टोरश्मिमंडलं
एकीभूतंचतत्तेजः क्षणेनादित्यतांगतं १६ तत्रनः संशयोजातस्तयोस्तेजः समागमे अनयोः कोभवेत्सूर्योरथस्था
योयमागतः १७ तेवयंजातसंदेहाः पर्यपृच्छामहेरविं कएषदिवमाक्रम्यगतः सूर्यइवापरः १८ इतिश्रीमहाभारते।
शांतिपर्वणिमोक्षधर्मेउंछवृत्त्युपाख्याने सूर्यउवाच नैषदेवोनिलसखोनासुरोनचपन्नगः उंछवृत्तिव्रतेसिद्धोमुनिरे
षदिवंगतः १ एषमूलफलाहारः शीर्णपर्णाशनस्तथा अप्भक्षोवायुभक्षश्चआसीद्विप्रः समाहितः २ भवा
स्त्वाननविप्रेणसंहिताभिरभिष्टुतः स्वर्गद्वारेकृतोद्योगोयेनासौत्रिदिवंगतः ३ असंगनिरनाकांक्षीनित्यमुंछशिलाशनः सर्वभूतहितेयुक्तएषविप्रोभुजंगमाः ४

इः २ ३ ४ ॥ ॥ ॥ ६

१ अध्यायः। आश्चर्यं २ उक्तानुक्तेकृतेकार्येश्रेष्ठेपिमेयवचात्सत्याख्नातेसति ५ अहंत्वमिभक्तिमानितिशेषः। मयिमित्रेसतिकाचिंतानकार्याइस

नहिदेवानगंधर्वानासुरानचपन्नगाः प्रभवंतीहभूतानांप्राप्तानामुत्तमांगतिं एतदेवंविधंदृष्टमाश्चर्यंतत्रमेद्विज
६ संसिद्धोमानुषः कामंयोसौसिद्धगतिंगतः सूर्येणसहितोब्रह्मन्पृथिवींपरिवर्तते ७ इतिश्रीमहाभारतेशांति
पर्वणिमोक्षधर्मेषुउंछवृत्युपाख्याने ब्राह्मणउवाच आश्चर्यमेनात्रसंदेहः सुप्रीतोस्मिभुजंगम अन्वर्थो
पगतैर्वाक्यैः पंथानंचास्मिदर्शितः १ स्वस्तितेस्तुगमिष्यामिसाधोभुजगसत्तम स्मरणीयोस्मिभवतासंप्रेषणा
नियोजनैः २ नागउवाच अनुक्त्वाहृद्गतंकार्यंक्वेदानींप्रस्थितोभवान् उच्यतांद्विजयत्कार्यंयदर्थंत्वमिहागतः
३ उक्तानुक्तेकृतेकार्येमामामंत्र्यद्विजर्षभ मयाप्रत्यनुज्ञातस्ततोयास्यसिसुव्रत ४ नहिमांकेवलंदृष्ट्वात्यक्त्वा
प्रणयवानिह गंतुमर्हसिविप्रर्षेवृक्षमूलगतोयथा ५ त्वयिचाहंद्विजश्रेष्ठभवान्मयिनसंशयः लोकोयंभवतः
सर्वः काचिंतामयिपन्नग ६ ब्राह्मणउवाच एवमेतन्महाप्राज्ञविदितात्मन्भुजंगम नातिरिक्तास्त्वयादेवाः
सर्वथैवयथायथं ७

सएवत्वमितियत्रेरेवोमहाबाहुः शाश्वतः पुरुषोत्तमः अनादिनिधनोविष्णुः किमाश्चर्यमतः परमितियः पूर्वंत्वाआदिसंसारनिर्वर्तनौपुरुषोत्तमउक्तः सएवत्वंसए
वचाहंसयाख्यायपुरुषेभयस्त्वासावादित्येसएकइतिव्दृपादित्यपुरुषयोरभेदावगमात्कारणात्मनाः भेदेपिकार्यात्मना आवयोर्भेदोभविष्यतीत्यसा
शंक्याहयोहंसएवभगवानपितुशब्दोवधारणे। एतेनभेदाभेदपक्षोनिरस्तः भूतानिविपदादीनिसर्वेयत्रगताः प्रलयकालेनदेवब्रह्मस्मरमर्याः

यएवत्वंसएवाहंयोहंसत्वंभवानपि अहंभवांश्चभूतानिसर्वेयत्रगताः सदा ८ आसीत्तुमेभोगपतेसंशयः पुराण
तेचये सोहमुञ्छव्रतेसाधोचरिष्याम्यर्थसाधनं ९ एषमेनिश्चयः साधोकृतंकारणमुत्तम आमंत्रयामिभद्रंतेकृता
र्थोस्मिभुजंगम १० इतिश्रीमहाभारतेशांतिपर्वणिमोक्षधर्मेषुउञ्छवृत्त्युपाख्याने भीष्मउवाच सचामंत्र्योरग
श्रेष्ठंब्राह्मणःकृतनिश्चयः दीक्षाकांक्षीततोराजंश्च्यवनंभार्गवंश्रितः १ ॥ ॥ ॥ ॥ ॥ ॥

एतच्चउञ्छवृत्तेःसूर्यप्रवेशमात्रश्रवणेनैवज्ञातंनिश्चितंचवेदवाक्यादितिभावः ८ भोगपतेभोगोअहिकुंडलंतस्यपतेभोगिपतेइतिस्वच्छः
पाठः १० अध्यायः १८७ दीक्षांक्षौरप्रायश्चित्तादिपूर्वंउञ्छव्रतस्वीकारलक्षणी १ १ ॥ ॥ ॥

तद्देनानुप्रबंधेनयद्यपिसर्वेषामाश्रमेषुमोक्षोस्तितथापिगार्हस्थ्यमेवस्वाध्याययज्ञनयमनियमशमदमादिगु येनसाश्रमांतरधर्माणांमाश्रयइतितेनै
वकालेनसर्वेधर्माःसमंवर्त्तीतितेनैवायंसंहारःकृतः यथाछांदोग्येपत्रसमसंस्था ३ मनत्वमेनीतिमान्मासोत्कर्षप्रतिपादकेनाकेसत्यपिश्वाचार्य
कुलाद्वेदमधीत्ययथाविधानंगुरोःकर्मातिशेषेणाभिसमाहृत्यकुटुंबेशुचौदेशेस्वाध्यायमधीयानोधार्मिकान्विदधदात्मनिसर्वेंद्रियाणिसंप्रतिष्ठा
प्याहिंसन्सर्वाणिभूतान्यन्यत्रतीर्थेभ्यः सखल्वेवंवर्तयन्यावदायुषंब्रह्मलोकमभिसंपद्यते [illegible] नचपुनरावर्त्तते इतिगृहिणोवा

सेतेनकृतसंस्कारोधर्ममेवाभिनिस्थितवान् तथैवचकथामेतांराजन्कथितवांस्तदा १ भार्गवेणापिराजेंद्रजन
कस्यनिवेशने कथैषाकथितापुरा पानारदायमहात्मने २ नारदेनापिराजेंद्रदेवेंद्रस्यनिवेशने कथिताभरत
श्रेष्ठपृष्टेनाक्लिष्टकर्मणा ४ देवराजेनचपुराकथितैषाकथाशुभा समस्तेभ्यः प्रशांतेभ्योविप्रेभ्योवसु
धाधिप ५ यदाचममरामेणायुद्धमासीत्सुदारुणं वसुभिस्तदाराजन्कथेयंकथितामम ६ पृच्छमानाय
तत्वेनमयाचैवोक्तमातव कथेयंकथितापुराणाधर्म्याधर्मभृतांवर ७ ॥ ॥ ॥ ॥ ॥

यसंहारःकृतः तैश्चकृत्स्नाश्रमधर्मसमासः यथोक्तंभगवताबादरायणेनकृत्स्नभावात्तुगृहिणोपसंहारइति। तथेहापिसुलभाजनसंवा
देसमासस्याधिकोस्तिहृपितउच्छहस्तुयास्थानेनगृहिणोवोपसंहारःप्रदर्शितः अतिशेषेणानिःशेषेणाकृत्स्नेस्मध्याहारः धार्मिकान्पुण्यावहा
न्धर्मान्सर्वेंद्रियाणिप्रतिष्ठाप्यस्वेनेनयोगउक्तः तीर्थेभ्यः यतेभ्यइतिश्रुतिपदानामर्थः यत्रकुत्राप्याश्रमेजितेंद्रियोध्याननिष्ठोमुच्यतइत्यु
क्तंभवति। तथैवचकथामेतामित्यादिनावंशउक्तः ७

परकृतिसरूपेणार्थवादेननिष्कामस्वकर्मैर्वर्जितेंद्रियेणाकर्तव्यंमेरेवर्गाचरमित्याशयेनोद्रेनआसीदिति ८ उपसंहरतिसचेति। यमाः अहिंसादयः नियमा
: शौचादयः वनांतरं वनमध्यंप्रविष्टः उंछः कणशस्त्वादानंकणिशाद्यर्जनंशिलं। परिगणितंपरिमितंउंछशिलाभ्यांजितमन्नमन्नंफणिपस्तुकांउंछहेते
नेतिभावेतिशेषः ९ वेदांतलक्षणार्थंकतुविधिविहितोतीर्थनारायणार्येनकेंधीरेशमिअन्नंफणिपतिमणितैपालगंगाधरार्येवेदेसांगे पितरंभि

धर्म १ ३४

यदयंपरमौपन्मांपृच्छसिभारत आसीद्द्वीरोदधनाकांक्षीधर्मार्थकरणेनृप ८ सचकिलकृतनिश्चयोद्विजोभुजगपति
प्रतिदेशितात्मकृत्यः यमनियमसहोवनांतरंपरिगणितोंछशिलाशनप्रविष्टः॥ ९॥ इतिश्रीमहाभारतेशतसाह॰
स्यांसंहितायांवैयासिक्यांशांतिपर्वणिमोक्षधर्मेषुउंछवृत्त्युपाख्यानंसमाप्तमिति समाप्तंचेदंशांति
पर्व॥ शुभमस्तु॥ अस्यानुशासनिकंपर्वभविष्यति तस्यायमाद्यश्लोकः युधिष्ठिरउवाच शमोब
हुविधाकारः सूक्ष्मउक्तः पितामह नचमेहृदयेशांतिरस्तिश्रुत्वेदमीदृशं संवत् १८३० समएनामवैशाख
माशेकृष्णपक्षेचतुर्दस्यांयभौमवासरेइदंपुस्तकसमाप्तः लीखितंद्वीसणकायस्थोदेव्यारामलीषामममदोषनदीयेत

वमथापितंरदृक्षिणामूर्तिमुपास्तेऽशैनिचितामणिंयः शरणमुपगतोस्मिग्निगोपालदेवं १ आकरोन्मोक्षधर्मान्सनीलकंठः समासतः अनेनप्रीयतां
देवोगिरिजापतिरव्ययः २ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्यकृतौभारतभा
वदीपेमोक्षधर्मार्थप्रकाशः समाप्तिमगमत्॥

ॐ

शांतपर्व पत्रे ५२६ श्री ३ मनसाराम ज्ञात

वैरागी ओतम अजीका श्री वजीरी मल जमे के

शांतिपर्व मोक्षधर्म
५८६

संख्या पत्रा ५२६





